# .. Mahasubhashitasangraha ..

# ॥ महासुभाषितसंग्रह ॥

ENMSS@0001@1अंशवस्तव निशाकर नूनं कल्पितास्तरुणकेतकखण्डैः ।
ENMSS@0001@2येन पाण्डुरतरद्युतयो नः कण्टकैरिव तुदन्ति शरीरम् ॥ ०००१॥
ENMSS@0002@1अंशुकं हृतवता तनुबाहु- स्वस्तिकापिहितमुग्धकुचाग्रा ।
ENMSS@0002@2भिन्नशङ्खवलयं परिणेत्रा पर्यरम्भि
रभसादचिरोढा ॥ ०००२॥
ENMSS@0003@1अंशुकमिव शीतभयात् संस्त्यानत्वच्छलेन हिमधवलम् ।
ENMSS@0003@2अम्भोभिरपि गृहीतं पश्यत शिशिरस्य माहात्म्यम् ॥ ०००३॥
ENMSS@0004@1अंशुकेन जघनं तिरोदधे क चुकेन च कुचौ मृगीदृशाम् ।
ENMSS@0004@2पीयमानमनिशं प्रियेक्षणैः क्षामतामिव जगाम मध्यमम् ॥ ०००४॥
ENMSS@0005@1अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ।
ENMSS@0005@2क्षीबतामिव गतः क्षितिमेष्यंल्लोहितं
वपुरुवाह पतङ्गः ॥ ०००५॥
ENMSS@0006@1अंशुमानपि विपाकपिशङ्गं रूपमाप परितो दिवसान्ते ।
ENMSS@0006@2कः परोऽत्र न विकारमुपेयाद् ध्वान्तभीमपरिवेल्लितमूर्तिः ॥ ०००६॥
ENMSS@0007@1अंशो दण्डसमः पूर्वः प्रयाससम उत्तमः ।
ENMSS@0007@2विलोपो वा यथालाभं प्रक्षेपसम एव वा ॥ ०००७॥
ENMSS@0008@1अंशोऽपि दुष्टदिष्टानां परेषां स्याद् विनाशकृत् ।
ENMSS@0008@2बाललेशोऽपि व्याघ्राणां यत् स्याज्जीवितहानये ॥ ०००८॥
ENMSS@0009@1अंसाववष्टब्धनता समाधिः शिरोधराया रहितप्रयासः ।
ENMSS@0009@2धृता विकारांस्त्यजता मुखेन प्रसादलक्ष्मीः शशलाञ्छनस्य ॥ ०००९॥
ENMSS@0010@1अंसालम्बितवामकुण्डलधरं मन्दोन्नतभ्रूलतं किंचित्
कुञ्चितकोमलाधरपुटं साचिप्रसारीक्षणम् ।
ENMSS@0010@2अलोलाङ्गुलिपल्लवैर्मुरलिकामापूरयन्तं मुदा मूले
कल्पतरोस्त्रिभङ्गललितं ध्याये जगन्मोहनम् ॥ ००१०॥
ENMSS@0011@1अंसासक्तकपोलवंशवदनव्यासक्तबिम्बाधर-
द्वन्द्वोदीरितमन्दमन्दपवनप्रारब्धमुग्धध्वनिः ।
ENMSS@0011@2ईषद्वक्रिमलोलहारनिकरः

प्रत्येकरोकानन-न्यश्चच्चश्चदुदश्चदङ्गुलिचयस्त्वां पातु

राधाधवः ॥ ००११॥

ENMSS@0012@1अंसेन कर्णं चिबुकेन वक्षः करद्वयेनाक्षि तिरोदधानाम् ।

ENMSS@0012@2संताडयामास हरिः समेत्य चकोरनेत्रां चलुकोदकेन ॥ ००१२॥

ENMSS@0013@1अंहः संहरदखिलं सकृदुदयादेव सकललोकस्य ।

ENMSS@0013@2तरणिरिव तिमिरजलधिं जयति जगन्मङ्गलं हरेर्नाम ॥ ००१३॥

ENMSS@0014@1अकण्टका पुष्पमही वेशयोषिदमातृका ।

ENMSS@0014@2मन्त्रिहीना च राज्यश्रीर्भुज्यते विटचेटकैः ॥ ००१४॥

ENMSS@0015@1अकण्ठस्य कण्ठे कथं पुष्पमाला विना नासिकायाः कथं धूपगन्धः
।

ENMSS@0015@2अकर्णस्य कर्णे कथं गीतनृत्यम् अपादस्य पादे कथं मे प्रणामः ॥
००१५॥

ENMSS@0016@1अकपर्दकस्य विफलं जनुरिति जानीमहे महेशोऽपि ।

ENMSS@0016@2शिरसि कृतेन कपर्दी भवति जटाजूटकेनापि ॥ ००१६॥

ENMSS@0017@1अकरवमधिमौलि पादपद्मावपनय मानिनि मानितामकाण्डे ।

ENMSS@0017@2यदि पररमणीं गतस्तदाथ स्तनयुगलिङ्गयुगं स्प्रशामि तन्वि ॥
००१७॥

ENMSS@0018@1अकरुण कातरमनसा दर्शितनीरा निरन्तरालेयम् ।

ENMSS@0018@2त्वामनुधावति विमुखं गङ्गेव भगीरथं दृष्टिः ॥ ००१८॥

ENMSS@0019@1अकरुणत्वमकारणविग्रहः परधनापहृतिः परयोषितः ।

ENMSS@0019@2स्वजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिधमिदं हि दुरात्मनाम् ॥ ००१९॥

ENMSS@0020@1अकरुण मृषाभाशासिन्धो विमुञ्च ममाञ्चलं तव

परिचितः स्नेहः सम्यङ्गयेत्यभिधायिनीम् ।

ENMSS@0020@2अविरलगलद्बाष्पां तन्वीं निरस्तविभूषणां क इह

भवतीं भद्रे निद्रे विना विनिवेदयेत् ॥ ००२०॥

ENMSS@0021@1अकरोः किमु नेत्रशोणिमानं किमकार्षीः करपल्लवावरोधम् ।

ENMSS@0021@2कलहं किमधाः क्रुधा रसज्ञे हितमर्थं न विदन्ति दैवदष्टाः ॥ ००२१॥

ENMSS@0022@1अकर्णमकरोच्छेषं विधिर्ब्रह्माण्डभङ्गधीः ।

ENMSS@0022@2श्रुत्वा रामकथां रम्यां शिरः कस्य न कम्पते ॥ ००२२॥

ENMSS@0023@1अकर्णधाराशुगसंभृताङ्गतां गतैररित्रेण विनास्य वैरिभिः ।

ENMSS@0023@2विधाय यावत्तरणेर्भिदामहो निमज्य तीर्णः समरे भवार्णवः ॥ ००२३॥

ENMSS@0024@1अकर्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ।

ENMSS@0024@2कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि ॥ ००२४॥
ENMSS@0025@1अकर्तव्येष्वसाध्वीव तृष्णा प्रेरयते जनम् ।
ENMSS@0025@2तमेव सर्वपापेभ्यो लज्जा मातेव रक्षति ॥ ००२५॥
ENMSS@0026@1अकर्मणां वै भूतानां वृत्तिः स्यान् न हि काचन ।
ENMSS@0026@2तदेवाभिप्रपद्येत न विहन्यात् कथंचन ॥ ००२६॥
ENMSS@0027@1अकर्मशीलं च महाशनं च लोकद्विष्टं बहुमायं नृशंसम् ।
ENMSS@0027@2अदेशकालज्ञमनिष्टवेषम् एतान् गृहे न प्रतिवासयीत ॥ ००२७॥
ENMSS@0028@1अकलङ्कचन्द्रकलया कलिता सा भाति वारुणी तरुणी ।
ENMSS@0028@2भालस्थलीव शम्भोः संध्याध्यानोपविष्टस्य ॥ ००२८॥
ENMSS@0029@1अकलङ्कान्तिके कान्तिः केति कालङ्कलङ्किनः ।
ENMSS@0029@2अरुणे तरुणे मस्या धावं कामयते शशी ॥ ००२९॥
ENMSS@0030@1अकलङ्का पुलकवती सस्नेहा मुक्तकञ्चुकी श्यामा ।
ENMSS@0030@2पततु तवोरसि दयिता खङ्गलता वैरिणः शिरसि ॥ ००३०॥
ENMSS@0031@1अकलङ्को दृढः शुद्धः परिवारी गुणान्वितः ।
ENMSS@0031@2सद्वंशो हृदयग्राही खङ्गः सुसदृशस्तव ॥ ००३१॥
ENMSS@0032@1अकलितनिजपररूपः स्वकमपि दोषं परस्थितं वेत्ति ।
ENMSS@0032@2नावास्थितस्तटस्थान् अचलानपि विचलितान् मनुते ॥ ००३२॥
ENMSS@0033@1अकलियुगमखर्वमत्र हृद्यं व्यचरदपापघनो यतः कुटुम्बी ।
ENMSS@0033@2मम रुचिरिह लक्ष्मणाग्रजेन प्रभवति शर्मदशास्यमर्दन ॥ ००३३॥
ENMSS@0034@1अकलिलतपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदध्माते रोषान्मुनावभिधावति ।
ENMSS@0034@2अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे स्फुरति
रभसात् पाणिः पादोपसंग्रहणाय च ॥ ००३४॥
ENMSS@0035@1अकल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे ।
ENMSS@0035@2अनुच्छ्वसन्स्मरन् पूर्वं गर्भे किं नाम विन्दते ॥ ००३५॥
ENMSS@0036@1अकस्मात् प्रक्रिया नृणां अकस्माच्चापकर्षणम् ।
ENMSS@0036@2शुभाशुभे महत्त्वं च प्रकर्तुं बुद्धिलाघवात् ॥ ००३६॥
ENMSS@0037@1अकस्मादपि यः कश्चिद् अर्थं प्राप्नोति पूरुषः ।
ENMSS@0037@2तं हठेनेति मन्यन्ते स हि यत्नो न कस्यचित् ॥ ००३७॥
ENMSS@0038@1अकस्मादुन्मत्त प्रहरसि किमध्वक्षितिरुहं हृदं
हस्ताघातैर्विदलसि किमुत्फुल्लनलिनम् ।

ENMSS@0038@2तदा जानीमस्ते करिवर बलोद्गारमसमं सटां सुप्तस्यापि
स्पृशसि यदि पञ्चाननशिशोः ॥ ००३८॥
ENMSS@0039@1अकस्मादेकस्मिन् पथि सखि मया यामुनतटं व्रजन्त्या
दृष्टोऽयं नवजलधरश्यामलतनुः ।
ENMSS@0039@2स दृग्भङ्ग्या किं वाकुरुत न हि जाने तत इदं मनो
मे व्यालोलं क्वचन गृहकृत्ये न लगते ॥ ००३९॥
ENMSS@0040@1अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः ।
ENMSS@0040@2शीलमेतदसाधूनाम् अभ्रं पारिप्लवं यथा ॥ ००४०॥
ENMSS@0041@1अकस्मादेव तन्वङ्गी जहास यदियं पुनः ।
ENMSS@0041@2नूनं प्रसूनबाणोऽस्यां स्वाराज्यमधितिष्ठति ॥ ००४१॥
ENMSS@0042@1अकस्मादेव ते चण्डि स्फुरिताधरपल्लवम् ।
ENMSS@0042@2मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः ॥ ००४२॥
ENMSS@0043@1अकस्मादेव यः कोपाद् अभीक्ष्णं बहु भाषते ।
ENMSS@0043@2तस्मादुद्विजते लोकः सस्फुलिङ्गादिवानलात् ॥ ००४३॥
ENMSS@0044@1अकस्माद्द्वेष्टि यो भक्तम् आजन्मपरिसेवितम् ।
ENMSS@0044@2न व्यञ्जने रुचिर्यस्य त्याज्यो नृप इवातुरः ॥ ००४४॥
ENMSS@0045@1अकाण्डकोपिनो भर्तुरन्यासक्तेश्च योषितः ।
ENMSS@0045@2प्रशान्तिश्चेतसः कर्तुं ब्रह्मणापि न शक्यते ॥ ००४५॥
ENMSS@0046@1अकाण्डध्वतमानसव्यवसितोत्सवैः
सारसैरकाण्दपटुताण्डवैरपि शिखण्डिनां मण्डलैः ।
ENMSS@0046@2दिशः समवलोकिताः सरसनिर्भरप्रोल्लसद्-
भवत्पृथुवरूथिनीरजनिभूरजःश्यामलाः ॥ ००४६॥
ENMSS@0047@1अकाण्डपातजातानाम् अस्त्राणां मर्मभेदिनाम् ।
ENMSS@0047@2गाढशोकप्रहाराणाम् अचिन्तैव महौषधम् ॥ ००४७॥
ENMSS@0048@1अकाण्डे वक्षोजस्खलितवसनव्यापृतकरं मृषा
जृम्भारम्भोन्नमितभुजबन्धोन्नतकुचम् ।
ENMSS@0048@2वृथा यातायातैः कपटकलितान्योन्यहसितं
हरन्त्येताश्चित्तान्यहह जगतां वारवनिताः ॥ ००४८॥
ENMSS@0049@1अकामस्य क्रिया काचिद् दृश्यते नेह कर्हिचित् ।
ENMSS@0049@2यद्यद्धि कुरुते किंचित् तत्तत् कामस्य चेष्टितम् ॥ ००४९॥
ENMSS@0050@1अकामां कामयानस्य शरीरमुपतप्यते ।

ENMSS@0050@2इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना ॥ ००५०॥

ENMSS@0051@1अकामान् कामयति यः कामयानान् परिद्विषन् ।

ENMSS@0051@2बलवन्तं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥ ००५१॥

ENMSS@0052@1अकारणं रूपमकारणं कुलं महत्सु नीचेषु च कर्म शोभते ।

ENMSS@0052@2इदं हि रूपं परिभुतपूर्वकं तदेव भूयो बहुमानमागतं ॥ ००५२॥

ENMSS@0053@1अकारणं व्याकरणं तन्त्रीशब्दोऽप्यकारणम् ।

ENMSS@0053@2अकारणं त्रयो वेदास्तण्डुलास्तत्र कारणम् ॥ ००५३॥

ENMSS@0054@1अकारणाविष्कृतकोपदारुणात् खलाद्भयं कस्य न नाम जायते ।

ENMSS@0054@2विषं महाहेरिव यस्य दुर्वचः सुदुःसहं संनिहितं सदा मुखे ॥ ००५४॥

ENMSS@0055@1अकारणेन विप्रेभ्यो यः कुप्यति नराधिपः ।

ENMSS@0055@2कृष्णसर्पं स गृह्णाति शिरसा बलदर्पितः ॥ ००५५॥

ENMSS@0056@1अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।

ENMSS@0056@2अकाले मन्त्रभेदाच्च येन माद्येन्न तत् पिबेत् ॥ ००५६॥

ENMSS@0057@1अकार्यप्रतिषेधश्च कार्याणां च प्रवर्तनम् ।

ENMSS@0057@2प्रदानं च प्रदेयानाम् अदेयानामसंग्रहः ॥ ००५७॥

ENMSS@0058@1अकार्यमसकृत् कृत्वा दृश्यन्ते ह्यधना नराः ।

ENMSS@0058@2धनयुक्तास्त्वधर्मस्था दृश्यन्ते चापरे जनाः ॥ ००५८॥

ENMSS@0059@1अकार्याण्यपि पर्याप्य कृत्वापिं वृजिनार्जनं ।

ENMSS@0059@2विधीयते हितं यस्य स देहः कस्य सुस्थिरः ॥ ००५९॥

ENMSS@0060@1अकार्ये तथ्यो वा भवति वितथः काममथवा
तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः ।

ENMSS@0060@2तुलोत्तीर्णस्यापि प्रकटनिहताशेषतमसो रवेस्तादृक्तेजो
न हि भवति कन्यां गत इति ॥ ००६०॥

ENMSS@0061@1अकालचर्या विषमा च गोष्ठी कुमित्रसेवा न कदापि कार्या ।

ENMSS@0061@2पश्याण्डजं पद्मवने प्रसुप्तं धनुर्विमुक्तेन शरेण भिन्नम् ॥ ००६१॥

ENMSS@0062@1अकालजलदेन्दोः सा हृद्या वदनचन्द्रिका ।

ENMSS@0062@2नित्यं कविचकोरैर्या पीयते न च हीयते ॥ ००६२॥

ENMSS@0063@1अकालजलदश्लोकैश्चित्रमात्मकृतैरिव ।

ENMSS@0063@2जातः कादम्बरीरामो नाटके प्रवरः कविः ॥ ००६३॥

ENMSS@0064@1अकालजलदच्छन्नम् आलोक्य रविमण्डलम् ।

ENMSS@0064@2चक्रवाकयुगं रौति रजनीभयशङ्कया ॥ ००६४॥
ENMSS@0065@1अकालमृत्युं परिहृत्य जीवितं ददाति यो देहसुखं च देहिनाम् ।
ENMSS@0065@2नतेन धात्रास्ति समः कुतोऽधिको न जीविताद्दानमिहातिरिच्यते ॥ ००६५॥
ENMSS@0066@1अकालमृत्युर्विश्वासो विश्वसन् हि विपद्यते ।
ENMSS@0066@2यस्मिन् करोति विश्वासं स जीवत्यपरो मृतः ॥ ००६६॥
ENMSS@0067@1अकालसहमत्यल्पं मूर्खव्यसनिनायकम् ।
ENMSS@0067@2अगुप्तं भीरुयोधं च दुर्गव्यसनमुच्यते ॥ ००६७॥
ENMSS@0068@1अकालसैन्ययुक्तस्तु हन्यते कालयोधिना ।
ENMSS@0068@2कौशिकेन हतज्योतिर्निशीथ इव वायसः ॥ ००६८॥
ENMSS@0069@1अकाले कृत्यमारब्धं कर्तुं नार्थाय कल्पते ।
ENMSS@0069@2तदेव काल आरब्धं महतेऽर्थाय कल्पते ॥ ००६९॥
ENMSS@0070@1अकाले गर्जिते देवे दुर्दिनं वाथवा भवेत् ।
ENMSS@0070@2पूर्वकाण्डहतं लक्ष्यम् अनध्यायं प्रचक्षते ॥ ००७०॥
ENMSS@0071@1अकिंचनः परिपतन् सुखमास्वादयिष्यसि ।
ENMSS@0071@2अकिंचनः सुखं शेते समुत्तिष्ठति चैव हि ॥ ००७१॥
ENMSS@0072@1अकिंचनत्वं राज्यं च तुलया समतोलयत् ।
ENMSS@0072@2अकिंचनत्वमधिकं राज्यादपि जितात्मनः ॥ ००७२॥
ENMSS@0073@1अकिंचनस्य दान्तस्य शान्तस्य समचेतसः ।
ENMSS@0073@2मया संतुष्टमनसः सर्वाः सुखमया दिशः ॥ ००७३॥
ENMSS@0074@1अकिंचनस्य शुद्धस्य उपपन्नस्य सर्वशः ।
ENMSS@0074@2अवेक्षमाणस्त्रींल्लोकान् न तुल्यमुपलक्षये ॥ ००७४॥
ENMSS@0075@1अकिंचनाश्च दृश्यन्ते पुरुषाश्चिरजीविनः ।
ENMSS@0075@2समृद्धे च कुले जाता विनश्यन्ति पतंगवत् ॥ ००७५॥
ENMSS@0076@1अकिंचित्कारिणां दीनैराकृष्टगुणकर्मणाम् ।
ENMSS@0076@2अघाय गतसत्त्वानां दर्शनस्पर्शनादिकम् ॥ ००७६॥
ENMSS@0077@1अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
ENMSS@0077@2संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ००७७॥
ENMSS@0078@1अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्यचित् ।
ENMSS@0078@2पतत्येवाधमांल्लोकान् यावच्छब्दः प्रकीर्त्यते ॥ ००७८॥
ENMSS@0079@1अकीर्तिर्निन्द्यते देवैः कीर्तिर्लोकेषु पूज्यते ।

ENMSS@0079@2कीर्त्यर्थं तु समारम्भः सर्वेषां सुमहात्मनाम् ॥ ००७९॥
ENMSS@0080@1अकीर्तेः कारणं योषिद् योषिद्वैरस्य कारणम् ।
ENMSS@0080@2संसारकारणं योषिद् योषितं वर्जयेत्ततः ॥ ००८०॥
ENMSS@0081@1अकुण्ठोत्कण्ठया पूर्णम् अकण्ठं कलकण्ठि माम् ।
ENMSS@0081@2कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥ ००८१॥
ENMSS@0082@1अकुबेरपुरीविलोकनं न धरासूनुकरं कदाचन ।
ENMSS@0082@2अथ तत्प्रतिकारहेतवे- ऽदमयन्तीपतिलोचनं भज ॥ ००८२॥
ENMSS@0083@1अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात् ।
ENMSS@0083@2परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ ००८३॥
ENMSS@0084@1अकुलानां कुले भावं कुलीनानां कुलक्षयम् ।
ENMSS@0084@2संयोगं विप्रयोगं च पश्यन्ति चिरजीविनः ॥ ००८४॥
ENMSS@0085@1अकुलीनः कुलीनश्च मर्यादां यो न लङ्घयेत् ।
ENMSS@0085@2धर्मापेक्षी मृदुर्दान्तः स कुलीनशतैर्वरः ॥ ००८५॥
ENMSS@0086@1अकुलीनस्तु पुरुषः प्रकृतः साधुसंक्षयात् ।
ENMSS@0086@2दुर्लभैश्वर्यसंप्राप्तो गर्वितः शत्रुतां व्रजेत् ॥ ००८६॥
ENMSS@0087@1अकुलीनोऽपि मूर्खोऽपि भूपालं योऽत्र सेवते ।
ENMSS@0087@2अपि संमानहीनोऽपि स सर्वत्र प्रपूज्यते ॥ ००८७॥
ENMSS@0088@1अकुले पतितो राजा मूर्खपुत्रो हि पण्डितः ।
ENMSS@0088@2निर्धनस्य धनप्राप्तिस्तृणवन्मन्यते जगत् ॥ ००८८॥
ENMSS@0089@1अकूपाराद् वारि प्रचुरतरमादाय जलदः स दानाध्यक्षोऽपि प्रकिरति जलं नाद्भुतमिदम् ।
ENMSS@0089@2स मेघो धन्यो यत् परिकिरति मुक्ताफलतया यदीयासौ कीर्तिर्नटति नृपनारीकुचतटे ॥ ००८९॥
ENMSS@0090@1अकूर्चारम्भोऽपि प्रतिचुबुकदेशं करतलं प्रतिज्ञायां कुर्वन् युवतिषु दृशं स्निग्धतरलां ।
ENMSS@0090@2कुमारोऽहं कारात् परिषदि समानानगणयन् भुजौ वक्षः पश्यन्नववयसि कान्तिं वितनुते ॥ ००९०॥
ENMSS@0091@1अकृतकवलारम्भैर्वक्त्रैर्भयस्थगितेक्षणाः किमपि वलितग्रीवं स्थित्वा मुहुर्मृगपङ्क्तयः ।
ENMSS@0091@2गगनमसकृत्पश्यन्त्येतास्तथाश्रुघनैर्मुखैर्निपतति यथा शृङ्गाग्रेभ्योऽक्रमं नयनोदकम् ॥ ००९१॥

ENMSS@0092@1अकृतज्ञमनार्यं च दीर्घरोषमनार्जवम् ।
ENMSS@0092@2चतुरो विद्धि चाण्डालाञ् जात्या जायेत पञ्चमः ॥ ००९२॥
ENMSS@0093@1अकृतत्यागमहिम्नां मिथ्या किं राजराजशब्देन ।
ENMSS@0093@2गोप्तारं न निधीनां महयन्ति महेश्वरं विबुधाः ॥ ००९३॥
ENMSS@0094@1अकृतद्विषदुन्नतिच्छिदः श्रितसंरक्षणवन्ध्यकर्मणः ।
ENMSS@0094@2पुरुषस्य निरर्थकः करः किल कण्डूयनमात्रसार्थकः ॥ ००९४॥
ENMSS@0095@1अकृतप्रेमैव वरं न पुनः संजातविघटितप्रेमा ।
ENMSS@0095@2उद्धृतनयनस्ताम्यति यथा हि न तथेह जातान्धः ॥ ००९५॥
ENMSS@0096@1अकृत विशदधाम्नो बिम्बसारं गृहीत्वा दयित युवतिवक्त्रं लोकधात्रेति विघ्नः ।
ENMSS@0096@2न हि न हि भवदीयो मोह एवैष मित्र सितगरलनिधानं तत्त्वतो निश्चिनु त्वम् ॥ ००९६॥
ENMSS@0097@1अकृतस्यागमो नास्ति कृते नाशो न विद्यते ।
ENMSS@0097@2अकस्मादेव लोकोऽयं तृष्णे दासीकृतस्त्वया ॥ ००९७॥
ENMSS@0098@1अकृतात्मानमासाद्य राजानमनये रतम् ।
ENMSS@0098@2समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥ ००९८॥
ENMSS@0099@1अकृतेऽप्युद्यमे पुंसाम् अन्यजन्मकृतं फलम् ।
ENMSS@0099@2शुभाशुभं समभ्येति विधिना संनियोजितम् ॥ ००९९॥
ENMSS@0100@1अकृतेष्वेवकार्येषु मृत्युर्वै संप्रकर्षति ।
ENMSS@0100@2युवैव धर्मशीलः स्याद् अनिमित्तं हि जीवितम् ॥ ०१००॥
ENMSS@0101@1अकृतोपद्रवः कश्चिन् महानपि न पूज्यते ।
ENMSS@0101@2पूजयन्ति नरा नागान् न तार्क्ष्यं नागघातिनम् ॥ ०१०१॥
ENMSS@0102@1अकृतयं नैव कृत्यं स्यात् प्राणत्यागेऽप्युपस्थिते ।
ENMSS@0102@2न च कृत्यं परित्याज्यम् एष धर्मः सनातनः ॥ ०१०२॥
ENMSS@0103@1अकृतयं मन्यते कृतयं अगम्यं मन्यते सुगम् ।
ENMSS@0103@2अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो नरः ॥ ०१०३॥
ENMSS@0104@1अकृत्रिमप्रेमरसा विलासालसगामिनी ।
ENMSS@0104@2असारे दग्धसंसारे सारं सारङ्गलोचना ॥ ०१०४॥
ENMSS@0105@1अकृत्रिमविलासाङ्कम् अशिक्षितकलाक्रमम् ।
ENMSS@0105@2अविभागाङ्गसुभगं बभूव सुरतं तयोः ॥ ०१०५॥
ENMSS@0106@1अकृत्वा कर्म यो लोके फलं विन्दति विष्टितः ।

ENMSS@0106@2स तु वक्तव्यतां याति द्वेष्यो भवति प्रायशः ॥ ०१०६॥
ENMSS@0107@1अकृत्वा निजदेशस्य रक्षां यो विजिगीषते ।
ENMSS@0107@2स नृपः परिधानेन वृतमौलिः पुमानिव ॥ ०१०७॥
ENMSS@0108@1अकृत्वा परसंतापम् अगत्वा खलनम्रताम् ।
ENMSS@0108@2अनुत्सृज्य सतां वर्त्म यत् स्वल्पमपि तद् बहु ॥ ०१०८॥
ENMSS@0109@1अकृत्वा पौरुषं या श्रीः किं तयालसभाग्यया ।
ENMSS@0109@2कुरङ्गोऽपि समश्नाति दैवादुपनतं तृणम् ॥ ०१०९॥
ENMSS@0110@1अकृत्वा मानुषं कर्म यो दैवमनुवर्तते ।
ENMSS@0110@2वृथा श्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना ॥ ०११०॥
ENMSS@0111@1अकृत्वा हेलया पादम् उच्चैर्मूर्धसु विद्विषाम् ।
ENMSS@0111@2कथंकारमनालम्बा कीर्तिर्द्यामधिरोहति ॥ ०१११॥
ENMSS@0112@1अकृपणमशठमचपलं योगिनमविषादिनं बुधं शूरम् ।
ENMSS@0112@2यदि नाश्रयति नरं श्रीः श्रीरेव हि वञ्चिता भवति ॥ ०११२॥
ENMSS@0113@1अकृशं कुचयोः कृशं वलग्ने विततं चक्षुषि विस्तृतं नितम्बे ।
ENMSS@0113@2अरुणाधरमाविरस्तु चित्ते करुणाशालि कपालिभागधेयम् ॥ ०११३॥
ENMSS@0114@1अकृशं नितम्बभागे क्षामं मध्ये समुन्नतं कुचयोः ।
ENMSS@0114@2अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥ ०११४॥
ENMSS@0115@1अकृष्टफलमूलेन वनवासरतः सदा ।
ENMSS@0115@2कुरुतेऽहरहः श्राद्धम् ऋषिर्विप्रः स उच्यते ॥ ०११५॥
ENMSS@0116@1अकेकी किं केकी वचसि चतुरः किन्न कुररः शुकः किंवा मूकः स च

कलरवः किं क्षतरवः ।
ENMSS@0116@2त्वयागण्यैः पुण्यैः पिकमधुरिमा धीरगरिमा यतो लब्धः स्तब्धः किमसि

रुचिरं नेह सुचिरम् ॥ ०११६॥
ENMSS@0117@1अकौसुमी मन्मथचापयश्टि- रनंशुका विभ्रमवैजयन्ती ।
ENMSS@0117@2ललाटरङ्गाङ्गणनर्तकीयम् अनञ्जना भ्रूरनुयाति दृष्टम् ॥ ०११७॥
ENMSS@0118@1अक्रत्वङ्गमतस्तक्रं न शतक्रतुना हुतम् ।
ENMSS@0118@2नादत्तमिति वाक्यार्थात् तक्रं शक्रस्य दुर्लभम् ॥ ०११८॥
ENMSS@0119@1अक्रत्वर्थमिति ज्ञात्वा शक्रे न हुतवान् पुरा ।
ENMSS@0119@2नादत्तमिति शास्त्रार्थात् तक्रं शक्रस्य दुर्लभम् ॥ ०११९॥
ENMSS@0120@1अक्रमेणानुपायेन कर्मारम्भो न सिध्यति ।

ENMSS@0120@2दधिसर्पिःपयांसीव शबरस्य यथा हि गोः ॥ ०१२०॥
ENMSS@0121@1अक्रोधं शिक्षयन्त्यन्यैः क्रोधना ये तपोधनाः ।
ENMSS@0121@2निर्धनास्ते धनायैव धातुवादोपदेशिनः ॥ ०१२१॥
ENMSS@0122@1अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः ।
ENMSS@0122@2अमानुषेभ्योमानुषाश्च प्रधाना विद्वांस्तथैवाविदुषः प्रधानः ॥ ०१२२॥
ENMSS@0123@1अक्रोधनः सत्यवादी भूतानामविहिंसकः ।
ENMSS@0123@2अनसूयः सदाचारो दीर्घमायुरवाप्नुयात् ॥ ०१२३॥
ENMSS@0124@1अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः ।
ENMSS@0124@2आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥ ०१२४॥
ENMSS@0125@1अक्रोधवैराग्यजितेन्द्रियत्वं क्षमादयाशान्तिजनप्रियत्वम् ।
ENMSS@0125@2निर्लोभदाता भयशोकहारी ज्ञानस्य चिह्नं भयलक्षणानि ॥ ०१२५॥
ENMSS@0126@1अक्रोधस्य यदा क्रोधः सर्वनाशाय कल्पते ।
ENMSS@0126@2राघवस्य प्रकोपेन बद्धो नदनदीपतिः ॥ ०१२६॥
ENMSS@0127@1अक्रोधेन जयेत् क्रोधम् असाधुं साधुना जयेत् ।
ENMSS@0127@2जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम् ॥ ०१२७॥
ENMSS@0128@1अक्लान्तद्युतिभिर्वसन्तकुसुमैरुत्तंसयन् कुन्तलान् अन्तः खेलति खञ्जरीटनयने कुञ्जेषु कञ्जेक्षणः ।
ENMSS@0128@2अस्मन्मन्दिरकर्मतस्तव करौ नाद्यापि विश्राम्यतः किं ब्रूमो रसिकाग्रणीरसि घटी नेयं विलम्बक्षमा ॥ ०१२८॥
ENMSS@0129@1अक्लिष्टबालतरुपल्लवलोभनीयं पीतं मया सदयमेव रतोत्सवेषु ।
ENMSS@0129@2बिम्बाधरं दशसि चेद् भ्रमर प्रियायास्त्वां कारयामि कमलोदरबन्धनस्थम् ॥ ०१२९॥
ENMSS@0130@1अक्लेशादिव चिन्तितम् उपतिष्ठति सिद्धमेव पुण्यवताम् ।
ENMSS@0130@2उड्डीयापुण्यवतां गच्छन्ति कपोतकाः पश्य ॥ ०१३०॥
ENMSS@0131@1अक्षत्रारिकृताभिमन्युनिधनप्रोद्भूततीव्रभ्रुवः पार्थस्याकृत शात्रवप्रतिकृतेरन्तः शुचा मुह्यतः ।
ENMSS@0131@2कीर्णा बाष्पकणैः पतन्ति धनुषि व्रीडाजडा दृष्टयो हा वत्सेति गिरः स्फुरन्ति न पुनर्निर्यान्ति वक्त्राद्बहिः ॥ ०१३१॥
ENMSS@0132@1अक्षदेवनपणीकृतेधरे कान्तयोर्जयपराजये सति ।
ENMSS@0132@2अत्र वक्तु यदि वेत्ति मन्मथः कस्तयोर्जयति जीयतेऽपि वा ॥ ०१३२॥

ENMSS@0133@1अक्षद्यूतजिताधरग्रहविधावीशोऽसि तत्खण्डना- दाधिक्ये वद को भवानिति मृषा कोपाश्चितभ्रू लतम् ।
ENMSS@0133@2स्विद्यत्खिन्नकरा ।ग्रकुड्म। लपरायत्तीकृतास्यस्य मे मुग्धाक्षीप्रतिकृत्य तत् कृतवती द्यूतेऽपि यन्नार्जितम् ॥ ०१३३॥
ENMSS@0134@1अक्षमः क्षमतामानो क्रियायां यः प्रवर्तते ।
ENMSS@0134@2स हि हास्यास्पदत्वं च लभते प्राणसंशयम् ॥ ०१३४॥
ENMSS@0135@1अक्षमालापवृत्तिज्ञा कुशासनपरिग्रहा ।
ENMSS@0135@2ब्राह्मीव दौर्जनी संसद् वन्दनीया समेखला ॥ ०१३५॥
ENMSS@0136@1अक्षमा ह्रीपरित्यागः श्रीनाशो धर्मसंक्षयः ।
ENMSS@0136@2अभिध्याप्राज्ञता चैव सर्वं लोभात् प्रवर्तते ॥ ०१३६॥
ENMSS@0137@1अक्षमोऽसत्यसंधश्च परदारी नृशंसकृत् ।
ENMSS@0137@2पच्यते नरकेष्वेव दह्यमानः स्वकर्मणा ॥ ०१३७॥
ENMSS@0138@1अक्षरद्वयमभ्यस्तं नास्ति नास्तीति यत् पुरा ।
ENMSS@0138@2तदिदं देहि देहीति विपरीतमुपस्थितम् ॥ ०१३८॥
ENMSS@0139@1अक्षरमैत्रीभाजः सालंकारस्य चारुवृत्तस्य ।
ENMSS@0139@2किं ब्रूमो सखि यूनो न हि न हि सखि पद्यबन्धस्य ॥ ०१३९॥
ENMSS@0140@1अक्षराणामकारोऽहम् इति विष्णुः स्वयं ब्रुवन् ।
ENMSS@0140@2भवता सोऽपि यत् सत्यम् आकारेण लघूकृतः ॥ ०१४०॥
ENMSS@0141@1अक्षराणि परीक्ष्यन्ताम् अम्बराडम्बरेण किम् ।
ENMSS@0141@2शंभुरम्बरहीनोऽपि सर्वज्ञः किं न जायते ॥ ०१४१॥
ENMSS@0142@1अक्षराणि विचित्राणि येन जानन्ति मानवाः ।
ENMSS@0142@2बलीवर्दसमास्ते तु खुरशृङ्गविवर्जिताः ॥ ०१४२॥
ENMSS@0143@1अक्षराणि समानानि वर्तुलानि घनानि च ।
ENMSS@0143@2परस्परविलग्नानि तरुणीकुचकुम्भवत् ॥ ०१४३॥
ENMSS@0144@1अक्षिपक्ष्म कदा लुप्तं छिद्यन्ते हि शिरोरुहाः ।
ENMSS@0144@2वर्धमानात्मनामेव भवन्ति हि विपत्तयः ॥ ०१४४॥
ENMSS@0145@1अक्षिभ्यां कृष्णशाराभ्याम् अस्याः कर्णौ न बाधितौ ।
ENMSS@0145@2शङ्के कनकताडङ्कपाशत्रासवशादिव ॥ ०१४५॥
ENMSS@0146@1अक्षीणकर्मबन्धस्तु ज्ञात्वा मृत्युमुपस्थितम् ।
ENMSS@0146@2उत्क्रान्तिकाले संस्मृत्य पुनर्योगित्वमृच्छति ॥ ०१४६॥
ENMSS@0147@1अक्षीणभोगाद्विषमाद् इष्टानिष्टभयोज्झितात् ।

ENMSS@0147@2दुर्जनाद्वत देवा अप्यशक्ता इव बिभ्यति ॥ ०१४७॥

ENMSS@0148@1अक्षेत्रे बीजमुत्सृष्टम् अन्तरेव विनश्यति ।

ENMSS@0148@2अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥ ०१४८॥

ENMSS@0149@1अक्षेषु मृगयायां च स्त्रीषु पाने वृथाटने ।

ENMSS@0149@2निद्रायां च निबन्धेन क्षिप्रं नश्यति भूपतिः ॥ ०१४९॥

ENMSS@0150@1अक्षेष्वियं व्यसनिता हृदये यदेते रागो घनो मधुमदोत्कटमाननं च ।

ENMSS@0150@2पद्मस्तथापि परमास्पदमेव लक्ष्म्यास्तद्दैन्यमेव किल दुर्भगता यदेभिः ॥ ०१५०॥

ENMSS@0151@1अक्षोठशुण्ठिमरिचार्द्रकदाडिमत्वक् कुस्तुम्बुरूलवणतैलसुसंस्कृतान् यः ।

ENMSS@0151@2मत्स्यान् सुशीतसितभक्ततले दधाति स ब्रह्मलोकमधिगच्छति पुण्यकर्मा ॥ ०१५१॥

ENMSS@0152@1अक्षौरेऽपि च नक्षत्रे कुर्वीत बुधसोमयोः ।

ENMSS@0152@2युक्तेऽपि तिथिनक्षत्रे न कुर्याच्छनिभौमयोः ॥ ०१५२॥

ENMSS@0153@1अक्षौहिणी रिपुं हन्यात् स्वयं वा तेन हन्यते ।

ENMSS@0153@2ब्राह्मणो मन्त्रविद्धन्यात् सर्वानेव रिपून् क्षणात् ॥ ०१५३॥

ENMSS@0154@1अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिञ्छगुच्छावलीं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ।

ENMSS@0154@2धूर्तानामभिसारसंभ्रमजुषां विष्वङ्निकुञ्जे सखि ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ॥ ०१५४॥

ENMSS@0155@1अक्ष्णोर्मञ्जुलमञ्जनं चरणयोर्नीलाश्मजौ नूपुरा- वङ्गे नीलपटः स्फुटं मृगमदन्यासः कपोलस्थले ।

ENMSS@0155@2यत्प्रीत्या परिशीलितं परदृशां रोधाय तत्सांप्रतं नेपथ्यस्य विधावपीदमसतीजातस्य जातं तमः ॥ ०१५५॥

ENMSS@0156@1अक्ष्णोर्युग्मं विलोकान्मृदुतनुगुणतस्तर्पयन्ती शरीरं दिव्यामोदेन वक्त्रादपगतमरुता नासिकां चारुवाचा ।

ENMSS@0156@2श्रोत्रद्वंद्वं मनोज्ञाद्रसनमपि रसादर्पयन्ती मुखाब्जं यद्वत्पञ्चाक्षसौख्यं वितरति युवतिः कामिनां नान्यदेवं ॥ ०१५६॥

ENMSS@0157@1अक्ष्णोर्विपक्ष इति सानुशयं लुलाव नीलोत्पलं यदबला कलमस्य गोप्त्री ।

ENMSS@0157@2भूयस्तदेव शिरसावहदुन्नतानां वैरं विरोधिषु दृढं न पराजितेषु

॥ ०१५७॥

ENMSS@0158@1अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।

ENMSS@0158@2न निशाकरवज्ञातु कलावैकल्यमागतः ॥ ०१५८॥

ENMSS@0159@1अखण्डितं च क्रमुकं चूर्णम् तु रसवर्जितम् ।

ENMSS@0159@2भूमौ निपतितं पत्रं शक्रस्यापि श्रिअयं हरेत् ॥ ०१५९॥

ENMSS@0160@1अखण्डिता शक्तिरथोपमानं न स्वीकृतं न च्छलरीतिरस्ति ।

ENMSS@0160@2अस्पृष्टसंदेहविपर्ययस्य कोऽयं तव न्यायनये निवेशः ॥ ०१६०॥

ENMSS@0161@1अखर्वपर्वगर्तेषु विच्छिन्नो यस्य वारिधिः ।

ENMSS@0161@2स एव हि मुनेः पाणिरधस्ताद्विन्ध्यभूभृतः ॥ ०१६१॥

ENMSS@0162@1अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम् ।

ENMSS@0162@2सविधेऽपि नसूक्ष्मसाक्षिणी वदनालंकृतिमात्रमक्षिणी ॥ ०१६२॥

ENMSS@0163@1अखिलेषु विहंगेषु हन्त स्वच्छन्दचारिषु ।

ENMSS@0163@2शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥ ०१६३॥

ENMSS@0164@1अगजाननपद्मार्कं गजाननमहर्निशम् ।

ENMSS@0164@2अनेकदं तं भक्तानाम् एकदन्तमुपास्महे ॥ ०१६४॥

ENMSS@0165@1अगणितगुणेन सुन्दर कृत्वा चारित्रमप्युदासीनम् ।

ENMSS@0165@2भवतानन्यगतिः सा विहितावर्तेन तरणिरिव ॥ ०१६५॥

ENMSS@0166@1अगणितगुरुर्याञ्चालोलं पदान्तसदातिथिः समयमविदन् मुग्धः कालासहो रतिलम्पटः ।

ENMSS@0166@2कृतककुपितं हस्ताघातं त्रपारुदितं हठा- दपरिगणयन् लज्जायां मां निमज्जयति प्रियः ॥ ०१६६॥

ENMSS@0167@1अगणितनिजश्रमाणां परकृत्येऽभ्येत्य वर्तमानानाम् ।

ENMSS@0167@2सुजनघनदिनमणीनां परोपकारार्थमजनि जनिः ॥ ०१६७॥

ENMSS@0168@1अगणितयशसा त्यक्त- स्थितिना क्रियतेऽथ याकृतज्ञेन ।

ENMSS@0168@2स्निग्धे सुहृदि सरागे मित्रे तव वञ्चना न युक्ता सा ॥ ०१६८॥

ENMSS@0169@1अगतित्वमतिश्रद्धा ज्ञानाभासेन तृप्तता ।

ENMSS@0169@2त्रयः शिष्यगुणा ह्येते मूर्खाचार्यस्य भाग्यजाः ॥ ०१६९॥

ENMSS@0170@1अगतीनां खलीकाराद् दुःखं नैवोपजायते ।

ENMSS@0170@2भवन्त्यशोकाः प्रायेण सांकुराः पादताडिताः ॥ ०१७०॥

ENMSS@0171@1अगदैः सर्वसामान्यैर्व्यन्तराणां विषं हरेत् ।

ENMSS@0171@2धूपो देवीसहापिच्छखण्डनैस्तद्विषापहः ॥ ०१७१॥

ENMSS@0172@1अगम्यगमनात् प्रायः प्रायश्चित्तीयते जनः ।
ENMSS@0172@2अगम्यं त्वद्यशो याति सर्वत्रैव च पावनम् ॥ ०१७२॥
ENMSS@0173@1अगम्यानि पुमान् याति योऽसेव्यांश्च निषेवते ।
ENMSS@0173@2स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ ०१७३॥
ENMSS@0174@1अगम्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः ।
ENMSS@0174@2शम्भलीभुक्तसर्वस्वा जना यत्पारिपार्श्विकाः ॥ ०१७४॥
ENMSS@0175@1अगम्यो मन्त्राणां प्रकृतिभिषजामप्यविषयः सुधासारासाध्यो विसदृशतरारम्भगहनः ।
ENMSS@0175@2जगद्ध्रामीकर्तुं परिणतधियानेन विधिना स्फुटं सृष्टो व्याधिः प्रकृतिविषमो दुर्जनजनः ॥ ०१७५॥
ENMSS@0176@1अगस्तितुल्याश्च घृताब्धिशोषणे दम्भोलितुल्या वटकाद्रिभेदने ।
ENMSS@0176@2शाकावलीकाननवह्निरूपास्त एव भट्टा इतरे भटाश्च ॥ ०१७६॥
ENMSS@0177@1अगस्तिहस्तचुलुकमितेऽब्धौ वाहनाकृतौ ।
ENMSS@0177@2मग्नः समुद्रो वेलायाम् इति देवास्तदा जगुः ॥ ०१७७॥
ENMSS@0178@1अगस्त्य इव यस्यासिर्न्यश्चितक्षितिभृद्वभौ ।
ENMSS@0178@2चित्रं सोऽप्यकरोन्नृत्यत् कबन्धं समरार्णवम् ॥ ०१७८॥
ENMSS@0179@1अगस्त्यस्य मुनेः शापाद् ब्रह्मस्यन्दनमास्थितः ।
ENMSS@0179@2महासुखात् परिभ्रष्टो नहुषः सर्पतां गतः ॥ ०१७९॥
ENMSS@0180@1अगस्त्येन पयोराशेः कियत् किं पीतमुज्झितम् ।
ENMSS@0180@2त्वया वैरिकुलं वीर समरे कीदृशं कृतम् ॥ ०१८०॥
ENMSS@0181@1अगा गाङ्गाङ्गकाकाकगाहकाघककाकहा ।
ENMSS@0181@2अहाहाङ्क खगाङ्कागकङ्कागखगकाकक ॥ ०१८१॥
ENMSS@0182@1अगाधजलसंचारी विकारी न च रोहितः ।
ENMSS@0182@2गण्डूषजलमात्रे तु शफरी फर्फरायते ॥ ०१८२॥
ENMSS@0183@1अगाधहृदया भूपाः कूपा इव दुरासदाः ।
ENMSS@0183@2घटका गुणिनो नो चेत् कथं लभ्येत जीवनम् ॥ ०१८३॥
ENMSS@0184@1अगाधेनापि किं तेन तोयेन लवणाम्बुधेः ।
ENMSS@0184@2जनुमात्रं वरं वारि तृष्णाच्छेदकरं नृणाम् ॥ ०१८४॥
ENMSS@0185@1अगारेऽस्मिन् कान्ते गिरिशमनिशानाथशकलं भुजंगानुत्तुङ्गान् सकलमपि वातायनपथे ।
ENMSS@0185@2निकुञ्जेषु श्येनानधिगृहशिरो राहुवलयं लिखन्त्या नीयन्ते शिव

शिव तया हन्त दिवसाः ॥ ०१८५॥

ENMSS@0186@1अगुणकणो गुणराशिर्द्वयमपि दैवेन खलमुखे पतितम् ।

ENMSS@0186@2प्रसरति तैलमिवैकः सलिले घृतवज्जडत्वमेत्यन्यः ॥ ०१८६॥

ENMSS@0187@1अगुरुरिति वदतु लोको गौरवमत्रैव पुनरहं मन्ये ।

ENMSS@0187@2दर्शितगुणैकवृत्तिर्यस्य जने जनितदाहेऽपि ॥ ०१८७॥

ENMSS@0188@1अगुरुसुरभिधूपाशोभितं केशपाशं गलितकुसुममालं धुन्वती कुञ्चिताग्रम् ।

ENMSS@0188@2त्यजति गुरुनितम्बा निम्ननाभिः सुमध्याप्युषसि शयनवासः कामिनी कामशोभा

॥ ०१८८॥

ENMSS@0189@1अगुरोरपि सत उच्चैः प्रशंसनं तद्गुणा वितन्वन्ति ।

ENMSS@0189@2अगुरुर्ज्वलनेऽप्यस्तः सौरभमिषतो गुणान् वमति ॥ ०१८९॥

ENMSS@0190@1अगूढविभवा यस्य पौरा राष्ट्रवासिनः ।

ENMSS@0190@2नयापनयवेत्तायः स राजा राजसत्तमः ॥ ०१९०॥

ENMSS@0191@1अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजम् ।

ENMSS@0191@2इति प्रलीनां नलिनीवने सखीं विदाम्बभूवुः सुचिरेण योषितः ॥ ०१९१॥

ENMSS@0192@1अग्निं प्राप्य यथा सद्यस्तूलराशिर्विनश्यति ।

ENMSS@0192@2तथा गङ्गाजलेनैव सर्वपापं विनश्यति ॥ ०१९२॥

ENMSS@0193@1अग्निं स्तोकमिवात्मानं संधुक्षयति यो नरः ।

ENMSS@0193@2स वर्धमानो ग्रसते महान्तमपि संचयम् ॥ ०१९३॥

ENMSS@0194@1अग्निः स्तोको वर्धते चाज्यसिक्तो बीजं चैकं बहुसाहस्रमेति ।

ENMSS@0194@2क्षयोदयौ विपुलौ संनियम्य तस्मादल्पं नावमन्येत वित्तम् ॥ ०१९४॥

ENMSS@0195@1अग्निकुण्डसमा नारी घृतकुम्भसमो नरः ।

ENMSS@0195@2संगमेन परस्त्रीणां कस्य नो चलते मनः ॥ ०१९५॥

ENMSS@0196@1अग्निकुम्भसमा नारी घृतकुम्भसमो नरः ।

ENMSS@0196@2उभयोरपि संयोगः कस्य विश्वासकारकः ॥ ०१९६॥

ENMSS@0197@1अग्निदाहे न मे दुःखं छेदे न निकषे न वा ।

ENMSS@0197@2यत्तदेव महद्दुःखं गुञ्जया सह तोलनम् ॥ ०१९७॥

ENMSS@0198@1अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।

ENMSS@0198@2क्षेत्रदारापहारी च षडेते ह्याततायिनः ॥ ०१९८॥

ENMSS@0199@1अग्निना भस्मना चैव स्तम्भेन च जनेन च ।

ENMSS@0199@2अद्वारेणैव मार्गेण पङ्क्तिदोषो न विद्यते ॥ ०१९९॥
ENMSS@0200@1अग्निरापः स्त्रियो मूर्खाः सर्पा राजकुलानि च ।
ENMSS@0200@2नित्यं यत्नेन सेव्यानि सद्यः प्राणहराणि षट् ॥ ०२००॥
ENMSS@0201@1अग्निर्गुरुर्द्विजातीनां वर्णानां पार्थिवो गुरुः ।
ENMSS@0201@2कुलस्त्रीणां गुरुर्भर्ता सर्वस्याभ्यागतो गुरुः ॥ ०२०१॥
ENMSS@0202@1अग्निर्दहति तापेन सूर्यो दहति रश्मिभिः ।
ENMSS@0202@2राजा दहति दण्डेन तपसा ब्राह्मणो दहेत् ॥ ०२०२॥
ENMSS@0203@1अग्निर्देवो द्विजातीनां मुनीनां हृदि दैवतम् ।
ENMSS@0203@2प्रतिमास्वल्पबुद्धीनां सर्वत्र समदर्शिनः ॥ ०२०३॥
ENMSS@0204@1अग्निर्हि देवताः सर्वाः सर्वणं च तदात्मकम् ।
ENMSS@0204@2तस्मात् सुवर्णं ददता दत्ताः सर्वाः स्म देवताः ॥ ०२०४॥
ENMSS@0205@1अग्निष्टोमादिभिर्यज्ञैर्विविधैराप्तदक्षिणैः ।
ENMSS@0205@2न तत् फलमवाप्नोति तीर्थार्थे गमनेन यत् ॥ ०२०५॥
ENMSS@0206@1अग्निश्तेजो महल्लोके गूढस्तिष्ठति दारुषु ।
ENMSS@0206@2न चोपयुङ्क्ते तद्दारु यावन्नो दीप्यते परैः ॥ ०२०६॥
ENMSS@0207@1स एव खलु दारुभ्यो यदा निर्मथ्य दीप्यते ।
ENMSS@0207@2तदा तच्च वनं चान्यन् निर्दहत्याशु तेजसा ॥ ०२०७॥
ENMSS@0208@1एवमेव कुले जाताः पावकोपमतेजसः ।
ENMSS@0208@2क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते ॥ ०२०८॥
ENMSS@0209@1अग्निहोत्रं गृहं क्षेत्रं गर्भिर्णीं वृद्धबालकौ ।
ENMSS@0209@2रिक्तहस्तेन नोपेयाद् राजानं देवतां गुरुम् ॥ ०२०९॥
ENMSS@0210@1अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
ENMSS@0210@2बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥ ०२१०॥
ENMSS@0211@1अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ।
ENMSS@0211@2रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥ ०२११॥
ENMSS@0212@1अग्निहोत्रमधीतं वा दानाद्याश्चाखिलाः क्रियाः ।
ENMSS@0212@2भजन्ते तस्य वैफल्यं यस्य वाक्यमकारणम् ॥ ०२१२॥
ENMSS@0213@1अग्निहोत्रेषु विप्राणां हृदि देवो मनीषिणाम् ।
ENMSS@0213@2प्रतिमास्वल्पबुद्धीनां सर्वत्र विदितात्मनाम् ॥ ०२१३॥
ENMSS@0214@1अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यत्र निमित्तमस्ति ।
ENMSS@0214@2एवं हि जन्तोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ०२१४॥

ENMSS@0215@1अग्नौ क्रियावतां देवो दिवि देवो मनीषिणाम् ।
ENMSS@0215@2प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ॥ ०२१५॥
ENMSS@0216@1अग्नौ दग्धं जले मग्नं हृतं तस्करपार्थिवैः ।
ENMSS@0216@2तत्सर्वं दानमित्याहुर्यदि क्लैब्यं न भाषते ॥ ०२१६॥
ENMSS@0217@1अग्नौ प्राप्तं प्रधूयेत यथा तूलं द्विजोत्तम ।
ENMSS@0217@2तथा गङ्गावगाढस्य सर्वं पापं प्रधूयते ॥ ०२१७॥
ENMSS@0218@1अग्नौ प्रास्तं तु पुरुषं कर्मान्वेति स्वयंकृतम् ।
ENMSS@0218@2तस्मात्तु पुरुषो यत्नाद् धर्मं संचिनुयाच्छनैः ॥ ०२१८॥
ENMSS@0219@1अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठते ।
ENMSS@0219@2आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ०२१९॥
ENMSS@0220@1अग्न्याकारं कलयसि पुरश्चक्रवाकीव चन्द्रं बद्धोत्कम्पं शिशिरमरुता दह्यते पद्मिनीव ।
ENMSS@0220@2प्राणान् धत्से कथमपि बलाद्गच्छतः शल्यतुल्यांस्तत् केनासौ सुतनु जनितो माम्मथस्ते विकारः ॥ ०२२०॥
ENMSS@0221@1अग्न्याधानेन यज्ञेन काषायेण जटाजिनैः ।
ENMSS@0221@2लोकान् विश्वासयित्वैव ततो लुम्पेद्यथा वृकः ॥ ०२२१॥
ENMSS@0222@1अग्रच्छाया तृणाग्निश्च नीचसेवा पटे जलम् ।
ENMSS@0222@2वेश्यारागः खलप्रेम सर्वं बुद्बुदसन्निभम् ॥ ०२२२॥
ENMSS@0223@1अग्रतः पृष्ठतो मध्ये पार्श्वतोऽथ समन्ततः ।
ENMSS@0223@2विद्युच्चकितवद्भाति सूर्यकोटिसमप्रभः ॥ ०२२३॥
ENMSS@0224@1अग्रतश्चतुरो वेदान् पृष्ठतः सशरं धनुः ।
ENMSS@0224@2उभाभ्यां च समर्थोऽहं शापादपि शरादपि ॥ ०२२४॥
ENMSS@0225@1अग्रतो वामपादं च दक्षिणं जातु कुञ्चितम् ।
ENMSS@0225@2आलीढं तु प्रकर्तव्यं हस्तद्वयसविस्तरम् ॥ ०२२५॥
ENMSS@0226@1अग्रसानुषु नितान्तपिशङ्गैर्भूरुहान्मृदुकरैरवलम्ब्य ।
ENMSS@0226@2अस्तशैलगहनं नु विवस्वान् आविवेश जलधिं नु महीं नु ॥ ०२२६॥
ENMSS@0227@1अग्राह्यं श्रवणस्य भूषणमलंकारो न भावोचितः
कण्ठस्याञ्जनमुज्ज्वलं नयनयोः सूक्ष्मत्वमावेक्षितुम् ।
ENMSS@0227@2वक्रस्य क्षणिकोऽधिवासनविधिः कान्ते प्रिये
नाभवस्सौभाग्यप्रतिकर्मनिर्मितमहाविद्यैव येनात्मनः ॥ ०२२७॥
ENMSS@0228@1अग्राह्या मूर्धजेष्वेताः स्त्रियो गुणसमन्विताः ।

ENMSS@0228@2न लताः पल्लवच्छेदम् अर्हन्त्युपवनोद्भवाः ॥ ०२२८॥

ENMSS@0229@1अग्रे कस्यचिदस्ति कंचिदभितः केनापि पृष्टे कृतः संसारः शिशुभावयौवनजराभारावतारादयम् ।

ENMSS@0229@2बालस्तं बहु मन्यतामसुलभं प्राप्तं युवा सेवतां वृद्धस्तद्विष्याद्बहिष्कृत इव व्यावृत्य किं पश्यति ॥ ०२२९॥

ENMSS@0230@1अग्रे कुग्रामवर्गः पिशितरसलसच्चण्डचण्डायमानः पश्चाद्व्याधो वधार्थो निशितशरकरः पादमुद्रानपायी ।

ENMSS@0230@2विष्वग्दीप्तो वनाग्निर्वनमतिगहनं धूमवात्या च दृष्टेः सरोद्धी कान्दिशीको हरि हरि हरिणःकं शरण्यं प्रयातु ॥ ०२३०॥

ENMSS@0231@1अग्रे गच्छत धेनुदुग्धकलशानादाय गोप्यो गृहं दुग्धे वस्कयणीकुले पुनरियं राधा शनैर्यास्यति ।

ENMSS@0231@2इत्यन्यव्यपदेशगुप्तहृदयः कुर्वन् विविक्तं व्रजं देवः कारणनन्दसूनुरशिवं कृष्णः स मुष्णातु वः ॥ ०२३१॥

ENMSS@0232@1अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः पृष्ठे लीलावलयरणितं चामरग्राहिणीनाम् ।

ENMSS@0232@2यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ०२३२॥

ENMSS@0233@1अग्रे तप्तजला नितान्तशिशिरा मूले मुहुर्बाहुभिर्व्यामथ्योपरतप्रपेषु पथिकैर्मार्गेषु मध्यंदिने ।

ENMSS@0233@2आधाराः प्लुतबालशैवलदलच्छेदावकीर्णोर्मयः पीयन्ते हलमुक्तमग्नमहिषप्रक्षोभपर्याविलाः ॥ ०२३३॥

ENMSS@0234@1अग्रे तिष्ठति दारुणाकृतिरसौ क्रोधोद्धतः केसरी पश्चादुद्भटदावदूषितधरासंक्रान्तचण्डानिलः ।

ENMSS@0234@2किं कुर्मः सहसा विहाय कलभानेतान् ब्रजामः कथं हंहो कूणितलोचनेति करिणी चिन्ताकुला ताम्यति ॥ ०२३४॥

ENMSS@0235@1अग्रे धनुः शरकरः स्वयमस्ति कामः पश्चात्त्वरा शशधरोदयसंशयोत्था ।

ENMSS@0235@2ध्वान्तं दिनान्तविकसद्विभवं समन्तात् किं केवला पथि वधूर्दयिताभिसारे ॥ ०२३५॥

ENMSS@0236@1अग्रे प्रस्तुतनाशानां मूकता परमो गुणः ।

ENMSS@0236@2तथापि प्रभुभक्तानां सौधर्म्यादिवमुच्यते ॥ ०२३६॥

ENMSS@0237@1यैरेव स्तुतिभिः स्वामी प्राप्यते व्यसनावटम् ।
ENMSS@0237@2पश्चान्मूकत्वमापन्नैर्उद्धर्तुं नैव शक्यते ॥ ०२३७॥
ENMSS@0238@1अग्रे माहिषिकं दृष्ट्वा मध्ये तु वृषलीपतिम् ।
ENMSS@0238@2अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः ॥ ०२३८॥
ENMSS@0239@1अग्रे यान्ति रथस्य रेणुवदमी चूर्णीभवन्तो घनाश्चक्रभ्रान्तिररान्तरेषु जनयत्यन्यामिवारावलिम् ।
ENMSS@0239@2चित्रन्यस्तमिवाचलं हयशिरस्यायामवच्चामरं यष्ट्यग्रे च समं स्थितो ध्वजपटः प्रान्ते च वेगानिलात् ॥ ०२३९॥
ENMSS@0240@1अग्रे लघिमा पश्चान् महतापि पिधीयते न हि महिम्ना ।
ENMSS@0240@2वामन इति त्रिविक्रमम् अभिदधति दशावतारविदः ॥ ०२४०॥
ENMSS@0241@1अग्रे विकीर्णकुरबक- फलजालकहीयमानसहकारम् ।
ENMSS@0241@2परिणामाभिमुखमृतोरुत्सुकयति यौवनं चेतः ॥ ०२४१॥
ENMSS@0242@1अग्रे व्याधः करधृतशरः पार्श्वतो जालमाला पृष्टे वह्निर्दहति नितरां संनिधौ सारमेयाः ।
ENMSS@0242@2एणी गर्भादलसगमना बालकै रुद्धपादा चिन्ताविष्टा वदति हि मृगं किं करोमि क्व यामिः ॥ ०२४२॥
ENMSS@0243@1अग्रे श्यामलबिन्दुबद्धतिलकैर्मध्येऽपि पाकान्वय-प्रौढीभूतपटोलपाटलतरैर्मूले मनाग्बभ्रुभिः ।
ENMSS@0243@2वृन्ते कर्कशकीरपिच्चहरिभिः स्थूलैः फलैर्बन्धुराः संप्रत्युत्सुकयन्ति कस्य न मनः पूगद्रुमाणां छटाः ॥ ०२४३॥
ENMSS@0244@1अग्रेसरी कुमारी तत्पृष्टे पुङ्गवो यदा तारः ।
ENMSS@0244@2सिद्धिस्तदोत्तमा स्याद् दृष्टाप्यादौ वरा दुर्गा ॥ ०२४४॥
ENMSS@0245@1अग्रे स्त्रीनखपाटलं कुरवकं श्यामं द्वयोर्भागयोर्बालाशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति ।
ENMSS@0245@2ईषद्बद्धरजःकणांग्रकपिशा चूते नवा मञ्जरी मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता ॥ ०२४५॥
ENMSS@0246@1अग्र्यो मुक्तिमतां प्रयोगसमये मन्त्रेषु पृष्ठं गतः पाकागारगतस्तु पाचकमनस्तोषाय वाचस्पतिः ।
ENMSS@0246@2उच्चायां निरतो रतोऽर्थकगणे पिण्डेषु दत्तादरो नानाश्राद्धगणैकचालितमना भट्टोट्टमो राजते ॥ ०२४६॥
ENMSS@0247@1अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ।

ENMSS@0247@2यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते ॥ ०२४७॥
ENMSS@0248@1अघटितं घटनां नयति ध्रुवं सुघटितं क्षणभङ्गुरताचलम् ।
ENMSS@0248@2जगदिदं कुरुते सचराचरं विधिरहो बलवानिति मे मतिः ॥ ०२४८॥
ENMSS@0249@1अघटितघटितं घटयति सुघटितघटितानि जर्जरीकुरुते ।
ENMSS@0249@2विधिरेव तानि घटयति यानि पुमान्नैव चिन्तयति ॥ ०२४९॥
ENMSS@0250@1अघृष्टमिव माणिक्यम् अमत्तमिव च द्विपम् ।
ENMSS@0250@2अशूरं पार्थिवं लोको जात्यमप्यवमन्यते ॥ ०२५०॥
ENMSS@0251@1अङ्कं केऽपि शशङ्किरेजलनिधेः पङ्कं परे मेनिरे सारङ्गं
कतिचिच्च संजगदिरे भूमेश्च बिम्बं परे ।
ENMSS@0251@2इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते तन्मन्ये
रविभीतमन्धतमसं कुक्षिस्थमालक्ष्यते ॥ ०२५१॥
ENMSS@0252@1अङ्कनिलीनगजानन- शङ्काकुलबाहुलेयहृतवसनौ ।
ENMSS@0252@2सस्मितहरकरकलितौ हिमगिरितनयास्तनौ जयतः ॥ ०२५२॥
ENMSS@0253@1अङ्कन्यासैर्विषमैर्मायावनितालकावलीकुटिलैः ।
ENMSS@0253@2को नाम कामचारैः कायस्थैर्मोहितो न जनः ॥ ०२५३॥
ENMSS@0254@1अङ्कमल्लविनोदेषु तथान्येषूत्सवादिषु ।
ENMSS@0254@2अन्तःपुरप्रचारेषु देवपूजापरेषु च ॥ ०२५४॥
ENMSS@0255@1अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः ।
ENMSS@0255@2केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥ ०२५५॥
ENMSS@0256@1अङ्कुरिते पल्लविते कोरकिते विकसिते च सहकारे ।
ENMSS@0256@2अङ्कुरितः पल्लवितः कोरकितो विकसितश्च मदनः ॥ ०२५६॥
ENMSS@0257@1अङ्केकृत्वोत्तमाङ्गं प्लवगबलपतेः पादमक्षस्य हन्तुर्दत्वोत्सङ्गे
सलीलं त्वचि कनकमृगस्याङ्गशेषं निधाय ।
ENMSS@0257@2बाणं रक्षः कुलघनं प्रगुणितमनुजेनादरात्तीक्ष्णमक्ष्णः
कोणेनावेक्षमाणस्त्वदनुजवचने दत्तकर्णोऽयमास्ते ॥ ०२५७॥
ENMSS@0258@1अङ्के वृद्धिमुपागतं शिशुतया सर्वाङ्गमालिङ्गितं मत्स्यः
श्रीपरिरम्भनिर्भरतरव्याकोशकोषोन्मुखैः ।
ENMSS@0258@2आशाप्तैः परिपीयमानमनिशं निःस्पन्दमिन्दिन्दिरैर्दूरादेव
निमेषशून्यनयनः पद्मं समुद्वीक्षते ॥ ०२५८॥
ENMSS@0259@1अङ्केषु शून्यविन्यासाद् वृद्धिः स्यात्तु दशाधिका ।
ENMSS@0259@2तस्माज्ज्ञेया विशेषेण अङ्कानां वामतो गतिः ॥ ०२५९॥

ENMSS@0260@1अङ्कोल्लक्काथतोयेन मिश्रितं घृतमाक्षिकम् ।
ENMSS@0260@2वसा किटिकुङ्गाणाम् एतैः सिक्ता महीरुहाः ॥ ०२६०॥
ENMSS@0261@1अङ्कोल्लक्कथितं स्विन्नं नृमांसं छागदुग्धयुक् ।
ENMSS@0261@2पिण्याकसहितं मूले सहकारस्य निक्षिपेत् ॥ ०२६१॥
ENMSS@0262@1अङ्कोल्लतैलभावितम् उषितं गोशकृति कुमुदकन्दमलम् ।
ENMSS@0262@2करकाम्बुकर्दमभृते कलशे कुसुमं समुद्वहति ॥ ०२६२॥
ENMSS@0263@1अङ्कोल्लतैलसूकर- शिशुमारवसासु भावितं बीजम् ।
ENMSS@0263@2सद्यो रोहति निहितं भूमौ करकाम्भसा सिक्तम् ॥ ०२६३॥
ENMSS@0264@1अङ्कोल्लपत्रधपेन यद्वा केशसमन्वितैः ।
ENMSS@0264@2सक्तुभिः कटुतैलाक्तैर्याति मत्स्यविषं क्षयम् ॥ ०२६४॥
ENMSS@0265@1अङ्कोल्लबीजमज्ञानां सूक्ष्मचूर्णं विधीयते ।
ENMSS@0265@2तिलतैलेन तच्चूर्णं सम्यक्कृत्वा च भावयेत् ॥ ०२६५॥
ENMSS@0266@1अङ्गं गलितं पलितं मुण्डं दन्तविहीनं जातं तुण्डम् ।
ENMSS@0266@2करधृतकम्पितशोभितदण्डं तदपि न मुञ्चत्याशा पिण्डम् ॥ ०२६६॥
ENMSS@0267@1अङ्गं चन्दनपङ्कपङ्कजबिसच्छेदावलीनं मुहुस्तापः शाप इवैष शोषणपटुः कम्पः सखीकम्पनः ।
ENMSS@0267@2श्वासाः संवृततारहाररुचयः संभिन्नचीनांशुका जातः प्रागतिदाहवेदनमहारम्भः स तस्या ज्वरः ॥ ०२६७॥
ENMSS@0268@1अङ्गं चन्दनपाण्डु पल्लवमृदुस्ताम्बूलताम्रोऽवरो धारायन्त्रजलाभिषेककलुषे धौताञ्जने लोचने ।
ENMSS@0268@2अन्तःपुष्पसुगन्धिरार्द्रकबरी स्वच्छं तनीयोऽम्बरं कान्तानां कमनीयतां बिदधते ग्रीष्मेऽपराह्णगमे ॥ ०२६८॥
ENMSS@0269@1अङ्गं दक्षिणमारुह्य वामेनोत्तरति स्फुटम् ।
ENMSS@0269@2तदा हानिकरी ज्ञेया व्यत्ययेन तु लाभदा ॥ ०२६९॥
ENMSS@0270@1अङ्गं दमनपत्राभमङ्गे यस्मिन् प्रतीयते ।
ENMSS@0270@2विद्याद्दमनवज्रं तु तीक्ष्णधारं महागुणम् ॥ ०२७०॥
ENMSS@0271@1अङ्गं प्रतीयते यत्र बहुग्रन्थिसमन्वितम् ।
ENMSS@0271@2दुर्लभं तन्महामूल्यं ग्रन्थिवज्रकमुच्यते ॥ ०२७१॥
ENMSS@0272@1अङ्गं भूषणनिकरो भूषयतीत्येष लौकिको वादः ।
ENMSS@0272@2अङ्गानि भूषणानां कामपि सुषमामजीजनंस्तस्याः ॥ ०२७२॥
ENMSS@0273@1अङ्गं येन रथीकृतं नयनयोर्युग्मं रथाङ्गीकृतं पत्रं स्वं

रथकर्मसारथ्थिकृतं श्वासस्तुरंगीकृताः ।
ENMSS@0273@2कोदऽडीकृतमात्मवीर्यमचिरान्मौर्वीकृतं भूषणं वामाङ्गं
विशिखीकृतं दिशतु नः क्षेमं स धन्वी पुमान् ॥ ०२७३॥
ENMSS@0274@1अङ्गणं तदिदमुन्मदद्विप- श्रेणिशोणितविहारिणो हरेः ।
ENMSS@0274@2उल्लसत्तरुणकेलिपल्लवां सल्लकीं त्यजति किं मतङ्गजः ॥ ०२७४॥
ENMSS@0275@1अङ्गणवेदिर्वसुधा कुल्या जलधिः स्थली च पातालम् ।
ENMSS@0275@2वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य धीरस्य ॥ ०२७५॥
ENMSS@0276@1अङ्गदोषपरित्यक्तश्चतुर्मार्गकृतश्रमः ।
ENMSS@0276@2ज्ञाता कुलकवाद्यस्य रञ्जको वादकः स्मृतः ॥ ०२७६॥
ENMSS@0277@1अङ्गनानामिवाङ्गानि गोप्यन्ते स्वगुणा यदा ।
ENMSS@0277@2तदा ते स्पृहणीयाः स्युरिमे ह्यत्यन्तदुर्लभाः ॥ ०२७७॥
ENMSS@0278@1अङ्गनामङ्गनामन्तरे माधवो माधवं माधवं चान्तरेणाङ्गना ।
ENMSS@0278@2इत्थमाकल्पिते मण्डले मध्यगः संजगौ वेणुना देवकीनन्दनः ॥ ०२७८॥
ENMSS@0279@1अङ्गन्यासस्ततः कार्यः शिवोक्तः सिद्धिमिच्छता ।
ENMSS@0279@2आचार्येण च शिष्यस्य पापघ्नो विघ्ननाशनः ॥ ०२७९॥
ENMSS@0280@1अङ्गप्रत्यङ्गजः पुत्रो हृदयाच्चापि जायते ।
ENMSS@0280@2तस्मात् प्रियतरो मातुः प्रियत्वान्न तु बान्धवः ॥ ०२८०॥
ENMSS@0281@1अङ्गप्रत्यङ्गभागेन ततः पिण्डः प्रजायते ।
ENMSS@0281@2चर्मणाच्छादितः सप्त धातवः सुग्रनुक्रमात् ॥ ०२८१॥
ENMSS@0282@1अङ्गमङ्गेन संपीड्य मांसं मांसेन तु स्त्रियः ।
ENMSS@0282@2पुराहमभवं प्रीतो यत्तन्मोहविजृम्भितम् ॥ ०२८२॥
ENMSS@0283@1अङ्गमनङ्गक्लिष्टं सुखयेदन्या न मे करस्पर्शात् ।
ENMSS@0283@2नोच्छ्वसिति तपनकिरणैश्चन्द्रस्येवांशुभिः कुमुदम् ॥ ०२८३॥
ENMSS@0284@1अङ्गयुक्तः कृतास्त्रश्च कुर्वन् सम्यक्पुरोविधिम् ।
ENMSS@0284@2विजानन् सिद्धसाध्यादीन् वैरिणोऽस्त्रैर्न पीड्यते ॥ ०२८४॥
ENMSS@0285@1अङ्गसङ्गात् तथा जीवो भजते प्राकृतान् गुणान् ।
ENMSS@0285@2अहंकाराभिभूतः सन् भिन्नस्तेभ्योऽपि सोऽव्ययः ॥ ०२८५॥
ENMSS@0286@1अङ्गाः संजातभङ्गाद्यनवनवसतिप्राप्तरङ्गाः
कलिङ्गास्तैलङ्गाःस्वर्गगङ्गाभिषवणमतयः शीर्यदङ्गाश्च वङ्गाः ।
ENMSS@0286@2लाटाःस्विद्यल्ललाटाः पदगमनदृढाश्वासलोलाश्च चोला जायन्ते श्रीनिजाम

पृथुरण भवतः प्रौढनिःसाणनादात् ॥ ०२८६॥
ENMSS@0287@1अङ्गाकृष्टदुकूलया सरभसं गूढौ भुजाभ्यां स्तनावाकृष्टे
जघनांशुके कृतमधः संसक्तमूरुद्वयम् ।
ENMSS@0287@2नाभीमूलनिबद्धचक्षुषि मयि व्रीडानताङ्ग्या तया दीपः
स्फूत्कृतवातवेपितशिखः कर्णोत्पलेनाहतः ॥ ०२८७॥
ENMSS@0288@1अङ्गाकृष्टिर्व्यथयति नखाङ्केषु वक्षोजकुम्भा- वास्यं जृम्भा
दशनवसने दन्तदष्टं दुनोति ।
ENMSS@0288@2यान्त्याः खेदं व्रजति करजश्रेणिषु श्रोणिभागः प्रातर्याति प्रगुणतरतां
वैशसं नैशमस्याः ॥ ०२८८॥
ENMSS@0289@1अङ्गाङ्गमागते शत्रौ किं करोति परिच्छदः ।
ENMSS@0289@2राहुणा ग्रसिते चन्द्रे किं किं भवति तारकैः ॥ ०२८९॥
ENMSS@0290@1अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः ।
ENMSS@0290@2पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः ॥ ०२९०॥
ENMSS@0291@1अङ्गानामतितानवं कुत इदं कम्पश्च कस्मात् कुतो मुग्धे
पाण्डुकपोलमाननमिति प्राणेश्वरेपृच्छति ।
ENMSS@0291@2तन्व्या सर्वमिदं स्वभावत इति व्याहृत्य पक्ष्मान्तर- व्यापी
बाष्पभरस्तया वलितया निःश्वस्य मुक्तोऽन्यतः ॥ ०२९१॥
ENMSS@0292@1अङ्गानि खेदयसि किं शिरीषकुसुमपरिपेलवानि मुधा ।
ENMSS@0292@2अयमीहितकुसुमानां संपादयिता तवास्ति दासजनः ॥ ०२९२॥
ENMSS@0293@1अङ्गानि चन्दनरजःपरिधूसराणि ताम्बूलरागसुभगोऽधरपल्लवश्च ।
ENMSS@0293@2स्वच्छाञ्जने च नयने वसनं तनीयः कान्तासु भूषणमिदं विबह्वश्च
शेषः ॥ ०२९३॥
ENMSS@0294@1अङ्गानि दत्त्वा हेमाङ्गि प्राणान् क्रीणासि चेन् नृणाम् ।
ENMSS@0294@2युक्तमेतन् न तु पुनः कोणं नयनपद्मयोः ॥ ०२९४॥
ENMSS@0295@1अङ्गानि धीपटुत्वं शक्तिर्दशनाः शनैर्विशीर्यन्ते ।
ENMSS@0295@2निखिलेन्द्रियाणि येषां चिरायुषस्ते नरा ज्ञेयाः ॥ ०२९५॥
ENMSS@0296@1अङ्गानि निद्रालसविभ्रमाणि वाक्यानि किंचिन् मदलालसानि ।
ENMSS@0296@2भ्रूक्षेपजिह्मानि च वीक्षितानि चकार कामः प्रमदाजनानाम् ॥ ०२९६॥
ENMSS@0297@1अङ्गानि मे दहतु कान्तवियोगवह्निः सम्रक्षतु प्रियतमं हृदि
वर्ततेऽसौ ।
ENMSS@0297@2इत्याशया शशिमुखी जलदश्रुवारि- धाराभिरुष्णमभिषिश्चति

हृत्प्रदेशम् ॥ ०२९७॥

ENMSS@0298@1अङ्गानि श्लथनिः सहानि नयते मुग्धालसे विभ्रमश्-

वासोत्कम्पितकोमलस्तनमुरः सायाससुप्ते भ्रुवौ ।

ENMSS@0298@2किं चान्दोलनकौतुकव्युपरतावास्येषु वामभ्रुवां स्वेदाम्भः

स्तपिताकुलालकलतेष्वावासितो मन्मथः ॥ ०२९८॥

ENMSS@0299@1अङ्गामोदसमोच्छलद्घुणिपतद्भृङ्गावलीमालित-

स्फूर्जल्लञ्छनसूत्रगुम्फितमिलन्नीलोत्पलश्रीरिव ।

ENMSS@0299@2निर्यत्पादनखोन्मुखांशुविसरस्रग्दन्तुरः स्मर्यतां मञ्जुश्रीः

सुरमुक्तमञ्जरिशिखावर्षैरिवाभ्यर्चितः ॥ ०२९९॥

ENMSS@0300@1अङ्गारपूर्वे गमने च लाभः सोमे शनौ दक्षिणमर्थलाभम् ।

ENMSS@0300@2बुधे गुरौ पश्चिमकार्यसिद्धी रवौ भृगौ चोत्तरमर्थलाभः ॥ ०३००॥

ENMSS@0301@1अङ्गारशूलाश्मपलालकेश- विस्तीर्णविद्विर्ममृतेषु दृष्टः ।

ENMSS@0301@2श्वा मूत्रयन्यच्छति कार्यनाशं दारिद्र्यमृत्युप्रमुखाननर्थान् ॥ ०३०१॥

ENMSS@0302@1अङ्गारसदृशी नारी घृतकुम्भसमः पुमान् ।

ENMSS@0302@2ये प्रसक्ता विलीनास्ते ये स्थितास्ते पदे स्थिताः ॥ ०३०२॥

ENMSS@0303@1अङ्गारसदृशी योषित् सर्पिःकुम्भसमः पुमान् ।

ENMSS@0303@2तस्याः परिसरे ब्रह्मन् स्थातव्यं न कदाचन ॥ ०३०३॥

ENMSS@0304@1अङ्गारहासिषु विलासगृहोदरेषु तल्पेषु तूलपटकल्पितवेष्टनेषु ।

ENMSS@0304@2उष्णेषु च प्रणयिनीकुचमण्डलेषु शान्तिं जगाम शिशिरस्य तुषारगर्वः ॥ ०३०४॥

ENMSS@0305@1अङ्गारैः खचितेव भूर्वियदपि ज्वालाकरालं करैस्तिग्मांशोः किरतीव तीव्रमभितो वायुः कुकूलानलम् ।

ENMSS@0305@2अप्यम्भांसि नखंपचानि सरितामाशा ज्वलन्तीव च

ग्रीष्मेऽस्मिन्नववह्निदीपितमिवाशेषं जगद्वर्तते ॥ ०३०५॥

ENMSS@0306@1अङ्गारैः शाकवृक्षस्य चूर्णितैः सघृतैस्त्र्यहम् ।

ENMSS@0306@2दत्तैर्नश्यत्यतीसारस्त्र्यहं पानीयवारणात् ॥ ०३०६॥

ENMSS@0307@1अङ्गासङ्गिमृणालकाण्डमयते भृङ्गावलीनां रुचं

नासामौक्तिकमिन्द्रनीलसरणिं श्वासानिलाद् गाहते ।

ENMSS@0307@2दत्तेयं हिमवालुकापि कुचयोर्धत्ते क्षणं दीपतां

तप्तायःपतिताम्बुवत्करतले धाराम्बु संलीयते ॥ ०३०७॥

ENMSS@0308@1अङ्गीकुरु त्वमवधीरय वा वयं तु दासास्तवेति वचसैव जयेम लोकान् ।

ENMSS@0308@2एतावतैव सुकरो ननु विश्वमात- रुद्दण्डदण्डधरकिंकरमौलिभङ्गः ॥ ०३०८॥

ENMSS@0309@1अङ्गीकुर्वन्ति भङ्गीमखिलगिरिगणास्तप्तजाम्बूनदीयां दूरीकुर्वन्ति पूरीकृतकनकगिरिस्फारगवं च यस्याः ।

ENMSS@0309@2उन्मत्तध्वान्तधारासुरवरपटलीदाहसञ्जातकीर्तिः सेयं प्राची प्रदीप्तिर्दलयतु दुरितं सर्वदा सर्वदा मे ॥ ०३०९॥

ENMSS@0310@1अङ्गीकुर्वन्नमृतरुचिरामुत्पतिष्णोस्सलीलं छायामन्तस्तव मणिमयो माल्यवानेष शैलः ।

ENMSS@0310@2शोभां वक्ष्यत्यधिकललितां शोभमानामतीन्दोर्देवस्यादेरुपजनयतो मानसादिन्दुबिम्बम् ॥ ०३१०॥

ENMSS@0311@1अङ्गीकृततितिक्षः सेड् गुणी निष्ठापरो यथा ।

ENMSS@0311@2मृषिस्तथा विजयते श्रीरामो राजसत्तमः ॥ ०३११॥

ENMSS@0312@1अङ्गीकृत्ताः क्षतिमिमामपि ये विषह्य गोप्तुं गुणान् किमिति वाञ्छसि तान्मुधैव ।

ENMSS@0312@2मुक्तामणेर्विमलरूपतया नितान्तम् एते तव स्वयमपि प्रकटीभवन्ति ॥ ०३१२॥

ENMSS@0313@1अङ्गुलिभङ्गविकल्पन- विविधविवादप्रवृत्तपाण्डित्यः ।

ENMSS@0313@2जपचपलोष्ठः सजने ध्यानपरो नगररथ्यासु ॥ ०३१३॥

ENMSS@0314@1अङ्गुलीकिसलयाग्रतर्जनं भ्रूविभङ्गकुटिलं च वीक्षितम् ।

ENMSS@0314@2मेखलाभिरसकृच्च बन्धनं वञ्चयन् प्रणयिनीरवाप सः ॥ ०३१४॥

ENMSS@0315@1अङ्गुलीभिः कुरङ्गाक्ष्याः शोभते मुद्रिकावलिः ।

ENMSS@0315@2प्रोतेव बाणैः पञ्चेषोः सूक्ष्मा लक्ष्यपरम्परा ॥ ०३१५॥

ENMSS@0316@1अङ्गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः ।

ENMSS@0316@2कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥ ०३१६॥

ENMSS@0317@1अङ्गुल्यः पञ्चमे मासे दृष्टिकुक्षौ च षष्ठमे ।

ENMSS@0317@2संचारः सप्तमे मासे अष्टमे नयनेषु च ॥ ०३१७॥

ENMSS@0318@1अङ्गुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः ।

ENMSS@0318@2बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी ॥ ०३१८॥

ENMSS@0319@1अङ्गुल्यग्रनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य किं तूष्णीं रोदिषि कोपने बहुतरं फूत्कृत्य रोदिष्यसि ।

ENMSS@0319@2यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥ ०३१९॥

ENMSS@0320@1अङ्गुल्यग्रनिरोधतस्तनुतरां धारामियं तन्वती कर्कया न परं पयो निपुणिका दातुं प्रपापालिका ।

ENMSS@0320@2विश्लिष्टाङ्गुलिना करेण दशनापाडं शनैः पान्थ हे निश्पन्दोर्ध्वविलोचनस्त्वमपि हा जानासि पातुं पयः ॥ ०३२०॥

ENMSS@0321@1अङ्गुल्यग्रेण यज्ञप्तं यज्ञप्तं मेरुलङ्घने ।

ENMSS@0321@2व्यग्रचित्तेन यज्ञप्तं त्रिविधं निष्फलं भवेत् ॥ ०३२१॥

ENMSS@0322@1अङ्गुल्या कः कवाटं प्रहरति कुटिले माधवः किं वसन्तो नो चक्री किं

कुलालो न हि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।

ENMSS@0322@2नाहं घोराहिमर्दी किमसि खगपतिर्नो हरिः किं कपीन्द्रः इत्येवं गोपकन्याप्रतिवचनजितः पातु वश्चक्रपाणिः ॥ ०३२२॥

ENMSS@0323@1अङ्गुष्ठतर्जनीभ्यां गा घ्राणे संगृह्य नामयेत् ।

ENMSS@0323@2मन्त्रेणानेन वश्याः स्युः पशवोऽश्वादयस्तथा ॥ ०३२३॥

ENMSS@0324@1अङ्गुष्ठनखदम्भेन पादयोः पतितः किमु ।

ENMSS@0324@2विभाति वक्त्रविजितः शशी विगतकल्मषः ॥ ०३२४॥

ENMSS@0325@1अङ्गुष्ठनखमूले तु तर्जन्यग्रं सुसंस्थितं ।

ENMSS@0325@2मत्सरी सा च विज्ञेया चित्रलक्ष्यस्य वेधने ॥ ०३२५॥

ENMSS@0326@1अङ्गुष्ठाक्रमवक्रिताङ्गुलिरधः पादार्धनीरुद्धभूः पार्श्वद्विगकृतो निहत्य कफणिद्वन्द्वेन दंशान्मुहुः ।

ENMSS@0326@2न्यग्जानुद्वययन्त्रयन्त्रितघटीवक्त्रान्तरालस्खलद् धाराध्वानमनोहरं सखि पयो गां दोग्धि गोपालकः ॥ ०३२६॥

ENMSS@0327@1अङ्गुष्ठाग्रे तु तर्जन्या मुखं यत्र निवेशितं ।

ENMSS@0327@2काकतुण्डी च विज्ञेया सूक्ष्मलक्ष्येषु योजिता ॥ ०३२७॥

ENMSS@0328@1अङ्गुष्ठे पदगुल्फजानुजघने नाभौ च वक्षःस्तने कक्षाकण्ठकपोलदन्तवसने नेत्रालिके मूर्धनि ।

ENMSS@0328@2शुक्लाशुक्लविभागतो मृगदृशामङ्गेष्वनङ्गस्थिती- रूर्ध्वाधोगमनेन वामपदगाः पक्षद्वये लक्षयेत् ॥ ०३२८॥

ENMSS@0329@1अङ्गुष्ठोदरमात्रं विशेषवित्प्राप्य पद्मरागमणिम् ।

ENMSS@0329@2सुखसंवाह्यमनुत्तरं अर्थं किं तेन नाप्नोति ॥ ०३२९॥

ENMSS@0330@1अङ्गेन केनापि विजेतुमस्या गवेष्यते किं चलपत्रपत्रं ।
ENMSS@0330@2न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ॥ ०३३०॥
ENMSS@0331@1अङ्गेन गात्रं नयनेन वक्त्रं न्यायेन राज्यं लवणेन भोज्यं ।
ENMSS@0331@2धर्मेण हीनं खलु जीवितं च न राजते चन्द्रमसा विना निशा ॥ ०३३१॥
ENMSS@0332@1अङ्गेऽनङ्गज्वरहुतवहश्चक्षुषि ध्यानमुद्रा कण्ठे जीवः करकिसलये दीर्घशायी कपोलः ।
ENMSS@0332@2अंसे वीणा कुचपरिसरे चन्दनं वाचि मौनं तस्याः सर्वं स्थितमिति न तु त्वां विना क्वापि चेतः ॥ ०३३२॥
ENMSS@0333@1अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं सास्रेण्यास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
ENMSS@0333@2अष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती संकल्पैस्ते विशति विधिना वैरिणा रुद्धमार्गः ॥ ०३३३॥
ENMSS@0334@1अङ्गेनाङ्गमनुप्रविश्य मिलतो हस्तावलेपादिभिः का वार्ता युधि गन्धसिन्धुरपतेर्गन्धोऽपि चेत्के द्विपाः ।
ENMSS@0334@2जेतव्योऽस्ति हरेः स लाञ्छनमतो वन्दामहे तामभूद् यद्वभ शरभः स्वयंजय इति श्रुत्वापि यो नाङ्कितः ॥ ०३३४॥
ENMSS@0335@1अङ्गेषु चतुरश्रत्वं समपादौ लताकरौ ।
ENMSS@0335@2प्रारम्भे सर्वनृत्यानाम् एतत्सामान्यमुच्यते ॥ ०३३५॥
ENMSS@0336@1अङ्गेषु मुख्या द्विजमध्यसंस्था वाणानुसंधान परासि नित्यं ।
ENMSS@0336@2अधं स्थिरप्रेमरसा रसज्ञे नरस्तुतिं संत्यज कर्णवत् त्वं ॥ ०३३६॥
ENMSS@0337@1अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि संचारिणि प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति ।
ENMSS@0337@2इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत- व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥ ०३३७॥
ENMSS@0338@1अङ्गैः सुकुमारतरैः सा कुसुमानां श्रियं प्रहरति ।
ENMSS@0338@2विकलयति कुसुमबाणो बाणालीभिर्मम प्राणान् ॥ ०३३८॥
ENMSS@0339@1अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु ।
ENMSS@0339@2शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ भावो भावं नुदति विषयाद्रागबन्धः स एव ॥ ०३३९॥

ENMSS@0340@1अङ्घ्रिदण्डो हरेरूर्ध्वम् उत्क्षिप्तो बलिनिग्रहे ।
ENMSS@0340@2विधिविष्टरपद्मस्य नालदण्डो मुदेऽस्तु वः ॥ ०३४०॥
ENMSS@0341@1अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्याम् ।
ENMSS@0341@2भृशमरतिमवाप्य तत्र चास्यास्तव सुखशीतमुपैतुमङ्कमिच्छा ॥ ०३४१॥
ENMSS@0342@1अचञ्चलं मुग्धमुदञ्चितं दृशोरनुन्नतं श्रीमदुरो मृगीदृशः ।
ENMSS@0342@2अभङ्गुराकूतवती गतिर्भ्रुवोरबद्धलक्ष्यं क्वचिदुत्क्रमान्तरम् ॥ ०३४२॥
ENMSS@0343@1अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
ENMSS@0343@2अभाललोचनः शंभुर्भगवान् बादरायणः ॥ ०३४३॥
ENMSS@0344@1अचलं चलदिव चक्षुः प्रकृतमपीदं समुद्यदिव वक्षः ।
ENMSS@0344@2अतदिव तदपि शरीरं संप्रति वामभ्रुवो जयति ॥ ०३४४॥
ENMSS@0345@1अचला कमला कस्य कस्य मित्रं महीपतिः ।
ENMSS@0345@2शरीरं च स्थिरं कस्य कस्य वश्या वराङ्गना ॥ ०३४५॥
ENMSS@0346@1अचला कमला हि कस्य कस्य क्षितिपालः किल मित्रमस्ति लोके ।
ENMSS@0346@2इह वश्यतमा च कस्य वेश्या स्थिरमप्यस्ति च कस्य देहमत्र ॥ ०३४६॥
ENMSS@0347@1अचिन्तनीया विधिवञ्चनेयं यदम्बुजाक्षी स्थविरस्य भर्तुः ।
ENMSS@0347@2स्वयं समादाय करं निधाय वक्षोजयुग्मे स्वपिति श्वसन्ती ॥ ०३४७॥
ENMSS@0348@1अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।
ENMSS@0348@2सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ ०३४८॥
ENMSS@0349@1अचिन्त्यमतिदुःसहं त्रिविधदुःखमेनोऽर्जितं चतुर्विधगतिश्रितं भवभृता न किं प्राप्यते ।
ENMSS@0349@2शरीरमसुखाकरं जगति गृह्णता मुञ्चता तनोति न तथाप्ययं विरतिमूर्जितां पापतः ॥ ०३४९॥
ENMSS@0350@1अचिन्त्याः पन्थानः किमपि महतामन्धकरिपोर्यदक्ष्णोऽभूत् तेजस्तदकृत कथाशेषमदनम् ।
ENMSS@0350@2मुनेर्नेत्रादत्रेर्यदजनि पुनर्ज्योतिरहह प्रतेने तेनेदं मदनमयमेव त्रिभुवनम् ॥ ०३५०॥
ENMSS@0351@1अचिरात् परात्मनिष्ठा भवति यतस्तत्क्रियेत चतुरेण क्लेशेन् कामदमनं धिगेकदारञ्जयन्तमात्मानम् ॥

ENMSS@0352@1अचिरादुपकर्तुराचरेद् अथ वात्मौपयिकीमुपक्रियाम् ।
ENMSS@0352@2पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः ॥ ०३५२॥
ENMSS@0353@1अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
ENMSS@0353@2नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥ ०३५३॥
ENMSS@0354@1अचिरेण परस्य भूयसों विपरीतां विगणय्य चात्मनः ।
ENMSS@0354@2क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ०३५४॥
ENMSS@0355@1अचिरेण रोचते मे दिवसानेवं वृथातिवाहयते ।
ENMSS@0355@2श्रितकृष्णपक्षगतये वयस्य काम्यस्तनीविरहः ॥ ०३५५॥
ENMSS@0356@1अचुम्बि या चन्दनबिन्दुमण्डली नलीयवक्त्रेण सरोजतर्जिना ।
ENMSS@0356@2श्रियं श्रिता काचन तारकासखी कृताशशाङ्कस्य तयाङ्कवर्तिनी
॥ ०३५६॥
ENMSS@0357@1अचेतना अपि प्रायो मैत्रीमेवानुबध्यते ।
ENMSS@0357@2स्ववृद्धात् क्षीयते क्षीरात् क्षीरात् प्रागेव वारिणा ॥ ०३५७॥
ENMSS@0358@1अचेष्टमानमासीनं श्रीः कंचिदुपतिष्ठति ।
ENMSS@0358@2कश्चित् कर्माणि कुर्वन् हि न प्राप्यमधिगच्छति ॥ ०३५८॥
ENMSS@0359@1अचोद्यमानानि यथा पुष्पाणि च फलानि च ।
ENMSS@0359@2स्वकालं नातिवर्तन्ते तथा कर्म पुराकृतम् ॥ ०३५९॥
ENMSS@0360@1अच्छप्रकाशवति चन्द्रमसि प्रियेऽस्मिन्न् आह्लादकारिणि सुधावति पूर्णबिम्बे ।
ENMSS@0360@2धाता विचिन्त्य मनसाखिलदृष्टिपातं हर्तुं चकार किमु कज्जलबिन्दुयोगम्
॥ ०३६०॥
ENMSS@0361@1। । । । । ।
ENMSS@0361@2अच्छलं मित्रभावेन सतां दारावलोकनम्
ENMSS@0362@1अच्छाच्छचन्दनरसार्द्रकरा मृगाक्ष्यो धारागृहाणि कुसुमानि च
कौमुदी च ।
ENMSS@0362@2मन्दो मरुत् सुमनसः शुचि हर्म्यपृष्ठं ग्रीष्मे मदं च मदनं
च विवर्धयन्ति ॥ ०३६२॥
ENMSS@0363@1अच्छासु हंस इव बालमृणालिकासु भृङ्गो नवास्विव मधुद्रुममञ्जरीषु
।
ENMSS@0363@2कोऽवन्तिभर्तुरपरो रसनिर्भरासु पृथ्वीपतिः सुकविसूक्तिषु बद्धभावः
॥ ०३६३॥

ENMSS@0364@1अच्छिद्रमस्तु हृदयं परिपूर्णमस्तु मौखर्यमस्तमितमस्तु गुरुत्वमस्तु ।

ENMSS@0364@2कृष्णप्रिये सखि दिशामि सदाशिषस्ते यद्वासरे मुरलि मे करुणां करोषि ॥ ०३६४॥

ENMSS@0365@1अच्छिन्नं नयनाम्बु बन्धुषु कृतं चिन्ता गुरुष्वर्पिता दत्तं दैन्यमशेषतः परिजने तापः सखीष्वाहितः ।

ENMSS@0365@2अद्य श्वः परनिर्वृतिं भजति सा श्वासैः परं खिद्यते विश्रब्धो भव विप्रयोगजनितं दुःखं विभक्तं तया ॥ ०३६५॥

ENMSS@0366@1अच्छिन्नमेखलमलब्धदृढोपगूढम् अप्राप्तचुम्बनमवीक्षितवक्रकान्ति ।

ENMSS@0366@2कान्ताविमिश्रवपुषः कृतविप्रलम्भ- सम्भोगसख्यमिव पातु वपुः स्मरारेः ॥ ०३६६॥

ENMSS@0367@1अच्छिन्नामृतबिन्दुवृष्टिसदृशीं प्रीतिं ददत्या दृशां याताया विगलत्पयोधरभराद्द्रष्टव्यतां कामपि ।

ENMSS@0367@2अस्याश्चन्द्रमसस्तनोरिव करस्पर्शास्पदत्वं गता नैते यन्मुकुलीभवन्ति सहसा पद्मास्तदेवाद्भुतम् ॥ ०३६७॥

ENMSS@0368@1अच्छेद्योऽयमदाह्योऽयम् अक्लेद्योऽशोष्य एव च ।

ENMSS@0368@2नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ ०३६८॥

ENMSS@0369@1अच्युतचरणतरङ्गिणि शशिशेखरमौलिमालतीमाले ।

ENMSS@0369@2त्वयि तनुवितरणसमये हरता देया न मे हरिता ॥ ०३६९॥

ENMSS@0370@1अच्युतभक्तिवशादिह समभावस्तत्प्रसङ्गेन ।

ENMSS@0370@2सा रमतेरभ्युदयति रतिरिति नैवाद्भुतं किंचित् ॥ ०३७०॥

ENMSS@0371@1अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।

ENMSS@0371@2नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ ०३७१॥

ENMSS@0372@1अजनि प्रतिदिनमेषा कर्दमशेषा मदङ्गसङ्गेन ।

ENMSS@0372@2प्रतिनिशमपूरि पम्पा दक्षिणसंपातिभिः सलिलैः ॥ ०३७२॥

ENMSS@0373@1अजनि भगवानस्माद्वेधाः शिरःसु सुधाभुजां कृतपदमिदं चैतद्देव्याः श्रियो धृतिमन्दिरम् ।

ENMSS@0373@2तदिह भुवनाभोगश्लाघ्ये सरोरुहि यच्चिरं शशधर तव द्वेषारम्भः स एष जडग्रहः ॥ ०३७३॥

ENMSS@0374@1अजनि रजनिरन्या चन्द्रमः कान्तिवन्या- विपुलचपलवीचिव्याचिता काचिदेव ।

ENMSS@0374@2सतरुगिरिसरिद्भिः किं हरिद्भिः समेतं धवलिमनि धरित्रीमण्डलं

मग्नमेतत् ॥ ०३७४॥

ENMSS@0375@1अजनि शिशिरशीलं शैवलं सागरे यच्चिकुरमकृत कामस्तन्वि ते किं न तेन ।

ENMSS@0375@2वहति कुटिलमेनं हेतुना केन मूर्ध्ना वदनविधुरयं चेत् सोदरो नादसीयः ॥ ०३७५॥

ENMSS@0376@1अजन्मा पुरुषस्तावद् गतासुस्तृणमेव वा ।

ENMSS@0376@2यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः ॥ ०३७६॥

ENMSS@0377@1अजन्यकम्पाः शूरा ये नित्यमप्यपराङ्मुखाः ।

ENMSS@0377@2दर्शयन्त्यपरागेण परेभ्यश्चित्ररूपवत् ॥ ०३७७॥

ENMSS@0378@1अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ।

ENMSS@0378@2गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ०३७८॥

ENMSS@0379@1अजवच्चर्वणं कुर्याद् गजवत् स्नानमाचरेत् ।

ENMSS@0379@2राजवत् प्रविशेद्ग्रामं चोरवद्गमनं चरेत् ॥ ०३७९॥

ENMSS@0380@1अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।

ENMSS@0380@2स्वपतो जागरूकस्य याथात्म्यं वेद कस्तव ॥ ०३८०॥

ENMSS@0381@1अजस्रं लसत्पद्मिनी वृन्दसङ्गं मधूनि प्रकामं पिबन्तं मिलिन्दम् ।

ENMSS@0381@2रविर्मोचयत्यब्जकारागृहेभ्यो दयालुर्हि नो दुष्टवद् दोषदर्शी ॥ ०३८१॥

ENMSS@0382@1अजस्रभूमीतटकुट्टनोत्थितैरुपास्यमानं चरणेषु रेणुभिः ।

ENMSS@0382@2रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥ ०३८२॥

ENMSS@0383@1अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च ।

ENMSS@0383@2दधौ पटीयान् समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥ ०३८३॥

ENMSS@0384@1अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयाम् ।

ENMSS@0384@2श्वासान् स वर्षत्यधिकं पुनर्यद् ध्यानात्तव त्वन्मयतां तदाप्य ॥ ०३८४॥

ENMSS@0385@1अजा इव प्रजा मोहाद् यो हन्यात् पृथिवीपतिः ।

ENMSS@0385@2तस्यैका जायते तृप्तिर्न द्वितीया कथंचन ॥ ०३८५॥

ENMSS@0386@1अजागलस्थस्तन उष्ट्रपुच्छं कक्षान्तरे केशमथाण्डयुग्मम् ।

ENMSS@0386@2त्वां संसृजन् सायणमायणादौ ब्रह्माग्रगण्यो न बभूव पूज्यः ॥ ०३८६॥

ENMSS@0387@1अजाङ्घ्रिनिर्दत्तरजश्चयापि कपालिना बद्धरसापि कामम् ।

ENMSS@0387@2ततोऽप्यधोधः पतितापि नित्यं गङ्गा कुसङ्गापि पुनाति लोकान् ॥ ०३८७॥

ENMSS@0388@1अजाजीजम्बाले रजसि मरिचानां च लुठिताः

कटुत्वादुष्णत्वाञ्जनितरसनौष्ठव्यतिकराः ।

ENMSS@0388@2अनिर्वाणोत्थेन प्रबलतरतैलाक्ततनवो मया सद्यो भृष्टाः कतिपयकवय्यः

कवलिताः ॥ ०३८८॥

ENMSS@0389@1अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः ।

ENMSS@0389@2सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ ०३८९॥

ENMSS@0390@1अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम् ।

ENMSS@0390@2यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ॥ ०३९०॥

ENMSS@0391@1अजातरोमामतिसुन्दराङ्गीं शृङ्गारवल्लीमिव राजकन्याम् ।

ENMSS@0391@2भुक्त्वा द्रुतं क्वापि गतो न चेत् स्याः स्यात्ते तदानर्थनिपात एव ॥ ०३९१॥

ENMSS@0392@1अजाधूलिरिव त्रस्तैर्मार्जनीरेणुवज्जनैः ।

ENMSS@0392@2दीपखट्वोत्थच्छायेव त्यज्यते निर्धनो जनः ॥ ०३९२॥

ENMSS@0393@1अजानता भवेत्कश्चिद् अपराधः कुतो यदि क्षन्तव्यमेव तस्याहुः सुपरीक्ष्य

परीक्षया ॥

ENMSS@0394@1अजानती कापि विलोकनोत्सुका समीरधूतार्धमपि स्तनांशुकम् ।

ENMSS@0394@2कुचेन तस्मै चलतेऽकरोत् पुरः पुराङ्गना मङ्गलकुम्भसंभृतिम्

॥ ०३९४॥

ENMSS@0395@1अजानन् माहात्म्यं पतति शलभस्तीव्रदहने स मीनोऽप्यज्ञानाद्

बडिशयुतमश्नातु पिशितम् ।

ENMSS@0395@2विजानन्तोऽप्येते वयमिह विपज्जालजटिलान् न मुञ्चामः कामानहह गहनो

मोहमहिमा ॥ ०३९५॥

ENMSS@0396@1अजामूत्रं च तद्विष्ठा सूकरस्य तथैव विट् ।

ENMSS@0396@2बुद्बुदं लेपतो हन्यान् मण्डलिक्ष्वेडसंभवम् ॥ ०३९६॥

ENMSS@0397@1अजायन्तैतस्मादमृतशशिलक्ष्मीप्रभृतयः परित्राताश्चेन्द्रात्

कुलशिखरिणः पूर्वयमुना ।

ENMSS@0397@2उपेता इत्येवं तव जलनिधे तीरमधुना विगर्जाभिः किं नः श्रुतिपुटमहो

जर्जरयसि ॥ ०३९७॥

ENMSS@0398@1अजायुद्धमृषिश्राद्धं प्रभाते मेघडम्बरः ।

ENMSS@0398@2दम्पत्योः कलहश्चैव बह्वारम्भे लघुक्रिया ॥ ०३९८॥

ENMSS@0399@1अजारजः खररजस्तथा संमार्जनीरजः ।
ENMSS@0399@2दीपखट्वोत्थच्छाया च शक्रस्यापि श्रियं हरेत् ॥ ०३९९॥
ENMSS@0400@1अजारजः पर्वणि मैथुनानि श्मशानधूमो मठभोजनानि ।
ENMSS@0400@2रजस्वलानेत्रनिरीक्षणानि हरन्ति पुण्यानि दिवा कृतानि ॥ ०४००॥
ENMSS@0401@1अजाविगर्दभोष्ट्राणां मार्जारमूषिकस्य च ।
ENMSS@0401@2रजांस्येतानि पापानि सर्वतः परिवर्जयेत् ॥ ०४०१॥
ENMSS@0402@1अजाश्वयोर्मुखं मेध्यं गावो मेध्यास्तु पृष्ठतः ।
ENMSS@0402@2ब्राह्मणाः पादतो मेध्याः स्त्रियो मेध्याश्च सर्वतः ॥ ०४०२॥
ENMSS@0403@1अजा सिंहप्रसादेन वने चरति निर्भयम् ।
ENMSS@0403@2राममासाद्य लङ्कायां लेभे राज्यं विभीषणः ॥ ०४०३॥
ENMSS@0404@1अजितेन्द्रियवर्गस्य नाचारेण भवेत् फलम् ।
ENMSS@0404@2केवलं देहखेदाय दुर्भगस्य विभूषणम् ॥ ०४०४॥
ENMSS@0405@1अजित्वा सार्णवामुर्वीम् अनिष्ट्वा विविधैर्मखैः ।
ENMSS@0405@2अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥ ०४०५॥
ENMSS@0406@1अजीयतावर्तशुभंयुनाभ्यां दोर्भ्यां मृणालं किमु कोमलाभ्याम् ।
ENMSS@0406@2निः सूत्रमास्ते घनपङ्कमृत्सु मूर्तासु नाकीर्तिषु तन्निमग्नम् ॥ ०४०६॥
ENMSS@0407@1अजीर्णं तपसः क्रोधो ज्ञानाजीर्णमहंकृतिः ।
ENMSS@0407@2परिनिन्दा क्रियांजीर्णम् अन्नाजीर्णं विषूचिका ॥ ०४०७॥
ENMSS@0408@1अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम् ।
ENMSS@0408@2भोजने चामृतं वारि भोजनान्ते विषापहम् ॥ ०४०८॥
ENMSS@0409@1अजेयः सुभगः सौम्यः त्यागी भोगी यशोनिधिः ।
ENMSS@0409@2भवत्यभयदानेन चिरंजीवी निरामयः ॥ ०४०९॥
ENMSS@0410@1अजैडकासूकरविड्विडङ्ग- किण्वोपचारेण च बीजपूरः ।
ENMSS@0410@2भूयोश्वमूत्राविलवारिसिक्तः फलानि धत्ते सुबहूनि शश्वत् ॥ ०४१०॥
ENMSS@0411@1अर्जितं स्वेन वीर्येण नान्यपाश्रित्य कंचन ।
ENMSS@0411@2फलशाकमपि श्रेयो भोक्तुं ह्यकृपणं गृहे ॥ ०४११॥
ENMSS@0412@1अज्ञं कर्माणि लिम्पन्ति तज्ज्ञं कर्म न लिम्पति ।
ENMSS@0412@2लिप्यते रसनैवैका सर्पिषा करवद् यथा ॥ ०४१२॥
ENMSS@0413@1अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ENMSS@0413@2ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ ०४१३॥
ENMSS@0414@1अज्ञतया प्रेम्णा वा चूडामणिमाकलय्य काचमणिम् ।

ENMSS@0414@2नृपतिर्वहेत शिरसा तेनासौ नह्यनर्घ्यमणिः ॥ ०४१४॥
ENMSS@0415@1अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
ENMSS@0415@2नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ०४१५॥
ENMSS@0416@1अज्ञस्तावदहं न मन्दधिषणः कर्तुं मनोहारिणीश्चाटूक्तीः प्रभवामियामिभवतो याभिः कृपापात्रताम् ।
ENMSS@0416@2आर्तेनाशरणेन किं तु कृपणेनाक्रन्दितं कर्णयोः कृत्वा सत्वरमे हि देहि चरणं मूर्धन्यधन्यस्य मे ॥ ०४१६॥
ENMSS@0417@1अज्ञातकालोचितकर्मयोगा रोगा इवाहर्निशि पश्यमानाः जगत्रये देवमनुष्यनागाः ।
ENMSS@0417@2प्रज्ञादरिद्राः खलु सर्व एव ॥ ०४१७॥
ENMSS@0418@1अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
ENMSS@0418@2मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ ०४१८॥
ENMSS@0419@1अज्ञातकुलशीलेऽपि प्रीतिं कुर्वन्ति वानराः ।
ENMSS@0419@2आत्मार्थे च न रोदन्ति रोदन्ति त्वितरे जनाः ॥ ०४१९॥
ENMSS@0420@1अज्ञातदेशकालाश्चपलमुखा पङ्गवोऽपिस प्लुतयः ।
ENMSS@0420@2नवविहगा इव मुग्धा भक्ष्यन्ते धूर्तमार्जारैः ॥ ०४२०॥
ENMSS@0421@1अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः ।
ENMSS@0421@2भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ॥ ०४२१॥
ENMSS@0422@1अज्ञातनामवर्णेष्वात्मापि ययार्प्यते धनांशेन ।
ENMSS@0422@2तस्या अपि सद्भावं मृगयन्ते मोघसंकल्पाः ॥ ०४२२॥
ENMSS@0423@1अज्ञातपाण्डित्यरहस्यमुद्रा ये काव्यमार्गे दधतेऽभिमानम् ।
ENMSS@0423@2ते गारुडीयाननधीत्य मन्त्रान् हालाहलास्वादनमारभन्ते ॥ ०४२३॥
ENMSS@0424@1अज्ञातभाविचौरादि दोषैर्नित्यविनाशिना ।
ENMSS@0424@2हास्यैकहेतुना लोके गणकस्य धनेन किम् ॥ ०४२४॥
ENMSS@0425@1अज्ञातमहिमा वाणी शिवं स्तौतु रसोन्मदा ।
ENMSS@0425@2रसातिरेकादौचित्यभङ्गः स्त्रीणां क्व लभ्यते ॥ ०४२५॥
ENMSS@0426@1अज्ञातमातृल लन- मैणशिशुं कश्चिदङ्कमारोप्य ।
ENMSS@0426@2अद्यापि रक्षसि विधो धर्मात्मा कोनु भवदन्यः ॥ ०४२६॥
ENMSS@0427@1अज्ञातवीवधासारतोयसस्यो व्रजेत्तु यः परराष्ट्रं न भूयः स स्वराष्ट्रमधिगच्छति ॥
ENMSS@0428@1अज्ञातशास्त्रसद्भावाञ् छास्त्रमात्रपरायणान् ।

ENMSS@0428@2त्यजेद् दूराद् भिषक्पाशान् पाशान् वैवस्वतानिव ॥ ०४२८॥
ENMSS@0429@1अज्ञाताः पुरुषा यस्य प्रविशन्ति महीपतेः ।
ENMSS@0429@2दुर्गं तस्य न संदेहः प्रविशन्ति द्रुतं द्विषः ॥ ०४२९॥
ENMSS@0430@1अज्ञातागममीलिताक्षियुगलं किं त्वं मुधा तिष्ठसि ज्ञातोसि प्रकटप्रकम्पपुलकैरङ्गैः स्फुटं मुग्धया ।
ENMSS@0430@2मुञ्चैनां जड किं न पश्यसि गलद्बाष्पाम्बुधौताननां सख्यैवं गदिते विमुच्य रभसात् कण्ठेवलग्नो युवा ॥ ०४३०॥
ENMSS@0431@1अज्ञातेन्दुपराभवं परिलसद्यालोलनेत्राञ्जनं भ्रान्तभ्रूलतमैणनाभितिलकं श्रीखण्डपत्रालकम् ।
ENMSS@0431@2बन्धूकाधरसुन्दरं सुरमुनिव्यामोहि वाक्यामृतं त्रैलोक्याद्भुतपङ्कजं वरतनोरास्यं न कस्य प्रियम् ॥ ०४३१॥
ENMSS@0432@1अज्ञानं कारणं न स्याद् वियोगो यदि कारणम् ।
ENMSS@0432@2शोको दिनेषु गच्छत्सु वर्धतामपयाति किम् ॥ ०४३२॥
ENMSS@0433@1अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः ।
ENMSS@0433@2अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ॥ ०४३३॥
ENMSS@0434@1अज्ञानं यत्फलं तस्य रसोऽधर्मः प्रकीर्तितः ।
ENMSS@0434@2भावोदकेन संवृद्धिस्तस्याश्रद्धा ऋतुः प्रिय ॥ ०४३४॥
ENMSS@0435@1अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
ENMSS@0435@2चक्षुरुन् मीलितं येन तस्मै श्रीगुरवे नमः ॥ ०४३५॥
ENMSS@0436@1अज्ञानप्रभवं हीदं यद्दुःखमुपलभ्यते ।
ENMSS@0436@2लोभप्रभवमज्ञानं वृद्धं भूयः प्रवर्धते ॥ ०४३६॥
ENMSS@0437@1अज्ञानमिह निदानं प्राग्रूपं जननमेव भवरोगे ।
ENMSS@0437@2पारिपाकः संसरणं भैषज्यं नैष्ठिकी शान्तिः ॥ ०४३७॥
ENMSS@0438@1अज्ञानवरषण्डेन प्रसुप्तो नरगर्दभः ।
ENMSS@0438@2कः समर्थः प्रबोद्धुं तं ज्ञानभेरीशतैरपि ॥ ०४३८॥
ENMSS@0439@1अज्ञानवलितो बाल्ये मदमूढश्च यौवने ।
ENMSS@0439@2वार्द्धके विह्वलाङ्गश्च कदा कुशलभाग्जनः ॥ ०४३९॥
ENMSS@0440@1अज्ञानाज्ज्ञानतो वापि जम्बूर्येन प्ररोपिता ।
ENMSS@0440@2गृहेऽपि स वसन्नित्यं यतिधर्मेण युज्यते ॥ ०४४०॥
ENMSS@0441@1अज्ञानात् कुरुते श्राद्धं योऽभिश्रवणवर्जितम् ।
ENMSS@0441@2श्राद्धहन्ता भवेत्कर्ता निराशाः पितरो गताः ॥ ०४४१॥

ENMSS@0442@1अज्ञानाज्ज्ञानतो वापि यद्दुरुक्तमुदाहृतम् ।
ENMSS@0442@2तत् क्षन्तव्यं युवाभ्यां मे कृत्वा प्रीतिपरं मनः ॥ ०४४२॥
ENMSS@0443@1अज्ञानाद्यदि वा ज्ञानात् कृत्वा कर्म विगर्हितम् ।
ENMSS@0443@2तस्माद् विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत् ॥ ०४४३॥
ENMSS@0444@1अज्ञानाद्यदि वाधिपत्यरभसादस्मत्परोक्षं हृता सीतेयं प्रविमुच्यतां शठ मरुत्पुत्रस्य हस्तेऽधुना ।
ENMSS@0444@2नो चेल्लक्ष्मणमुक्तमार्गणगणच्छेदोच्छलच्छोणित-
च्छत्रच्छन्नदिगन्तमन्तकपुरं पुत्रैर्वृतो यास्यसि ॥ ०४४४॥
ENMSS@0445@1अज्ञानान्धमबान्धवं कवलितं रक्षोभिरक्षाभिधैः क्षिप्तं
मोहमहान्धकूपकुहरे दुर्हृद्भिराभ्यन्तरैः ।
ENMSS@0445@2क्रन्दन्तं शरणागतं गतधृतिं सर्वापदामास्पदं मा मां मुञ्च
महेश पेशलदृशा सत्रासमाश्वासय ॥ ०४४५॥
ENMSS@0446@1अज्ञानान्निरयं याति तथाज्ञानेन दुर्गतिम् ।
ENMSS@0446@2अज्ञानात् क्लेशमाप्नोति तथापत्सु निमज्जति ॥ ०४४६॥
ENMSS@0447@1अज्ञानामवनीभुजामहरः स्वर्णाभिषेकोत्सवाज्ज्ञातुः
श्रीयुवरङ्गभूपरसिकश्लाघैव संमानना ।
ENMSS@0447@2सारासारविवेकशून्यरमणीसंभोगसाम्राज्यतः
सारङ्गेन्दुमुखीविलोककपटश्चातुर्ययूनां मुदे ॥ ०४४७॥
ENMSS@0448@1अज्ञानामविरामलौकिकवचोभाजाममीषां पुनर्मन्त्रोच्चारण एव पर्यवसितं मौनव्रतं कर्मसु ।
ENMSS@0448@2ग्रामायव्ययलेखनेन नयतां कालानशेषानहो पारंपर्यत ईदृशामिह
नृणां ब्राह्मण्यमन्यादृशम् ॥ ०४४८॥
ENMSS@0449@1अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां किं लब्धं
शठ दुर्नयेन नयता सौभाग्यमेतां दशाम् ।
ENMSS@0449@2पश्यैतद्दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणं वक्षस्ते
मलतैलपङ्कशबलैर्वेणीपदैरङ्कितम् ॥ ०४४९॥
ENMSS@0450@1अज्ञानेनापिहिते विज्ञाने कर्म किं कुरुते ।
ENMSS@0450@2विकले चक्षुषि तमसा व्यादाय मुखं किमीक्षेत ॥ ०४५०॥
ENMSS@0451@1अज्ञानेनावृतो लोको मात्सर्यान्न प्रकाशते ।
ENMSS@0451@2लोभात् त्यजति मित्राणि सङ्गात् स्वर्गं न गच्छति ॥ ०४५१॥
ENMSS@0452@1अज्ञानेनावृतो लोको लोभेन च वशीकृतः ।

ENMSS@0452@2सङ्गन बहुभिर्नष्टस्तेन स्वर्गं न गच्छति ॥ ०४५२॥

ENMSS@0453@1अज्ञानैकहतो बाल्ये यौवने गृहतत्परः ।

ENMSS@0453@2वार्धकेऽपत्यचिन्तार्तः कर्मभिर्बध्यते पुनः ॥ ०४५३॥

ENMSS@0454@1अज्ञानोपहतो बाल्ये यौवने मदनाहृतः ।

ENMSS@0454@2शेषे कलत्रचिन्तार्तः किं करोतु कदा जनः ॥ ०४५४॥

ENMSS@0455@1अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥

ENMSS@0455@2नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ०४५५॥

ENMSS@0456@1अज्ञास्तरन्ति पारं विज्ञा विज्ञाय द्राङ्गिमज्ञन्ति ।

ENMSS@0456@2कथय कलावति केयं तव नयनतरङ्गिणीरीतिः ॥ ०४५६॥

ENMSS@0457@1अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।

ENMSS@0457@2धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥ ०४५७॥

ENMSS@0458@1अज्ञेष्वज्ञो गुणिषु गुणवान् पण्डिते पण्डितोऽसौ दीने दीनः सुखिनि सुखवान्

भोगिनो भोगिभावः ।

ENMSS@0458@2ज्ञाता ज्ञातुर्युवतिषु युवा वाग्मिनां तत्त्ववेत्ता धन्यः सोऽयं भवति

भुवन योऽवधूतेऽवधूतः ॥ ०४५८॥

ENMSS@0459@1अज्ञो जन्तुश्च नीचोऽयम् आत्मनः सुखदुःखयोः ।

ENMSS@0459@2ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ ०४५९॥

ENMSS@0460@1अज्ञो न वितरत्यर्थान् पुनर्दारिद्रियशङ्कया ।

ENMSS@0460@2प्राज्ञोऽपि वितरत्यर्थान् पुनर्दारिद्रियशङ्कया ॥ ०४६०॥

ENMSS@0461@1अज्ञोऽपि तज्ज्ञतामेति शनैः शैलोऽपि चूर्ण्यते ।

ENMSS@0461@2बाणोऽप्येति महालक्ष्यं पश्याभ्यासविजृम्भितम् ॥ ०४६१॥

ENMSS@0462@1अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।

ENMSS@0462@2अज्ञं हि बाल इत्याहुः पितेत्येव तु मन्त्रदम् ॥ ०४६२॥

ENMSS@0463@1अज्ञो वा यदि वा विपर्ययगते ज्ञानेऽथ संदेहभृद्

दृष्टादृष्टविरोधि कर्म कुरुते यस्तस्य गोप्ता गुरुः ।

ENMSS@0463@2निः संदेहविपर्यये सति पुनर्ज्ञाने विरुद्धक्रियं राजा चेत् पुरुषं

न शास्ति तदयं प्राप्तः प्रजाविप्लवः ॥ ०४६३॥

ENMSS@0464@1अञ्चति रजनिरुदञ्चति तिमिरमिदं चञ्चति महोभूः ।

ENMSS@0464@2उक्तं न त्यज युक्तं विरचय रक्तं मनस्तस्मिन्॥ ०४६४॥

ENMSS@0465@1अञ्चलान्तरितगुर्जराङ्गना- कुङ्कुमारुणकुचप्रभाधरम् ।

ENMSS@0465@2कोकरागपटलैर्नु रञ्जितं भानुमन्तमुदयन्तमाश्रये ॥ ०४६५॥
ENMSS@0466@1अञ्जनमुस्तोशीरैः सनागकोशातकामलकचूर्णैः ।
ENMSS@0466@2कतकफलसमायुक्तैः कूपे योगः प्रदातव्यः ॥ ०४६६॥
ENMSS@0467@1अञ्जनमिषतः स्त्रीणां दृशोर्विषं शश्वदावसति ।
ENMSS@0467@2कथमन्यथा तदीषत् पातेऽपि हता युवानः स्युः ॥ ०४६७॥
ENMSS@0468@1अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च संचयम् ।
ENMSS@0468@2अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मभिः ॥ ०४६८॥
ENMSS@0469@1अञ्जलिं शपथं सान्त्वं प्रणम्य शिरसा वदेत् ।
ENMSS@0469@2अश्रुप्रपातनं चैव कर्तव्यं भूतिमिच्छता ॥ ०४६९॥
ENMSS@0470@1अञ्जलिं शपथं सान्त्वं शिरसा पादवन्दनम् ।
ENMSS@0470@2आशाकरणमित्येकं कर्तव्यं भूतिमिच्छता ॥ ०४७०॥
ENMSS@0471@1अञ्जलिरकारि लोकैर्म्लानिमनाप्तैव रञ्जिता जगती ।
ENMSS@0471@2संध्याया इव वसतिः स्वल्पापि सखे सुखायैव ॥ ०४७१॥
ENMSS@0472@1अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम् ।
ENMSS@0472@2अहो सुमनसां वृत्तिर्वामदक्षिणयोः समा ॥ ०४७२॥
ENMSS@0473@1अञ्जलौ जलमधीरलोचना लोचनप्रतिशरीरशारितम् ।
ENMSS@0473@2आत्तमात्तमपि कान्तमुक्षितुं कातरा शफरशङ्किनी जहौ ॥ ०४७३॥
ENMSS@0474@1अटता धात्रीमखिलाम् इदमाश्चर्यं मया दृष्टम् ।
ENMSS@0474@2धनदोऽपि नयननन्दन परिहरसि यदुग्रसंपर्कम् ॥ ०४७४॥
ENMSS@0475@1अटत्कटकघोटकप्रकटचापटङ्कारवच्चटच्चटदिति स्फुटं स्फुटति मेदिनी कर्परम् ।
ENMSS@0475@2निजामधरणीपतौ वलति कौतुकाडम्बराद् इदं भुवनमण्डलं दरदरीदरीदर्यहो ॥ ०४७५॥
ENMSS@0476@1अटनेन महारण्ये सुपन्था जायते शनैः ।
ENMSS@0476@2वेदाभ्यासात् तथा ज्ञानं शनैः पर्वतलङ्घनम् ॥ ०४७६॥
ENMSS@0477@1अट वा विकटः पतत्रनादैः कटुवाचं रट वाथवा दिवान्ध ।
ENMSS@0477@2परुषं परिपश्य संयतं तत् परमं नः पुरमागतो न चेत् त्वम् ॥ ०४७७॥
ENMSS@0478@1अटवी कीदृशी प्रायो दुर्गमा भवति प्रिये ।
ENMSS@0478@2प्रियस्य कीदृशी कान्ता तनोति सुरतोत्सवम् ॥ ०४७८॥
ENMSS@0479@1अटव्या द्रुमपुष्पाणि दूरस्था अपि बान्धवाः ।

ENMSS@0479@2कान्ता चालेख्यरूपा च ते काले न प्रतिष्ठिताः ॥ ०४७९॥
ENMSS@0480@1अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ।
ENMSS@0480@2केशशूलाः स्त्रियो राजन् भविष्यन्ति युगक्षये ॥ ०४८०॥
ENMSS@0481@1अणिमा महिमा चैव लघिमा गरिमा तथा ।
ENMSS@0481@2प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः ॥ ०४८१॥
ENMSS@0482@1अणुकं सुरतं नाम दंपत्योः पार्श्वसंस्थयोः ।
ENMSS@0482@2जायन्ते निबिडाश्लेषाः समीभूतशरीरयोः ॥ ०४८२॥
ENMSS@0483@1अणुनापि प्रविश्यारिं छिद्रेण बलवत्तरम् ।
ENMSS@0483@2निःशेषं मज्जयेद्राष्ट्रं यानपात्रमिवोदकम् ॥ ०४८३॥
ENMSS@0484@1अणु धनमपि न त्याज्यं मम भवता ज्ञापिते सत्यम् ।
ENMSS@0484@2वित्तं जीवितमग्र्यं जीवितहानिर्धनत्यागः ॥ ०४८४॥
ENMSS@0485@1अणुपूर्वं बृहत् पश्चाद् भवत्यार्येषु संगतम् ।
ENMSS@0485@2विपरीतमनार्येषु यथेच्छसि तथा कुरु ॥ ०४८५॥
ENMSS@0486@1अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ।
ENMSS@0486@2सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः ॥ ०४८६॥
ENMSS@0487@1अणुमात्रं यथा शल्यं शरीरे दुःखदायकम् ।
ENMSS@0487@2तथातिसू । । संयुक्तं मनः संसारदायकम् ॥ ०४८७॥
ENMSS@0488@1अणुरपि ननु नैव क्रोडभूषास्य काचित् परिभजसि यदेतत्तद्विभूतिस्तथैव ।
ENMSS@0488@2इह सरसि मनोज्ञे संततं पातुमम्भः श्रमपरिभवमग्नाः के न मग्नाः करीन्द्राः ॥ ०४८८॥
ENMSS@0489@1अणुरपि मणिः प्राणत्राणक्षमो विषभक्षिणां शिशुरपि रुषा सिंहीसूनुः समाह्वयते गजान् ।
ENMSS@0489@2तनुरपि तरुस्कन्धोद्भूतो दहत्यनलो वनं प्रकृतिमहतां जात्यं तेजो न मूर्तिमपेक्षते ॥ ०४८९॥
ENMSS@0490@1अणुरप्यसतां सङ्गः सद्गुणं हन्ति विस्तृतम् ।
ENMSS@0490@2गुणरुपान्तरं याति तक्रयोगाद्यथा पयः ॥ ०४९०॥
ENMSS@0491@1अणुरप्युपहन्ति विग्रहः प्रभुमन्तः प्रकृतिप्रकोपजः ।
ENMSS@0491@2अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः ॥ ०४९१॥
ENMSS@0492@1अणोरणीयान् महतो महीयान् आत्मास्य जन्तोर्निहितो गुहायाम् ।
ENMSS@0492@2तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः ॥ ०४९२॥

ENMSS@0493@1अणोरणीयान् महतो महीयान् मध्यो नितम्बश्च मम प्रियायाः ।
ENMSS@0493@2यज्ञोपवीतं परमं पवित्रं किंचाङ्गरागारुणितं प्रियायाः ॥ ०४९३॥
ENMSS@0494@1अणोरणीयान् महतो महीयान् योगे वियोगे दिवसोऽङ्गनायाः ।
ENMSS@0494@2यज्ञोपवीतं परमं पवित्रं स्पृष्ट्वा सखे सत्यमिदं ब्रवीमि ॥ ०४९४॥
ENMSS@0495@1अण्डं कण्डूयमानेन यत् सुखं तव भूपते ।
ENMSS@0495@2खुर्जनानन्तरं दुःखं भूयात्तु तव वैरिणाम् ॥ ०४९५॥
ENMSS@0496@1अण्डजाः पुण्डरीकेषु समुद्रेषु जनार्दनाः ।
ENMSS@0496@2नीलकण्ठाश्च शैलेषु निवसन्तु न तेन ते ॥ ०४९६॥
ENMSS@0497@1अण्डाभ्यां लोमशाभ्यां तु जाताण्डो न हितः स्मृतः ।
ENMSS@0497@2भरमाभावक्रपुच्छं च कृष्णनीलं परित्यजेत् ।
ENMSS@0497@3निन्द्यः केवलकृष्णस्तु सर्वश्वेतस्तु पूजितः ॥ ०४९७॥
ENMSS@0498@1अण्वपि गुणाय महतां महदपि दोषाय दोषिणां सुकृतम् ।
ENMSS@0498@2तृणमपि दुग्धाय गवां दुग्धमपि विषाय सर्पाणाम् ॥ ०४९८॥
ENMSS@0499@1अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ।
ENMSS@0499@2सिद्धेऽन्यथाऽर्थे न यतेत भूयः परिश्रमं तत्र समीक्षमाणः ॥ ०४९९॥
ENMSS@0500@1अतः परं प्रवक्ष्यामि खड्गलक्षणमुत्तमम् ।
ENMSS@0500@2प्रधानदेहसंभूतैर्दैत्यास्थिभिररिंदम् ॥ ०५००॥
ENMSS@0501@1अतः परं प्रवक्ष्यामि शराणां लक्षणां शुभम् ।
ENMSS@0501@2स्थूलं न चातिसूक्ष्मं च न पक्कं न कुभूमिजम् ।
ENMSS@0501@3हीनग्रन्थिविदीर्णं च वर्जयेदीदृशं शरम् ॥ ०५०१॥
ENMSS@0502@1अतः परमगम्योऽयं पन्था विश्रम्यतामिति ।
ENMSS@0502@2प्रत्यक्षियुगलं तस्याः कर्णौ वक्तुमिवागतौ ॥ ०५०२॥
ENMSS@0503@1अतः प्रशस्ते नक्षत्रे शुभे वारे शुचिष्मता ।
ENMSS@0503@2औषधं विधिवद्ग्राह्यं स्मृत्वा देवीं च सुप्रभाम् ॥ ०५०३॥
ENMSS@0503@3मन्त्रः -- ओं सुप्रभायै नमः ॥ ०५०३॥
ENMSS@0504@1अतः संदेहदोलायां रोपणीयं न मानसम् ।
ENMSS@0504@2ग्रन्थेऽस्मिंश्चापचतुरैर्चीरचिन्तामणौ क्वचित् ॥ ०५०४॥
ENMSS@0505@1अतः समीक्ष्य कर्तव्यं विशेषात् संगतं रहः ।
ENMSS@0505@2अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ ०५०५॥
ENMSS@0506@1अतः सुस्थितचित्तेन प्रस्थातव्यं शुभे दिने ।
ENMSS@0506@2स्मृत्वा क्षेमंकरीं देवीं पश्यता शकुनाञ्शुभान् ॥ ०५०६॥

ENMSS@0507@1अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने ।
ENMSS@0507@2उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम् ॥ ०५०७॥
ENMSS@0508@1अत एव हि नेच्छन्ति साधवः सत्समागमम् ।
ENMSS@0508@2यद्वियोगासिलूनस्य मनसो नास्ति भेषजम् ॥ ०५०८॥
ENMSS@0509@1अतटस्थस्वादुफल- ग्रहणव्यवसायनिश्चयो येषाम् ।
ENMSS@0509@2ते शोकक्लेशरुजां केवलमुपयान्ति पात्रतां मन्दाः ॥ ०५०९॥
ENMSS@0510@1अतत्त्वज्ञोऽसि बालश्च दुस्तोषोऽपूरणोऽनलः ।
ENMSS@0510@2नैव त्वं वेत्थ सुलभं नैव त्वं वेत्थ दुर्लभम् ॥ ०५१०॥
ENMSS@0511@1अतथ्यान्यपि तथ्यानि दर्शयन्ति हि पेशलाः ।
ENMSS@0511@2समे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥ ०५११॥
ENMSS@0512@1अतथ्यास्तथ्यसंकाशास्तथ्याश्चातथ्यदर्शनाः ।
ENMSS@0512@2दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणम् ॥ ०५१२॥
ENMSS@0513@1अतथ्येनोच्यमानस्य कः कोपो यन्न तत्तथा ।
ENMSS@0513@2तथ्येनापि हि कः कोपो यदनुक्तेऽपि मत्तथा ॥ ०५१३॥
ENMSS@0514@1अतनुज्वरपीडितासि बाले तव सौख्याय मतो ममोपवासः ।
ENMSS@0514@2रसमर्पय वैद्यनाथ नाहं भवदावेदितलङ्घने समर्था ॥ ०५१४॥
ENMSS@0515@1अतनुना नवमम्बुदमाम्बुदं सुतनुरस्रमुदस्तमवेक्ष्य सा ।
ENMSS@0515@2उचितमायतनिःश्वसितच्छलाच्छ्वसनशस्त्रममुञ्चदमुं प्रति ॥ ०५१५॥
ENMSS@0516@1अतन्त्री वाग्वीणा स्तनयुगलमग्रीवकलसा- वनब्जं
दृङ्नीलोत्पलदलमपत्रोरुकदली ।
ENMSS@0516@2अकाण्डा दोर्वल्ली वदनमलकलङ्कः शशधरस्तदस्यास्तारुण्यं
भुवनविपरीतं घटयति ॥ ०५१६॥
ENMSS@0517@1अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
ENMSS@0517@2तारकातरला श्यामा सानन्दं न करोति कम् ॥ ०५१७॥
ENMSS@0518@1अतन्द्रितचमूपतिप्रहितहस्तमस्वीकृत- प्रणीतमणिपादुकं किमिति
विस्मितान्तःपुरम् ।
ENMSS@0518@2अवाहनपरिष्क्रियं पतगराजमारोहतः करिप्रवरबृंहिते भगवतस्त्वरायै
नमः ॥ ०५१८॥
ENMSS@0519@1अतसीकुसुमोपमेयकान्तिर्यमुनालकुकदम्बमूलवर्ती ।
ENMSS@0519@2नवगोपवधूविनोदशाली वनमाली वितनोतु मङ्गलानि ॥ ०५१९॥
ENMSS@0520@1अतसीपुष्पसंकाशं खं वीक्ष्य जलदागमे ।

ENMSS@0520@2ये वियोगेऽपि जीवन्ति न तेषां विद्यते भयम् ॥ ०५२०॥
ENMSS@0521@1अतस्करकरग्राह्यम् अराजाज्ञावशंवदम् ।
ENMSS@0521@2अदायादविभागार्हं धनमार्जयतस्थिरम् ॥ ०५२१॥
ENMSS@0522@1अतस्तु विपरीतस्य नृपतेरजितात्मनः ।
ENMSS@0522@2संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥ ०५२२॥
ENMSS@0523@1अतस्त्वष्टाङ्गया बुद्ध्या नृपतिर्नीतिशास्त्रवित् ।
ENMSS@0523@2समर्थः पृथिवीं कृत्स्नाम् अपि जेतुं विचक्षणः ॥ ०५२३॥
ENMSS@0524@1अताडयत् पल्लवपाणिनैकां पुष्पोच्चये राजवधूमशोकः ।
ENMSS@0524@2तच्छेदहेतोरलिपङ्क्ति भङ्ग्या व्याकृष्यते वासिलता स्मरेण ॥ ०५२४॥
ENMSS@0525@1अतिकलुषमाशुनश्वरम् आपातस्फुरणमनभिलाषकरम् ।
ENMSS@0525@2अपि हृष्यन्ति जनाः कथम् अवलम्ब्य ज्ञानखद्योतम् ॥ ०५२५॥
ENMSS@0526@1अतिकुपितमनस्के कोपनिष्पत्तिहेतुं विदधति सति शत्रौ विक्रियां चित्ररूपाम् ।
ENMSS@0526@2वदति वचनमुच्चैर्दुःश्रवं कर्कशादि कलुषविकलता या तां क्षमां वर्णयन्ति ॥ ०५२६॥
ENMSS@0527@1अतिकुपिता अपि सुजना योगेन मृदूभवन्ति न तु नीचाः ।
ENMSS@0527@2हेम्नः कठिनस्यापि द्रवणोपायोऽस्ति न तृणानाम् ॥ ०५२७॥
ENMSS@0528@1अतिकृष्णेष्वतिगौरेष्वतिपीनेष्वतिकृशेषु मनुजेषु ।
ENMSS@0528@2अतिदीर्घेष्वतिलघुषु प्रायेण न विद्यतेऽपत्यम् ॥ ०५२८॥
ENMSS@0529@1अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
प्रयासेनेवाक्ष्णोस्तरलतरतारं गमितयोः ।
ENMSS@0529@2इदानीं राधायाः प्रियतमसमायातसमये पपातस्वे दाम्बुप्रसर इव हर्षाश्रुनिकरः ॥ ०५२९॥
ENMSS@0530@1अतिक्रान्तं तु यः कार्यं पश्चाच्चिन्तयते नरः ।
ENMSS@0530@2तच्चास्य न भवेत् कार्यं चिन्तया तु विनश्यति ॥ ०५३०॥
ENMSS@0531@1अतिक्रान्तः कालः सुचरितशतामोदसुभगो गताः शुक्ला धर्मा नवनलिनसूत्रांशुतनुताम् ।
ENMSS@0531@2परिम्लानः प्रायो बुधजनकथासारनिपुणो निरानन्दं जातं जगदिदमतीतोत्सवमिव ॥ ०५३१॥
ENMSS@0532@1अतिक्रान्तः कालो लटभललनाभोगसुभगो भ्रमन्तः श्रान्ताः स्मः सुचिरमिह

सं सारसरणौ ।

ENMSS@0532@2इदानीं स्वः सिन्धोस्तटभुवि समाक्रन्दनगिरः सुतारैः फूत्कारैः शिव शिव शिवेति प्रतनुमः ॥ ०५३२॥

ENMSS@0533@1अतिक्रान्तमतिक्रान्तम् अनागतमनागतम् ।

ENMSS@0533@2वर्तमानसुखभ्रान्तिर्नवा भोगिदरिद्रयोः ॥ ०५३३॥

ENMSS@0534@1अतिक्लेशेन यद् द्रव्यम् अतिलोभेन यत्सुखम् ।

ENMSS@0534@2परपीडा च या वृत्तिर्नैव साधुषु विद्यते ॥ ०५३४॥

ENMSS@0535@1अतिक्लेशेन येऽर्थाः स्युर्धर्मस्यातिक्रमेण च ।

ENMSS@0535@2अरेर्वा प्रणिपातेन मा स्म तेषु मनः कृथाः ॥ ०५३५॥

ENMSS@0536@1अतिक्लेशे मनःस्थैर्यं क्रमेण सहनं तथा ।

ENMSS@0536@2जयलाभाय हेतू द्वौ सैन्यानामधिकौ विदुः ॥ ०५३६॥

ENMSS@0537@1अतिगम्भीरमनाविलम् अक्षोभ्यमदृष्टपारमविलङ्घ्यम् ।

ENMSS@0537@2अविरलतरङ्गसंकुलम् एक्षिषि विज्ञानसागरं महताम् ॥ ०५३७॥

ENMSS@0538@1अतिगम्भीरे भूपे कूप इव जनस्य दुःखतारस्य ।

ENMSS@0538@2दधति समीहितसिद्धिं गुणवन्तः पार्थिवा घटकाः ॥ ०५३८॥

ENMSS@0539@1अतिचपलकलत्रं प्रातिवेश्मातिचौर- स्तनयगतिमांधं (?) बालरण्डा तनूजा ।

ENMSS@0539@2अतिशठमथ मैत्री (?) वश्यता सर्वजन्तो रिपुभयतनुरोगौ चाष्टदुःखं नराणाम् ॥ ०५३९॥

ENMSS@0540@1अतिचारुचन्द्ररोचिः कुर्वन् कुसुमेषुकेलिकेतनताम् ।

ENMSS@0540@2सुरभिः कदानुयास्यति समुकुलरुचिरस्तनीहारः ॥ ०५४०॥

ENMSS@0541@1अतिचिरादनुषङ्गवतः कणा- नवनिजान् यदि हेम जिहाससि ।

ENMSS@0541@2पटुपुटज्वलनज्वरवेदना तव भवत्यपयाति च गौरवम् ॥ ०५४१॥

ENMSS@0542@1अतिजीर्णमपक्कं च ज्ञातिधृष्टं तथैव च ।

ENMSS@0542@2दग्धं छिद्रं न कर्तव्यं बाह्याभ्यन्तरहस्तकम् ॥ ०५४२॥

ENMSS@0543@1अतिजीवति वित्तेन सुखं जीवति विद्यया ।

ENMSS@0543@2किंचिज्जीवति शिल्पेन ऋते कर्म न जीवति ॥ ०५४३॥

ENMSS@0544@1अतितामसोऽजगन्धिः काकरवो ह्रस्वकूर्चकः पापः ।

ENMSS@0544@2भीरुः कुधीः पिशाचो रासभलिङ्गस्तु विज्ञेयः ॥ ०५४४॥

ENMSS@0545@1अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत् ।

ENMSS@0545@2अतितृष्णाभिभूतस्य शिखा भवति मस्तके ।

ENMSS@0546@1अतितेजस्व्यपि राजा पानासक्तो न साधयत्यर्थान् ।
ENMSS@0546@2तृणमपि दग्धुं शक्तो न वाडवाग्निः पिबन्ननिशम् ॥ ०५४६॥
ENMSS@0547@1अतिथिं नाम काकुत्स्थात् पुत्रं प्राप कुमुद्वती ।
ENMSS@0547@2पश्चिमाद्यामिनीयामात् प्रसादमिव चेतना ॥ ०५४७॥
ENMSS@0548@1। । । । । ।
ENMSS@0548@2अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता ॥ ०५४८॥
ENMSS@0549@1अतिथिः द्वारि तिष्ठेत आपो गृह्णाति यो नरः ।
ENMSS@0549@2आपोशनं सुरापानम् अन्नं गोमांसभक्षणम् ॥ ०५४९॥
ENMSS@0550@1अतिथिः पूजितो यस्य गृहस्थस्य तु गच्छति ।
ENMSS@0550@2नान्यस्तस्मात् परो धर्म इति प्राहुर्मनीषिणः ॥ ०५५०॥
ENMSS@0551@1अतिथिः पूजितो यस्य ध्यायते मनसा शभम् ।
ENMSS@0551@2न तत् ऋतुशतेनापि तुल्यमाहुर्मनीषिणः ॥ ०५५१॥
ENMSS@0552@1अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः ।
ENMSS@0552@2अप्रणोद्योऽतिथिः सायम् अपि वाग्भूतृणोदकैः ॥ ०५५२॥
ENMSS@0553@1अतिथिर्बालकः पत्नी जननी जनकस्तथा ।
ENMSS@0553@2पञ्चैते गृहिणः पोष्या इतरे च स्वशक्तितः ॥ ०५५३॥
ENMSS@0554@1अतिथिर्बालकश्चैव राजा भार्या तथैव च ।
ENMSS@0554@2अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः ॥ ०५५४॥
ENMSS@0555@1अतिथिर्बालकश्चईव स्त्रीजनो नृपतिस्तथा ।
ENMSS@0555@2एते वित्तं न जानन्ति जामाता चैव पञ्चमः ॥ ०५५५॥
ENMSS@0556@1अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
ENMSS@0556@2स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ ०५५६॥
ENMSS@0557@1अतिथिश्चापवादी च द्वावेतौ मम बान्धवौ ।
ENMSS@0557@2अपवादी हरेत् पापम् अतिथिः स्वर्गसंक्रमः ॥ ०५५७॥
ENMSS@0558@1अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च ।
ENMSS@0558@2सामान्यं भोजनं सद्भिर्गृहस्थस्य प्रशस्यते ॥ ०५५८॥
ENMSS@0559@1अतिथीनां न सत्कारो न च सज्ञनसंगमः ।
ENMSS@0559@2न यत्र स्वात्मवर्णास्था सा गृहाश्रमवञ्चना ॥ ०५५९॥
ENMSS@0560@1अतिदर्पे हता लङ्का अतिमाने च कौरवाः ।
ENMSS@0560@2अतिदाने बलिर्बद्धः सर्वमत्यन्तगर्हितम् ॥ ०५६०॥
ENMSS@0561@1अतिदाक्षिण्ययुक्तानां शङ्कितानां पदे पदे ।

ENMSS@0561@2परापवादिभीरूणां न भवन्ति विभूतयः ॥ ०५६१॥
ENMSS@0562@1अतिदानाद्धतः कर्णस्त्वतिलोभात् सुयोधनः ।
ENMSS@0562@2अतिकामाद्दशग्रीवस्त्वति सर्वत्र वर्जयेत् ॥ ०५६२॥
ENMSS@0563@1अतिदानाद्बलिर्बद्धो नष्टो मानात् सुयोधनः ।
ENMSS@0563@2विनष्टो रावणो लौ ल्याद् अति सर्वत्र वर्जयेत् ॥ ०५६३॥
ENMSS@0564@1अतिदानाद्बलिर्बद्धो ह्यतिमानात् सुयोधनः ।
ENMSS@0564@2अतिकामाद्दशग्रीवो ह्यति सर्वत्र गर्हितः ॥ ०५६४॥
ENMSS@0565@1अतिदाने बलिर्बद्धो अतिमाने च कौरवाः ।
ENMSS@0565@2अतिरूपे हृता सीता सर्वमत्यन्तगर्हितम् ॥ ०५६५॥
ENMSS@0566@1अतिदीर्घजीविदोषाद् व्यासेन यशोऽपहारितं हन्त ।
ENMSS@0566@2कैर्नोच्येत गुणाढ्यः स एव जन्मान्तरापन्नः ॥ ०५६६॥
ENMSS@0567@1अतिदूरपथश्रान्ताश्छायां यान्ति च शीतलाम् ।
ENMSS@0567@2शितलाश्च पुनर्यान्ति का कस्य परिदेवना ॥ ०५६७॥
ENMSS@0568@1अति धर्माद् बलं मन्ये बलाद् धर्मः प्रवर्तते ।
ENMSS@0568@2बले प्रतिष्ठितो धर्मो धर्ण्यामिव जङ्गमम् ॥ ०५६८॥
ENMSS@0569@1अतिनीचानि वाक्यानि दृष्टिमात्रातिनिन्दकः ।
ENMSS@0569@2क्षुद्रसंवादभाषी यो ह्येवं दुष्टः शठो जनः ॥ ०५६९॥
ENMSS@0570@1अतिपक्वकपित्थेन लिप्तपात्रे सुयामितम् ।
ENMSS@0570@2दुग्धमस्तुविहीनं स्याच्चन्द्रबिम्बोपमं दधि ॥ ०५७०॥
ENMSS@0571@1अतिपटलैरनुयातां सहृदयहृदयज्वरं विलुम्पन्तीम् ।
ENMSS@0571@2मृगमदपरिमललहरीं समीर पामरपुरे किरसि ॥ ०५७१॥
ENMSS@0572@1अतिपरमाद्भुतवेषा काप्येषा जयति सृष्टिरात्मभुवः ।
ENMSS@0572@2तत् किं न वाञ्छितं स्याद् अस्या यदि विधुरवीक्षणः पाता ॥ ०५७२॥
ENMSS@0573@1अतिपरिगृहीतमौना वर्जितमाल्यानुलेपनस्नाना ।
ENMSS@0573@2दूरोत्सारितलज्जा निर्ग्रन्थग्रन्थरचनेव ॥ ०५७३॥
ENMSS@0574@1अतिपरिचयादवज्ञा भवति विशिष्टेऽपि वस्तुनि प्रायः ।
ENMSS@0574@2लोकः प्रयागवासी कूपे स्नानं समाचरति ॥ ०५७४॥
ENMSS@0575@1अतिपरिचयादवज्ञा संततगमनादनादरो भवति ।
ENMSS@0575@2मलये भिल्लपुरन्ध्री चन्दनतरुमिन्धनं कुरुते ॥ ०५७५॥
ENMSS@0576@1अतिपरिचयादवज्ञेत्येतद् वाक्यं मृषैव तद्भाति ।

ENMSS@0576@2अतिपरिचितेऽप्यनादौ संसारेऽस्मिन् न जायतेऽवज्ञा ॥ ०५७६॥
ENMSS@0577@1अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी ।
ENMSS@0577@2जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ०५७७॥
ENMSS@0578@1अतिपीतां तमोराजीं तनीयान् सोढुमक्षमः ।
ENMSS@0578@2वमतीव शनैरेष प्रदीपः कज्जलच्छलात् ॥ ०५७८॥
ENMSS@0579@1अतिपूजिततारेयं दृष्टिः श्रुतिलङ्घनक्षमा सुतनु ।
ENMSS@0579@2जिनसिद्धान्तस्थितिरिव सवासना कं न मोहयति ॥ ०५७९॥
ENMSS@0580@1अतिपेलवमतिपरिमित- वर्णं लघुतरमुदाहरति शठः ।
ENMSS@0580@2परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥ ०५८०॥
ENMSS@0581@1अतिप्रचण्डां बहुपाकपाकिनीं विवादशीलां स्वयमेव तस्करीम् ।
ENMSS@0581@2अक्रोशबीजां परवेश्मगामिनीं त्यजेत भार्यां दशपुत्रसूरपि ॥ ०५८१॥
ENMSS@0582@1अतिप्रचण्डा बहुदुःखभागिनी विवादशीला परगेहगामिनी ।
ENMSS@0582@2भर्तुः स्वयं निन्दति या च तस्करी त्यजेत् स्वभार्यां दशपुत्रपुत्रिणीम्
॥ ०५८२॥
ENMSS@0583@1अतिप्रौढा रात्रिर्बहलशिखदीपः प्रभवति प्रियः
प्रेमारब्धस्मरविधिरसज्ञः परमसौ ।
ENMSS@0583@2सखि स्वैरं स्वैरं सुरतमकरोद्व्रीडितवपुर्यतः पर्यङ्कोऽयं
रिपुरिव कडत्कारमुखरः ॥ ०५८३॥
ENMSS@0584@1अतिबलिनामपि मलिना- शयेन बलिकर्णपुत्राणाम् ।
ENMSS@0584@2विश्वासोपनतानां वासोपुत्रेण जीवितं जह्रे ॥ ०५८४॥
ENMSS@0585@1अतिबहुतरलज्जाश्रृङ्खलाबद्धपादो मदननृपतिवाहो यौवनोन्मत्तहस्ती ।
ENMSS@0585@2प्रकटितकुचकुम्भो लोमराजीकरेण पिबति सरसि नाभीमण्डलाख्ये पयांसि
॥ ०५८५॥
ENMSS@0586@1अतिभीरुमतिक्लीबं दीर्घसूत्रं प्रमादिनम् ।
ENMSS@0586@2व्यसनाद् विषयाक्रान्तं न भजन्ति नृपं प्रजाः ॥ ०५८६॥
ENMSS@0587@1अतिमन्दचन्दनमहीधरवातं स्तबकाभिरामलतिकातरुजातम् ।
ENMSS@0587@2अपि तापसानुपवनं मदनार्तान् मदमञ्जुगुञ्जदलिपुञ्जमकार्षीत् ॥ ०५८७॥
ENMSS@0588@1अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः ।
ENMSS@0588@2तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥ ०५८८॥
ENMSS@0589@1अतिमात्रभासुरत्वं पुष्यति भानुः परिग्रहादह्नः ।

ENMSS@0589@2अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः ॥ ०५८९॥
ENMSS@0590@1अतिमानः श्रियं हन्ति पुरुषस्याल्पमेधसः ।
ENMSS@0590@2गर्भेण दुष्यते कन्या गृहवासेन च द्विजः ॥ ०५९०॥
ENMSS@0591@1अतिमानिनमग्राह्यम् आत्मसंभावितं नरम् ।
ENMSS@0591@2क्रोधनं व्यसने हन्ति स्वजनोऽपि नराधिपम् ॥ ०५९१॥
ENMSS@0592@1अतिमृदु नवनीताच्चन्द्रकाच्चातिरम्यं बहुललितसुधायाः स्वादतः सद्रसाढ्यम् ।
ENMSS@0592@2सकलललितभोगागारभाग्यैकयोग्यं परिलसति हविष्यं कस्य गल्लच्छलेन ॥ ०५९२॥
ENMSS@0593@1अतियत्नगृहीतोऽपि खलः खलखलायते ।
ENMSS@0593@2शिरसा धार्यमाणोऽपि तोयस्यार्धघटो यथा ॥ ०५९३॥
ENMSS@0594@1अतिरमणीये काव्ये पिशुनोऽन्वेषयति दूशणान्येव ।
ENMSS@0594@2अतिरमणीये वपुषि व्रणमेव हि मक्षिकानिकरः ॥ ०५९४॥
ENMSS@0595@1अतिरागाद् दशग्रीवो ह्यतिलोभात् सुयोधनः ।
ENMSS@0595@2अतिदानाद् धतः कर्णो ह्यतिः सर्वत्र गर्हितः ॥ ०५९५॥
ENMSS@0596@1अतिरिच्यते सुजन्मा कश्चिज्जनकान्निजेन चरितेन ।
ENMSS@0596@2कुम्भः परिमितमम्भः पिबति पपौ कुम्भसंभवोऽम्भोधिम् ॥ ०५९६॥
ENMSS@0597@1अतिरुचिरङ्गजकृत्त्या क्षोभितदक्षं भवन्तमेव भजे ।
ENMSS@0597@2यस्मिन् प्रसादसुमुखे सद्यो वामापि भवति मम तुष्ट्यै ॥ ०५९७॥
ENMSS@0598@1अतिरुपवती सीता अतिगर्वी च रावणः ।
ENMSS@0598@2अतीव बलवान् रामो लङ्कायेन क्षयं गता ॥ ०५९८॥
ENMSS@0599@1अतिरूपाद् धृता सीता अतिगर्वेण रावणः ।
ENMSS@0599@2अतिदानाद् बलिर्बद्धो ह्यति सर्वत्र गर्हितम् ॥ ०५९९॥
ENMSS@0600@1अतिरूपेण वै सीता अतिगर्वेण रावनः ।
ENMSS@0600@2अतिदानं बलिर्दत्त्वा अति सर्वत्र वर्जयेत् ॥ ०६००॥
ENMSS@0601@1अतिलोभो न कर्तव्यः कर्तव्यस्तु प्रमाणतः ।
ENMSS@0601@2अतिलोभजदोषेण जम्बुको निधनं गतः ॥ ०६०१॥
ENMSS@0602@1अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत् ।
ENMSS@0602@2अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके ॥ ०६०२॥
ENMSS@0603@1अतिलोहितकरचरणं मञ्जुलगोरोचनातिलकम् ।
ENMSS@0603@2हठपरिवर्तितशकटं मुररिपुमुत्तानशायिनं वन्दे ॥ ०६०३॥

ENMSS@0604@1अतिलौल्यप्रसक्तानां विपत्तिर्नैर्व दूरतः ।
ENMSS@0604@2जीवं नश्यति लोभेन मीनस्यामिषदर्शने ॥ ०६०४॥
ENMSS@0605@1अतिवादांस्तितिक्षेत नाभिमन्येत्कथंचन ।
ENMSS@0605@2क्रोध्यमानः प्रियं ब्रूयाद् आक्रुष्टः कुशलं वदेत् ॥ ०६०५॥
ENMSS@0606@1अतिवादांस्तितिक्षेत नावमन्येत कंचन ।
ENMSS@0606@2न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ०६०६॥
ENMSS@0607@1अतिवादोऽतिमानश्च तथात्यागो नराधिप ।
ENMSS@0607@2क्रोधश्चातिविवित्सा च मित्रद्रोहश्च तानी षट् ॥ ०६०७॥
ENMSS@0608@1एत एवासयस्तीक्ष्णाः कृन्तन्त्यायूंषि देहिनाम् ।
ENMSS@0608@2एतानि मानवान् घ्नन्ति न मृत्युर्भद्रमस्तु ते ॥ ०६०८॥
ENMSS@0609@1अतिबाहितमतिगहनं विनापवादेन यौवनं येन ।
ENMSS@0609@2दोषनिधाने जन्मनि किं न प्राप्तं फलं तेन ॥ ०६०९॥
ENMSS@0610@1अतिविततगगनसरणि- प्रसरणपरिमुक्तविश्रमानन्दः ।
ENMSS@0610@2मरुदुल्लासितसौरभ- कमलाकरहासकृद्रविर्जयति ॥ ०६१०॥
ENMSS@0611@1अतिविपुलं कुचयुगलं रहसि करैरामृशन् मुहुर्लक्ष्म्याः ।
ENMSS@0611@2तदपहृतं निजहृदयं जयति हरर्मृगयमाण इव ॥ ०६११॥
ENMSS@0612@1अतिविशदानन्तपद- प्रवृत्तदृष्टिर्न मधुरवीक्षणतः ।
ENMSS@0612@2तृप्यत्यश्चितकामः प्रातस्तनकमलमुकुलवीक्षणतः ॥ ०६१२॥
ENMSS@0613@1अतिवृष्टिरनावृष्टिः शलभाः मूषख़ाः शुकाः ।
ENMSS@0613@2असत्करश्च दण्डश्च परचक्राणि तस्कराः ॥ ०६१३॥
ENMSS@0614@1राजानीकप्रियोत्सर्गो मरकव्याधिपीडनम् ।
ENMSS@0614@2पशूनां मरणं रोगो राष्ट्रव्यसनमुच्यते ॥ ०६१४॥
ENMSS@0615@1अतिव्ययोऽनपेक्षा च तथार्जनमधर्मतः ।
ENMSS@0615@2मोषणं दूरसंस्थानां कोषव्यसनमुच्यते ॥ ०६१५॥
ENMSS@0616@1अतिशयितकदम्बोऽयं मोदकदम्बानिलो वहति ।
ENMSS@0616@2वियदम्बुदमेदुरितं मे दुरितं पश्य नागतो दयितः ॥ ०६१६॥
ENMSS@0617@1अतिशरव्ययता मदनेन तां निखिलपुष्पमयस्वशरव्ययात् ।
ENMSS@0617@2स्फुटमकारि फलान्यपि मुश्चता तदुरसि स्तनतालयुगार्पणम् ॥ ०६१७॥
ENMSS@0618@1अतिशौचमशौचं वा अतिनिन्दा अतिस्तुतिः ।
ENMSS@0618@2अत्याचारमनाचारं षड्विधं मूर्खलक्षणम् ॥ ०६१८॥

ENMSS@0619@1अतिश्लथालम्बिपयोधरेयं शुभ्रीभवत्काशविकासिकेशा ।

ENMSS@0619@2अतीतलावण्यजलप्रवाहा प्रावृट् जरां प्राप शरच्छलेन ॥ ०६१९॥

ENMSS@0620@1अतिसंचयलुब्धानां वित्तमन्यस्य कारणम् ।

ENMSS@0620@2अन्यैः संचीयते यत्नाद् अन्यैश्च मधु पीयते ॥ ०६२०॥

ENMSS@0621@1अतिसंपदमापन्नैर्भेतव्यं पतनाद्भूयः ।

ENMSS@0621@2अत्युच्चशिखरा मेरोः शक्रवज्रेण पातिताः ॥ ०६२१॥

ENMSS@0622@1अतिसज्जनदुर्गतिः खलपङ्क्तिसमुन्नतिः ।

ENMSS@0622@2युवतिस्तनविच्युतिरिति किं विधिनिर्मितिः ॥ ०६२२॥

ENMSS@0623@1अतिसत्कृता अपि शठाः सहभुवमुज्झन्ति जातु न प्रकृतिम् ।

ENMSS@0623@2शिरसा महेश्वरेणा- ऽपि ननु धृतो वक्र एव शशी ॥ ०६२३॥

ENMSS@0624@1अतिसाहसमतिदुष्करम् अत्याश्चर्यं च दानमर्थानाम् ।

ENMSS@0624@2योऽपि ददाति शरीरं न ददाति स वित्तलेशमपि ॥ ०६२४॥

ENMSS@0625@1अतिसाहसिकं शूरा मन्त्रिणस्तं निरूपकम् ।

ENMSS@0625@2विनीतं गुरवो जज्ञुर्धूर्तमन्तःपुराङ्गनाः ॥ ०६२५॥

ENMSS@0626@1अतिहरितपत्रपरिकर- संपन्नस्पन्दनैकविटपस्य ।

ENMSS@0626@2घनवासनैर्मयूखैः कुसुम्भकुसुमायते तरणिः ॥ ०६२६॥

ENMSS@0627@1अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च संगमार्थम् ।

ENMSS@0627@2आपत्प्रपन्नस्य च मोक्षणार्थं यन्मन्त्र्यतेऽसौ परमो हि मन्त्रः ॥ ०६२७॥

ENMSS@0628@1अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।

ENMSS@0628@2विजानाति यदा योगी तदा संविदिति स्मृता ॥ ०६२८॥

ENMSS@0629@1अतीतानागता भावा ये च वर्तन्ति सांप्रतम् ।

ENMSS@0629@2तान् कालनिर्मितान् बुद्ध्वा न संज्ञां हातुमर्हसि ॥ ०६२९॥

ENMSS@0630@1अतीता शीतार्तिः प्रसरति शनैरुष्मकणिका दिनानि स्फायन्ते रविरपि रथं

मन्थरयति ।

ENMSS@0630@2हिमानीनिर्मुक्तः स्फुरति नितरां शीतकिरणः शराणां व्यापारः कुसुमधनुषो

न व्यवहितः ॥ ०६३०॥

ENMSS@0631@1अतीत्य बन्धूनवलङ्घ्य मित्राण्याचार्यमागच्छति शिष्यदोषः ।

ENMSS@0631@2बालं ह्यपत्यं गुरवे प्रदातुर्नैवापराधोऽस्ति पितुर्न मातुः ॥ ०६३१॥

ENMSS@0632@1अतीन्द्रियायां परलोकवृत्ताविहैव तीव्राशुभपाककशंसी ।

ENMSS@0632@2दृष्येत नाशो यदि नाम नाशु न कः कुकृत्येन यतेत भूत्यै ॥ ०६३२॥

ENMSS@0633@1अतीव कर्कशाः स्तब्धा हिंस्रजन्तुभिरावृताः ।

ENMSS@0633@2दुरासदाश्च विषमा ईश्वराः पर्वता इव ॥ ०६३३॥

ENMSS@0634@1अतीव खलु ते कान्ता वसुधा वसुधाधिप ।

ENMSS@0634@2गतासुरपि यां गात्रैर्मां विहाय निषेवसे ॥ ०६३४॥

ENMSS@0635@1अतीव बलहीनं हि लङ्घनं नैव कारयेत् ।

ENMSS@0635@2ये गुणा लङ्घने प्रोक्तास्ते गुणा लघुभोजने ॥ ०६३५॥

ENMSS@0636@1अतीव सौख्यशुभदा याम्या निशि भवेच्छिवा ।

ENMSS@0636@2पूर्वस्यां तत्पुराध्यक्षम् अन्यं कुर्यादहर्मुखे ॥ ०६३६॥

ENMSS@0637@1अतुलितबलधामं स्वर्णशैलाभदेहं दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।

ENMSS@0637@2सकलगुणनिधानं वानराणामधीशं रघुपतिवरदूतं वातजातं नमामि ॥ ०६३७॥

ENMSS@0638@1अतुष्टं स्वेषु दारेषु चपलं चपलेन्द्रियम् ।

ENMSS@0638@2नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ०६३८॥

ENMSS@0639@1अतुष्टिदानं कृतपूर्वनाशनम् अमाननं दुश्चरितानुकीर्तनम् ।

ENMSS@0639@2कथाप्रसङ्गेन च नामविस्मृतिर्विरक्तभावस्य जनस्य लक्षणम् ॥ ०६३९॥

ENMSS@0640@1अतुहिनरुचिनासौ केवलं नोदयाद्रिः क्षणमुपरिगतेन क्ष्माभृतः सर्व एव ।

ENMSS@0640@2नवकरनिकरेण स्पष्टबन्धूकसून- स्तबकरचितमेते शेखरं बिभ्रतीव ॥ ०६४०॥

ENMSS@0641@1अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।

ENMSS@0641@2अक्षमावान् परं दोषैरात्मानं चैव योजयेत् ॥ ०६४१॥

ENMSS@0642@1अतृणे सतृणा यस्मिन् सतृणे तृणवर्जिता मही यत्र ।

ENMSS@0642@2तस्मिञ्शिरा प्रदिष्टा वक्तव्यं वा धनं तत्र ॥ ०६४२॥

ENMSS@0643@1अतोगरीयः किं नुस्याद् अशर्म नरकेष्वपि ।

ENMSS@0643@2यत् प्रियस्य प्रियं कर्तुम् अधमेन न शक्यते ॥ ०६४३॥

ENMSS@0644@1अतो निजबलोन्मानं चापं स्याच्छुभकारकम् ।

ENMSS@0644@2देवानामुत्तमं चापं ततो न्यूनं च मानवम् ॥ ०६४४॥

ENMSS@0645@1अतोऽर्थं पठ्यते शास्त्रं कीर्तिर्लोकेषु जायते ।

ENMSS@0645@2कीर्तिमान् पूज्यते लोके परत्रेह च मानवः ॥ ०६४५॥

ENMSS@0646@1अतो हास्यतरं लोके किंचिदन्यन्न विद्यते ।

ENMSS@0646@2यत्र दुर्जन इत्याह दुर्जनः सज्ञनं स्वयम् ॥ ०६४६॥

ENMSS@0647@1अत्तुं वाञ्छति शांभवो गणपतेराखुं क्षुधार्त्तः फणी तं च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि नागाननम् ।

ENMSS@0647@2इत्थं यत्र परिग्रहस्य घटना शंभोरपि स्याद्गृहे तत्रान्यस्य कथं न भावि जगतस्तस्मात् स्वरूपं हि तत् ॥ ०६४७॥

ENMSS@0648@1अत्यच्छं सितमंशुकं शुचि मधु स्वामोदमच्छं रजः कार्पुरं विधृतार्द्रचन्दनकुचद्वन्द्वाः कुरङ्गीदृशः ।

ENMSS@0648@2धारावेश्म सपाटलं विचकिलस्रग्दाम चन्द्रत्विषो धातः सृष्टिरियं वृथैव तव न ग्रीष्मोऽभविष्यद्यदि ॥ ०६४८॥

ENMSS@0649@1अत्यद्भुतमिमं मन्ये स्वभावममनस्विनः ।

ENMSS@0649@2यदुपक्रियमाणोऽपि प्रीयते न विलीयते ॥ ०६४९॥

ENMSS@0650@1अत्यन्तं कुरुतां रसायनविधिं वाक्यं प्रियं जल्पतु वार्धेः पारमियर्तु गच्छतु नभो देवाद्रिमारोहतु ।

ENMSS@0650@2पातालं विशतु प्रसर्पतु दिशं देशान्तरं भ्राम्यतु न प्राणी तदपि प्रहर्तुमनसा संत्यज्यते मृत्युना ॥ ०६५०॥

ENMSS@0651@1अत्यन्तकण्डूतिपरो नराणाम् विरोधकारी शुनकः सदैव ।

ENMSS@0651@2स्यादूर्ध्वपादः शुनकः शयानः सिद्धिप्रदः कार्यविधौ विदुष्टे ॥ ०६५१॥

ENMSS@0652@1अत्यन्तकृष्णः स विनिर्मलस्त्वं स वामनः सर्वत उन्नतोऽसि ।

ENMSS@0652@2जनार्दनो यत् स दयापरस्त्वं विष्णुः कथं वीर तवोपमानम् ॥ ०६५२॥

ENMSS@0653@1अत्यन्तकोपः कटुका च वाणी दरिद्रता च स्वजनेषु वैरम् ।

ENMSS@0653@2नीचप्रसङ्गः कुलहीनसेवा चिह्नानि देहे नरकस्थितानाम् ॥ ०६५३॥

ENMSS@0654@1अत्यन्तचञ्चलस्येह पारदस्य निबन्धने ।

ENMSS@0654@2कामं विज्ञायते युक्तिर्न स्त्रीचित्तस्य काचन ॥ ०६५४॥

ENMSS@0655@1अत्यन्तनिर्गते चैव सुबद्धे नैव चाविले ।

ENMSS@0655@2प्रशस्ते वाजिनां नेत्रे मध्वाभे कालतारके ॥ ०६५५॥

ENMSS@0656@1अत्यन्तपरिणाहित्वाद् अतीव श्लक्ष्णतावशात् ।

ENMSS@0656@2न कांचिदुपमां रोढुम् ऊरू शक्नोति सुभ्रुवः ॥ ०६५६॥

ENMSS@0657@1अत्यन्तभीमवनजीवगणेन पूर्णं दुर्गं वनं भवभृतां मनसाप्यगम्यम् ।

ENMSS@0657@2चौराकुलं विशति लोभवशेन मर्त्यो नो धर्मकर्म विदधाति कदाचिदज्ञः ॥ ०६५७॥

ENMSS@0658@1अत्यन्तमतिमेधावी त्रयाणामेकमश्नुते ।

ENMSS@0658@2अल्पायुषो दरिद्रो वा ह्यनपत्यो न संशयः ॥ ०६५८॥

ENMSS@0659@1अत्यन्तमन्थनकदर्थनमुत्सहन्ते मर्यादया नियमिताः किमु साधवोऽपि ।

ENMSS@0659@2लक्ष्मीसुधाकरसुधाद्युपनीय शेषे रत्नाकरोऽपि गरलं किमु नोज्ञगार ॥ ०६५९॥

ENMSS@0660@1अत्यन्तमसदार्याणाम् अनालोचितचेष्टितम् ।

ENMSS@0660@2अतस्तेषां विवर्धन्ते सततं सर्वसंपदः ॥ ०६६०॥

ENMSS@0661@1अत्यन्तविमुखे दैवे व्यर्थयत्ने च पौरुषे ।

ENMSS@0661@2मनस्विनो दरिद्रस्य वनादन्यत् कुतः सुखम् ॥ ०६६१॥

ENMSS@0662@1अत्यन्तव्यवधानलब्धजनुषो जात्यापि भिन्नक्रमाः सांनिध्यं विधिना कुतूहलवता कुत्रापि संप्रापिताः ।

ENMSS@0662@2गच्छन्त्यामरणं गुणव्यतिकृता भेदं न भूमीरुहस्ते काष्ठादपि निष्ठुरा गुणगणैर्ये नैकतां प्रापिताः ॥ ०६६२॥

ENMSS@0663@1अत्यन्तशीतलतया सुभगस्वभाव सत्यं न कश्चिदपि ते तरुरस्ति तुल्यः ।

ENMSS@0663@2छायार्थिनामपि पुनर्विकटद्विजिह्व- सङ्गेन चन्दन विषद्रुमनिर्विशेषः ॥ ०६६३॥

ENMSS@0664@1अत्यन्तशुद्धचिन्मात्रे परिणामश्चिराय यः ।

ENMSS@0664@2तुर्यातीतं पदं तत् स्यात् तत्स्थो भूयो न शोचति ॥ ०६६४॥

ENMSS@0665@1अत्यन्तसुखसंचारा मध्याह्ने स्पर्शतः सुखाः ।

ENMSS@0665@2दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः ॥ ०६६५॥

ENMSS@0666@1अत्यन्तस्तिमिताङ्गानां व्यायामेन सुखैषिणाम् ।

ENMSS@0666@2भ्रान्तिज्ञानावृताक्षाणां प्रहारोऽपि सुखायते ॥ ०६६६॥

ENMSS@0667@1अत्यन्तोन्नतपूर्वपर्वतमहापीठे हरस्पर्धया दूरोदश्चितधूमसंनिभतमस्तारास्फुलिण्गाकुलम् ।

ENMSS@0667@2नूनं पञ्चशरोऽकरोच्छशिमिषात् स्वं ज्वाललिङ्गं यतो गर्वाच्छर्वपरान् दहेन्मुनिवरान् सर्वानखर्वा शुभिः ॥ ०६६७॥

ENMSS@0668@1अत्यपूर्वस्य रागस्य पूर्वपक्षाय पल्लवाः ।

ENMSS@0668@2पद्मानि पादयुग्मस्य प्रत्युदाहरणानि च ॥ ०६६८॥

ENMSS@0669@1अत्यम्बुपानं कठिनासनं च धातुक्षयो वेगविधारणं च ।
ENMSS@0669@2दिवाशयो जागरणं च रात्रौ षड्भिर्नराणां निवसन्ति रोगाः ॥ ०६६९॥
ENMSS@0670@1अत्यम्बुपानात् प्रभवन्ति रोगाः अल्पाम्बुपाने च तथैव दोषाः ।
ENMSS@0670@2तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभुरि ॥ ०६७०॥
ENMSS@0671@1अत्यम्बुपानाद् विषमाशनाच्च दिवाशयाज्जागरणच्च रात्रौ ।
ENMSS@0671@2सम्रोधनान् मूत्रपुरीषयोश्च षड्भिः प्रकारैः प्रभवन्ति रोगाः ॥ ०६७१॥
ENMSS@0672@1अत्यम्बुपानान्न विपच्यतेऽन्नम् अनम्बुपानाच्च स एव दोषः ।
ENMSS@0672@2तस्मान्नरो वह्निविवर्धनार्थं महुर्मुहुर्वारि पिबेदभूरि ॥ ०६७२॥
ENMSS@0673@1अत्यर्थवक्रत्वमनर्थकं या शून्यापि सर्वान्यगुणैर्व्यनक्ति ।
ENMSS@0673@2अस्पृश्यतादूषितया तया किं तुच्छश्वपुच्छच्छटयेव वाचा ॥ ०६७३॥
ENMSS@0674@1अत्यल्पं जीवितं पापान्यापातमधुराण्यलम् ।
ENMSS@0674@2तदाचर चिरस्थेयपरलोकावलोकनम् ॥ ०६७४॥
ENMSS@0675@1अत्यल्पसंपदः सन्तः पुमानिष्टश्च दुष्कुले ।
ENMSS@0675@2लक्ष्मीरनभिजातस्य वेधसः स्खलितत्रयम् ॥ ०६७५॥
ENMSS@0676@1अत्याग्रहो न कर्तव्यो हठात्कश्चिन्न भाषते ।
ENMSS@0676@2यथायथोन्दति तथा भारो भवति कम्बलः ॥ ०६७६॥
ENMSS@0677@1अत्याजिलब्धविजयप्रसरस्त्वया किं विज्ञायते रुचिपदं न महीमहेन्द्रः ।
ENMSS@0677@2प्रत्यर्थिदानवशताहितचेष्टयासौ जीमूतवाहनधियं न करोति कस्य ॥ ०६७७॥
ENMSS@0678@1अत्यादरादध्ययनं द्विजानाम् अर्थोपलब्ध्या फलवद्विधाय ।
ENMSS@0678@2क्रतूनतुच्छानवितुं तवैषा मीमांसकाद्याधिकृतिः प्रसिद्धा ॥ ०६७८॥
ENMSS@0679@1अत्यादरेण निहितं मयि यद्भवत्या तत्प्रेमहेम किमभूदिति नैव जाने ।
ENMSS@0679@2उत्सृज्य किं तदिह पातकमुत्तराणि प्राणा अपि प्रियतमे कतमे भवेयुः ॥ ०६७९॥
ENMSS@0680@1अत्यादरो दारसहोदरेषु न मातृपित्रोर्न च सोदरेषु ।
ENMSS@0680@2मूर्खे नियोगस्तनये वियोगः पश्यन्ति लोकाः कलिकौतुकानि ॥ ०६८०॥
ENMSS@0681@1अत्यादरो भवेद् यत्र कार्यकारणवर्जितः ।
ENMSS@0681@2तत्र शङ्का प्रकर्तव्या परिणामेऽसुखावहा ॥ ०६८१॥

ENMSS@0682@1अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
ENMSS@0682@2शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार ॥ ०६८२॥
ENMSS@0683@1अत्यायासेन नात्मानं कुर्यादतिसमुच्छ्रयम् ।
ENMSS@0683@2पातो यथा हि दुःखाय नोच्छ्रायः सुखकृत् तथा ॥ ०६८३॥
ENMSS@0684@1अत्यार्यमतिदातारम् अतिशूरमतिव्रतम् ।
ENMSS@0684@2प्रज्ञाभिमानिनं चैव श्रीर्भयान्नोपसर्पति ॥ ०६८४॥
ENMSS@0685@1न चातिगुणवत्स्वेषा नात्यन्तं निर्गुणेषु च ।
ENMSS@0685@2नैषा गुणान्कामयते नैर्गुण्यां नानुरज्यते ।
ENMSS@0685@3उन्मत्ता गौरिवान्धा श्रीः क्वचिदेवावतिष्ठते ॥ ०६८५॥
ENMSS@0686@1अत्याशीविषशस्त्रं हि विजितप्रलयानलम् ।
ENMSS@0686@2तेजो लङ्घयितुं शक्तः को नु नाम द्विजन्मनाम् ॥ ०६८६॥
ENMSS@0687@1अत्यासन्ना विनाशाय दूरस्था न फलप्रदा ।
ENMSS@0687@2तस्मादाहृत्य दातव्या भूमिः पार्थिवसत्तम ॥ ०६८७॥
ENMSS@0688@1अत्यासन्ना विनाशाय दूरस्था न फलप्रदाः ।
ENMSS@0688@2सेव्या मध्यमभावेन राजावह्निर्गुरुः स्त्रियः ॥ ०६८८॥
ENMSS@0689@1अत्युक्तौ यदि न प्रकुप्यसि मृषावादं न चेन्मन्यसे तद्ब्रूमोऽद्भुतकीर्तनाय रसना केषां न कण्डूयते ।
ENMSS@0689@2देव त्वत्तरुणप्रतापदहनज्वालावलीशोषिताः सर्वे वारिधयस्ततो रिपुवधूनेत्राम्बुभिः पूरिताः ॥ ०६८९॥
ENMSS@0690@1अत्युच्चस्तनशैलदुर्गममुरो नाभिर्गभीरान्तरा भीमं देहवनं स्फुरद्भुजलतं रोमालिजालाकुलम् ।
ENMSS@0690@2व्याधः पञ्चशरः किरत्यतितरां तीक्ष्णान् कटाक्षाशुगांस्- तन्मे ब्रूहि मनःकुरङ्ग शरणं किं सांप्रतं यास्यसि ॥ ०६९०॥
ENMSS@0691@1अत्युच्चाः परितःस्फुरन्ति गिरयः स्फारास्तथाम्भोधयस्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
ENMSS@0691@2आश्चर्येण मुहुर्मुहुः स्तुतिमिमां प्रस्तौमि यावद्भुवस्तावद्बिभ्रादिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ॥ ०६९१॥
ENMSS@0692@1अत्युच्चैरतिनीचैरश्लीलमयुक्तमनुपयुक्तं च ।
ENMSS@0692@2न वदति नृपतिसभाया- मादरमीप्सुर्महामनसाम् ॥ ०६९२॥
ENMSS@0693@1अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः ।

ENMSS@0693@2सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥ ०६९३॥
ENMSS@0694@1अत्युच्छ्रितोन्नतसितध्वजपङ्क्तिचित्रैर्नागाश्वपत्तिरथसंक्षुभितैर्बलौघैः
।
ENMSS@0694@2उद्धूतचामरविराजितगात्रशोभाः पुण्येन भूमिपतयो भुवि संचरन्ति
॥ ०६९४॥
ENMSS@0695@1अत्युज्ज्वलैरवयवैर्मृदुतां दधाना मुक्ता बलं वितरति स्मरदानदक्षा ।
ENMSS@0695@2स्निग्धाशाया गुरुगुणग्रथिता मनोज्ञा फीणी नवीनललनेव मुदं ददाति
॥ ०६९५॥
ENMSS@0696@1अत्युत्सार्य बहिर्विटङ्कवडभीगण्डस्थलश्यामिकां
भिन्नाभिन्नगवाक्षजालविरलच्छिद्रैः प्रदीपांशवः ।
ENMSS@0696@2आरूढस्य भरेण यौवनमिव ध्वान्तस्य नक्तं मुखे निर्याताः कपिलाः
करालविरलश्मश्रूप्ररोहा इव ॥ ०६९६॥
ENMSS@0697@1अत्युत्सेकेन महसा साहसाध्यवसायिनाम् ।
ENMSS@0697@2श्रीरारोहति संदेहं महतामपि भूभृताम् ॥ ०६९७॥
ENMSS@0698@1अत्युदात्तगणेष्वेषा कृतपुण्यैः प्ररोपिता ।
ENMSS@0698@2शतशाखी भवत्येव यावन्मात्रापि सत्क्रिया ॥ ०६९८॥
ENMSS@0699@1अत्युद्गाढरयस्थिराकृतिघनध्वानभ्रमन्मन्दर-
क्षुब्धक्षीरधिवीचिसंचयगतप्रालेयपादोपमः ।
ENMSS@0699@2श्रीमत्पोतलके गभीरविवृतिध्वानप्रतिध्वानिते सान्द्रस्वांशुचयश्रिया
वलयितो लोकेश्वरः पातु वः ॥ ०६९९॥
ENMSS@0700@1अत्युद्धृता वसुमती दलितोऽरिवर्गः क्रोडीकृता बलवता बलिराजलक्ष्मीः
।
ENMSS@0700@2एकत्र जन्मनि कृतं यदनेन यूना जन्मत्रये तदकरोत् पुरुषः पुराणः
॥ ०७००॥
ENMSS@0701@1अत्युन्नतपदं प्राप्तः पूज्यान् नैवावमानयेत् ।
ENMSS@0701@2नहुषः शक्रतां प्राप्तश्च्युतोऽगस्त्यावमाननात् ॥ ०७०१॥
ENMSS@0702@1अत्युन्नतस्तनमुरो नयने सुदीर्घे वक्रे भ्रुवावतितरां वचनं ततोऽपि ।
ENMSS@0702@2मध्योऽधिकं तनुरनूनगुरुर्नितम्बो मन्दा गतिः किमपि चाद्भुतयौवनायाः
॥ ०७०२॥
ENMSS@0703@1अत्युन्नतस्तनयुगा तरलायताक्षी द्वारि स्थिता तदुपयानमहोत्सवाय
।
ENMSS@0703@2सा पूर्णकुम्भनवनीरजतोरणस्रक्- संभारमङ्गलमयत्नकृतं विधत्ते

॥ ०७०३॥
ENMSS@0704@1अत्युन्नतिं प्राप्य नरः प्रावारः कीटको यथा ।
ENMSS@0704@2स विनश्यत्यसंदेहम् आहैवमुशना नृपः ॥ ०७०४॥
ENMSS@0705@1अत्युन्नतिव्यसनिनः शिरसोऽधुनैष स्वस्यैव चातकशिशुः प्रणयं विधत्ताम् ।
ENMSS@0705@2अस्यैतदिच्छति यदि प्रततासु दिक्षु ताः स्वच्छशीतमधुराः क्व नु नाम नापः ॥ ०७०५॥
ENMSS@0706@1अत्युन्नतोऽम्बुभिर्मेघश्चातकान् न धिनोति चेत् ।
ENMSS@0706@2मरुता हृतसर्वस्वः स पश्चात् किं करिश्यति ॥ ०७०६॥
ENMSS@0707@1अत्युपचित्तैरुपायैश्चक्रभृदेको भुजैरिव चतुर्भिः ।
ENMSS@0707@2नृपतिः श्रियमपि सुचिरं हरिरिव परिरभ्य निर्भरं रमते ॥ ०७०७॥
ENMSS@0708@1अत्युल्लसद्विसरहस्ययुजा भुजेन वक्रेण शारदसुधांशुसहोदरेण ।
ENMSS@0708@2पीयुषपोषसुभगेन च भाषितेन त्वं चेत् प्रसीदसि मृगाक्षि कुतो निदाघः ॥ ०७०८॥
ENMSS@0709@1अत्युष्णा ज्वरितेव भास्करकरैरापीतसारा मही यक्ष्मार्ता इव पादपाः प्रमुषितच्छाया दवाग्न्याश्रयात् ।
ENMSS@0709@2विक्रोशन्त्यवशादिवोच्छ्रितगुहाव्यात्ताननाः पर्वता लोकोऽयं रविपाकनष्टहृदयः संयाति मूर्छामिव ॥ ०७०९॥
ENMSS@0710@1अत्युष्णात् सघृतादन्नाद् अच्छिद्राच्चैव वाससः ।
ENMSS@0710@2अपरप्रेष्यभावाच्च भूय इच्छन् पतत्यधः ॥ ०७१०॥
ENMSS@0711@1अत्येति रजनी या तु सा न प्रतिनिवर्तते ।
ENMSS@0711@2यात्येव यमुना पूर्णा समुद्रमुदकार्णवम् ॥ ०७११॥
ENMSS@0712@1अत्र चैत्रसमये निरन्तराः प्रोषिताहृदयकीर्णपावकाः ।
ENMSS@0712@2वान्ति कामुकमनोविमोहना व्याललोलमलयाचलानिलाः ॥ ०७१२॥
ENMSS@0713@1अत्र मन्मथमिवातिसुन्दरं दानवारिमिव दिव्यतेजसम् ।
ENMSS@0713@2शैलराजमिव धैर्यशालिनं वेद्मि वेङ्कटपतिं महीपतिम् ॥ ०७१३॥
ENMSS@0714@1अत्र यत् पतितं वर्णबिन्दुमात्राविसर्गकम् ।
ENMSS@0714@2भ्रमप्रमाददोषाद्धि क्षन्तव्यं तत् सुबुद्धिभिः ॥ ०७१४॥
ENMSS@0715@1अत्रस्तो निजपक्षैस्तुण्डविघातैर्जनानभिभवन्तः ।
ENMSS@0715@2कुर्वन्ति शत्रुवृद्धिं निशि विरुतवन्तो जनविनाशम् ॥ ०७१५॥
ENMSS@0716@1अत्रस्थः सखि लक्षयोजनगतस्यापि प्रियस्यागमं वेत्त्याख्याति च

धिक्छुकादय इमे सर्वे पथन्तः स्थिताः ।

ENMSS@0716@2मत्कान्तस्य वियोगतापदहनज्वालावलीचन्दनः काकस्तेन गुणेन काञ्चनमये व्यापारितः पञ्जरे ॥ ०७१६॥

ENMSS@0717@1अत्रकण्ठं विलुठ सलिले निर्जला भूः पुरस्ताज्ञह्याः शोषं वदनविहितेनामलक्याः ।

ENMSS@0717@2फलेन स्थाने स्थाने तदिति पथिकस्त्रीजन(ः) क्लान्तगात्रीं पश्यन् सीतां

किमु न कृपया वर्धितो रोदितश्च ॥ ०७१७॥

ENMSS@0718@1अत्रनुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः ।

ENMSS@0718@2रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥ ०७१८॥

ENMSS@0719@1अत्रान्तरे किमपि वाग्विभवातिवृत्त- वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः ।

ENMSS@0719@2तद्भूरिसात्त्विकविकारमपास्तधैर्यम् आचार्यकं विजयि मान्मथमाविरासीत् ॥ ०७१९॥

ENMSS@0720@1अत्रान्तरे च कुलटाकुलवर्त्मघात- संजातपातक इव स्फुटलाञ्छनश्रीः ।

ENMSS@0720@2वृन्दावनान्तरमदीपयदंशुजालैर्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥ ०७२०॥

ENMSS@0721@1अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ।

ENMSS@0721@2यतो हि कर्मभूरेषा अतोऽन्या भोगभूमयः ॥ ०७२१॥

ENMSS@0722@1अत्रायातं पथिक भवता कर्मणाकारि पथ्यं तथ्यं ब्रूमः पुनरपि सखे साहसं मा विधासीः ।

ENMSS@0722@2वामाक्षीणां नयननलिनप्रान्तनिर्धूतधैर्याः स्वां मर्यादामिह हि नगरे योगिनोऽपि त्यजन्ति ॥ ०७२२॥

ENMSS@0723@1अत्रर्द्रचन्दनकुचार्पितसूत्रहार- सीमन्तचुम्बिसिचयस्फुटबाहुमूलः ।

ENMSS@0723@2दूर्वाप्रकाण्डरुचिरासु गुरूपभोगो गौडाङ्गनासु चिरमेष चकास्ति वेषः ॥ ०७२३॥

ENMSS@0724@1अत्रार्यः खरदूषणत्रिशिरसां नादानुबन्धोद्यमे रुन्धाने भुवनं त्वया चकितया योद्धा निरुद्धः क्षणम् ।

ENMSS@0724@2सस्नेहाः सरसाः सहासरभसाः सभ्रू भ्रमाः सस्पृहाः सोत्साहास्त्वयि तद्बले च निदधे दोलायमाना दृशः ॥ ०७२४॥

ENMSS@0725@1अत्रावासपरिग्रहं गृहपतेराचक्ष्व चण्डोद्यमैः चण्डालैरुपसेविताः

सखि धनुर्हस्तैः पुरस्तादिमाः ।

ENMSS@0725@2उत्कालाकुलसारमेयरसनालेलिह्यमानोन्नत-

द्वाराग्रत्वगवास्थिसास्रशकलस्रग्वल्लयः पल्लयः ॥ ०७२५॥

ENMSS@0726@1अत्राशितं शयितमत्र निपीतमत्र सायं तया सह मया विधिवञ्चितेन ।

ENMSS@0726@2इत्यादि हन्त परिचिन्तयतो वनान्ते रामस्य लोचनपयोभिरभूत् पयोधिः

॥ ०७२६॥

ENMSS@0727@1अत्रासीत् किल नन्दसद्म शकटस्यात्राभवद् भञ्जनं

बन्धच्छेदकरोऽपिदामभिरभूद् बद्धोऽत्र दामोदरः ।

ENMSS@0727@2इत्थं माथुरवृद्धवक्त्रविगलत्पीयूषधारां पिबन् आनन्दाश्रुधरः

कदा मधुपुरीं धन्यश्चरिष्याम्यहम् ॥ ०७२७॥

ENMSS@0728@1अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद् देवरे गाढं वक्षसि

ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।

ENMSS@0728@2दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः केनाप्यत्र मृगाक्षि

राक्षसपतेः कृत्ता च कण्ठवी ॥ ०७२८॥

ENMSS@0729@1अत्रास्थः पिशितं शवस्य कठिनैरुत्कृत्य कृत्स्नं

नखैर्नग्नस्नायुकरालघोरकुहरैर्मस्तिष्कदिग्धाङ्गलिः ।

ENMSS@0729@2संदश्यौष्ठपुटेन भुग्नवदनः प्रेतश्चिताग्निद्रुतं

सूत्कारैर्नलकास्थिकोटरगतं मज्जानमाकर्षति ॥ ०७२९॥

ENMSS@0730@1अत्रास्मिन् सुतनु लतागृहेऽस्ति रम्यं मालत्याः कुसुममनुच्चितं परेण ।

ENMSS@0730@2इत्युक्त्वा मृदुकरपल्लवं गृहीत्वा मुग्धाक्षी रहसि निनाय कोऽपि

धन्यः ॥ ०७३०॥

ENMSS@0731@1अत्रिलोचनसंभूतज्योतिरुद्गमभासिभिः ।

ENMSS@0731@2सदृशण् शोभतेऽत्यर्थं भूपाल तव चेष्टितम् ॥ ०७३१॥

ENMSS@0732@1अत्रैव दास्यसि विमुक्तिमथापि याचे मातः शरीरपतनं मणिकर्णिकायाम् ।

ENMSS@0732@2अस्तु स्वकृत्यमनुकम्पनमीश्वराणां दासस्य कर्मकरतैव तथा स्वकृत्यम्

॥ ०७३२॥

ENMSS@0733@1अत्रैव सरसि जातं विकसितमत्रैव निर्भरं नलिनैः ।

ENMSS@0733@2कालवशागततुहिनैर्विलीनमत्रैव हा कष्टम् ॥ ०७३३॥

ENMSS@0734@1अत्रैष स्वयमेव चित्रफलके कम्पस्खलल्लेखया संतापार्तिविनोदनाय कथमप्यालिख्य सख्या भवान् ।

ENMSS@0734@2बाष्पव्याकुलमीक्षितः सरभसं चूताङ्कुरैरर्चितो मूर्ध्ना च प्रणतः सखीषु मदनव्याजेन चापह्नुतः ॥ ०७३४॥

ENMSS@0735@1अत्रोत्पातघनेन मन्त्रिविकले शून्याम्बरव्यापिना धृष्टस्वप्रकृतिक्रियासमुचिते ग्रमे तथा जृम्भितम् ।

ENMSS@0735@2रथ्याकर्दमवाहिनामतिशुचिस्वच्छात्मनामन्तरं नाप्यज्ञायि जनैर्यथौघपयसां स्रोतोजलानामपि ॥ ०७३५॥

ENMSS@0736@1अत्रोद्याने मया दृष्टा वल्लरी पञ्चपल्लवा ।

ENMSS@0736@2पल्लवे पल्लवे ताम्रा यस्यां कुसुममञ्जरी ॥ ०७३६॥

ENMSS@0737@1अत्वरा सर्वकार्येषु त्वरा कार्यविनाशिनी ।

ENMSS@0737@2त्वरमाणेन मूर्खेण मयूरो वायसीकृतः ॥ ०७३७॥

ENMSS@0738@1अथ कालाग्निरुद्रस्य तृतीयनयनोत्थिता ।

ENMSS@0738@2ज्वाला दहति तत्सर्वं निर्वाणं ब्रह्मणो यतः ॥ ०७३८॥

ENMSS@0739@1अथ कृतकविहङ्गैः पार्थिवोद्दूलयन्तैस्तुमुलमुपरिपातादम्बुवर्षात् त्रसन्त्यः अविगलितसपत्नीगात्रसंमर्ददुःखाः प्रणयिनमभिपेतुर्हानिनादेन देव्यः ॥

ENMSS@0740@1(अर्जुन उवाच) अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।

ENMSS@0740@2अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ०७४०॥

ENMSS@0741@1(श्रीभगवानुवाच) काम एष क्रोध एष रजोगुणसमुद्भवः ।

ENMSS@0741@2महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ०७४१॥

ENMSS@0742@1धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।

ENMSS@0742@2यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ०७४२॥

ENMSS@0743@1अथ कोकिल कुरु मौनं जलधरसमयेऽपि पिच्छिला भूमिः ।

ENMSS@0743@2विकसति कुटजकदम्बे वक्तरि भेके कुतस्तवावसरः ॥ ०७४३॥

ENMSS@0744@1अथ धूकस्वरो वामे यात्रायां गच्छतः शुभः ।

ENMSS@0744@2दक्षिणे मृतये किंचिद् दुष्टं दर्शनमस्य हि ॥ ०७४४॥

ENMSS@0745@1अथ जगदवगाढं वासरान्तापचारात् तिमिरपटलवृद्धावप्रतीकारसत्त्वम् ।

ENMSS@0745@2शशिभिषगनुपूर्वं शीतहस्तो भिषज्यन्न् अधिकविशदवक्त्रः स्वैरभावं चकार ॥ ०७४५॥

ENMSS@0746@1अथ दीर्घतमं तमः प्रवेक्ष्यन् सहसा रुग्णरयः स संभ्रमेण ।

ENMSS@0746@2निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने ॥ ०७४६॥
ENMSS@0747@1अथ देहं स्थिरीकर्तुं योगिनां सिद्धिमिच्छताम् ।
ENMSS@0747@2कथ्यन्ते शुद्धकर्माणि यैः सिद्धिं प्रापुरुत्तमाः ॥ ०७४७॥
ENMSS@0748@1अथ नगरधृतैरमात्यरत्नैः पथि समियाय स जाययाभिरामः ।
ENMSS@0748@2मधुरिव कुसुमश्रिया सनाथः क्रममिलितैरलिभिः कुतूहलोत्कैः ॥ ०७४८॥
ENMSS@0749@1अथ नभसि निरीक्ष्य व्याप्तदिक्चक्रवालं सजलजलदजालं प्राप्तहृत्रृषप्रकर्षः ।
ENMSS@0749@2विहितविपुलबर्हाडम्बरो नीलकण्ठो मदमृदुकलकण्ठो नाट्यमङ्गीचकार ॥ ०७४९॥
ENMSS@0750@1अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।
ENMSS@0750@2नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥ ०७५०॥
ENMSS@0751@1अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः ।
ENMSS@0751@2नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ॥ ०७५१॥
ENMSS@0752@1अथ पङ्क्तिमतामुपेयिवद्भिः सरसैर्वक्रपथश्रितैर्वचोभिः ।
ENMSS@0752@2क्षितिभर्तुरुपायनं चकार प्रथमं तत्परतस्तुरङ्गमाद्यैः ॥ ०७५२॥
ENMSS@0753@1अथ पथिकवधूदहनः शनकैरुदभून्निशाकरालोकः ।
ENMSS@0753@2कुमुदप्रबोधदूतो व्यसनगुरुश्चक्रवाकीणाम् ॥ ०७५३॥
ENMSS@0754@1अथ प्रसन्नेन्दुमुखीन् सिताम्बरा समाययावुत्पलपत्रलोचना ।
ENMSS@0754@2सपङ्कजा श्रीरिव गां निषेवितुं सहंसबालव्यजना शरद्वधूः ॥ ०७५४॥
ENMSS@0755@1अथबद्धजेटे रामे सुमन्त्रे गृहमागते ।
ENMSS@0755@2त्यक्तो राजा सुतत्यागाद् अविश्वस्तैरिवासुभिः ॥ ०७५५॥
ENMSS@0756@1अथ भद्राणि भूताणि हीनशक्तिरहं परम् ।
ENMSS@0756@2मुदं तदापि कुर्वीत हानिर्द्वेषफलं यतः ॥ ०७५६॥
ENMSS@0757@1अथ मनसिजदिग्ज्याभिशंसी जलधरदुग्दुभिराततान शब्दम् ।
ENMSS@0757@2तदनु तदनुजीविभिः कदम्बैः कवचितमुन्मदषद्वदच्छलेन ॥ ०७५७॥
ENMSS@0758@1अथ मन्त्रमिमं कर्ने जपेद्दंशं स्पृशेत् तथा ।
ENMSS@0758@2एकविंशतिवारं च वृश्चिकक्ष्वेडशान्तये ॥ ०७५८॥
ENMSS@0759@1अथ मन्मथवाहिनीपरागः किमपि ज्योतिरुदस्फुरत् पुरस्तात् ।

ENMSS@0759@2तिमिरस्य जरा चकोरकूरं कुलडाकेलिबनीदवानलार्चिः ॥ ०७५९॥
ENMSS@0760@1अथ रतिरभसादलीकनिद्रा- मधुरविघूर्णितलोचनोत्पलाभिः ।
ENMSS@0760@2शयनतलमशिश्रियन् वधूभिः सह मदमन्मथमन्थरा युवानः ॥ ०७६०॥
ENMSS@0761@1अथ राज्ञा दरः कार्यो न तु कस्यां चिदापदि ।
ENMSS@0761@2अपि चेतसि दीर्णः स्यान् नैव वर्तेत दीर्णवत् ॥ ०७६१॥
ENMSS@0762@1अर्थतुपक्वात् कलतोऽवशोषिताद् विकृष्य बीजं पयसा निषिच्य ।
ENMSS@0762@2विशोषितं पञ्चदिनानि सर्पिषा विडङ्गमिश्रेण च धूपयेत् ततः ॥ ०७६२॥
ENMSS@0763@1अथर्वविधितत्त्वज्ञैर्ब्राह्मणैर्विजितेन्द्रियैः ।
ENMSS@0763@2मन्त्रतन्त्रविधानज्ञैर्दूरादुन्मूलयेद् रिपून् ॥ ०७६३॥
ENMSS@0764@1अथर्वाम्नायतत्त्वज्ञस्तन्त्रज्ञः ऋतुकर्मठः धनुर्वेदस्य वेत्ता च
पुरोधा राजसंमतः ॥
ENMSS@0765@1अथ लक्ष्मणानुगतकान्तवपुर्जलधिं विलङ्घ्य शशिदाशरथिः ।
ENMSS@0765@2परिवारितः परित ऋक्षगनैस्तिमिरौघराक्षसकुलं बिभिदे ॥ ०७६५॥
ENMSS@0766@1अथवा नश्यति प्रज्ञा प्राज्ञस्यापि नरस्य हि ।
ENMSS@0766@2प्रतिकूले गते दैवे विनाशे समुपस्थिते ॥ ०७६६॥
ENMSS@0767@1अथवा प्रोच्यते ध्यानम् अन्यदेवात्र योगिनाम् ।
ENMSS@0767@2रहस्यं परमं मुक्तेः कारणं प्रथमं च यत् ॥ ०७६७॥
ENMSS@0768@1अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः ।
ENMSS@0768@2स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ॥ ०७६८॥
ENMSS@0769@1अथवाभिनिविष्टबुद्धिषु व्रजति व्यर्थकतां सुभाषितम् ।
ENMSS@0769@2रविरागिषु शीतरोचिषः करजालं कमलाकरोष्विव ॥ ०७६९॥
ENMSS@0770@1अथवा मम भाग्यविप्लवाद् अशनिः कल्पित एष वेधसा ।
ENMSS@0770@2यदनेन तरुर्न पातितः क्षिपता तद्विडपाश्रया लता ॥ ०७७०॥
ENMSS@0771@1अथवा मूलसंस्थानाम् उद्घातैस्तु प्रबोधयेत् ।
ENMSS@0771@2सुप्तां कुण्डलिनीं शक्तिं बिसतन्तुनिभाकृतिम् ॥ ०७७१॥
ENMSS@0772@1अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः ।
ENMSS@0772@2हिमसेकविपत्तिरत्र मे नलीनी पूर्वनिदर्शनं मता ॥ ०७७२॥
ENMSS@0773@1अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
ENMSS@0773@2क्लान्तिरहितमभिराधयितुं विधिवत् तपांसि विदधे धनंजयः ॥ ०७७३॥
ENMSS@0774@1अथ संसारसंहारवामनाबन्धवासितः ।

ENMSS@0774@2अजायत वृषारूढो भैरवो महसां निधिः ॥ ०७७४॥

ENMSS@0775@1अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं रतिवलयपदाङ्के चापमासज्य कण्ठे ।

ENMSS@0775@2सहचरमधुहस्तन्यस्तुचूताङ्कुरास्त्रश् शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥ ०७७५॥

ENMSS@0776@1अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।

ENMSS@0776@2मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥ ०७७६॥

ENMSS@0777@1अथ सान्द्रसांध्यकिरणारुणितं हरिहेतिहूति मिथुनं पततोः ।

ENMSS@0777@2पृथगुत्पपात विरहार्तिदलद्- धृदयस्त्रुतासृगनुलिप्तमिव ॥ ०७७७॥

ENMSS@0778@1अथ सामान्यशृङ्गारे युवतीनां प्रशंसनम् ।

ENMSS@0778@2स्त्रीपुंसजातिकथनं तयोः संयोगवर्णनम् ॥ ०७७८॥

ENMSS@0779@1अथ स्फुरन्मीनविधूतपङ्कजा विकङ्कतीरस्खलितोर्मिसंहतिः ।

ENMSS@0779@2पयोऽवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ ०७७९॥

ENMSS@0780@1अथ स्वमादाय भयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात् ।

ENMSS@0780@2निलीय तस्मिन् निवसन्नपांनिधिर्वने तडाको ददृशोऽवनीभुजा ॥ ०७८०॥

ENMSS@0781@1अथ स्वस्थाय देवाय नित्याय हतपाप्मने ।

ENMSS@0781@2त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥ ०७८१॥

ENMSS@0782@1अथागत्य भुवं राज्ञां गता वाहनतां हयाः ।

ENMSS@0782@2तेषां धर्मार्थकामांश्च साधयन्त्युपकारिणः ॥ ०७८२॥

ENMSS@0783@1अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत् कुमारी ।

ENMSS@0783@2नासौ न काम्यो न च वेद सम्यग् दृष्टुं न सा भिन्नरुचिर्हि लोकः ॥ ०७८३॥

ENMSS@0784@1अथातः संप्रवक्ष्यामि लक्षणानि हि वाजिनाम् ।

ENMSS@0784@2शुभानि वर्णैरावर्तैस्तानि विद्याद्विचारतः ॥ ०७८४॥

ENMSS@0785@1अथातः संप्रवक्ष्यामि हयारोहणमुत्तमम् ।

ENMSS@0785@2येन विज्ञातमात्रेण रेवन्तः प्रियतां व्रजेत् ॥ ०७८५॥

ENMSS@0786@1अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।

ENMSS@0786@2रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ॥ ०७८६॥

ENMSS@0787@1अथानन्दकरं वक्ष्ये षडर्तूनां च वर्णनम् ।
ENMSS@0787@2यद्रसास्वादमुदिता विभान्ति विबुधालयः ॥ ०७८७॥
ENMSS@0788@1अथानुक्रमद्वाराणि विरच्यन्तेऽत्र वाङ्मये ।
ENMSS@0788@2अन्योक्तिसूक्तमुक्तालीं समुद्धृत्य श्रुताम्बुधेः ॥ ०७८८॥
ENMSS@0789@1अथापि नापसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् ।
ENMSS@0789@2विषयेन्द्रियसंयोगान् मनः क्षुभ्यति नान्यथा ॥ ०७८९॥
ENMSS@0790@1अथाप्रशस्ताः खरतुल्यनादाः प्रदीप्तपुच्छाः कूनखा विवर्णाः ।
ENMSS@0790@2निकृत्तकर्णा द्विपमस्तकाश्च भवन्ति ये वा सिततालुजिह्वाः ॥ ०७९०॥
ENMSS@0791@1अथायतनसंनिधौ भगवतो भवानीपतेर्मनोहरमचीखनद् भुवनभूषणं भूपतिः ।
ENMSS@0791@2विगाहनकुतूहलोत्तरलपौरसीमन्तिनी- पयोधरभरत्रुटद्विकटवीचिमुद्रं सरः ॥ ०७९१॥
ENMSS@0792@1अथाशुद्धोद्भवो ग्राम्यनर्तक्स्येव यो भवेत् ।
ENMSS@0792@2कैतवस्नेहमापन्नो भवः संकीर्ण उच्यते ॥ ०७९२॥
ENMSS@0793@1अथाश्वानां जन्मदेशान् प्रवक्ष्याम्यनुपूर्वशः ।
ENMSS@0793@2उत्तमानां च मध्यानां हीनानां यत्र संभवः ॥ ०७९३॥
ENMSS@0794@1अथाससादास्तमनिन्द्यतेजा जनस्य दूरोज्झितमृत्युभीतेः ।
ENMSS@0794@2उत्पत्तिमद्वस्तु विनाश्यवश्यं यथाहमित्येवमिवोपदेष्टुम् ॥ ०७९४॥
ENMSS@0795@1अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च चक्रुः
कुशं रत्नविशोषभाजं सौभ्रात्रमेषां हि कुलानुसारि ॥
ENMSS@0796@1अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
ENMSS@0796@2जनस्थाने शून्ये विकलकरणैरार्यचरितैरपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ ०७९६॥
ENMSS@0797@1अथेह कथ्यतेस्माभिः कर्मना येन बन्धनम् ।
ENMSS@0797@2छिद्यते सदुपायेन श्रुत्वा तत्र प्रवर्त्यताम् ॥ ०७९७॥
ENMSS@0798@1अथैतत् पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ।
ENMSS@0798@2सर्वं नेत्यनृतं ब्रूयात् स दुष्कीर्तिः स्वसन् मृतः ॥ ०७९८॥
ENMSS@0799@1अथो गणपतिं वन्दे महामोदविधायिनम् ।
ENMSS@0799@2विद्याधरगणैर्यस्य पूज्यते कण्ठगर्जितम् ॥ ०७९९॥
ENMSS@0800@1अथोच्चकैर्जरठकपोतकंधरा- तनूरुहप्रकरविपाण्डुरद्युति ।

ENMSS@0800@2बलैश्चलच्चरणविधूतमुच्चरद् धनावलीरुदचरत क्ष्मारजः
॥ ०८००॥
ENMSS@0801@1अथोच्यते श्वानरुतस्य सारं सारं समस्तेष्वपि शाकुनेषु ।
ENMSS@0801@2विस्पष्टचेष्टं शुभलक्षणं च शुभाशुभं प्राक्तनकर्मपाकम्
॥ ०८०१॥
ENMSS@0802@1अथोत्तरस्यां दिशि खञ्जरीटम् आलोक्य कोऽपि स्मितमादधानः ।
ENMSS@0802@2कस्याश्चिदास्ये स्मितचारुभासि सभावयामास विलोचनानि ॥ ०८०२॥
ENMSS@0803@1अथोद्ययौ बालसुहृत् स्मरस्य शयामाधवः श्यामललक्ष्मभङ्ग्या ।
ENMSS@0803@2तारावधूलोचनचुम्बनेन लीलाविलीनाञ्जनबिन्दुरिन्दुः ॥ ०८०३॥
ENMSS@0804@1अथोपगूढे शरदा शशाङ्के प्रावृड् ययौ शान्ततडित्कटाक्षा ।
ENMSS@0804@2कासां न सौभाग्यगुणोऽङ्गनानां नष्टः परिभ्रष्टपयोधराणाम् ॥ ०८०४॥
ENMSS@0805@1अदः समित्संमुखवीरयौवत- त्रटद्भुजाकम्बुमृणालहारिणी ।
ENMSS@0805@2द्विषद्व्रणस्रैणदृगम्बुनिर्झरे यशोमरालावलिरस्य खेलति ॥ ०८०५॥
ENMSS@0806@1अदण्डनमदण्ड्यानां दण्ड्यानां चापि दण्डनम् ।
ENMSS@0806@2अग्राह्यग्रहणं चैव ग्राह्याणां ग्रहणं तथा ॥ ०८०६॥
ENMSS@0807@1अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
ENMSS@0807@2अयशो महदाप्नोति नरकं चैव गच्छति ॥ ०८०७॥
ENMSS@0808@1अदत्तं नादत्ते कृतसुकृतकामः किमपि यः शुभश्रेणिस्तस्मिन् वसति कलहंसीव कमले ।
ENMSS@0808@2विपत् तस्माद् दूरं व्रजति रजनीवाम्बरमणेर्विनीतं विद्येव त्रिदिवशिवलक्ष्मीर्भजति तम् ॥ ०८०८॥
ENMSS@0809@1अदत्तदोषेण भवेद् दरिद्रो दरिद्रदोषेण करोति पापम् ।
ENMSS@0809@2पापादवश्यं नरकं प्रयाति पुनर्दरिद्रः पुनरेव पापी ॥ ०८०९॥
ENMSS@0810@1अदत्तभुक्तमुत्सृज्य धनं सुचिररक्षितम् ।
ENMSS@0810@2मूषका इव गच्छन्ति कदर्याः स्वक्षये क्षयम् ॥ ०८१०॥
ENMSS@0811@1अदत्तानामुपादानं हिंसा चैवाविधानतः ।
ENMSS@0811@2परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥ ०८११॥
ENMSS@0812@1अदत्तेत्यागता लज्जा दत्तेति व्यथितं मनः ।
ENMSS@0812@2धर्मस्नेहान्तरे न्यस्ता दुःखिताः खलु मातरः ॥ ०८१२॥
ENMSS@0813@1अदनस्पृहया दुरीश्वराणां सदन्द्वारि वितर्दिमाश्रयन्ताम् ।
ENMSS@0813@2अपुनर्भवसाधनं शरीरं जरयामो वयमों नमः शिवाय ॥ ०८१३॥

ENMSS@0814@1अदभ्रमभ्रोपलपट्टकेषु ये शितीक्रियन्ते मदनेन पत्रिणः ।

ENMSS@0814@2तडिल्लता तन्निकषोत्थपावक- स्फुलिङ्गभङ्गीं ललिताङ्गि सेवते ॥ ०८१४॥

ENMSS@0815@1अदम्भा हि रम्भा विलक्षा च लक्ष्मीर्घृताची ह्रिया चीरसंच्छादितास्या ।

ENMSS@0815@2अहो जायते मन्दवर्णाप्यपर्णा समाकर्ण्य तस्या गुणस्यैकदेशम् ॥ ०८१५॥

ENMSS@0816@1अदयं घर्ष शिलायां दह वा दाहेन भिन्धि लौहेन ।

ENMSS@0816@2हे हेमकार कनकं म मां गुञ्जाफलैस्तुलय ॥ ०८१६॥

ENMSS@0817@1अदय दशसि किं त्वं बिम्बबुद्ध्याधरं मे भव चपल निराशः पक्वजम्बूफलानाम् ।

ENMSS@0817@2इति दयितमवेत्य द्वारदेशाप्तमन्या निगदति शुकमुच्चैः कान्तदन्तक्षतौष्ठी ॥ ०८१७॥

ENMSS@0818@1अदर्शनादापतितः पुनश्चादर्शनं गतः ।

ENMSS@0818@2न त्वासौ वेद न त्वं तं कः सन् कमनुशोचसि ॥ ०८१८॥

ENMSS@0819@1अदर्शनादापतिताः पुनश्चादर्शनं गताः ।

ENMSS@0819@2न ते तव न तेषां त्वं तत्र का परिदेवना ॥ ०८१९॥

ENMSS@0820@1अदर्शने दर्शनमात्रकामा दृष्टौ परिष्वङ्गरसैकलोला ।

ENMSS@0820@2आलिङ्गितायां पुनरायताक्ष्याम् आशास्महे विग्रहयोरभेदम् ॥ ०८२०॥

ENMSS@0821@1अदाक्षिण्यादतीवोग्राः पवना इव दुर्जनाः ।

ENMSS@0821@2गुरूनपि प्रतिक्षेप्तुं प्रयतन्ते क्षमाभृतः ॥ ०८२१॥

ENMSS@0822@1अदाता पुरुषस्त्यागी दाता त्यागी च नित्यशः ।

ENMSS@0822@2इति ज्ञात्वा स्वयं बुद्धया धनं दद्यात् पुनः पुनः ॥ ०८२२॥

ENMSS@0823@1अदाता पुरुषस्धनं संत्यज्य गच्छति ।

ENMSS@0823@2दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति ॥ ०८२३॥

ENMSS@0824@1अदातारं दातृप्रवरमनयं विश्वविनयं विरूपं रूपाढ्यं विगतजयिनं विश्वजयिनम् ।

ENMSS@0824@2अकुल्यं कुल्यं त्वामहमवदमाशापरवशात् मृषावादेत्युक्तिस्त्वयि खलु मृषावादिनि मयि ॥ ०८२४॥

ENMSS@0825@1अदाता वंशदोषेण कर्मदोषाद् दरिद्रता ।

ENMSS@0825@2उत्मादो मातृदोषेण पितृदोषेण मूर्खता ॥ ०८२५॥

ENMSS@0826@1अदातृमानसं क्वापि न स्पृशन्ति कवेर्गिरः ।

ENMSS@0826@2दुःखायैवातिवृद्धस्य विलासास्तरुणीकृताः ॥ ०८२६॥
ENMSS@0827@1अदानमीषद् दानं च किंचित् कोपाय दर्धियाम् ।
ENMSS@0827@2संपूर्णदानं प्रकृतिर्विरामो वैरकारणम् ॥ ०८२७॥
ENMSS@0828@1अदान्तस्याविनीतस्य वृथापण्डितमानिनः ।
ENMSS@0828@2न गुणाय भवन्ति स्म नटस्येवाजितात्मनः ॥ ०८२८॥
ENMSS@0829@1अदाहि यस्तेन दशार्धबाणः पुरा पुरारेर्नयनालयेन ।
ENMSS@0829@2न निर्दहंस्तं भवदक्षिवासी न वैरशुद्धेरधुनाधर्मणः ॥ ०८२९॥
ENMSS@0830@1अदीप्तेऽग्नौ हतो होमो हता भुक्तिरसाक्षिका ।
ENMSS@0830@2उपजीव्या हता कन्या स्वार्थे पाकक्रिया हता ॥ ०८३०॥
ENMSS@0831@1अदीर्घं कालमापन्नः प्रश्रयं युवतेः स्मरः ।
ENMSS@0831@2प्रगल्भ्यते मनस्येव मुघं वपुषि जायते ॥ ०८३१॥
ENMSS@0832@1बिभेत्यङ्गार्पणे वाच्छत्यालिख्यातां रतिं प्रिये ।
ENMSS@0832@2उक्तप्रत्युक्तसंमूढा संमुखं न निरीक्षते ॥ ०८३२॥
ENMSS@0833@1रतचूतफलोत्पाकरसैः कान्तं न धिन्वती ।
ENMSS@0833@2बाला निदाघलक्ष्मीव तापयत्येव केवलम् ॥ ०८३३॥
ENMSS@0834@1अदीर्घदर्शिभिः क्रूरैर्मूढैरिन्द्रियसायकैः ।
ENMSS@0834@2हमद्भिः क्रियते कर्म रुदद्भिरनुभूयते ॥ ०८३४॥
ENMSS@0835@1अदीर्घसूत्रः स्मृतिमान् कुतज्ञो नीतिशास्त्रवित् ।
ENMSS@0835@2धीमानायतिदर्शी च मन्त्री राज्ञः सुसंनिधिः ॥ ०८३५॥
ENMSS@0836@1अदुर्गविषयः कस्य नारेः परिभवास्पदम् ।
ENMSS@0836@2अदुर्गोऽनाश्रयो राजा पोतच्युतमनुष्यवत् ॥ ०८३६॥
ENMSS@0837@1अदृष्टापतितां भार्यां मूढो यस्तु परित्यजेत् ।
ENMSS@0837@2सप्तजन्मनि स स्त्रीत्वं लभते नात्र संशयः ॥ ०८३७॥
ENMSS@0838@1अदुष्टापतितां भार्यां यौवने यः परित्यजेत् ।
ENMSS@0838@2स जीवनान्ते स्त्रीत्वं च वन्ध्यत्वं च समाप्नुयात् ॥ ०८३८॥
ENMSS@0839@1अदूरगमनं तीर्थम् अदेहदमनं तपः ।
ENMSS@0839@2अनम्भःसंभवं स्नानं मातुश्चरणपङ्कजम् ॥ ०८३९॥
ENMSS@0840@1अदृष्यन्ति पुरस्तेन खेलाः खञ्जनपङ्क्तयः ।
ENMSS@0840@2अस्मग्रन्त विनिःश्वस्य प्रियानयनविभ्रमाः ॥ ०८४०॥
ENMSS@0841@1अदृष्टगुणदोषाणाम् अधृतानां च कर्मणाम् ।
ENMSS@0841@2नान्तरेण क्रियां तेषां फल्मिष्टं प्रवर्तते ॥ ०८४१॥

ENMSS@0842@1अदृष्टपूर्वः कण्ठोऽयं कान्ताया भुवनत्रये ।
ENMSS@0842@2यस्माद्विणानिनादस्य समुद्भूतिर्विभाव्यते ॥ ०८४२॥
ENMSS@0843@1अदृष्टपूर्वमस्माभिर्यदेतदृश्यतेऽधुना ।
ENMSS@0843@2विषं विषधरैः पीतं मूर्छिताः पथिकाङ्गनाः ॥ ०८४३॥
ENMSS@0844@1अदृष्टपूर्वानादाय भावानपरिशङ्कितान् ।
ENMSS@0844@2इष्टानिष्टान् मनुष्याणाम् अस्तं गच्छन्ति रात्रयः ॥ ०८४४॥
ENMSS@0845@1अदृष्टपूर्वा बहवः सहायाः सर्वे पदस्थस्य भवन्ति वश्याः ।
ENMSS@0845@2अर्थाद्विहीनस्य पदच्युतस्य भवन्ति काले स्वजनोऽपि शत्रुः ॥ ०८४५॥
ENMSS@0846@1अदृष्टमुखभङ्गस्य युक्तमन्धस्य याचितुम् ।
ENMSS@0846@2अहो बत महत् कष्टं चक्षुष्मानपि याचते ॥ ०८४६॥
ENMSS@0847@1अदृष्टव्यापारं गतवति दिनानामधिपतौ यशः शेषीभूते शशिनि गतधाम्नि ग्रहगणे ।
ENMSS@0847@2तथान्धं संजातं जगदुपनते मेघसमये यथामी गण्यन्ते तमसि पटवः कीटमणयः ॥ ०८४७॥
ENMSS@0848@1अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
ENMSS@0848@2तदृष्टेन न दृष्टेन भत्रता लभ्यते मुखम् ॥ ०८४८॥
ENMSS@0849@1अदेशकालार्थमनायतिक्षमं यदप्रियं लाघवकारि चात्मनः ।
ENMSS@0849@2विचिन्त्य बुद्ध्या मुहुरप्यवैम्यहं न तद्वचो हालहलं हि तद्विषम् ॥ ०८४९॥
ENMSS@0850@1अदेशकाले यद् दानम् अपात्रेभ्यश्च दीयते ।
ENMSS@0850@2असत्कृतमवज्ञातं तत्तामसमुदाहृदम् ॥ ०८५०॥
ENMSS@0851@1अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते ।
ENMSS@0851@2ग्राहोऽल्पीयानपि जले जलेन्द्रमपाइ कर्षति ॥ ०८५१॥
ENMSS@0852@1अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ।
ENMSS@0852@2लोकपालान् सृजेयुश्च लोकानन्यांस्तथा द्विजः ॥ ०८५२॥
ENMSS@0853@1अदोषाद्दोषाद्वा त्यक्ति विपिने तां यदि भवान् अभ्रद्रं भद्रं वा त्रिभुवनपते त्वां वदतु कः ।
ENMSS@0853@2इदं क्रूरं मे स्मरति हृदयं यत् किल तया त्वदर्थ कान्तारे कुलतिलक नात्मापि गणितः ॥ ०८५३॥
ENMSS@0854@1अद्भिः शुध्यन्ति वस्त्राणि मनः सत्येन शुध्यति ।

ENMSS@0854@2अहिंसया च भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥ ०८५४॥
ENMSS@0855@1अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
ENMSS@0855@2विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥ ०८५५॥
ENMSS@0856@1अद्भुतस्तत्रपाथोधिरगाधी यस्य वर्धकः ।
ENMSS@0856@2अक्षपादोऽतमःस्पृष्टस्त्वकलङ्कः कलानिधिः ॥ ०८५६॥
ENMSS@0857@1अद्भ्यो ऽग्निर्ब्रह्मतःक्षत्रम् अश्मनो लोहमुत्थितम् ।
ENMSS@0857@2तेषां सर्वत्रगं तेजः स्वासु योनिषु साम्यति ॥ ०८५७॥
ENMSS@0858@1अद्यतनो योद्धव्ये शकुनो विहयाय याक्रिकविरुद्धः ।
ENMSS@0858@2दिवसान्तरिते युद्धे क्षेमः प्रास्थानिकः शकुनः ॥ ०८५८॥
ENMSS@0859@1अद्य धारा सदाधारा सदालम्बा सरस्वती ।
ENMSS@0859@2पण्डिता मण्डिताः सर्वे भोजराजे भुवं गते ॥ ०८५९॥
ENMSS@0860@1अद्य प्रभृत्यवनताङ्गि तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
ENMSS@0860@2अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ०८६०॥
ENMSS@0861@1अद्य भोमिदिनं सत्यं सत्यमप्रस्तुतं तव ।
ENMSS@0861@2तथापि दूति गन्तव्यं नार्तः कालमपेक्षते ॥ ०८६१॥
ENMSS@0862@1अद्य मे सफलमायतनेत्रे जीवितं मदनसंश्रयभावम् ।
ENMSS@0862@2आगतासि भवनं मम यस्मात् स्वागतं तव वरोरु निषीद ॥ ०८६२॥
ENMSS@0863@1अद्य यावदपि येन निबद्धौ न प्रभू विचलितुं बलिविन्ध्यौ ।
ENMSS@0863@2आस्थितावितथतागुणपाशस्त्वादृशा स विदुषा दुरपासः ॥ ०८६३॥
ENMSS@0864@1अद्य शीतं वरिवर्ति सरीसर्ति समीरणः ।
ENMSS@0864@2अपत्नीको मरीमर्ति नरीनर्ति कुचोष्णवान् ॥ ०८६४॥
ENMSS@0865@1अद्य स प्रवसतीति सुभ्रुवः श्रोत्रसीमनि विजृम्भिते ध्वनौ ।
ENMSS@0865@2सद्य एव निजपाणिगुम्फिते पुष्पदामनि महोरगभ्रमः ॥ ०८६५॥
ENMSS@0866@1अद्य सुन्दरि कलिन्दनन्दिनी- तीरकुञ्जभुवि केलिलम्पटः ।
ENMSS@0866@2वादयन् मुरलिकां मुहुर्मुहुर्माधवो हरति मामकं मनः ॥ ०८६६॥
ENMSS@0867@1अद्य स्वर्गवधूगणे गुणमय त्वत्कीर्तिमिन्दूज्ज्वलाम् उच्चैर्गायति निष्कलङ्किमदशामादास्यते चन्द्रमाः ।
ENMSS@0867@2गीताकर्णनमोदमुक्तयवसग्रासाभिलाषो वद स्वामिन्नङ्कमृगः कियन्ति हि

दिनान्येतस्य वर्तिष्यते ॥ ०८६७॥

ENMSS@0868@1अद्य स्वां जननीमकारणरुषा प्रातः सुदूरं गतां प्रत्यानेतुमितो गतो गृहपतिः क्षुत्वैव मध्यंदिने ।

ENMSS@0868@2पङ्गुत्वेन शरीरजर्जरतया प्रायः स लक्ष्याकृतिर्दृष्टोऽसौ भवता न किं पथिक हे स्थित्वा क्षणं कथ्यताम् ॥ ०८६८॥

ENMSS@0869@1अद्यापि कोकनदचारुसरेखहस्तां तां शातकुम्भकलशस्तनचारुगात्रीम् ।

ENMSS@0869@2बिम्बाधरीं विषमबाणनिपीडिताङ्गीं संचिन्तये द्व्यणुकमध्यतनुप्रकाशाम् ॥ ०८६९॥

ENMSS@0870@1अद्यापि कोपविमुखीकृतगन्तुकामा नोक्तं वचः प्रतिददाति यदैव वक्रम् ।

ENMSS@0870@2चुम्बामि रोदति भृशं पतितोऽस्मि पादे दासस्तव प्रियतमे भज मां स्मरामि ॥ ०८७०॥

ENMSS@0871@1अद्यापि चाटुशतदुर्ललितोचितार्थं तस्याः स्मरामि सुरतक्लमविह्वलायाः ।

ENMSS@0871@2अव्यक्तनिःस्वनितकातरकथ्यमान- संकीर्णवर्णरुचितं वचनं प्रियायाः ॥ ०८७१॥

ENMSS@0872@1अद्यापि तत्कनककुण्डलघृष्टगण्डम् आस्यं स्मरामि विपरीतरताभियोगे ।

ENMSS@0872@2आन्दोलनश्रमजलस्फुटसान्द्रबिन्दु- मुक्ताफलप्रकरविच्छुरितं प्रियायाः ॥ ०८७२॥

ENMSS@0873@1अद्यापि तत्कनकगौरकृताङ्गरागं प्रस्वेदबिन्दुविततं वद्नं प्रियायाः ।

ENMSS@0873@2अन्ते स्मरामि रतिखेदविलोलनेत्रं राहूपरागपरिमुक्तमिवेन्दुबिम्बम् ॥ ०८७३॥

ENMSS@0874@1अद्यापि तत्कनकरेणुघनोरुदेशे न्यस्तं स्मरामि नखरक्षतलक्ष्म तस्याः ।

ENMSS@0874@2आकृष्टहेमरुचिराम्बर्मुत्थिताया लज्ञावशात् करधृतं च ततो व्रजन्त्याः ॥ ०८७४॥

ENMSS@0875@1अद्यापि तत्कमलरेणुसुगन्धगन्धि तत्प्रेमवारि मकरध्वजपातकारि ।

ENMSS@0875@2प्राप्नोम्यहं यदि पुनः सुरतैकतीर्थं प्राणांस्त्यजामि नियतं तदवाप्तिहेतोः ॥ ०८७५॥

ENMSS@0876@1अद्यापि तत्कृतकचग्रहमाग्रहेण दन्तैर्मया दशनवाससि खण्ड्यमाने ।

ENMSS@0876@2तस्या मनाङ्मुकुलिताक्षमलक्ष्यमाण- सीत्कारगर्भमसकृद्वदनं स्मरामि ॥ ०८७६॥

ENMSS@0877@1अद्यापि तत्तरलतारकिताक्षमास्यम् आलिप्रचन्दनरसाहितशोभमस्याः ।

ENMSS@0877@2कस्तूरिकातिलकतारकिताभिराम- गण्डस्थलद्युति मुहुर्मनसा स्मरामि ॥ ०८७७॥

ENMSS@0878@1अद्यापि तत्प्रणयभङ्गुरदृष्टिपातं तस्याः स्मरामि रतिविभ्रमगात्रभङ्गम् ।

ENMSS@0878@2वस्त्राञ्चलस्खलनचारुपयोधरान्तं दन्तच्छदं दशनखण्डनमण्डनं च ॥ ०८७८॥

ENMSS@0879@1अद्यापि तत्सपरिवेषशशिप्रकाशम् आस्यं स्मरामि जङ्गात्रविवर्तनेषु ।

ENMSS@0879@2तद्वेलदुञ्ज्वलकराङ्गुलिजालगुम्फ- दोः कन्दलीयुगलकं दयितं प्रियायाः ॥ ०८७९॥

ENMSS@0880@1अद्यापि तत्सुरतकेलिनिरस्त्रयुद्धं बन्धोपबन्धपतनोत्थितशून्यहस्तम् ।

ENMSS@0879@2दन्तौष्ठपीडननखक्षतरक्तसिक्तं तस्याः स्मरामि रतिबन्धुरनिष्ठुरत्वम् ॥ ०८७९॥

ENMSS@0881@1अद्यापि तत्सुरतकेलिविमर्दखेद- संजातघर्मकणविस्फुरितं प्रियायाः ।

ENMSS@0881@2आपाण्डुरं तरलतारनिमीलिताक्षं वक्त्रं स्मरामि परिपूर्णनिशाकराभम् ॥ ०८८१॥

ENMSS@0882@1अद्यापि तद्वदनपङ्कजगन्धलुब्ध- भ्राम्यद्द्विरेफचयचुम्बितगण्डयुग्मम् ।

ENMSS@0882@2लीलावधूतकरपल्लवकङ्कनानां क्वाणो विमूर्च्छति मनः स्तुतरां मदीयम् ॥ ०८८२॥

ENMSS@0883@1अद्यापि तद्विकसिताम्बुजमध्यगौरं गोरोचनातिलकभासुरफालरेखम् ।

ENMSS@0883@2ईषन्मदालसविघूर्णितदृष्टिपातं तस्या मुखं प्रति मनो मम गच्छतीदम् ॥ ०८८३॥

ENMSS@0884@1अद्यापि तन्नयनकज्जलमुज्ज्वलास्यं विश्रान्तकर्णयुगलं परिहासहेतोः ।

ENMSS@0884@2पश्ये तवात्मनि नवीनपयोधराभ्यां क्षीणं वपुर्यदि विनश्यति नो न दोषः ॥ ०८८४॥

ENMSS@0885@1अद्यापि तन्मदनकार्मुकभङ्गुरभ्रु- दन्तद्युतिप्रकरकर्बुरिताधरोष्ठम् ।
ENMSS@0885@2कर्णावसक्तपुलकोज्ज्वलदन्तपत्रं तस्याः पुनः पुनरपीह मुखं स्मरामि
॥ ०८८५॥

ENMSS@0886@1अद्यापि तन्मनसि संपरिवर्तते मे रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या
।
ENMSS@0886@2जीवेति मङ्गलवचः परिहृत्य कोपात् कर्णे कृतं कनकपत्रमनालपन्त्या
॥ ०८८६॥

ENMSS@0887@1अद्यापि तां कनककङ्कणभूषिताग्र- हस्तां च वक्त्रकमलेन
सुनिर्जितेन्दुम् ।
ENMSS@0887@2लीलावतीं सुरतखेदनिमीलिताक्षीं ध्यायामि चेतसि मदाकुललालसाङ्गीम्
॥ ०८८७॥

ENMSS@0888@1अद्यापि तां कनककान्तिमदालसाङ्गीं व्रीडोत्सुकां निपतितामिव चेष्टमानाम्
।
ENMSS@0888@2अङ्गाङ्गसङ्गपरिचुम्बनजातमोहां तां जीवनौषधिमिव प्रमधां
स्मरामि ॥ ०८८८॥

ENMSS@0889@1अद्यापि तां कनकचम्पकदामगौरीं फुल्लारविन्दवदनां तनुरोमराजीम्
।
ENMSS@0889@2सुप्तोत्थितां मदनविह्वलसालसाङ्गीं विद्यां प्रमादगलितामिव चिन्तयामि
॥ ०८८९॥

ENMSS@0890@1अद्यापि तां कनकपत्रसनाथकर्णाम् उत्तुङ्गकर्कशकुचार्पिततारहाराम्
।
ENMSS@0890@2काञ्चीनिपुञ्जितविशालनितम्बबिम्बाम् उद्दाननूपुररणच्चरणां स्मरामि
॥ ०८९०॥

ENMSS@0891@1अद्यापि तां कटिसमार्पितवामपाणिम् आकुञ्चितैकचरणाग्रनिरुद्धभूमिम्
।
ENMSS@0891@2स्तम्भावलम्बितभुजां पथि मां व्रजन्तं पश्यामि
बन्धुरितकंधरमीक्षमाणाम् ॥ ०८९१॥

ENMSS@0892@1अद्यापि तां कुटिलकुन्तलकेशपाशाम् उन्तिद्रतामरसपत्रविशालनेत्राम्
।
ENMSS@0892@2उत्तुङ्गपीवरपयोधरकुङ्मलाढ्यां ध्यायामि चेतसि यथैव गुरूपदेशम्
॥ ०८९२॥

ENMSS@0893@1अद्यापि तां क्षणवियोगविषोपमे यां सङ्गे पुनर्बहुतराममृताभिषेकाम्
।

ENMSS@0893@2तां जीवधारणकरीं मदनातपत्राम् उद्धृत्तकेशनिवहां सुदतीं स्मरामि
॥ ०८९३॥

ENMSS@0894@1अद्यापि तां क्षितितले वरकामिनीनां सर्वाङ्गसुन्दरतया प्रथमैकरेखाम्
।

ENMSS@0894@2शृङ्गारनाटकरसोत्तमपानपात्रीं कान्तां स्मरामि कुसुमायुधबाणखिन्नाम्
॥ ०८९४॥

ENMSS@0895@1अद्यापि तां गतिनिराकृतराजहंसीं धम्मिल्लनिर्जितकलापमयूखभासाम्
।

ENMSS@0895@2मत्तश्रिया मदचकोरविलोलनेत्रां संचिन्तयामि कलकण्ठसमानकण्ठाम्
॥ ०८९५॥

ENMSS@0896@1अद्यापि तां गमनमित्युदितं मदीयं श्रुत्वैव भीरुहरिणीमिव
चञ्चलाक्षीम् ।

ENMSS@0896@2वाचः स्खलद्विगलदश्रुहलाकुलाक्षीं संचिन्तयामि गुरुशोकविनम्रवक्राम्
॥ ०८९६॥

ENMSS@0897@1अद्यापि तां गलितबन्धनकेशपाशां स्रस्तस्रजं
स्मितसुधामधुराधरौष्ठीम् ।

ENMSS@0897@2पीनोन्नतस्तनयुगोपरिचारुचुम्बन्- मुक्तावलीं रहसि लोलदृशं स्मरामि
॥ ०८९७॥

ENMSS@0898@1अद्यापि तां चिरयिते मयि तन्निवासं रात्रौ समागतवतीं परिवर्तमानाम्
।

ENMSS@0898@2गत्वा स्मितं किमपि चण्चलितां निषण्णां सख्या समागतवतीमधिकं
स्मरामि ॥ ०८९८॥

ENMSS@0899@1अद्यापि तां जगति वर्णयितुं न कश्चिच्छक्नोत्यदृष्टसदृशीं
च परिग्रहं मे ।

ENMSS@0899@2दृष्टं द्वयोः सदृशयोः खलु येन रूपं शक्तो भवेद्यदि स एव
नरो न चान्यः ॥ ०८९९॥

ENMSS@0900@1अद्यापि तां जघनदर्शनलालसेन कृष्टं मया निवसनांचलमेकपार्श्वात्
।

ENMSS@0900@2पूज्य स्थितामपि ततो मुहुराकृषन्तीं मन्दाक्षसंकुचितनूत्नमुखीं
स्मरामि ॥ ०९००॥

ENMSS@0901@1अद्यापि तां झटिति वक्रितकन्धराग्रां निक्षिप्तपाणिकमलां च
नितम्बमिम्बे ।

ENMSS@0901@2वासांसपार्श्वलसदुल्बणकेशपाशां पश्यामि मां प्रति दृशं बहुशः क्षिपन्तीम् ॥ ०९०१॥

ENMSS@0902@1अद्यापि तां धवलवेश्मनि रत्नदीप- मालामयूखपटलैर्दलितान्धकारे ।

ENMSS@0902@2प्राप्तोद्यमे रहसि संमुखदर्शनार्थं लज्जाभयार्तनयनामनुचिन्तयामि ॥ ०९०२॥

ENMSS@0903@1अद्यापि तां नखपदं स्तनमण्डले यद् दत्तं मयास्यमधुपानविमोहितेन ।

ENMSS@0903@2उद्भिन्नरोमपुलकैर्बहुभिः समन्ताज्जागर्ति रक्षति विलोकयति स्मरामि ॥ ०९०३॥

ENMSS@0904@1अद्यापि तां न खलु वेद्मि किमीशपत्नी शापं गता सुरपतेरथ कृष्णलक्ष्मीः ।

ENMSS@0904@2धत्रैव किं नु जगतः परिमोहनाय सा निर्मिता युवतिरत्नदिदृक्षया वा ॥ ०९०४॥

ENMSS@0905@1अद्यापि तां नववयःश्रियमिन्दुवक्त्रां उत्तुङ्गपीवरपयोधरभारखिन्नाम् ।

ENMSS@0905@2संपीड्य बाहुयुगलेन पिबामि वक्त्रां प्रोन्मत्तवन्मधुकरः कमलं यथेष्टम् ॥ ०९०५॥

ENMSS@0906@1अद्यापि तां निजवपुःकृशवेदिमध्याम् उत्तुङ्गसंभृतसुधास्तनकुम्भयुग्माम् ।

ENMSS@0906@2नानाविचित्रकृतमण्डनम्ण्डिताङ्गीं सुप्तोत्थितां निशि दिवा न हि विस्मरामि ॥ ०९०६॥

ENMSS@0907@1अद्यापि तां निधुवनक्लमनिःसहाङ्गीम् आपाण्डुगण्डपतितालककुन्तलालीम् ।

ENMSS@0907@2प्रच्छन्नपापकृतमन्तरिवावहन्तीं कण्ठावसक्तमृदुबाहुलतां स्मरामि ॥ ०९०७॥

ENMSS@0908@1अद्यापि तां निधुवने मधुपानरक्तां लीलाधरां कृशतनुं चपलायताक्षीम् ।

ENMSS@0908@2काश्मीरपङ्कमृगनाभिकृताङ्गरागां कर्पूरपूगपरिपूर्णमुखीं स्मरामि ॥ ०९०८॥

ENMSS@0909@1अद्यापि तां निभृतवक्त्रकमापतन्तं मां द्वारि वीक्ष्य सहसैव मिषेण सुप्ताम् ।

ENMSS@0909@2मन्दं मयि स्पृशति कण्टकिताङ्गयष्टिम् उत्फुल्लगल्लफलकां बहुशः

स्मरामि ॥ ०९०९॥

ENMSS@0910@1अद्यापि तां नृपतिशेखरराजपुत्रीं संपूर्णयौवनमदालसघूर्णनेत्रीम् ।

ENMSS@0910@2गन्धर्वयक्षसुरकिन्नरनागकन्यां स्वर्गादहो निपतितामिव चिन्तयामि ॥ ०९१०॥

ENMSS@0911@1अद्यापि तांप्रणयिनीं मृगशावकाक्षीं पीयूषपूर्णकुचकुम्भयुगं वहन्तीम् ।

ENMSS@0911@2पश्याम्यहं यदि पुर्नदिवसावसाने स्वर्गापवर्गनरराजसुखं त्यजामि ॥ ०९११॥

ENMSS@0912@1अद्यापि तां प्रथमतो वरसुन्दरीणां स्नेहैकपात्रघटितामवनीशपुत्रीम् ।

ENMSS@0912@2हंहो जना मम वियोगहुताशनोऽयं सोढुं न शक्यत इति प्रतिचिन्तयामि ॥ ०९१२॥

ENMSS@0913@1अद्यापि तां प्रथममेव गतं विरागं निर्भर्त्स्य रोषपरुषैर्वचनैर्मुहुर्माम् ।

ENMSS@0913@2आन्दोलनेन च नितम्बसहायवृत्त्या सम्चिन्तयामि रत्ये सुदतीमभीक्ष्णम् ॥ ०९१३॥

ENMSS@0914@1अद्यापि तां प्रथमसंगमजातलज्जां बालां रसेन पतिते मयि मन्दपीठे ।

ENMSS@0914@2फूर्कारकम्पितशिखातरलप्रदीपं कर्णोत्पलेन विनिवारयतीं स्मरामि ॥ ०९१४॥

ENMSS@0915@1अद्यापि तां भुजलतार्पितकण्ठपाशां वक्षःस्थलं मम पिधाय पयोधराभ्याम् ।

ENMSS@0915@2ईषन्निमीलितसलीलविलोचनान्तां पश्यामि मृग्धवदनां वदनं पिबन्तीम् ॥ ०९१५॥

ENMSS@0916@1अद्यापि तां मदनमन्दिरवैजयन्तीम् अन्तर्गृहे विवसनां दधतीं निशान्ते ।

ENMSS@0916@2अङ्गैरनङ्गविसरैर्मम गाढ्बङ्गम् आलिङ्ग्य केलिशयने शयितां स्मरामि ॥ ०९१६॥

ENMSS@0917@1अद्यापि तां मम मनःपरितापशान्त्यै चक्षुर्विशुद्धतटिनीमलसालसाङ्गीम् ।

ENMSS@0917@2श्रीखण्डखण्डखचिताचितगात्रयिष्टं तन्वीं सदा हृदयहर्षनिधिं स्मरामि ॥ ०९१७॥

ENMSS@0918@1अद्यापि तां मयि कपाटसमीपलीने मन्मार्गदत्तदृशमाननदत्तहस्ताम्

मद्गोत्रचिह्नितपदं मृदुकाकलीभिः किंचित्तरङ्गमनसं मनसा स्मरामि ॥

ENMSS@0919@1 अद्यापि तां मयि कृतागसि दृष्टभावां भाषां लपत्यपि मुहुर्निगृहीतवाचम् ।

ENMSS@0919@2रामां विरुद्धघनमन्युसबाष्पकण्ठां निःश्वासशुष्यदधरां रुदतीं स्मरामि ॥ ०९१९॥

ENMSS@0920@1अद्यापि तां मयि गते चिरकोपयन्तीं यान्तीं समागतवतीं परिवर्तमानाम् ।

ENMSS@0920@2ऊर्ध्वस्थितां किमपि मञ्चतलं निषण्णां शय्यां समाश्रतवतीमधिकं स्मरामि ॥ ०९२०॥

ENMSS@0921@1अद्यापि तां मयि दृशं तुदतीं स्मरामि स्मेरां स्मरद्वरकरां मधुरां सुताराम् ।

ENMSS@0921@2अत्युद्बलां सुरतलां कुटिलां सुशीलां निष्पन्दमन्दसमदप्रमदप्रसादाम् ॥ ०९२१॥

ENMSS@0922@1अद्यापि तां मयि निमीलितचारुनेत्रे कोऽयं वदेत्यभिहितां वदतीं सखीभिः ।

ENMSS@0922@2मातर्न विद्म इति सस्मितमुल्लसन्तीम् उत्फुल्लगण्डफलकां नितरां स्मरामि

॥ ०९२२॥

ENMSS@0923@1अद्यापि तां मसृणचन्दनपङ्कमिश्र- कस्तूरिकापरिमलोत्थविसर्पिगन्दाम् ।

ENMSS@0923@2अन्योन्यचञ्चुपुटचुम्बनलग्नपक्ष्म - युग्माभिरामनयनां शयने स्मरामि ॥ ०९२३॥

ENMSS@0924@1अद्यापि तां मुखगतैररुणैः कराग्रैरापृच्छ्यमानमपि मां न विभाषयन्तीम् ।

ENMSS@0924@2तद्बाष्पपूरितदृशं बहु निःश्वसन्तीं चिन्ताकुलां किमपि नम्रमुखीं स्मरामि ॥ ०९२४॥

ENMSS@0925@1अद्यापि तां पुनः कमलायताक्षीं पश्यामि पीवरपयोधरभारखिन्नाम् ।

ENMSS@0925@2संपीड्य बाहुयुगलेन पिबामि वक्त्रम् उन्मत्तवन्मधुकरः कमलं यथेष्टम् ॥ ०९२५॥

ENMSS@0926@1अद्यापि तां यदि पुनः श्रवणायताक्षीं पश्यामि दीर्घविरहज्वरिताङ्गयष्टिम् ।

ENMSS@0926@2अङ्गैरहं समुपगूह्य ततोऽतिगाढं नोन्मीलयामि नयने न च तां त्यजामि ॥ ०९२६॥

ENMSS@0927@1अद्यापि तां रहसि दर्पणमीक्षमाणाम् दृष्ट्वा स्फुटं प्रतिनिधिं मयि पृष्ठलीने ।

ENMSS@0927@2पश्यामि वेपथुमतीं च सुविभ्रमां च लज्जाकुलां च समुदं जितमन्मथां च ॥ ०९२७॥

ENMSS@0928@1अद्यापि तां विधृतकज्जललोलनेत्रां पृथ्वीं प्रभूतकुसुमाकुलकेशपाशाम् ।

ENMSS@0928@2सिन्दूरसंलुलितमौक्तिकदन्तकान्तिम् आबद्धहेमकटकां रहसि स्मरामि ॥ ०९२८॥

ENMSS@0929@1अद्यापि तां विधृतककज्जललोलनेत्रां पृथ्वीं प्रभूतकुसुमाकुलकेशपाशाम् ।

ENMSS@0929@2सिन्दूरसंलुलितमौक्तिकदन्तकान्तिम् आबद्धहेमकटकां रहसि स्मरामि ॥ ०९२९॥

ENMSS@0930@1अद्यापि तां विरहवह्नि निपोडिताङ्गीं तन्वीं कुरङ्गनयनां सुरतैकपात्रीम् ।

ENMSS@0930@2नानाविचित्रकृतमण्डनमावहन्तीं तां राजहंसगमनां सुदतीं स्मरामि ॥ ०९३०॥

ENMSS@0931@1अद्यापि तां विहसीतां काचभारनम्रां मुक्ताकलापधवलीकृतकण्ठदेशाम् ।

ENMSS@0931@2तत्केलिमन्दरगिरौ कुसुमायुधस्य कान्तां स्मरामि रुचिरोज्ज्वलपुष्पकेतुम् ॥ ०९३१॥

ENMSS@0932@1अद्यापि तां शशिमुखीं नवयौवनाढ्यां पीनस्तनीं पुनरहं यदि गौरकान्तिम् ।

ENMSS@0932@2पश्यामि मन्मथशरानलपीडिताङ्गीं गात्राणि संप्रति करोमि सुशीतलानि ॥ ०९३२॥

ENMSS@0933@1अद्यापि तां शिखरचारुवलक्षदन्तैर्मुख्यानि कुन्दमुकुलानि जितां च साध्वीम् ।

ENMSS@0933@2संचिन्तयामि सततं प्रविलोलिचित्तां कामेषुनीरजदृशं वनजावतंसाम् ॥ ०९३३॥

ENMSS@0934@1अद्यापि तां समपनीतनितम्बवस्त्रां श्यामां च साध्वसरसाकुलविह्वलाङ्गीम् ।

ENMSS@0934@2एकेन पाणिकमलेन पिधाय गृह्यम् अन्येन नाभिकुहरं दधतीं स्मरामि ॥ ०९३४॥

ENMSS@0935@1अद्यापि तां सललितश्लथकेशपाशाम् ईषत्समुन्मिषितघूर्णितवक्रनेत्राम् ।

ENMSS@0935@2सुप्तोत्थितां विदधतीं मुहुरङ्गभङ्ग पश्यामि दष्टमधरं बहुशः स्पृशन्तीम् ॥ ०९३५॥

ENMSS@0936@1अद्यापि तां सुनिपुणं यतता मयापि दृष्टं न यत्सदृशतो वदनं कदाचित् ।

ENMSS@0936@2सौन्दर्यनिर्जितरति द्विजराजकान्ति कान्तामिहातिविमलत्वमहागुणेन ॥ ०९३६॥

ENMSS@0937@1अद्यापि तां सुरतघूर्णनिमीलिताक्षीं स्रस्ताङ्गयष्टगलितांशुककेशपाशाम् ।

ENMSS@0937@2शृङ्गारवारिरुहकाननराहहंसीं जन्मान्तरेऽपि निधनेऽप्यनुचिन्तयामि ॥ ०९३७॥

ENMSS@0938@1अद्यापि तां सुरतजागरघूर्णमान- तिर्यग्वलत्तरलतारक्दीर्घनेत्राम् ।

ENMSS@0938@2शृङ्गारसारकमलाकरराजहंसीं व्रीडाविनम्रवदनामुषसि स्मरामि ॥ ०९३८॥

ENMSS@0939@1अद्यापि तां सुरतताण्डवसूत्रधारं दुर्वारदर्पजघनग्लपिताङ्गयष्टिम् ।

ENMSS@0939@2अङ्गं रसैः समुपगुह्य कटिं दधानां किंचिन्निमीलनयनां मनसा स्मरामि ॥ ०९३९॥

ENMSS@0940@1अद्यापि तां सुरतताण्डवसूत्रधारीं पूर्णेन्दुसुन्दरमुखीं मदविह्वलाङ्गीम् ।

ENMSS@0940@2तन्वीं विशालजघनस्तनभारनम्रां व्यालोलकुन्तलकलापवतीं स्मरामि ॥ ०९४०॥

ENMSS@0941@1अद्यापि तां सुरतलब्धयशःपताकां लम्बालकां विरहपाण्डुरगण्डभित्तिम् ।

ENMSS@0941@2स्वप्नेऽपि लोलनयनां क्षणदृष्टनष्टां विद्यां प्रमादगुणितामिव संस्मरामि ॥ ०९४१॥

ENMSS@0942@1अद्यापि तां सुरभिनिर्भरदन्तभाजं धावन्तमास्यकमलं चलचञ्चरीकम् ।

ENMSS@0942@2किंचिच्चलल्ललितकुञ्चितवामनेत्रां पश्यामि केलिकमलेन निवारयन्तीम् ॥ ०९४२॥

ENMSS@0943@1अद्यापि तां सुवदनां वलभौ निषण्णां तद्गेहसंनिधिपदे मयि दृष्टमात्रे ।
ENMSS@0943@2वीतोत्तरां प्रियसखीषु कुतस्मरासु लज्जाविलासहसितां हृदि चिन्तयामि ॥ ०९४३॥

ENMSS@0944@1अद्यापि तां सुवदनां स्तनभारनम्रां श्यामां च वामनयनां रमणीयगात्रीम् ।
ENMSS@0944@2निद्रालसामलकनिर्जितषद्पदालिं संचिन्तयामि सततं स्मरवैजयन्तीम् ॥ ०९४४॥

ENMSS@0945@1अद्यापि तां सुशयितां क्षणविप्रबुद्धां निद्रालसां हृदि वहामि कृताङ्गभङ्गाम् ।
ENMSS@0945@2जृम्भावतीर्णमुखमारुतगन्धलब्ध- मुघभ्रमद्भ्रमरविभ्रमलोलनेत्राम् ॥ ०९४५॥

ENMSS@0946@1अद्यापि तां स्तिमितवस्त्रमिवाङ्गलग्नां प्रौढप्रतापमदनानलतप्तदेहाम् ।
ENMSS@0946@2बालामनाथशरणामनुकम्पनीयां प्राणाधिकां क्षणमहं न हि विस्मरामि ॥ ०९४६॥

ENMSS@0947@1अद्यापि तानि स्मितमुखीं पुरुषायितेषु लम्बालकाकुलकपोललतां स्मरामि ।
ENMSS@0947@2आन्दोलनश्रमजलाकुलविह्वलाङ्गीं श्वासोत्तरं च निभृतं च मुहुर्वदन्तीम् ॥ ०९४७॥

ENMSS@0948@1अद्यापि तानि परिवर्तितकंधराणि किंचित्क्षुतत्रुटितकञ्चुकजालकानि ।
ENMSS@0948@2तस्या भुजाग्रलुलदुद्वलकुन्तलानि चित्ते स्फुरन्ति मम वक्रविलोचनानि ॥ ०९४८॥

ENMSS@0949@1अद्यापि तानि मम चेतसि संस्फुरन्ति कर्णान्तसंगतकटाक्षनिरीक्षितानि ।
ENMSS@0949@2तस्याः स्मरज्वरकराणि मदालसानि लीलाविलासबहुलानि विलोचनानि ॥ ०९४९॥

ENMSS@0950@1अद्यापि तानि मम चेतसि संस्फुरन्ति बिम्बोष्ठदेशपरिकीर्णशुचिस्मतानि ।

ENMSS@0951@1अद्यापि तानि मृदुवाक्यसुभाषितानि तिर्थग्विवर्त्तिनयनान्तनिरीक्षणानि
लीलालसाञ्चितगतानि शुचिस्मितानि तस्याः स्मरामि मदविभ्रमचेष्टितानि ॥

ENMSS@0952@1अद्यापि तामनिभृतक्रममागतं च मां द्वारि वीक्ष्य शयने निमिषेण

सुप्ताम् ।

ENMSS@0952@2मन्दं मयि स्पृशति कण्डकिताङ्गयष्टिम् उत्फुल्लगण्डफलकां बहुशः स्मरामि ॥ ०९५२॥

ENMSS@0953@1अद्यापि तामनुनयत्यपि चाटुपूर्वं कोपात् प्राकृतमुखीं मयि सापराधे ।

ENMSS@0953@2आलिङ्गति प्रसभमुत्पुलकाङ्गयष्टिं मामेते दुःसहमिवोक्तवतीं स्मरामि ॥ ०९५३॥

ENMSS@0954@1अद्यापि तामनुनयत्यपि मय्यसक्तां व्यावृत्त्य केलिशयने शयितां पराचीम् ।

ENMSS@0954@2निद्राकुलामिव ममाभिमुखीभवन्तीं प्रातर्मदङ्गनिहितैकभुजां स्मरामि ॥ ०९५४॥

ENMSS@0955@1अद्यापि तामभिविशालनितम्बबिम्बां गम्भीरनाभिकुहरां तनुमध्यभागाम् ।

ENMSS@0955@2अम्लानकोमलमृणालसमानबाहुं लीलालसाञ्चितगतिं मनसा स्मरामि ॥ ०९५५॥

ENMSS@0956@1अद्यापि तामरुणयत्यरुणेन्तरिक्षम् आपृच्छमानमपि नाम विधारयन्तीम् ।

ENMSS@0956@2उत्थाप्य निश्चलदृशौ मम निःश्वसन्तीं चिन्ताकुलां किमपि नम्रमुखीं स्मरामि ॥ ०९५६॥

ENMSS@0957@1अद्यापि तामलमसीलितचारुनेत्रां लोलद्भुजावलयझंकृतिमावहन्तीम् ।

ENMSS@0957@2वेल्लत्करोरुकुचमुन्नमितस्वकर्णे कण्डूयनं विदधतीं हृदि चिन्तयामि ॥ ०९५७॥

ENMSS@0958@1अद्यापि तामवहितां मनसाचलेन संचिन्तयामि युवतीं मम जीविताशाम् ।

ENMSS@0958@2नान्योपभुक्तनवयौवनभारसारां जन्मान्तरेऽपि मम सैव गतिर्यथा स्यात् ॥ ०९५८॥

ENMSS@0959@1अद्यापि तामविगणय्य कृतापराधम् आपादमूलपतितं सहसा चलन्तीम् ।

ENMSS@0959@2वस्त्राञ्चलं मम करान्निजमाक्षिपन्तीं मा मेति रोषपरुषं वदतीं स्मरामि ॥ ०९५९॥

ENMSS@0960@1अद्यापि तामहमलज्ञितपूर्वघृष्टे शय्यातले सुशयितां मदनोत्सवाय ।

ENMSS@0960@2वीर्णावतीं विकचचम्पकपुष्पनासां ध्यायामि चेतसि सदा नदतीं

शुभाङ्गीम् ॥ ०९६०॥

ENMSS@0961@1अद्यापि तामित इतश्च पुरश्च पश्चाद् अन्तर्बहिः परित एव परिभ्रमन्तीम्
।

ENMSS@0961@2पश्यामि फुल्लकनकाम्बुजसंनिभेन् वक्रेण तिर्यगपवर्तितलोचनेन

॥ ०९६१॥

ENMSS@0962@1अद्यापि तामुपवने परिचारयुक्तां संचिन्तयाम्युपगतां मदनोत्सवाय
।

ENMSS@0962@2मां पार्श्वसंनिहितलोकभयात् सशङ्कं

व्यावर्तितेक्षणमनुक्षणमीक्षमाणाम् ॥ ०९६२॥

ENMSS@0963@1अद्यापि तामुभयपार्श्वगहाररम्यां वासन्तिकाकुसुमभासित्तकञ्चुकां च
।

ENMSS@0963@2राकाभिरामविधुमण्डलवल्गुववत्रां लावण्यनिर्ज्जितरयां सततं स्मरामि

॥ ०९६३॥

ENMSS@0964@1अद्यापि तामुरसिजद्वयमुन्नमय्य मध्ये वलित्रितयलक्षितरोमराजिम्
।

ENMSS@0964@2ध्यायामि वेल्लितभुजां विहिताङ्गभङ्गं व्याजेन नाभिकुहरं मम

दर्शयन्तीम् ॥ ०९६४॥

ENMSS@0965@1अद्यापि तिष्ठति दृशोरिदमुत्तरीयं धर्तुं पुनः स्तनतटे गलितं

प्रवृत्ता ।

ENMSS@0965@2वाचं निशम्य नयनं नयनं ममेति किंचित्तदा यद्करोत् स्मितमायताक्षी

॥ ०९६५॥

ENMSS@0966@1अद्यापि दुर्निवारं स्तुतिकन्या भजति कौमारम् ।

ENMSS@0966@2मद्भ्यो न रोचते सा- ऽसन्तोऽप्यस्यै न रोचन्ते ॥ ०९६६॥

ENMSS@0967@1अद्यापि धावति मनः किमहं करोमि सार्धं सखीभिरपि वासगृहे सुकान्ते ।

ENMSS@0967@2कान्ताङ्गसंगपरिहासविचित्रनृत्ये क्रीडाभिराम इति यातु मदीयकालः

॥ ०९६७॥

ENMSS@0968@1अद्यापि न स्फुरति केसरभारलक्ष्मीर्न प्रेङ्खति ध्वनितमद्रगुहान्तरेषु
।

ENMSS@0968@2मत्तास्तथापि करिणो हरिणाधिपस्य पश्यन्ति भीतमनसः पदवीं वनेषु

॥ ०९६८॥

ENMSS@0969@1अद्यापि निर्मलशरच्छशिगौरकान्ति चेतो मुनेरपि हरेत् किमुतास्मदीयम् ।

ENMSS@0969@2वक्रं सुधामयमहं यदि तत् प्रपद्ये चुम्बन् पिबाम्यविरतं व्यथते मनो मे ॥ ०९६९॥

ENMSS@0970@1अद्यापि नानं हरकोपवह्निस्त्वयि ज्वलत्यौर्व इवाम्बुराशौ ।

ENMSS@0970@2त्वमन्यथा मन्मथ मद्विधानां भस्मावशेषः कथमेवमुष्णः ॥ ०९७०॥

ENMSS@0971@1अद्यापि रोज्झति हरः किल कालकूटं कूर्मो बिभर्ति धरणीं पुष्ठभागे ।

ENMSS@0971@2अम्भोनिधिर्वहति दुःसहवाडवाग्निं अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ ०९७१॥

ENMSS@0972@1अद्यापि मारुतविधूतलतावितानां वीणाविनोदरचनां मम जीवितेशाम् ।

ENMSS@0972@2पञ्चेषुराष्ट्रकमलां शुभवेदिमध्यां ध्यायामि चेतसि सर्तीं मदनाभिरामाम् ॥ ०९७२॥

ENMSS@0973@1अद्यापि मे निशि दिवा हृदयं दुनोति पूर्णेन्दुसुन्दरसुखं मम वल्लभायाः ।

ENMSS@0973@2लावण्यनिर्जितरतिक्षतकामदर्पं भूयः पुरः प्रतिपदं न विलोक्यते यत् ॥ ०९७३॥

ENMSS@0974@1अद्यापि मे वरतनोर्मधुराणि तस्या यान्यर्थवन्ति न च यानि निरर्थकानि ।

ENMSS@0974@2निद्रानिमीलितदृशो मदमन्थरायास्तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥ ०९७४॥

ENMSS@0975@1अद्यापि ये न विहिता विपुलाः प्रबन्धा विद्योतमानविभवाः सुखयन्ति विश्वम् ।

ENMSS@0975@2सोऽयं द्विशुद्धगुरुवंशभवः प्रसिद्धो गोपालदत्त उपमेयपदं कथं स्यात् ॥ ०९७५॥

ENMSS@0976@1अद्यापि वासगृहतो मयि नीयमाने दुर्वारभीषणकरैर्यमदूतकल्पैः ।

ENMSS@0976@2किं किं तया बहुविधं न कृतं मदर्थे वक्तुं न पार्यत इति व्यथते मनो मे ॥ ०९७६॥

ENMSS@0977@1अद्यापि विस्मयकरी त्रिदशान् विहाय बुद्धिर्बलाच्चलति मे किमहं करोमि ।

ENMSS@0977@2जानन्नपि प्रतिमुहूर्तमिहान्तकाले कान्तेति वल्लभतरेति ममेति धीरा ॥ ०९७७॥

ENMSS@0978@1अद्यापि शीतद्युतिरात्मबिम्बं निर्माय निर्माय पुनर्भुनक्ति ।
ENMSS@0978@2तस्या मुखेनायतलोचनायाः कर्तुं न शक्तिः सदृशं प्रियायाः ॥ ०९७८॥

ENMSS@0979@1अद्यापि श्रवसी न कुण्डलचले केलिक्कणत्कङ्कणौ बाहू नापि न हारिहारवलयालुण्ठा च कण्ठावनिः ।
ENMSS@0979@2अस्याः पश्य तथापि पङ्कजदृशो विश्वं प्रियं भावुकं पश्यामः स्फुटताविभूषणकराभोगं वपुर्वैभवम् ॥ ०९७९॥

ENMSS@0980@1अद्यापि सा मम मनस्तटिनी सदास्ते रोमाञ्चवीचिविलसद्विपुलस्वभावा ।
ENMSS@0980@2कादम्बकेशररुचिः क्षतवीक्षणं मां गात्रक्लमं कथयती प्रियराजहंसी ॥ ०९८०॥

ENMSS@0981@1अद्यापि सुन्दरि तवाननचन्द्रबिम्बं बन्दीकृताम्बुजयुगं परिचुम्ब्य चेतः ।
ENMSS@0981@2त्वत्संगमोद्भवसुखं तनुते तथापि वैरं करोति करुणाविकलो विवेकः ॥ ०९८१॥

ENMSS@0982@1अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
ENMSS@0982@2उद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात् फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी ॥ ०९८२॥

ENMSS@0983@1अद्यापि हरिहरादिभिरमरैरपि तत्त्वतो न विज्ञाताः ।
ENMSS@0983@2भ्रमविभ्रमबहुमोहा वेश्याः संसारमायाश्च ॥ ०९८३॥

ENMSS@0984@1अद्यापि हि नृशंसस्य पितुस्ते दिवसो गतः ।
ENMSS@0984@2तमसा पिहितः पन्था एहि पुत्रक शेवहे ॥ ०९८४॥

ENMSS@0985@1अद्याप्यशोकनवपल्लवरक्तहस्तां मुक्ताफलप्रचयचुम्बितचूचुकाग्राम् ।
ENMSS@0985@2अन्तःस्मितोच्छ्वसितपाण्डुरगण्डभित्तिं तां वल्लभामलसहंसगतिं स्मरामि ॥ ०९८५॥

ENMSS@0986@1अद्याप्यहं चलितचारुनिमीलिताक्षम् आस्यं स्मरामि सततं सुरतावसाने ।
ENMSS@0986@2तत्कालनिश्वसितनिःसृतकान्तिकान्तं स्वेदोदबिन्दुपरिदन्तुरितं प्रियायाः ॥ ०९८६॥

ENMSS@0987@1अद्याप्यहं वरवधूसुरतोपभोगं जीवामि नान्यविधिना क्षणमन्तरेण ।
ENMSS@0987@2तद्भ्रातरो मरणमेव हि दुःखशान्त्यै विज्ञापयामि भवतस्त्वरितं

लुनीध्वम् ॥ ०९८७॥

ENMSS@0988@1अद्याप्यहं विकचकुन्दसमानदन्तं तिर्यग्विवर्तितविशालविलोचनान्तम्
।

ENMSS@0988@2तस्या मुखं सुविजितेन्दु न विस्मरामि चोद्यं कृतज्ञ इव
साधुकृतोपकारम् ॥ ०९८८॥

ENMSS@0989@1अद्याप्यहं सरसमञ्जुलभृङ्गनादम् ईषत्स्मरोल्लसितरागसुपाण्डुगण्डम्
।

ENMSS@0989@2पश्यामि पूर्णशरदिन्दुसमानकान्ति तस्या मुखं विकचपङ्कजपात्रनेत्रम्
॥ ०९८९॥

ENMSS@0990@1अद्याप्यहो जगति सुन्दरलक्षपूर्णे अन्यान्यमुत्तमगुणाधिकसंप्रपन्ने ।

ENMSS@0990@2अन्याभिरप्युपमितुं न मया च शक्यं रूपं तदीयमिति मे हृदये
वितर्कः ॥ ०९९०॥

ENMSS@0991@1अद्याप्युन्मदयातुधानतरुणीचञ् चत्करास्फालन-
व्यावल्गन्नृकपालतालरणितैर्नृत्यत्पिशाचाङ्गनाः ।

ENMSS@0991@2उद्गायन्ति यशांसि यस्य विततैर्नादैः प्रचण्डानिल-
प्रक्षुभ्यत्करिकुम्भकूटकुहरव्यक्तै रणक्षोणयः ॥ ०९९१॥

ENMSS@0992@1अद्याभोगिनि गाढमर्मनिवहे हर्म्याग्रवेदीजुषां सद्यश्चन्दनशोषिणि
स्तनतटे सङ्गे कुरङ्गीदृशाम् ।

ENMSS@0992@2प्रायः प्रश्लथयन्ति पुष्पधनुषः पुष्पाकरे निष्ठिते निर्वेदं
नवमल्लिकासुरभयः सायंतना वायवः ॥ ०९९२॥

ENMSS@0993@1अद्याम्भः परितः पतिष्यति भुवस्तापोऽद्य निर्वास्यति क्षेत्रेष्वद्य
यतिष्यते जनपदः सस्येषु पर्युत्सुकः ।

ENMSS@0993@2नर्तिष्यन्ति तवोदयेऽद्य जलद व्यालोलपुच्छच्छद-
च्छत्रच्छादितमौलयो दिशि दिशि क्रीडालसाः केकिनः ॥ ०९९३॥

ENMSS@0994@1अद्यारभ्य कठोरकार्मुकलताविन्यस्तहस्ताम्बुजस्तावन्न प्रकटीकरोमि
नयने

शोणे निमेषोदयान् ।

ENMSS@0994@2यावत् सायककोतिपाटितरिपुक्ष्मापालमौलिस्खलन्
मल्लीमाल्यपतत्परागपटलैरामोदिनी मेदिनी ॥ ०९९४॥

ENMSS@0995@1अद्यारभ्य न हि प्रिये पुनरहं मानस्य वा भाजनं गृह्णीयां विषरूपिणः
शठमतेर्नामापि संक्षेपतः ।

ENMSS@0995@2किं तेनैव विना शशाङ्ककिरणस्पष्टाट्टहासा निशा नैको वा दिवसः

पयोदमलिनो यायान् मम प्रावृषि ॥ ०९९५॥

ENMSS@0996@1अद्याशनं शिशुजनस्य बलेन जातं श्वो वा कथं नु भवितेति विचिन्तयन्ती ।

ENMSS@0996@2इत्यश्रुपातमलिनीकृतगण्डदेशा नेच्छेद्दरिद्रगृहिणी रजनीविरामम् ॥ ०९९६॥

ENMSS@0997@1अद्येदं श्व इदं तथा परुदिदं कृत्यं परारि त्वदश्चेतश्चिन्तयसीत्थमेव सततं निर्व्याकुलं रे कुतः ।

ENMSS@0997@2तत्कालं विलसन्मनोरथलताकान्तारदावानलो यस्मिन् दण्डधरं स्मरिष्यसि सखे सोऽप्यस्ति कश्चित् क्षणः ॥ ०९९७॥

ENMSS@0998@1अद्येश्वराश्चारणगायनानां सदैव कल्पद्रुमवत् फलन्ति ।

ENMSS@0998@2सद्भ्यस्तु किंचिद् वचसैव सायं दीपाय कर्पूरमिवार्पयन्ति ॥ ०९९८॥

ENMSS@0999@1अद्यैके प्रातरपरे विततेऽह्नि तथा परे ।

ENMSS@0999@2यान्ति निःसीम्नि संसारे कः स्थाता ननु शोचति ॥ ०९९९॥

ENMSS@1000@1 अद्यैव कुरु यच्छ्रेयो मा त्वा कालोऽत्यगादयम् ।

ENMSS@1000@2अकृतेष्वेव कार्येषु मृत्युर्वै संप्रकर्षति ॥ १०००॥

ENMSS@1001@1अद्यैव कुरु यच्छ्रेयो वृद्धःसन् किं करिष्यसि ।

ENMSS@1001@2स्वगात्राण्यपि भाराय भवन्ति हि विपर्यये ॥ १००१॥

ENMSS@1002@1अद्यैव यत् प्रतिपदुद्गतचन्द्रलेखा- सख्यं त्वया तनुरियं गमिता वराक्याः ।

ENMSS@1002@2कान्ते गते कुसुमसायक तत् प्रभाते बाणावलीं कथय कुत्र विमोक्ष्यसि त्वम् ॥ १००२॥

ENMSS@1003@1अद्यैव श्वः परश्वस्त्रिचतुरदिवसानन्तरं सायमह्नि प्रातः प्राह्णे पराह्णे क्षणमिह निवस प्रस्थितोऽभ्येहि भूयः ।

ENMSS@1003@2इत्थं रेकातिरेकानविदितकपटप्रक्रियानर्थिसार्थान् अत्यर्थं व्यर्थयन्ति प्रतिदिवसमहो राजधान्यां वदान्याः ॥ १००३॥

ENMSS@1004@1अद्यैव हसितं गीतं क्रीडितं यैः शरीरिभिः ।

ENMSS@1004@2अद्यैव ते न दृश्यन्ते पश्य कालस्य चेष्टितम् ॥ १००४॥

ENMSS@1005@1अद्योत्सङ्गवसद्भुजंगकवलक्लेशादिवेशाचल- प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।

ENMSS@1005@2किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयाद् उन्मीलन्ति कुहूःकुहूरिति

कलोत्तालाः पिकानां गिरः ॥ १००५॥

ENMSS@1006@1अद्योद्यानगृहाङ्गणे सखि मया स्वप्नेन लाक्षारुणः

प्रोत्क्षिप्तोऽयमशोकदोहदविधौ पादः क्वणन्नूपुरः ।

ENMSS@1006@2तावत् किं कथयामि केलिपटुना निर्गत्य कुञ्जोदराद् अज्ञातोपनतेन तेन

सहसा मूर्ध्नेव संभावितः ॥ १००६॥

ENMSS@1007@1अद्योन्मीलन्मलयपवनोद्धूतचूतांकुराग्र-

ग्रासास्वादादधिकमधुरैरुच्चरद्भिर्निनादैः ।

ENMSS@1007@2क्वापि क्वापि स्मरहुतवहोद्दीपनायाध्वगानां होतुं प्राणानृचमिव पिकः

सामिधेनीमधीते ॥ १००७॥

ENMSS@1008@1अद्राक्षीदपनिद्रकोरकभरव्यानम्रवल्लीस्खलद्-

धूलीदुर्दिनसूदिताम्बरमसावुद्यानमुर्वीपतिः ।

ENMSS@1008@2आस्थानीभवनं वसन्तनृपतेर्देवस्य चेतोभुवः सत्रागारमनुत्तरं

मधुलिहामेकं प्रपामण्डपम् ॥ १००८॥

ENMSS@1009@1अद्राक्षुर्ये नरेन्द्रा द्रुपदतनुभुवः केशपाशावकृष्टिं चक्रुर्वाकारयन्

वा मनसि किमपरं येऽन्वमन्यन्त मोहात् ।

ENMSS@1009@2सर्वेषामेव तेषां समरमखभुवि क्रोधवह्नौ जुहोति

द्वित्रैर्हुंकारमन्त्रैरभिजनसमिधो मध्यमः पाण्डवेयः ॥ १००९॥

ENMSS@1010@1अद्रिष्वञ्जनपुञ्जकान्ति जलद्रप्रायं च मूले दिशाम् ऊर्ध्वं

नीलवितानकल्पभवनौ जम्बाललेपोपमम् ।

ENMSS@1010@2तीरे नीरनिधेस्तमालविटपिच्छायां च सायं

शनैरुद्गच्छत्यभिसारिकाप्रियतमप्रेमानुकूलं तमः ॥ १०१०॥

ENMSS@1011@1अद्रेः किं स्विद्वहति पवनः

शृङ्गमित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।

ENMSS@1011@2स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन्

स्थूलहस्तावलेपान् ॥ १०११॥

ENMSS@1012@1अद्रोहः शौचानाम् अचापलं व्रतविशेषनियमानाम् ।

ENMSS@1012@2पैशुन्यमप्रियाणां वृत्तिच्छेदो नृशंसचरितानाम् ॥ १०१२॥

ENMSS@1013@1अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।

ENMSS@1013@2अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ १०१३॥

ENMSS@1014@1अद्रोहसमयं कृत्वा मुनीनामग्रतो हरिः ।

ENMSS@1014@2जघान नमुचिं पश्चाद् अपां फेनेन पार्थिव ॥ १०१४॥
ENMSS@1015@1अद्रोहे समयं कृत्वा चिच्छेद नमुचेः शिरः ।
ENMSS@1015@2शक्रः सा हि मता तस्य रिपौ वृत्तिः सनातनी ॥ १०१५॥
ENMSS@1016@1अद्रौ जीर्णदरीषु संकटसरित्तीरेषु निम्नोन्नते ऊढा येन वृषेण धूर्बलवता यूना द्वितीयेन या ।
ENMSS@1016@2तां वृद्धोऽपि कृशोऽपि दुर्वह धुरं वोढुं स एव क्षमो रथ्याभङ्गुलकैः समेत्य बहुभिर्नाकृष्यतेऽन्यैर्वृषैः ॥ १०१६॥
ENMSS@1017@1अद्वितीयं निजं लोके विलोक्य वहतो मुदम् ।
ENMSS@1017@2प्रमदावदनस्यायं दर्पोद्रिको न तु स्मितम् ॥ १०१७॥
ENMSS@1018@1अद्विसंवीक्षणं चक्षुरद्विसंमीलनं मनः ।
ENMSS@1018@2अद्विसंस्पर्शनः पाणिरद्य मे किं करिष्यति ॥ १०१८॥
ENMSS@1019@1अद्वेषपेशलं कुर्यान् मनः कुसुमकोमलम् ।
ENMSS@1019@2बभूव द्वेषदोषेण देवदानवसंक्षयः ॥ १०१९॥
ENMSS@1020@1अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद् विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
ENMSS@1020@2कालेनावरणात्ययात् परिणते यत्स्नेहसारे स्थितं भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत् प्राप्यते ॥ १०२०॥
ENMSS@1021@1अद्वैतमेकं सुखमुन्नयन्ती विस्मारयन्ती जगदेव तन्वि ।
ENMSS@1021@2मुक्ताश्रितामात्मरुचिं वदन्ती वेदान्तसिद्धान्तकथेव भासि ॥ १०२१॥
ENMSS@1022@1अद्वैतोक्तिपटून् वटूनपि वयं बालान् नमस्कुर्महे ये तु द्वन्द्ववदास्तदीयशिरसि न्यस्याम वामं पदम् ।
ENMSS@1022@2सिंहः स्वीयशिशून् निवेश्य हृदये सान्द्रादरादामृशत्यावेशेन भिनत्ति संभ्रमपदं मत्तेभकुम्भस्थलम् ॥ १०२२॥
ENMSS@1023@1अद्वैधमानसंयुक्तं शूरं धीरं विपश्चितम् ।
ENMSS@1023@2न श्रीः संत्यजते नित्यम् आदित्यमिव रश्मयः ॥ १०२३॥
ENMSS@1024@1अधः करोति यद्रत्नं मूर्ध्ना धारयते तृणम् ।
ENMSS@1024@2दोषस्तस्यैव जलधे रत्नं रत्नं तृणं तृणम् ॥ १०२४॥
ENMSS@1025@1अधः कुर्वन्प्रजाः सर्वा बहुधा महिमोल्बणः ।
ENMSS@1025@2राजा पर्वणि कस्मिंश्चिद् भवेदहिभयाकुलः ॥ १०२५॥
ENMSS@1026@1अधः क्षिपन्ति कृपणा वित्तं तत्र यियासवः ।
ENMSS@1026@2सन्तस्तु गुरुतीर्थादौ तदुच्चैःपदकाङ्क्षिणः ॥ १०२६॥

ENMSS@1027@1अधः पश्यन् पार्श्वद्वयवलितसाचीकृतशिराः शनैः पक्षस्थैर्याद्दिवि मसृणचक्राकृतिगतिः ।

ENMSS@1027@2चिराच्चिल्लस्तिर्यक्चरिततरमाहारनिपुणो निपत्यैवाकस्माच्चलचरणमूर्धं प्रपतति ॥ १०२७॥

ENMSS@1028@1अधः पश्यसि किं बाले पतितं तव किं भुवि ।

ENMSS@1028@2रे रे मूर्ख न जानासि गतं तारुण्यमौक्तिकम् ॥ १०२८॥

ENMSS@1029@1अधःपुष्पी शङ्खपुष्पी लज्जालुर्गिरिकर्णिका ।

ENMSS@1029@2नीलिनी सहदेवा च पुत्रमार्जारिका तथा ॥ १०२९॥

ENMSS@1030@1 विष्णुक्रान्ता च सर्वासां जटा ग्राह्या रवेर्दिने ।

ENMSS@1030@2बद्धा भुजे विलेपाद्वा काये शस्त्रौघवारिका ॥ १०३०॥

ENMSS@1031@1अधः शेते शम्भुस्तव चरणमाधाय हृदये बहिर्द्वारि दौवारिकपदमुपेतः कमलजः ।

ENMSS@1031@2विडौजा वैफल्यं भजति निजविज्ञापनकृते तावहं दासः स्यामिति मनसि

लज्जा भयमपि ॥ १०३१॥

ENMSS@1032@1अधःस्था रमते नारी उपरिस्थश्च कामुकः ।

ENMSS@1032@2प्रसिद्धं तद्व्रतं ज्ञेयं ग्रामबालजनप्रियम् ॥ १०३२॥

ENMSS@1033@1अधनं खलु जीवधनं धनमर्धधनं महद्धनं धान्यम् ।

ENMSS@1033@2अतिधनमेतत् सुन्दरि विद्या च तपश्च कीर्तिश्च ॥ १०३३॥

ENMSS@1034@1अधना अपि ते धन्याः साधवो गृहमेधिनः ।

ENMSS@1034@2यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः ॥ १०३४॥

ENMSS@1035@1अधना धनमिच्छन्ति वाचं चैव चतुष्पदाः ।

ENMSS@1035@2मानवाः स्वर्गमिच्छन्ति मोक्षमिच्छन्ति देवताः ॥ १०३५॥

ENMSS@1036@1अधनेनार्थकामेन नार्थः शक्यो विवित्सता ।

ENMSS@1036@2अर्थैरर्था निबध्यन्ते गजैरिव महागजाः ॥ १०३६॥

ENMSS@1037@1अधनो दातुकामोऽपि संप्राप्तो धनिनां गृहम् ।

ENMSS@1037@2मन्यते याचकोऽयं धिग् दारिद्र्यं खलु देहिनाम् ॥ १०३७॥

ENMSS@1038@1अधनोऽयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् ।

ENMSS@1038@2इति कारुणिको नूनं धनं मे भूरि नाददत् ॥ १०३८॥

ENMSS@1039@1अधमं बाधते भूयो दुःखवेगो न तत्तमम् ।

ENMSS@1039@2पादद्वयं व्रजत्याशु शीतस्पर्शो न चक्षुषी ॥ १०३९॥

ENMSS@1040@1अधममित्रकुमित्रसमागमः प्रियवियोगभयानि दरिद्रता ।
ENMSS@1040@2अपयशः खलु लोकपराभवो भवति पापतरोः फलमीदृशम् ॥ १०४०॥
ENMSS@1041@1अधमर्णशवाजीविश्राद्धभुग्दुष्टभूभुजाम् ।
ENMSS@1041@2अभिप्राया न सिद्ध्यन्ति तेनेदं ध्रियते जगत् ॥ १०४१॥
ENMSS@1042@1अधमाः कलिमिच्छन्ति संधिमिच्छन्ति मध्यमाः ।
ENMSS@1042@2उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ १०४२॥
ENMSS@1043@1अधमा धनमिच्छन्ति धनमानौ च मध्यमाः ।
ENMSS@1043@2उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ १०४३॥
ENMSS@1044@1अधमे संगता लक्ष्मीर्नोपभोगाय कस्यचित् ।
ENMSS@1044@2कर्दमे पतिता छाया सहकारतरोरिव ॥ १०४४॥
ENMSS@1045@1अधमो मातुकारश्च धातुकारश्च मध्यमः ।
ENMSS@1045@2धातुमातुक्रियाकार उत्तमः परिकीर्तितः ॥ १०४५॥
ENMSS@1046@1अधमो लक्षणज्ञः स्यान् मध्यमो लक्ष्यमाचरेत् ।
ENMSS@1046@2लक्ष्यलक्षणसंयुक्त उत्तमः परिकीर्तितः ॥ १०४६॥
ENMSS@1047@1अधरं किल बिम्बनामकं फलमस्मादिति भव्यमन्वयम् ।
ENMSS@1047@2लभतेऽधरबिम्बमित्यदः पदमस्या रदनच्छदं वदत् ॥ १०४७॥
ENMSS@1048@1अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
ENMSS@1048@2कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम् ॥ १०४८॥
ENMSS@1049@1अधरः पद्मरागोऽयम् अनर्घः सव्रणोऽपि ते ।
ENMSS@1049@2मुग्धे हस्तः किमर्थोऽयम् अपार्थ इह दीयते ॥ १०४९॥
ENMSS@1050@1अधरद्युतिरस्तपल्लवा मुखशोभा शशिकान्तिलङ्घिनी ।
ENMSS@1050@2तनुरप्रतिमा च सुभ्रुवो न विधेरस्य कृतिं विवक्षति ॥ १०५०॥
ENMSS@1051@1अधरमधरे कण्ठं कण्ठे निधाय भुजं भुजे हृदि च हृदयं मध्ये मध्यं सरोजदृशो दृढम् ।
ENMSS@1051@2सरभसमहो चोरावूरुं पदं च पदे बलाद् गमयति जनो धन्यः कश्चित् समां शिशिरे निशाम् ॥ १०५१॥
ENMSS@1052@1अधरमधरे कण्ठे कण्ठं सचाटु दृशोर्दृशावलिकमलिके कृत्वा गोपीजनेन ससंभ्रमम् ।
ENMSS@1052@2शिशुरिति रुदन् कृष्णो वक्षःस्थले निहितोऽचिरान्- निभृतपुलकः स्मेरः पायात् स्मरालसविग्रहः ॥ १०५२॥

ENMSS@1053@1अधरममृतं कः संदेहो मधुन्यपि नान्यथा मधुरमधिकं द्राक्षायाश्च प्रसन्नरसं फलम् ।
ENMSS@1053@2सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्ञनो वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात् ॥ १०५३॥
ENMSS@1054@1अधरस्य मधुरिमाणं कुचकाठिन्यं दृशोस्तथा तैक्ष्ण्यम् ।
ENMSS@1054@2कवितायाः परिपाकान् अनुभवरसिको विजानाति ॥ १०५४॥
ENMSS@1055@1अधरामृतपानेन ममास्यमपराध्यतु ।
ENMSS@1055@2मूर्ध्नो किमपराद्धं यः पादौ नाप्नोति चुम्बितुम् ॥ १०५५॥
ENMSS@1056@1अधरामृतमाधुरीधुरीणो हरिलीलामुरलीनिनाद एषः ।
ENMSS@1056@2प्रततान मनःप्रमोदमुच्चैर्हरिणीनां हरिणीदृशं मुनीनाम् ॥ १०५६॥
ENMSS@1057@1अधरामृतेन पित्तं नश्यति वायुः पयोधरयुगेन ।
ENMSS@1057@2अनवरतरतेन कफं त्रिदोषशमनं वपुर्नार्याः ॥ १०५७॥
ENMSS@1058@1अधरेण समागमाद् रदानाम् अरुणिम्ना पिहितोऽपि शुक्लभावः ।
ENMSS@1058@2हसितेन सितेन पक्ष्मलाक्ष्याः पुनरुल्लासमवाप जातपक्षः ॥ १०५८॥
ENMSS@1059@1अधरेणोन्नतिभाजा भुजंगपरिपीडितेन ते दूति ।
ENMSS@1059@3संक्षोभितं मनो मे जलनिधिरिव मन्दरागेण ॥ १०५९॥
ENMSS@1060@1अधरे नववीटिकानुरागो नयने कज्जलमुज्ज्वलं दुकूलम् ।
ENMSS@1060@2इदमाभरणं नितम्बनीनाम् इतरद्भूषणमङ्गदूषणाय ॥ १०६०॥
ENMSS@1061@1अधरे बिन्दुः कण्ठे मणिमाला स्तनयुगे शशप्लुतकम् ।
ENMSS@1061@2तव सूचयन्ति केतकि कुसुमायुधशास्त्रपण्डितं रमणम् ॥ १०६१॥
ENMSS@1062@1अधरे मधुरा सरस्वतीयं ननु कर्णे मणिकर्णिकाप्रवाहः ।
ENMSS@1062@2शिरसि प्रतिभाति चारुवेणी कथमेणीनयना न तीर्थराजः ॥ १०६२॥
ENMSS@1063@1अधरे विनिहितवंशं चम्पककुसुमेन कल्पितोत्तंसम् ।
ENMSS@1063@2विनतं दधानमंसं वामं सततं नमामि जितकंसम् ॥ १०६३॥
ENMSS@1064@1अधरोऽयमधीराक्ष्या बन्धुजीवप्रभाहरः ।
ENMSS@1064@2अन्यजीवप्रभां हन्त हरतीति किमद्भुतम् ॥ १०६४॥
ENMSS@1065@1अधरोष्ठे च घोणायां गण्डयोश्चिबुके तथा ।
ENMSS@1065@2मुष्के नाभौ त्रिके कुक्षावावर्तास्त्वतिनिन्दिताः ॥ १०६५॥
ENMSS@1066@1अधरोऽसौ कुरङ्गाक्ष्याः शोभते नासिकातले ।
ENMSS@1066@2सुवर्णनलिकामध्यान् माणिक्यमिव विच्युतम् ॥ १०६६॥
ENMSS@1067@1अधर्मं धर्ममिति या मन्यते तमसावृता ।

ENMSS@1067@2सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ १०६७॥
ENMSS@1068@1अधर्मं धर्मवेषेण यदिमं लोकसंकरम् ।
ENMSS@1068@2अभिपत्स्ये शुभं हित्वा क्रियाविधिविवर्जितम् ।
ENMSS@1069@1अधर्मः क्षत्रियस्यैतद् यद् व्याधिमरणं गृहे ।
ENMSS@1069@2युद्धे तु मरणं यत् स्यात् सोऽस्य धर्मः सनातनः ॥ १०६९॥
ENMSS@1070@1अधर्मः सुरसस्तस्य चोत्कटैर्मधुरायते ।
ENMSS@1070@2यादृशैश्च फलैश्चैव सुफलो लोभपादपः ॥ १०७०॥
ENMSS@1071@1अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम् ।
ENMSS@1071@2अस्वर्ग्यं च परत्रापि तस्मात्तत् परिवर्जयेत् ॥ १०७१॥
ENMSS@1072@1अधर्मदण्डनंस्वर्गकीर्तिलोकविनाशनम् ।
ENMSS@1072@2सम्यक्तु दण्डनं राज्ञः स्वर्गकीर्तिजयावहम् ॥ १०७२॥
ENMSS@1073@1अधर्मद्रोहसंयुक्ते मित्रजातेऽप्युपेक्षणम् ।
ENMSS@1073@2आत्मवन्मित्रवर्गे तु प्राणानपि परित्यजेत् ॥ १०७३॥
ENMSS@1074@1अधर्मप्रतिषेधश्च न्यायमार्गेण वर्तनम् ।
ENMSS@1074@2उपकार्योपकारित्वम् इति वृत्तं महीपतेः ॥ १०७४॥
ENMSS@1075@1अधर्ममन्यत्र महीतलेऽस्मिन् संक्षोभहेतुं मलिनं विचार्य ।
ENMSS@1075@2निष्कासनायास्य रुषेव देव सितं यशः सर्वदिशः प्रयाति ॥ १०७५॥
ENMSS@1076@1अधर्मरुचयो मूढास्तिर्यग्गतिपरायणाः ।
ENMSS@1076@2कृच्छ्रां योनिमनुप्राप्य न सुखं विन्दते जनाः ॥ १०७६॥
ENMSS@1077@1अधर्मसाधनं बुधा मुधा न जन्तुहिंसनं सृजन्तु वेदनिन्दया भजन्तु केवलं दयाम् ।
ENMSS@1077@2इति प्रबोधयन् विधिं विधाय वैदिकं विधिं विशुद्धबोधबन्धुरन्तरेधि बुद्धदेव नः ॥ १०७७॥
ENMSS@1078@1अधर्मस्तु महांस्तात भवेत् तस्य महीपतेः ।
ENMSS@1078@2यो हरेद् बलिषड्भागं न च रक्षति पुत्रवत् ॥ १०७८॥
ENMSS@1079@1अधर्मादर्जितं द्रव्यम् अल्पकालं तु तिष्ठति ।
ENMSS@1079@2ततः सपत्नमयते समूलं तेन नश्यति ॥ १०७९॥
ENMSS@1080@1अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति ।
ENMSS@1080@2तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ॥ १०८०॥
ENMSS@1081@1अधर्मेणैधते तावत् ततो भद्राणि पश्यति ।
ENMSS@1081@2ततः सपत्नाञ् जयति समूलस्तु विनश्यति ॥ १०८१॥

ENMSS@1082@1अधर्मेषु रसस्तस्य उत्क्लेदैर्मधुरायते ।
ENMSS@1082@2तादृशैश्च फलैश्चैव सफलो लोभपादपः ॥ १०८२॥
ENMSS@1083@1अधर्मोपचितं वित्तं हरन्त्यन्येऽल्पमेधसः ।
ENMSS@1083@2संभोजनीयापदेशैर्जलानीव जलौकसः ॥ १०८३॥
ENMSS@1084@1अधर्मोपार्जितैरर्थैर्यः करोत्यौर्ध्वदेहिकम् ।
ENMSS@1084@2न स तस्य फलं प्रेत्य भुङ्क्तेऽर्थस्य दुरागमात् ॥ १०८४॥
ENMSS@1085@1अधर्षितानां शूराणां समरेष्वनिवर्तिनाम् ।
ENMSS@1085@2धर्षणामर्षणं भीरु मरणादतिरिच्यते ॥ १०८५॥
ENMSS@1086@1अधश्च दूरपातित्वं समे लक्ष्यं सुनिश्चितम् ।
ENMSS@1086@2दृढस्फोटं प्रकुर्वीत ऊर्ध्वसंस्थानयोगतः ॥ १०८६॥
ENMSS@1087@1अधस्तनश्वभ्रभुवो न याति षण्- न सर्वनारीषु न सञ्ज्ञितोऽन्यतः ।
ENMSS@1087@2न जायते व्यन्तरदेवजातिषु न भावनज्योतिषिकेषु सद्रुचिः ॥ १०८७॥
ENMSS@1088@1अधस्ताच्छिद्रितं चर्म दुर्गन्धिपरिपूरितम् ।
ENMSS@1088@2मूत्रक्लिन्नं च तस्यार्थे मा राजन् ब्राह्मणान् वधीः ॥ १०८८॥
ENMSS@1089@1अधाक्षीन्नो लङ्कामयमयमुदन्वन्तमतरद् विशल्यां
सौमित्रेरयमुपनिनायौषधिवराम् ।
ENMSS@1089@2इति स्मारं स्मारं त्वदरिनगरीभित्तिलिखितं हनूमन्तं दन्तैर्दशति
कुपितो राक्षसगणः ॥ १०८९॥
ENMSS@1090@1अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छ्रयच्छायलवोऽपि पल्लवे ।
ENMSS@1090@2तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः ॥
१०९०॥
ENMSS@1091@1अधार्मिकांश्च क्रूरांश्च दृष्टदोषान् निराकृतान् ।
ENMSS@1091@2परेभ्योऽभ्यागतांश्चैव दूरादेतान् विवर्जयेत् ॥ १०९१॥
ENMSS@1092@1अधार्मिको नरो यो हि यस्य चाप्यनृतं धनम् ।
ENMSS@1092@2हिंसारतिश्च यो नित्यं नेहासौ सुखमेधते ॥ १०९२॥
ENMSS@1093@1अधिकः स्यात् पितुः पुत्रो रूपविद्यापराक्रमैः ।
ENMSS@1093@2तिष्ठन् पित्रार्जितपदे सुब्रह्मण्यस्तु तादृशः ॥ १०९३॥
ENMSS@1094@1अधिकरतलतल्पं कल्पितस्वापलीला- परिमिलननिमीलत्पाण्डिमा
गण्डपाली ।
ENMSS@1094@2सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव स्मरनरपतिलीलायौवराज्याभिषेकम्
॥ १०९४॥
ENMSS@1095@1अधिकार ऋणं गर्भश्चतुर्थं श्वानमैथुनम् ।

ENMSS@1095@2आगमे परमं सौख्यं निर्गमे दुःखकारणम् ॥ १०९५॥

ENMSS@1096@1अधिकाराभिषेकेषु मृदङ्गवचनं श्रृणु ।

ENMSS@1096@2बद्धा दण्डहता रिक्ता भविष्यसि यथा वयम् ॥ १०९६॥

ENMSS@1097@1अधिकारेण यो युक्तः कथं तस्यास्ति खण्डनम् ।

ENMSS@1097@2नीचेषूपकृतं राजन् बालुकास्विव मुद्रितम् ॥ १०९७॥

ENMSS@1098@1अधिकोन्नतैरपि सुदारुणान्वितैरसकृद्भ्रमत्पशुगणाङ्घ्रिपीडितैः ।

ENMSS@1098@2विधिसिद्धनैकगुणसस्यसम्पदां विरसस्वभावकठिनैरलं खलैः

॥ १०९८॥

ENMSS@1099@1अधिगगनमनेकास्तारका राज्यभाजः प्रतिगृहमिह दीपा दर्शयन्ति

प्रभुत्वम् ।

ENMSS@1099@2दिशि दिशि विलसन्तः सन्ति खद्योतपोताः सवितरि परिभूते किं न

लोकैर्व्यलोकि ॥ १०९९॥

ENMSS@1100@1अधिगतपरमार्थान् पण्डितान् मावमंस्थास्तृणमिव लघु लक्ष्मीर्नैव

तान् संरुणद्धि ।

ENMSS@1100@2अभिनवमदलेखाश्यामगण्डस्थलानां न भवति बिसतन्तुर्वारणं वारणानाम्

॥ ११००॥

ENMSS@1101@1अधिगतमहिमा मनुष्यलोके बत सुतरामवसीदति प्रमादी ।

ENMSS@1101@2गजपतिरुरुशैलश्रृङ्गवक्रष्मा गुरुरवमज्जति पङ्कभाङ्ग दारु

॥ ११०१॥

ENMSS@1102@1अधिगत्येद्दगेतस्या हृदयं मृदुतामुचोः ।

ENMSS@1102@2प्रतीम एव वैमुख्यं कुचयोर्युक्तवृत्तयोः ॥ ११०२॥

ENMSS@1103@1अधिगमनमनेकास्तारका राजमानाः प्रतिगृहमपि दीपाः प्राप्नुवन्ति

प्रतिष्ठाम् ।

ENMSS@1103@2दिशि दिशि विकसन्तः सन्ति खद्योतपोताः सवितरि उदितेऽस्मिन् किं नु

लोकैरलोकि ॥ ११०३॥

ENMSS@1104@1अधिगम्याशु गोलक्ष्यम् एकः शाम्यति मार्गणः ।

ENMSS@1104@2अनुरोधस्थिरतया न च शक्यप्रतारणः ॥ ११०४॥

ENMSS@1105@1अधिदेहलि हन्त हेमवल्ली शरदिन्दुः सरसीरुहे शयानः ।

ENMSS@1105@2अधिखञ्जनचञ्चु मौक्तिकाली फलितं कस्य सुजन्मनस्तपोभिः ॥ ११०५॥

ENMSS@1106@1अधिपञ्चवटीकुटीरवर्ति स्फुटितेन्दीवरसुन्दरोरुमूर्ति ।
ENMSS@1106@2अपि लक्ष्मणलोचनैकलक्ष्यं भजत ब्रह्म सरोरुहायताक्षम् ॥ ११०६॥
ENMSS@1107@1अधिभिल्लपल्लिगल्लं स्याद्वल्लवपल्लवोऽपि वाचालः ।
ENMSS@1107@2नागरनरवरपरिषदि कस्य मुखादक्षरं क्षरति ॥ ११०७॥
ENMSS@1108@1अधियामिनि गजगामिनि कामिनि सौदामिनीव यं व्रजसि ।
ENMSS@1108@2जलदेनेव न जाने कति कति सुकृतानि तेन विहितानि ॥ ११०८॥
ENMSS@1109@1अधिरजनि जगाम धाम तस्याः प्रियतमयेति रुषा स्रजावनद्धः ।
ENMSS@1109@2पदमपि चलितुं युवा न सेहे किमिव न शक्तिहरं ससाध्वसानाम् ॥ ११०९॥
ENMSS@1110@1अधिरजनि प्रिअयसविधे कथ्मपि संवेशिता बलाद् गुरुभिः ।
ENMSS@1110@2किं भवितेति सशङ्कं पङ्कजनयना परामृशति ॥ १११०॥
ENMSS@1111@1अधिरजनिमुखे यः सान्द्रलाक्षानुरागैर्व्यतिकरित इवोच्चैः पाटलत्वं दधानः ।
ENMSS@1111@2उषसि स खलु दीपः पाननिर्धूतरागः स्फुरदधर इवायं धसरत्वं बिभर्ति ॥ ११११॥
ENMSS@1112@1अधिरजनि व्याधगृहे सुखमननभूतमनुभूय ।
ENMSS@1112@2अपशोककोकमिथुनं जीवनदानेसमुल्लसति ।
ENMSS@1113@1अधिरोहार्य पादाभ्यां पादुके हेमभूषिते ।
ENMSS@1113@2एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥ १११३॥
ENMSS@1114@1अधिलवङ्गममी रजसाधिकं मलिनिताः सुमनोदलतालिनः ।
ENMSS@1114@2स्फुटमिति प्रसवेन पुरोऽहसत् सपदि कुन्दलता दलतालिनः ॥ १११४॥
ENMSS@1115@1अधिश्रीरुद्याने त्वमसि भवतः पल्लवचयो धुरीणः कल्याणे तव जगति शाखा श्रमहरा ।
ENMSS@1115@2मुदे पुष्पोल्लेखः फलमपि च तुष्ट्यै तनभृतां रसाल त्वां तस्माच्छ्रयति शतशः कोकिलकुलम् ॥ १११५॥
ENMSS@1116@1अधिष्ठानं समिच्छन्ति ह्यचलं निर्बले सति ।
ENMSS@1116@2संसारे सर्वभूतानां तृणबिन्दुवदस्थिरे ॥ १११६॥
ENMSS@1117@1अधीतपञ्चाशुगबाणवञ्चने स्थिता मदन्तर्बहिरेषि चेदुरः ।
ENMSS@1117@2स्मराशुगेभ्यो हृदय बिभेतु न प्रविश्य तत्त्वन्मयसपुटे मम ॥ १११७॥
ENMSS@1118@1अधीतविद्यैर्विगते शिशुत्वे धनोर्जिते हारिणि यौवने च ।
ENMSS@1118@2सेव्या नितम्बास्तु विलासिनीनां ततस्तदर्थं धरणीधराणाम् ॥ १११८॥

ENMSS@1119@1अधीतस्य च तप्तस्य कर्मणः सुकृतस्य च ।
ENMSS@1119@2षष्ठं भजति भागं तु प्रजा धर्मेण पालयन् ॥ १११९॥
ENMSS@1119@3षड्भागस्य न भोक्तासौ रक्षते न प्रजाः कथम् ॥ १११९॥
ENMSS@1120@1अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
ENMSS@1120@2चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्
॥ ११२०॥
ENMSS@1121@1अधीते तु महाभाष्ये व्यर्था सा पदमञ्जरी ।
ENMSS@1121@2नाधीते तु महाभाष्ये व्यर्था सा पदमञ्जरी ॥ ११२१॥
ENMSS@1122@1अधीत्य चतुरो वेदान् धर्मशास्त्राण्यनेकशः ।
ENMSS@1122@2परं तत्त्वं न जानाति दर्वी पाकरसानिव ॥ ११२२॥
ENMSS@1123@1अधीत्य चतुरो वेदान् व्याकृत्याष्टादश स्मृतीः ।
ENMSS@1123@2अहो श्रमस्य वैफल्यम् आत्मापि कलितो न चेत् ॥ ११२३॥
ENMSS@1124@1अधीत्य नीतिं यस्माच्च नीतियुक्तो न दृश्यते ।
ENMSS@1124@2अनभिज्ञश्च साचिव्यं गमितः केन हेतुना ॥ ११२४॥
ENMSS@1125@1अधीत्य वेदान् परिसंस्तीर्य चाग्नीन् इष्ट्वा यज्ञैः पालयित्वा प्रजाश्च
।
ENMSS@1125@2गोब्राह्मणार्थे शस्त्रपूतान्तरात्मा हतः संग्रमे क्षत्रियः स्वर्गमेति
॥ ११२५॥
ENMSS@1126@1अधीत्य सकलं श्रुतं चेरमुपास्य घोरं तपो यदिच्छसि फलं
तयोरह हि लाभपूजादिकम् ।
ENMSS@1126@2छिनत्सि तरुपल्लवप्रसरमेव शून्याशयः कथं समुपलिप्सते सुरसमस्य
पक्कं फलम् ।
ENMSS@1127@1अधीत्येदं यथाशास्त्रं नरो जानाति सत्तमः ।
ENMSS@1127@2धर्मोपदेशविख्यातं कार्याकार्यं शुभाशुभम् ॥ ११२७॥
ENMSS@1128@1अधीयते विजानन्ति विरज्यन्ति मुहुर्मुहुः ।
ENMSS@1128@2नात्यन्ताय निवर्तन्ते नरा वषम्यतो विधेः ॥ ११२८॥
ENMSS@1129@1अधीयीत ब्राह्मणोऽथो यजेत दद्यादियात् तीर्थमुख्यानि चैव ।
ENMSS@1129@2अध्यापयेद्याजयेच्चापि याज्यान् प्रतिग्रहान् वा विदितान् प्रतीच्छेत्
॥ ११२९॥
ENMSS@1130@1तथा राजन्यो रक्षणं वै प्रजानां कृत्वा धर्मेणाप्रयत्तोऽथ दत्त्वा ।
ENMSS@1130@2यज्ञैरिष्ट्वा सर्ववेदानधीत्य दारान् कृत्वा पुण्यकृदावसेद् गृहान्
॥ ११३०॥

ENMSS@1131@1वैश्योऽधीत्य कृषिगोरक्षपण्यैर्वित्तं चिन्वन् पालयन्नप्रमत्तः ।
ENMSS@1131@2प्रियं कुर्वन् ब्राह्मणक्षत्रियाणां धर्मशीलः पुण्यकृदावसेद् गृहान् ॥ ११३१॥
ENMSS@1132@1परिचर्यां वन्दनं ब्राह्मणानां नाधीयीत प्रतिषिद्धोऽस्य यज्ञः ।
ENMSS@1132@2नित्योत्थितो भूतयेऽतन्द्रितहः स्याद् एष स्मृतः शूद्रधर्मः पुराणः ॥ ११३२॥
ENMSS@1133@1अधीरः कर्कशः स्तब्धः कुचेलः स्वयमागतः ।
ENMSS@1133@2एते पञ्च न पूज्यन्ते बृहस्पतिसमा यदि ॥ ११३३॥
ENMSS@1134@1अधीराक्ष्याः पीनस्तनकलशमास्कन्दसि मुहुः क्रमादूरुद्वन्द्वं कलयसि च लावण्यललितम् ।
ENMSS@1134@2भुजाश्लिष्टो हर्षादनुभवसि हस्ताहतिकलाम् इदं वीणादण्डं प्रकटय फलं कस्य तपसः ॥ ११३४॥
ENMSS@1135@1अधुना दधिमन्थनानुबन्धं कुरुषे किं गुरुविभ्रमालसाङ्गि ।
ENMSS@1135@2कलशस्तनि लालसीति कुञ्जे मुरलीकोमलकाकली मुरारेः ॥ ११३५॥
ENMSS@1136@1अधुना मधुकरपतिना गिलितोऽप्यपकारदंपती येन ।
ENMSS@1136@2त्रातः स पालयेत्त्वां विकाररहितो विनायको लक्ष्म्याः ॥ ११३६॥
ENMSS@1137@1अधृतपरिपतन्निचोलबन्धं मुषितनकारमवक्रदृष्टिपातं ।
ENMSS@1137@2प्रकटहसितमुन्नतास्यबिम्बं पुरसुदृशःस्मरचेष्टितं स्मरामि ॥ ११३७॥
ENMSS@1138@1अधृत यद्विरहोष्मणि सञ्जितं मनसिजेन तदूरुयुगं तदा ।
ENMSS@1138@2स्पृशति तत्कदनं कदलीतरुर्यदि मरुज्वलदूषरदूषितः ॥ ११३८॥
ENMSS@1139@1अधोगतिं च सम्प्राप्य बिसाः पङ्ककलङ्किताः ।
ENMSS@1139@2गुणिनो निर्गुणैर्दाशैः कृष्टाः स्वाङ्कुरदर्शिताः ॥ ११३९॥
ENMSS@1140@1अधोदृष्टिनैर्कृतिकः स्वार्थसाधनतत्परः ।
ENMSS@1140@2शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः ॥ ११४०॥
ENMSS@1141@1अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
ENMSS@1141@2उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ ११४१॥
ENMSS@1142@1अधोमुखी स्त्रीस्तनतुल्यताप्तये प्रतप्य तीव्रं सुमहत्तरं तपः ।
ENMSS@1142@2यदा न तामाप तदा हृदि स्फुटं विदीर्यते पक्कमिषेण दाडिमः ॥ ११४२॥
ENMSS@1143@1अधोमुखैकदंष्ट्रेण विषशुक्रप्रवाहिणा ।
ENMSS@1143@2अनेन दुश्चिकित्स्येन जगद्दष्टं भगाहिना ॥ ११४३॥

ENMSS@1144@1अधोऽर्धे लक्षणं यस्य परार्धे नैव दृश्यते ।
ENMSS@1144@2अधमः स भवेत् खड्गः क्षितीशानां भयावहः ॥ ११४४॥
ENMSS@1145@1अधोऽर्धे वर्ण एकः स्याद् ऊर्ध्वार्धे भिन्नवर्णकः ।
ENMSS@1145@2वर्णसंकरवान् खड्गो नृपाणां भयवर्धनः ॥ ११४५॥
ENMSS@1146@1अधोविधानात् कमलप्रवालयोः शिरःसु दानादखिलक्षमाभुजाम् ।
ENMSS@1146@2पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया ॥ ११४६॥
ENMSS@1147@1अध्ययनमित्रसङ्ग- प्रवेशयात्राविवाहदानेषु ।
ENMSS@1147@2शुभकार्येष्वखिलेष्वपि शस्तः सोमाध्वगः पवनः ॥ ११४७॥
ENMSS@1148@1अध्यस्तान्ध्यमपूर्वमर्थधिषणैर्ग्राह्यं पुमर्थास्पदं लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकम् ।
ENMSS@1148@2आम्नायान्तविभातविश्वविभवं सर्वाविरुद्धं परं सत्यं ज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदोम् ॥ ११४८॥
ENMSS@1149@1अध्याक्रान्ता वसतिरमुनाप्याश्रमं सर्वभोग्ये रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।
ENMSS@1149@2अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥ ११४९॥
ENMSS@1150@1अध्यापयन्ति शास्त्राणि तृणीकुर्वन्ति पण्डितान् ।
ENMSS@1150@2विस्मारयन्ति जातिं स्वां वराटाः पञ्चषाः करे ॥ ११५०॥
ENMSS@1151@1अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते ।
ENMSS@1151@2कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ॥ ११५१॥
ENMSS@1152@1अध्यापितोऽसि केनैतां मशक क्षुद्रतामिह ।
ENMSS@1152@2यस्यैव कर्णे लगसि पीडां तस्य करोषि यत् ॥ ११५२॥
ENMSS@1153@1अध्यायोधनवेदि मार्गणकुशानास्तीर्य खड्गस्रुचा हुत्वारेः पललं चरुं हविरसृक् तन्मस्तकस्वस्तिकैः ।
ENMSS@1153@2संवेष्ट्याहवनीयमानसदसि ख्योऽसौ प्रतापानलो- ऽस्थापि द्रागुदकाञ्जलीकृतचतुःपाथोधिना श्रीमता ॥ ११५३॥
ENMSS@1154@1अध्यासामासुरुत्तुङ्गहेमपीठानि यान्यमी ।
ENMSS@1154@2तैरूहे केसरिक्रान्तत्रिकूटशिखरोपमा ॥ ११५४॥
ENMSS@1155@1अध्यासिते वयस्याया भवता महता हृदि ।
ENMSS@1155@2स्तनावन्तरसंमान्तौ निष्क्रान्तौ ब्रूमहे बहिः ॥ ११५५॥
ENMSS@1156@1अध्यासीनाश्ववारैरुपजनितभये

हेषमाणैस्तुरङ्गैर्गर्जत्स्फूर्जन्महौजोत्कटकरटिघटाकोटिभिर्दुष्प्रवेशे।

ENMSS@1156@2संग्रामे कल्पकल्पेऽप्यरिजनविसरैर्मार्गणश्रेणिबद्धे बध्येऽवध्ये नृपेऽपि प्रभवति यवसं प्राणविश्राणनाय ॥ ११५६॥

ENMSS@1157@1अध्यास्य शान्तां कुकुभं श्रृगाली नरस्य वामा यदि रारटीति ।

ENMSS@1157@2तदर्थलाभं वितरत्यवश्यम् अर्थक्षयं दक्षिणतो रटन्ती ॥ ११५७॥

ENMSS@1158@1अध्यास्य सौरभेयं मौक्तिकरुचिरङ्गणेषु विहितगतिः मान्यः स एव हृदि मे गौरी वामाङ्गमाश्रिता यस्य ॥

ENMSS@1159@1अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेष- स्याहेर्भूयः फणसमुचितः काययष्टीनिकायः ।

ENMSS@1159@2दुग्धाम्भोधेर्मुनिचुलुकनत्रासनाशाभ्युपायः कायव्यूहः क्व जगति न जागर्त्यदः कीर्तिपूरः ॥ ११५९॥

ENMSS@1160@1अध्येति नृत्यति लुनाति मिनोति नौति क्रीणाति हन्ति वपते चिनुते बिभेति ।

ENMSS@1160@2मुष्णाति गायति धिनोति बिभर्ति भिन्ते लोभेन सीव्यति पणायति याचते

च ॥ ११६०॥

ENMSS@1161@1अध्रुवेण शरीरेण प्रतिक्षणविनाशिना ।

ENMSS@1161@2ध्रुवं यो नार्जयेद्धर्मं स शोच्यो मूढचेतनः ॥ ११६१॥

ENMSS@1162@1अध्रुवे हि शरीरे यो न करोति तपोऽर्जनम् ।

ENMSS@1162@2स पश्चात्तप्यते मूढो मृतो गत्वात्मनो गतिम् ॥ ११६२॥

ENMSS@1163@1अध्वक्लान्ततनुर्नवज्वरवती नृत्यश्लथाङ्गी तथा मासैकप्रसवा ददाति सुरते षण्मासगर्भा सुखम् ।

ENMSS@1163@2विख्याता विरहस्य संगमविधौ क्रुद्धप्रसन्ने ऋतु- स्थाने नूतनसंगमे मधुमदे रागास्पदं योषितः ॥ ११६३॥

ENMSS@1164@1अध्वनि पदग्रहपरं मदयति हृदयं न वा न वा श्रवणम् ।

ENMSS@1164@2काव्यमभिज्ञसभायां मञ्जीरं केलिवेलायाम् ॥ ११६४॥

ENMSS@1165@1अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः ।

ENMSS@1165@2मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः ॥ ११६५॥

ENMSS@1166@1अध्वन्यध्वनि तरवः पथि पथि पथिकैरुपास्यते छाया ।

ENMSS@1166@2विरलः स कोऽपि विटपी यमध्वगो गृहगतः स्मरति ॥ ११६६॥

ENMSS@1167@1अध्वन्यध्वनि भूरुहः फलबृतो नम्रानुपेक्ष्यादराद् दूरादुन्नतिसंश्रयव्यसनिनः पान्थस्य मुग्धात्मनः ।

ENMSS@1167@2यन्मूलं समुपागतस्य मधुरच्छायाफलैः का कथा शीर्णेनापि हि
नोपयोगमगमत् पर्णेन तालद्रुमः ॥ ११६७॥
ENMSS@1168@1अध्वन्यस्य वधूर्वियोगविधुरा भर्तुः स्मरन्ती यदि प्राणानुज्झति कस्य
तन्महदहो संजायते किल्बिषम् ।
ENMSS@1168@2इत्येवं पथिकः करोति हृदये यावत् तरोर्मूर्धनि प्रोद्घुष्टं परपुष्टया
तव तवेत्युच्चैर्वचोऽनेकशः ॥ ११६८॥
ENMSS@1169@1अध्वन्याः किल मूलगर्तमधुनाप्यापूरयन्त्यश्रुभिर्व्याक्रोशन्त्यधुना
सबान्धवकुलाः सायं मुहूर्तं द्विजाः ।
ENMSS@1169@2इत्थं यावदिमानि बिभ्रति शुचं भूतान्यपि त्वत्कृते तावत्त्वं न
गतोऽसि पादप चिरं कीर्त्यात्मना वर्तसे ॥ ११६९॥
ENMSS@1170@1अध्वन्यानां शिशिरसमये चण्डचाण्डालकाण्ड- प्रायाः कायानहह
पवनाः
क्लेशयन्तो विशन्ति ।
ENMSS@1170@2बध्नन्त्येते सपदि सुदृशां दुर्भगानामपीह प्रौढाश्लेषाश्लथितदयितं
मूर्ध्नि सौभाग्यपट्टम् ॥ ११७०॥
ENMSS@1171@1अध्वन्यान् कति रुन्धते कति दृधान् भिन्दन्ति तोयाकरान् केदारान्
कति
यज्ञयन्ति कति च व्यापाटयन्ति द्रुमान् ।
ENMSS@1171@2वाहिन्यः क्षणलुप्तवारिविभवा वन्या अवन्यामिमा यः सिन्धुः सकलाश्रयः
स तु पुनः कुत्रेति न ज्ञायते ॥ ११७१॥
ENMSS@1172@1अध्वन्यैर्मकरन्दशीकरसुरामत्तक्वणत्कोकिले मार्गे मार्गनिरोधिनी परिहृता
शङ्केऽशुभाशङ्कया ।
ENMSS@1172@2पान्थस्त्रीवधपातकादुपगतं चण्डालचिह्नं मधोरेषा किङ्किणिकेव
षट्पदमयी झंकारिणी संहतिः ॥ ११७२॥
ENMSS@1173@1अध्वश्रमाय चरणौ विरहाय दारा अभ्यर्थनाय वचनं च वपुर्जरायै
।
ENMSS@1173@2एतानि मे विदधतस्तव सर्वदैव धातस्त्रपा यदि न किं न परिश्रमोऽपि
॥ ११७३॥
ENMSS@1174@1अध्वश्रान्तमविज्ञातम् अतिथिं क्षुत्पिपासितम् ।
ENMSS@1174@2यस्तं न पूजयेद् भक्त्या तमाहुर्ब्रह्मघातिनम् ॥ ११७४॥
ENMSS@1175@1अध्वाग्रजाग्रन्निभृतापदन्धुर्बन्धुर्यदि स्यात् प्रतिबन्धुमर्हः ।

ENMSS@1175@2जोषं जनः कार्यविदस्तु वस्तु प्रच्छ्या निजेच्छा पदवीं मुदस्तु ॥ ११७५॥

ENMSS@1176@1अध्वा जरा देहवतां पर्वतानां जलं जरा ।

ENMSS@1176@2असंभोगो जरा स्त्रीणां वाक्षल्यं मनसो जरा ॥ ११७६॥

ENMSS@1177@1अध्वा जरा मनुष्याणाम् अनध्वा वाजिनां जरा ।

ENMSS@1177@2अमैथुनं जरा स्त्रीणाम् अश्वानां मैथुनं जरा ॥ ११७७॥

ENMSS@1178@1अध्वानं नैकचक्रः प्रभवति भुवनभ्रान्तिदीर्घं विलङ्घ्य प्रातः
प्राप्तुंरथो मे पुनरिति मनसि न्यस्तचिन्तातिभारः ।

ENMSS@1178@2संध्याकृष्टावशिष्टस्वकरपरिकरैः स्पष्टहेमारपङ्क्ति
व्याकृष्यावस्थितोऽस्तक्षितिभृति नयतीवैष दिक्कक्रमर्कः ॥ ११७८॥

ENMSS@1179@1अध्वा न यदि निसङ्गपङ्कसंकुलितो भवेत् ।

ENMSS@1179@2ततः कुतस्ते धौरेय धुर्यता व्यज्यतामियम् ॥ ११७९॥

ENMSS@1180@1अद्वारेण विशन्त्येव बुद्धिमन्तो रिपोर्गृहम् ।

ENMSS@1180@2अकृत्वा धर्षणां पूर्वं कथं युद्धं प्रवर्तते ॥ ११८०॥

ENMSS@1181@1अनक्षरं रूपमिह क्षरन्ती पञ्चाशदर्णैरमृताम्बुपूर्णैः ।

ENMSS@1181@2व्याकीर्णविध्यमण्डमदन्तराला (?) शब्दात्मिका मामवतात् समन्तात् ॥ ११८१॥

ENMSS@1182@1अनक्षरज्ञेन जनेन सख्यं संभाषणं दुष्प्रभुसेवनं च ।

ENMSS@1182@2आलिङ्गनं लम्बपयोधराणां प्रत्यक्षदुःखं त्रयमेव भूमौ ॥ ११८२॥

ENMSS@1183@1अनङ्कुरितकूर्चकः स तु सितोपलाढ्यं पयः स एव धृतकूचकः
सलवणाम्बुतक्रोपमः ।

ENMSS@1183@2स एव सितकूर्चकः क्वथितगुग्गुलोद्वेगकृद् भवन्ति हरिणीदृशां
प्रियतमेषु भावास्त्रयः ॥ ११८३॥

ENMSS@1184@1अनङ्गः पञ्चभिः पुष्पैर्विश्वं व्यजयतेषुभिः ।

ENMSS@1184@2इत्यसंभाव्यमथवा विचित्रा वस्तुशक्तयः ॥ ११८४॥

ENMSS@1185@1अनङ्गतापप्रशमाय तस्य कदर्थ्यमाना मुहुरामृणालम् ।

ENMSS@1185@2मधौ मधौ नाकनदीनलिन्यो वरं वहन्तां शिशिरेऽनुरागम् ॥ ११८५॥

ENMSS@1186@1अनङ्ग पलितं मूर्ध्नि पश्यैतद् विजयध्वजम् ।

ENMSS@1186@2इदानीं जितमस्माभिस्तवाकिंचित्कराः शराः ॥ ११८६॥

ENMSS@1187@1अनङ्गबाणाकुलितस्य शंभोः शिरो भवानीचरणेऽतिनम्रम् ।

ENMSS@1187@2विलोक्य काचिच्चरणे चरन्ती पिपीलिका चुम्बति चन्द्रबिम्बम् ॥ ११८७॥

ENMSS@1188@1अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।

ENMSS@1188@2आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥ ११८८॥

ENMSS@1189@1अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः ।

ENMSS@1189@2जनयन्ति मुहुर्यूनाम् अन्तःसंतापसंततिम् ॥ ११८९॥

ENMSS@1190@1अनङ्गमङ्गलारम्भकुम्भाविव पयोधरौ ।

ENMSS@1190@2कस्य नार्तिहरौ तस्याः करपल्लवसंवृतौ ॥ ११९०॥

ENMSS@1191@1अनङ्गरङ्गपीठोऽस्याः श‍ृङ्गारस्वर्णविष्टरः ।

ENMSS@1191@2लावण्यसारसंघातः सा घना जघनस्थली ॥ ११९१॥

ENMSS@1192@1अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।

ENMSS@1192@2कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥ ११९२॥

ENMSS@1193@1अनङ्गरसचातुरीचपलचारुचेलाञ्चलश्चलन्मकरकुण्डलस्फुरितकान्तिगण्डस्थलः ।

ENMSS@1193@2व्रजोल्लसितनागरीनिकररासलास्योत्सुकः स मे सपदि मानसे स्फुरतु कोऽपि

गोपालकः ॥ ११९३॥

ENMSS@1194@1अनङ्गलङ्घनालग्ननानातङ्का सदङ्गना ।

ENMSS@1194@2सदानघ सदानन्द नताङ्गासङ्गसंगत ॥ ११९४॥

ENMSS@1195@1अनङ्गशस्त्राणि नताङ्गि तीक्ष्णतां नयत्ययस्कार इवाम्बुदागमः ।

ENMSS@1195@2मलीमसाङ्गाररुचां पयोमुचां तथाहि मध्ये ज्वलितस्तडिच्छिखी ॥ ११९५॥

ENMSS@1196@1अनङ्गीकृतकामानाम् अनुमानार्हवर्ष्मणाम् ।

ENMSS@1196@2ध्र्तनिर्मलतीर्थानां भूतिलेपो विभूषणम् ॥ ११९६॥

ENMSS@1197@1अनङ्गेनाबलासङ्गाज्जिता येन जगत्त्रयी ।

ENMSS@1197@2स चित्रचरितः कामः सर्वकामप्रदोऽस्तु वः ॥ ११९७॥

ENMSS@1198@1अनङ्गोऽयमनङ्गत्वम् अद्य निन्दिष्यति ध्रुवम् ।

ENMSS@1198@2यदनेन न संप्राप्तः पाणिस्पर्शोत्सवस्तव ॥ ११९८॥

ENMSS@1199@1अनञ्जितासिता दृष्टिर्भ्रूरनावर्जिता नता ।

ENMSS@1199@2अरञ्जितोऽरुणश्चायम् अधरस्तव सुन्दरि ॥ ११९९॥

ENMSS@1200@1अनणुरणन्मणिमेखल- मविरतशिञ्जानमञ्जुमञ्जीरम् ।

ENMSS@1200@2परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥ १२००॥

ENMSS@1201@1अनतिचिरोज्झितस्य जलदेन चिर- स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम्
।

ENMSS@1201@2विरलविकीर्णवज्रशकला सकलाम् इह विदधाति धौतकलधौतमही
॥ १२०१॥

ENMSS@1202@1अनतिशयं स्वर्णचयं निवहन् नितरां प्रमोदये स्वान्ते ।

ENMSS@1202@2किंतु तवैषा संपत् कस्योपकृते प्रतिब्रूहि ॥ १२०२॥

ENMSS@1203@1अनतिशिथिले पुंभावेन प्रगल्भबलाः खलु प्रसभमलयः पाथोजास्ये निविश्य निरित्वराः ।

ENMSS@1203@2किमपि मुखतः कृत्वानीतं वितीर्य सरोजिनी- मधुरसमुषोयोगे जायां नवान्नमचीकरन् ॥ १२०३॥

ENMSS@1204@1अनधिगतमनोरथस्य पूर्वं शतगुणितेव गता मम त्रियामा ।

ENMSS@1204@2यदि तु तव समागमे तथैव प्रसरति सुभ्रुततः कृती भवेयम् ॥
१२०४॥

ENMSS@1205@1अनधीत्य यथा वेदान् न विप्रः श्राद्धमर्हति ।

ENMSS@1205@2एवमश्रुतषाड्गुण्यो न मन्त्रं श्रोतुमर्हति ॥ १२०५॥

ENMSS@1206@1अनधीत्य स्वजशास्त्रं योऽन्यशास्त्रं समीहते वक्तुम् ।

ENMSS@1206@2सोऽहेः पदानि गणयति निशि तमसि जले चिरगतस्य ॥ १२०६॥

ENMSS@1207@1अनधीत्यार्थशास्त्राणि बहवः पशुबुद्धयः ।

ENMSS@1207@2प्रागल्भ्याद्वक्तुमिच्छन्ति मन्त्रेष्वभ्यन्तरीकृताः ॥ १२०७॥

ENMSS@1208@1अनध्यवसितावगाहनमनल्पधीशक्तिनाप्यदृष्टपर्मार्थतत्त्वमधिकाभियोगैरपि
।

ENMSS@1208@2मतं मम जगत्यलब्धसदृशप्रतिग्राहकं प्रयास्यति पयोनिधेः पय इव स्वदेहे जराम् ॥ १२०८॥

ENMSS@1209@1अनध्वन्याः काव्येष्वलसगतयः शास्त्रगहनेष्वदुःखज्ञा वाचां परिणतिषु मूकाः परगुणे ।

ENMSS@1209@2विदग्धानां गोष्ठीष्वकृतपरिचर्याश्च खलु ये भवेयुस्ते किं वा परभणितिकण्डूतिनिकषाः ॥ १२०९॥

ENMSS@1210@1अनन्तं बत मे वित्तं यस्य मे नास्ति किंचन ।

ENMSS@1210@2मिथिलायां प्रदीप्तायां न मे दह्यति किंचन ॥ १२१०॥

ENMSS@1211@1अनन्तकोपादिचतुष्टयोदये त्रिभेदमिथ्यात्वमलोदये तथा ।

ENMSS@1211@2दुरन्तमिथ्यात्वविषं शरीरिणाम् अनन्तसंसारकरं प्ररोहति ॥ १२११॥

ENMSS@1212@1अनन्तख्यातिसंपन्नः शुद्धसत्त्वः सधीबलः ।

ENMSS@1212@2धत्ते बहुमुखं भोगं श्रुतिदृष्टिस्थिराशयः ॥ १२१२॥
ENMSS@1213@1अनन्ततत्त्वं परिगृह्य धात्रा विनिर्मितोऽस्याः किल मध्यभागः ।
ENMSS@1213@2अणुः परं योगिदृशानुलक्ष्यः सच्चित्कलास्थैर्यबलावनद्धः ॥ १२१३॥
ENMSS@1214@1अनन्तनामधेयाय सर्वाकारविधायिने ।
ENMSS@1214@2समस्तमन्त्रवाच्याय विश्वैकपतये नमः ॥ १२१४॥
ENMSS@1215@1अनन्तपदविन्यासरचना सरसा कवेः ।
ENMSS@1215@2बुधो यदि समीपस्थो न कुजन्यः पुरो यदि ॥ १२१५॥
ENMSS@1216@1अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः ।
ENMSS@1216@2यत् सारभूतं तदुपासनीयं हंसैर्यथा क्षीरमिवाम्बुमध्यात् ॥ १२१६॥
ENMSS@1217@1अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
ENMSS@1217@2एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ १२१७॥
ENMSS@1218@1अनन्तरमरिं वद्याद् अरिसेविनमेव च अरेरनन्तरं मित्रम् उदासीनं तयोः

परम् ॥
ENMSS@1219@1अनन्तविभवभ्रष्टा दौर्भाग्यपरितापिनी ।
ENMSS@1219@2शोच्यति प्राप्य जीवत्वं भर्तृहीनेव नायिका ॥ १२१९॥
ENMSS@1220@1अनन्तशास्त्रं बहुलाश्च विद्याः स्वल्पश्च कालो बहुविध्नता च ।
ENMSS@1220@2यत् सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात् ॥ १२२०॥
ENMSS@1221@1अनन्तासौ कीर्तिः कविकुमुदबन्धोः क्षितिपतेस्त्रिलोकीयं क्षुद्रा तदिह कथमस्याः स्थितिरिति ।
ENMSS@1221@2मुधेयं वः शङ्का कलयत कियद्दर्पणतलं विशाला किं तत्र स्फुरति न कवीन्द्रप्रतिकृतिः ॥ १२२१॥
ENMSS@1222@1अनन्तोद्भूतभूतौघसंकुले भूतलेऽखिले ।
ENMSS@1222@2शस्त्रे शास्त्रे त्रिचतुराश्चतुरा यदि मादृशाः ॥ १२२२॥
ENMSS@1223@1अनन्यक्षुण्णश्रीर्मलयवनजन्मायमनिलो निपीय स्वेदाम्बु स्मरमकरसंभुक्तविभवम् ।
ENMSS@1223@2विदर्भाणां भूरि प्रियतमपरीरम्भरभस- प्रसङ्गादेङ्गानि द्विगुणपुलकासञ्जि तनुते ॥ १२२३॥
ENMSS@1224@1अनन्यशोभाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ।
ENMSS@1224@2पराभिमर्शो न तवास्ति कः करं प्रसारयेत् पन्नगरत्नसूचये ॥ १२२४॥
ENMSS@1225@1अनन्यसाधारणकान्तिकान्त- तनोरमुष्याः किमु मध्यदेशः ।

ENMSS@1225@2जगत्रयीजन्मभृतां निषण्णा चित्तावलीयं त्रिवलीमिषेण ॥ १२२५॥
ENMSS@1226@1अनन्यसाधारणसौरभान्वितं दधानमत्युज्ज्वलपुष्पसंपदः ।
ENMSS@1226@2न चम्पकं भृङ्गगणः सिषेवे कथं सुगन्धेर्मलिनात्मनां रतिः
॥ १२२६॥
ENMSS@1227@1अनन्यसामान्यतया प्रसिद्धस्त्यागीति गीतो जगतीतले यः ।
ENMSS@1227@2अभूदहंपूर्विकया गतानाम् अतीव भूमिः स्मरमार्गणानाम् ॥ १२२७॥
ENMSS@1228@1अनन्यालम्बनत्वेन प्रेम भागवतं भज ।
ENMSS@1228@2नृणां प्रेमेति का मात्रा प्राप्तं प्रेम प्रभोर्यदि ॥ १२२८॥
ENMSS@1229@1अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
ENMSS@1229@2तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ १२२९॥
ENMSS@1230@1अनन्याश्रितचित्तेन सेवितोऽपि च वारिदः ।
ENMSS@1230@2सिंश्चेन्न चेत् तदा मन्ये चातकस्यैव पातकम् ॥ १२३०॥
ENMSS@1231@1अनपेक्षितगुरुवचना सर्वान् ग्रन्थीन् विभेदयति सम्यक् ।
ENMSS@1231@2प्रकटयति पररहस्यं विमर्शशक्तिर्निजा जयति ॥ १२३१॥
ENMSS@1232@1अनभिज्ञाय शास्त्रार्थान् पुरुषाः पशुबुद्धयः ।
ENMSS@1232@2प्रागल्भ्याद्वक्तुमिच्छन्ति मन्त्रेष्वभ्यन्तरीकृताः ॥ १२३२॥
ENMSS@1233@1अनभिज्ञो गुणानां यो न भृत्यैः सोऽनुगम्यते ।
ENMSS@1233@2धनाढ्योऽपि कुलीनोऽपि क्रमायातोऽपि भूपतिः ॥ १२३३॥
ENMSS@1234@1अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम् ।
ENMSS@1234@2कर्मणां फलमस्तीति त्रिविधं मनसा चरेत् ॥ १२३४॥
ENMSS@1235@1अनभिलषतः श्रीलीलाब्जे परागविलेपनं त्रिदशकरिणः पातुं
दानप्रवाहमवाञ्छतः ।
ENMSS@1235@2त्रिदशसुमनोगन्धासक्तिं विमुक्तवतः सखे बत खलु शिवा संतुष्टस्य
द्विरेफ तव स्थितिः ॥ १२३५॥
ENMSS@1236@1अनभ्यासहतोत्साहा परेण परिभूयते ।
ENMSS@1236@2या लज्जाजननी जाड्यात् किं तया मन्दविद्यया ॥ १२३६॥
ENMSS@1237@1अनभ्यासहता विद्या हतो राजविरोधकृत् ।
ENMSS@1237@2जीवनार्थं हतं तीर्थं जीवनार्थं हतं व्रतम् ॥ १२३७॥
ENMSS@1238@1अनभ्यासेन विद्यानाम् असंसर्गेण धीमताम् ।
ENMSS@1238@2अनिग्रहेण चाक्षाणां जायते व्यसनं नृणाम् ॥ १२३८॥
ENMSS@1239@1अनभ्यासेन वेदानाम् आचारस्य च वर्जनात् ।

ENMSS@1239@2आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥ १२३९॥
ENMSS@1240@1अनम्यासैर्हता विद्या नित्यहासैर्हताः स्त्रियः ।
ENMSS@1240@2कुबीजेन हतं क्षेत्रं भृत्यदोषैर्हता नृपाः ॥ १२४०॥
ENMSS@1241@1अनभ्रवृष्टिः श्रवणामृतस्य सरस्वती विभ्रमजन्मभूमिः ।
ENMSS@1241@2वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ॥ १२४१॥
ENMSS@1242@1अनभ्रेविद्युतं दृष्ट्वा दक्षिणां दिशमाश्रिताम् ।
ENMSS@1242@2रात्राविन्द्रधनुश्चापि जीवितं द्वित्रिमासिकम् ॥ १२४२॥
ENMSS@1243@1अनम्राक्रमणं शौर्यं धनं निजभुजार्जितम् भार्या रूपानुरूपा च पुरुषस्येह युज्यते ॥
ENMSS@1243@2अन्यथा तु किमेतेन रूपेणापि । । ।
ENMSS@1244@1अनयनपथे प्रिये न व्यथा यथा दृश्य एव दुष्प्रापे ।
ENMSS@1244@2म्लानैव केवलं निशि तपनशिला वासरे ज्वलति ॥ १२४४॥
ENMSS@1245@1अनयश्च नयश्चापि दैवात् संपद्यते नरैः ।
ENMSS@1245@2तद्वशात् कुरुते कर्म शुभाशुभफलं पुमान् ॥ १२४५॥
ENMSS@1246@1अनया कृतमन्यभुक्तया वसुधागोचरया विरक्तया ।
ENMSS@1246@2अतिशायि महेन्द्रयोषितां वपुषा किं न तवावरोधनम् ॥ १२४६॥
ENMSS@1247@1अनया जघनाभोगभरमन्थरयानया ।
ENMSS@1247@2अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ॥ १२४७॥
ENMSS@1248@1अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे ।
ENMSS@1248@2चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥ १२४८॥
ENMSS@1249@1अनयानुक्रमणिकया मुक्तामणयो मयाभिहिताः ।
ENMSS@1249@2एकैकोऽपि हि भास्वान् किं पुनरेषां निगद्यते निकरः ॥ १२४९॥
ENMSS@1250@1अनया रत्नसमृद्ध्या सागर लहलहसि किमिह लहरीभिः ।
ENMSS@1250@2त्वद्वल्लभा वराक्यो वहन्ति वर्षासु वारीणि ॥ १२५०॥
ENMSS@1251@1अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया ।
ENMSS@1251@2घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥ १२५१॥
ENMSS@1252@1अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता ।
ENMSS@1252@2मम्लौ साथ विषादेन पद्मिनीव हिमाम्भसा ॥ १२५२॥
ENMSS@1253@1अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः ।
ENMSS@1253@2अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ॥ १२५३॥
ENMSS@1254@1अनयो विनयस्तस्य विधिर्यस्यानुवर्तते ।

ENMSS@1254@2नयः सम्यक्प्रयुक्तोऽपि भाग्यहीनस्य दुर्नयः ॥ १२५४॥

ENMSS@1255@1अनर्घ्यं सौन्दर्यं जगदुपरि माधुर्यलहरी- परीतं सौरभ्यं

दिशि दिशि रसैकव्यसनिता ।

ENMSS@1255@2इति प्रीत्यास्माभिस्त्वयि खलु रसाले व्यवसितं क एवं जानीते यदसि

कटुकीटैरुपहतः ॥ १२५५॥

ENMSS@1256@1अनर्घ्यमपि माणिक्यं हेमाश्रयमपेक्षते ।

ENMSS@1256@2अनाश्रया न शोभन्ते पण्डिता वनिता लताः ॥ १२५६॥

ENMSS@1257@1अनर्घ्यलावण्यनिधानभूमिर्न कस्य लोभं लटभा तनोति ।

ENMSS@1257@2अवैमि पुष्पायुधयामिकोऽस्याम् अविश्वसन् न क्षणमेति निद्राम् ॥ १२५७॥

ENMSS@1258@1अनर्घ्याण्यपि रत्नानि लभ्यन्ते विभवैः सुखम् ।

ENMSS@1258@2दुर्लभो रत्नकोट्यापि क्षणोऽपि हि गतायुषः ॥ १२५८॥

ENMSS@1259@1अनर्थकं विप्रवासं गृहेभ्यः पापैः संधिं परदाराभिमर्शम् ।

ENMSS@1259@2दम्भं स्तैन्यं पैशुनं मद्यपानं न सेवते यः स सुखी सदैव ॥ १२५९॥

ENMSS@1260@1अनर्थमकरागाराद् अस्मात् संसारसागरात् ।

ENMSS@1260@2उड्डीयते निरुद्वेगं सर्वत्यागेन पुत्रक ॥ १२६०॥

ENMSS@1261@1अनर्थमर्थतः पश्यन् अर्थं चैवाप्यनर्थतः ।

ENMSS@1261@2इन्द्रियैः प्रसृतो बालः सुदुःखं मन्यते सुखम् ॥ १२६१॥

ENMSS@1262@1अनर्थां श्चार्थरूपेण अर्थांश्चानर्थरूपतः ।

ENMSS@1262@2अर्थायैव हि केषांचिद् धननाशो भवत्युत ॥ १२६२॥

ENMSS@1263@1अनर्था ह्यर्थरूपाश्च अर्थाश्चानर्थरूपिणः ।

ENMSS@1263@2भवन्ति ते विनाशाय दैवायत्तस्य रोचते ॥ १२६३॥

ENMSS@1264@1अनर्थितर्पणं वित्तं चित्तमध्यानदर्पणम् ।

ENMSS@1264@2अतीर्थसर्पणं देहं पर्यन्ते शोच्यतां व्रजेत् ॥ १२६४॥

ENMSS@1265@1अनर्थित्वान्मनुष्याणां भयात् परिजनस्य च ।

ENMSS@1265@2मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥ १२६५॥

ENMSS@1266@1अनर्थे चैव निरतम् अर्थे चैव पराङ्मुखम् ।

ENMSS@1266@2न तं भर्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः ॥ १२६६॥

ENMSS@1267@1अनर्थोऽप्यर्थरूपेण तथार्थोऽनर्थरूपभाक् ।

ENMSS@1267@2उत्पद्यते विनाशाय तस्मादुक्तं परीक्षयेत् ॥ १२६७॥

ENMSS@1268@1अनलंकृतोऽपि माधव हरसि मनो मे सदा प्रसभम् ।

ENMSS@1268@2किं पुनरलंकृतस्त्वं संप्रति नखरक्षतैस्तस्याः ॥ १२६८॥
ENMSS@1269@1अनलः शीतनाशाय विषनाशाय गारुडम् ।
ENMSS@1269@2विवेको दुःखनाशाय सर्वनाशाय दुर्मतिः ॥ १२६९॥
ENMSS@1270@1अनलः सलिलाञ्जातः कार्त्तिकेयोऽपि वह्नितः ।
ENMSS@1270@2गूढं हि महतां जन्म परिच्छेत्तुं क ईश्वरः ॥ १२७०॥
ENMSS@1271@1अनलसजवापुष्पोत्पीडच्छवि प्रथमं ततः समदयवनीगण्डच्छायं पुनर्मधुपिङ्गलम् ।
ENMSS@1271@2तदनु च नवस्वर्णादर्शप्रभं शशिनस्ततस्तरुणतगराकारं बिम्बं विभाति नभस्तले ॥ १२७१॥
ENMSS@1272@1अनलस्तम्भनविद्यां सुभग भवान् नियतमेव जानाति ।
ENMSS@1272@2मन्मथशराग्नितप्ते हृदि मे कथमन्यथा वससि ॥ १२७२॥
ENMSS@1273@1अनल्पं जल्पन्तः कति बत गता नो यमपुरं पुरस्तादस्माकं विधृतनयना व्यात्तवदनाः ।
ENMSS@1273@2अतीता यद्येवं न हि निजहितं चेतसि वयं वहामो हा मोहाद् विषयविषजातादवसिताः ॥ १२७३॥
ENMSS@1274@1अनल्पं संतापं शमयति मनोजन्मजनितं तथा शीतं स्फीतं हिमवति निशीथे ग्लपयति ।
ENMSS@1274@2तदेवं कोऽप्यूष्मा रमणपरिरम्भोत्सवमिलत्-पुरन्ध्रीनीरन्ध्रस्तनकलशजन्मा विजयते ॥ १२७४॥
ENMSS@1275@1अनल्पचिन्ताभरमोहनिश्चला विलोक्यमानैव करोति साध्वसम् ।
ENMSS@1275@2स्वभावशोभानतिमात्रभूषणा तनुस्तवेयं बत किं नु सुन्दरि ॥ १२७५॥
ENMSS@1276@1अनल्पत्वात् प्रधानत्वाद् वंशस्येवेतरे स्वराः ।
ENMSS@1276@2विजिगीषोर्नृपतयः प्रयान्ति परिवारताम् ॥ १२७६॥
ENMSS@1277@1अनवद्यमवद्यं स्याद् वारुणीलेशमात्रतः ।
ENMSS@1277@2तद्वच्छिष्यो विरुद्धार्थाद् विगुरोरेव नश्यति ॥ १२७७॥
ENMSS@1278@1अनवरतकनकवितरण- जललवभृतकरतरङ्गितार्थिततेः ।
ENMSS@1278@2भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला ॥ १२७८॥
ENMSS@1279@1अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभिन्नम् ।
ENMSS@1279@2अपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरिचर इव नागः प्राणसारं बिभर्ति ॥ १२७९॥

ENMSS@1280@1अनवरतनयनविगलित- जललवघटिताक्षसूत्रवलयेन ।
ENMSS@1280@2मृत्युंजयमिव जपति त्वद्गोत्रं विरहिणी बाला ॥ १२८०॥
ENMSS@1281@1अनवरतनयनविगलित- जललवपरिमुषितपत्रलेखान्तम् ।
ENMSS@1281@2करतलनिषण्णमबले वदनमिदं कं न तापयति ॥ १२८१॥
ENMSS@1282@1अनवरतपरोपकरण- व्यग्रीभवदमलचेतसां महताम् ।
ENMSS@1282@2आपातकाटवानि स्फुरन्ति वचनानि भेषजानीव ॥ १२८२॥
ENMSS@1283@1अनवरतरसेन रागभाजा करजपरिक्षतिलब्धसंस्तवेन ।
ENMSS@1283@2सपदि तरुणपल्लवेन वध्वा विगतदयं खलु खण्डितेन मम्ले ॥ १२८३॥
ENMSS@1284@1अनवसरे च यदुक्तं सुभाषितं तच्च भवति हास्याय ।
ENMSS@1284@2रहसि प्रौढवधूनां रतिसमये वेदपाठ इव ॥ १२८४॥
ENMSS@1285@1अनवस्थितचित्तस्य न जने न वने सुखम् ।
ENMSS@1285@2जने दहति संसर्गो वने सङ्गविवर्जनम् ॥ १२८५॥
ENMSS@1286@1अनवस्थितचित्तानां प्रसादोऽपि भयंकरः ।
ENMSS@1286@2सर्पी हन्ति किल स्नेहाद् अपत्यानि न वैरतः ॥ १२८६॥
ENMSS@1287@1अनवहितः किमशक्तो विबुधैरभ्यर्थितः किमतिरसिकः ।
ENMSS@1287@2सर्वंकषोऽपि कालस्तिरयति सूक्तानि न कवीनाम् ॥ १२८७॥
ENMSS@1288@1अनवाप्यं च शोकेन शरीरं चोपतप्यते ।
ENMSS@1288@2अमित्राश्च प्रहृष्यन्ति मा स्म शोके मनः कृथाः ॥ १२८८॥
ENMSS@1289@1अनवेक्षितमर्यादं नास्तिकं विप्रलुम्पकम् ।
ENMSS@1289@2अरक्षितारमत्तारं नृपं विद्यादधोगतिम् ॥ १२८९॥
ENMSS@1290@1अनव्यये व्ययं याति व्यये याति सुविस्तृतिम् ।
ENMSS@1290@2अपूर्वस्तव कोशोऽयं विद्याकोशेषु भारति ॥ १२९०॥
ENMSS@1291@1अनसि सीदति सैकतवर्त्मनि प्रचुरभारभरक्षपितौक्षके ।
ENMSS@1291@2गुरुभरोद्धरणोद्धुरकंधरं स्मरति सारथिरेष धुरंधरम् ॥ १२९१॥
ENMSS@1292@1अनसूयः कृतप्रज्ञः शोभनान्याचरन् सदा ।
ENMSS@1292@2अकृच्छ्रात् सुखमाप्नोति सर्वत्र च विराजते ॥ १२९२॥
ENMSS@1293@1अनसूया क्षमा शान्तिः संतोषः प्रियवादिता ।
ENMSS@1293@2कामक्रोधपरित्यागः शिष्टाचारनिदर्शनम् ॥ १२९३॥
ENMSS@1294@1अनसूयार्जवं शौचं संतोषः प्रियवादिता ।
ENMSS@1294@2दमः सत्यमनायासो न भवन्ति दुरात्मनाम् ॥ १२९४॥
ENMSS@1295@1अनस्तमितसारस्य तेजसस्तद्विजृम्भितम् ।

ENMSS@1295@2येन पाषाणखण्डस्य मूल्यमल्पं वसुंधरा ॥ १२९५॥
ENMSS@1297@1अनाकलितमानुष्याः क्षमासंस्पर्शवर्जिताः ।
ENMSS@1297@2प्रतिबुद्धैर्न सेव्यन्ते पूर्वदेवविरोधिनः ॥ १२९७॥
ENMSS@1298@1अनाकाशे चन्द्रः सरसिजदलद्वन्द्वसहितो गृहीतः पश्चार्धे कुटिलकुटिलैः सोऽपि तिमिरैः ।
ENMSS@1298@2सुधां मुञ्चत्युच्चैरनिशमथ संमोहजननीं किमुत्पातालीयं वदत जगतः कर्तुमुदिता ॥ १२९८॥
ENMSS@1299@1अनाकूतैरेव प्रियसहचरीणां शिशुतया वचोभिः पाञ्चालीमिथुनमधुना संगमयितुम् ।
ENMSS@1299@2उपादत्ते नो वा विरमति न वा केवलमियं कपोलौ कल्याणी पुलकमुकुलैर्दन्तुरयति ॥ १२९९॥
ENMSS@1300@1अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
ENMSS@1300@2तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ॥ १३००॥
ENMSS@1301@1अनागतं भयं दृष्ट्वा नीतिशास्त्रविशारदः ।
ENMSS@1301@2अवसन्मूषकस्तत्र कृत्वा शतमुखं बिलम् ॥ १३०१॥
ENMSS@1302@1अनागतं यः कुरुते स शोभते स शोचते यो न करोत्यनागतम् ।
ENMSS@1302@2वने वसन्नेव जरामुपागतो बिलस्य वाचा न कदापि हि श्रुता ॥ १३०२॥
ENMSS@1303@1अनागतं हि बुध्येत यच्च कार्यं पुरः स्थितम् ।
ENMSS@1303@2न तु बुद्धिक्षयात् किंचिद् अतिक्रामेत् प्रयोजनम् ॥ १३०३॥
ENMSS@1304@1अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति ।
ENMSS@1304@2स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥ १३०४॥
ENMSS@1305@1अनागतवतीं चिन्तां यो नरः कर्तुमिच्छति ।
ENMSS@1305@2स भूमौ पाण्डुरः शेते सोमशर्मपिता यथा ॥ १३०५॥
ENMSS@1306@1अनागतविधाता च प्रत्युत्पन्नमतिश्च यः ।
ENMSS@1306@2द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति ॥ १३०६॥
ENMSS@1307@1अनागतविधातारम् अप्रमत्तमकोपनम् ।
ENMSS@1307@2स्थिरारम्भमदीनं च नरं श्रीरुपतिष्ठति ॥ १३०७॥
ENMSS@1308@1अनागतविधानं च कर्तव्यं विषये नृपैः ॥
ENMSS@1308@2आगमश्चापि कर्तव्यस्तथा दोषो न जायते ॥ १३०८॥
ENMSS@1309@1अनागतविधानं तु कर्तव्यं शुभमिच्छता ।

ENMSS@1309@2आपदं शङ्कमानेन पुरुषेण विपश्चिता ॥ १३०९॥

ENMSS@1310@1अनागतोपधं हिंस्रं दुर्बुद्धिमबहुश्रुतम् ।

ENMSS@1310@2त्यक्तोपात्तं मद्यपानद्यूतस्त्रीमृगयाप्रियम् ॥ १३१०॥

ENMSS@1310@3कार्ये महति युञ्जानो हीयतेऽर्थपतिः श्रिया ॥ १३१०॥

ENMSS@1311@1अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।

ENMSS@1311@2अखण्डं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ १३११॥

ENMSS@1312@1अनातपत्रोऽप्ययमत्र लक्ष्यते सितातपत्रैरिव सर्वतो वृतः ।

ENMSS@1312@2अचामरोऽप्येष सदैव वीज्यते विलासबालव्यजनेन कोऽप्ययम् ॥ १३१२॥

ENMSS@1313@1अनातुरोत्कण्ठितयोः प्रसिध्यता समागमेनापि रतिर्न मां प्रति ।

ENMSS@1313@2परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानुरागयोः ॥ १३१३॥

ENMSS@1314@1अनात्मवान् नयद्वेषी वर्धयन्नरिसंपदः ।

ENMSS@1314@2प्राप्यापि महदैश्वर्यं सह तेन विनश्यति ॥ १३१४॥

ENMSS@1315@1अनाथानां दरिद्राणां बालवृद्धतपस्विनाम् ।

ENMSS@1315@2अन्यायपरिभूतानां सर्वेषां पार्थिवो गतिः ॥ १३१५॥

ENMSS@1316@1अनाथानां नाथो गतिरगतिकानां व्यसनिनां विनेता भीतानामभयमधृतीनां भरवशः ।

ENMSS@1316@2सुहृद्बन्धुः स्वामी शरणमुपकारी वरगुरुः पिता माता भ्राता जगति पुरुषो यः स नृपतिः ॥ १३१६॥

ENMSS@1317@1अनाथान् रोगिणो यश्च पुत्रवत् परिपालयेत् ।

ENMSS@1317@2गुरुणा समनुज्ञातः स भिषक्छब्दमश्नुते ॥ १३१७॥

ENMSS@1318@1अनादरपरो विद्वान् ईहमानः स्थिरां श्रियम् ।

ENMSS@1318@2अग्नेः शेषमृणाच्छेषं शत्रोः शेषं न शेषयेत् ॥ १३१८॥

ENMSS@1319@1अनादरहतां सेवां दाम्पत्यं प्रेमवर्जितम् ।

ENMSS@1319@2मैत्रीं च हेतुसापेक्षां चे तना नाधिकुर्वते ॥ १३१९॥

ENMSS@1320@1अनादरालोकविवृद्धशोकः पितुः प्रियावाक्यवशंगतस्य ।

ENMSS@1320@2औत्तानपादिर्जगतां शरण्यम् आराध्य विष्णुं पदमग्र्यमायात् ॥ १३२०॥

ENMSS@1321@1अनादायी व्ययं कुर्याद् असहायी रणप्रियः ।

ENMSS@1321@2आतुरः सर्वभक्षी च नरः शीघ्रंविनश्यति ॥ १३२१॥

ENMSS@1322@1अनादिधाविस्वपरंपराया हेतुस्रजः स्रोतसि वेश्वरे वा ।
ENMSS@1322@2आयत्तधीरेष जनस्तदार्याः किमीदृशः पर्यनुयोगयोग्यः ॥ १३२२॥
ENMSS@1323@1अनादिष्टोपि भूपस्य दृष्ट्वा हानिकरं च यः ।
ENMSS@1323@2यतते तस्य नाशाय स भृत्योऽर्हो महीभुजाम् ॥ १३२३॥
ENMSS@1324@1अनादृत्यौचित्यं ह्रियमविगणय्यातिमहतीं यदेतस्याप्यर्थे धनलवदुराशातरलिताः ।
ENMSS@1324@2अलीकाहंकारज्वरकुटिलितभ्रूणि धनिनां मुखानि प्रेक्ष्यन्ते धिगिदमतिदुष्पूरमुदरम् ॥ १३२४॥
ENMSS@1325@1अनादेयं नाददीत परिक्षीणोऽपि पार्थिवः ।
ENMSS@1325@2न चादेयं समृद्धोऽपि सूक्ष्ममप्यर्थमुत्सृजेत् ॥ १३२५॥
ENMSS@1326@1अनादेयस्य चादानाद् आदेयस्य च वर्जनात् ।
ENMSS@1326@2दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ॥ १३२६॥
ENMSS@1327@1अनाद्यन्ता तु सा तृष्णा अन्तर्देहगता नृणाम् ।
ENMSS@1327@2विनाशयति संभूता अयोनिज इवानलः ॥ १३२७॥
ENMSS@1328@1अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ।
ENMSS@1328@2तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ १३२८॥
ENMSS@1329@1अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलम् ।
ENMSS@1329@2मलं पृथिव्या वाहीकाः पुरुषस्यानृतं मलम् ॥ १३२९॥
ENMSS@1330@1अनायका विनश्यन्ति नश्यन्ति बहुनायकाः ।
ENMSS@1330@2स्त्रीनायका विनश्यन्ति नश्यन्ति शिशुनायकाः ॥ १३३०॥
ENMSS@1331@1अनायके न वस्तव्यं न वसेद् बहुनायके ।
ENMSS@1331@2स्त्रीनायके न वस्तव्यं न वसेद् बालनायके ॥ १३३१॥
ENMSS@1332@1अनायव्ययकर्ता च अनाथः कलहप्रियः ।
ENMSS@1332@2आतुरः सर्वभक्षी च नरः शीघ्रं विनश्यति ॥ १३३२॥
ENMSS@1333@1अनायासकृशं मध्यम् अशङ्कतरले दृशौ ।
ENMSS@1333@2अभूषणमनोहारि वपुर्वयसि सुभ्रुवः ॥ १३३३॥
ENMSS@1334@1अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य ।
ENMSS@1334@2त्वदाप्तसंकेततया कृतार्था श्रव्यापि नानेन जनेन संज्ञा ॥ १३३४॥
ENMSS@1335@1अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
ENMSS@1335@2फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसंपदः ॥ १३३५॥
ENMSS@1336@1अनारतं प्रतिदिशं प्रतिदेशं जले स्थले ।

ENMSS@1336@2जायन्ते च म्रियन्ते च बुद्बुदा इव वारिणि ॥ १३३६॥
ENMSS@1337@1अनारतपरिस्खलन्नयनवारिधाराशत-
प्रवृद्धपथनिम्नगासलिलरुद्धयानोद्यमा ।
ENMSS@1337@2त्वदीयरिपुकामिनी बहुविदेशयानैषिणी विनिन्दति वलद्दृशा गुरुरुषाश्रुपं
प्रावृषम् ॥ १३३७॥
ENMSS@1338@1अनारब्धाक्षेपं परमकृतवाष्पव्यतिकरं निगूढान्तस्तापं
हृदयविनिपीतं व्यवसितम् ।
ENMSS@1338@2कृशाङ्ग्या यत्पापे व्रजति मयि नैराश्यपिशुनं श्लथैरङ्गैरुक्तं
हृदयमिदमुन्मूलयति तत् ॥ १३३८॥
ENMSS@1339@1अनारभ्या भवन्त्यर्थाः केचिन् नित्यं तथागताः ।
ENMSS@1339@2कृतः पुरुषकारोऽपि भवेद्येषु निरर्थकः ॥ १३३९॥
ENMSS@1340@1अनारम्भस्तु कार्याणां प्रथमं बुद्धिलक्षणम् ।
ENMSS@1340@2आरब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ॥ १३४०॥
ENMSS@1341@1अनाराध्य कालीमनास्वाद्य गौडी- मृते मन्त्रतन्त्राद्विना शब्दचौर्यात्
।
ENMSS@1341@2प्रबन्धं प्रगल्भं प्रकर्तुं प्रवक्तुं विरिञ्चिप्रपञ्चे मदन्यः
कविः कः ॥ १३४१॥
ENMSS@1342@1अनारोग्यमनायुष्यम् अस्वर्ग्यं चातिभोजनम् ।
ENMSS@1342@2अपुण्यं लोकविद्विष्टं तस्मात् तत् परिवर्जयेत् ॥ १३४२॥
ENMSS@1343@1अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता ।
ENMSS@1343@2पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ १३४३॥
ENMSS@1344@1अनार्यप्रज्ञानामिह जनवधूनां हि मनसो महाशल्यं कर्णे तव
कनकजम्बूकिसलयः ।
ENMSS@1344@2भ्रमन् भिक्षाहेतोरधिनगरि बुद्धोऽसि न मया ? त्वयैतावद्वेषः पथिक
न विधेयः पुनरपि ॥ १३४४॥
ENMSS@1345@1अनार्यमप्याचरितं कुमार्या भवान् मम क्षाम्यतु सौम्य तावत् ।
ENMSS@1345@2हंसोऽपि देवांशतयासि वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः ॥
१३४५॥
ENMSS@1346@1अनार्यवृत्तमप्राज्ञम् असूयकमधार्मिकम् ।
ENMSS@1346@2अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा ॥ १३४६॥
ENMSS@1347@1अनार्येण कृतघ्नेन संगतिर्मे न युज्यते ।
ENMSS@1347@2विनाशमपि काङ्क्षन्ति ज्ञातीनां ज्ञातयः सदा ॥ १३४७॥

ENMSS@1348@1अनालोक्य व्ययं कर्त्ता अनाथः कलहप्रियः ।
ENMSS@1348@2आतुरः सर्वक्षेत्रेषु नरः शीघ्रं विनश्यति ॥ १३४८॥
ENMSS@1349@1अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृदस्त्वयाकाण्डे मानः किमिति सरले
संप्रति कृतः ।
ENMSS@1349@2समाकृष्टा ह्येते प्रलयदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥ १३४९॥
ENMSS@1350@1अनावर्ती कालो व्रजति स वृथा तन्न गणितं दशास्तास्ताः सोढा
व्यसनशतसंपातविधुराः ।
ENMSS@1350@2कियद्वा वक्ष्यामः किमिव बत नात्मन्युपकृतं वयं यावत्तावत् पुनरपि
तदेव व्यवसितम् ॥ १३५०॥
ENMSS@1351@1अनावर्जितचित्तापि ध्रुवं सर्वान् प्रधावति ।
ENMSS@1351@2फलं न लभते किंचित् तृष्णा जीर्णेव कामिनी ॥ १३५१॥
ENMSS@1352@1अनाविलं फलं भुङ्क्ते विषयाणामनुत्सुकः ।
ENMSS@1352@2उत्सुको लब्धरोकेण तत्र शोकेन शीर्यते ॥ १३५२॥
ENMSS@1353@1अनावृतनवद्वारपञ्जरे विहगानिलः ।
ENMSS@1353@2यत्तिष्ठति तदाश्चर्यं वियोगे तस्य का कथा ॥ १३५३॥
ENMSS@1354@1अनावृताः स्ववर्णेषु सर्वसाधारणाः पुरा ।
ENMSS@1354@2नार्यो बभूवुर्निर्वैरो यतः सर्वोऽभवज्जनः ॥ १३५४॥
ENMSS@1355@1अनावृष्टिहते देशे सस्ये च प्रलयं गते ।
ENMSS@1355@2धन्यास्तात न पश्यन्ति देशभङ्गं कुलक्षयम् ॥ १३५५॥
ENMSS@1356@1अनाश्रिता दानपुण्यं वेदपुण्यमनाश्रिताः ।
ENMSS@1356@2रागद्वेषविनिर्मुक्ता विचरन्तीह मोक्षिणः ॥ १३५६॥
ENMSS@1357@1अनाश्रिते दृप्तगुरौ अवज्ञां कलयेन् नृपः ।
ENMSS@1357@2संवर्तेन मरुत्तस्तु निरस्तमकरोद्गुरुम् ॥ १३५७॥
ENMSS@1358@1अनास्था वस्तूनामभिमतगुणानामुपहृतौ घनो गर्वस्तन्व्या रुषि च
विहिताडम्बरविधिः ।
ENMSS@1358@2प्रहारः पादाभ्यां यमनमपि काञ्च्या चरणयोः प्रियाया विब्बोकं तदिदमिति
धन्योऽनुभवति ॥ १३५८॥
ENMSS@1359@1अनास्वादितसंभोगाः पतन्तु तव शत्रवः ।
ENMSS@1359@2बालवैधव्यदग्धानां कुलस्त्रीणां स्तना इव ॥ १३५९॥

ENMSS@1360@1अनास्वाद्यमविक्रेयम् अनादेयमनीप्सितम् ।
ENMSS@1360@2दत्तं निरुपकारं यद् वन्ध्यदानेन तेन किम् ॥ १३६०॥
ENMSS@1361@1अनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
ENMSS@1361@2सुरापो वृषलीभर्ता ब्रःमहा गुरुतल्पगः ॥ १३६१॥
ENMSS@1362@1असत्प्रतिग्रहे युक्तः स्तेनः कुत्सितयाजकः ।
ENMSS@1362@2अदोषस्त्यक्तुमन्योन्यं कर्मसंकरनिश्चयात् ॥ १३६२॥
ENMSS@1363@1अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
ENMSS@1363@2विश्वसित्यप्रमत्तेषु मूढचेता नराधमः ॥ १३६३॥
ENMSS@1363A@1अनाहूतः समायातः अनापृष्टस्तु भाषते ।
ENMSS@1363A@2परनिन्दात्मनः स्तुतिश्चत्वारि लघुलक्षणम् ॥
ENMSS@1364@1अनाहूतप्रविष्टस्य दृष्टस्य क्रुद्धचक्षुषा ।
ENMSS@1364@2स्वयमेवोपविष्टस्य वरं मृत्युर्न भोजनम् ॥ १३६४॥
ENMSS@1365@1अनहूताः स्वयं यान्ति रसास्वादविलोलुपाः ।
ENMSS@1365@2निवारिता न गच्छन्ति मक्षिका इव भिक्षुकाः ॥ १३६५॥
ENMSS@1366@1अनाहूतो विशेद्यस्तु अपृष्टो बहु भाषते ।
ENMSS@1366@2आत्मानं मन्यते प्रीतं भूपालस्य स दुर्मतिः ॥ १३६६॥
ENMSS@1367@1अनाह्वाने प्रवेशश्च अपृष्टे परिभाषणम् ।
ENMSS@1367@2आत्मस्तुतिः परे निन्दा चत्वारि लघुलक्षणम् ॥ १३६७॥
ENMSS@1368@1अनिच्छतोऽपि दुःखानि यथेहायान्ति देहिनः ।
ENMSS@1368@2सुखान्यपि तथा मन्ये चिन्तादैन्येन को गुणः ॥ १३६८॥
ENMSS@1369@1अनिःसरन्तीमपि गेहगर्भात् कीर्तिं परेषामसतीं वदन्ति ।
ENMSS@1369@2स्वैरं भ्रमन्तीमपि च त्रिलोक्यां त्वत्कीर्तिमाहुः कवयः सतीं तु ॥ १३६९॥
ENMSS@1370@1अनिच्छन्तोऽपि विनयं विद्याभ्यासेन बालकाः ।
ENMSS@1370@2भेषजेनेव नैरुज्यं प्रापणीयाः प्रयत्नतः ॥ १३७०॥
ENMSS@1371@1अनिच्छन्नपि चित्तेन विदेशस्थोऽपि मानवः ।
ENMSS@1371@2स्वकर्मोत्पातवातेन नीयते यत्र तत्फलम् ॥ १३७१॥
ENMSS@1372@1अनिज्यया विवाहैश्च वेदस्योत्सादनेन च ।
ENMSS@1372@2कुलान्यकुलतां यान्ति धर्मस्यातिक्रमेण च ॥ १३७२॥
ENMSS@1373@1अनित्यं निस्त्राणं जननमरणव्याधिकलितं
जगन्मिथ्यात्वार्थैरहमहमिकालिङ्गितमिदम् ।

ENMSS@1373@2विचिन्त्यैवं सन्तो विमलमनसो धर्ममतयस्तपः कर्तुं वृत्तास्तदपसृतये जैनमनघम् ॥ १३७३॥
ENMSS@1374@1अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ।
ENMSS@1374@2ऐश्वर्यं प्रियसंवासो गृध्येदेषु न पण्डितः ॥ १३७४॥
ENMSS@1375@1अनित्यतासमाख्यानं विषयादिविडम्बनम् ।
ENMSS@1375@2पश्चात्तापस्य कथनं कालस्य चरितं तथा ॥ १३७५॥
ENMSS@1376@1अनित्यते जगन्निन्द्ये वन्दनीयासि संप्रति ।
ENMSS@1376@2या करोषि प्रसङ्गेन दुःखानामप्यनित्यताम् ॥ १३७६॥
ENMSS@1377@1अनित्यत्वे कृतमतिर्म्लानमाल्येन शोचति ।
ENMSS@1377@2नित्यत्वे कृतबुद्धिस्तु भिन्नभाण्डेऽनुशोचति ॥ १३७७॥
ENMSS@1378@1अनित्यमिति जानन्तो न भवन्ति भवन्ति च ।
ENMSS@1378@2अथ येनैव कुर्वन्ति नैव जातु भवन्ति ते ॥ १३७८॥
ENMSS@1379@1अनित्यस्य शरीरस्य सर्वदोषमयस्य च ।
ENMSS@1379@2दुर्गन्धस्य च रक्षार्थं नाहं पापं करोमि वै ॥ १३७९॥
ENMSS@1380@1अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
ENMSS@1380@2नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥ १३८०॥
ENMSS@1381@1अनित्ये प्रियसंवासे संसारे चक्रवद्गतौ ।
ENMSS@1381@2पथि संगतमेवैतद् भ्राता माता पिता सखा ॥ १३८१॥
ENMSS@1382@1अनित्यो विजयो यस्माद् दृश्यते युध्यमानयोः ।
ENMSS@1382@2पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् ॥ १३८२॥
ENMSS@1383@1अनिद्रो दुःस्वप्नः प्रपतनमनद्रि द्रुमतटं जराहीनः कम्पस्तिमिररहितस्त्रासस्मयः ।
ENMSS@1383@2अनाघातं दुःखं विगतनिगडो बन्धनविधिः सजीवं जन्तूनां मरणमवनीशाश्रयरसः ॥ १३८३॥
ENMSS@1384@1अनिधाय मुखे पत्रं पूगं खादति यो नरः ।
ENMSS@1384@2सप्तजन्मदरिद्रत्वम् अन्ते विष्णुस्थितिश्च न ॥ १३८४॥
ENMSS@1385@1अनिन्दा परकृत्येषु स्वधर्मपरिपालनम् ।
ENMSS@1385@2कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः ॥ १३८५॥
ENMSS@1386@1प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे ।
ENMSS@1386@2गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता ॥ १३८६॥
ENMSS@1387@1बन्धुभिर्बद्धसंयोगः सुजने चतुरश्रता ।

ENMSS@1387@2तच्चित्तानुविधायित्वम् इति वृत्तं महात्मनाम् ॥ १३८७॥
ENMSS@1388@1अनिन्द्यमपि निन्दन्ति स्तुवन्त्यस्तुत्यमुच्चकैः ।
ENMSS@1388@2स्वापतेयकृते मर्त्याः किं किं नाम न कुर्वते ॥ १३८८॥
ENMSS@1389@1अनिबन्धनकचबन्धनम् अनिदानं दानमुत्तरीयस्य ।
ENMSS@1389@2आकस्मिकमन्दस्मितम् अपहस्तयतीव बाल्यमेतस्याः ॥ १३८९॥
ENMSS@1390@1अनिभालित एव केवलं खनिगर्भे निधिरेष जीर्यतु ।
ENMSS@1390@2न तु सीदतु मूल्यहानितो वणिजालोकनगोचरीकृतः ॥ १३९०॥
ENMSS@1391@1अनिमिषमविरामा रागिणां सर्वरात्रं नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य ।
ENMSS@1391@2इदमुदवसितानामस्फुटालोकसंपन् नयनमिव सनिद्रं घूर्णते दैपमर्चिः ॥ १३९१॥
ENMSS@1392@1अनियतरुदितस्मितं विराजत्- कतिपयकोमलदन्तकुड्मलाग्रम् ।
ENMSS@1392@2वदनकमलकं शिशोः स्मरामि स्खलदसमञ्जसमुग्धजल्पितं ते ॥ १३९२॥
ENMSS@1393@1अनियुक्ता हि साचिव्ये यद्वदन्ति मनीषिणः ।
ENMSS@1393@2अनुरागद्रवस्यैताः प्रणयस्यातिभूमयः ॥ १३९३॥
ENMSS@1394@1अनिराकृततापसंपदं फलहीनां सुमनोभिरुज्झिताम् ।
ENMSS@1394@2खलतां खलनामिवासतीं प्रतिपद्येत कथं बुधो जनः ॥ १३९४॥
ENMSS@1395@1अनिरीक्षणमेव दृष्टिरार्द्रा परिहासालपनानि मौनमेव ।
ENMSS@1395@2अवधीरणमेव चाभियोगो विनिगूढोऽपि हि लक्ष्यतेऽनुरागः ॥ १३९५॥
ENMSS@1396@1अनिर्घातं धाराधरमशमनीयं निधिरपाम् अकाठिन्यं चिन्तामणिमजडभूतं सुरतरुम् ।
ENMSS@1396@2अभित्त्वोपादाय प्रभुरपशुवृत्तिं च सुरभिं परार्थैकस्वार्थानकृत पुरुषानादिपुरुषः ॥ १३९६॥
ENMSS@1397@1अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ।
ENMSS@1397@2पुरुषोक्तिः कथं तस्मिन् ब्रूहि त्वं हि तपोधन ॥ १३९७॥
ENMSS@1398@1कृतं पुरुषशब्देन जातिमात्रावलम्बिना ।
ENMSS@1398@2योऽङ्गीकृतगुणैः श्लाध्यः सविस्मयमुदाहृतः ॥ १३९८॥
ENMSS@1399@1ग्रसमानमिवौजांसि सदसा गौरवेरितम् ।
ENMSS@1399@2नाम यस्याभिननदन्ति द्विषोऽपि स पुमान्पुमान् ॥ १३९९॥
ENMSS@1400@1अनिर्दयोपभोगस्य रूपस्य मृदुनः कथम् ।
ENMSS@1400@2कठिनं खलु ते चेतः शिरीषस्येव बन्धनम् ॥ १४००॥

ENMSS@1401@1अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ।
ENMSS@1401@2निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ॥ १४०१॥
ENMSS@1402@1अनिर्वाच्यमनिर्भिन्नम् अपरिच्छिन्नमव्ययम् ।
ENMSS@1402@2ब्रह्मेव सुजनप्रेम दुःखमूलनिकृन्तनम् ॥ १४०२॥
ENMSS@1403@1अनिर्वृतं तथा मन्दं परलोकपराङ्मुखम् ।
ENMSS@1403@2नरकाय न सद्वृत्यं कुपुत्रालम्बिजन्म वै ॥ १४०३॥
ENMSS@1404@1अनिर्वेदः श्रियो मूलं चक्षुर्मे लोहसंनिभा ।
ENMSS@1404@2अहोरात्राणि दीर्घाणि समुद्रः किं न शुष्यति ॥ १४०४॥
ENMSS@1405@1अनिर्वेदः श्रियो मूलं दुःखनाशे सुखस्य च ।
ENMSS@1405@2महान् भवत्यनिर्विण्णः सुखं चात्यन्तमश्नुते ॥ १४०५॥
ENMSS@1406@1अनिर्वेदः श्रियो मूलम् अनिर्वेदः परं सुखम् ।
ENMSS@1406@2अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥ १४०६॥
ENMSS@1407@1अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ।
ENMSS@1407@2करोति सफलं जन्तोः कर्म यच्च करोति सः ॥ १४०७॥
ENMSS@1408@1अनिल निखिलविश्वं प्राणिति त्वत्प्रयुक्तं सपदि च विनिमीलत्याकुलं त्वद्वियोगात् ।
ENMSS@1408@2वपुरसि परमेशस्याचितं नोचितं ते सुरभिमसुरभिं वा यत्समं स्वीकरोषि ॥ १४०८॥
ENMSS@1409@1अनिशं नयनाभिरामया रमया संमदिनो मुखस्य ते ।
ENMSS@1409@2निशि निःसरदिन्दिरं कथं तुलयामः कलयापि पङ्कजम् ॥ १४०९॥
ENMSS@1410@1अनिशं मतङ्गजानां बृंहितमाकर्ण्यते यथा विपिने ।
ENMSS@1410@2मन्ये तथा न जीवति गजेन्द्रपलकवलनः सिंहः ॥ १४१०॥
ENMSS@1411@1अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे ।
ENMSS@1411@2यदि मदिरायतनयनां तामधिकृत्य प्रहरतीति ॥ १४११॥
ENMSS@1412@1अनिश्चितैरध्यवसायभीरुभिर्यथेष्टसंलापरतिप्रयोजनैः ।
ENMSS@1412@2फले विसंवादमुपागता गिरः प्रयान्ति लोके परिहासवस्तुताम् ॥ १४१२॥
ENMSS@1413@1अनिष्टः कन्यकाया यो वरो रूपान्वितोऽपि यः ।
ENMSS@1413@2यदि स्यात्तस्य नो देया कन्या श्रेयोऽभिवाञ्छता ॥ १४१३॥
ENMSS@1414@1अनिष्टदः क्षितीशानां भूकम्पः संध्ययोर्द्वयोः ।
ENMSS@1414@2दिग्दाहः पीतवर्णत्वाद् राज्ञां चानिष्टदः परः ॥ १४१४॥

ENMSS@1415@1अनिष्टयोगात् प्रियविप्रयोगतः परापमानाद्धनहीनजीवितात् ।
ENMSS@1415@2अनेकजन्मव्यसनप्रबन्धतो बिभेति नो यस्तपसो बिभेति सः ॥ १४१५॥
ENMSS@1416@1अनिष्टसम्प्रयोगाच्च विप्रयोगात्प्रियस्य च ।
ENMSS@1416@2मानुषा मानसैर्दुःखैर्युज्यन्ते अल्पबुद्धयः ॥ १४१६॥
ENMSS@1417@1अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।
ENMSS@1417@2यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥ १४१७॥
ENMSS@1418@1अनिष्पन्नामपि क्रियां नयोपेतां विचक्षणाः ।
ENMSS@1418@2फलदां हि प्रकुर्वन्ति महासेनापतिर्यथा ॥ १४१८॥
ENMSS@1419@1अनीर्ष्याः श्रोतारो मम वचसि चेद्वच्मि तदहं स्वपक्षाद्भेतव्यं बहु न तु विप्रपक्षात् प्रभवतः ।
ENMSS@1419@2तमस्याक्रान्तशे कियदपि हि तेजोवयविनः स्वशक्त्या भासन्ते दिवसकृति सत्येव न पुनः ॥ १४१९॥
ENMSS@1420@1अनीर्ष्युर्गुप्तदारः स्याच्चोक्षः स्यादघृणी नृपः ।
ENMSS@1420@2स्त्रियं सेवेत नात्यर्थं मृष्टं भुञ्जीत नाहितम् ॥ १४२०॥
ENMSS@1421@1अनीर्ष्युर्गुप्तदारः स्यात् संविभागी प्रियंवदः ।
ENMSS@1421@2श्लक्ष्णो मधुरवाक्स्त्रीणां न चासां वशगो भवेत् ॥ १४२१॥
ENMSS@1422@1अनीशाय शरीरस्य हृदयं स्ववशं मयि ।
ENMSS@1422@2स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निःश्वसितैरिव ॥ १४२२॥
ENMSS@1423@1अनीश्वरोऽयं पुरुषो भवाभवे सूत्रप्रोता दारुमयीव योषा ।
ENMSS@1423@2धात्रा तु दिष्टस्य वशे किलायं तस्माद्वद त्वं श्रवणे धृतोऽहम् ॥ १४२३॥
ENMSS@1424@1अनुकर्तुमपह्नोतुम् अतिवर्तितुमीक्षितुम् ।
ENMSS@1424@2अशक्ये तेजसां पत्यौ मित्रतानुमतिक्षमा ॥ १४२४॥
ENMSS@1425@1अनुकुरुतः खलसुजनावग्रिमपाश्चात्यभागयोः सूच्याः ।
ENMSS@1425@2विदधाति रन्ध्रमेको गुणवानन्यस्त्वपिदधाति ॥ १४२५॥
ENMSS@1426@1अनुकूलकलत्रो यस्तस्य स्वर्ग इहैव हि ।
ENMSS@1426@2प्रतिकूलकलत्रस्य नरको नात्र संशयः ॥ १४२६॥
ENMSS@1427@1अनुकूलमर्थ्यमविरोधि हितं श्रवणीयमागमरहस्ययुतम् ।
ENMSS@1427@2वचनं मदीयमपकर्णयति क्व मनोभवः क्व गुणसंग्रहणम् ॥ १४२७॥
ENMSS@1428@1अनुकूलवरपुरंध्रिषु पुरुषाणां बद्धमूलरागाणाम् ।

ENMSS@1428@2नयति मनो दुःशीलः कुसुमास्त्रो हीनपात्रेषु ॥ १४२८॥
ENMSS@1429@1अनुकूलविधायिदैवतो विजयी स्यान् ननु कीदृशो नृपः ।
ENMSS@1429@2विरहिण्यपि जानकी वने निवसन्ती मुदमादधौ कुतः ॥ १४२९॥
ENMSS@1430@1अनुकूलां विमलाङ्गीं कुलजां कुशलां सुशीलसंपन्नाम् ।
ENMSS@1430@2पञ्चलकारां भार्यां पुरुषः पुण्योदयाल्लभते ॥ १४३०॥
ENMSS@1431@1अनुकूला सदा तुष्टा दक्षा साध्वी विचक्षणा ।
ENMSS@1431@2एभिरेव गुणैर्युक्ता श्रीरिव स्त्री न संशयः ॥ १४३१॥
ENMSS@1432@1अनुकूले विधौ देयं यतः पूरयिता हरिः ।
ENMSS@1432@2प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति ॥ १४३२॥
ENMSS@1433@1अनुकूले सति धातरि भवत्यनिष्टादपीष्टमविलम्बम् ।
ENMSS@1433@2पीत्वा विषमपि शंभुर्मृत्युंजयतामवाप तत्कालम् ॥ १४३३॥
ENMSS@1434@1अनुकृतगण्डशैलमदमण्डितगण्डतट-
भ्रमदलिमण्डलीनिविडगुङ्गमघोषजुषः ।
ENMSS@1434@2दलयति हेलयैव हरिरुग्रकरान्करिण- स्त्रिजगति तेज एव गुरु नो विकृताकृतिता ॥ १४३४॥
ENMSS@1435@1अनुक्षणमनुक्षणं क्षितिप रक्ष्यमाणा त्वया प्रयाति विदिशो दश प्रबलकीर्तिरेकाकिनी ।
ENMSS@1435@2इयं नियतमर्थिषु प्रतिदिनं वितीर्णा रमा जहाति न तवान्तिकं द्वितयमेतदत्यद्भुतम् ॥ १४३५॥
ENMSS@1436@1अनुगतपरितोषितानुजीवी मधुरवचाश्चरितानुरक्तलोकः ।
ENMSS@1436@2सुनिपुणपरमाप्तसक्ततन्त्रो भवति चिरं नृपतिः प्रदीप्तरश्मिः ॥ १४३६॥
ENMSS@1437@1अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते ।
ENMSS@1437@2स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति ॥ १४३७॥
ENMSS@1438@1अनुगम्य श्मशानान्तं निवर्तन्तीह बान्धवाः ।
ENMSS@1438@2अग्नौ प्रक्षिप्य पुरुषं ज्ञातयः सुहृदस्तथा ॥ १४३८॥
ENMSS@1439@1अनुगृहाण शिशूनभिलङ्घिता शबरवारिविहारवनस्थली ।
ENMSS@1439@2विसृज कातरतामिदमग्रतो हरिनि कारुणिकस्य तपोवनम् ॥ १४३९॥
ENMSS@1440@1अनुग्रहविधौ देव्या मातुश्च महदन्तरम् ।
ENMSS@1440@2माता गाढं निबध्नाति बन्धं देवी निकृन्तति ॥ १४४०॥
ENMSS@1441@1अनुग्रहादेव दिवौकसां नरो निरस्य मानुष्यकमेति दिव्यताम् ।
ENMSS@1441@2अयोविकारे स्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि ॥ १४४१॥

ENMSS@1442@1अनुचरति शशाङ्कं राहुदोषेऽपि तारा पतति न वनवृक्षे याति भूमिं लता च ।
ENMSS@1442@2त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः ॥ १४४२॥
ENMSS@1443@1अनुचितकर्मारम्भः स्वजनविरोधो बलीयसा स्पर्धा ।
ENMSS@1443@2प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि ॥ १४४३॥
ENMSS@1444@1अनुचितफलाभिलाषी नित्यं विधिना निवार्यते पुरुषः ।
ENMSS@1444@2द्राक्षाविपाकसमये मुखपाको भवति काकानाम् ॥ १४४४॥
ENMSS@1445@1अनुचितमुचितं वा कर्म कोऽयं विभागो भगवति परमास्तां भक्तियोगो द्रढीयान् ।
ENMSS@1445@2किरति विषमहीन्द्रः सान्द्रपीयूषमिन्दुर्द्वयमपि स महेशो निर्विशेषं बिभर्ति ॥ १४४५॥
ENMSS@1446@1अनुचितमेवाचरितं पशुपतिना यद्विधेः शिरश्छिन्नम् ।
ENMSS@1446@2छिन्नो न चास्य हस्तो येनायं दुर्लिपिं लिखति ॥ १४४६॥
ENMSS@1447@1अनुचिते यदि कर्मणि युज्यते शठधिया प्रभुणा सगुणो जनः ।
ENMSS@1447@2भवति नास्य गुणापचयस्ततः पदगतस्य किरीटमणेरिव ॥ १४४७॥
ENMSS@1448@1अनुच्चनीचचलताम् अङ्गानां चलपादताम् ।
ENMSS@1448@2कटिकूर्परशीर्षांशकर्णानां समरूपताम् ॥ १४४८॥
ENMSS@1449@1रम्यां प्रतीकविश्रान्तिम् उरसश्च समुन्नतिम् ।
ENMSS@1449@2अभ्यासाभ्यर्हितं प्राहुः सौष्ठवं नृत्यवेदिनः ॥ १४४९॥
ENMSS@1450@1अनुच्छिष्टो देवैरपरिदलितो राहुदशनैः कलङ्केनास्पृष्टो न खलु परिभूतो दिनकृता ।
ENMSS@1450@2कुहूभिर्नो लुप्तो न च युवतिवक्रेण विजितः कलानाथः कोऽयं कनकलतिकायामुदयते ॥ १४५०॥
ENMSS@1451@1अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
ENMSS@1451@2प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ १४५१॥
ENMSS@1452@1अनुज्झितसुहृद्भावः सुहृदां दुर्हृदामपि ।
ENMSS@1452@2सम इत्येव भाव्योऽपि नम इत्यभिभाष्यते ॥ १४५२॥
ENMSS@1453@1अनुत्कीर्णा यथा पङ्के पुत्रिका वाथ दारुणि ।

ENMSS@1453@2वर्णा यथा मषीकल्के तथा सर्गे स्थिताः परे ॥ १४५३॥

ENMSS@1454@1अनुत्तमानुभावस्य परैरपिहितौजसः ।

ENMSS@1454@2अकार्यसुहृदोऽस्माकम् अपूर्वास्तव कीर्तयः ॥ १४५४॥

ENMSS@1455@1अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च ।

ENMSS@1455@2प्राप्यते फलमुत्थानाल्लभते चार्थसंपदम् ॥ १४५५॥

ENMSS@1456@1अनु त्वा तात जीवन्तु सुहृदः साधुभिः सह ।

ENMSS@1456@2पर्जन्यमिव भूतानि स्वादुद्रुममिवाण्डजाः ॥ १४५६॥

ENMSS@1457@1अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।

ENMSS@1457@2शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥ १४५७॥

ENMSS@1458@1अनुदितसटावंसौ नातिस्फुटाः करजाङ्कुरा दशनमुकुलोद्भेदः स्तोको मुखे

मृदु गर्जितम् ।

ENMSS@1458@2मृगपतिशिशोर्नास्त्यद्यापि क्रिया स्वकुलोचिता मदकृतमहागन्धस्यान्ध्यं

व्यपोहति दन्तिनाम् ॥ १४५८॥

ENMSS@1459@1अनुदिनमतितीव्रं रोदिषीति त्वमुच्चैः सखि किल कुरुषे त्वं वाच्यतां

मे मुधैव ।

ENMSS@1459@2हृदयमिदमनङ्गाङ्गारसङ्गाद्विलीय प्रसरति बहिरम्भः सुस्थिते

नैतदश्रु ॥ १४५९॥

ENMSS@1460@1अनुदिनमधिकं ते कम्पते कायवल्ली शिव शिव नयनान्तं नाश्रुधारा

जहाति ।

ENMSS@1460@2कथय कथय कोऽयं यत्कृते कोमलाङ्गि त्यजति न परिणद्धं

पाण्डिमानं कपोलः ॥ १४६०॥

ENMSS@1461@1अनुदिनमनुकूलमाचरन्तं विहितमतिः प्रतिकूलमाचरेत् कः ।

ENMSS@1461@2शमितगरलजातकण्ठदाहं शितिकण्ठः शशिनं शिरस्सु धत्ते ॥ १४६१॥

ENMSS@1462@1अनुदुनमनुरक्तः पद्मिनीचक्रवाले नवपरिमलमाद्यच्चञ्चरीकानुकर्षी ।

ENMSS@1462@2कलितमधुरपद्मः कोऽपि गम्भीरवेदी जयति मिहिरकन्याकूलवन्याकरीन्द्रः

॥ १४६२॥

ENMSS@1463@1अनुदिनमभ्यासदृढैः सोढुं दीर्घोऽपि शक्यते विरहः ।

ENMSS@1463@2प्रत्यासन्नसमाग म- मुहूर्तविघ्नोऽपि दुर्विषः ॥ १४६३॥

ENMSS@1464@1अनुदेहमागतवतः प्रतिमां परिणायकस्य गुरुमुद्वहता ।

ENMSS@1464@2मुकुरेण वेपथुभृतोऽतिभरात् कथमप्यपाति न वधूकरतः ॥ १४६४॥

ENMSS@1465@1अनुद्घुष्टः शब्दैरथ च घटनातः स्फुटरसः पदानामर्थात्मा रमयति न तूत्तानितरसः ।
ENMSS@1465@2यथा दृश्यः किंचित्पवनचलचीनांशुकतया स्तनाभोगः स्त्रीणां हरति न तथोन्मुद्रिततनुः ॥ १४६५॥
ENMSS@1466@1अनुनयगुरोर्गोष्ठीबन्धो मुखासवसंपदां शपथविवरं विस्रब्धानां धियां प्रथमातिथिः ।
ENMSS@1466@2अविनयवचोवादस्थानं पुरंध्रिषु पप्रथे मदविलसितस्यैकाचार्यश्चिरं रतिविभ्रमः ॥ १४६६॥
ENMSS@1467@1अनुनयति पतिं न लज्जमाना कथयति नापि सखीजनाय किंचित् ।
ENMSS@1467@2प्रसरति मलयानिले नवोढा वहति परंतु चिराय शून्यमन्तः ॥ १४६७॥
ENMSS@1468@1अनुनयमगृहीत्वा व्याजसुप्ता पराची रुतमथ कृकवाकोस्तारमाकर्ण्य कल्ये ।
ENMSS@1468@2कथमपि परिवृत्ता निद्रयान्धा किल स्त्री मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥ १४६८॥
ENMSS@1469@1अनुनेतुं मानिन्या दयितश्चरणे सरागचरणायाः ।
ENMSS@1469@2यावत् पतितः स तया तत्क्षणमवधीरितः कस्मात् ॥ १४६९॥
ENMSS@1470@1अनुपायेन कर्माणि विपरीतानि यानि च क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥
ENMSS@1471@1अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
ENMSS@1471@2अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १४७१॥
ENMSS@1472@1अनुपोष्य त्रिरात्राणि तिर्थान्यनभिगम्य च ।
ENMSS@1472@2अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते ॥ १४७२॥
ENMSS@1473@1अनुप्रासिनि सन्दर्भे गोनन्दनसमः कुतः ।
ENMSS@1473@2यथार्थनामतैवास्य यद्वा वदति चारुताम् ॥ १४७३॥
ENMSS@1474@1अनुबन्धं क्षयं हिंसाम् अनपेक्ष्य च पौरुषम् ।
ENMSS@1474@2मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ १४७४॥
ENMSS@1475@1अनुबन्धं च संप्रेक्ष्य विपाकांश्चैव कर्मणाम् ।
ENMSS@1475@2उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा ॥ १४७५॥
ENMSS@1476@1अनुबन्धानवेक्षेत सानुबन्धेषु कर्मसु ।
ENMSS@1476@2संप्रधार्य च कुर्वीत न वेगेन समाचरेत् ॥ १४७६॥

ENMSS@1477@1अनुभवं वदनेन्दुरुपागमन् नियतमेष यदस्य महात्मनः ।

ENMSS@1477@2क्षुभितमुत्कलिकातरलं मनः पय इव स्तिमितस्य महोदधेः ॥ १४७७॥

ENMSS@1478@1अनुभवत ददत वित्तं मान्यान् मानयत सज्जनान् भजत ।

ENMSS@1478@2अतिपरुषपवनविलुलित- दीपशिखाचञ्चला लक्ष्मीः ॥ १४७८॥

ENMSS@1479@1अनुभवत युवत्यो भाग्यवत्यो नितान्तं कुसुमवलयवेलासङ्गखेलासुखानि ।

ENMSS@1479@2मम तु मधुकराणां वाटपाटच्चराणां सपदि पतति धाटी पुष्पवाटीनिवेशे ॥ १४७९॥

ENMSS@1480@1अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया ।

ENMSS@1480@2अन्यदासनरज्जुपरिग्रहे भुजलतां जलतामबलाजनः ॥ १४८०॥

ENMSS@1481@1अनुभाववता गुरु स्थिरत्वाद् अविसंवादि धनुर्धनंजयेन ।

ENMSS@1481@2स्वबलव्यसनेऽपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥ १४८१॥

ENMSS@1482@1अनुभूतचरेषु दीर्घिकाणाम् उपकण्ठेषु गतागतैकतानाः ।

ENMSS@1482@2मधुपाः कथयन्ति पद्मिनीनां सलिलैरन्तरितानि कोरकाणि ॥ १४८२॥

ENMSS@1483@1अनुभूतभवव्यवस्थितिर्जनताकानरताभिलाषिणी ।

ENMSS@1483@2तदवैमि सुखेन संसृतौ कलितानङ्गतयैव निसृतिः ॥ १४८३॥

ENMSS@1484@1अनुभूतमिदं लोके यद्बध्वा बलवत्तरैः ।

ENMSS@1484@2ईश्वरैर्दुर्बलः कृष्यः ऋतौ पशुरिवाबलः ॥ १४८४॥

ENMSS@1485@1अनुमतमिवानेतुं जोषं तमीतमसां कुलं दिशि दिशि दृशो विन्यस्यन्त्यः श्रियाङ्कुरिताञ्जनाः ।

ENMSS@1485@2मदनहुतभुग्धूमच्छायैः पटैरसितैर्वृताः प्रययुररसद्भूषैरङ्गैः प्रियानभिसारिकाः ॥ १४८५॥

ENMSS@1486@1अनुमतिसरसं विमुच्य चूतं नवनवमञ्जुलमञ्जरीपरीतम् ।

ENMSS@1486@2अपि पिकदयिते कथं मतिस्ते घटयति निश्फलपिप्पलेऽवलेपम् ॥ १४८६॥

ENMSS@1487@1अनुममार न मार कथं नु सा रतिरतिप्रथितापि पतिव्रता ।

ENMSS@1487@2इयदनाथवधूवधपातकी दयितयापि तयासि किमुज्झितः ॥ १४८७॥

ENMSS@1488@1अनुमरणे व्यवसायं स्त्रीधर्मे कः करोति सविवेकः ।

ENMSS@1488@2संसारमुक्त्युपायं दण्डग्रहणं व्रतं हित्वा ॥ १४८८॥

ENMSS@1489@1अनुययौ विविधोपलकुण्डल- द्युतिवितानकसंवलितांशुकम् ।

ENMSS@1489@2धृतधनुवलयस्य पयोमुचः शबलिमा बलिमानमुषो वपुः ॥ १४८९॥

ENMSS@1490@1अनुयाताने कजनः परपुरुषैरुह्यतेऽस्य निजदेहः ।
ENMSS@1490@2अधिकारस्थः पुरुषः शव इव न शृणोति वीक्षते कुमतिः ॥ १४९०॥
ENMSS@1491@1अनुयाति न भर्तारं यदि दैवात् कथंचन ।
ENMSS@1491@2तथापि शीलं संरक्ष्यं शीलभङ्गात् पतत्यधः ॥ १४९१॥
ENMSS@1492@1अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः ।
ENMSS@1492@2स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥ १४९२॥
ENMSS@1493@1अनुयुक्तो दस्युवधे रणे कुर्यात् पराक्रमम् ।
ENMSS@1493@2नास्य कृत्यमतः किंचिद् अन्यद् दस्युनिबर्हणात् ॥ १४९३॥
ENMSS@1494@1अनुरक्तजनविरक्ता नम्रोत्सिक्ता विरक्तरागिण्यः ।
ENMSS@1494@2वञ्चकवचनासक्ता नार्यः सद्भावशङ्किन्यः ॥ १४९४॥
ENMSS@1495@1अनुरक्तेन हृष्टेन तुष्टेन जगतीपतिः ।
ENMSS@1495@2अल्पेनापि स्वसैन्येन भूमिं जयति भूमिपः ॥ १४९५॥
ENMSS@1496@1अनुरञ्जिता अपि गुणैर्न नमन्ति प्रकृतयो विना दण्डात् ।
ENMSS@1496@2अङ्कगतापि न वीणा कलमधुरमताडिता क्वणति ॥ १४९६॥
ENMSS@1497@1अनुरञ्जय राजानं मा जानन् जातु कोपयेः प्रकृतीः ।
ENMSS@1497@2एतद्द्वयानुराग- स्थिरया तिष्ठ प्रतिष्ठयाश्लिष्टः ॥ १४९७॥
ENMSS@1498@1अनुरागं जनो याति परोक्षे गुणकीर्तनम् ।
ENMSS@1498@2न बिभ्यति च सत्त्वानि सिद्धेर्लक्षणमुत्तमम् ॥ १४९८॥
ENMSS@1499@1अनुरागवती संध्या दिवसस्तत्पुरःसरः ।
ENMSS@1499@2अहो दैवगतिश्चित्रा तथापि न समागमः ॥ १४९९॥
ENMSS@1500@1अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम् ।
ENMSS@1500@2निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥ १५००॥
ENMSS@1501@1अनुरागवर्तिना तव विरहेणोग्रेण सा गृहीताङ्गी ।
ENMSS@1501@2त्रिपुररिपुणेव गौरी वरतनुरर्धावशिष्टेव ॥ १५०१॥
ENMSS@1502@1अनुरागादभिसरतो लङ्घितजलधेः कलाधिनाथस्य ।
ENMSS@1502@2रजनीमुखचुम्बनतः शिथिलितमलकं कलङ्कमाकलये ॥ १५०२॥
ENMSS@1503@1अनुरागो वृथा स्त्रीषु स्त्रीषु गर्वो वृथा तथा ।
ENMSS@1503@2प्रियोऽहम् सर्वदा ह्यस्या ममैषा सर्वदाप्रिया ॥ १५०३॥
ENMSS@1504@1अनुरूपमिदं कूप छद्मच्छन्नस्य किं न ते ।
ENMSS@1504@2सन्मार्गविभ्रमान्मार्गपातोऽयं यन्निपातितः ॥ १५०४॥
ENMSS@1505@1अनुरूपेण संसर्गं प्राप्य सर्वोऽपि मोदते ।

ENMSS@1505@2दिनं तेजोनिधिर्यद्वद् रत्रिं दोषाकरस्तथा ॥ १५०५॥

ENMSS@1506@1अनुलेपनानि कुसुमान्यबलाः कृतमन्यवः पतिषु दीपशिखाः ।

ENMSS@1506@2समयेन तेन चिरसुप्तमनो- भवबोधनं सममबोधिषत ॥ १५०६॥

ENMSS@1507@1अनुलोमेन बलिनं प्रतिलोमेन दुर्जनम् ।

ENMSS@1507@2आत्मतुल्यबलं शत्रुं विनयेन बलेन वा ॥ १५०७॥

ENMSS@1508@1अनुवनं वनराजिवधूमुखे बहलरागजवाधरचारुणि ।

ENMSS@1508@2विकचबाणदलावलयोऽधिकं रुरुचिरे रुचिरेक्षणविभ्रमाः ॥ १५०८॥

ENMSS@1509@1अनुवनमनुयान्तं बाष्पवारि त्यजन्तं मुदितकमलदामक्षाममालोक्य रामम् ।

ENMSS@1509@2दिनमपि रविरोचिस्तापमन्तः प्रपेदे रजनिरपि च ताराबाष्पबिन्दून् बभार

॥ १५०९॥

ENMSS@1510@1अनुवनमनुशैलं तामनालोक्य सीतां प्रतिदिनमतिदीनं वीक्ष्य रामं विरामम् ।

ENMSS@1510@2गिरिरशनिमयोऽयं यस्तदा न द्विधाभूत् क्षितिरपि न विदीर्णा सापि सर्वंसहैव ।

ENMSS@1511@1अनुवादयिता वाद्यं नृत्यसि यत्त्वयि सुरेश्वरः साक्षात् ।

ENMSS@1511@2पक्षश्च तेऽजवन्द्यस्तदसि कलापिन् परं धन्यः ॥ १५११॥

ENMSS@1512@1अनुवेलं निहन्यन्ते यस्य सिन्धोरिवोद्यमाः ।

ENMSS@1512@2तं प्रमथ्य श्रियं कोऽपि विपक्षो भूभृदुद्धरेत् ॥ १५१२॥

ENMSS@1513@1अनुशयवत्येवोक्ता प्रोष्यत्पतिका न भेदतो बहुभिः ।

ENMSS@1513@2परदेशादागच्छत्- पतिकापि यथा प्रमुदितैव ॥ १५१३॥

ENMSS@1514@1अनुशासद्धि धर्मेण व्यवहारेण संस्थया ।

ENMSS@1514@2न्यायेन च चतुर्थेन चतुरन्तां महीं जयेत् ॥ १५१४॥

ENMSS@1515@1अनुशीलितकुञ्जवाटिकायां जघनालंकृतपीतशाटिकायाम् ।

ENMSS@1515@2मुरलीकलकूजिते रतायां मम चेतोऽस्तु कदम्बदेवतायाम् ॥ १५१५॥

ENMSS@1516@1अनुशोचनमस्तविचारमना विगतस्य मृतस्य च यः कुरुते ।

ENMSS@1516@2स गते सलिले तनुते वरणं भुजगस्य गतस्य गतिं क्षिपति ॥ १५१६॥

ENMSS@1517@1अनुष्ठानेन रहितां पाठमात्रेण केवलम् ।

ENMSS@1517@2रञ्जयत्येव या लोकं किं तया शुकविद्यया ॥ १५१७॥

ENMSS@1518@1अनुष्ठितं तु यद् देवैर्ऋषिभिर्यदनुष्ठितम् ।

ENMSS@1518@2नानुष्ठेयं मनुष्यैस्तु तदुक्तं कर्म आचरेत् ॥ १५१८॥
ENMSS@1519@1अनुष्ठितेषु कार्येषु यो गुह्यं न प्रकाशयेत् ।
ENMSS@1519@2स तत्र लभते सिद्धिं जलमध्ये कपिर्यथा ॥ १५१९॥
ENMSS@1520@1अनुसरति करिकपोलं भ्रमरः श्रवणेन ताड्यमानोऽपि ।
ENMSS@1520@2गणयति न तिरस्कारं दानान्धविलोचनो नीचः ॥ १५२०॥
ENMSS@1521@1अनुसर सरस्तीरं वैरं किमत्र सहात्मना कतिपयपयःपाणम् मानिन् समाचर चातक ।
ENMSS@1521@2प्रलयपवनैरस्तं नीतः पुरातनवारिदो यदयमदयं कीलाजालं विमुञ्चति नूतनः ॥ १५२१॥
ENMSS@1522@1अनूढा मन्दिरे यस्य रजः प्राप्नोति कन्यका ।
ENMSS@1522@2पतन्ति पितरस्तस्य स्वर्गस्था अपि तैर्गुणैः ॥ १५२२॥
ENMSS@1523@1अनूनवेगादयमद्वितीयश्छायातुरङ्गादिव लज्जमानः ।
ENMSS@1523@2खुरोद्धुतैर्वीर तुरङ्गमस्ते रजोभिरह्नां पतिमावृणोति ॥ १५२३॥
ENMSS@1523A@1अनृजुत्वमसद्भावं कार्पण्यं चलचित्तता ।
ENMSS@1523A@2पुंसां मित्रेषु ये दोषास्ते वेश्यासु गुणाः स्मृताः ॥
ENMSS@1524@1अनृतं च समुत्कर्षे राजगामि च पैशुनम् ।
ENMSS@1524@2गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥ १५२४॥
ENMSS@1525@1अनृतं चाटुवादश्च धनयोगो महानयम् ।
ENMSS@1525@2सत्यं वैदुष्यमित्येष योगो दारिद्र्यकारकः ॥ १५२५॥
ENMSS@1526@1अनृतं सत्यमित्याहुः सत्यं चापि तथानृतम् ।
ENMSS@1526@2इति यास्ताः कथं वीर संरक्ष्याः पुरुषैरिह ॥ १५२६॥
ENMSS@1527@1अनृतं साहसं माया मूर्खत्वमतिलुब्धता ।
ENMSS@1527@2अशौचत्वं निर्दयत्वं स्त्रीणां दोषाः स्वभावजाः ॥ १५२७॥
ENMSS@1528@1अनृतपटुता क्रौर्ये चित्तं सतामवमानिता मतिरविनये धर्मे शाठ्यं गुरुष्वपि वञ्चनम् ।
ENMSS@1528@2ललितमधुरा वाक्प्रत्यक्षे परोक्षविभाषिणी कलियुगमहाराजस्यैताः स्फुरन्ति विभूतयः ॥ १५२८॥
ENMSS@1529@1अन्त्रमनृतमेतद्यस्तुधासूतिरिन्दुर्नियतमयमनार्यो निर्गतः कालकूटात् ।
ENMSS@1529@2हृदयदहनदक्षा दारुणा चान्यथेयं वद सखि मधुरत्वे मोहशक्तिः कुतोऽस्य ॥ १५२९॥

ENMSS@1530@1अनृते धर्मभग्ने च न शुश्रूषति चाप्रिये ।
ENMSS@1530@2न प्रियं न हितं वाच्यं सद्भिरेवेति निन्दिताः ॥ १५३०॥
ENMSS@1531@1अनेकगतिचित्रितं विविधजातिभेदाकुलं समेत्य तनुमद्गणः प्रचुरचित्रचेष्टोद्यतः ।
ENMSS@1531@2पुरार्जितविचित्रकर्मफलभुग्विचित्रां तनुं प्रगृह्य नटवत् सदा भ्रमति जन्मरङ्गाङ्गणे ॥ १५३१॥
ENMSS@1532@1अनेकचित्तमन्त्रश्च द्वेष्यो भवति मन्त्रिणाम् ।
ENMSS@1532@2अनवस्थितचित्तत्वात् कर्ये तैः समुपेक्ष्यते ॥ १५३२॥
ENMSS@1533@1अनेकजन्मसंभूतं पापं पुंसां प्रणश्यति ।
ENMSS@1533@2स्नानमात्रेण गङ्गायां सद्यः पुण्यस्य भाजनम् ॥ १५३३॥
ENMSS@1534@1अनेकजीवघातोत्थं म्लेच्छोच्छिष्टं मलाविलम् ।
ENMSS@1534@2मलाक्तपात्रनिक्षिप्तं किं शौचं लिहतो मधु ॥ १५३४॥
ENMSS@1535@1अनेकदोषदुष्टस्य कायस्यैको महान् गुणः ।
ENMSS@1535@2यो यथा वर्तयत्येनं तं तथैवानुवर्तते ॥ १५३५॥
ENMSS@1536@1अनेकदोषदुष्टस्य मधुनोऽपास्तदोषताम् ।
ENMSS@1536@2यो ब्रूते तद्रसासक्तः सोऽसत्याम्बुधिरस्तधीः ॥ १५३६॥
ENMSS@1537@1अनेकधेति प्रगुणेन चेतसा विविच्य मिथ्यात्वमलं सदूषणम् ।
ENMSS@1537@2विमुच्य जैनेन्द्रमतं सुखावहं भजन्ति भव्या भवदुःखभीरवः ॥ १५३७॥
ENMSS@1538@1अनेकपर्यायगुणैरुपेतं विलोक्यते येन समस्ततत्त्वम् ।
ENMSS@1538@2तदिन्द्रियानिन्द्रियभेदभिन्नं ज्ञानं जिनेन्द्रैर्गदितं हिताय ॥ १५३८॥
ENMSS@1539@1अनेकभवसंचिता इह हि कर्मणा निर्मिताः प्रियाप्रियवियोगसंगमविपत्तिसंपत्तयः ।
ENMSS@1539@2भवन्ति सकलास्विमा गतिषु सर्वदा देहिनां जरामरणवीचिके जननसागरे मज्ञताम् ॥ १५३९॥
ENMSS@1540@1अनेकमलसंभवे कृमिकुलैः सदा संकुले विचित्रबहुवेदने बुधविनिन्दिते दुःसहे ।
ENMSS@1540@2भ्रमन्नयमनारतं व्यसनसंकटे देहवान् पुरार्जितवशो भवे भवति भामिनीगर्भके ॥ १५४०॥
ENMSS@1541@1अनेकमुखपापात्मा छद्मसंदर्शिताश्रमः ।
ENMSS@1541@2कर्बुरप्रकृतिः कश्चित् कापेयकलहोचितः ॥ १५४१॥

ENMSS@1541A@1अनेकयुद्धविजयी संधानंयस्य गच्छति ।
ENMSS@1541A@2तत्प्रतापेन तस्याशु वशं गच्छन्ति विद्विषः ॥
ENMSS@1542@1अनेकराज्यान्तरितम् अतिक्षिप्तं न युध्यते ।
ENMSS@1542@2अन्तर्गतामित्रशल्यम् अन्तःशल्यं हि न क्षमम् ॥ १५४२॥
ENMSS@1544@1अनेकवर्णपदतां वाग्विद्युदिव बिभ्रती ।
ENMSS@1544@2अभ्रान्तेषु सदा सारसङ्गिषु स्यात् स्फुरद्गुणा ॥ १५४४॥
ENMSS@1545@1अनेकविद्वज्जनरत्नपूर्णं वे दोदकन्यायतरङ्गरम्यम् ।
ENMSS@1545@2अलङ्घनीयं गुरुतीर्थमेकं सभासमुद्रं शिरसा नमामि ॥ १५४५॥
ENMSS@1546@1अनेकशास्त्रं बहु वेदितव्यम् अल्पश्च कालो बह्वश्च विघ्नाः ।
ENMSS@1546@2यत् सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमध्यात् ॥ १५४६॥
ENMSS@1547@1अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
ENMSS@1547@2सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ १५४७॥
ENMSS@1548@1अनेकसुषिरं कान्तं वादि स्त्रीमुखपङ्कजम् ।
ENMSS@1548@2पश्य कान्ते वनस्यान्ते नेत्रश्रुतिमनोरमम् ॥ १५४८॥
ENMSS@1549@1अनेकसुषिरं वाद्यं कान्तं च ऋषिसंज्ञितम् ।
ENMSS@1549@2चक्रिणा च सदाराध्यं यो जानाति स पण्डितः ॥ १५४९॥
ENMSS@1550@1अनेके फणिनः सन्ति भेकह्बक्षणतत्पराः ।
ENMSS@1550@2एक एव हि शेषोऽयं धरणीधरणक्षमः ॥ १५५०॥
ENMSS@1551@1अनेकैर्नायकगुणैः सहितः सखि मे पतिः ।
ENMSS@1551@2स एव यदि जारः स्यात् सफलं जीवितं भवेत् ॥ १५५१॥
ENMSS@1552@1अनेन कल्याणि मृणालकोमलं व्रतेन गात्रं ग्लपयस्यकारणम् ।
ENMSS@1552@2प्रसादमाकाङ्क्षति यस्तवोत्सुकः स किं त्वया दासजनः प्रसाद्यते ॥ १५५२॥
ENMSS@1553@1अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
ENMSS@1553@2कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्ररूढः
॥ १५५३॥
ENMSS@1554@1अनेन किं न पर्याप्तं मांसस्य परिवर्जनम् ।
ENMSS@1554@2यत्पाटितं तृणेनापि स्वमङ्गं परिदूयते ॥ १५५४॥
ENMSS@1555@1अनेन कुम्भद्वयसंनिवेश- संलक्ष्यमाणेन कुचद्वयेन उन्मज्ञता
यौवनवारणेन वापीव तन्वङ्गि तरङ्गितासि ॥
ENMSS@1556@1अनेन तनुमद्यया मुखरनूपुराराविणा नवाम्बुरुहकोमलेन चरणेन

संभावितः ।

ENMSS@1556@2अशोक यदि सद्य एव कुसुमैर्न संपत्स्यसे वृथा वहसि दोहदं ललितकामिसाधारणम् ॥ १५५६॥

ENMSS@1557@1अनेन तव पुत्रस्य प्रसुप्तस्य वनान्तरे ।

ENMSS@1557@2शिखामारुह्य हस्तेन खड्गेन निहतं शिरः ॥ १५५७॥

ENMSS@1558@1अनेन त्वं स्वरूपेण पुष्पबाणैश्च पञ्चभिः ।

ENMSS@1558@2मोहयन् पुरुषान् स्त्रीश्च कुरु सृष्टिं सनातनीम् ॥ १५५८॥

ENMSS@1559@1अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि ।

ENMSS@1559@2त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते ॥ १५५९॥

ENMSS@1560@1अनेन पुरुषो देहान् उपादत्ते विमुञ्चति ।

ENMSS@1560@2हर्षं शोकं भयं दुःखं सुखं चानेन विन्दति ॥ १५६०॥

ENMSS@1561@1अनेन भवति श्रेष्ठो मुच्यन्ते च सभासदः ।

ENMSS@1561@2कर्तारमेनो गच्छेच्च निन्द्यो यत्र हि निन्द्यते ॥ १५६१॥

ENMSS@1562@1अनेन मर्त्यदेहेन यल्लोकद्वयशर्मदम् ।

ENMSS@1562@2विचिन्त्य तदनुष्ठेयं हेयं कर्म ततोऽन्यथा ॥ १५६२॥

ENMSS@1563@1अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन् मनसो रुचिस्ते ।

ENMSS@1563@2सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरंपरासु ॥ १५६३॥

ENMSS@1564@1अनेन योगराजेन धूपिताम्बरभूषणः ।

ENMSS@1564@2धूपिताङ्गस्त्रिभुवनं मनुजः कुरुते वशम् ॥ १५६४॥

ENMSS@1565@1अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् ।

ENMSS@1565@2समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥ १५६५॥

ENMSS@1566@1अनेन रम्भोरु भवन्मुखेन तुषारभानोस्तुलया जितस्य ।

ENMSS@1566@2ऊनस्य नूनं परिपूरणाय ताराः स्फुरन्ति प्रतिमानखण्डाः ॥ १५६६॥

ENMSS@1567@1अनेन वीतरागेण बुद्धेनेवाधरेण ते ।

ENMSS@1567@2दूति निर्व्याजमाख्याता सर्ववस्तुषु शून्यता ॥ १५६७॥

ENMSS@1568@1अनेन सर्वार्थिकृतार्थिता कृता हृतार्थिनौ कामगवीसुरद्रुमौ ।

ENMSS@1568@2मिथःपयःसेचनपल्लवाशनैः प्रदाय दानव्यसनं समाप्नुतम् ॥ १५६८॥

ENMSS@1569@1अनेन सार्धं तव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत् ।

ENMSS@1569@2प्रेमापि तन्वि त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ॥ १५६९॥

ENMSS@1570@1अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।

ENMSS@1570@2द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥ १५७०॥
ENMSS@1571@1अनेन सिध्यति ह्येतन्ममाप्येष पराक्रमः ।
ENMSS@1571@2एवं ज्ञात्वा चरेद्यस्तु सफलास्तस्य बुद्धयः ॥ १५७१॥
ENMSS@1572@1अनेनैव प्रकारेण त्रयो ग्रीवाश्रिताः शुभाः ।
ENMSS@1572@2ललाटे युगलावर्तौ चन्द्रार्कौ शुभकारकौ ॥ १५७२॥
ENMSS@1573@1अनैश्वर्ये तृषा भार्या पथि क्षेत्रे त्रिधा कृषिः ।
ENMSS@1573@2लम्बकः साक्षिणश्चैव पञ्चानर्था असंकृताः ॥ १५७३॥
ENMSS@1574@1अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
ENMSS@1574@2प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ॥ १५७४॥
ENMSS@1575@1अनौचित्येन कन्यासु पुरस्त्रीषु च या रतिः ।
ENMSS@1575@2स कामो हि क्षितीन्द्राणाम् अरिषड्वर्गपूर्वजः ॥ १५७५॥
ENMSS@1576@1अन्तःकटुरपि लघुरपि सद्वृत्तं यः पुमान् न संत्यजति ।
ENMSS@1576@2स भवति सद्यो वन्द्यः सर्षप इव सर्वलोकस्य ॥ १५७६॥
ENMSS@1577@1अन्तःकटु सदा प्रेम मानुषं परिलक्ष्यते ।
ENMSS@1577@2हताशान् न करोत्यस्मान् दैवप्रेमैव केवलम् ॥ १५७७॥
ENMSS@1578@1अन्तःकपालविवरे जिह्वामाकुञ्च्य चार्पयेत् ।
ENMSS@1578@2भ्रूमध्यदृष्टिरमृतं पिबेत् खेचरमुद्रया ॥ १५७८॥
ENMSS@1579@1अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
ENMSS@1579@2आनन्दग्रन्थिरेकोऽयम् अपत्यमिति कथ्यते ॥ १५७९॥
ENMSS@1580@1अन्तःकरणविकारं गुरुपरिजनसंकटेऽपि कुलटानाम् ।
ENMSS@1580@2जानन्ति तदभियुक्ता भ्रूभङ्गापाङ्गमधुरदृष्टेन ॥ १५८०॥
ENMSS@1581@1अन्तःकरणशून्योऽपि तृणपूलकपूरुषः सत्कृतः क्षेत्रपतिना समर्थो मृगवारने ॥
ENMSS@1582@1अन्तः किंचित् किंचिन् मुक्तानामहह विभ्रमं वहसि ।
ENMSS@1582@2दूराद्दर्शयसि पुनः क्षारोद्गारं जडाधीशः ॥ १५८२॥
ENMSS@1583@1अन्तः कुटिलतां बिभ्रच्छङ्खः स खलु निष्ठुरः ।
ENMSS@1583@2हुंकरोति यदा ध्मातस्तदैव बहु गण्यताम् ॥ १५८३॥
ENMSS@1584@1अन्तःकूजदुदारकण्ठमसकृन्मुञ्चेति लोलेक्षणं प्रायः स्मेरकपोलमूलममृतप्रस्यन्दि बिम्बाधरम् ।
ENMSS@1584@2आधूताङ्गुलिपल्लवाग्रमलमित्यानर्तितभ्रूलतं पीतं येन मुखं त्वदीयमबले सोऽहं हि धन्यो युवा ॥ १५८४॥

ENMSS@1584A@1अन्तः केचन केचनापि हि दले केचित् तथा पल्लवे मूले केचन केचन

त्वचि फले पुष्पे च केऽपि द्रुमाः ।

ENMSS@1584A@2सौरभ्यं नितरां बिभर्त्यविकलः श्रीखण्डषण्डीकृतः सर्वाङ्गे

सुरभिर्न कोऽपि ददृशे मुक्त्वा भवन्तं क्वचित् ॥

ENMSS@1585@1अन्तःकोपकषायितेऽपि हृदये साधोरसच्चेष्टितैर्भद्राण्येव बहिः

क्रियासु वचनान्याविर्भवन्त्यर्थतः ।

ENMSS@1585@2मध्येऽत्यन्तकरालवाडवशिखाशोषेऽपि वारांनिधेः कल्लोलाः प्रकटीभवन्ति

सततं मुक्ताफलोद्गारिणः ॥ १५८५॥

ENMSS@1587@1अन्तःक्रूराः सौम्यमुखा अगाधहृदयाः स्त्रियः ।

ENMSS@1587@2अन्तर्विषा बहिःसौम्या भक्ष्या विषकृता इव ॥ १५८७॥

ENMSS@1588@1अन्तः क्रोधोज्झिहानज्वलनभवशिखाकारजिह्वावलीढ- प्रौढब्रह्माण्डभाण्डः

पृथुभुवनगुहागर्भगम्भीरनादः ।

ENMSS@1588@2दृप्यत्पारीन्द्रमूर्तिर्मुरजिदवतु वः सुप्रभामण्डलीभिः

कुर्वन्निर्धूमधूमध्वजनिचितमिव व्योम रोमच्छटानाम् ॥ १५८८॥

ENMSS@1589@1अन्तःखेदमिवोद्वहन् यदनिशं रत्नाकरो घूर्णते यच्च ध्यानमिवास्थितो

न कनकक्षोणीधरः स्यन्दते ।

ENMSS@1589@2जाने दानविलासदानरभसं शौर्यं च ते शुश्रुवान् एको

मन्थविघट्टनास्तदपरष्टङ्काहतीः शङ्कते ॥ १५८९॥

ENMSS@1590@1अन्तःपुरचरैः सार्धं यो न मन्त्रं समाचरेत् ।

ENMSS@1590@2न कलत्रैर्नरेन्द्रस्य स भवेद् राजवल्लभः ॥ १५९०॥

ENMSS@1591@1अन्तःपुरधनाध्यक्षैर्वैरिदूतैर्निराकृतैः ।

ENMSS@1591@2संसर्गं न व्रजेद् राजम् विना पार्थिवशासनात् ॥ १५९१॥

ENMSS@1592@1अन्तःपुराणां विहितव्यवस्थः पदे पदेऽहं स्खलितानि रक्षन् ।

ENMSS@1592@2जरातुरः संप्रति दण्डनीत्या सर्वं नृपस्यानुकरोमि वृत्तम् ॥ १५९२॥

ENMSS@1593@1अन्तःपुरीयसि रणेषु सुतीयसि त्वं पौरं जनं तव सदा रमणीयते श्रीः ।

ENMSS@1593@2दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र- संचारमत्र भुवि संचरसि

क्षितीश ॥ १५९३॥

ENMSS@1594@1अन्तःपुरे पितृतुल्यं मातृतुल्यं महानसे ।

ENMSS@1594@2गोषु चात्मसमं दद्यात् स्वयमेव कृषिं व्रजेत् ॥ १५९४॥

ENMSS@1595@1अन्तःप्रकाशमिच्छन्तः सदसच्च विवेचितुम् ।

ENMSS@1595@2स्नेहं सूक्तिप्रदीपेऽस्मिन् वर्धयन्तु सुबुद्धयः ॥ १५९५॥

ENMSS@1596@1अन्तःप्रतप्तमरुसैकतदह्यमान- मूलस्य चम्पकतरोः क्व विकासचिन्ता ।

ENMSS@1596@2प्रायो भवत्यनुचितस्थितिदेशभाजां श्रेयः स्वजीवपरिपालनमात्रमेव

॥ १५९६॥

ENMSS@1597@1अन्तः प्रविश्य युवचिह्नमुरोऽबलानां येन क्रमेण बत लोडयते मनीषिन् ।

ENMSS@1597@2आश्रित्य तं हि नियमं तत उन्नयेते एतौ कुचौ सपदि हन्ति विदीर्णमध्यात्

॥ १५९७॥

ENMSS@1598@1अन्तःशरीरपरिशोषमुदग्रयन्तः कीटक्षतस्रुतिभिरस्रमिवोद्वमन्तः ।

ENMSS@1598@2छायावियोगमलिना व्यसने निमग्ना वृक्षाः श्मशानमुपगन्तुमिव प्रवृत्ताः

॥ १५९८॥

ENMSS@1599@1अन्तःसंतोषचित्तानां संपदस्ति पदे पदे ।

ENMSS@1599@2अन्तर्मलिनचित्तानां सुखं स्वप्नेऽपि दुर्लभम् ॥ १५९९॥

ENMSS@1600@1अन्तःसंतोषवाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्यन्

अङ्गेनानस्तिरोमा रचयति पुलकश्रेणिमानन्दकन्दाम् ।

ENMSS@1600@2न क्षोणीभङ्गभीरुः कलयति च शिरःकम्पनं तन्न विद्मः

श्रृण्वन्नेतस्य कीर्तीः कथमुरगपतिः प्रीतिमाविष्करोति ॥ १६००॥

ENMSS@1601@1अन्तःसमुत्थविरहानलतीव्रताप- संतापिताङ्ग करिपुङ्गव मुञ्च शोकम् ।

ENMSS@1601@2धात्रा स्वहस्तलिखितानि ललाटपट्टे को वाक्षराणि परिमार्जयितुं समर्थः

॥ १६०१॥

ENMSS@1602@1अन्तः समेत्यापि बहिः प्रयाति स्पृष्टा विधत्ते त्ववगूहनानि ।

ENMSS@1602@2दत्त्वाधरं रोदिति शुष्कमेव सैवं विलासैस्तपसाप्यलभ्या ॥ १६०२॥

ENMSS@1603@1अन्तःसारविहीनानां सहायः किं करिष्यति ।

ENMSS@1603@2मलयेऽपि स्थितो वेणुर्वेणुरेव न चन्दनः ॥ १६०३॥

ENMSS@1604@1अन्तःसारविहीनानाम् उपदेशो न जायते ।

ENMSS@1604@2मलयाचलसंसर्गान् न वेणुश्चन्दनायते ॥ १६०४॥

ENMSS@1605@1अन्तःसारैरकुटिलैस्सुस्निग्धैः सुपरीक्षितैः ।

ENMSS@1605@2मन्त्रिभिर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरम् ॥ १६०५॥

ENMSS@1606@1अन्तःसारोऽपि निर्याति नूनमर्थितया सह ।
ENMSS@1606@2अन्यथा तदवस्थस्य महिमा केन देहिनाम् ॥ १६०६॥
ENMSS@1607@1अन्तःस्थसुरतारम्भा भिलाषमपि गोपयत् ।
ENMSS@1607@2अन्योन्यं मिथुनं वेत्ति नेत्रे दृष्ट्वैव चञ्चले ॥ १६०७॥
ENMSS@1608@1अन्तःस्थेनाविरुद्धेन सुवृत्तेनातिचारुणा ।
ENMSS@1608@2अन्तर्भिन्नेन संप्राप्तं मौक्तिकेनापि बन्धनम् ॥ १६०८॥
ENMSS@1609@1अन्तःस्वीकृतजाह्नवीजलमतिस्वच्छन्दरत्नांकुर-
श्रेणीशोणभुजङ्गनायकफणाचक्रोल्लसत्पल्लवम् ।
ENMSS@1609@2भूयादभ्युदयाय मोक्षनगरप्रस्थानभाजामितः
प्रत्यूहप्रशमैकपूर्णकलशप्रायं शिरो धूर्जटेः ॥ १६०९॥
ENMSS@1610@1अन्तकः पर्यवस्थाता जन्मिनः संततापदः ।
ENMSS@1610@2इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥ १६१०॥
ENMSS@1611@1अन्तकः शमनो मृत्युः पातालं वडवामुखम् ।
ENMSS@1611@2क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ॥ १६११॥
ENMSS@1612@1अन्तकाय ददता त्वया प्रिया- कायकाञ्चनलताप्रतिग्रहम् ।
ENMSS@1612@2दीयते बत मदीयजीवनं दक्षिणानिल कुतो न दक्षिणा ॥ १६१२॥
ENMSS@1613@1अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
ENMSS@1613@2यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ १६१३॥
ENMSS@1614@1अन्तकाले हि भूतानि मुह्यन्तीति पुराश्रुतिः ।
ENMSS@1614@2राज्ञैवं कुर्वता लोके प्रत्यक्षा सा श्रुतिः कृता ॥ १६१४॥
ENMSS@1615@1अन्तकोऽपि हि जन्तूनाम् अन्तकालमपेक्षते ।
ENMSS@1615@2न कालनियमः कश्चिद् उत्तमर्णस्य विद्यते ॥ १६१५॥
ENMSS@1616@1अन्तरं कियदाख्यान्ति सन्तो रघुकिरातयोः ।
ENMSS@1616@2अन्तरं तावदाख्यान्ति सन्तो रघुकिरातयोः ॥ १६१६॥
ENMSS@1617@1अन्तरङ्गमनङ्गस्य शृङ्गारकुलदैवतम् ।
ENMSS@1617@2अङ्गीकरोति तन्वङ्गी सा विलासमयं वयः ॥ १६१७॥
ENMSS@1618@1अन्तरङ्गा हि ये राज्ञः परस्वादायिनः शठाः ।
ENMSS@1618@2भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः ॥ १६१८॥
ENMSS@1619@1अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
ENMSS@1619@2तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥ १६१९॥
ENMSS@1620@1अन्तर्गतमलो दुष्टस्तीर्थस्नानशतैरपि ।

ENMSS@1620@2न शुध्यति यथा भाण्डं सुराया दाहितं च सत् ॥ १६२०॥

ENMSS@1621@1अन्तर्गता मदनवह्निशिखावली या सा बाध्यते किमिह चन्दनपङ्कलेपैः
।

ENMSS@1621@2यत्कुम्भकारपचनोपरि पङ्कलेपस्तापाय केवलमसौ न च तापशान्त्यै

॥ १६२१॥

ENMSS@1622@1अन्तर्गतैर्गुणैः किं द्वित्रा अपि यत्र साक्षिणो विरलाः ।

ENMSS@1622@2स गुणो गीतेर्यदसौ वनेचरं हरिणमपि हरति ॥ १६२२॥

ENMSS@1623@1अन्तर्गतो यदि हरिस्तपसा ततः किं नान्तर्गतो यदि हरिस्तपसा ततः किम् ।

ENMSS@1623@2अन्तर्बहिर्यदि हरिस्तपसा ततः किं नान्तर्बहिर्यदि हरिस्तपसा ततः किम्

॥ १६२३॥

ENMSS@1624@1अन्तर्गाढं चिह्नहीनं विशालं मध्ये स्थूलं स्थूलधारातितीक्ष्णम् ।

ENMSS@1624@2रक्षोवक्षश्छेदनार्थं महान्तं कृत्वा खड्गं देवराजोतिहृष्टः

॥ १६२४॥

ENMSS@1625@1अन्तर्गूढानर्थान् अव्यञ्जयतः प्रसादरहितस्य ।

ENMSS@1625@2संदर्भस्य नदस्य च न रसः प्रीत्यै रसज्ञानाम् ॥ १६२५॥

ENMSS@1626@1अन्तर्गृहं नयति वर्धितरोमहर्षं स्पर्शेन सीत्करणगर्भमुखीः

करोति ।

ENMSS@1626@2किंचाधरव्रणवतीः कुरुते पुरन्ध्रीः किं वल्लभः किमुत हैमन एष

वातः ॥ १६२६॥

ENMSS@1627@1अन्तर्गृहे कृष्णमवेक्ष्य चौरं बद्ध्वा कवाटं जननीं गतैका ।

ENMSS@1627@2उलूखले दामनिबद्धमेनं तत्रापि दृष्ट्वा स्तिमिता बभूव ॥ १६२७॥

ENMSS@1628@1अन्तर्जलावारितमूर्ति यातो बालापरिष्वङ्गसुखाय पत्युः ।

ENMSS@1628@2विघ्नाय वैमल्यमपां बभूव व्यर्थः प्रसादो हि जलाशयानाम् ॥ १६२८॥

ENMSS@1629@1अन्तर्दधानापि कठोरभावं स्वच्छद्युतिः सा निजमाधुरीभिः ।

ENMSS@1629@2भुक्ता रसं स्वादुविदां तनोति गुणोपगूढा सितशर्करेव ॥ १६२९॥

ENMSS@1630@1अन्तर्दुष्टः क्षमायुक्तः सर्वानर्थकरः किल ।

ENMSS@1630@2शकुनिः शकटारश्च दृष्टान्तावत्र भूपते ॥ १६३०॥

ENMSS@1631@1अन्तर्धृतगुणैरेव परेषां स्थीयते हृदि ।

ENMSS@1631@2अर्थं समर्थयन्त्येनं समग्रं कुसुमस्रजः ॥ १६३१॥

ENMSS@1632@1अन्तर्नाडीनियमितमरुल्लङ्घितब्रह्मरन्ध्रं स्वान्ते शान्तिप्रणयिनि समुन्मीलदानन्दसान्द्रम् ।
ENMSS@1632@2प्रत्यग्ज्योतिर्जयति यमिनः स्पष्टलालाटनेत्र- व्याजव्यक्तीकृतमिव जगद्व्यापि चन्द्रार्धमौलेः ॥ १६३२॥
ENMSS@1633@1अन्तर्निदह्यमानेन शक्तिहीनेन शत्रुषु ।
ENMSS@1633@2संततिः क्रियते येन निन्द्यं धिक्तस्य जीवितम् ॥ १६३३॥
ENMSS@1634@1अन्तर्निबद्धगुरुमन्युपरंपराभिरिच्चोचितं किमपि वक्तुमशक्नुवत्याः ।
ENMSS@1634@2अव्यक्तहूंकुतिचलत्कुचमण्डलायास्तस्याः स्मरामि मुहुरर्धविलोकितानि ॥ १६३४॥
ENMSS@1635@1अन्तर्बलान्यहममुष्य मृगाधिपस्य वाचा निगद्य कथमद्य लघूकरोमि ।
ENMSS@1635@2जानन्ति किं न करजक्षतकुम्भिकुम्भा- दामुक्तमौक्तिकमयानि दिगन्तराणि ॥ १६३५॥
ENMSS@1636@1अन्तर्भावनिगूधेयं वाक्ते प्रकृतिपेशला ।
ENMSS@1636@2विकाराद्यनभिज्ञेया विषदिग्धेव वारुणी ॥ १६३६॥
ENMSS@1637@1अन्तर्भूतो निवसति जडे जडः शिशिरमहसि हरिण इव ।
ENMSS@1637@2अजडे शशीव तपने स तु प्रविष्टोऽपि निःसरति ॥ १६३७॥
ENMSS@1638@1अन्तर्भूय प्रभोः प्राप्यो विशेषः सर्वथा बुधैः ।
ENMSS@1638@2को हि नाम न कुर्वीत केवलोदरपूरणम् ॥ १६३८॥
ENMSS@1639@1अन्तर्मग्नकरेणवः कलभकव्यारुग्णकन्दाङ्कुरैः सामोदाः परितः प्रमत्तमहिषश्वासोल्लसद्वीचयः ।
ENMSS@1639@2संमोदं जनयन्ति शैलसरितः सुच्छायकच्छस्थली- सीमानो जलसेकशीतलशिलानिद्राणरोहिद्गणाः ॥ १६३९॥
ENMSS@1640@1अन्तर्मन्युविभिन्नदीर्घरसितप्रोद्भूतकण्ठव्यथैराक्रुष्टास्तटिनीषु कोकमिथुनैर्यावन्निशीथं मिथः ।
ENMSS@1640@2शीतोन्नागरजम्बुकौघमुखरग्रामोपकण्ठस्थलाः कृच्छ्रेणोपरमन्ति पान्थगृहिणीचिन्तायता रात्रयः ॥ १६४०॥
ENMSS@1641@1अन्तर्मलिनदेहेन बहिराह्लादकारिणा ।
ENMSS@1641@2महाकालफलेनेव कः खलेन न वञ्चितः ॥ १६४१॥
ENMSS@1642@1अन्तर्मलिनसंसर्गाच्छ्रुतवानपि दुष्यति ।
ENMSS@1642@2यच्चक्षुःसंनिकर्षेण कर्णोऽभूत् कुटिलाश्रयः ॥ १६४२॥
ENMSS@1643@1अन्तर्मलीमसे वक्रे चले कर्णान्तसर्पिणि तस्या नेत्रयुगे दृष्टे दुर्जने

च कुतः सुखम् ॥

ENMSS@1644@1अन्तर्माररसार्द्रा गुरुगुणबद्धानुकूलतां धत्ते ।

ENMSS@1644@2निष्ठुरबाह्याकारा दृतिरिव पतिसंनिधौ नव्या ॥ १६४४॥

ENMSS@1645@1अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविभ्रंशनः

स्तम्भाकर्षणदृप्तिहर्षणमहामन्त्रः कुरङ्गीदृशाम् ।

ENMSS@1645@2दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंशः

कंसरिपोर्विलोपयतु वोऽश्रेयांसि वंशीरवः ॥ १६४५॥

ENMSS@1646@1अन्तर्ये सततं लुथन्त्यगणितास्तानेव

पाथोधरैरात्तानापततस्तरङ्गवलयैरालिङ्ग्य गृह्णन्नसौ ।

ENMSS@1646@2व्यक्तं मौक्तिकरत्नतां जलकणान्संप्रापयत्यम्बुधिः प्रायोऽन्येन कृतादरो

लघुरपि प्राप्तोऽर्च्यते स्वामिभिः ॥ १६४६॥

ENMSS@1647@1अन्तर्लीनभुजंगमं गृहमिवान्तःस्थोग्रसिंहं वनं

ग्राहाकीर्णमिवाभिरामकमलच्छायासनाथं सरः ।

ENMSS@1647@2कालेनार्यजनापवादपिशुनैः क्षुद्रैरनार्यैः श्रितं दुःखेन प्रविगाह्यते

सचकितं राज्ञां मनः सामयम् ॥ १६४७॥

ENMSS@1648@1अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः ।

ENMSS@1648@2उत्पीड इव धूमस्य मोहः प्रागावृणोति माम् ॥ १६४८॥

ENMSS@1649@1अन्तर्वसति मार्जारी शुनी वा राजवेश्मनि ।

ENMSS@1649@2बहिर्बद्धोऽपि मातङ्गस्ततः किं लघुतां गतः ॥ १६४९॥

ENMSS@1650@1अन्तर्वहसि कषायं बाह्याकारेण मधुरतां यासि ।

ENMSS@1650@2सहकार मायिविटपिन् युक्तं लोकैर्बहिर्नीतः ॥ १६५०॥

ENMSS@1651@1अन्तर्बहिस्त्रिजगतीरसभावविद्वान् यो नर्तयत्यखिलदेहभृतां कुलानि ।

ENMSS@1651@2क्षेमं ददातु भगवान् परमादिदेवः शृङ्गारनाटकमहाकविरात्मजन्मा ॥ १६५१॥

ENMSS@1652@1अन्तर्वाणिं मन्यमानः खलोऽयं पौरोभाग्यं सूक्तिमुक्तासु धत्ते ।

ENMSS@1652@2सर्वानन्दिन्यङ्गके कामिनीनाम् ईर्म मार्गत्येष वै बम्भरालिः ॥ १६५२॥

ENMSS@1653@1अन्तर्विशति मार्जारी शुनी वा राजवेश्मनि ।

ENMSS@1653@2बहिःस्थस्य गजेन्द्रस्य किमर्थः परिहीयते ॥ १६५३॥

ENMSS@1654@1अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः ।

ENMSS@1654@2गुञ्जाफलसमाकारा योषितः केन निर्मिताः ॥ १६५४॥

ENMSS@1655@1अन्तर्विष्णोस्त्रिलोकी निवसति फणिनामीश्वरे सोऽपि शेते सिन्धोः सोऽप्येकदेशे

तमपि चुलुकयां कुम्भयोनिश्चकार ।

ENMSS@1655@2धत्ते खद्योतलीलामयमपि नभसि श्रीनृसिंहक्षितीन्द्र त्वत्कीर्तेः

कर्णनीलोत्पलमिदमपि च प्रेक्षणीयं विभाति ॥ १६५५॥

ENMSS@1656@1अन्तर्हिते शशिनि सैव कुमुद्वती मे दृष्टिं न नन्दयति

संस्मरणीयशोभा ।

ENMSS@1656@2इष्टप्रवासजनितान्यबलाजनेन दुःखानि नूनमतिमात्रदुरुद्वहानि ॥ १६५६॥

ENMSS@1657@1अन्तश्छिद्राणि भूयंसि कण्टका बहवो बहिः ।

ENMSS@1657@2कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः ॥ १६५७॥

ENMSS@1658@1अन्तश्छिद्रैरियमधिगता दुस्त्यजा

दुष्टवंशैरत्यासक्तिर्निजकुलशुभोदर्कलाभाय न स्यात् ।

ENMSS@1658@2किं तु ग्रीष्मश्वसनजनितान्योन्यसंघर्षवह्नि-

ज्वालामालाजटिलवपुषामात्मनां नाशनाय ॥ १६५८॥

ENMSS@1659@1अन्तस्तव स ज्वलनो भीमा मकराश्च सर्वतो विकटाः ।

ENMSS@1659@2अथ बत विषमयमङ्गम् तदिति निषेव्यः कथं भवेर्जलधे ॥ १६५९॥

ENMSS@1660@1अन्तस्तारं तरलिततलाः स्तोकमुत्पीडभाजः पक्ष्माग्रेषु ग्रथितपृषतः

कीर्णधाराः क्रमेण ।

ENMSS@1660@2चित्तातङ्कं निजगरिमतः सम्यगासूत्रयन्तो निर्यान्त्यस्याः कुवलयदृशो

बाष्पवारां प्रवाहाः ॥ १६६०॥

ENMSS@1661@1अन्तस्तिमिरनाशाय शाब्दबोधो निरर्थकः ।

ENMSS@1661@2न नश्यति तमो नाम कृतया दीपवार्तया ॥ १६६१॥

ENMSS@1662@1अन्तस्तृष्णोपतप्तानां दावदाहमयं जगत् ।

ENMSS@1662@2भवत्यखिलजन्तूनां यदन्तस्तद्बहिः स्थितम् ॥ १६६२॥

ENMSS@1663@1अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले ।

ENMSS@1663@2निःसृतस्तिमिरभारनिरोधाद् उच्छ्वसन्निव रराज दिगन्तः ॥ १६६३॥

ENMSS@1664@1अन्तेनार्जुनतां दधाति नयनं मध्ये तथा कृष्णतां द्वैरूप्यं

दधतामुना विरचितः कर्णेन ते विग्रहः ।

ENMSS@1664@2तत्कर्णार्जुनकृष्णविग्रहवती साक्षात् कुरुक्षेत्रतां यातासि त्वदवाप्तिरेव

तरुणि श्रेयः परं गण्यते ॥ १६६४॥

ENMSS@1665@1अन्तेषु रेमिरे धीरा नते मध्येषु रेमिरे ।

ENMSS@1665@2अन्तप्राप्तिं सुखामाहुर्दुःखमन्तरमन्तयोः ॥ १६६५॥
ENMSS@1666@1अन्ते सन्तोषदं विष्णुं स्मरेत् हन्तारमापदाम् ।
ENMSS@1666@2शरतल्पगतो भीष्मः सस्मार गरुडध्वजम् ॥ १६६६॥
ENMSS@1667@1अन्तो नाश्चर्यजातस्य जततो दृश्यते क्वचित् ।
ENMSS@1667@2क्षुद्राहंभावसीमाया यावतीं मुक्तिमाप्नुमः ।
ENMSS@1667@3आश्चर्याणि हि तावन्ति प्रकाशानि भवन्ति नः ॥ १६६७॥
ENMSS@1668@1अन्तो नास्ति पिपासायाः संतोषः परमं सुखम् ।
ENMSS@1668@2तस्मात् संतोषमेवेह धनं पश्यन्ति पण्डिताः ॥ १६६८॥
ENMSS@1669@1अन्त्यजोऽपि नरः पूज्यो यस्यास्ति विपुलं धनम् ।
ENMSS@1669@2अपि ब्रह्मकुले जातो निर्धनः परिभूयते ॥ १६६९॥
ENMSS@1670@1अन्त्यजोऽपि यदा साक्षी विवादे संप्रजायते ।
ENMSS@1670@2न तत्र युज्यते दिव्यं किं पुनर्वनदेवताः ॥ १६७०॥
ENMSS@1671@1अन्त्यावस्थागतोऽपि महान् स्वगुणाञ्जहाति न शुद्धतया ।
ENMSS@1671@2न श्वेतभावमुज्झति शङ्खः शिखिभुक्तमुक्तोऽपि ॥ १६७१॥
ENMSS@1672@1अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराधोषयन्त्यम्बरम् ।
ENMSS@1672@2पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥ १६७२॥
ENMSS@1673@1अन्त्राकल्पचलत्पयोधरभरव्याविद्धमेघच्छटा-
सृक्कस्थामिषगृध्नुगृध्रगरुदास्फालोच्चलन्मूर्धजा ।
ENMSS@1673@2व्यादायाननमट्टहासविकटं दूरेण तारापथात्
त्रस्यत्सिद्धपुरंध्रिवृन्दरभसोन्मुक्तादुपक्रामति ॥ १६७३॥
ENMSS@1674@1अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल- व्यक्तोत्तंसभृतः पिनह्य सहसा हृत्पुण्डरीकस्रजः ।
ENMSS@1674@2एताः शोणितपङ्ककुङ्कुमजुषः संभूय कान्तैः पिबन्त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥ १६७४॥
ENMSS@1675@1अन्त्रैः स्वैरपि संयताग्रचरणो मूर्च्छाविरामक्षणे
स्वाधीनव्रणिताङ्गशस्त्रनिचितो रोमोद्गमं वर्मयन् ।
ENMSS@1675@2भग्नानुद्वलयन्निजान् परभटान् संतर्जयन् निष्ठुरं धन्यो धाम
जयश्रियः पृथुरणस्तम्भे पताकायते ॥ १६७५॥
ENMSS@1676@1अन्दूमुद्धूय बद्धां निजमपि सहसा सूतमुन्मथ्य सद्यो

निर्यातस्त्रस्तवाजिव्रजकृतनिनदाकर्णनक्रुद्धचेताः ।
ENMSS@1676@2संरम्भारम्भभग्नद्रुमविटपशतैः प्रोथयन्नापनस्थान् आयाति व्यालनागस्त्वरितमिह जनाः सावधाना भवन्तु ॥ १६७६॥
ENMSS@1677@1अन्धं तमश्चेदयि बाधते त्वां सरोजनेत्रं जगदेकसूत्रम् ।
ENMSS@1677@2सुधाचरित्रम् परमं पवित्रं कुरुष्व मित्रं वसुदेवपुत्रम् ॥ १६७७॥
ENMSS@1678@1अन्धं दरिद्रितमपि प्रियया विहीनं वीक्ष्येश्वरे वदति या च वरं त्वमेकम् ।
ENMSS@1678@2नेत्रे न नापि वसु नो वनितां स वव्रे छत्राभिरामसुतदर्शनमित्युवाच ॥ १६७८॥
ENMSS@1679@1अन्धं पतिं प्राप्य विलासिनीनां कटाक्षबाणा विफला भवन्ति ।
ENMSS@1679@2तद्वत् कुजादित्यशनैश्चराणां न वारदोषाः प्रभवन्ति रात्रौ ॥ १६७९॥
ENMSS@1680@1अन्धः स एव श्रुतवर्जितो यः शठः स एवार्थिनिरर्थको यः ।
ENMSS@1680@2मृतः स एवास्ति यशो न यस्य धर्मे न धीर्यस्य स एव शोच्यः ॥ १६८०॥
ENMSS@1681@1अन्धः स्यादन्धवेलायां बाधिर्यमपि चाश्रयेत् ।
ENMSS@1681@2कुर्यात् तृणमयं चापं शयीत मृगशायिकाम् ॥ १६८१॥
ENMSS@1682@1 सान्त्वादिभिरुपायैस्तु हन्याच्छत्रुं वशे स्थितम् ।
ENMSS@1682@2दया तस्मिन् न कर्त्तव्या शरणागत इत्युत ॥ १६८२॥
ENMSS@1683@1अन्धकं कुब्जकं चैव कुष्ठाङ्गं व्याधिपीडितम् ।
ENMSS@1683@2आपद्गतं च भर्तारं न त्यजेत् सा महासती ॥ १६८३॥
ENMSS@1684@1अन्धकः कुब्जकश्चैव त्रिस्तनी राजकन्यका ।
ENMSS@1684@2त्रयोऽप्यन्यायतः सिद्धाः संमुखे कर्मणि स्थिते ॥ १६८४॥
ENMSS@1685@1अन्धकः कुब्जकश्चैव राजकन्या च त्रिस्तनी ।
ENMSS@1685@2अनयोऽपि नयं याति यावच्छ्रीर्भजते नरम् ॥ १६८५॥
ENMSS@1686@1अन्धकः कुब्जकश्चैव राजकन्या च त्रिस्तनी ।
ENMSS@1686@2सानुकूले जगन्नाथे विपरीतः सुयुग्भवेत् ॥ १६८६॥
ENMSS@1687@1अन्धकारगरलं यतो जगन्- मोहकारि भृशमत्ति नित्यशः ।
ENMSS@1687@2उज्ज्वलं जठरमोषधीपतेरञ्जनाभमभवत् ततः प्रिये ॥ १६८७॥
ENMSS@1688@1अन्धकाराङ्कुरो जज्ञे ववृधे चाविलम्बितम् ।
ENMSS@1688@2भीमेन रममाणाया हिडिम्बाया इवात्मजः ॥ १६८८॥
ENMSS@1689@1अन्धत्वमन्धसमये बधिरत्वं बह्दिरकाल आलम्ब्य ।

ENMSS@1689@2श्रीकेशवयोः प्रणयी परमेष्ठी नाभिवास्तव्यः ॥ १६८९॥

ENMSS@1690@1अन्धद्वये महानन्धो विषयान्धीकृतेक्षणः ।

ENMSS@1690@2चक्षुषान्धो न जानाति विषयान्धो न केनचित् ॥ १६९०॥

ENMSS@1691@1अन्धस्य दर्पणेनेव हितेनेव हतश्रुतेः ।

ENMSS@1691@2दुःखाभितप्तः शोकेन नेक्षते न श‍ृणोति च ॥ १६९१॥

ENMSS@1692@1अन्धस्य पन्था बधिरस्य पन्थाः स्त्रियः पन्था वैवधिकस्य पन्थाः ।

ENMSS@1692@2राज्ञः पन्था ब्राह्मणेनासमेत्य समेत्य तु ब्राह्मणस्यैव पन्थाः ॥ १६९२॥

ENMSS@1693@1अन्धस्य मे हृतविवेकमहाधनस्य चौरैर्विभो बलिभिरिन्द्रियनामधेयैः ।

ENMSS@1693@2मोहान्धकूपकुहरे विनिपातितस्य देवेश देहि कृपणस्य करावलम्बम् ॥ १६९३॥

ENMSS@1694@1अन्धा इव न पश्यन्ति योग्यायोग्यं हिताहितम् ।

ENMSS@1694@2पथा तेनैव गच्छन्ति नीयन्ते येन पार्थिवाः ॥ १६९४॥

ENMSS@1695@1अन्धा इव बधिरा इव मूका इव मोहभाज इव ।

ENMSS@1695@2पङ्गव इवानभिमते नृपतेर्निवसन्ति साधवः सदसि ॥ १६९५॥

ENMSS@1696@1अन्धा विद्वज्जनैर्हीना मूका कविभिरुज्झिता ।

ENMSS@1696@2बधिरा गायनैर्हीना सभा भवति भूभृताम् ॥ १६९६॥

ENMSS@1697@1अन्धीकरोमि भुवनं बधिरीकरोमि धीरं सचेतनमचेतनतां नयामि ।

ENMSS@1697@2कृत्यं न पश्यति न येन हितं श‍ृणोति धीमानधीतमपि न प्रतिसंदधाति ॥ १६९७॥

ENMSS@1697A@1अन्धे तमसि मज्जामः पशुभिर्ये यजामहे ।

ENMSS@1697A@2अहिंसायाः परो धर्मो न भूतो न भविष्यति ॥

ENMSS@1698@1अन्दोऽप्यन्योक्तपथो दण्डधृगन्योपचरणीयः ।

ENMSS@1698@2राजत्वप्रतिहतैर्जनानुरागैर्भरति भूपः ॥ १६९८॥

ENMSS@1699@1अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह ।

ENMSS@1699@2यो भाषतेऽर्थवैकल्यम् अप्रत्यक्षं सभां गतः ॥ १६९९॥

ENMSS@1700@1अन्धो वा वधिरो वाथ कुष्टी वाप्यन्त्यजोऽपि वा ।

ENMSS@1700@2परिगृह्णातु तां कन्यां सलक्षां स्याद् विदेशगः ॥ १७००॥

ENMSS@1701@1अन्धो हि राजा भवति यस्तु शास्त्रविवर्जितः ।

ENMSS@1701@2अन्धः पश्यति चारेण शास्त्रहीनो न पश्यति ॥ १७०१॥

ENMSS@1702@1अन्ध्रीनीरन्ध्रपीनस्तनतटलुठनायासमन्दप्रचाराश्चारूनुल्लासयन्तो

द्रविडनरवधूहारिधम्मिल्लभारान् ।
ENMSS@1702@2जिघ्रन्तः सिंहलीनां मुखकमलमलं केरलीनां कपोलं चुम्बन्तो वान्ति मन्दं मलयपरिमला वायवो दाक्षिणात्याः ॥ १७०२॥
ENMSS@1703@1अन्नं किंशुकपुष्पपुञ्जसदृशं पाषाणजालैर्युतं धूम्यं गन्धयुतं च जालमखिलं भग्नाश्च दन्तालयः ।
ENMSS@1703@2आज्यं दूरतरं न चापि लवणं न श्रूयते तिन्त्रिणी भक्ष्याणां वचनं च नास्ति हि सखे तद्भोजनं वर्णये ॥ १७०३॥
ENMSS@1704@1अन्नं दद्यादतिथये श्रद्धया स्वर्गदं हि तत् ।
ENMSS@1704@2सकुटुम्बो दिशन्नन्नं सक्तुप्रस्थो दिवंगतः ॥ १७०४॥
ENMSS@1705@1अन्नं धान्यं वसु वसुमतीत्युत्तरेणोत्तरेण व्याकृष्यन्ते परमकृपणाः पामरा यद्वदित्यम् ।
ENMSS@1705@2भूमिः खं द्यौर्द्रुहिणगृहमित्युत्तरेणोत्तरेण व्यामोह्यन्ते विमलमतयोऽप्यस्थिरेणैव धाम्ना ॥ १७०५॥
ENMSS@1706@1अन्नं नास्त्युदकं नास्ति नास्ति ताम्बूलचर्वणम् ।
ENMSS@1706@2मन्दिरेषुमहोत्साहः शुष्कचर्मस्य (?) ताडनम् ॥ १७०६॥
ENMSS@1707@1अन्नं मुक्तासुवर्णं द्रवगुणरहिताः स्वर्णरूपाश्च सूपाः सामोदाः शाकभेदाः फलगुडमिलिताः पायसम् ॥। ।
ENMSS@1707@2यावद्भोज्यं तदाज्यं दधि कथिनतरं नैकरूपास्त्वपूपाः भुज्यन्ते भूसुरौधैर्महति तव गृहे रामचन्द्रस्य तृप्त्यै ॥ १७०७॥
ENMSS@1708@1अन्नं विधात्रा विहितं मर्त्यानां जीवधारणम् ।
ENMSS@1708@2तदनादृत्य मतिमान् प्रार्थयेन्न तु किंचन ॥ १७०८॥
ENMSS@1709@1अन्नं संप्रोक्ष्य गायत्र्या सत्यं त्वर्तेति मन्त्रतः ।
ENMSS@1709@2ऋतं त्वेति च सायं तु परिषिश्चेत् प्रदक्षिणम् ॥ १७०९॥
ENMSS@1710@1अन्नं हि प्राणिनां प्राणा आर्तानां शरणं त्वहम् ।
ENMSS@1710@2धर्मो वित्तं नृणां प्रेत्य सन्तोऽर्वाग् बिभ्यतोऽरणम् ॥ १७१०॥
ENMSS@1711@1अन्नजा भुवि मर्त्यानां श्रमजा वा कथंचन ।
ENMSS@1711@2सैषा भवति लोकस्य निद्रा सर्वस्य लौकिकी ॥ १७११॥
ENMSS@1712@1अन्नदाता भयत्राता कन्यादाता तथैव च ।
ENMSS@1712@2जनिता चोपनेता च पश्चैते पितरः स्मृताः ॥ १७१२॥
ENMSS@1713@1अन्नदानं महादानं विद्यादानं महत्तरम् ।
ENMSS@1713@2अन्नेन क्षणिका तृप्तिर्यावज्जीवं तु विद्यया ॥ १७१३॥

ENMSS@1714@1अन्नदानात् परं दानं न भूतं न भविष्यति ।
ENMSS@1714@2अन्नेन धार्यते सर्वं जगदेतच्चराचरम् ॥ १७१४॥
ENMSS@1715@1अन्नदाहे हरेन्मांसम् अम्बुदाहे च शोणितम् ।
ENMSS@1715@2कामदाहे हरेन्नेत्रम् अनिद्रा रोगकारिणी ॥ १७१५॥
ENMSS@1716@1अन्नदो जलदश्चैव आतुरस्य चिकित्सकः ।
ENMSS@1716@2त्रयस्ते स्वर्गमायान्ति विना यज्ञेन भारत ॥ १७१६॥
ENMSS@1717@1अन्नपानं विषाद्रक्षेद् विशेषेण महीपतेः ।
ENMSS@1717@2योगक्षेमौ तदायत्तौ धर्माद्या यन्निबन्धनाः ॥ १७१७॥
ENMSS@1718@1अन्नपानादिभिश्चैव वस्त्रालंकारभूषणैः ।
ENMSS@1718@2गन्धमाल्यैर्विचित्रैश्च गुरुं तत्र प्रपूजयेत् ॥ १७१८॥
ENMSS@1719@1अन्नपानानि जीर्यन्ते यत्र भक्षाश्च भक्षिताः ।
ENMSS@1719@2तस्मिन्नेवोदरे गर्भः किं नाम न विजीर्यते ॥ १७१९॥
ENMSS@1720@1अन्नप्रणाशे सीदन्ति शरीरे पञ्च धातवः ।
ENMSS@1720@2आहारात् सर्वभूतानि संभवन्ति महीतले ॥ १७२०॥
ENMSS@1721@1अन्नमूलं बलं पुंसां बलमूलं हि जीवनम् ।
ENMSS@1721@2तस्माद् यत्नेन संरक्षेद् बलं च कुशलो भिषक् ॥ १७२१॥
ENMSS@1722@1अन्नवस्त्रसुवर्णानि रत्नानि विविधानि च ।
ENMSS@1722@2ब्राह्मणेभ्यो नदीतीरे ददाति व्रज सत्वरम् ॥ १७२२॥
ENMSS@1723@1अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनश्च ऋत्विजः ।
ENMSS@1723@2यजमानं दानहीनो नास्ति यज्ञसमो रिपुः ॥ १७२३॥
ENMSS@1724@1अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
ENMSS@1724@2पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ॥ १७२४॥
ENMSS@1725@1अन्नादिवर्गं फलपुष्पमांस- मत्स्यादिभिः पूर्णमुखः सदैव ।
ENMSS@1725@2स्याद्दृष्टमात्रोऽभिमतार्थसिद्ध्यै मृष्टान्नभोज्याय मुदे च काकः ॥ १७२५॥
ENMSS@1726@1अन्नादिविष्टानवगोमयानि न वा विधुन्वन् वदने सदैव ।
ENMSS@1726@2वामोपसव्योऽप्यवलोक्यमानो मनोरथं पूरयते ध्रुवश्च ॥ १७२६॥
ENMSS@1727@1अन्नादिविष्टापिशितादिभिर्यः पूर्णाननोऽभीष्टफलप्रदोऽसौ ।
ENMSS@1727@2मन्त्रादिसिद्ध्यै वणिगादिलाभे शस्तो विवाहादिविधौ च काकः ॥ १७२७॥
ENMSS@1728@1अन्नादे भ्रूणहा मार्ष्टि अन्नेन अभिशंसति ।

ENMSS@1728@2स्तेनः प्रमुक्तो राजनि याचन्ननृतसंकरे ॥ १७२८॥
ENMSS@1729@1अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी ।
ENMSS@1729@2गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥ १७२९॥
ENMSS@1730@1अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
ENMSS@1730@2यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १७३०॥
ENMSS@1731@1अन्नाद्रक्तं च शुक्लं चाप्यतो जीवः प्रतिष्ठितः ।
ENMSS@1731@2इन्द्रियाणि च बुद्धिश्च तृप्यन्त्यन्नेन नित्यशः ॥ १७३१॥
ENMSS@1732@1अन्नाभावे मृत्युः शालिभिरन्नानि शालयो वृष्ट्या ।
ENMSS@1732@2वृष्टिस्तपसेति वदन्न् अमृत्यवे तत्तपश्चरतु ॥ १७३२॥
ENMSS@1733@1अन्नाशने स्यात् परमाणुमात्रः प्रशक्यते शोधयितुं तपोभिः ।
ENMSS@1733@2मांसाशने पर्वतराजमात्रो नो शक्यते शोधयितुं महत्त्वात् ॥ १७३३॥
ENMSS@1734@1अन्नेन धार्यते सर्वं जगदेतच्चराचरम् ।
ENMSS@1734@2अन्नात् प्रभवति प्राणः प्रत्यक्षं नास्ति संशयः ॥ १७३४॥
ENMSS@1735@1अन्ने पाने च ताम्बूले फले पुष्पे विभूषणे ।
ENMSS@1735@2वस्त्रे विलेपने धूपे शय्यायामासनेषु च ॥ १७३५॥
ENMSS@1736@1अन्यं काननमाशु गच्छ तरसा वन्यं फलं भुङ्क्ष्व रे धन्यं
धाम विभाति ते न हि तथा पुण्यं जघन्यं कुरु ।
ENMSS@1736@2एतस्मिन्करिशाव मा व्रज वने जल्पामि तथ्यं वचो जानास्येव
करीन्द्रदर्पदलनो निद्राति पञ्चाननः ॥ १७३६॥
ENMSS@1737@1अन्यं मनुष्यं हृदयेन कृत्वा अन्यं ततो दृष्टिभिराह्वयन्ति ।
ENMSS@1737@2अन्यत्र मुञ्चन्ति मदप्रसेकम् अन्यं शरीरेण च कामयन्ते ॥ १७३७॥
ENMSS@1738@1अन्यः कः क्षारवार्धे त्वमिव नियमितो वानरैर्वा नरैर्वा विप्रेणैकेन
कोऽन्यः करकुहरपुटीपात्रमात्रे निपीतः ।
ENMSS@1738@2जल्पन्नित्थं पृथूर्मिध्वनिभिरवतरत्फेनकूटाट्टहासैः स्पर्धां धत्ते
पयोधेरधिकमधिपुरं निर्मितो यत्तटाकः ॥ १७३८॥
ENMSS@1739@1अन्यः करोति व्यापारं लिप्तो भवति लेखकः ।
ENMSS@1739@2भगलिङ्गप्रसङ्गेन छिन्ना भवति नासिका ॥ १७३९॥
ENMSS@1740@1अन्यः कोऽपि स कुम्भसंभवमुनेरास्तां शिखी जाठरो यं संचिन्त्य
दुकूलवह्निसदृशः संलक्ष्यते वाडवः ।
ENMSS@1740@2वन्द्यं तज्जठरं स मीनमकरग्राहावलिस्तोयधिः
पश्चात्पार्श्वमपूरितान्तरवियद्यत्र स्वनन् भ्राम्यति ॥ १७४०॥

ENMSS@1741@1अन्य इत्यनुपजातयन्त्रणं द्रागुदश्चितवती विलोचनम् ।
ENMSS@1741@2मामवेत्य चकिता वृतानना दन्तदष्टरसना मनागभूत् ॥ १७४१॥
ENMSS@1742@1अन्यकर्मविमूढो य आत्मकर्मविशारदः ।
ENMSS@1742@2यथा पश्य न जानाति स्तनपानेतरच्छिशुः ॥ १७४२॥
ENMSS@1743@1अन्यकालपरिहार्यमजस्रं तद्द्वयेन विदधे द्वयमेव ।
ENMSS@1743@2धृष्टता रहसि भर्तृषु ताभिर्निर्दयत्वमितरैरबलासु ॥ १७४३॥
ENMSS@1744@1अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति ।
ENMSS@1744@2पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति ॥ १७४४॥
ENMSS@1745@1अन्यतो नय मुहूर्तमाननं चन्द्र एष सरले कलामयः ॥
ENMSS@1745@2मा कदाचन कपोलयोर्मलं संक्रमय्य समतां स नेष्यति ॥ १७४५॥
ENMSS@1476@1अन्यतो यदि निजोपचिकीर्षा मानहानिरिति भीतिरनीतिः ।
ENMSS@1476@2श्रीधरोऽपि हि बले श्रियमिच्छन् मानमातनुत वामनमेव ॥ १४७६॥
ENMSS@1477@1अन्यत्कृत्यं मनुजश्चिन्तयति दिवानिशं विशुद्धधिया ।
ENMSS@1477@2वेधा विदधात्यन्यत् स्वामीव न शक्यते धर्तुम् ॥ १४७७॥
ENMSS@1748@1अन्यत्र देशे घटिता जगन्ति ग्रसिष्यते विश्वसृजेति मत्वा ।
ENMSS@1748@2संकोचयित्वा किमु पादमूल- द्वयान्तराले निहितास्ति योनिः ॥ १७४८॥
ENMSS@1749@1अन्यत्र भीष्माद् गाङ्गेयाद् अन्यत्र च हनूमतः ।
ENMSS@1749@2हरिणीखुरमात्रेण चर्मणा मोहितं जगत् ॥ १७४९॥
ENMSS@1750@1अन्यत्र यापितनिशं परिलोहिताङ्गम् अन्याङ्गनागतमिवागतमुष्णरश्मिम् ।
ENMSS@1750@2प्रातर्निरीक्ष्य कुपितेव हि पद्मिनीयम् उत्फुल्लहल्लकसुलोहितलोचनाभूत् ॥ १७५०॥
ENMSS@1751@1अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ।
ENMSS@1751@2नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥ १७५१॥
ENMSS@1752@1अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद् यो मां नेच्छति
नागतश्च हहहा कोऽयं विधेः प्रक्रमः ।
ENMSS@1752@2इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे बाला वृत्तविवर्तनव्यतिकरा
नाप्नोति निद्रां निशि ॥ १७५२॥
ENMSS@1753@1अन्यथा चिन्तिता ह्यर्था नरैस्तात मनस्विभिः ।
ENMSS@1753@2अन्यथैव हि गच्छन्ति दैवादिति मतिर्मम ॥ १७५३॥

ENMSS@1754@1अन्यथा परिदृष्टानि मुनिभिर्वेददर्शिभिः ।
ENMSS@1754@2अन्यथा परिवर्तन्ते वेगा इव नभस्वतः ॥ १७५४॥
ENMSS@1755@1अन्यथालिङ्ग्यते कान्ता भावेन दुहितान्यथा ।
ENMSS@1755@2मनसो भिद्यते वृत्तिरभिन्नेष्वपि वस्तुषु ॥ १७५५॥
ENMSS@1756@1अन्यथा वर्त्तमानानाम् अर्थी भूतोऽयमन्यथा ।
ENMSS@1756@2अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम् ॥ १७५६॥
ENMSS@1757@1अन्यथा वेदशास्त्राणि ज्ञानपाण्डित्यमन्यथा ।
ENMSS@1757@2अन्यथा तत्पदं शान्तं लोकाः क्लिश्यन्ति चान्यथा ॥ १७५७॥
ENMSS@1758@1अन्यथा शास्त्रगर्भिण्या धिया धीरोऽर्थमीहते ।
ENMSS@1758@2स्वामीव प्राक्तनं कर्म विदधाति तदन्यथा ॥ १७५८॥
ENMSS@1759@1अन्यथैव विचिन्त्यन्ते पुरुषेण मनोरथाः ।
ENMSS@1759@2दैवेनाहितसद्भावाः कर्मणां गतयोऽन्यथा ॥ १७५९॥
ENMSS@1760@1अन्यथैवसती पुत्रं चिन्तयेदन्यथा पतिम् ।
ENMSS@1760@2यथा यथा स्वभावस्य महाभाग उदाहृतम् ॥ १७६०॥
ENMSS@1761@1अन्यथैव हि मन्यन्ते पुरुषास्तानि तानि च ।
ENMSS@1761@2अन्यथैव प्रभुस्तानि करोति विकरोति च ॥ १७६१॥
ENMSS@1762@1अन्यथैव हि सौहार्दं भवेत्स्वच्छान्तरात्मनः ।
ENMSS@1762@2प्रवर्ततेऽन्यथा वाणी शाठ्योपहतचेतसः ॥ १७६२॥
ENMSS@1763@1अन्यदस्मि भवतीं न याचिता वारमेकमधरं धयामि ते ।
ENMSS@1763@2इत्यसिस्वददुपांशुकाकुवाक् सोपमर्दहठवृत्तिरेव तम् ॥ १७६३॥
ENMSS@1764@1अन्यदाभाषितं पूर्वं दत्तमन्यत्ततोऽल्पकम् ।
ENMSS@1764@2यत्सदोषमयोग्यं वा कूटदानेन तेन किम् ॥ १७६४॥
ENMSS@1765@1अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
ENMSS@1765@2पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ १७६५॥
ENMSS@1766@1अन्यदीयमविचिन्त्य पातक निर्घृणो हरति जीवितोपमम् ।
ENMSS@1766@2द्रव्यमत्र कितवो विचेतनस्तेन गच्छति कदर्थनां चिरम् ॥ १७६६॥
ENMSS@1767@1अन्यदुःखेन यो दुःखी योऽन्यहर्षेण हर्षतः ।
ENMSS@1767@2स एव जगतामीशो नररूपधरो हरिः ॥ १७६७॥
ENMSS@1768@1अन्यदुच्छृङ्खलं सत्त्वम् अन्यच्छास्त्रनियन्त्रितम् ।
ENMSS@1768@2सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥ १७६८॥
ENMSS@1769@1अन्यदुप्तं जातमन्यद् इत्येतन्नोपपद्यते ।

ENMSS@1769@2उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ॥ १७६९॥
ENMSS@1770@1अन्यदोषमिव स स्वकं गुणं ख्यापयेत् कथमधृष्टताजडः ।
ENMSS@1770@2उच्यते स खलु कार्यवत्तया धिग्वभिन्नबुधसेतुमर्थिताम् ॥ १७७०॥
ENMSS@1771@1अन्यद्गोपुच्छकं ज्ञेयं शुद्धकाष्ठविनिर्मितम् ।
ENMSS@1771@2मुखे च लोहकण्ठेन वेध्यं त्र्यङ्गुलसंमितम् ॥ १७७१॥
ENMSS@1772@1अन्यपूर्वां स्त्रियं साध्वीं कामयेत न गर्वतः ।
ENMSS@1772@2साध्वीरिच्छन् महादेवः षण्डोऽभूद्दारुकावने ॥ १७७२॥
ENMSS@1773@1अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।
ENMSS@1773@2जातुषाभरणस्येव रूपेणापि हि तस्य किम् ॥ १७७३॥
ENMSS@1774@1अन्यमाश्रयते लक्ष्मीस्त्वन्यमन्यं च मेदिनी ।
ENMSS@1774@2अनन्यगामिनी पुंसां कीर्तिरेका पतिव्रता ॥ १७७४॥
ENMSS@1775@1अन्ययान्यवनितागतचित्तं चित्तनाथमभिशङ्कितवत्या ।
ENMSS@1775@2पीतभूरिसुरयापि न मेदे निर्वृतिर्हि मनसो मदहेतुः ॥ १७७५॥
ENMSS@1776@1अन्यया यौवने मर्त्यो बुद्ध्या भवति मोहितः ।
ENMSS@1776@2मध्येऽन्यया जरायांतु सोऽन्यां रोचयते मतिम् ॥ १७७६॥
ENMSS@1777@1अन्यवर्णं शिरो यस्य पुच्छं वा यस्य वाजिनः ।
ENMSS@1777@2पुच्छेन शिरसा वापि नानावर्णः स निन्दितः ॥ १७७७॥
ENMSS@1778@1अन्यवर्णपरावृत्त्या बन्धचिह्ननिगूहनैः ।
ENMSS@1778@2अनाख्यातः सतां मध्ये कविश्चोरो विभाव्यते ॥ १७७८॥
ENMSS@1779@1अन्यस्त्रीस्पृहयालवो जगति के पद्मामगम्या च का को धातुर्दशने समस्तमनुजैः का प्रार्थ्यतेऽहर्निशम् ।
ENMSS@1779@2दृष्ट्वैकां यवनेश्वरो निजपुरे पद्माननां कामिनीं मित्रं प्राह किमादरेण सहसा यारानदीदंशमा ॥ १७७९॥
ENMSS@1780@1अन्यस्माल्लब्धोष्मा क्षुद्रः प्रायेण दुःसहो भवति ।
ENMSS@1780@2रविरपि न दहति तादृग् यादृग्युत्तप्तवालुकानिकरः ॥ १७८०॥
ENMSS@1781@1अन्यस्मिन्नपि काले दयिताविरहः करोति संतापम् ।
ENMSS@1781@2किं पुनरविरलजलधर- गुरुतररसितेषु दिवसेषु ॥ १७८१॥
ENMSS@1782@1अन्यस्मिन् प्रेष्यमाणे तु पुरस्ताद्यः समुत्पतेत् ।
ENMSS@1782@2अहं किं करवाणीति स राजवसतिं वसेत् ॥ १७८२॥
ENMSS@1783@1अन्यस्य लगति कर्णे जीवितमन्यस्य हरति बाण इव ।
ENMSS@1783@2हृदयं दुनोति पिशुनः कण्टक इव पादलग्नोऽपि ॥ १७८३॥

ENMSS@1784@1अन्यस्यै संप्रतीयं कुरु मदनरिपो स्वाङ्गदानप्रसादं नाहं सोढुं समर्था शिरसि सुरनदीं नापि संध्यां प्रणन्तुम् ।
ENMSS@1784@2इत्युक्त्वा कोपविद्धां विघटयितुमुमामात्मदेहं प्रवृत्तां रुन्धानः पातु शम्भोः कुचकलसहठस्पर्शकृष्टो भुजो वः ॥ १७८४॥
ENMSS@1785@1अन्याङ्गनाभिरधिकं स करोति केलिं त्वं तेन मा कुरु विषादमदभ्ररूपे ।
ENMSS@1785@2पेपीयते मधुकरः क्व न तं मरन्दं नो जातु विस्मरति पङ्कजिनीं तथापि ॥ १७८५॥
ENMSS@1786@1अन्या जगद्धितमयी मनसः प्रवृत्तिरन्यैव कापि रचना वचनावलीनाम् ।
ENMSS@1786@2लोकोत्तरा च कृटिराकृतिरार्तहृद्या विद्यावतां सकलमेव गिरां दवीयः ॥ १७८६॥
ENMSS@1787@1अन्यादानाकुलान्तःकरणवशविपद्बाधितप्रेतरङ्कं ग्रासभ्रश्यत्करालश्लथपिशितशवाग्रग्रहे मुक्तनादम् ।
ENMSS@1787@2सर्वैः क्रामद्भिरुल्काननकवलरसव्यात्तवक्त्रप्रभाभिर्व्यक्तैस्तैः संवलद्भिः क्षणमपरमिव व्योम्नि वृत्तं श्मशानम् ॥ १७८७॥
ENMSS@1788@1अन्यानपि तरून् रोप्य फलपुष्पोपयोगिनः ।
ENMSS@1788@2रत्नधेनुसहस्रस्य फलं प्राप्नोति मानवः ॥ १७८८॥
ENMSS@1789@1अन्या निरर्थिका चिन्ता बलतेजःप्रणाशिनी ।
ENMSS@1789@2नाशयेत् सर्वसौख्यं तु रूपहानिं निदर्शयेत् ॥ १७८९॥
ENMSS@1790@1अन्यानि शास्त्राणि विनोदमात्रं प्राप्तेषु वा तेषु न तैश्च किंचित् ।
ENMSS@1790@2चिकित्सितज्योतिषमन्त्रवादाः पदे पदे प्रत्ययमावहन्ति ॥ १७९०॥
ENMSS@1791@1अन्यानि शास्त्राणि विनोदमात्रं प्राप्तेषु कालेषु न तैश्च किंचित् ।
ENMSS@1791@2चिकित्सितज्योतिषमन्त्रवादाः पदे पदे प्रत्ययमावहन्ति ॥ १७९१॥
ENMSS@1792@1अन्यान्परिवदन् साधुर्यथा हि परितप्यते ।
ENMSS@1792@2तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः ॥ १७९२॥
ENMSS@1793@1अन्यान्योपमितं युगं निरुपमं तेऽयुग्ममङ्गेषु यत् सोऽयं सिक्थकमास्यकान्तिमधुनस्तन्वङ्गि चन्द्रस्तव ।
ENMSS@1793@2त्वद्वाचां स्वरमात्रिकां मदकलः पुंस्कोकिलो घोषयत्यभ्यासस्य किमस्त्यगोचरमिति प्रत्याशया मोहितः ॥ १७९३॥
ENMSS@1794@1अन्या प्रकामसुरतश्रमखिन्नदेहा रात्रिप्रजागरविपाटलनेत्रपद्मा ।
ENMSS@1794@2शय्यान्तदेशलुलिताकुलकेशपाशा निद्रां प्रयाति मृदुसूर्यकराभितप्ता

॥ १७९४॥

ENMSS@1795@1अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं हर्षान्विता विरचिताधरचारुशोभा ।

ENMSS@1795@2कूर्पासकं परिदधाति नखक्षताङ्गी व्यालम्बिनीलललितालककुञ्चिताक्षी ॥ १७९५॥

ENMSS@1796@1अन्याभ्यो वन्याभ्यो मालति धन्यासि वल्लरीभ्यस्त्वम् ।

ENMSS@1796@2यत् किल तवैव सविधे क्रीडति मधुपः सदैव मुदितोऽयम् ॥ १७९६॥

ENMSS@1797@1अन्यामन्यां धनावस्थां प्राप्य वैशेषिकीं नराः ।

ENMSS@1797@2असंतुष्टाः प्रमुह्यन्ति संतोषं यान्ति पण्डिताः ॥ १७९७॥

ENMSS@1798@1अन्यायः प्रौढवादेन नीयते न्यायतां यया ।

ENMSS@1798@2न्यायश्चान्यायतां लोभात् किं तया क्षुद्रविद्यया ॥ १७९८॥

ENMSS@1799@1अन्यायकरभोगैश्च यो हि जीवति नित्यशः ।

ENMSS@1799@2विरागादेव लोकानां भ्रंशते स हि पार्थिवः ॥ १७९९॥

ENMSS@1800@1अन्यायद्रविणादानेष्वुद्यमः क्रियते वृथा ।

ENMSS@1800@2लुब्धानां सत्यसंकोचात् संकुचन्त्येव संपदः ॥ १८००॥

ENMSS@1801@1अन्यायवित्तेन कृतोऽपि धर्मः सव्याज इत्याहुरशेषलोकाः ।

ENMSS@1801@2न्यायार्जितार्थेन स एव धर्मो निर्व्याज इत्यार्यजना वदन्ति ॥ १८०१॥

ENMSS@1802@1अन्यायसमुपात्तेन दानधर्मो धनेन यः ।

ENMSS@1802@2क्रियते न स कर्तारं त्रायते महतो भयात् ॥ १८०२॥

ENMSS@1803@1अन्या या वसनोत्तमं तदधुना संगृह्य मान्यं पुनर्यन्मां दर्शयसि प्रियं प्रियतमं तोषाय रोषाय नो ।

ENMSS@1803@2सर्वसैव सतश्च रीतिरियती पूर्वं श्रुता वृद्धतः प्रायः प्राप्य निजप्रकर्षमखिलं मित्रं मुदादर्शयत् ॥ १८०३॥

ENMSS@1804@1अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति ।

ENMSS@1804@2प्राप्ते चैकादशे वर्षे समूलं च विनश्यति ॥ १८०४॥

ENMSS@1805@1अन्यायोपार्जितं द्रव्यम् अर्थदूषणमुच्यते ।

ENMSS@1805@2अपात्रदानं पात्रार्थ हरणं तस्य लक्षणम् ॥ १८०५॥

ENMSS@1806@1अन्यार्थमङ्गीकृतवारिपाणौ विशङ्कमानास्तव दाननीरम् ।

ENMSS@1806@2परस्परं दीनमुखा न के वा देवाः सुमेरुं शुशुचुः स्वभूमिम् ॥ १८०६॥

ENMSS@1807@1अन्या विहाय पतिगृह- मविचिन्तितकुलकलङ्कजनगर्हाः ।
ENMSS@1807@2रागोपरक्तहृदया यान्ति दिगन्तं मनुष्या आसज्य ॥ १८०७॥
ENMSS@1808@1अन्याश्चिरं सुरतकेलिपरिश्रमेण खेदं गताः
प्रशिथिलीकृतगात्रयष्ट्यः ।
ENMSS@1808@2संहृष्यमाणविपुलोरुपयोधरार्ता अभ्यञ्जनं विदधति प्रमदाः
सुशोभाः ॥ १८०८॥
ENMSS@1809@1अन्यासां न किमस्ति वेश्मनि वधूः कैवं निशि प्रावृषि प्रैति
प्रान्ततडागमम्ब गृहिणि स्वस्थासि मेऽवस्थया ।
ENMSS@1809@2भग्नोऽयं वलयो घटो विघटितः क्षण्णा तनुः कण्टकैराक्रान्तः स
तथा भुजङ्गहतकः कष्टं न यद्दृष्टवान् ॥ १८०९॥
ENMSS@1810@1अन्या साधिगता त्वया क्व युवती यस्याः स मानग्रहो याते लोचनगोचरं
प्रियतमे संप्रत्यपक्रामति ।
ENMSS@1810@2अस्माकं पुनरुग्रपूरुषशताश्लेषप्रगल्भात्मनाम्
एतादृश्यनभिज्ञपूरुषपरिष्वङ्गे कुतः साध्वसम् ॥ १८१०॥
ENMSS@1811@1अन्या सा सरसी मराल मुनिभिर्यत्तीरसोपानिका- विन्यस्तान् बलितण्डुलान्
कवलयन् दृष्टोऽसि हृद्यैर्मुखैः ।
ENMSS@1811@2एषा पक्कणवापिका कमलिनीखण्डेऽत्र
गुप्तात्मभिर्व्याधैस्त्वद्विधमुग्धबन्धनविधौ किं नाम नासूत्र्यते ॥ १८११॥
ENMSS@1812@1अन्यासु तावदुपमर्दसहासु भृङ्ग लोलं विनोदय मनः सुमनोलतासु
।
ENMSS@1812@2मुग्दामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं नवमल्लिकायाः
॥ १८१२॥
ENMSS@1813@1अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा संभाराः खलु तेऽन्य
एव विधिना यैरेष सृष्टो युवा ।
ENMSS@1813@2श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलाद् दृष्टे
यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च ॥ १८१३॥
ENMSS@1814@1अन्यास्ता मलयाद्रिकाननभुवः स्वच्छस्रवन्निर्झरास्तृष्णा यासु निवर्तते
तनुभृतामालोकमात्रादपि ।
ENMSS@1814@2रूक्षध्वाङ्क्षपरिग्रहो मरुरयं स्फारीभवद्भ्रान्तयः ता एता
मृगतृष्णिका हरिण हे नेदं पयो गम्यताम् ॥ १८१४॥
ENMSS@1815@1अन्यूनं गुणममृतस्य धारयन्ती संफुल्लस्फुरितसरोरुहावतंसा ।

ENMSS@1815@2प्रेयोभिः सह सरसी निषेव्यमाणा रक्तत्वं व्यधित वधूदृशं सुरा च ॥ १८१५॥

ENMSS@1816@1अन्यूनोन्नतयोऽतिमात्रपृथवः पृथ्वीधरश्रीभृतस्तन्वन्तः कनकावलीभिरुपमां सौदामनीदामभिः ।

ENMSS@1816@2वर्षन्तः शममानयन्नुपलसच्छृङ्गारलेखायुधाः काले कालियकायकालवपुषः पांसून् गजाम्भोमुचः ॥ १८१६॥

ENMSS@1817@1अन्ये च बहवो रागा जाता देशविशेषतः ।

ENMSS@1817@2मारूप्रभृतयो लोके ते च तद् देशिकाः स्मृताः ॥ १८१७॥

ENMSS@1818@1अन्ये चेत् प्राकृता लोका बहुपापानि कुर्वते ।

ENMSS@1818@2प्रधानपुरुषेणापि कार्यं तत्पृष्ठतो नु किम् ॥ १८१८॥

ENMSS@1819@1अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ये भ्रातश्चातक किं वृथातिरटितैः खिन्नोऽसि विश्राम्यताम् ।

ENMSS@1819@2मेघः शारद एष काशधवलः पानीयरिक्तोदरो गर्जत्येव हि केवलं भृशतरं नो बिन्दुमप्युज्झति ॥ १८१९॥

ENMSS@1820@1अन्ये ते विहगाः पयोद परितो धावन्ति तृष्णातुरा वापीकूपतडागसागरजले मज्ञन्ति दत्तादराः ।

ENMSS@1820@2मामद्यापि न वेत्सि चातकशिशुं यच्छुष्ककण्ठोऽपि सन् नान्यं वाञ्छति नोपसर्पति न च प्रस्तौति न ध्यायति ॥ १८२०॥

ENMSS@1821@1अन्ये ते सुमनोलिहः प्रहसदप्यम्भोजमुज्झन्ति ये वातान्दोलनकेलिचञ्चलदलप्रान्तैरपि त्रासिताः ।

ENMSS@1821@2अन्यः कोऽपि स एष षद्वदभटः संसह्य कर्णाहतीर्येनानेकपगण्डगण्डलमिलद्दानाम्बुनि क्रीडितम् ॥ १८२१॥

ENMSS@1822@1अन्येनापि स्वमांसेन छिद्यमानेन दूयते ।

ENMSS@1822@2तथापि परमांसानि स्वादूनीति समश्नुते ॥ १८२२॥

ENMSS@1823@1अन्येऽपि सन्ति गुणिनः कति नो जगत्यां हार त्वमेव गुणिनामुपरिस्थितोऽसि ।

ENMSS@1823@2एणीदृशामुरसि नित्यमवस्थितोऽसि सद्वृत्तता च शुचिता च न खण्डिता ते ॥ १८२३॥

ENMSS@1824@1अन्येऽपि सन्ति बत तामरसावतंसा हंसावलीवलयिनो जलसंनिवेशाः ।

ENMSS@1824@2कोऽप्याग्रहो गुरुरयं बत चातकस्य पौरंदरीं यदभिवाञ्छति

वारिधाराम् ॥ १८२४॥

ENMSS@1825@1अन्येयं रूपसंपत्तिरन्या वैदग्ध्यधोरणी ।

ENMSS@1825@2नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः ॥ १८२५॥

ENMSS@1826@1अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा ।

ENMSS@1826@2तस्य पापागमस्तात हेत्वभावान्न विद्यते ॥ १८२६॥

ENMSS@1827@1 कर्मणा मनसा वाचा परपीडां करोति यः ।

ENMSS@1827@2तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभम् ॥ १८२७॥

ENMSS@1828@1अन्येषामपि नश्यन्ति सुहृदश्च धनानि च ।

ENMSS@1828@2पश्य बुद्ध्या मनुष्याणां राजन्नापदमात्मनः ॥ १८२८॥

ENMSS@1829@1अन्येष्वर्थकृता मैत्री यावदर्थविडम्बनम् ।

ENMSS@1829@2पुंभिः स्त्रीषु कृता यद्वत् सुमनःस्विव षद्वदैः ॥ १८२९॥

ENMSS@1830@1अन्ये हि दुःखमृतवः प्रथयन्त्यहोभिः सूर्यांशुलुप्ततिमिरैरभिसारिकाणाम्
।

ENMSS@1830@2हेमन्त एष हिमरुद्धसहस्रधामा कामं करोति दिवसेष्वपि शर्म तासाम्
॥ १८३०॥

ENMSS@1831@1अन्यैः साकं विरोधेन वयं पञ्चोत्तरं शतम् ।

ENMSS@1831@2परस्परविरोधेन वयं पञ्च च ते शतम् ॥ १८३१॥

ENMSS@1832@1अन्योच्छिष्टेषु पात्रेषु भुक्तैतेषु महीभुजः ।

ENMSS@1832@2कस्मान्न लज्जामवहन् शौचचिन्तां न वा दधुः ॥ १८३२॥

ENMSS@1833@1अन्यो धनं प्रेतगतस्य भुङ्क्ते वयांसि चाग्निश्च शरीरधातून् ।

ENMSS@1833@2द्वाभ्यामयं सह गच्छत्यमुत्र पुण्येन पापेन च वेष्ट्यमानः ॥ १८३३॥

ENMSS@1834@1अन्योन्यं कृतवैराणां पुत्रपौत्रं निगच्छति ।

ENMSS@1834@2पुत्रपौत्रे विनष्टे तु परलोकं निगच्छति ॥ १८३४॥

ENMSS@1835@1अन्योन्यं दशनच्छदेषु दशतोरन्योन्यमालिङ्गतोरन्योन्यं नखरैः
खरैर्विलिखतोरन्योन्यमाचुम्बतोः ।

ENMSS@1835@2औत्सुक्येन नवं नवं निधुवनप्रागल्भ्यमभ्यस्यतोः श्रान्ते
पञ्चशरेऽपि न प्रणयिनोः प्राप्तोऽपकर्षं रसः ॥ १८३५॥

ENMSS@1836@1अन्योन्यं मतिमास्थाय यत्र सम्प्रतिभाष्यते ।

ENMSS@1836@2न चैकमत्ये श्रेयोस्ति मन्त्रः सोऽधम उच्यते ॥ १८३६॥

ENMSS@1837@1अन्योन्यकृतवैराणां संवासान्मृदुतां गतम् ।

ENMSS@1837@2नव तिष्ठति तद्वरं पुष्करस्थमिवोदकम् ॥ १८३७॥
ENMSS@1838@1अन्योन्यगूढचेष्टित- सद्भावस्नेहपाशबद्धस्य ।
ENMSS@1838@2विच्छेदकरो मृत्युर्धीराणां वा परिच्छेदः ॥ १८३८॥
ENMSS@1839@1अन्योन्यगोप्यं विदुषां तु लक्षं यदस्य तुल्याः प्रभवो भवन्ति ।
ENMSS@1839@2परस्परालिङ्गनतत्पराणां न कान्त सौख्यं युवतीजनानाम् ॥ १८३९॥
ENMSS@1840@1अन्योन्यग्रथितारुणाङ्गुलिनमत्पाणिद्वयस्योपरि
न्यस्योच्छ्वासविकम्पिताधरदलं निर्वेदशून्यं मुखम् ।
ENMSS@1840@2आमीलन्नयनान्तवान्तसलिलं श्लाध्यस्य निन्द्यस्य वा कस्येदं
दृढसौहृदं प्रतिदिनं दीनं त्वया स्मर्यते ॥ १८४०॥
ENMSS@1841@1अन्योन्यदर्शनकृतः समानरूपानुरागकुलवयसाम् ।
ENMSS@1841@2केषांचिदेव मन्ये समागमो भवति पुण्यवताम् ॥ १८४१॥
ENMSS@1842@1अन्योन्यप्रकटानुरागरभसादुद्भूतरोमाञ्चयोरुत्कण्ठापरिखेददुःसहतया
क्षामीभवद्गात्रयोः ।
ENMSS@1842@2नक्तं दैववशात् क्षणं गुरुजनात्स्वायत्ततां प्राप्तयोर्यातो
दुर्लभसंगमोत्सवविधिर्यूनोर्जनाख्येयताम् ॥ १८४२॥
ENMSS@1843@1अन्योन्यभेदो भ्रातॄणां सुहृदां वा बलान्तक ।
ENMSS@1843@2भवत्यानन्दकृद्देव द्विषतां नात्र संशयः ॥ १८४३॥
ENMSS@1844@1अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
ENMSS@1844@2मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ॥ १८४४॥
ENMSS@1845@1अन्योन्यरागवशयोर्युवयोर्विलास- स्वच्छन्दताच्छिदपयातु तदालिवर्गः
।
ENMSS@1845@2अत्याजयन् सिचयमाजिमकारयन्वा दन्तैर्नखैश्च मदनो मदनः कथं
स्यात् ॥ १८४५॥
ENMSS@1846@1अन्योन्यलक्षणैर्युक्तां नारीं संकीर्णकां विदुः ।
ENMSS@1846@2या निजैरेव संयुक्ता चिह्नैस्तां केवलां जगुः ॥ १८४६॥
ENMSS@1847@1अन्योन्यलावण्यविलोकनान्तं नेत्रद्वयं स्यात्सततं किलास्याः ।
ENMSS@1847@2इत्येव नासा विहिता विधात्रा मध्ये तयोर्दर्शनविघ्नकर्त्री ॥ १८४७॥
ENMSS@1848@1अन्योन्यवारिघटितौ धनवारिपाताद् भीतौ भृशं
मृगवधूर्मृगयूथपश्च ।
ENMSS@1848@2वित्तस्तया घटनया कृतसौख्यमोहौ नैवाम्बुवाहजलशीकरपातपीडाम्
॥ १८४८॥

ENMSS@1849@1अन्योन्यविपरीतानि मतानि मनसः सदा ।
ENMSS@1849@2अविद्यायां पुनः सत्ये ज्ञानस्योच्चतरस्य हि ।
ENMSS@1849@3अङ्गानि निखिलानि स्युः पूरयन्ति परस्परम् ॥ १८४९॥
ENMSS@1850@1अन्योन्यश्वसिताशनैः फणधरैराविश्य सत्त्वान्बहिर्भुञ्जानैः
परिचारकैस्तृणगणैरानन्दिना नन्दिना ।
ENMSS@1850@2भिक्षान्नोपचितैश्च दारतनयैः पुष्णाति विश्वानि यः स स्वामी मम
दैवतं तदितरो नाम्नापि नाम्नायते ॥ १८५०॥
ENMSS@1851@1अन्योन्यसंगमवशादधुना विभातां तस्यापि तेऽपि मनसी विकसद्विलासे
।
ENMSS@1851@2स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तम् आदाविव द्व्यणुककृत्परमाणुयुग्मम्
॥ १८५१॥
ENMSS@1852@1अन्योन्यसंभिन्नदृशां सखीनां तस्यास्त्वयि प्रागनुरागचिह्नम् ।
ENMSS@1852@2कस्यापि कोऽपीति निवेदितं च धात्रेयिकायाश्चतुरं वचश्च ॥ १८५२॥
ENMSS@1853@1अन्योन्यसंवलितमांसलदन्तकान्ति सोल्लासमाविरलसं वलितार्धतारम्
।
ENMSS@1853@2लीलागृहे प्रतिकलं किलकिञ्चितेषु व्यावर्तमानविनयं मिथुनं चकास्ति
॥ १८५३॥
ENMSS@1854@1अन्योन्यसमुपष्टम्भाद् अन्योन्यापाश्रयेण च ।
ENMSS@1854@2ज्ञातयः संप्रवर्धन्ते सरसीवोत्पलान्युत ॥ १८५४॥
ENMSS@1855@1अन्योन्यस्माद्विनिर्भिन्नं भिन्नगर्भं न युध्यते ।
ENMSS@1855@2तथैवापसृतं शक्तं नैकराज्यान्तरीकृतम् ॥ १८५५॥
ENMSS@1856@1अन्योन्यस्य नियन्त्रणापरिभवादप्रौढशीतातपाः
पुष्यत्किंशुकचूतनूतनदलाविर्भूतशोणश्रियः ।
ENMSS@1856@2पद्मोल्लासितगन्धवासितवहद्वातावदातत्विषो मोदोन्मादजुषो हरन्ति हृदयं
वासन्तिका वासराः ॥ १८५६॥
ENMSS@1857@1अन्योन्यस्य लयं भयादिव महाभूतेषु यातेष्वलं कल्पान्ते परमेक एव
स तरुः स्कन्धोच्चयैर्जृम्भते ।
ENMSS@1857@2विन्यस्य त्रिजगन्ति कुक्षिकुहरे देवेन यस्यास्यते शाखाग्रे शिशुनेव
सेवितजलक्रीडाविलासालसम् ॥ १८५७॥
ENMSS@1858@1अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः ।

ENMSS@1858@2एष धर्मः समासेन ज्ञेयः मत्रीपुंसयोः परः ॥ १८५८॥

ENMSS@1859@1अन्योन्याक्षिनिपातजातमदयोरन्योन्यचेष्टाशत-
स्पृष्टान्तःपदयोर्मनोभवशरव्याघातसंभ्रान्तयोः ।

ENMSS@1859@2स्यादेव द्विरदेन्द्रयोरिव तयोरालिङ्गनं प्राङ्गणे धैर्यस्तम्भविडम्बिनी
बलवती लज्जा न चेदर्गला ॥ १८५९॥

ENMSS@1860@1अन्योन्यान्तरनिर्गताङ्गुलिदलश्रेणीभवन्निश्चल- ग्रन्थिप्रग्रथितं
करद्वयमुपर्युत्तानमाबिभ्रता ।

ENMSS@1860@2सेयं विभ्रमतोरणप्रणयिना जृम्भाभरोत्तभिते- नोच्चैर्बाहुयुगेन
शंसति मनोजन्मप्रवेशोत्सवम् ॥ १८६०॥

ENMSS@1861@1अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के मग्नानां
स्यन्दनानामुपरि कृतपदन्यासविक्रान्तपत्तौ ।

ENMSS@1861@2स्फीतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
संग्रामैकार्णवान्तःपयसि विचरितुं पण्डिताः पाण्डुपुत्राः ॥ १८६१॥

ENMSS@1862@1अन्योन्याहतदन्तनादमुखरं प्रह्वं मुखं कुर्वता नेत्रे साश्रुकणे निमील्य
पुलकव्यासङ्गि कण्डूयता ।

ENMSS@1862@2हा हा हेति सुनिष्ठुरं विवदता बाहू प्रसार्य क्षणं पुण्याग्निः पथिकेन
पीयत इव ज्वालाहतश्मश्रुणा ॥ १८६२॥

ENMSS@1863@1अन्योन्येषां पुष्करैरामृशन्तो दानोद्भेदानुच्चकैर्भुग्नवालाः ।

ENMSS@1863@2उन्मूर्धानः संनिपत्यापरान्तैः प्रायुध्यन्त स्पष्टदन्तध्वनीभाः ॥ १८६३॥

ENMSS@1864@1अन्योपभोगकलुषा मानवती प्रेमगर्विता मुदिता ।

ENMSS@1864@2सौन्दर्यगर्विता च प्रेमपराधीनमानसानूढा ॥ १८६४॥

ENMSS@1865@1अन्योऽपि चन्दनतरोर्महनीयमूर्तेः सेकार्थमुत्सहति तद्गुणबद्धतृष्णः ।

ENMSS@1865@2शाखोटकस्य पुनरस्य महाशयोयम् अम्भोद एव शरणं यदि निर्गुणस्य
॥ १८६५॥

ENMSS@1866@1अन्यो हि नाश्नाति कृतं हि कर्म स एव कर्ता सुखदुःखभागी ।

ENMSS@1866@2यत्तेन किंचिद्धि कृतं हि कर्म तदश्नुते नास्ति कृतस्य नाशः
॥ १८६६॥

ENMSS@1867@1अन्वग्राहि मया प्रेयान् निशि स्वोपनयादिति ।

ENMSS@1867@2न विप्रलभते तावद् आलीरियमलीकवाक् ॥ १८६७॥

ENMSS@1868@1अन्वयागतविद्यानाम् अन्वयागतसंपदाम् ।

ENMSS@1868@2विदुषां च प्रभूणां च हृदयं नावलिप्यते ॥ १८६८॥

ENMSS@1869@1अन्वर्थवेदी शूरश्च क्षमावान्न च कर्कशः ।
ENMSS@1869@2कल्याणमेधास्तेजस्वी स भद्रः परिकीर्तितः ॥ १८६९॥
ENMSS@1870@1अन्विष्यद्भिरयं चिरात् कथमपि प्रार्थ्येत यद्यर्थिभिर्नाथ त्वं पुनरर्थिनः प्रतिदिनं यत्नात् समन्विष्यसि ।
ENMSS@1870@2प्राप्तौ चिन्तितमात्रकं ददसौ चिन्तातिरिक्तप्रदं त्वामालोक्य विदीर्यते यदि न तद्ग्रावैव चिन्तामणिः ॥ १८७०॥
ENMSS@1871@1अन्वीक्षणं च विद्यानां सद्वर्णाश्रमरक्षणम् ।
ENMSS@1871@2ग्रहणं शस्त्रशास्त्राणां युद्धमार्गोपशिक्षणम् ॥ १८७१॥
ENMSS@1872@1अन्वेतं वायवो यान्ति पृष्ठे भानुर्वयांसि च ।
ENMSS@1872@2अनुप्लवन्ते मेघाश्च यस्य तस्य रणे जयः ॥ १८७२॥
ENMSS@1873@1अन्वेषयति मदान्ध- द्विरदमदाम्बुसिक्तमवनितलम् ।
ENMSS@1873@2परिणतगर्भभरार्ता सिंहवधूः शल्लकीविपिने ॥ १८७३॥
ENMSS@1874@1अपः पिबन् प्रपापालीम् अनुरक्तो विलोकयन् ।
ENMSS@1874@2अगस्त्यं चिन्तयामास चतुरः सापि सागरान् ॥ १८७४॥
ENMSS@1875@1अपकर्ताहमस्मीति हृदि ते मा स्म भूद्भयम् ।
ENMSS@1875@2विमुखेषु न मे खड्गः प्रहर्तुं जातु वाञ्छति ॥ १८७५॥
ENMSS@1876@1अपकारदशायामप्युपकुर्वन्ति साधवः ।
ENMSS@1876@2छिन्दन्तमपि वृक्षः स्वच्छायया किं न रक्षति ॥ १८७६॥
ENMSS@1877@1अपकारमसंप्राप्य तुष्येत् साधुरसाधुतः ।
ENMSS@1877@2नैषोऽलाभो भुजङ्गेन वेष्टितो यो न दश्यते ॥ १८७७॥
ENMSS@1878@1अपकारिणि कोपश्चेत् कोपे कोपः कथं न जायेत ।
ENMSS@1878@2धर्मार्थकाममोक्ष- प्राणयशोहारिणि क्रूरे ॥ १८७८॥
ENMSS@1879@1अपकारिणि चेत् कोपः कोपे कापः कथं न ते ।
ENMSS@1879@2धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि ॥ १८७९॥
ENMSS@1880@1अपकारिणि विस्रम्भं यः करोति नराधमः ।
ENMSS@1880@2अनाथो दुर्बलो यद्वन् न चिरं स तु जीवति ॥ १८८०॥
ENMSS@1881@1अपकारिषु मा पापं चिन्तय त्वं कदाचन ।
ENMSS@1881@2स्वयमेव पतिष्यन्ति कूलजाता इव द्रुमाः ॥ १८८१॥
ENMSS@1882@1अपकुर्यात् समर्थं वा नोपकुर्याद्यदापदि ।
ENMSS@1882@2उच्छिन्द्यादेव तन्मित्रं विश्वस्याङ्कमुपस्थितम् ॥ १८८२॥
ENMSS@1883@1अपकुर्वन्नपि प्रायः प्राप्नोति महतः फलम् ।

ENMSS@1883@2और्वं दहन्तमेवाग्निं संतर्पयति सागरः ॥ १८८३॥
ENMSS@1884@1अपकृत्य बलस्थस्य दूरस्थोऽस्मीति नाश्वसेत् ।
ENMSS@1884@2श्येनानुचरितैर्ह्येते निपतन्ति प्रमाद्यतः ॥ १८८४॥
ENMSS@1885@1अपकृत्वा बुद्धिमतो दूरस्थोऽस्मीति नाश्वसेत् ।
ENMSS@1885@2दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः ॥ १८८५॥
ENMSS@1886@1अपक्रान्ते बाल्ये तरुणिमनि चागन्तुमनसि प्रयाते मुग्धत्वे चतुरिमणि चाश्लेषरसिके ।
ENMSS@1886@2न केनापि स्पृष्टं यदिह वयसा मर्म परमं यदेतत् पञ्चेषोर्जयति वपुरिन्दीवरदृशः ॥ १८८६॥
ENMSS@1887@1अपक्वं भङ्गमायाति अतिजीर्णं तु कर्कशम् ।
ENMSS@1887@2ज्ञातिघृष्टं तु सोद्वेगं कलहो बान्धवैः सह ॥ १८८७॥
ENMSS@1888@1अपक्वमपि चूतस्य फलं द्रवति वेगतः ।
ENMSS@1888@2गुडशुण्टीप्रलेपेन विधृतं शश्वदातपे ॥ १८८८॥
ENMSS@1889@1अपक्वे तु घटे नीरं चालन्यां सूक्ष्मपिष्टकम् ।
ENMSS@1889@2स्त्रीणां च हृदये वार्ता न तिष्ठति कदापि हि ॥ १८८९॥
ENMSS@1890@1अपगतमदरागा योषिदेका प्रभाते कृतनिबिडकुचाग्रा पत्युरालिङ्गनेन ।
ENMSS@1890@2प्रियतमपरिभुक्तं वीक्षमाना स्वदेहं व्रजति शयनवासाद् वासमन्यद्धसन्ती ॥ १८९०॥
ENMSS@1891@1अपगतरजोविकारा घनपटलाक्रान्ततारकालोका ।
ENMSS@1891@2लम्बपयोधरभारा प्रावृडियं वृद्धवनितेव ॥ १८९१॥
ENMSS@1892@1अपङ्किलधियः शुद्धाः साधुमानसवृत्तयः ।
ENMSS@1892@2वमन्ति श्रुतिजीवातुं ध्वनिं नवरसास्पदम् ॥ १८९२॥
ENMSS@1893@1अपचिक्रमिषुः पूर्वं सेनां स्वां परिसान्त्वयन् ।
ENMSS@1893@2विलङ्घयित्वा सत्रेण ततः स्वयमुपक्रमेत् ॥ १८९३॥
ENMSS@1894@1अपटः कपटी हिमहीनरुचिः प्रथितः पशुरन्यकलत्ररतः ।
ENMSS@1894@2तव राय(?)वसन्तसमो न हरो न हरिर्न्न हरिर्न्न हरिर्न्न हरिः ॥ १८९४॥
ENMSS@1895@1अपण्डितास्ते पुरुषा मता मे ये स्त्रीषु च श्रीषु च विश्वसन्ति ।
ENMSS@1895@2श्रियो हि कुर्वन्ति तथैव नार्यो भुजङ्गकन्यापरिसर्पणानि ॥ १८९५॥
ENMSS@1896@1अपण्डितो वापि सुहृत् पण्डितो वाप्यनात्मवान् ।
ENMSS@1896@2मन्त्रमूलं यतो राज्यम् अतो मन्त्रं सुरक्षितम् ॥ १८९६॥

ENMSS@1897@1अपतुषारतया विशदप्रभैः सुरतसङ्गपरिश्रमनोदिभिः ।

ENMSS@1897@2कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनम् ॥ १८९७॥

ENMSS@1898@1अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ।

ENMSS@1898@2दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह ॥ १८९८॥

ENMSS@1899@1अपत्यदर्शनस्यार्थे प्राणानपि च या त्यजेत् ।

ENMSS@1899@2त्यजन्ति तामपि क्रूरा मातरं दारहेतवे ॥ १८९९॥

ENMSS@1900@1अपत्यानि प्रायो दश दश वराही जनयति क्षमाभारे धुर्यः स पुनरिह नासीन्न भविता ।

ENMSS@1900@2पदं कृत्वा यः स्वं फणिपतिफणाचक्रवलये निमज्जन्तीमन्तर्जलधि वसुधामुत्तुलयति ॥ १९००॥

ENMSS@1901@1अपत्ये यत् तादृग्दुरितमभवत् तेन महता विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।

ENMSS@1901@2पटुर्धारावाही नव इव चिरेणापि हि न मे निकृन्तन्मर्माणि क्रकच इव

मन्युर्विरमति ॥ १९०१॥

ENMSS@1902@1अपथेन प्रववृते न जातूपचितोऽपि सः ।

ENMSS@1902@2वृद्धौ नदीमुखेनैव प्रस्थानं लवणाम्भसः ॥ १९०२॥

ENMSS@1903@1अपथेनैव यो योगाद् अधः सारायते स्वयम् ।

ENMSS@1903@2नीचोपसर्पणवशात् स पतेद् वंशवानपि ॥ १९०३॥

ENMSS@1904@1अपथ्यभोगेषु यथातुराणां स्पृहा यथार्थेष्वतिदुर्गतानाम् ।

ENMSS@1904@2परोपतापेषु यथा खलानां स्त्रीणां तथा चौर्यरतोत्सवेषु ॥ १९०४॥

ENMSS@1905@1अपथ्यमायतौ लोभाद् आमनन्त्यनुजीविनः ।

ENMSS@1905@2प्रियं श्रृणोति यस्तेभ्यस्तमृच्छन्ति न संपदः ॥ १९०५॥

ENMSS@1906@1अपथ्यस्य च भुक्तस्य दन्तस्य चलितस्य च ।

ENMSS@1906@2अमात्यस्य च दुष्टस्य समूलोद्धरणं सुखम् ॥ १९०६॥

ENMSS@1907@1अपदान्तरं च परितः क्षितिक्षिताम् अपतन् द्रुतभ्रमितहेमनेमयः ।

ENMSS@1907@2जविमारुताञ्चितपरस्परोपम- क्षितिरेणुकेतुवसनाः पताकिनः ॥ १९०७॥

ENMSS@1908@1अपदो दूरगामी च साक्षरो न च पण्डितः ।

ENMSS@1908@2अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥ १९०८॥

ENMSS@1909@1अपध्वस्तो ह्यवमतो दुःखं जीवति जीवितम् ।

ENMSS@1909@2जीवितं यदवक्षिप्तं यथैव मरणं तथा ॥ १९०९॥

ENMSS@1910@1अपनय महामोहं राजन्ननेन तवासिना कथय कुहकक्रीडाश्चर्यं कथं क्व च शिक्षितम् ।
ENMSS@1910@2यदरिरुधिरं पायं पायं कुसुम्भरसारुणं झगिति वमति क्षीराम्भोधिप्रवाहसितं यशः ॥ १९१०॥
ENMSS@1911@1अपनिद्रमधूकपाण्डुरा सुदृशोऽदृश्यत गण्डमण्डली ।
ENMSS@1911@2गमिताश्रुजलप्लवैरिव कृशिमाकीर्णतयापि निम्नताम् ॥ १९११॥
ENMSS@1912@1अपनीतं सुनीतेन योऽर्थं प्रत्यानिनीषते ।
ENMSS@1912@2मतिमास्थाय सुदृढां तदकापुरुषव्रतम् ॥ १९१२॥
ENMSS@1913@1अपनीतपरिमलान्तर- कथे पदं न्यस्य देवतरुकुसुमे ।
ENMSS@1913@2पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद् भ्रमर धन्योऽसि ॥ १९१३॥
ENMSS@1914@1अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः ।
ENMSS@1914@2अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते ॥ १९१४॥
ENMSS@1915@1अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
ENMSS@1915@2स्वार्थमभ्युद्धरेत् प्राज्ञः कार्यध्वंसो हि मूर्खता ॥ १९१५॥
ENMSS@1916@1अपमानः पतिविहितो गुरुपरिकरतीव्रता गृहे दौःस्थ्यम् ।
ENMSS@1916@2शीलक्षतये यासां तासामतिरागतोऽन्यनररक्तिः ॥ १९१६॥
ENMSS@1917@1अपमानात् तपोवृद्धिः संमानाच्च तपःक्षयः ।
ENMSS@1917@2अर्चितः पूजितो विप्रो दुग्धा गौरिव गच्छति ॥ १९१७॥
ENMSS@1918@1अपमानात् तु संभूतं मानेन प्रशमं नयेत् ।
ENMSS@1918@2सामपूर्व उपायो वा प्रणामो वाभिमानजे ॥ १९१८॥
ENMSS@1919@1अपमानितोऽपि कुलजो न वदति पुरुषं स्वभावदाक्षिण्यात् ।
ENMSS@1919@2नहि मलयचन्दनतरुः परशुप्रहतः स्रवेत् पूयम् ॥ १९१९॥
ENMSS@1920@1अपमेघोदयं वर्षम् अदृष्टकुसुमं फलम् ।
ENMSS@1920@2अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ॥ १९२०॥
ENMSS@1921@1अपयाति सरोषया निरस्ते कृतकं कामिनि चुक्षुवे मृगाक्ष्या ।
ENMSS@1921@2कलयन्नपि सव्यथोऽवतस्थे- ऽशकुनेन स्खलितः किलेतरोऽपि ॥ १९२१॥
ENMSS@1922@1अपयान्तीनामधुना संकेतनिकेतनान्मृगाक्षीणाम् ।
ENMSS@1922@2वासस एव न केवलम् अभवन्मनसोऽपि परिवर्तः ॥ १९२२॥
ENMSS@1923@1अपयायिनि स्वतोऽर्थे कथमिव सौहार्दधीः कदर्याणाम् ।
ENMSS@1923@2यस्यापयानसमये प्राणत्यागोऽपि हा सुकरः ॥ १९२३॥

ENMSS@1924@1अपरजलधेर्लक्ष्मीं यस्मिन् पुरीं पुरभित्प्रभे मदगजघटाकारैर्नावां शतैरवमृद्गति ।
ENMSS@1924@2जलदपटलानीकाकीर्णं नवोत्पलमेचकं जलनिधिरिव व्योम व्योम्नः समोऽभवदम्बुधिः ॥ १९२४॥
ENMSS@1925@1अपरतरुनिकरमुक्तं मरुमण्डलमावसत्यसावेकः ।
ENMSS@1925@2फलकुसुमैरुपकुर्वन्न् अररे करीर कथं धीरः ॥ १९२५॥
ENMSS@1926@1अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः ।
ENMSS@1926@2सुकरस्तरुवत् सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ १९२६॥
ENMSS@1927@1अपराद्धं भवद्वाणीश्राविणा पृच्छ किं मया ।
ENMSS@1927@2वीणाह परुषं यन्मां कलकण्ठी च निष्ठुरम् ॥ १९२७॥
ENMSS@1928@1अपराद्धांस्तु सुस्निग्धान् स्नोहोक्त्या मानदानतः ।
ENMSS@1928@2साधयेद् भेददण्डाभ्यां यथायोगेन चापरान् ॥ १९२८॥
ENMSS@1929@1अपराधं न श्रृणुमो न चासत्यं त्वयोदितम् ।
ENMSS@1929@2गोप्येति गदितः कृष्णस्तूष्णीं तिष्ठन् पुनातु वः ॥ १९२९॥
ENMSS@1930@1अपराधः स दैवस्य न पुनर्मन्त्रिणामयम् ।
ENMSS@1930@2कार्यं सुघटितं यत्नाद् दैवयोगाद् विनश्यति ॥ १९३०॥
ENMSS@1931@1अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
ENMSS@1931@2अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ १९३१॥
ENMSS@1932@1अपराधानुरूपं च दण्डं पापेषु पातयेत् ।
ENMSS@1932@2उद्वेजयेद्धनैर्ऋद्धान् दरिद्रान् वधबन्धनैः ॥ १९३२॥
ENMSS@1933@1अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि ।
ENMSS@1933@2वर्धयसि विलसितं त्वं दासजनायात्र कुप्यसि च ॥ १९३३॥
ENMSS@1934@1अपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भात् ।
ENMSS@1934@2सेव्यो जनश्च कुपितः कथं नु दासो निरपराधः ॥ १९३४॥
ENMSS@1935@1अपराधीनाशोकः सहते चरणाहतिं सरोजदृशाम् ।
ENMSS@1935@2विलसितबकुलो वनिता- मुखवासी मद्यपात इव ॥ १९३५॥
ENMSS@1936@1अपराधेऽपि निःशङ्को नियोगी चिरसेवकः ।
ENMSS@1936@2स स्वामिनमवज्ञाय चरेच्च निरवग्रहः ॥ १९३६॥
ENMSS@1937@1अपराधो न मेऽस्तीति नैतद् विश्वासकारणम् ।
ENMSS@1937@2विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ १९३७॥
ENMSS@1938@1अपराधो मया कान्ते कृतो यदि त्वया मतः ।

ENMSS@1938@2निपात्य गिरिशृङ्गोच्चौ कुचौ किं न निपीड्यते ॥ १९३८॥

ENMSS@1939@1अपराह्णशीतलतरेण शनैरनिलेन लोलितलताङ्गुलये ।

ENMSS@1939@2निलयाय शाखिन इवाह्वयते ददुराकुलाः खगकुलानि गिरः ॥ १९३९॥

ENMSS@1939A@1अपरित्यक्तमात्मानम् इच्छता पण्ययोषिताम् ।

ENMSS@1939A@2नित्यौपयोगिकं द्रव्यम् आत्मसारं प्रदर्शयेत् ॥

ENMSS@1940@1अपरीक्षितपरवञ्चनम् अश्नति लोभादपेक्षितप्रेक्षी ।

ENMSS@1940@2व्याधूतपक्षमवशो विहन्यते पक्षिवत् क्षितिपः ॥ १९४०॥

ENMSS@1941@1अपरीक्षितलक्षणप्रमाणैरपरामृष्टपदार्थसार्थतत्त्वैः ।

ENMSS@1941@2अवशीकृतजैत्रयुक्तिजालैरलमेतैरनधीततर्कविद्यैः ॥ १९४१॥

ENMSS@1942@1अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम् ।

ENMSS@1942@2पश्चाद्भवति संतापो ब्राह्मणी नकुलं यथा ॥ १९४२॥

ENMSS@1943@1अपरोक्षधनो गम्यः श्रीमानपि नान्यथेति निर्दिष्टम् ।

ENMSS@1943@2कन्दर्पशास्त्रकारैः कुतः कथा लुप्तविभवस्य ॥ १९४३॥

ENMSS@1944@1अपर्णेयं भूभृद्वनमटति वल्काम्बरधरा जटालो दिग्वासाः शिखरिणि शिवोऽयं निवसति ।

ENMSS@1944@2इति भ्रान्त्यान्योऽन्यं क्षणमिलितयोः क्षोणितिलक द्विषद्दम्पत्योस्ते शिव

शिव भवन्ति प्रणतयः ॥ १९४४॥

ENMSS@1945@1अपर्णैव लता सेव्या विद्वद्भिरिति मे मतिः ।

ENMSS@1945@2यया वृतः पुराणोऽपि स्थाणुः सूतेऽमृतं फलम् ॥ १९४५॥

ENMSS@1946@1अपर्यन्तस्य कालस्य कियानंशः शरच्छतम् ।

ENMSS@1946@2तन्मात्रपरमायुर्यः स कथं स्वप्तुमर्हति ॥ १९४६॥

ENMSS@1947@1अपर्याप्तभुजायामः सखेदोऽस्याः सखीजनः ।

ENMSS@1947@2श्रोण्यां कथंचित् कुरुते रशनादामबन्धनम् ॥ १९४७॥

ENMSS@1948@1अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।

ENMSS@1948@2विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ १९४८॥

ENMSS@1949@1अपवादादभीतस्य समस्य गुणदोषयोः ।

ENMSS@1949@2असद्वृत्तेरहो वृत्तं दुर्विभावं विधेरिव ॥ १९४९॥

ENMSS@1950@1अपवादो भवेद् येन येन विप्रत्ययो भवेत् ।

ENMSS@1950@2नरके गम्यते येन तद् बुधः कथमाचरेत् ॥ १९५०॥

ENMSS@1951@1अपशङ्कमङ्कपरिवर्तनोचिताश्चलिताः पुरः पतिमुपैतुमात्मजाः ।

ENMSS@1951@2अनुरोदितीव करुणेन पत्रिणां विरुतेन वत्सलतयैष निम्नगाः ॥ १९५१॥

ENMSS@1952@1अपशास्त्रधनो राजा संचयं नाधिगच्छति ।

ENMSS@1952@2अस्थाने चास्य तद्वित्तं सर्वमेव विनश्यति ॥ १९५२॥

ENMSS@1953@1अपशूलं तमासाद्य लवणं लक्ष्मणानुजः ।

ENMSS@1953@2रुरोध संमुखीनो हि जयो रन्ध्रप्रहारिणाम् ॥ १९५३॥

ENMSS@1954@1अपशोकमनाः कुटुम्बिनीम् अनुगृह्णीष्व निवापदत्तिभिः ।

ENMSS@1954@2स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ॥ १९५४॥

ENMSS@1955@1अपश्चात्तापकृत् सम्यग् अनुबन्धिफलप्रदः ।

ENMSS@1955@2अदीर्घकालोऽभीष्टश्च प्रशस्तो मन्त्र उच्यते ॥ १९५५॥

ENMSS@1956@1अपश्यद्भिरिवेशानं रणान्निववृते गणैः ।

ENMSS@1956@2मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः ॥ १९५६॥

ENMSS@1957@1अपश्यद्भिर्महास्वादान् भावान् स्वाद्वविवेकिभिः ।

ENMSS@1957@2किं ज्ञेयमशनादन्यत् क्ष्मापैरन्धैरिवोक्षभिः ॥ १९५७॥

ENMSS@1958@1अपसरणमेव युक्तं मौनं वा तत्र राजहंसस्य ।

ENMSS@1958@2कटु रटति निकटवर्ती वाचाटष्टिट्टिभो यत्र ॥ १९५८॥

ENMSS@1959@1अपसरति न चक्षुषो मृगाक्षी रजनिरियं च न याति नैति निद्रा ।

ENMSS@1959@2प्रहरति मदनोऽपि दुःखितानां बत बहुशोऽभिमुखीभवन्त्यपायाः ॥ १९५९॥

ENMSS@1960@1अपसर पृथिवि समुद्राः संवृणुताम्बूनि भूधरा नमत ।

ENMSS@1960@2वामनहरिलघुतुन्दे जगतां कलहः स वः पायात् ॥ १९६०॥

ENMSS@1961@1अपसर मधुकर दूरं परिमलबहुलेऽपि केतकीकुसुमे ।

ENMSS@1961@2इह नहि मधुलवलाभो भवति परं धूलिधूसरं वदनम् ॥ १९६१॥

ENMSS@1962@1अपसर सखे दूरादस्मात् कटाक्षविषानलात् प्रकृतिविषमाद् योषित्सर्पाद् विलासफणाभृतः ।

ENMSS@1962@2इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधैश्चटुलवनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः ॥ १९६२॥

ENMSS@1963@1अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।

ENMSS@1963@2अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥ १९६३॥

ENMSS@1964@1अपसारसमायुक्तं नयज्ञैर्दुर्गमुच्यते ।

ENMSS@1964@2अपसारपरित्यक्तं दुर्गव्याजेन बन्धनम् ॥ १९६४॥

ENMSS@1965@1अपस्तरन्ति पाषाणा ह्यनुघ्नन्ति हि राक्षसान् ।

ENMSS@1965@2कपयः कर्म कुर्वन्ति कालस्य कुटिला गतिः ॥ १९६५॥
ENMSS@1966@1अपहत्य तमस्तीव्रं यथा भात्युदरे रविः ।
ENMSS@1966@2तथापहत्य पाप्मानं भाति गङ्गाजलोक्षितः ॥ १९६६॥
ENMSS@1967@1अपहरति मनो मे कोऽप्ययं कृष्णचौरः प्रणतदुरितचौरः पूतनाप्राणचौरः ।
ENMSS@1967@2वलयवसनचौरो बालगोपीजनानां नयनहृदयचौरः पश्यतां सज्जनानाम् ॥ १९६७॥
ENMSS@1968@1अपहरति महत्त्वं प्रार्थना किं न जाने जनयति गुरुलज्जामित्यहं किं न वेद्मि ।
ENMSS@1968@2तदपि वद वदान्यं तं सदा प्रत्यहं मां जठरपिठरवर्ती वह्निरर्थीकरोति ॥ १९६८॥
ENMSS@1969@1अपहरसि सदा मनांसि पुंसाम् अतिमहता गुणसंपरिग्रहेण ।
ENMSS@1969@2न च भवसि तथाप्यनेकचित्तो हृतमथवा विवृणोति कः परस्वम् ॥ १९६९॥
ENMSS@1970@1अपहस्तितबान्धवे त्वया विहितं साहसमस्य तृष्णया ।
ENMSS@1970@2तदिहानपराधिनि प्रिये सखि कोऽयं करुणोज्झितक्रमः ॥ १९७०॥
ENMSS@1971@1अपहाय शनैः पटीरवाटीरिह लाटीजनमानलुण्ठनाय ।
ENMSS@1971@2समुदेति मनोजराजधाटी- परिपाटीपटुरेष गन्धवाहः ॥ १९७१॥
ENMSS@1972@1अपहृत्य परस्यार्थं तेन धर्मं करोति यः ।
ENMSS@1972@2स दाता नरकं याति यस्यार्थस्तस्य तत्फलम् ॥ १९७२॥
ENMSS@1973@1अपह्नुवानस्य जनाय यन्निजाम् अधीरतामस्य कृतं मनोभुवा ।
ENMSS@1973@2अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ॥ १९७३॥
ENMSS@1974@1अपां निधिं वारिभिरर्चयन्ति दीपेन सूर्यं प्रतिबोधयन्ति ।
ENMSS@1974@2ताभ्यां तयोः किं परिपूर्णता स्याद् भक्त्या हि तुष्यन्ति महानुभावाः ॥ १९७४॥
ENMSS@1975@1अपां प्रवाहो गाङ्गोऽपि समुद्रं प्राप्य तद्रसः ।
ENMSS@1975@2भवत्यवश्यं तद् विद्वान् नाश्रयेदशुभात्मकम् ॥ १९७५॥
ENMSS@1976@1अपां मूले लीनं क्षणपरिचितं चन्दनरसे मुणालीहारादौ कृतलघुपदं चन्द्रमसि च ।
ENMSS@1976@2मुहूर्तं विश्रान्तं सरसकदलीकाननतले प्रियाकण्ठाश्लेषे निवसति परं शैत्यमधुना ॥ १९७६॥

ENMSS@1977@1अपां विहारे तव हारविभ्रमं करोतु नीरे पृषदुत्करस्तरन् ।
ENMSS@1977@2कठोरपीनोच्चकुचद्वयीतट- त्रुटत्तरः सारवसारवोर्मिजः ॥ १९७७॥
ENMSS@1978@1अपाकुरु कपोलतः सखि भुजङ्गवल्लीरसं परित्यज कुचस्थलात् त्रुटितबन्धनं कञ्चुकम् ।
ENMSS@1978@2पिधेहि दशनच्छदे दशनजक्षतं लाक्षया वदेत्थमबलागणे गुरुजने कथं यास्यसि ॥ १९७८॥
ENMSS@1979@1अपाकृत्याशेषाण्यपि च घनजालानि परितस्तमोधूमस्तोमोद्भवमलिनिमानं च तदनु ।
ENMSS@1979@2शरच्चन्द्रः शिल्पी रतिपतिमुदेऽसौ निजकरैः सुधासंदोहार्द्रैर्भुवनभवनं पाण्डुरयति ॥ १९७९॥
ENMSS@1980@1अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
ENMSS@1980@2इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥ १९८०॥
ENMSS@1981@1अपाङ्गपातैरपदेशपूर्वैरेणीदृशामेकशिलानगर्यात् ।
ENMSS@1981@2वीथीषु वीथीषु विनापराधं पदे पदे शृङ्खलिता युवानः ॥ १९८१॥
ENMSS@1982@1अपाङ्गसंसर्गि तरङ्गितं दृशोर्भ्रुवोररालान्तविलासि वेल्लितम् ।
ENMSS@1982@2विसारि रोमाञ्चनकञ्चुकं तनोस्तनोति योऽसौ सुभगे तवागतः ॥ १९८२॥
ENMSS@1983@1अपाङ्गस्तव तन्वङ्गि विचित्रोऽयं भुजङ्गमः ।
ENMSS@1983@2दृष्टमात्रः सुमनसाम् अपि मूर्छाविधायकः ॥ १९८३॥
ENMSS@1984@1अपाङ्गात् पुच्छमूलं तु तिर्यगश्वं प्रमाणयेत् ।
ENMSS@1984@2खुरान्तात् ककुदं यावद् ऊर्ध्वमानेन बुद्धिमान् ॥ १९८४॥
ENMSS@1985@1अपात्रं पात्रता याति यत्र पात्रं न विद्यते ।
ENMSS@1985@2अस्मिन् देशे द्रुमो नास्ति एरण्डोऽपि द्रुमायते ॥ १९८५॥
ENMSS@1986@1अपात्रवर्षणं जातु न कुर्यात् सद्भिगर्हितम् ।
ENMSS@1986@2अपात्रवर्षणात् किं स्याद् अन्यत् कोशक्षयादृते ॥ १९८६॥
ENMSS@1987@1अपात्रे पात्रताबुद्धिः पात्रे बुद्धिरपात्रता ।
ENMSS@1987@2ऋणानुबन्धरूपेण दातुरुत्पद्यते मतिः ॥ १९८७॥
ENMSS@1988@1अपात्रे रमते नारी गिरौ वर्षति वासवः ।
ENMSS@1988@2खलमाश्रयते लक्ष्मीः प्राज्ञः प्रायेण निर्धनः ॥ १९८८॥

ENMSS@1989@1अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः ।
ENMSS@1989@2युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ॥ १९८९॥
ENMSS@1990@1अपानेन पुनः कश्चित् प्रेरितः कालरूपिणा ।
ENMSS@1990@2निःश्वासोच्छ्वासकृद्याति जपन् हंसेत्यहर्निशम् ॥ १९९०॥
ENMSS@1991@1अपापघनसंवृतेरविशदस्मितात्युन्नमत् समस्तनरसादरग्रहणतः कृतार्थप्रिया ।
ENMSS@1991@2रतिर्मनसि जायते यदि कदापि शौर्याश्रया तदैव सकलं जनुः सफलमेवमाहात्मभूः ॥ १९९१॥
ENMSS@1992@1अपापास्तत्कुलीनाश्च मानयन्ति स्वकान् हितान् ।
ENMSS@1992@2एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः ॥ १९९२॥
ENMSS@1993@1अपामुद्धृत्तानां निजमुपदिशन्त्या स्थितिपदं दधत्या शालीनामवनतिमुदारे सति फले ।
ENMSS@1993@2मयूराणामुग्रं विषमिव हरन्त्या मदमहो कृतः कृत्स्नस्यायं विनय इव लोकस्य शरदा ॥ १९९३॥
ENMSS@1994@1अपायकलिता मनुर्जगति सापदः सम्पदो विनश्वरमिदं सुखं विषयजं श्रियश्चञ्चलाः ।
ENMSS@1994@2भवन्ति जरसारसास्तरललोचना योषितस्तदप्ययमहो जनस्तपसि नो परे
रज्यति ॥ १९९४॥
ENMSS@1995@1अपायसंदर्शनजां विपत्तिम् उपायसंदर्शनजां च सिद्धिम् ।
ENMSS@1995@2मेधाविनो नीतिविधिप्रयुक्तां पुरः स्फुरन्तीमिव दर्शयन्ति ॥ १९९५॥
ENMSS@1996@1अपायि मुनिना पुरा पुनरमायि मर्यादया अतारि कपिना पुरा पुनरदाहि लङ्कारिणा ।
ENMSS@1996@2अमन्थि मुरवैरिणा पुनरबन्धि लङ्कारिणा क्व नाम वसुधापते तव यशोऽम्बुधिः क्वाम्बुधिः ॥ १९९६॥
ENMSS@1997@1अपारः पाथोधिः पुलिनपदवी योजनशतं निरालम्बो मार्गो वियति किल
शून्या दश दिशः ।
ENMSS@1997@2इतीवायं कीरः कतिपयपदान्येव गगने मुहुर्भ्राम्यन् भ्राम्यन् पतति गुणवृक्षे पुनरपि ॥ १९९७॥
ENMSS@1998@1अपारपुलिनस्थलीभुवि हिमालये मालये निकामविकटोन्नते दुरधिरोहणे रोहणे ।

ENMSS@1998@2महत्यमरभूधरे गहनकन्दरे मन्दरे भ्रमन्ति न पतन्त्यहो परिणता भवत्कीर्तयः ॥ १९९८॥

ENMSS@1999@1अपारसंसारसमुद्रमध्ये संमज्ञतो मे शरणं किमस्ति ।

ENMSS@1999@2गुरो दयालो कृपया वदैतद् विश्वेशपादाम्बुजदीर्घनौका ॥ १९९९॥

ENMSS@2000@1अपारे काव्यसंसारे कविरेव प्रजापतिः ।

ENMSS@2000@2यथा वै रोचते विश्वं तथेदं परिवर्तते ॥ २०००॥

ENMSS@2001@1अपारे पाथोधौ किमिति सतिमिग्राहगहने निलीय श्रीनाथः स्वपिति भुजगे
शङ्कित इव ।

ENMSS@2001@2किमेतावद्भिर्वा भवतु किल सर्वातिशयितः श्रिया संश्लिष्टाङ्गो व्यपगतभयं को निवसतु ॥ २००१॥

ENMSS@2002@1अपारैर्व्यापारैरहरिह नयन्तोऽशनदशा- स्वथ स्नाताः संध्यां विदधति न जातु स्वसमये ।

ENMSS@2002@2त्यजन्तः स्वां वृत्तिं द्विजकुलभवा ग्रामगणकी- भवन्तो हन्तामी कथमपि च जीवन्ति बहवः ॥ २००२॥

ENMSS@2003@1अपार्थकमनायुष्यं गोविषाणस्य भक्षणम् ।

ENMSS@2003@2दन्ताश्च परिघृष्यन्ते रसश्चापि न लभ्यते ॥ २००३॥

ENMSS@2004@1अपार्थेतरयुक्तानां व्याससंग्रहशालिनाम् ।

ENMSS@2004@2अपि गोपालगीतानां निवेशो निगमादिषु ॥ २००४॥

ENMSS@2005@1अपास्तपाथेयसुधोपयोगैस्त्वच्चुम्बिनैव स्वमनोरथेन ।

ENMSS@2005@2क्षुधं च निर्वापयता तृषं च स्वादीयसाध्वा गमितः सुखं तैः
॥ २००५॥

ENMSS@2006@1अपास्तपाथोरुहि शायितं करे करोति लीलाकमलं किमाननम् ।

ENMSS@2006@2तनोषि हारं कियदस्त्रुणः स्त्रवैरदोषनिर्वासितभूषणे हृदि ॥ २००६॥

ENMSS@2007@1अपास्तस्ताराभिर्विधन इव कामी युवतिभिर्मधुच्छत्रच्छायां स्पृशति शशलक्ष्मा परिणतः ।

ENMSS@2007@2अयं प्राचीकर्णाभरणरचनाशोककुसुम- च्छटालक्ष्मीचौरः कलयति रविः पूर्वमचलम् ॥ २००७॥

ENMSS@2008@1अपास्य लक्ष्मीहरणोत्थवैरिताम् अचिन्तयित्वा च तदद्रिमन्थनम् ।

ENMSS@2008@2ददौ निवासं हरये महोदधिर्विमत्सरा धीरधियां हि वृत्तयः ॥ २००८॥

ENMSS@2009@1अपि कल्पानिलस्यैव तरङ्गस्य महोदधेः ।

ENMSS@2009@2शक्यते प्रसरो रोद्धुं नानुरक्तस्य चेतसः ॥ २००९॥
ENMSS@2010@1अपि कापुरुषो भीरुः स्याच्चेन्नृपतिसेवकः ।
ENMSS@2010@2तथापि न पराभूतिं जनादाप्नोति मानवः ॥ २०१०॥
ENMSS@2011@1अपि कापुरुषो भीरुः स्याच्चेन्नृपतिसेवकः ।
ENMSS@2011@2यदाप्नोति फलं लोकात् तस्यांशमपि नो गुणी ॥ २०११॥
ENMSS@2012@1अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः ।
ENMSS@2012@2कर्कटेन द्वितीयेन जीवितं परिरक्षितम् ॥ २०१२॥
ENMSS@2013@1अपि कालस्य यः कालः सोऽपि कालमपेक्षते ।
ENMSS@2013@2कर्तुं जगन्ति हन्तुं वा कालस्तेन जगत्प्रभुः ॥ २०१३॥
ENMSS@2014@1अपि कीर्त्यर्थमायान्ति नाशं सद्योऽतिमानिनः ।
ENMSS@2014@2न चेच्छन्त्ययशोमिश्रम् अप्येवानन्त्यमायुषः ॥ २०१४॥
ENMSS@2015@1अपि कुञ्जरकर्णाग्राद् अपि पिप्पलपल्लवात् ।
ENMSS@2015@2अपि विद्युद्विलसिताद् विलोलं ललनामनः ॥ २०१५॥
ENMSS@2016@1अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ।
ENMSS@2016@2अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥ २०१६॥
ENMSS@2017@1अपि घोरापराधस्य धर्ममाश्रित्य तिष्ठतः ।
ENMSS@2017@2स हि प्रच्छाद्यते दोषः शैलो मेघैरिवासितैः ॥ २०१७॥
ENMSS@2018@1अपि चाप्यफलं कर्म पश्यामः कुर्वतो जनान् ।
ENMSS@2018@2नान्यथा ह्यभिजानन्ति वृत्तिं लोके कथंचन ॥ २०१८॥
ENMSS@2019@1अपि चिन्तामणिश्चिन्तापरिश्रममपेक्षते ।
ENMSS@2019@2इदं त्वचिन्तितं मन्ये कृतमाश्चर्यमार्यया ॥ २०१९॥
ENMSS@2020@1अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
ENMSS@2020@2साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥ २०२०॥
ENMSS@2021@1अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
ENMSS@2021@2सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ २०२१॥
ENMSS@2022@1अपि जनकसुतायास्तच्च तच्चानुरूपं स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।
ENMSS@2022@2ननु पुनरिव तन्मे गोचरीभूतमक्ष्णोरभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥ २०२२॥
ENMSS@2023@1अपि जलकणान् पयोधेर्दूरादाहृत्य जायते जलदः ।

ENMSS@2023@2निकटाद् घटानपि शतं समीहरन् वारिहार्येव ॥ २०२३॥

ENMSS@2024@1अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् ।

ENMSS@2024@2स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥ २०२४॥

ENMSS@2025@1अपि तरुवनान्यूष्मायन्ते तपत्यपि यामिनी दहति सरसीवातोऽप्येष ज्वलन्ति

जलान्यपि ।

ENMSS@2025@2इति समधिकं ग्रीष्मे भीष्मे न पुण्यवतां भयं मलयजरसैर्दिग्धं

लब्ध्वा वधूस्तनमण्डलम् ॥ २०२५॥

ENMSS@2026@1अपि तुरगसमीपादुत्पतन्तं मयूरं न स रुचिरकलापं बाणलक्ष्यीचकार ।

ENMSS@2026@2सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे रतिविगलितबन्धे केशपाशे प्रियायाः

॥ २०२६॥

ENMSS@2027@1अपि तेजो निधिर्हन्त पतितो यदि जायते ।

ENMSS@2027@2सुरतं किमिवास्माकम् इति कोकैर्वियुज्यते ॥ २०२७॥

ENMSS@2028@1अपि त्वया कैरविणि व्यधायि मुधा सुधाबन्धुनि बन्धुभावः ।

ENMSS@2028@2जनापवादः परितः प्रयातः समागमो हन्त न जातु जातः ॥ २०२८॥

ENMSS@2029@1अपि दलन्मुकुले बकुले यया पदमधायि कदापि न तृष्णया ।

ENMSS@2029@2अहह सा सहसा विधुरे विधौ मधुकरी बदरीमनुवर्तते ॥ २०२९॥

ENMSS@2030@1अपि दिनमणिरेष क्लेशितः शीतसंघैरथ निशि निजभार्यां गाढमालिङ्ग्य

दोर्भ्याम् ।

ENMSS@2030@2स्वपिति पुनरुदेतुं सालसाङ्गस्तु तस्मात् किमु न भवतु दीर्घा यामिनी

कामिनीयम् ॥ २०३०॥

ENMSS@2031@1अपि दोर्भ्यां परिबद्धा बद्धापि गुणैरनेकधा निपुणैः ।

ENMSS@2031@2निर्गच्छति क्षणादिव जलधिजलोत्पत्तिपिच्छिला लक्ष्मीः ॥ २०३१॥

ENMSS@2032@1अपि नदथ निकामं दर्दुराः किं सुवर्ण- द्युतिभरमुपनीता

नूतनैर्वारिपूरैः ।

ENMSS@2032@2अयमचिरविनाशी शोचनीयस्तु भावी स चिरमवटसीम्नि प्राच्य एव क्रयो

वः ॥ २०३२॥

ENMSS@2033@1अपि नाम स दृश्येत पुरुषातिशयो भुवि ।

ENMSS@2033@2गर्वोच्छूनमुखा येन धनिनो नावलोकिताः ॥ २०३३॥

ENMSS@2034@1अपि नित्यानन्दमयं सहः श्रियं वहति संततं हृदये ।
ENMSS@2034@2कः साधारणपुरुषः प्रभवत्वेनामनादर्त्तुम् ॥ २०३४॥
ENMSS@2035@1अपि निपुणतरमधीतं दुर्विनयारूढचेतसः पुंसः ।
ENMSS@2035@2मणिरिव फणिफणवर्ती प्रभवति शोकाय लोकानाम् ॥ २०३५॥
ENMSS@2036@1अपि निर्मुक्तभोगेन स्वान्तःस्थविषयेक्षया ।
ENMSS@2036@2असद्भावाय जायेत जिह्मगेन सहासिका ॥ २०३६॥
ENMSS@2037@1अपि पञ्चशतं दण्ड्यान् दण्डयेत् पृथिवीपतिः ।
ENMSS@2037@2अभावे पञ्च कायस्थान् एकं वा स्वर्णकारकम् ॥ २०३७॥
ENMSS@2038@1अपि पञ्चशतं शूरा मृद्नन्ति महतीं चमूम् ।
ENMSS@2038@2अथवा पञ्च षट् सप्त विजयन्तेऽनिवर्तिनः ॥ २०३८॥
ENMSS@2039@1अपि पुत्रैः कलत्रैर्वा प्राणान् रक्षेत पण्डितः ।
ENMSS@2039@2विद्यमानैर्यतस्तैः स्यात् सर्वं भूयोऽपि देहिनाम् ॥ २०३९॥
ENMSS@2040@1अपि पौरुषमादेयं शास्त्रं चेद्युक्तिबोधकम् ।
ENMSS@2040@2अन्यत्त्वार्षमपि त्याज्यं भाव्यं न्याय्यैकसेविना ॥ २०४०॥
ENMSS@2041@1अपि प्रगल्भललनाकटाक्षचपलाः श्रियः ।
ENMSS@2041@2सन्मन्त्रिप्रणिधानेन चिरं तिष्ठन्ति भूभुजाम् ॥ २०४१॥
ENMSS@2042@1अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा विलोलद्वानीरं तव जननि
तीरं श्रितवताम् ।
ENMSS@2042@2सुधातः स्वादीयः सलिलमिदमातृप्ति पिबतां जनानामानन्दः परिहसति निर्वाणपदवीम् ॥ २०४२॥
ENMSS@2043@1अपि प्राणसमानिष्टान् पालितांल्लालितानपि ।
ENMSS@2043@2भृत्यान् युद्धे समुत्पन्ने पश्येच्छुष्कमिवेन्धनम् ॥ २०४३॥
ENMSS@2044@1अपि बन्धुतया नारी बहुपुत्रा गुणैर्युता ।
ENMSS@2044@2शोच्या भवतिसा नारी पतिहीना तपस्विनी ॥ २०४४॥
ENMSS@2045@1अपि ब्रह्मपरानन्दादिदमप्यधिकं ध्रुवम् ।
ENMSS@2045@2जहार नारदादीनां चित्तानि कथमन्यथा ॥ २०४५॥
ENMSS@2046@1अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुध्यति ।
ENMSS@2046@2तदर्थेन विचीर्णेन न कथंचित्सुहृद्द्रुहः ॥ २०४६॥
ENMSS@2047@1अपि भुजलतोत्क्षेपादस्याः कृतं परिरम्भणं प्रियसहचरीक्रीडालापे श्रुता अपि सूक्तयः ।

ENMSS@2047@2नवपरिणयव्रीडावत्या मुखोन्नतियत्नतो- ऽप्यलसवलिता तिर्यग्दृष्टिः करोति महोत्सवम् ॥ २०४७॥

ENMSS@2048@1अपि भोगिषु मणिधारिण एव निहंसि नतु यद्विषोऽपि परान् ।

ENMSS@2048@2तत्तव गरुड स्थाने दानवसंहारिवाहस्य ॥ २०४८॥

ENMSS@2049@1अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा ।

ENMSS@2049@2नादण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात् ॥ २०४९॥

ENMSS@2050@1अपि मन्दत्वमापन्नो नष्टो वापीष्टदर्शनात् ।

ENMSS@2050@2प्रायेण प्राणिनां भूयो दुःखवेगोऽधिको भवेत् ॥ २०५०॥

ENMSS@2051@1अपि मरणमुपैति सा मृगाङ्कि विलसति कैव कथा रसान्तरस्य ।

ENMSS@2051@2अयि कथमधुना दधाति शान्तिं विषमशरज्वरतीव्रदेहदाहः ॥ २०५१॥

ENMSS@2052@1अपि मानुष्यकं लब्ध्वा भवन्ति ज्ञानिनो न ये ।

ENMSS@2052@2पशुतैव वरा तेषां प्रत्यवायाप्रवर्तनात् ॥ २०५२॥

ENMSS@2053@1अपि मार्दवभावेन गात्रं संलीय बुद्धिमान् ।

ENMSS@2053@2अरिं नाशयते नित्यं यथा वल्ली महाद्रुमम् ॥ २०५३॥

ENMSS@2054@1अपि मुदमुपयान्तो वाग्विलासैः स्वकीयैः परभणितिषु तोषं यान्ति सन्तः

कियन्तः ।

ENMSS@2054@2निजघनमकरन्दस्यन्दपूर्णालवालः कलशसलिलसेकं नेहते किं रसालः ॥ २०५४॥

ENMSS@2055@1अपि मृगपतिना करीन्द्रकुम्भ- स्थलदलनोद्गतपौरुषेण यस्य ।

ENMSS@2055@2भयचकितदृशा प्रनष्टमुच्चैः स हि शरभीकुलराजचक्रवर्ती ॥ २०५५॥

ENMSS@2056@1अपि मृद्व्या गिरा लभ्यः सदा जागर्त्यतन्द्रितः ।

ENMSS@2056@2नास्ति धर्मसमो भृत्यः किंचिदुक्तस्तु धावति ॥ २०५६॥

ENMSS@2057@1अपि मेरूपमं प्राज्ञम् अपि शूरमपि स्थिरम् ।

ENMSS@2057@2तृणीकरोति तृष्णैका निमेषेण नरोत्तमम् ॥ २०५७॥

ENMSS@2058@1अपि यत्सुकरं कर्म तदप्येकेन दुष्करम् ।

ENMSS@2058@2बिशेषतोऽसहायेन किमु राज्यं महोदयम् ॥ २०५८॥

ENMSS@2059@1अपि राज्यादपि स्वर्गाद् अपीन्दोरपि माधवात् ।

ENMSS@2059@2अपि कान्ताकुचस्पर्शात् संतोषः परमं सुखम् ॥ २०५९॥

ENMSS@2060@1अपि लपितुमहं न हन्त शक्तस्तव पुरतः परितापमायताक्ष्याः ।

ENMSS@2060@2शिव शिव रसना यतो न यत्नाद् अपि यतते निजदाहशङ्कयेव ॥ २०६०॥

ENMSS@2061@1अपि ललितसुगुणवेणिः सालंकारापि या सुवर्णापि ।

ENMSS@2061@2रघुतिलक विहीना चेद् वाणी रमणीव नैव कल्याणी ॥ २०६१॥

ENMSS@2062@1अपि वज्रेण संघर्षम् अपि पद्भ्यां पराभवम् ।

ENMSS@2062@2सहन्ते गुणलोभेन त एव मणयो यदि ॥ २०६२॥

ENMSS@2063@1अपि वटतरोः स्पर्धां बीजेन सर्षप सांप्रतं परिणमसि यो मुष्टिः शाकं सति स्थलसौष्ठवे ।

ENMSS@2063@2जठरकुहरक्रीडद्विश्वो यदेकदलोदरे प्रलयशिशुको देवः शिश्ये पुरेति ह शुश्रुमः ॥ २०६३॥

ENMSS@2064@1अपि वर्षशतं स्थित्वा सदा कृत्रिमरागिणी ।

ENMSS@2064@2वेश्या शुकीव निःश्वासा निःसङ्गेभ्यः पलायते ॥ २०६४॥

ENMSS@2065@1अपि विधिः कुसुमानि तवाशुगान् स्मर विधाय न निर्वृतिमाप्तवान् ।

ENMSS@2065@2अदित पञ्च हि ते स नियम्य तांस्तदपि तैर्बत जर्जरितं जगत् ॥ २०६५॥

ENMSS@2066@1अपि वीर्योत्कटः शत्रुर्यतो भेदेन सिध्यति ।

ENMSS@2066@2तस्माद् भेदः प्रयोक्तव्यः शत्रूणां विजिगीषुणा ॥ २०६६॥

ENMSS@2067@1अपि वेत्ति षडक्षराणि चेद् उपदेष्टुं शितिकण्ठमिच्छति ।

ENMSS@2067@2वसनाशनमात्रमस्ति चेद् धनदादप्यतिरिच्यते खलः ॥ २०६७॥

ENMSS@2068@1अपि शारदचन्द्रिका यदीयां तुलनां गच्छति दुष्करैस्तपोभिः ।

ENMSS@2068@2न तदुज्झति मानसं मदीयं हसितं खञ्जनमञ्जुलोचनायाः ॥ २०६८॥

ENMSS@2069@1अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः ।

ENMSS@2069@2सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ॥ २०६९॥

ENMSS@2070@1अपि शिशिरतरोपचारयोग्यं द्वितयमिदं युगपन्न सह्यमेव ।

ENMSS@2070@2जरठितरविदीधितिश्च कालो दयितजनेन समं च विप्रयोगः ॥ २०७०॥

ENMSS@2071@1अपि श्रोणिभरस्वैरां धर्तुं तामशकन्न सः ।

ENMSS@2071@2तदङ्गसङ्गजस्तम्भो गजस्तम्भोरुदोरपि ॥ २०७१॥

ENMSS@2072@1अपि संतापशमनाः शुद्धाः सुरभिशीतलाः ।

ENMSS@2072@2भुजङ्गसङ्गाज्जायन्ते भीषणाश्चन्दनद्रुमाः ॥ २०७२॥

ENMSS@2073@1अपि संपूर्णतायुक्तैः कर्तव्याः सुहृदो बुधैः ।

ENMSS@2073@2नदीशः परिपूर्णोऽपि चन्द्रोदयमपेक्षते ॥ २०७३॥
ENMSS@2074@1अपि संभृतस्य सततं रिक्तत्वं बिभ्रतो विसर्जनतः ।
ENMSS@2074@2उदरस्योदारस्य च केवलमाकारतो भेदः ॥ २०७४॥
ENMSS@2075@1अपि सत्पथनिष्ठानाम् आशाः पूरयतामपि ।
ENMSS@2075@2अगस्त्यवृत्तिर्मेघानां हन्त मालिन्यकारणम् ॥ २०७५॥
ENMSS@2076@1अपि स दिवसः किं स्याद्यत्र प्रियामुखपङ्कजे मधु मधुकरीवास्मद्दृष्टिर्विकासिनि पास्यति ।
ENMSS@2076@2तदनु च मृदुस्निग्धालापक्रमाहितनर्मणः सुरतसचिवैरङ्गैः सङ्गो ममापि भविष्यति ॥ २०७६॥
ENMSS@2077@1अपि सर्वविदो न राजते वचनं श्रोतरि बोधवर्जिते ।
ENMSS@2077@2अपि भर्तरि नष्टलोचने विफलः किं न कलत्रविभ्रमः ॥ २०७७॥
ENMSS@2078@1अपि सहवसतामसतां जलरुहजलवद्भवत्यसंश्लेषः ।
ENMSS@2078@2दूरेऽपि सतां वसतां प्रीतिः कुमुदेन्दुवद् भवति ॥ २०७८॥
ENMSS@2079@1अपि सागरपर्यन्ता विचेतव्या वसुन्धरा ।
ENMSS@2079@2देशो ह्यरत्निमात्रोऽपि नास्ति दैवज्ञवर्जितः ॥ २०७९॥
ENMSS@2080@1अपि सुभगं तव वदनं पश्यति सुभगे यदा यदा चन्द्रः ।
ENMSS@2080@2ग्लायति हन्त पिधत्ते सपदि मुखं स्वं पयोदान्तः ॥ २०८०॥
ENMSS@2081@1अपि स्थानुवदासीत शुष्यन् परिगतः क्षुधा ।
ENMSS@2081@2न त्वेवानात्मसंपन्नाद् वृत्तिमीहेत पण्डितः ॥ २०८१॥
ENMSS@2082@1अपि स्यात् पितृहा वैरी सोऽपि दानविलोभितः ।
ENMSS@2082@2गत्वा विश्वासभावं स शत्रोरात्मानमर्पयेत् ॥ २०८२॥
ENMSS@2083@1अपि स्वमस्वप्नमसूषुपन्नमी परस्य दाराननवैतुमेव माम् ।
ENMSS@2083@2स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय हृदापि तादृशीम् ॥ २०८३॥
ENMSS@2084@1अपि स्वल्पतरं कार्यं यद्भवेत् पृथिवीपतेः ।
ENMSS@2084@2तन्न वाच्यं सभामध्ये प्रोवाचेदं बृहस्पतिः ॥ २०८४॥
ENMSS@2085@1अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम् ।
ENMSS@2085@2देवानां च विनाशः स्याद् ध्रुवं तस्य गुरोरपि ॥ २०८५॥
ENMSS@2086@1अपि स्वैः सर्वस्वैः पुनरपधनैः कैरपि धनैः परित्राणैः प्राणैर्यदपि च विधेयं परहितम् ।
ENMSS@2086@2तदद्यैतच्छब्दात् परभृत भवत्येव भवतस्ततः शब्दालस्यं

कथमपि निरस्यं क्षणमपि ॥ २०८६॥

ENMSS@2087@1अपीडयन् बलं शत्रूञ् जिगीषुरभिषेणयेत् ।

ENMSS@2087@2सुखसाध्यं द्विषां सैन्यं दीर्घप्रयाणपीडितम् ॥ २०८७॥

ENMSS@2088@1अपीतक्षीबकादम्बम् असंमृष्टामलाम्बरम् ।

ENMSS@2088@2अप्रसादितशुद्धाम्बु जगदासीन्मनोहरम् ॥ २०८८॥

ENMSS@2089@1अपुत्रत्वं भवच्छ्रेयो न तु स्याद्विगुणः सुतः ।

ENMSS@2089@2जीवन्नप्यविनीतोऽसौ मृत एव न संशयः ॥ २०८९॥

ENMSS@2090@1अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ।

ENMSS@2090@2तस्मात् पुत्रमुखं दृष्ट्वा भवेत् पश्चाद्धि तापसः ॥ २०९०॥

ENMSS@2091@1अपुत्रस्य गृहं शून्यं दिशः शून्यास्त्वबान्धवाः ।

ENMSS@2091@2मूर्खस्य हृदयं शून्यं सर्वशून्या दरिद्रता ॥ २०९१॥

ENMSS@2092@1अपुत्रस्य गृहं शोच्यं शोच्यं राज्यमराजकम् ।

ENMSS@2092@2निराहाराः प्रजाः शोच्या शोच्यं मैथुनमप्रजम् ॥ २०९२॥

ENMSS@2093@1अपुनर्देहिशब्दार्थम् अप्रत्युपकृतिक्षमम् ।

ENMSS@2093@2अर्थिनं कुरुते कश्चित् पुनरावृत्तिवर्जितम् ॥ २०९३॥

ENMSS@2094@1अपुष्यत घनावली भुवनजीवनैर्यत्करैरवर्ध्यत
सुधारुचिर्बहुबुधालिसंतर्पणः ।

ENMSS@2094@2तमन्धतमसच्छिदं रविमवेक्ष्य जाज्वल्यसे त्वमेव रविकान्ततामयसि
हन्त किं कुर्महे ॥ २०९४॥

ENMSS@2095@1अपूजितैवास्तु गिरीन्द्रकन्या किं पक्षपातेन मनोभवस्य ।

ENMSS@2095@2यद्यस्ति दूती सरसोक्तिदक्षा दासः पतिः पादतले वधूनाम् ॥
२०९५॥

ENMSS@2096@1अपूजितोऽतिथिर्यस्य गृहाद्याति विनिःश्वसन् ।

ENMSS@2096@2गच्छन्ति पितरस्तस्य विमुखाः सह दैवतैः ॥ २०९६॥

ENMSS@2097@1अपूज्या यत्र पूज्यन्ते पूज्यानां तु विमानना ।

ENMSS@2097@2त्रीणि तत्र प्रवर्तन्ते दुर्भिक्षं मरणं भयम् ॥ २०९७॥

ENMSS@2098@1अपूज्या यत्र पूज्यन्ते पूज्यानामप्यमानना ।

ENMSS@2098@2तव दैवकृतो दण्डः सद्यः पतति दारुणः ॥ २०९८॥

ENMSS@2099@1अपूर्णे नैव मर्तव्यं संपूर्णे नैव जीवति ।

ENMSS@2099@2तस्माद्धैर्यं विधातव्यं हन्तव्या परवाहिनी ॥ २०९९॥

ENMSS@2100@1अपूर्वं चौर्यमभ्यस्तं त्वया चञ्चललोचने ।

ENMSS@2100@2दिवापि जाग्रतां पुंसां चेतो हरसि दूरतः ॥ २१००॥
ENMSS@2101@1अपूर्वं यद्वस्तु प्रथयति विना कारणकलां जगद् ग्रावप्रख्यं निजरसभरात् सारयति च ।
ENMSS@2101@2क्रमात् प्रख्योपाख्याप्रसरसुभगं भासयति तत् सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥ २१०१॥
ENMSS@2102@1अपूर्वः कोऽपि कोपाग्निः सज्जनस्य खलस्य च ।
ENMSS@2102@2एकस्य शाम्यति स्नेहाद् वर्धतेऽन्यस्य वारितः ॥ २१०२॥
ENMSS@2103@1अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
ENMSS@2103@2व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ॥ २१०३॥
ENMSS@2104@1अपूर्वः कोऽपि तन्वङ्ग्या मम मार्गः प्रदर्शितः ।
ENMSS@2104@2योगं चिन्तयतो येन राग एव विवर्धते ॥ २१०४॥
ENMSS@2105@1अपूर्वकर्मचण्डालम् अपि मुग्धे विमुञ्च माम् ।
ENMSS@2105@2श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥ २१०५॥
ENMSS@2106@1अपूर्वदेशाधिगमे युवराजाभिषेचने ।
ENMSS@2106@2पुत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते ॥ २१०६॥
ENMSS@2107@1अपूर्वमधुरामोदप्रमोदितदिशस्ततः ।
ENMSS@2107@2आययुर्भृङ्गमुखराः शिरः शेखरशालिनः ॥ २१०७॥
ENMSS@2108@1अपूर्वयेव तत्कालसमागमसकामया ।
ENMSS@2108@2दृष्टेन राजन् वपुषा कटाक्षैर्विजयश्रिया ॥ २१०८॥
ENMSS@2109@1अपूर्वा रसनाव्याली खलाननबिलेशया ।
ENMSS@2109@2कर्णमूले दशत्यन्यं हरत्यन्यस्य जीवितम् ॥ २१०९॥
ENMSS@2110@1अपूर्वाह्लाददायिन्य उच्चैस्तरपदाश्रयाः ।
ENMSS@2110@2अतिमोहापहारिण्यः सूक्तयो हि महीयसाम् ॥ २११०॥
ENMSS@2111@1अपूर्विणा न कर्तव्यं कर्म लोके विगर्हितम् ।
ENMSS@2111@2कृतपूर्विणस्तु त्यजतो महान् धर्म इति श्रुतिः ॥ २१११॥
ENMSS@2112@1अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः ।
ENMSS@2112@2मार्गणौघः समायाति गुणो जाति दिगन्तरम् ॥ २११२॥
ENMSS@2113@1अपूर्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले ।
ENMSS@2113@2दूरतो दहते गात्रं गात्रलग्नः सुशीतलः ॥ २११३॥
ENMSS@2114@1अपूर्वो भाति भारत्याः काव्यामृतफले रसः ।
ENMSS@2114@2चर्वणे सर्वसामान्ये स्वादुवित् केवलं कविः ॥ २११४॥

ENMSS@2115@1अपूर्वोऽयं कान्ते ज्वलति मुखदीपस्तव चिरं तमो द्रष्ट् णां यो जनयतितरां याति सुतनो ।
ENMSS@2115@2अधस्ताद्यत्रेयं बत सुरभिधूमालकततिर्यदीया वार्तैव ज्वलयति पतंगानिव जनान् ॥ २११५॥
ENMSS@2116@1अपूर्वोऽयं धनुर्वेदो मन्मथस्य महात्मनः ।
ENMSS@2116@2शरीरमक्षतं कृत्वा भिनत्त्यन्तर्गतं मनः ॥ २११६॥
ENMSS@2117@1अपूर्वोऽयं पन्थाः शिव तव विभुत्वस्य कतमो जगद्वन्धो यत्ते पदयुगमकामं प्रणमताम् ।
ENMSS@2117@2प्रयाति प्रध्वंसं न खलु दुरितं केवलमिदं चिरोपात्तं सद्यः सुकृतमपि सर्वं विगलति ॥ २११७॥
ENMSS@2118@1अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने ।
ENMSS@2118@2शोऽन्तरं यो विजानाति स विद्वन्नात्र संशयः ॥ २११८॥
ENMSS@2119@1अपृच्छं पुत्रदारादींस्तैरुक्तोऽहं रघत्तम ।
ENMSS@2119@2पापं तवैव तत्सर्वं वयं तु फलभागिनः ॥ २११९॥
ENMSS@2120@1अपृष्टस्तस्य न ब्रूयाद् यश्च नेच्छेत् पराभवम् ।
ENMSS@2120@2एष एव सतां धर्मो विपरीतोऽसतां मतः ॥ २१२०॥
ENMSS@2121@1अपृष्टस्तु नरः किंचिद् यो ब्रूते राजसंसदि ।
ENMSS@2121@2न केवलमसंमानं लभते च विडम्बनाम् ॥ २१२१॥
ENMSS@2122@1अपृष्टेन न वक्तव्यः सचिवेन विपश्चिता ।
ENMSS@2122@2नानुशिष्यादपृच्छन्तं महदेतद्धि साहसम् ॥ २१२२॥
ENMSS@2123@1अपृष्टेनापि वक्तव्यं सचिवेनात्र किंचन ।
ENMSS@2123@2पृष्टेन तु विशेषेण वाच्यं पथ्यं महीपतेः ॥ २१२३॥
ENMSS@2124@1अपृष्टोऽत्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः ।
ENMSS@2124@2न केवलमसंमानं लभते च विडम्बनम् ॥ २१२४॥
ENMSS@2125@1अपृष्ट्वैव भवेन्मूढज्ञानं मनसि चिन्तनात् ।
ENMSS@2125@2अपूर्णः कुरुते शब्दं न पूर्णः कुरुते घटः ॥ २१२५॥
ENMSS@2126@1अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
ENMSS@2126@2सदा लोकहितासक्ता रत्नदीपा इवोत्तमाः ॥ २१२६॥
ENMSS@2127@1अपेताः शत्रुभ्यो वयमिति विषादोऽयमफलः प्रतीकारस्त्वेषामनिशमनुसंधातुमुचितः ।
ENMSS@2127@2जरासंधाद्भग्नः सह हलभृता दानवरिपुर्जघानैनं पश्चान्न

किमनिलसूनुः प्रियसखः ॥ २१२७॥
ENMSS@2128@1अपेहि हृदयाद्वा मे वामे दर्शनमेहि वा ।
ENMSS@2128@2अदूरविरहोत्कण्ठादुःखं दुःकेन सह्यते ॥ २१२८॥
ENMSS@2129@1अप्यखिलालंकारा- नाकलयन्तोऽपि रसविदश्चित्रम् ।
ENMSS@2129@2कलयन्ति सरसकाव्ये नालंकारं कदाचिदपि ॥ २१२९॥
ENMSS@2130@1अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
ENMSS@2130@2यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥ २१३०॥
ENMSS@2131@1अप्यतिशयितमनर्थं शमयत्यर्थं समर्पयन् नृपतिः ।
ENMSS@2131@2तमनर्पयन् निरर्थं प्राणेन समं परित्यजत्यर्थम् ॥ २१३१॥
ENMSS@2132@1अप्यत्युच्चो भूमिसमः पार्थिवोऽपि न पार्थिवः ।
ENMSS@2132@2मानार्थं जीवितं तस्य कृते माने न जीवति ॥ २१३२॥
ENMSS@2133@1अप्यनारभमाणस्य विभोरुत्पादिताः परैः ।
ENMSS@2133@2व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः ॥ २१३३॥
ENMSS@2134@1अप्यनावर्जिताः स्वेन फलरागेण संनताः ।
ENMSS@2134@2अर्भकैरपि गृह्यन्ते साधुसंतानशाखिनः ॥ २१३४॥
ENMSS@2135@1अप्यनेकैरुपचितैर्दुर्विनीतैः सुतैरलम् ।
ENMSS@2135@2निदर्शनं धार्तराष्ट्राः शतं दुर्योधनादयः ॥ २१३५॥
ENMSS@2136@1अप्यभीष्टा न लभ्यन्ते संत्यक्ता न त्यजन्ति च ।
ENMSS@2136@2वासना इव संसारे मोहनैकपराः स्त्रियः ॥ २१३६॥
ENMSS@2137@1अप्यशक्यं त्वया दत्तं दुःखं शक्यन्तरात्मनि ।
ENMSS@2137@2बाष्पो वाहीकनारीणां वेगवाही कपोलयोः ॥ २१३७॥
ENMSS@2138@1अप्याकरसमुत्पन्नमणिजातिरसंस्कृता ।
ENMSS@2138@2जातरूपेण कल्याणि न हि संयोगमर्हति ॥ २१३८॥
ENMSS@2139@1अप्यात्मनो विनाशं गणयति न खलः परव्यसनहृष्टः ।
ENMSS@2139@2प्रायो मस्तकनाशे समरमुखे नृत्यति कबन्धः ॥ २१३९॥
ENMSS@2140@1अप्यापत्समयः साधोः प्रयाति श्लाघनीयताम् ।
ENMSS@2140@2विधोर्विधुंतुदास्कन्दविपत्कालोऽपि सुन्दरः ॥ २१४०॥
ENMSS@2141@1अप्यामीलितपङ्कजां कमलिनीमप्युल्लसत्पल्लवां वासन्तीमपि सौधभित्तिपतितामात्मप्रतिच्छायिकाम् ।
ENMSS@2141@2मन्वानः प्रथमं प्रियेति पुलकस्वेदप्रकम्पाकुलं प्रीत्यालिङ्गति नास्ति सेति न पुनः खेदोत्तरं मूर्च्छति ॥ २१४१॥

ENMSS@2142@1अप्युत्कटे च रौद्रे च शत्रौ यस्य न हीयते ।

ENMSS@2142@2धैर्यं प्राप्ते महीपस्य न स याति पराभवम् ॥ २१४२॥

ENMSS@2143@1अप्युन्नतपदारूढः पूज्यान् नैवापमानयेत् ।

ENMSS@2143@2नहुषः शक्रतां प्राप्य च्युतोऽगस्त्यावमाननात् ॥ २१४३॥

ENMSS@2144@1अप्युन्मत्तात् प्रलपतो बालाच्च परिसर्पतः ।

ENMSS@2144@2सर्वतः सारमादद्याद् अश्मभ्य इव काञ्चनम् ॥ २१४४॥

ENMSS@2145@1अप्युपायैस्त्रिभिस्तात योऽर्थः प्राप्तुं न शक्यते ।

ENMSS@2145@2तस्य विक्रमकालांस्तान् युक्तानाहुर्मनीषिणः ॥ २१४५॥

ENMSS@2146@1अप्युद्दामव्यसनसरणेः संगमे कामुकानां भद्रं भद्रे
भुवनजयिनस्त्वत्कलाकौलशस्य ।

ENMSS@2146@2अप्युत्साहप्रचुरसुहृदः कामकेलीनिवासाः प्रौढोत्साहास्तव सुवदने
स्वस्तिमन्तो विलासाः ॥ २१४६॥

ENMSS@2147@1अप्येकवंशजनुषोः पश्यत पूर्णत्वतुच्छताभाजोः ।

ENMSS@2147@2ज्याकार्मुकयोः कश्चिद् गुणभूतः कश्चिदपि भर्ता ॥ २१४७॥

ENMSS@2148@1अप्येतद्रजनीमयं जगदथो निद्रामयी सा निशा निद्रा स्वप्नमयी भवेदथ
च स स्वप्नो मृगाक्षीमयः ।

ENMSS@2148@2सेयं मानमयी मम प्रियतमा तच्चाटुचेष्टामयो मादृक् क्वेति
समीहितैकविधये संकल्प तुभ्यं नमः ॥ २१४८॥

ENMSS@2149@1अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः ।

ENMSS@2149@2राजदोषपरामृष्टास्तिष्ठन्ते नापराधिनः ॥ २१४९॥

ENMSS@2150@1अप्यौत्सुक्ये महति दयितप्रार्थनासु प्रतीपाः काङ्क्षन्त्योऽपि व्यतिकरसुखं
कातराः स्वाङ्गदाने ।

ENMSS@2150@2आबाध्यन्ते न खलु मदनेनैव लब्धान्तरत्वाद् आबाधन्ते मनसिजमपि
क्षिप्तकालाः कुमार्यः ॥ २१५०॥

ENMSS@2151@1अप्रकटवर्तितस्तन- मण्डलिकानिभृतचक्रदर्शिन्यः ।

ENMSS@2151@2आवेशयन्ति हृदयं स्मरचर्यागुप्तयोगिन्यः ॥ २१५१॥

ENMSS@2152@1अप्रकटीकृतशक्तिः शक्तोऽपि जनात् तिरस्क्रियां लभते ।

ENMSS@2152@2निवसन्नन्तर्दारुणि लङ्घ्यो वह्निर्न तु ज्वलितः ॥ २१५२॥

ENMSS@2153@1अप्रगल्भस्य या विद्या कृपणस्य च यद्धनम् ।

ENMSS@2153@2यच्च बाहुबलं भीरोर्व्यर्थमेतत् त्रयं भुवि ॥ २१५३॥

ENMSS@2154@1अप्रगल्भाः पदन्यासे जननीरागहेतवः ।
ENMSS@2154@2सन्त्येके बहुलालापाः कवयो बालका इव ॥ २१५४॥
ENMSS@2155@1अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना ।
ENMSS@2155@2काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत् ॥ २१५५॥
ENMSS@2156@1अप्रणाद्योऽतिथिः सायं सूर्योढो गृहमेधिनाम् ।
ENMSS@2156@2पूजया तस्य देवत्वं प्रयान्ति गृहमेधिनः ॥ २१५६॥
ENMSS@2157@1अप्रतिकृत्यात्मानं सहसानर्थेषु न प्रवर्तेत ।
ENMSS@2157@2शिरसि धृतेऽमृतकिरणे विषमघसद्विषमनेत्रोऽपि ॥ २१५७॥
ENMSS@2158@1अप्रतिबुद्धे श्रोतरि वक्तुर्वाक्यं प्रयाति वैफल्यम् ।
ENMSS@2158@2नयनविहीने भर्तरि लावण्यमिवेह खञ्जनाक्षीणाम् ॥ २१५८॥
ENMSS@2159@1अप्रतिष्ठाश्च ये केचिद् अधर्मशरणाश्च ये ।
ENMSS@2159@2तेषां प्रतिष्ठा गङ्गेह शरणं शर्म वर्म च ॥ २१५९॥
ENMSS@2160@1अप्रत्यक्षाणि शास्त्राणि विवादस्तत्र केवलम् ।
ENMSS@2160@2प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥ २१६०॥
ENMSS@2161@1अप्रत्याकलितप्रभावविभवे सर्वाश्रयाम्भोनिधौ वासो नाल्पतपःफलं यदपरं दोषोऽयमेको महान् ।
ENMSS@2161@2शम्बूकोऽपि यदत्र दुर्लभतरै रत्नैरनर्घैः सह
स्पर्धामेकनिवासकारणवशादेकान्ततो वाञ्छति ॥ २१६१॥
ENMSS@2162@1अप्रदाता समृद्धोऽसौ दरिद्रश्च महामनाः ।
ENMSS@2162@2अश्रुतश्च समुन्नद्धस्तमाहुर्मूढचेतसम् ॥ २१६२॥
ENMSS@2163@1अप्रदीपा यथा रात्रिरनादित्यं यथा नभः ।
ENMSS@2163@2तथासांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि ॥ २१६३॥
ENMSS@2164@1अप्रधानः प्रधानः स्यात् पार्थिवं यदि सेवते ।
ENMSS@2164@2प्रधानोऽप्यप्रधानः स्याद् यदि सेवाविवर्जितः ॥ २१६४॥
ENMSS@2165@1अप्रभूतमतनीयसि तन्वी काञ्चिधाम्नि पिहितैकतरोरु ।
ENMSS@2165@2क्षौममाकुलकरा विचकर्ष क्रान्तपल्लवमभीष्टतमेन ॥ २१६५॥
ENMSS@2166@1अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः ।
ENMSS@2166@2कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम् ॥ २१६६॥
ENMSS@2167@1अप्रमत्तेऽपि पुरुषे हितकार्यावलम्बिनि ।
ENMSS@2167@2दैवमुन्मार्गरसिकम् अन्यथैव प्रमद्यते ॥ २१६७॥
ENMSS@2168@1अप्रमादश्च कर्तव्यस्त्वया राज्ञः समाश्रये ।

ENMSS@2168@2त्वदीयस्य शरीरस्य वयं भाग्योपजीविनः ॥ २१६८॥
ENMSS@2169@1अप्रसन्नमपराद्धरि पत्यौ कोपदीप्तमुररीकृतधैर्यम् ।
ENMSS@2169@2क्षालितं नु शमितं नु वधूनां द्रावितं नु हृदयं मधुवारैः
॥ २१६९॥
ENMSS@2170@1अप्रसादोऽनधिष्ठानं देयांशहरणं च यत् ।
ENMSS@2170@2कालयापोऽप्रतीकारस्तद् वैराग्यस्य कारणम् ॥ २१७०॥
ENMSS@2171@1अप्रस्तावस्तुतिभिरनिशं कर्णशूलं करोति स्वं दारिद्र्यं वदति
वसनं दर्शयत्येव जीर्णम् ।
ENMSS@2171@2छायाभूतश्चलति न पुरः पार्श्वयोर्नैव पश्चान् निःस्वः खेदं
दिशति धनिनां व्याधिवद्दुश्चिकित्स्यः ॥ २१७१॥
ENMSS@2172@1अप्राकृतः स कथमस्तु न विस्मयाय यस्मिन्नुवास करुणा च कृतज्ञता
च ।
ENMSS@2172@2लक्ष्मीश्च सात्त्विकगुणज्वलितं च तेजो धर्मश्च मानविनयौ च
पराक्रमश्च ॥ २१७२॥
ENMSS@2173@1अप्राकृतस्य चारितातिशयस्य भावैरत्यद्भुतैर्मम हृतस्य
तथाप्यनास्था ।
ENMSS@2173@2कोऽप्येष वीरशिशुकाकृतिरप्रमेय- सामर्थ्यसारसमुदायमयः पदार्थः
॥ २१७३॥
ENMSS@2174@1अप्राकृतस्याहवदुर्मदस्य निवार्यमस्यास्त्रबलेन वीर्यम् ।
ENMSS@2174@2अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः ॥ २१७४॥
ENMSS@2175@1अप्राज्ञेन च कातरेण च गुणः स्याद् भक्तियुक्तेन कः
प्रज्ञाविक्रमशालिनोऽपि हि भवेत् किं भक्तिहीनात् फलम् ।
ENMSS@2175@2प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये ते भृत्या नृपतेः
कलत्रमितरे संपत्सु चापत्सु च ॥ २१७५॥
ENMSS@2176@1अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
ENMSS@2176@2लभते बुद्ध्यवज्ञानम् अवमानं च भारत ॥ २१७६॥
ENMSS@2177@1अप्राप्तकालवचनं बृहस्पतिरपि ब्रुवन् ।
ENMSS@2177@2प्राप्नुयाद् बुद्धिशैथिल्यम् अपमानं च शाश्वतम् ॥ २१७७॥
ENMSS@2178@1अप्राप्तकालो यो मूर्खो हसेत् स्वेच्छानुसारतः ।
ENMSS@2178@2प्राप्नुयाद् बुद्ध्यवज्ञानं सभायां चैव शाश्वतम् ॥ २१७८॥

ENMSS@2179@1अप्राप्तकेलिसुखयोरतिमानरुद्ध- संधानयो रहसि जातरुषोरकस्मात्
।
ENMSS@2179@2यूनोर्मिथोऽभिलषतोः प्रथमानुनीतिं भावाः प्रसादपिशुनाः क्षपयन्ति निद्राम् ॥ २१७९॥
ENMSS@2180@1अप्राप्तपुष्पोद्गमविभ्रमैव रुद्धा भुजङ्गेन तथा यथेयम् ।
ENMSS@2180@2न शक्यते स्प्रष्टुमपीहमानैरामोदिनी चन्दनशाखिकेव ॥ २१८०॥
ENMSS@2181@1अप्राप्तप्रथमावकर्तनरुषा व्यानम्रमूकीभवद्- वक्रेष्वन्यशिरःसु यस्य दहने छिन्नं शिरो जुह्वतः ।
ENMSS@2181@2उच्चार्य स्वयमेव मन्त्रमकरोन्नास्याहमित्यात्मनस्त्यागं पङ्क्तिमुखः स विक्रमसुहृद्वीरः कथं वर्ण्यते ॥ २१८१॥
ENMSS@2182@1अप्राप्तयौवना नारी न कामाय न शान्तये ।
ENMSS@2182@2संप्राप्ते षोडशे वर्षे गर्दभी चाप्सरायते ॥ २१८२॥
ENMSS@2183@1अप्राप्तवल्लभसमागमनाधिकायाः सख्याः पुरोऽत्र निजचित्तविनोदबुद्ध्या
।
ENMSS@2183@2आलापवेषगतिहास्यविकत्थनाद्यैः प्राणेश्वरानुकृतिमाकलयन्ति लीलाम् ॥ २१८३॥
ENMSS@2184@1अप्राप्येऽपि यथा कामे धर्मे चिन्ता न किं तथा ।
ENMSS@2184@2अलाभेऽपि द्वयोरेका भयदा शिवदापरा ॥ २१८४॥
ENMSS@2185@1अप्राप्येषुरुदासितासिरशनेरारात् कुतः शङ्कुतश्चक्रव्युत्क्रमकृत् परोक्षपरशुः शूलेन शून्या यया ।
ENMSS@2185@2मृत्युर्दैत्यपतेः कृतः स सदृशः पादाङ्गुलीपर्वतः पार्वत्या प्रतिपाल्यतां त्रिभुवनं निःशल्यकल्यं तया ॥ २१८५॥
ENMSS@2186@1अप्रामाण्यं च वेदानां शास्त्राणां चातिलङ्घनम् ।
ENMSS@2186@2सर्वत्र चानवस्थानम् एतन्नाशनमात्मनः ॥ २१८६॥
ENMSS@2187@1अप्रार्थनमसंस्पर्शम् असंदर्शनमेव च ।
ENMSS@2187@2पुरुषस्येह नियमो भवेद्रागप्रहाणये ॥ २१८७॥
ENMSS@2188@1अप्रार्थितं यथा दुःखं तथा सुखमपि स्वयम् ।
ENMSS@2188@2प्राणिनं प्रतिपद्येत सर्वं नियतियन्त्रितम् ॥ २१८८॥
ENMSS@2189@1अप्रियं न हि भाषेत न विरुध्येत केनचित् ।
ENMSS@2189@2कार्यसिद्धिं समीहेत कार्यभ्रंशो हि मूर्खता ॥ २१८९॥
ENMSS@2190@1अप्रियं पुरुष चापि परद्रोहं परस्त्रियम् ।
ENMSS@2190@2अधर्ममनृतं चैव दूरात् प्राज्ञो विवर्जयेत् ॥ २१९०॥

ENMSS@2191@1अप्रियं यस्य कुर्वीत भूयस्तस्य प्रियं चरेत् ।
ENMSS@2191@2अचिरेण प्रियः स स्याद् योऽप्रियः प्रियमाचरेत् ॥ २१९१॥
ENMSS@2192@1अप्रियमुक्ताः पुरुषाः प्रयतन्ते द्विगुणमप्रियं वक्तुम् ।
ENMSS@2192@2तस्मादवाच्यमप्रियम् अप्रियमश्रोतुकामेन ॥ २१९२॥
ENMSS@2193@1अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
ENMSS@2193@2परपरिवादनिवृत्तैः क्वचित् क्वचिन् मण्डिता वसुधा ॥ २१९३॥
ENMSS@2194@1अप्रियवचनाङ्गारैर्दग्धोऽपि न विप्रियं वदत्यार्यः ।
ENMSS@2194@2किं दह्यमानमगरु स्वभावसुरभिं परित्यजति ॥ २१९४॥
ENMSS@2195@1अप्रियस्यापि वचसः परिणामाविरोधिनः ।
ENMSS@2195@2वक्ता श्रोता च यत्रास्ति रमन्ते तत्र संपदः ॥ २१९५॥
ENMSS@2196@1अप्रियाण्यपि कुर्वन्तः स्वार्थायोद्यत चेष्टिताः ।
ENMSS@2196@2पण्डिता नोपलभ्यन्ते वायसैरिव कोकिलाः ॥ २१९६॥
ENMSS@2197@1अप्रियाण्यपि कुर्वाणो निष्ठुराण्यपि च ब्रुवन् ।
ENMSS@2197@2चेतः प्रह्लादयत्येव सर्वावस्थासु वल्लभः ॥ २१९७॥
ENMSS@2198@1अप्रियाण्यपि कुर्वाणो यः प्रियः प्रिय एव सः ।
ENMSS@2198@2दग्धमन्दिरसारेऽपि कस्य वह्नावनादरः ॥ २१९८॥
ENMSS@2199@1अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
ENMSS@2199@2त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥ २१९९॥
ENMSS@2200@1अप्रिया न भविष्यन्ति प्रियो मे न भविष्यति ।
ENMSS@2200@2अहं च न भविष्यामि सर्वं च न भविष्यति ॥ २२००॥
ENMSS@2201@1अप्रियैः सह संवासः प्रियैश्चापि विनाभवः ।
ENMSS@2201@2असद्भिः संप्रयोगश्च तद्दुःखं चिरजीविनाम् ॥ २२०१॥
ENMSS@2202@1अप्रियैरपि निष्पिष्टैः किं स्यात् क्लेशासहिष्णुभिः ।
ENMSS@2202@2ये तदुन्मूलने शक्ता जिगीषा तेषु शोभते ॥ २२०२॥
ENMSS@2203@1अप्रियोऽपि हि पथ्यः स्याद् इति वृद्धानुशासनम् ।
ENMSS@2203@2वृद्धानुशासने तिष्ठन् प्रियतामुपगच्छति ॥ २२०३॥
ENMSS@2204@1अप्रीतां रोगिणीं नारीम् अन्तर्वत्नीं धृतव्रताम् ।
ENMSS@2204@2रजस्वलामकामां च न कामेत बलात् पुमान् ॥ २२०४॥
ENMSS@2205@1अप्सु प्लवन्ते पाषाणा मानुषा घ्नन्ति राक्षसान् ।
ENMSS@2205@2कपयः कर्म कुर्वन्ति कालस्य कुटिला गतिः ॥ २२०५॥
ENMSS@2206@1अप्स्वात्मानं न वीक्षेत नावगाहेत् पयोरयम् ।

ENMSS@2206@2संदिग्धनावं नारोहेन् न बाहुभ्यां नदीं तरेत् ॥ २२०६॥
ENMSS@2206A@1अफलं श्राद्धम् अपात्रे  धनम् अफलं यत् न दत्तमर्थिभ्यः ।
ENMSS@2206A@2यौवनमफलं यमिनश्  श्रुतमफलं दुर्विनीतस्य ॥
ENMSS@2207@1अफलस्यापि वृक्षस्य छाया भवति शीतला ।
ENMSS@2207@2निर्गुणोऽपि वरं बन्धुर्यः परः पर एव सः ॥ २२०७॥
ENMSS@2208@1अफलानि दुरन्तानि समव्ययफलानि च ।
ENMSS@2208@2अशक्यानि च कार्याणि नारभेत विचक्षणः ॥ २२०८॥
ENMSS@2209@1अबन्धुष्वपि बन्धुत्वं स्नेहात् समुपजायते ।
ENMSS@2209@2बन्धुष्वपि च बन्धुत्वम् अलोकज्ञेषु हीयते ॥ २२०९॥
ENMSS@2210@1अबलः प्रोन्नतं शत्रुं यो याति मदमोहितः ।
ENMSS@2210@2युद्धार्थं स निवर्तेत शीर्णदन्तो यथा गजः ॥ २२१०॥
ENMSS@2211@1अबलस्वकुलाशिनो झषान् निजनीडद्रुमपीडिनः खगान् ।
ENMSS@2211@2अनवद्यतृणार्दिनो मृगान् मृगयाघाय न भूभुजां घ्नताम् ॥ २२११॥
ENMSS@2212@1अबलां बलिना नीतां दशामिमां मकरकेतुना रक्ष ।
ENMSS@2212@2आपत्पतितोद्धृतये भवति हि शुभजन्मनां जन्म ॥ २२१२॥
ENMSS@2213@1अबला अपि वीरेशान् यत्साहाय्यमुपाश्रिताः ।
ENMSS@2213@2पराभवन्ति दृक्कोणपातेनैव स मन्मथः ॥ २२१३॥
ENMSS@2214@1अबलाढ्यविग्रहश्रीरमर्त्यनतिरक्षमालयोपेतः ।
ENMSS@2214@2पञ्चक्रमोदितमुखः पायात् परमेश्वरो मुहुरनादिः ॥ २२१४॥
ENMSS@2215@1अबलाबुद्धिहीनाया दोषं क्षन्तुं सदार्हसि ।
ENMSS@2215@2मूढस्य सततं दोषं क्षमां कुर्वन्ति साधवः ॥ २२१५॥
ENMSS@2216@1अबला यत्र प्रबला शिशुरवनीशो निरक्षरो मन्त्री ।
ENMSS@2216@2नहि नहि तत्र धनाशा जीवित आशापि दुर्लभा भवति ॥ २२१६॥
ENMSS@2217@1अबलावनपर एको भुवनत्रितयेऽपि चेत्तदा भर्त्ता ।
ENMSS@2217@2कथमन्यथा सुधाकर- चन्दनमुख्याप्रियत्वं स्यात् ॥ २२१७॥
ENMSS@2218@1अबला विषहेत कथं दृढशक्तिममुष्य रतिरसप्रसरम् ।
ENMSS@2218@2मदनतुलितानुरागो न विदध्याद्यदि बलाधानम् ॥ २२१८॥
ENMSS@2219@1अबलासु विलासिनोऽन्वभूवन् नयनैरेव नवोपगूहनानि ।
ENMSS@2219@2मरुदागमवार्तयापि शून्ये समये जाग्रति संप्रवृद्ध एव ॥ २२१९॥
ENMSS@2220@1अबलेति परीवादो वृथा हि हरिणीदृशाम् ।
ENMSS@2220@2यासां नेत्रनिपातेन नटवद् घूर्ण्यते जगत् ॥ २२२०॥

ENMSS@2221@1अबले सलिले व्यवस्यता ते मुखभावो गमितो न पङ्कजेन ।
ENMSS@2221@2कथमादिमवर्णतान्त्यजस्य द्विजराजेन कृतोरुनिग्रहस्य ॥ २२२१॥
ENMSS@2222@1अबलोऽसि न जितकाशी- प्रतिभटराशीन् परापत क्षितिप ।
ENMSS@2222@2जाताम्भःकणपातः क्क विनश्यत्यनलसंघातः ॥ २२२२॥
ENMSS@2223@1अबालरुचिरे भ्रुवौ न च मरालमन्दा गतिर्दृगञ्चलमचञ्चलं हृदयभूदभूतो दया(?) ।
ENMSS@2223@2सुधा न खलु वाक्पथातिथिरथापि यूनां मनो मनोजशरजर्ज्झरन्नयति मोहमस्यास्तनुः ॥ २२२३॥
ENMSS@2224@1अबुधा अजंगमा अपि कयापि गत्या परं पदमवाप्ताः ।
ENMSS@2224@2मन्त्रिण इति कीर्त्यन्ते नयबलगुटिका इव जनेन ॥ २२२४॥
ENMSS@2225@1अबुधैः कृतमानसंविदस्तव पार्थैः कुत एव योग्यता ।
ENMSS@2225@2सहसि प्लवगैरुपासितं न हि गुञ्जाफलमेति सोष्मताम् ॥ २२२५॥
ENMSS@2226@1अबुधैरर्थलाभाय पण्यस्त्रीभिरिव स्वयम् ।
ENMSS@2226@2आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृतः ॥ २२२६॥
ENMSS@2227@1अबुद्धिमाश्रितानां च क्षन्तव्यमपराधिनाम् ।
ENMSS@2227@2न हि सर्वत्र पाण्डित्यं सुलभं पुरुषेण वै ॥ २२२७॥
ENMSS@2228@1अथ चेद् बुद्धिजं कृत्वा ब्रूयुस्ते तदबुद्धिजम् ।
ENMSS@2228@2पापान् स्वल्पेऽपि तान् हन्याद् अपराधे तथानृजून् ॥ २२२८॥
ENMSS@2229@1अबुद्धा चित्तमप्राप्य विश्रम्भं प्रभविष्णुषु ।
ENMSS@2229@2न स्वेच्छं व्यवहर्तव्यम् आत्मनो भूतिमिच्छता ॥ २२२९॥
ENMSS@2230@1अबोधि नो ह्रीनिभृतं मदिङ्गितं प्रतीत्य वा नादृतवत्यसाविति ।
ENMSS@2230@2लुनाति यूनः स्म धियं कियद्गता निवृत्य बालादरदर्शनेषुणा ॥ २२३०॥
ENMSS@2231@1अब्जं त्वन्नमथाब्जभूस्तत इदं ब्रह्माण्डमण्डात् पुनर्विश्वं स्थावरजंगमं तदितरत् त्वन्मूलमित्थं पयः ।
ENMSS@2231@2धिक् त्वां चौर इव प्रयासि निभृतं निर्गत्य जालान्तरैर्बध्यन्ते विवशास्त्वदेकशरणास्त्वामाश्रिता जन्तवः ॥ २२३१॥
ENMSS@2232@1अब्दायनर्तुष्वथ मासपक्ष- दिनानि कार्येऽप्यवधौ विदध्यात् ।
ENMSS@2232@2हीनावधिर्येन भवत्यसत्यः सर्वोऽपि लोके शकुनो गृहीतः ॥ २२३२॥
ENMSS@2233@1अब्देभकुम्भे निर्बिन्ने विद्युत्खड्गलताहते ।
ENMSS@2233@2स्वच्छमुक्ताफलस्थूला निपेतुस्तोयबिन्दवः ॥ २२३३॥

ENMSS@2234@1अब्दैर्वारिजिघृक्षयार्णवगतैः साकं व्रजन्ती मुहुः संसर्गाद्वडवानलस्य समभूदापन्नसत्त्वा तडित् ।
ENMSS@2234@2मन्ये देव तया क्रमेण जनितो युष्मत्प्रतापानलो येनारातिवधूविलोचनजलैः सिक्तोऽपि संवर्धते ॥ २२३४॥
ENMSS@2235@1अब्धिना सह मित्रत्वे दारिद्र्यं यदि जायते ।
ENMSS@2235@2लाञ्छनं सागरस्यैव मैत्रीकर्तुर्न लाञ्छनम् ॥ २२३५॥
ENMSS@2236@1अब्धिर्न तृप्यति यथा सरितां सहस्रैर्नो चेन्धनैरिव शिखी बहुधोपनीतैः ।
ENMSS@2236@2जीवः समस्तविषयैरपि तद्वदेवं संचिन्त्य चारुधिषणस्त्यजतीन्द्रियार्थान् ॥ २२३६॥
ENMSS@2237@1अब्धिर्यद्यवधीरितो न तु तदा तस्मान्निपीयाम्बुदैर्वान्तान् याचसि काकुभिर्जललवानुत्तानचञ्चूपुटः ।
ENMSS@2237@2तत्ते निस्त्रपनीचतैवमुचिता निर्वक्तुमेतत् कथं विद्मः केन गुणेन मानिषु पुनः सारङ्ग संगीयते ॥ २२३७॥
ENMSS@2238@1अब्धी रत्नमधो धत्ते धत्ते वा शिरसा तृणम् ।
ENMSS@2238@2अब्धेरेव हि दोषोऽयं रत्नं रत्नं तृणं तृणम् ॥ २२३८॥
ENMSS@2239@1अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षेः । पोतोपाया इह हि बहवो लङ्घनेऽपि क्षमन्ते ।
ENMSS@2239@2आहो रिक्तः कथमपि भवेदेष दैवात् तदानीं को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥ २२३९॥
ENMSS@2240@1अब्धौ मज्जन्ति मीना इव फणिन इव क्षौणिरन्ध्रं विशन्ति क्रामन्त्यद्रीन् विहङ्गा इव कपय इव क्वाप्यरण्ये चरन्ति ।
ENMSS@2240@2देव क्ष्मापालशक्र प्रसरदनुपमत्वच्चमूचक्रवाह-व्यूहव्याधूतधूलीपटलहतदृशः कान्दिशीकाः क्षितीशाः ॥ २२४०॥
ENMSS@2241@1अब्रवीच्च भगवन् मतङ्गजैर्यद्बृहद्भिरपि कर्म दुष्करम् ।
ENMSS@2241@2तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् ॥ २२४१॥
ENMSS@2242@1अभक्ष्यं भक्षयेन्नित्यं सुवासोमद्यपा गृहे ।
ENMSS@2242@2कुष्ठी भवति वित्तेशो वेश्यादोषाः स्वभावजाः ॥ २२४२॥
ENMSS@2243@1अभग्नवृत्ताः प्रसभाद् आकृष्टा यौवनोद्धतैः ।
ENMSS@2243@2चक्रन्दुरुच्चकैर्मुष्टिग्राह्यमध्या धनुर्लता ॥ २२४३॥
ENMSS@2244@1अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।

ENMSS@2244@2दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ २२४४॥
ENMSS@2245@1अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
ENMSS@2245@2दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २२४५॥
ENMSS@2246@1तेजः क्षमा धृतिः शौचम् अद्रोहो नातिमानिता ।
ENMSS@2246@2भवन्ति संपदं दैवीम् अभिजातस्य भारत ॥ २२४६॥
ENMSS@2247@1दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च ।
ENMSS@2247@2अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ २२४७॥
ENMSS@2248@1दैवी संपद्विमोक्षाय निबन्धायासुरी मता ॥
ENMSS@2249@1अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः ।
ENMSS@2249@2तस्यापि सर्वभूतेभ्यो न भयं विद्यते क्वचित् ॥ २२४९॥
ENMSS@2250@1अभयं सर्वभूतेभ्यो यो ददाति दयापरः ।
ENMSS@2250@2अभयं तस्य भूतानि ददतीत्यनुशुश्रुमः ॥ २२५०॥
ENMSS@2251@1अभयं सर्वभूतेभ्यो यो ददाति दयापरः ।
ENMSS@2251@2तस्य देहविमुक्तस्य क्षय एव न विद्यते ॥ २२५१॥
ENMSS@2252@1अभयमभयं देव ब्रूमस्तवासिलतावधूः कुवलयदलश्यत्मा शत्रोरुरःस्थलशायिनी ।
ENMSS@2252@2समयसुलभां कीर्तिं भव्यामसूत सुतामसावपि रमयितुं रागान्धेव भ्रमत्यखिलं जगत् ॥ २२५२॥
ENMSS@2253@1अभयस्य हि यो दाता स पूज्यः सततं नृपः ।
ENMSS@2253@2सत्रं हि वर्धते तस्य सदैवाभयदक्षिणम् ॥ २२५३॥
ENMSS@2254@1अभयस्यैव यो दाता तस्यैव सुमहत्फलम् ।
ENMSS@2254@2न हि प्राणसमं दानं त्रिषु लोकेषु विद्यते ॥ २२५४॥
ENMSS@2255@1अभवदभिनवप्ररोहभाजां छविपरिपाटिषु यः पुराङ्ककानाम् ।
ENMSS@2255@2अहह विरहवैकृते स तस्याः कृशिमनि संप्रति दूर्वया विवादः ॥ २२५५॥
ENMSS@2256@1अभव्यजीवो वचनं पठन्नपि जिनस्य मिथ्यात्वविषं न मुञ्चति ।
ENMSS@2256@2यथा विषं रौद्रविषोऽति पन्नगः सशर्करं चारु पयः पिबन्नपि ॥ २२५६॥
ENMSS@2257@1अभावि सिन्ध्वा संध्याभ्रसदृग्गृधिरतोयया ।
ENMSS@2257@2हृते योद्धुं जनः पांशौ स दृग्गृधि रतो यया ॥ २२५७॥
ENMSS@2258@1अभावे न नरस्तस्माद् भावः सर्वत्र कारणम् ।

ENMSS@2258@2चित्तं शोधय यत्नेन किमन्यैर्बाह्यशोधनैः ॥ २२५८॥

ENMSS@2259@1अभावे पट्टसूत्रस्य हारिणी स्नायुरिष्यते ।

ENMSS@2259@2गुणार्थमथवा ग्राह्याः स्नायवो महिषीगवाम् ॥ २२५९॥

ENMSS@2259A@1अभिगम्यास्ते सद्भिर्व्यपगतमानावमानदोषाश्च ।

ENMSS@2259A@2ये स्वगृहमुपगतानां श्रममुपचारैर्व्यपनयन्ति ॥

ENMSS@2260@1अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे विभवगरुभिः कृत्यैरस्य प्रतिक्षणमाकुला ।

ENMSS@2260@2तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ २२६०॥

ENMSS@2261@1अभिजातजनव्यथावहा बहलोष्मप्रसरा विदाहिनः ।

ENMSS@2261@2प्रखला इव दृष्टिमागता भुवि तापाय निदाघवासराः ॥ २२६१॥

ENMSS@2262@1अभितापसंपदमथोष्णरुचिर्निजतेजसामसहमान इव ।

ENMSS@2262@2पयसि प्रपित्सुरपराम्बुनिधेरधिरोढुमस्तगिरिमभ्यपतत् ॥ २२६२॥

ENMSS@2263@1अभितिग्मरश्मि चिरमाविरमा- दवधानखिन्नमनिमेषतया ।

ENMSS@2263@2विगलन्मधुव्रतकुलाश्रुजलं न्यमिमीलदब्जनयनं नलिनी ॥ २२६३॥

ENMSS@2264@1अभितो नितरां सलिलं जलदे दातुं समुद्यते भवति ।

ENMSS@2264@2तदपि बहुलमल्पं वा पात्राधीनं मतं पतनम् ॥ २२६४॥

ENMSS@2265@1अभित्तावुत्थिते चित्रे दृश्यते भित्तिरातता ।

ENMSS@2265@2अहो विचित्रा मायेयं भग्नं तुण्डं शिलाप्लुता ॥ २२६५॥

ENMSS@2266@1अभिद्रोहेण भूतानाम् अर्जयन् गत्वरीः श्रियः ।

ENMSS@2266@2उदन्वानिव सिन्धूनाम् आपदामेति पात्रताम् ॥ २२६६॥

ENMSS@2267@1अभिधाय तदा तदप्रियं शिशुपालोऽनुशयं परं गतः ।

ENMSS@2267@2भवतोऽभिमनाः समीहते सरुषः कर्तुमुपेत्य माननाम् ॥ २२६७॥

ENMSS@2268@1अभिधावति मां मृत्युरयमुद्घूर्णमुद्गरः ।

ENMSS@2268@2कृपणं पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥ २२६८॥

ENMSS@2269@1अभिध्यालु परस्वेषु नेह नामुत्र नन्दति ।

ENMSS@2269@2तस्मादभिध्या संत्याज्या सर्वदाभीप्सता सुखम् ॥ २२६९॥

ENMSS@2270@1अभिनयशस्तौ हस्तौ पादौ परिभूतकिसलयौ सलयौ ।

ENMSS@2270@2अङ्गं रञ्जितरङ्गं नृत्तं पुंभावशालि समवृत्तम् ॥ २२७०॥

ENMSS@2271@1अभिनयान् परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।

ENMSS@2271@2अमदयत् सहकारलता मनः सकलिका कलिकामजितामपि ॥ २२७१॥

ENMSS@2272@1अभिनवं गलितांशुकदर्शितं दधति यत्स्तनयोरुपरिस्थितम् ।

ENMSS@2272@2वसनमण्डलमण्डनमङ्गनास्तदधिकं प्रतिपक्षमनोज्वरम् ॥ २२७२॥

ENMSS@2273@1अभिनवकुशसूत्रस्पर्धि कर्णे शिरीषं कुरवकपरिधानं पाटलादाम कण्ठे ।

ENMSS@2273@2तनुसरसजलार्द्रोन्मीलितः सुन्दरीणां दिनपरिणतिजन्मा कोऽपि वेशश्चकास्ति ॥ २२७३॥

ENMSS@2274@1अभिनवजवापुष्पस्पर्धी तवाधरपल्लवो हसितकुसुमोन्मेषच्छायादरच्छुरितान्तरः ।

ENMSS@2274@2नयनमधुपश्रेणीं यूनामनारतमाहरंस्तरुणि तनुते तारुण्यश्रीर्विलासवतंसताम् ॥ २२७४॥

ENMSS@2275@1अभिनवनलिनीकिसलय- मृणालवलयादि दवदहनराशिः ।

ENMSS@2275@2सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते ॥ २२७५॥

ENMSS@2276@1अभिनवनलिनीविनोदलुब्धो मुकुलितकैरविणीवियोगभीरुः ।

ENMSS@2276@2भ्रमति मधुकरोऽयमन्तराले श्रयति न पङ्कजिनीं कुमुद्वतीं वा ॥ २२७६॥

ENMSS@2277@1अभिनवनवनीतप्रीतमाताम्रनेत्रं विकचनलिनलक्ष्मीस्पर्धि सानन्दवक्रम् ।

ENMSS@2277@2हृदयभवनमध्ये योगिभिर्ध्यानगम्यं नवगगनतमालश्यामलं कंचिदीडे ॥ २२७७॥

ENMSS@2278@1अभिनवनवनीतस्निग्धमापीतदुग्धं दधिकणपरिदिग्धं मुग्धमङ्गं मुरारेः ।

ENMSS@2278@2दिशतु भुवनकृच्छ्रच्छेदितापिच्छगुच्छच्छवि नवशिखिपिच्छालाञ्छितं वाञ्छितं वः ॥ २२७८॥

ENMSS@2279@1अभिनवपल्लवरशना शिशिरतरतुषारजलमङ्गलस्नाता ।

ENMSS@2279@2पुष्पवती चूतलता प्रियेव ददृशे फलाभिमुखी ॥ २२७९॥

ENMSS@2280@1अभिनवपुलकालीमण्डिता गण्डपाली निगदति विनिगूढानन्दहिन्दोलिचेतः ।

ENMSS@2280@2सुदति वदति पुण्यैः कस्य धन्यैर्मनोज- प्रसरमसकृदेतच्चापलं लोचनस्य ॥ २२८०॥

ENMSS@2281@1अभिनवमुखमुद्रं क्षुद्रकूपोपवीतं प्रशिथिलविपुलत्वं

ज्वालकोच्छ्वासिपालम् ।

ENMSS@2281@2परिणतिपरिपाटिव्याकृतेनारुणिम्ना हतहरितिमशेषं नागरङ्गं चकास्ति ॥ २२८१॥

ENMSS@2282@1अभिनवयवसश्रीशालिनि क्ष्मातलेऽस्मिन् अतिशयपरभागं भेजिरे जिष्णुगोपाः ।

ENMSS@2282@2कुवलयशयनीये मुग्धमुग्धेक्षणाया मणय इव विमुक्ताः कामकेलिप्रसङ्गात् ॥ २२८२॥

ENMSS@2283@1अभिनववधूरोषस्वादः करीषतनूनपाद्

असरलजनाश्लेषक्रूरस्तुषारसमीरणः ।

ENMSS@2283@2गलितविभवस्याज्ञेवाद्य द्युतिर्मसृणा रवेर्विरहिवनितावक्त्रौपम्यं बिभर्ति निशाकरः ॥ २२८३॥

ENMSS@2284@1अभिनवविषवल्लीपादपद्मस्य विष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला ।

ENMSS@2284@2जयति जयपताका काप्यसौ मोक्षलक्ष्म्याः क्षपितकलिकलङ्का जाह्नवी नः

पुनातु ॥ २२८४॥

ENMSS@2285@1अभिनवसेवकविनयैः प्राघुणकोक्तैर्विलासिनीरुदितैः ।

ENMSS@2285@2धूर्तजनवचननिकरैरिह कश्चिदवञ्चितो नास्ति ॥ २२८५॥

ENMSS@2286@1अभिनषति वैनतेयं चामरसहितः ससत्यभामो यः ।

ENMSS@2286@2नारायणः स साक्षाद् विबुधसमर्च्यः सदा जयतु ॥ २२८६॥

ENMSS@2287@1अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि ।

ENMSS@2287@2असावञ्जनसंकाशस्त्वं तु चामीकरद्युतिः ॥ २२८७॥

ENMSS@2288@1अभिन्नेष्वपि कार्येषु भिद्यते मनसः क्रिया ।

ENMSS@2288@2अन्यथैव स्तनं पुत्रश्चिन्तयत्यन्यथा पतिः ॥ २२८८॥

ENMSS@2289@1अभिपतति घनं शृणोति गर्जाः सहति शिलाः सहते तडित्तरङ्गान् ।

ENMSS@2289@2विधुवति गरुतं रुतं विधत्ते जलपृषते कियतेऽपि चातकोऽयम् ॥ २२८९॥

ENMSS@2290@1अभिप्रायं यो विदित्वा तु भर्तुः सर्वाणि कार्याणि करोत्यतन्द्रीः ।

ENMSS@2290@2वक्ता हितानामनुरक्त आर्यः शक्तिज्ञ आत्मेव हि सोऽनुकम्प्यः ॥ २२९०॥

ENMSS@2291@1वाक्यं तु यो नाद्रियतेऽनुशिष्टः प्रत्याह यश्चापि नियुज्यमानः ।

ENMSS@2291@2प्रज्ञाभिमानी प्रतिकूलवादी त्याज्यः स तादृक्त्वरयैव भृत्यः ॥ २२९१॥

ENMSS@2292@1अभिप्रायानुसारेण प्रकटीकुरुते प्रियम् ।
ENMSS@2292@2अहो महाप्रभावानां भूपतीनां वसुंधरा ॥ २२९२॥
ENMSS@2293@1अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
ENMSS@2293@2सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ २२९३॥
ENMSS@2294@1अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनादे ।
ENMSS@2294@2जन इव न धृतेश्चचाल जिष्णुर्न हि महतां सुकरः समाधिभङ्गः ॥ २२९४॥
ENMSS@2295@1अभिभूतोऽपि नोत्साहं जह्याज्ज्ञातु स्वसिद्धये ।
ENMSS@2295@2नष्टाङ्गोऽपि ग्रसत्येव सैंहिकेयो मुहुर्द्विषौ ॥ २२९५॥
ENMSS@2296@1अभिभूतोऽप्यवज्ञातो यो राज्ञां द्वारि तिष्ठति ।
ENMSS@2296@2स तु राज्ञां श्रियं भुङ्क्ते नाभिमानी कदाचन ॥ २२९६॥
ENMSS@2297@1अभिभूय विभूतिमार्तवीं मधुगन्धातिशयेन वीरुधाम् ।
ENMSS@2297@2नृपतेरमरस्रगाप सा दयितोरुस्तनकोटिसुस्थितम् ॥ २२९७॥
ENMSS@2298@1अभिभूय सतामवस्थितिं जडजेषु प्रतिपाद्य च श्रियम् ।
ENMSS@2298@2जगतीपरितापकृत् कथं जलधौ नावपतेदसौ रविः ॥ २२९८॥
ENMSS@2299@1अभिमतफलदाता त्वं च कल्पद्रुमश्च प्रकटमिह विशेषं कंचनोदाहरामः ।
ENMSS@2299@2कथमिह मधुरोक्तिप्रेमसंमानमिश्रं तुलयति सुरशाखी देव दानं त्वदीयम् ॥ २२९९॥
ENMSS@2300@1अभिमतफलसिद्धिसिद्धमन्त्रा- वलि बलिजित्परमेष्ठिनोरुपास्ये ।
ENMSS@2300@2भगवति मदनारिनारि वन्दे निखिलनगाधिपभर्तृदारिके त्वाम् ॥ २३००॥
ENMSS@2301@1अभिमतमभितः कृताङ्गभङ्गा कुचयुगमुन्नतिवित्तमुन्नमय्य ।
ENMSS@2301@2तनुरभिलषितं क्लमच्छलेन व्यवृणुत वेल्लितबाहुवल्लरीका ॥ २३०१॥
ENMSS@2302@1अभिमतमहामानग्रन्थिप्रभेदपटीयसी गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
ENMSS@2302@2विपुलविलसल्लज्जावल्लीविदारकुठारिका जठरपिठरी दुःपूरेयं करोति विडम्बनाम् ॥ २३०२॥
ENMSS@2303@1अभिमतवस्तूपहृता- वपि गुरुगर्वादनादरस्तन्व्याः ।
ENMSS@2303@2स्खलितेऽपि प्रियस्य सं- यमताडनमित्येव बिब्बोकः ॥ २३०३॥
ENMSS@2304@1अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण ।

ENMSS@2304@2दैवमिति यदपि कथयसि पुरुषगुणः सोऽप्यदृष्टाख्यः ॥ २३०४॥
ENMSS@2305@1अभिमन्त्र्य शुचिविधानाद् आज्याढ्यं हस्तिकर्णजं चूर्णम् ।
ENMSS@2305@2योऽश्नाति स हि नरः स्याद् यथेष्टचेष्टोऽपि दीर्घायुः ॥ २३०५॥
ENMSS@2306@1अभिमानधनं येषां चिरं जीवन्ति ते नराः ।
ENMSS@2306@2अभिमानविहीनानां किं धनेन किमायुषा ॥ २३०६॥
ENMSS@2307@1अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ।
ENMSS@2307@2अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ २३०७॥
ENMSS@2308@1अभिमानवतां पुंसाम् आत्मसारमजानताम् ।
ENMSS@2308@2अन्धानामिव दृश्यन्ते पतनान्ताः प्रवृत्तयः ॥ २३०८॥
ENMSS@2309@1अभिमानवतां ब्रह्मन् युक्तायुक्तविवेकिनाम् ।
ENMSS@2309@2युज्यतेऽवश्यभोग्यानां दुःखानामप्रकाशनम् ॥ २३०९॥
ENMSS@2310@1अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
ENMSS@2310@2विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥ २३१०॥
ENMSS@2311@1अभिमानितभूतेन सानुबन्धरसेन तु ।
ENMSS@2311@2यतः सर्वेन्द्रियप्रीतिः स कामः प्रोच्यते बुधैः ॥ २३११॥
ENMSS@2312@1अभिमानिनमुद्भ्रान्तम् आत्मसंभावितं शठम् ।
ENMSS@2312@2क्रोधनं चैव नृपतिं व्यसने घ्नन्ति वैरिणः ॥ २३१२॥
ENMSS@2313@1अभिमुखगते यस्मिन्नेव प्रिये बहुशो वदत्यवनतमुखं तूष्णीमेव स्थितं मृगनेत्रया ।
ENMSS@2313@2अथ किल बलाल्लीलालोलं स एष तथेक्षितः कथमपि यथा दृष्ट्वा मन्ये कृतं श्रुतिलङ्घनम् ॥ २३१३॥
ENMSS@2313A@1अभिमुखमधुरतरेभ्यः पराङ्मुखाक्रोशनात् कुशीलेभ्यः ।
ENMSS@2313A@2अभ्यन्तरकलुषेभ्यो भेतव्यं मित्रशत्रुभ्यः ॥
ENMSS@2314@1अभिमुखनिहतस्य सतस्तिष्ठतु तावज्जयोऽथ वा स्वर्गः ।
ENMSS@2314@2उभयबलसाधुवादः श्रवणमुखोऽस्त्येव चात्यर्थम् ॥ २३१४॥
ENMSS@2315@1अभिमुखपतयालुभिर्ललाट- श्रमसलिलैरविधौतपत्रलेखः ।
ENMSS@2315@2कथयति पुरुषायितं वधूनां मृदितहिमद्युतिदुर्मनाः कपोलः ॥ २३१५॥
ENMSS@2316@1अभिमुखपतितैर्गुणप्रकर्षाद् अवजितमुद्धतिमुज्ज्वलां दधानैः ।
ENMSS@2316@2तरुकिसलयजालमग्रहस्तैः प्रसभमनीयत भङ्गमङ्गनानाम् ॥ २३१६॥
ENMSS@2317@1अभिमुखमुपयाति मां स्म किंचित् त्वमभिदधाः पटले मधुव्रतानाम् ।

ENMSS@2317@2मधुसुरभिमुखाब्जगन्धलब्धेरधिकमधि त्वदनेन मा निपाति ॥ २३१७॥

ENMSS@2318@1अभिमुखागतमार्गणधोरणि- ध्वनितपल्लवितागम्बरगह्वरे ।

ENMSS@2318@2वितरणे च रणे च समुद्यते भवति कोऽपि परं विरलः परः ॥ २३१८॥

ENMSS@2319@1अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम् ।

ENMSS@2319@2विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः ॥ २३१९॥

ENMSS@2320@1अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे ।

ENMSS@2320@2चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥ २३२०॥

ENMSS@2321@1अभियाति नः सतृष एष चक्षुषो हरिरित्यखिद्यत नितम्बिनीजनः ।

ENMSS@2321@2न विवेद यः सततमेनमीक्षते न वितृष्णतां व्रजति खल्वसावपि

॥ २३२१॥

ENMSS@2322@1अभियुक्तं बलवता दुर्लभं हीनसाधनम् ।

ENMSS@2322@2हृतस्वं कामिनं चोरम् आविशन्ति प्रजागराः ॥ २३२२॥

ENMSS@2323@1अभियुक्तो बलवता तिष्ठन् दुर्गे प्रयत्नवान् ।

ENMSS@2323@2तद्बलीयस्तराह्वानं कुर्वीतात्मविमुक्तये ॥ २३२३॥

ENMSS@2324@1अभियुक्तो यदा पश्येन् न कांचिद् गतिमात्मनः ।

ENMSS@2324@2युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह ॥ २३२४॥

ENMSS@2325@1अभियोक्ता बली यस्माद् अलब्ध्वा न निवर्तते ।

ENMSS@2325@2उपहाराद्दते तस्मात् संधिरन्यो न विद्यते ॥ २३२५॥

ENMSS@2326@1अभिरामेऽभिनिवेशं विदधाना विविधलाभनिरपेक्षा ।

ENMSS@2326@2उपहस्यसे सुमध्ये विदग्धवाराङ्गनावारैः ॥ २३२६॥

ENMSS@2327@1अभिलक्ष्यं स्थिरं पुण्यं ख्यातं सद्भिर्निषेवितम् ।

ENMSS@2327@2सेवेत सिद्धिमन्विच्छञ् श्लाघ्यं विन्ध्यमिवेश्वरम् ॥ २३२७॥

ENMSS@2328@1अभिलषत उपायं विक्रमं

कीर्तिलक्ष्म्योरसुगममरिसैन्यैरङ्कमभ्यागतस्य ।

ENMSS@2328@2जनक इव शिशुत्वे सुप्रियस्यैकसूनोरविनयमपि सेहे पाण्डवस्य स्मरारिः

॥ २३२८॥

ENMSS@2329@1अभिलषति न खलु पुरुषः श्रियमपि कीर्त्या विनाकृतां कुशलः ।

ENMSS@2329@2क्षणिकाय वस्तुने कस्त्यजतीह चिरस्थिरं श्रेयः ॥ २३२९॥

ENMSS@2330@1अभिलषति पद्मयोनौ निःस्ववधूनां सुतान् स्रष्टुम् ।

ENMSS@2330@2स्वं स्वं विशङ्कमाना वेपन्ते क्रकचवर्त्तिनो लोकाः ॥ २३३०॥

ENMSS@2331@1अभिलषतोरनुभावान् तिलोत्तमायाः किलोत्तमानुभयोः ।
ENMSS@2331@2सुन्दोपसुन्दयोरपि नाशो भेदादुदाह्रियते ॥ २३३१॥
ENMSS@2332@1अभिलषन्ति तवाधरमाधुरीं तदिह किं हरिणाक्षि मुधा बुधाः ।
ENMSS@2332@2सुरसुधामधरीकुरुते यतस्त्वदधरोऽधरतामगमत् ततः ॥ २३३२॥
ENMSS@2333@1अभिलषसि यदीन्दो वक्रलक्ष्मीं मृगाक्ष्याः पुनरपि सकृदब्धौ मज्ज संक्षालयाङ्कम् ।
ENMSS@2333@2सुविमलमथ बिम्बं पारिजातप्रसूनैः सुरभय वद नो चेत् त्वं क्क तस्या मुखं क्क ॥ २३३३॥
ENMSS@2334@1अभिलषिताधिकवरदे प्रणिपतितजनार्तिहारिणि शरण्ये ।
ENMSS@2334@2चरणौ नमाम्यहं ते विद्याधरदेवते गौरि ॥ २३३४॥
ENMSS@2335@1अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा ।
ENMSS@2335@2स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥ २३३५॥
ENMSS@2336@1अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
ENMSS@2336@2चत्वारि तस्य वर्धन्त आयुः प्रज्ञा यशो बलम् ॥ २३३६॥
ENMSS@2337@1अभिवादयेत वृद्धम् आसनं चास्य दर्शयेत् ।
ENMSS@2337@2कृताञ्जलिरुपासीत गच्छन्तं पृष्ठतोऽन्वियात् ॥ २३३७॥
ENMSS@2338@1अभिवाद्य यथा वृद्धान् सन्तो गच्छन्ति निर्वृतिम् ।
ENMSS@2338@2एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ २३३८॥
ENMSS@2339@1अभिवीक्ष्य सामिकृतमण्डनं यतीः कररुद्धनीविगलदंशुकाः स्त्रियः ।
ENMSS@2339@2दधिरेऽधिभित्ति पटहप्रतिस्वनैः स्फुटमट्टहासमिव सौधपङ्क्तयः ॥ २३३९॥
ENMSS@2340@1अभिशप्तः पुण्यकार्ये प्रवृत्तोऽपि न सिद्धिभाक् ।
ENMSS@2340@2भर्त्रानुगमनोद्युक्ता रेणुका जनमारिका ॥ २३४०॥
ENMSS@2341@1अभिशस्तवत् प्रपश्यन्ति दरिद्रं पार्श्वतः स्थितम् ।
ENMSS@2341@2दारिद्र्यं पातिकं लोके कस्तच्छंसितुमर्हति ॥ २३४१॥
ENMSS@2342@1अभिषिषेणयिषुं भुवनानि यः स्मरमिवाख्यत लोध्ररजश्चयः ।
ENMSS@2342@2क्षुभितसैन्यपरागविपाण्डुर- द्युतिरयं तिरयन्नुदभूद्दिशः ॥ २३४२॥
ENMSS@2343@1अभिषेकार्द्रशिरसा राजा राज्यावलोकिना ।
ENMSS@2343@2सहायवरणं कार्यं तत्र राज्यं प्रतिष्ठितम् ॥ २३४३॥
ENMSS@2344@1यदप्यल्पतरं कर्म तदप्येकेन दुष्करम् ।
ENMSS@2344@2पुरुषेणासहायेन किमु राज्यं महोदयम् ॥ २३४४॥

ENMSS@2345@1अभिसरणपरा सदा वराकी समरमहाध्वसु रक्तपङ्किलेषु ।
ENMSS@2345@2हृदि धरणिभुजामियं नृपश्रीर्निहितपदैव कलङ्कमातनोति ॥ २३४५॥
ENMSS@2346@1अभिसरणमयुक्तमङ्गनानाम् इति तव सुन्दरि मा स्म भूद्वितर्कः ।
ENMSS@2346@2ननु पतिमगमत् स्वयं नदीनां सरिदपि शंभुजटामुहूर्तमाला ॥ २३४६॥
ENMSS@2347@1अभिसरणरसः कृशाङ्गयष्टेरयमपरत्र न वीक्षितः श्रुतो वा ।
ENMSS@2347@2अहिमपि यदियं निरास नाङ्घ्रेर्निबिडतनूपुरमात्मनीनबुद्ध्या ॥ २३४७॥
ENMSS@2348@1अभिसारे सरोजाक्षि यदि गन्तुं समीहसे ।
ENMSS@2348@2समाच्छाद्य मुखं याहि प्रयत्नेन प्रियं प्रति ॥ २३४८॥
ENMSS@2349@1अभिहन्ति हन्त कथमेष माधवं सुकुमारकायमनवग्रहः स्मरः ।
ENMSS@2349@2अचिरेण वैकृतविवर्तदारुणः कलभं कठोर इव कूटपाकलः ॥ २३४९॥
ENMSS@2350@1अभिहिताप्यभियोगपराङ्मुखी प्रकटमङ्गविलासमकुर्वती ।
ENMSS@2350@2उपरि ते पुरुषायितुमक्षमा नववधूरिव शत्रुपताकिनी ॥ २३५०॥
ENMSS@2351@1अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा घनान्धकारीकृतशर्वरीष्वपि ।
ENMSS@2351@2तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ २३५१॥
ENMSS@2352@1अभीक्ष्णमुष्णैरपि तस्य सोष्मणः सुरेन्द्रबन्दीश्वसितानिलैर्यथा ।
ENMSS@2352@2सचन्दनाम्भःकणकोमलैस्तथा वपुर्जलार्द्रापवनैर्न निर्ववौ ॥ २३५२॥
ENMSS@2353@1अभीप्सां स्वात्मनो रक्षाऽविरतं सुस्थिरं तथा ।
ENMSS@2353@2यत्नमातिष्ठ धैर्येण ततः सिद्धिर्भवेद् ध्रुवम् ॥ २३५३॥
ENMSS@2354@1अभीष्टफलसंसिद्धिस्तुष्टिः काम्या सुसंपदः ।
ENMSS@2354@2द्वित्रिभिर्बहुभि सार्धं भोजनेन प्रजायते ॥ २३५४॥
ENMSS@2355@1अभीष्टमासाद्य चिराय काले समुद्धृताशं कमनी चकाशे ।
ENMSS@2355@2योषिन्मनोजन्मसुखोदयेषु समुद्धृताशङ्कमनीचकाशे ॥ २३५५॥
ENMSS@2356@1अभुक्तायां यस्यां क्षणमपि न यातं नृपशतैर्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजाम् ।
ENMSS@2356@2तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ २३५६॥
ENMSS@2357@1अभुक्त्वामलकं पथ्यं भुक्त्वा तु बदरीफलम् ।
ENMSS@2357@2कपित्थं सर्वदा पथ्यं कदली न कदाचन ॥ २३५७॥
ENMSS@2358@1अभुञ्जतांश्चाददतां धनं चौरा हरन्ति हि ।
ENMSS@2358@2सरघाणां यथा सर्वं माक्षिकं वनचारिणः ॥ २३५८॥

ENMSS@2359@1अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं च दुःखम् ।
ENMSS@2359@2किं तु त्वदग्रे शरणागतानां पराभवो नाथ न तेऽनुरूपम् ॥ २३५९॥
ENMSS@2360@1अभूतमासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सते नृपः ।
ENMSS@2360@2विजानतोऽपि ह्यनयस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः ॥ २३६०॥
ENMSS@2361@1अभूत् प्राची पिङ्गा रसपतिरिव प्राश्य कनकं गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
ENMSS@2361@2क्षणात् क्षीणास्तारा नृपतय इवानुद्यमपरा न दीपा राजन्ते द्रविणरहितानामिव गुणाः ॥ २३६१॥
ENMSS@2362@1अभूदम्भोराशेः सह वसतिरासीत् कमलया गुणानामाधारो नयनफलमिन्दुः प्रथयति ।
ENMSS@2362@2कथं सिंहीसूनुस्तमपि तुदति प्रौढदशनैर्गुणानामास्वादं पिशुनरसना किं रसयति ॥ २३६२॥
ENMSS@2363@1अभूवन्नद्भुतोष्माणः शीतव्याप्ते जगत्त्रये ।
ENMSS@2363@2कुचोत्सङ्गाः कृशाङ्गीणां स्थानं मन्मथतेजसः ॥ २३६३॥
ENMSS@2364@1अभेदेनैव युध्येरन् रक्षेयुश्च परस्परम् ।
ENMSS@2364@2फल्गु सैन्यस्य यत् किंचिन् मध्ये व्यूहस्य तद्भवेत् ॥ २३६४॥
ENMSS@2365@1अभेदेनोपास्ते कुमुदमुदरे वा स्थितवतो विपक्षादम्भोजादुपगतवतो वा
मधुलिहः ।
ENMSS@2365@2अपर्याप्तः कोऽपि स्वपरपरिचर्यापरिचय- प्रबन्धः साधूनामयमनभिसंधानमधुरः ॥ २३६५॥
ENMSS@2366@1अभेद्योऽनुद्धतः स्तब्धः सूनृतः प्रियदर्शनः ।
ENMSS@2366@2बहुश्रुतः कालवेदी जितग्रन्थोऽर्थकर्मवित् ॥ २३६६॥
ENMSS@2367@1अभोगसुभगा भूतिरदैन्यधवलं कुलम् ।
ENMSS@2367@2अदर्पविशदा विद्या भवत्युन्नतचेतसाम् ॥ २३६७॥
ENMSS@2368@1अभोगिनौ मण्डलिनौ तत्क्षणान्मुक्तकञ्चुकौ ।
ENMSS@2368@2वरमाशीविषौ स्पृष्टौ न तु पत्न्याः पयोधरौ ॥ २३६८॥
ENMSS@2369@1अभ्यक्तं रहसि गतं विचित्तमन्येन मन्त्रयन्तं वा ।
ENMSS@2369@2उचितप्रणयमपि नृपं सहसार्या नोपसर्पन्ति ॥ २३६९॥
ENMSS@2370@1अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
ENMSS@2370@2बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥ २३७०॥

ENMSS@2371@1अभ्यघानि मुनिचापलात् त्वया यन्मृगः क्षितिपतेः परिग्रहः ।
ENMSS@2371@2अक्षमिष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ॥ २३७१॥
ENMSS@2371A@1अभ्यन्तरगता बाह्या बाह्याश्चाभ्यतरं गताः ।
ENMSS@2371A@2यैर्नरा निधनं यान्ति यथा राजा कचद्रुमः ॥
ENMSS@2372@1अभ्यर्थये किमपि जीवितजन्मतस्त्वाम् उत्कण्ठतोद्गति निःसर तावदेव ।
ENMSS@2372@2कान्ते दृगन्तपथलम्बिनि जीवतीति यावन्न कर्णपथमेति जनापवादः ॥ २३७२॥
ENMSS@2373@1अभ्यर्थ्य सप्रणति मन्दिरमभ्युपेता देवी स्वयं भगवती पृथगेव तासाम् ।
ENMSS@2373@2आसन्नवल्लभसमागमसूचनानि संजीवनानि वचनान्यपि वाचितानि ॥ २३७३॥
ENMSS@2374@1अभ्यस्ताः स्फुटमेव शास्त्रगतयः सम्यक्कवित्वोदधेः पारं चाधिगतं सतां परिषदि प्राप्तः प्रतिष्ठोदयः ।
ENMSS@2374@2निर्विण्णस्य ममाधुना ननु परः पन्था न दैन्यं विना नेतुं वाञ्छति वासना सुरधुनीतीरेऽनुरूपं वयः ॥ २३७४॥
ENMSS@2375@1अभ्यस्तेऽपि नितम्बभारफलके खेदालसेयं गतिः किंचित् संवलितार्धपक्ष्मविरलालोका दृशोऽन्तर्गताः ।
ENMSS@2375@2तन्मन्ये निभृतं त्वयाद्य हृदये कश्चिद्धृतो वल्लभो निश्वासाः कथमन्यथा द्विगुणतामेते तवैवं गताः ॥ २३७५॥
ENMSS@2376@1अभ्यस्तेऽपि हि नाम वस्तुनि चिरादज्ञानसंभावनं शौचाशौचाविवादिता विशकलस्मृत्यक्षरावर्तनम् ।
ENMSS@2376@2वारं वारमृणोपघातकथनं कोऽप्येष डम्भात्मनां प्रायो दग्धदुरीशवञ्चनविधौ जागर्त्यपूर्वः क्रमः ॥ २३७६॥
ENMSS@2377@1अभ्यस्य पवनविजयं व्याख्याय च शैवसंहिताः सकलाः ।
ENMSS@2377@2मरणसमये गुरूणां पर्दवदसवो विनिष्क्रान्ताः ॥ २३७७॥
ENMSS@2378@1अभ्यस्य वेदमवधाय च पूर्वतन्त्रम् आलक्ष्य शिष्टचरितानि पृथग्विधानि ।
ENMSS@2378@2अध्यापनादिभिरवाप्य धनं च भूरि कर्माणि मातरलसाः कथमाचरेयुः ॥ २३७८॥
ENMSS@2379@1अभ्यस्य स्मरदंशकौशलमुपाध्यायीरुपास्यावयोः क्रीडाम्नायरहस्यवस्तुनि मिथोऽप्यासीज्जिगीषा सखि ।

ENMSS@2379@2उत्कम्पोत्पुलकाङ्गसंभृतघनस्वेदाविलस्तन्मया सद्यो निष्प्रतिभः स मन्मथकथावैतण्डिकः खण्डितः ॥ २३७९॥
ENMSS@2380@1अभ्यस्यादौ श्रुतिमथ गृहं प्राप्य लब्ध्वा महार्थान् इष्ट्वा यज्ञैर्जनिततनयः प्रव्रजेदायुषोऽन्ते ।
ENMSS@2380@2इत्याचष्टे य इह स मनुर्याज्ञवल्क्योऽपि वा मे तावत् कालं प्रतिभवति चेदायुषस्तत्प्रमाणम् ॥ २३८०॥
ENMSS@2381@1अभ्यायान्तं झटिति गिलितुं वायुमप्यायतास्ये भीमाकारे प्रकृतिकुटिले बद्धनिर्व्याजवैरे ।
ENMSS@2381@2प्रायेणेत्थं कृतपरिचये पापिनि क्रूरसर्पे भद्रश्रीभिः परिचितिकथा कीदृशी मादृशानाम् ॥ २३८१॥
ENMSS@2382@1अभ्यावहति कल्याणं विविधा वाक्सुभाषिता ।
ENMSS@2382@2सैव दुर्भाषिता राजन्न् अनर्थायोपपद्यते ॥ २३८२॥
ENMSS@2383@1अभ्यासः कर्मणां सम्यग् उत्पादयति कौशलम् ।
ENMSS@2383@2विधिना तावदभ्यस्तं यावत् सृष्टा मृगेक्षणा ॥ २३८३॥
ENMSS@2384@1अभ्यासकारणा विद्या लक्ष्मीः पुण्यानुसारिणी ।
ENMSS@2384@2दानानुसारिणी कीर्तिर्बुद्धिः कर्मानुसारिणी ॥ २३८४॥
ENMSS@2385@1अभ्यासरहिता विद्या निरुद्योगा नृपश्रियः ।
ENMSS@2385@2वेषयोषाश्च रागिण्यो हास्यायतनमङ्गने ॥ २३८५॥
ENMSS@2386@1अभ्यासश्छन्दसां दण्डो ज्वरदण्डश्च लङ्घनम् ।
ENMSS@2386@2यमदण्डो विष्णुभक्तिः शत्रुदण्डः शुभा गतिः ॥ २३८६॥
ENMSS@2387@1अभ्यासस्थितचूतषण्डगहनस्थानादितो गेहिनी ग्रामं कंचिदवृक्षकं विरहिणी तूर्णं वधूर्नीयताम् ।
ENMSS@2387@2अत्रायान्त्यचिरेण कोकिलकुलव्याहारझंकारिणः पन्थस्त्रीजनजीवितैकहरणप्रौढाः पुरो वासराः ॥ २३८७॥
ENMSS@2388@1अभ्यासात्तु स्थिरस्वान्त ऊर्ध्वरेताश्च जायते ।
ENMSS@2388@2परानन्दमयो योगी जरामरणवर्जितः ॥ २३८८॥
ENMSS@2389@1अभ्यासाद्धार्यते विद्या कुलं शीलेन धार्यते ।
ENMSS@2389@2गुणेन ज्ञायते त्वार्यः कोपो नेत्रेण गम्यते ॥ २३८९॥
ENMSS@2390@1अभ्यासाद्धार्यते विद्या कुलं शीलेन धार्यते ।
ENMSS@2390@2गुणैर्मित्राणि धार्यन्ते अक्ष्णा क्रोधश्च धार्यते ॥ २३९०॥
ENMSS@2391@1अभ्यासानुसरी विद्या बुद्धिः कर्मानुसारिणी ।

ENMSS@2391@2उद्योगानुसरी लक्ष्मीः फलं भाग्यानुसारि च ॥ २३९१॥

ENMSS@2392@1अभ्यासेन स्थिरं चित्तम् अभ्यासेनानिलच्युतिः ।

ENMSS@2392@2अभ्यासेन परानन्दो ह्यभ्यासेनात्मदर्शनम् ॥ २३९२॥

ENMSS@2393@1अभ्यासेनान्यसंचारो ह्यभ्यासेनान्यरूपता ।

ENMSS@2393@2अभ्यासेन समुत्क्रान्तिरभ्यासेनाणिमादयः ॥ २३९३॥

ENMSS@2394@1अभ्यासो रतिहेतोर्भवति नराणां न वस्तुसद्गुणतः ।

ENMSS@2394@2सत्यपि मांसोपचये रागाय कुचौ स्फिजौ न पुनः ॥ २३९४॥

ENMSS@2395@1अभ्यासो हि कर्मणां कौशलमावहति ।

ENMSS@2395@2न हि सकृन्निपातमात्रेणोद- बिन्दुरपि ग्रावणि निम्नतामादधाति ॥ २३९५॥

ENMSS@2396@1अभ्युक्षितोऽसि सलिलैर्न बलाहकानां चाषाग्रपक्षसदृशं भृशमन्तराले ।

ENMSS@2396@2मिथ्यैतदाननमिदं भवतस्तथा हि हेमन्तपद्ममिव निष्प्रभतामुपैति ॥ २३९६॥

ENMSS@2397@1अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता तत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्या स्वयम् ।

ENMSS@2397@2सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति प्राच्यैः पुत्रि निवेदितः कुलवधूसिद्धान्तधर्मागमः ॥ २३९७॥

ENMSS@2398@1अभ्युद्धृता वसुमती दलितं रिपूरः क्रीडीकृता बलवता बलिराजलक्ष्मीः ।

ENMSS@2398@2एकत्र जन्मनि कृतं तदनेन यूना जन्मत्रये यदकरोत् पुरुषः पुराणः ॥ २३९८॥

ENMSS@2399@1अभ्युद्यत्कवलग्रहप्रणयिनस्ते शल्लकीपल्लवास्तच्चास्फालसहं सरः क्षितिधृतामित्यस्ति को निह्नुते ।

ENMSS@2399@2दन्तस्तम्भनिषण्णनिःसहकरः श्वासैरतिप्रांशुभिर्येनायं विरही तु वारणपतिः स्वामिन् स विन्ध्यो भवान् ॥ २३९९॥

ENMSS@2400@1अभ्युन्नतस्तनयुगा तरलायताक्षी द्वारि स्थिता तदुपयानमहोत्सवाय ।

ENMSS@2400@2सा पूर्णकुम्भनवनीरजतोरणस्रक् संभारमङ्गलमयत्नकृतं विधत्ते ॥ २४००॥

ENMSS@2401@1अभ्युन्नताङ्गुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरन्तौ ।

ENMSS@2401@2आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ॥ २४०१॥

ENMSS@2402@1अभ्युन्नतानामणुरप्युदारं पश्चात् प्रकोपं जनयेदरीणाम् ।

ENMSS@2402@2तं चाप्रमत्तः प्रसमीक्ष्य यायान्- न नाशयेद् दृष्टमदृष्टहेतोः

॥ २४०२॥

ENMSS@2403@1अभ्युन्नता पुरस्ताद् अवगाढा जघनगौरवात् पश्चात् ।

ENMSS@2403@2द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥ २४०३॥

ENMSS@2404@1अभ्युन्नतेऽपि जलदे जगदेकसार- साधारणप्रणयहारिणि हा यदेते
।

ENMSS@2404@2उल्लासलास्यललितं तरवो न यान्ति हे दावपावक स तावक एव
दोषः ॥ २४०४॥

ENMSS@2405@1अभ्युन्नतेवाङ्घ्रिनखाङ्कुराणां द्युतिर्विरेजे हरिणी दृशोऽस्याः ।

ENMSS@2405@2पुङ्खावली पञ्चशरा युधानां लावण्यदर्पद्विगुणीकृतेव ॥ २४०५॥

ENMSS@2406@1अभ्युन्नतोऽसि सलिलैः परिपूरितोऽसि त्वामर्थयन्ति विहगास्तृषितास्तथैते

।

ENMSS@2406@2कालः पयोधर परोपकृतेस्तवायं चण्डानिलव्यतिकरे क्व भवान् क्व
ते

वा ॥ २४०६॥

ENMSS@2407@1अभ्युपयुक्ताः सद्भिर्गतागतैरहरहः प्रखिन्दानाः ।

ENMSS@2407@2कृपणजनसंनिकर्षं प्राप्यार्थाः प्रस्वपन्तीव ॥ २४०७॥

ENMSS@2408@1अभ्युल्लसन्ति विनिवारितचन्दनानाम् एणीदृशां वपुषि कुङ्कुमपत्रलेखाः
।

ENMSS@2408@2अभ्यागताः करसरोजपदारविन्द- संरक्षणाय किरणा इव तिग्मभानोः

॥ २४०८॥

ENMSS@2409@1अभ्युष्णात् सघृतादन्नाद् अच्छिद्राच्चैव वाससः ।

ENMSS@2409@2अपरप्रेष्यभावाच्च भूय इच्छन् पतत्यधः ॥ २४०९॥

ENMSS@2410@1अभ्येत्य याचितोऽपि त्यक्त्वा लज्ज्ञां मया विगतलज्ज्ञः ।

ENMSS@2410@2चिच्छेदैष ममाशां सहसा प्रतिषेधशस्त्रेण ॥ २४१०॥

ENMSS@2411@1अभ्रच्छाया खलप्रीतिः समुद्रान्ते च मेदिनी ।

ENMSS@2411@2अल्पेनैव विनश्यन्ति यौवनानि धनानि च ॥ २४११॥

ENMSS@2412@1अभ्रच्छाया खलप्रीतिर्नवसस्यानि योषितः ।

ENMSS@2412@2किंचित्कालोपभोग्यानि यौवनानि धनानि च ॥ २४१२॥

ENMSS@2413@1अभ्रच्छाया खलप्रीतिर्वेश्यारागो विभूतयः ।

ENMSS@2413@2महीभुजां प्रसादश्च पञ्चैते चञ्चलाः स्मृताः ॥ २४१३॥

ENMSS@2414@1अभ्रच्छाया तृणादग्निः खलप्रीतिः स्थले जलम् ।
ENMSS@2414@2वेश्यारागः कुमित्रं च षडेते बुद्बुदोपमाः ॥ २४१४॥
ENMSS@2415@1अभ्रच्छाया तृणादग्निः पराधीनं च यत् सुखम् ।
ENMSS@2415@2अज्ञानेषु च वैराग्यं क्षिप्रमेतद् विनश्यति ॥ २४१५॥
ENMSS@2416@1अभ्रध्वानैर्मुखरितदिशः श्रेणयस्तोयदानां धारासारैर्धरणिवलयं सर्वतः प्लावयन्ति ।
ENMSS@2416@2तेन स्नेहं वहति विपुलं मत्सखीयुक्तमेतत् त्वम् निःस्नेहो यदसि तदिदं
नाथ मे विस्मयाय ॥ २४१६॥
ENMSS@2417@1अभ्रपुष्पमपि दित्सति शीतं सार्थिना विमुखता यदभाजि ।
ENMSS@2417@2स्तोककस्य खलु चञ्चुपुटेन म्लानिरुल्लसति तद्घनसंघे ॥ २४१७॥
ENMSS@2418@1अभ्रवृन्दं विशाखान्तं प्रसूत्यन्तं च यौवनम् ।
ENMSS@2418@2राज्यान्तं नरकं तद्वद् याचनान्तं हि गौरवम् ॥ २४१८॥
ENMSS@2419@1अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणम् ।
ENMSS@2419@2इदं तु नयनद्वन्द्वं तव तद्गुणभूषितम् ॥ २४१९॥
ENMSS@2420@1अमञ्जदाकण्ठमसौ सुधासु प्रियं प्रियाया वचनं निपीय ।
ENMSS@2420@2द्विषन्मुखेऽपि स्वदते स्तुतिर्या तन्मिष्टता नेष्टमुखे त्वमेया ॥ २४२०॥
ENMSS@2421@1अमदयन्मधुगन्धसनाथया किसलयाधरसंगतया मनः ।
ENMSS@2421@2कुसुमसंभृतया नवमल्लिका स्मितरुचा तरुचारुविलासिनी ॥ २४२१॥
ENMSS@2422@1अमनस्कं गते चित्ते जायते कर्मणां क्षयः ।
ENMSS@2422@2यथा चित्रपटे दग्धे दह्यते चित्रसंचयः ॥ २४२२॥
ENMSS@2423@1अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
ENMSS@2423@2अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ॥ २४२३॥
ENMSS@2424@1अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
ENMSS@2424@2निर्धना पृथिवी नास्ति ह्याम्नायाः खलु दुर्लभाः ॥ २४२४॥
ENMSS@2425@1अमन्दतरवार्यग्रधाराहतमहीभृतः ।
ENMSS@2425@2चित्रचापधरा वीरा विद्योतन्ते घना इव ॥ २४२५॥
ENMSS@2426@1अमन्दमणिनूपुरक्वणनचारुचारीक्रमं
झणज्झणितमेखलास्खलिततारहारच्छटम् ।
ENMSS@2426@2इदं तरलकङ्कणावलिविशेषवाचालितं मनो हरति सुभ्रुवः किमपि कन्दुकक्रीडितम् ॥ २४२६॥

ENMSS@2427@1अमन्दमत्तमातङ्ग आसाराभ्युदयान्वितः ।
ENMSS@2427@2इत्यादिलक्षणोपेतः स्कन्धावारः प्रशस्यते ॥ २४२७॥
ENMSS@2428@1अमन्दानन्दनिष्यन्दम् अपास्तान्यक्रियाक्रमम् ।
ENMSS@2428@2जगज्जन्मोत्सवे तस्याः पीतामृतमिवाभवत् ॥ २४२८॥
ENMSS@2429@1अमन्दानन्दानां गलदलघुसंतापविपदां पदाम्भोजद्वन्द्वं शिरसि दधतामिन्दुशिरसः ।
ENMSS@2429@2कदा नः कालिन्दीसलिलशबलैरम्बरसरित् तरङ्गैरङ्गारीभवति भवबन्धेन्धनचयः ॥ २४२९॥
ENMSS@2430@1अमन्यतासौ कुसुमेषु गर्भगं परागमन्धंकरणं वियोगिनाम् ।
ENMSS@2430@2स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु संगतम् ॥ २४३०॥
ENMSS@2431@1अमरतरुकुसुमसौरभ- सेवनसंपूर्णसकलकामस्य ।
ENMSS@2431@2पुष्पान्तरसेवेयं भ्रमरस्य विडम्बना महती ॥ २४३१॥
ENMSS@2432@1अमरयुवतिगीतोद्ग्रीवसारङ्गशृङ्गो-
ल्लिखितशशिसुधाम्भःशाद्वलारामरम्याम् ।
ENMSS@2432@2सुरपतिगजगण्डस्रंसिदानाम्बुधारा प्रसवसुरभिमाशां वासवीयां नमामि ॥ २४३२॥
ENMSS@2433@1अमरीमुखसीधुमाधुरीणां लहरी काचन चातुरी कलानाम् ।
ENMSS@2433@2तरलीकुरुते मनो मदीयं मुरलीनादपरंपरा मुरारेः ॥ २४३३॥
ENMSS@2434@1अमरुककवित्वडमरुक- नादेन विनुह्नुता न संचरति ।
ENMSS@2434@2शृङ्गारभणितिरन्या धन्यानां श्रवणविवरेषु ॥ २४३४॥
ENMSS@2435@1अमरैरमृतं न पीतमब्धेर्न च हालाहलमुल्बणं हरेण ।
ENMSS@2435@2विधिना निहितं खलस्य वाचि द्वयमेतद् बहिरेकमन्तरन्यत् ॥ २४३५॥
ENMSS@2436@1अमरैर्गतं मधुकरैश्चलितं प्रवरैः प्रयातमपि पद्मदृशाम् ।
ENMSS@2436@2विभवे गते सकलमेव गतं ध्रुवमेकमश्चति यशः सरसः ॥ २४३६॥
ENMSS@2437@1अमर्त्याः सन्तु मर्त्या वा चेतनाः सन्त्वचेतनाः ।
ENMSS@2437@2दानमेव पुरस्कृत्य स्तूयन्ते भुवनैस्त्रिभिः ॥ २४३७॥
ENMSS@2438@1अमर्षिणा कृत्यमिव क्षमाश्रयं मदोद्धतेनेव हितं प्रियं वचः ।
ENMSS@2438@2बलीयसा तद्विधिनेव पौरुषं बलं निरस्तं न रराज जिष्णुना ॥ २४३८॥
ENMSS@2439@1अमर्षोपगृहीतानां मन्युसंतप्तचेतसाम् ।
ENMSS@2439@2परस्परापकारेण पुंसां भवति विग्रहः ॥ २४३९॥

ENMSS@2440@1अमलमृणालकाण्डकमनीयकपोलरुचेस्तरलसलीलनीलनलिनप्रतिफुल्लदृशः ।
ENMSS@2440@2विकसदशोकशोणकरकान्तिभृतः सुतनोर्मदलुलितानि हन्त ललितानि हरन्ति मनः ॥ २४४०॥
ENMSS@2441@1अमलात्मसु प्रतिफलन्नभितस्तरुणीकपोलफलकेषु मुहुः ।
ENMSS@2441@2विससार सान्द्रतरमिन्दुरुचाम् अधिकावभासितदिशां निकरः ॥ २४४१॥
ENMSS@2442@1अमलीमसमच्छिद्रम् अक्रौर्यमतिसुन्दरम् ।
ENMSS@2442@2अदेयमप्रतिग्राह्यम् अहो ज्ञानं महाधनम् ॥ २४४२॥
ENMSS@2443@1अमात्यः शूर एव स्याद् युद्धसंपन्न एव च ।
ENMSS@2443@2तस्मादपि भयं राज्ञः पश्य राज्यस्य योजनम् ॥ २४४३॥
ENMSS@2444@1अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः ।
ENMSS@2444@2एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः ॥ २४४४॥
ENMSS@2445@1अमात्याद्याः प्रकृतयो मित्रान्ता राज्यमुच्यते ।
ENMSS@2445@2अशेषराज्यव्यसनात् पार्थिवव्यसनं गुरु ॥ २४४५॥
ENMSS@2446@1अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया ।
ENMSS@2446@2नृपतौ कोषराष्ट्रे तु दूते संधिविपर्ययौ ॥ २४४६॥
ENMSS@2447@1अमात्यैः कामवृत्तो हि राजा कापथमाश्रितः ।
ENMSS@2447@2निग्राह्यः सर्वथा सद्भिर्न निग्राह्यो निगृह्यसे ॥ २४४७॥
ENMSS@2448@1अमात्यो युवराजश्च भुजावेतौ महीपतेः ।
ENMSS@2448@2मन्त्री नेत्रं हि तद्भिन्न एतस्मिन्नपि तद्वधः ॥ २४४८॥
ENMSS@2449@1अमात्सर्यं बुधाः प्राहुर्दानं धर्मे च संयमम् ।
ENMSS@2449@2अवस्थितेन नित्यं च सत्येनामत्सरी भवेत् ॥ २४४९॥
ENMSS@2450@1अमानितं हि युध्येत कृतमानार्थसंग्रहम् ।
ENMSS@2450@2न विमानिमत्यर्थं प्रदीप्तक्रोधपावकम् ॥ २४५०॥
ENMSS@2451@1अमानुषं सत्त्वमन्तर्योगिनं प्रविशेद्यदि ।
ENMSS@2451@2वाय्वग्निधारणा चैनं देहसंस्थं विनिर्दहेत् ॥ २४५१॥
ENMSS@2452@1अमानेनापि भवता दानमानादिभिर्गुणैः ।
ENMSS@2452@2आश्रितः सर्व एवायं समानः क्रियते जनः ॥ २४५२॥
ENMSS@2453@1अमाययैव वर्तेत न कथंचन मायया ।
ENMSS@2453@2बुध्येतारिप्रयुक्तां च मायां नित्यं सुसंवृतः ॥ २४५३॥
ENMSS@2454@1अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ।

ENMSS@2454@2ब्रह्मचारी भवेन्नित्यम् अप्यृतौ स्नातको द्विजः ॥ २४५४॥
ENMSS@2455@1अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः ।
ENMSS@2455@2मदनानलबोधने भवेत् खग धाय्या धिगधैर्यधारिणः ॥ २४५५॥
ENMSS@2456@1अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
ENMSS@2456@2अहितः सहितः साधुयशोभिरसतामसि ॥ २४५६॥
ENMSS@2457@1अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
ENMSS@2457@2निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव ॥ २४५७॥
ENMSS@2458@1अमितद्युतिराकरात् प्रसूतिः परिशुद्धा च महामणेर्विशेषः ।
ENMSS@2458@2मकुटे चरणाङ्गुलीयके वा विनिवेशः पुनरस्य शिल्पितन्त्रम् ॥ २४५८॥
ENMSS@2459@1अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
ENMSS@2459@2कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ २४५९॥
ENMSS@2460@1अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
ENMSS@2460@2शुभं वेत्त्यशुभं पापं भद्रं दैवहतो नरः ॥ २४६०॥
ENMSS@2461@1अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति वः ।
ENMSS@2461@2मित्राणि तस्य नश्यन्ति अमित्रं नष्टमेव च ॥ २४६१॥
ENMSS@2462@1अमित्रं नैव मुञ्चेत ब्रुवन्तं करुणान्यपि ।
ENMSS@2462@2दुःखं तत्र न कुर्वीत हन्यात् पूर्वापकारिणम् ॥ २४६२॥
ENMSS@2463@1अमित्रमपि चेद्दीनं शरणैषिणमागतम् ।
ENMSS@2463@2व्यसने योऽनुगृह्णाति स वै पुरुषसत्तमः ॥ २४६३॥
ENMSS@2464@1अमित्रप्रमिता ह्येता गतश्रद्धाः सुदारुणः ।
ENMSS@2464@2मूलप्रवादेन विषं प्रयच्छन्ति जिघांसवः ॥ २४६४॥
ENMSS@2465@1अमित्रव्यसनान्मित्रम् उत्थितं यद्विरज्यति ।
ENMSS@2465@2अरिव्यसनसिद्ध्या तच्छत्रुणैव प्रसिध्यति ॥ २४६५॥
ENMSS@2466@1अमित्राणां वधे युक्तो मित्राणां संग्रहे रतः ।
ENMSS@2466@2त्रिवर्गफलभोक्ता तु राजा धर्मेण युज्यते ॥ २४६६॥
ENMSS@2467@1अमित्रादुन्नतिं प्राप्य नोन्नतोऽस्मीति विश्वसेत् ।
ENMSS@2467@2तस्मात् प्राप्योन्नतिं नश्येत् प्रावार इव कीटकः ॥ २४६७॥
ENMSS@2468@1अमित्रानपि कुर्वीत मित्रान्युपचयावहान् ।
ENMSS@2468@2अहिते वर्तमानानि मित्राण्यपि परित्यजेत् ॥ २४६८॥
ENMSS@2469@1अमित्रे विश्वासः श्वपचकरके सौमिकरसः कपाले गङ्गाम्भः
खलपरिषदङ्के सुजनता ।

ENMSS@2469@2परिक्षीणाचारे श्रुतमनुपनीते च निगमः स्वतःसिद्धां शुद्धिं त्यजति विपरीतं च फलति ॥ २४६९॥
ENMSS@2470@1अमित्रो न विमोक्तव्यः कृपणं बह्वपि ब्रुवन् ।
ENMSS@2470@2कृपा तस्मिन् न कर्तव्या हन्यादेवापकारिणम् ॥ २४७०॥
ENMSS@2471@1अमित्रो मित्रतां याति मित्रं चापि प्रदुष्यति ।
ENMSS@2471@2सामर्थ्ययोगात् कार्याणां तद्गत्या हि सदा गतिः ॥ २४७१॥
ENMSS@2472@1अमी कारागारे निविडनलिनीनालनिगडैर्निबध्यन्तां हंसाः प्रथमविसकन्दाङ्कुरभिदः ।
ENMSS@2472@2नवे वासन्तीनामुदयिनि वने गर्भकलिका- च्छिदो निर्धार्यन्तां परभृतयुवानो मदकलाः ॥ २४७२॥
ENMSS@2473@1अमी तटसमीपनिर्झरतरङ्गरिङ्गत्पयो-
जडीकृतपटीरभूरुहकुटीरसंचारिणः ।
ENMSS@2473@2मनो विधुरयन्ति मे मलयमेखलामेदुराः दुरासदवनप्रियप्रियतमारुता मारुताः ॥ २४७३॥
ENMSS@2474@1अमी तिलाः तैलिक नूनमेतां स्नेहादवस्थां भवतोपनीताः ।
ENMSS@2474@2द्वेषोऽभविष्यद्यदमीषु नूनं तदा न जाने किमिवाकरिष्यः ॥ २४७४॥
ENMSS@2475@1अमी पानकरम्भाभाः सप्तापि जलराशयः ।
ENMSS@2475@2त्वद्यशोराज हंसस्य पञ्जरं भुवनत्रयम् ॥ २४७५॥
ENMSS@2476@1अमी पुरस्थाः सकलाः सुनिद्रिता न नूपुरं मुञ्च सुखेन यास्यसि ।
ENMSS@2476@2व्रजत्यपि श्रीपतिरङ्घ्रिमाश्रितं हरे तवाख्यातिरियं भविष्यति ॥ २४७६॥
ENMSS@2477@1अमी पृथुस्तम्बभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः ।
ENMSS@2477@2विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुमिवास्यतोत्पलम् ॥ २४७७॥
ENMSS@2478@1अमीभिः संसिक्तेस्तव किमु फलं वारिदघटे यदेतेऽपेक्षन्ते सलिलमवटेभ्योऽपि तरवः ।
ENMSS@2478@2अयं युक्तो व्यक्तं ननु सुखयितुं चातकशिशुर्यदेष ग्रीष्मेऽपि स्पृहयति न पाथस्त्वदपरान् ॥ २४७८॥
ENMSS@2479@1अमीभिराकण्ठमभोजि तद्गृहे तुषारधारामृदितेव शकरा ।
ENMSS@2479@2हयद्विषद्वष्कयणीपयः सुतं सुधाह्रदात् पङ्कमिवोद्धृतं दधि ॥ २४७९॥
ENMSS@2480@1अमी व्यर्थारम्भा दुरधिगमभूभृत्परिसरे विषक्ता लक्ष्यन्ते वयमिव

हताशा जलधराः ।

ENMSS@2480@2ममेवान्तश्चेष्टाविफलविपुलाकारविभवाः स्वभूमौ यान्तीमाः परिणतिमसंख्याश्च सरितः ॥ २४८०॥

ENMSS@2481@1अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिविहारिणीनाम् ।

ENMSS@2481@2पारिप्लवाः स्रोतसि निम्नगायाः शैवाललोलांश्छलयन्ति मीनान् ॥ २४८१॥

ENMSS@2482@1अमीषां जन्तूनां कतिपयनिमेषस्थितिजुषां वियोगे धीराणां क इह परितापस्य विषयः ।

ENMSS@2482@2क्षणादुत्पद्यन्ते विलयमपि यान्ति क्षणममी न केऽपि स्थातारः सुरगिरिपयोधिप्रभृतयः ॥ २४८२॥

ENMSS@2483@1अमीषां प्राणानां तुलितबिसिनीपत्रपयसां कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ।

ENMSS@2483@2यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ २४८३॥

ENMSS@2484@1अमीषां मञ्जुश्रीरुचिरवदनश्रीकृतरुचां श्रुतं नो नामापि क्व नु खलु हिमांशुप्रकृतयः ।

ENMSS@2484@2ममाभ्यर्णे धार्ष्ट्याच्चरति पुनरिन्दीवरमिति क्रुधेवेदं प्रान्तारुणमवतु वो लोचनयुगम् ॥ २४८४॥

ENMSS@2485@1अमीषां मण्डलाभोगः स्तनानामेव शोभते ।

ENMSS@2485@2येषामुपेत्य सोत्कम्पा राजानोऽपि करप्रदाः ॥ २४८५॥

ENMSS@2486@1अमीषां मोहाद्वा धरणिधरचूडाञ्चलभुवाम् अभाग्याद्वा कैश्चिन्मरकतमणिश्चेन्न गणितः ।

ENMSS@2486@2तथासौ रथ्यायामपि निपतितः किं न कुरुते समुन्मीलन्नीलद्युतिलहरिलिप्ता इव दिशः ॥ २४८६॥

ENMSS@2487@1अमीषामामोदप्रणयसुभगं संगतमभूत् प्रसूनैरुन्निद्रैः सह बहुभिरेव प्रतिवनम् ।

ENMSS@2487@2उदन्या न क्वापि व्यरमदरविन्दे परममी पिबन्ति स्वच्छन्दं रसमुदरपूरं मधुलिहः ॥ २४८७॥

ENMSS@2488@1अमीषामारूढप्रसवविवराणां मधुलिहां ध्वनिः पान्थस्त्रीणां प्रसरति वियोगज्वर इव ।

ENMSS@2488@2द्रुमालीनां यूनोर्मन इव सरागं किसलयं परागः पुष्पाणां पतति

मदनस्येव विशिखः ॥ २४८८॥

ENMSS@2489@1अमीषामुष्णांशोः किरणनिकराणां परिचयात् सरस्तीक्ष्णं माभूस्तव किल

निसर्गः शिशिरिमा ।

ENMSS@2489@2दुरात्मानो ह्येते कतिपयपयोबिन्दुरसिकान् निरस्यन्तः पान्थांस्त्वयि किमपि

शोषं विदधति ॥ २४८९॥

ENMSS@2490@1अमी समुद्धूतसरोजरेणुना हृता हृतासारकणेन वायुना ।

ENMSS@2490@2उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः ॥ २४९०॥

ENMSS@2491@1अमी हि वस्त्रान्तनिरुद्धवक्त्राः प्रयान्ति मे दूरतरं वयस्याः ।

ENMSS@2491@2परोऽपि बन्धुः सुखसंस्थितस्य मित्रं न कश्चिद् विषमस्थितस्य

॥ २४९१॥

ENMSS@2492@1अमी हि वृक्षाः फलपुष्पशोभिताः कठोरनिष्पन्दलतोपवेष्टिताः ।

ENMSS@2492@2नृपाज्ञया रक्षिजनेन पालिता नराः सदारा इव यान्ति निर्वृतिम् ॥ २४९२॥

ENMSS@2493@1अमी हेलोन्मेषव्यसनिषु पलाशेषु परितः पिबन्ति स्वच्छन्दं मधु

मधुलिहो माद्यति जनः ।

ENMSS@2493@2अयं च प्रत्यग्रं दशति सहकारं परभृतो यदीदं मर्मान्तर्विदलति

क एष व्यतिकरः ॥ २४९३॥

ENMSS@2494@1अमुं कालक्षेपं त्यज जलद गम्भीरमधुरैः किमेभिर्निर्घोषैः सृज

झटिति झात्कारि सलिलम् ।

ENMSS@2494@2अये पश्यावस्थामकरुणसमीरव्यतिकर-

स्फुरद्दावज्वालावलिजटिलमूर्तेर्विटपिनः ॥ २४९४॥

ENMSS@2495@1अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।

ENMSS@2495@2यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥ २४९५॥

ENMSS@2496@1अमुं सहासप्रहितेक्षणानि व्याजार्धसंदर्शितमेखलानि ।

ENMSS@2496@2नालं विकर्तुं जनितेन्द्रशङ्कं सुराङ्गनाविभ्रमचेष्टितानि ॥ २४९६॥

ENMSS@2497@1अमुक्तां भूषयन्तु स्वां तनुं संसारसिन्धुगैः ।

ENMSS@2497@2मणिकर्णी ताम्रपर्णी मुक्तिमुक्ताफलैर्जनाः ॥ २४९७॥

ENMSS@2498@1अमुद्रकुमुदत्विषः स्फुरितफेनलक्ष्मीस्पृशो मरालकुलविभ्रमाः

शफरफाललीलाभृतः ।

ENMSS@2498@2जयन्ति गिरिजापतेस्तरलमौलिमन्दाकिनी-

तरङ्गचयचुम्बिनस्तुहिनदीधितेरंशवः ॥ २४९८॥

ENMSS@2499@1अमुद्रोऽपि वरं कूपः समुद्रेणापि तेन किम् ।

ENMSS@2499@2सुस्वादु सलिलं यत्र पीयते पथिकैः पथि ॥ २४९९॥

ENMSS@2500@1अमुना मरुकूपेन के के नाम न वञ्चिताः ।

ENMSS@2500@2रुदत्पथिकनेत्राम्बुपिच्छिलप्रान्तभूमिना ॥ २५००॥

ENMSS@2501@1अमुना यमुनाजलकेलिकृता सहसा तरसा परिरभ्य भृता ।

ENMSS@2501@2हरिणा हरिणी मृगनेत्रवती नवयौवनयौवनभारवती ॥ २५०१॥

ENMSS@2502@1अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना ।

ENMSS@2502@2नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ॥ २५०२॥

ENMSS@2503@1अमुनैव पथागतागतं कृतवानद्य मनोहरो हरिः ।

ENMSS@2503@2सखि दुर्जनभीतया मया हतया हन्त चिरं न वीक्षितः ॥ २५०३॥

ENMSS@2504@1अमुष्मिन्नारामे तरुभिरभिरामे विटपिनः स्फुटं नृत्यद्भृङ्गी

विविधनवसंगीतकलनात् ।

ENMSS@2504@2परानन्दैः पूर्णाः क इव तव वर्णावलिपद- क्रमश्रोता वेत्ता द्विजवर

शुक श्राम्यसि कुतः ॥ २५०४॥

ENMSS@2505@1अमुष्मिन्नुद्यानद्रुमकुहरनीरन्ध्रभरिते तमःखण्डे

पिण्डीकृतबहलकालायसघने ।

ENMSS@2505@2यतामद्यास्माकं कथमपि पुरोन्यस्तचरणं निमेषेऽप्युन्मेषे नहि नहि

विशेषो नयनयोः ॥ २५०५॥

ENMSS@2506@1अमुष्मिन्नुद्याने विहगखल एष प्रतिकलं विलोलः काकोलः क्वणति
खलु

यावत् कटुतरम् ।

ENMSS@2506@2सखे तावत् कीर द्रढय हृदि वाचं च सकलां न मौनेन न्यूनो

भवति गुणभाजां गुणगणः ॥ २५०६॥

ENMSS@2507@1अमुष्मिन् पञ्चेषोस्त्रिभुवनजिगीषोः सहचरे मुखं रात्रेरत्रेस्तनुभुवि

रहश्चुम्बति सति ।

ENMSS@2507@2ज्वलन्तीर्ष्यारोषोदयमयतयेवोषधिलताः पतद्भृङ्गीभङ्ग्या दधति

कुमुदिन्यः कलुषताम् ॥ २५०७॥

ENMSS@2508@1अमुष्मिन् संनद्धे जलमुचि समभ्यस्य कतिचित् ककारान्

पर्यन्तद्विगुणमतरेफप्रसविनः ।

ENMSS@2508@2स माद्यन्दात्यूहश्चलविपुलकण्ठः प्रसरति क्रमोदञ्चत्तारः

क्रमवशनमन्मन्दमधुरः ॥ २५०८॥

ENMSS@2509@1अमुष्मिन् संसारे परिकलितसारेतरतया तदा विद्योत्कर्षः परिणतिमुपैति

श्रुतिविदाम् ।

ENMSS@2509@2यदा मन्दाकिन्या मधुरवमरालीकलकल- प्रणालीवाचाले परिसरतटे यान्ति

दिवसाः ॥ २५०९॥

ENMSS@2510@1अमुष्मिंल्लावाण्यामृतसरसि नूनं मृगदृशः स्मरः शर्वप्लुष्टः

पृथुजघनभागे निपतितः ।

ENMSS@2510@2यदङ्गाङ्गाराणां प्रथमपिशुना नाभिकुहरे शिखा धूमस्येयं परिणमति

रोमावलिवपुः ॥ २५१०॥

ENMSS@2511@1अमुष्मै चौराय प्रतिनिहतमृत्युप्रतिभिये प्रभुः प्रीतः

प्रादादुपरितनपादद्वयकृते ।

ENMSS@2511@2सुवर्णानां कोटीर्दश दशनकोटिक्षतगिरीन् गजेन्द्रानप्यष्टौ

मदमुदितकूजन्मधुलिहः ॥ २५११॥

ENMSS@2512@1अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता ।

ENMSS@2512@2उरःश्रिया तत्र च गोपुरस्फुरत्- कपाटदुर्धर्षतिरःप्रसारिता ॥ २५१२॥

ENMSS@2513@1अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन् ।

ENMSS@2513@2निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि ॥ २५१३॥

ENMSS@2514@1अमुष्य मुषिता लक्ष्मीश्चक्षुषेति न नूतनम् ।

ENMSS@2514@2न वेद्मि कथयत्यस्याः कर्णे लग्नं किमुत्पलम् ॥ २५१४॥

ENMSS@2515@1अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम् ।

ENMSS@2515@2अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम् ॥ २५१५॥

ENMSS@2516@1अमुष्यां संक्रान्तौ तव तरुणि तारुण्यतरणे स्मरो दाता

देवस्त्रिवलितटिनीतीरनिकटे ।

ENMSS@2516@2अमू ते वक्षोजौ सखि सुघटितौ हाटकघटौ महादानं कस्मै वद भवतु

सारङ्गनयने ॥ २५१६॥

ENMSS@2517@1अमुष्या लावण्यं मृदुलमृदुलानप्यवयवान् मनोलौल्यं धातुः करकठिनतां

मे विमृशति ।

ENMSS@2517@2पदं चित्ते धत्ते मतिरिति पुरा पङ्कजभुवा ध्रुवं कल्याणीयं कलितसुकृतैरेव रचिता ॥ २५१७॥

ENMSS@2518@1अमुष्योर्वीभर्त्तुः प्रसृमरचमूसिन्धुरभवैरवैमि प्रारब्धे वमथुभिरवश्यायसमये ।

ENMSS@2518@2न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न तद् वधूवक्राम्भोजं भवतु न स तेषां कुदिवसः ॥ २५१८॥

ENMSS@2519@1अमूनि गच्छन्ति युगानि न क्षणः कियत् सहिष्ये न हि मृत्युरस्ति मे ।

ENMSS@2519@2स मां न कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः ॥ २५१९॥

ENMSS@2520@1अमूर्खो यो मनुष्याणां मन्युसंतप्तचेतसाम् ।

ENMSS@2520@2परस्परोपकारेण पुंसां भवति विग्रहः ॥ २५२०॥

ENMSS@2521@1अमूर्हि भित्त्वा जलदान्तराणि पङ्कान्तराणीव मृणालसूच्यः ।

ENMSS@2521@2पतन्ति चन्द्रव्यसनाद्विमुक्ता दिवोऽश्रुधारा इव वारिधाराः ॥ २५२१॥

ENMSS@2522@1अमूल्यस्य मम स्वर्णतुलाकोटिद्वयं कियत् ।

ENMSS@2522@2इति कोपादिवाताम्रं पादयुग्मं मृगीदृशः ॥ २५२२॥

ENMSS@2523@1अमृतं किरति हिमांशुर्विषमेव फणी समुद्गिरति ।

ENMSS@2523@2गुणमेव वक्ति साधुर्दोषमसाधुः प्रकाशयति ॥ २५२३॥

ENMSS@2524@1अमृतं चैव मृत्युश्च द्वयं देहे प्रतिष्ठितम् ।

ENMSS@2524@2मृत्युमापद्यते मोहात् सत्येनापद्यतेऽमृतम् ॥ २५२४॥

ENMSS@2525@1अमृतं तदधरबिम्बे वचनेष्वमृतं विलोकनेऽप्यमृतम् ।

ENMSS@2525@2अमृतभृतौ कुचकुम्भौ सत्यं सा सृष्टिरपरैव ॥ २५२५॥

ENMSS@2526@1अमृतं दुर्लभं न् णां देवानामुदकं तथा ।

ENMSS@2526@2पित् णां दुर्लभः पुत्रस्तक्रं शक्रस्य दुर्लभम् ॥ २५२६॥

ENMSS@2527@1अमृतं नाम यत् सन्तो मन्त्रजिह्वेषु जुह्वति ।

ENMSS@2527@2शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥ २५२७॥

ENMSS@2528@1अमृतं भुज्यते विद्ये भवतीमाश्रितैः परम् ।

ENMSS@2528@2अन्ये तु बत दूयन्ते संसरन्त इतस्ततः ॥ २५२८॥

ENMSS@2529@1अमृतं शिशिरे वह्निरमृतं क्षीरभोजनम् ।

ENMSS@2529@2अमृतं गुणवद्भार्या अमृतं बालभाषितम् ॥ २५२९॥

ENMSS@2530@1अमृतं शिशिरे वह्निरमृतं प्रियदर्शनम् ।

ENMSS@2530@2अमृतं राजसंमानम् अमृतं क्षीरभोजनम् ॥ २५३०॥

ENMSS@2531@1अमृतं शिशिरे वह्निरमृतं बालभाषणम् ।

ENMSS@2531@2अमृतं स्वप्रिया भार्या ह्यमृतं स्वामिगौरवम् ॥ २५३१॥

ENMSS@2532@1अमृतं शिशिरे वह्निरमृतं स्वामिगौरम् ।

ENMSS@2532@2भार्यामृतं गुणवती धारोष्णममृतं पयः ॥ २५३२॥

ENMSS@2533@1अमृतं सद्गुणा भार्या अमृतं बालभाषितम् ।

ENMSS@2533@2अमृतं राजसंमानम् अमृतं मानभोजनम् ॥ २५३३॥

ENMSS@2534@1अमृतजलधेः पायं पायं पयांसि पयोधरः किरति करकास्ताराकारा यदि

स्फटिकावनौ ।

ENMSS@2534@2तदिह तुलनामानीयन्ते क्षणं कठिनाः पुनः सततममृतस्यन्दोद्गारा

गिरः प्रतिभावताम् ॥ २५३४॥

ENMSS@2535@1अमृतद्रवमाधुरीधुरीणां गिरमाकर्ण्य कुरङ्गलोचनायाः ।

ENMSS@2535@2मुहुरभ्यसनं कषायकण्ठी कलकण्ठी कुरुते कुहूरुतेन ॥ २५३५॥

ENMSS@2536@1अमृतद्रवैर्विदधदब्जदृशाम् अपमार्गमोषधिपतिः स्म करैः ।

ENMSS@2536@2परितो विसर्पि परितापि भृशं वपुषोऽवतारयति मानविषम् ॥ २५३६॥

ENMSS@2537@1अमृतनिधानं रुचिरं संतापनिवर्तते सदा निरतम् ।

ENMSS@2537@2चन्द्रमुखं तव सुन्दरि सुस्मितभासा विकासते परितः ॥ २५३७॥

ENMSS@2538@1अमृतमधुरैः काञ्चीनादैः कृताभयडिण्डिमे

त्रिवलिलहरीलावण्याम्भःकणोत्करकर्बुरे ।

ENMSS@2538@2विषमनयनज्वालाजालावलीढपराक्रमो लुठति मदनस्तन्वङ्गीनां

नितम्बशिलातले ॥ २५३८॥

ENMSS@2539@1अमृतममृतं कः संदेहो मधून्यपि नान्यथा मधुरमधिकं चूतस्यापि

प्रसन्नरसं फलम् ।

ENMSS@2539@2सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्ञनो वदतु यदिहान्यत्स्वादु स्यात्

प्रियादशनच्छदात् ॥ २५३९॥

ENMSS@2540@1अमृतममृतं चन्द्रं चन्द्रं रतिं च रतिं तथा प्रथितमतयः

कामं ब्रूयुर्मधूनि मधून्यपि ।

ENMSS@2540@2यदि न सुभगास्पर्शामोदं विना प्रमुदे ततः सकलमकलं तेषां व्यूहं

ब्रवीमि पुनः प्रिये ॥ २५४०॥

ENMSS@2541@1अमृतममृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं रतिरपि रतिः कामः

कामो मधूनि मधून्यपि ।

ENMSS@2541@2इति न भजते वस्तु प्रायः परस्परसंकरं तदियमबला धत्ते लक्ष्मीं कथं सकलात्मिकाम् ॥ २५४१॥

ENMSS@2542@1अमृतमयमनङ्गक्ष्मारुहस्यालवालं मृतदिवसकपालं कालकापालिकस्य ।

ENMSS@2542@2जयति मकरकेतोः शाणचक्रं शराणाम् अमरपुरपुरन्ध्रीदर्पणः श्वेतभानुः ॥ २५४२॥

ENMSS@2543@1अमृतरसविसरवितरण- मरणोत्तारितसुरे सति पयोधौ ।

ENMSS@2543@2कस्य स्फुरन्ति हृदये ग्रीष्मतडाका भुवि वराकाः ॥ २५४३॥

ENMSS@2544@1अमृतरससारभूतः सकलकलो मकरकेतुसर्वस्वम् ।

ENMSS@2544@2अखिलजननयनसुखकृत् कथमिन्दुर्वासरेऽभ्युदितः ॥ २५४४॥

ENMSS@2545@1अमृतवचनलीलाविभ्रमैरन्नपानं रचय चतुर कीर भ्रान्तचित्तेषु तेषु ।

ENMSS@2545@2अकलितपरसेवातापपापः पिकोऽसौ भजतु विपिनवाटीमेष पीयूषकण्ठः ॥ २५४५॥

ENMSS@2546@1अमृतसिक्तमिवाङ्गमिदं यदि भवति तन्वि तवाद्भुतवीक्षितैः ।

ENMSS@2546@2अधरमिन्दुकरादपि शुभ्रयन्त्यरुणयन्त्यरुणादपि किं दृशम् ॥ २५४६॥

ENMSS@2547@1अमृतस्यन्दिकिरणश्चन्द्रमा नामतो मतः ।

ENMSS@2547@2अन्य एवायमर्थात्मा विषनिष्यन्दिदीधितिः ॥ २५४७॥

ENMSS@2548@1अमृतस्यन्दिनं कश्चित् कृष्णमेघं द्विजः स्मरन् ।

ENMSS@2548@2उदन्यया न वेशन्तम् उदन्वन्तं च वीक्षते ॥ २५४८॥

ENMSS@2549@1अमृतस्य प्रवाहैः किं कायक्षालनसंभवैः ।

ENMSS@2549@2चिरान्मित्रपरिष्वङ्गो योऽसौ मूल्यविवर्जितः ॥ २५४९॥

ENMSS@2550@1अमृतस्येव कुण्डानि सुखानामिव राशयः ।

ENMSS@2550@2रतेरिव निधानानि योषितः केन निर्मिताः ॥ २५५०॥

ENMSS@2551@1अमृतस्येव तृप्येत अपमानस्य योगवित् ।

ENMSS@2551@2विषवच्च जुगुप्सेत संमानस्य सदा द्विजः ॥ २५५१॥

ENMSS@2552@1अमृतस्येव संतृप्येद् अवमानस्य वै द्विजः ।

ENMSS@2552@2सुखं ह्यवमतः शेते योऽवमन्ता स नश्यति ॥ २५५२॥

ENMSS@2553@1अमृतांशोः किरणेभ्यो- ऽजायत वृद्धिर्महोदधेरुदरे ।

ENMSS@2553@2कथयन्ति हारमणयो हृदि तापमुषः स्पृशन्तोऽपि ॥ २५५३॥

ENMSS@2554@1अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके ।
ENMSS@2554@2मुखेन्दौ तव सत्यस्मिन् अपरेण किमिन्दुना ॥ २५५४॥
ENMSS@2555@1अमृतादमृतं न तावकाद् अपरं यत् त्रिपुराररिरादरात् ।
ENMSS@2555@2अवलम्ब्य शिरःस्थलेन तद् धृतहालाहाल एष जीवति ॥ २५५५॥
ENMSS@2556@1अमृताध्मातजीमूतस्निग्धसंहननस्य ते ।
ENMSS@2556@2परिष्वङ्गीय वात्सल्याद् अयमुत्कण्ठते जनः ॥ २५५६॥
ENMSS@2557@1अमृताप्यायिनां न् णां संतोषो नैव जायते ।
ENMSS@2557@2गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥ २५५७॥
ENMSS@2558@1अमृतायतामिति वदेत् पीते भुक्ते क्षुते च शतं जीव ।
ENMSS@2558@2छोटिकया सह जृम्भा- समये स्यातां चिरायुरानन्दौ ॥ २५५८॥
ENMSS@2559@1अमृता विगतप्राणा सान्तः शल्याकृतव्रणा ।
ENMSS@2559@2अबद्धा निश्चलेवास्ते कूटसंस्थे मृगे मृगी ॥ २५५९॥
ENMSS@2560@1अमृतोत्प्रेक्षणे चारुरशेषजनसञ्जनः ।
ENMSS@2560@2कविर्गरुडवन्मान्य इन्द्रवज्रादिवृत्तकृत् ॥ २५६०॥
ENMSS@2561@1अमृतोन्मथितैः सुवर्णचूर्णैर्मृदमुत्पाद्य निधाय नाभिचक्रे ।
ENMSS@2561@2अकरोन्नवरोमराजियष्ट्या कुचकुम्भौ कुसुमेषुकुम्भकारः ॥ २५६१॥
ENMSS@2562@1अमेध्यपूर्णे कृमिजालसंकुले स्वभावदुर्गन्धिनि शौचवर्जिते ।
ENMSS@2562@2कलेवरे मूत्रपुरीषभाजने रमन्ति मूढा विरमन्ति पण्डिताः ॥ २५६२॥
ENMSS@2563@1अमेयो मितलोकस्त्वम् अनर्थी प्रार्थनावहः ।
ENMSS@2563@2अजितो जिष्णुरत्यन्तम् अव्यक्तो व्यक्तकारणम् ॥ २५६३॥
ENMSS@2564@1अमोघक्रोधहर्षस्य स्वयं कृत्यान्ववेक्षिणः ।
ENMSS@2564@2आत्मप्रत्ययकोशस्य वसुधेयं वसुंधरा ॥ २५६४॥
ENMSS@2565@1अमोघा वासरे विद्युद् अमोघं निशि गर्जितम् ।
ENMSS@2565@2अमोघा मुनीनां वाणी अमोघं देवदर्शनम् ॥ २५६५॥
ENMSS@2566@1अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणम् ।
ENMSS@2566@2देवतानां पित् णां च भागो येन प्रदीयते ॥ २५६६॥
ENMSS@2567@1अम्बरं विनयतः प्रियपाणेर्योषितश्च करयोः कलहस्य ।
ENMSS@2567@2वारणामिव विधातुमभीक्ष्णं कक्ष्यया च वलयैश्च शिशिञ्जे ॥ २५६७॥
ENMSS@2568@1अम्बरं स्तिमितमम्बुधारया व्यक्त एष परितः पयोधरः ।
ENMSS@2568@2प्रावृषा किमपि लज्जमानया मीलिते रविविधूविलोचने ॥ २५६८॥
ENMSS@2569@1अम्बरमनूरुलङ्घ्यं वसुंधरा सापि वामनैकपदा ।

ENMSS@2569@2अब्धिरपि पोतलङ्घ्यः सतां मनः केन तुल्यं स्यात् ॥ २५६९॥
ENMSS@2570@1अम्बरमपनय मुग्धे व्रजतु विकाशं दिगम्बरता ।
ENMSS@2570@2हारावलिसुरतटिनी नखशशिमण्डलस्य कुचशम्भोः ॥ २५७०॥
ENMSS@2571@1अम्बरमम्बुनि पत्रमरातिः पीतमहीनगणस्य ददाह ।
ENMSS@2571@2यस्य वधूस्तनयं गृहमब्जा पातु स वो हरलोचनवह्निः ॥ २५७१॥
ENMSS@2572@1अम्बरमेष रमण्यै यामिन्यै वासरः प्रेयान् ।
ENMSS@2572@2अधिकं ददौ निजाङ्काद् अथ संकुचितः स्वयं तस्थौ ॥ २५७२॥
ENMSS@2573@1अम्बरविपिनमिदानीं तिमिरवराहोऽवगाहते जलधेः ।
ENMSS@2573@2रोमसु यदस्य लग्नास्तारकजलबिन्दवो भान्ति ॥ २५७३॥
ENMSS@2574@1अम्बरान्तमवलम्बितुकामम् अन्ध्यया समभिवीक्ष्य तु कामम् ।
ENMSS@2574@2अन्धकारमथ गम्य तनूनं लज्जयेव निरगम्यत नूनम् ॥ २५७४॥
ENMSS@2575@1अम्बरेऽम्बुभरलम्बिपयोदे मत्तबर्हिरुचिरेऽद्रिनितम्बे ।
ENMSS@2575@2पुष्पधामनि कदम्बकदम्बे का गतिः पथिक कालविलम्बे ॥ २५७५॥
ENMSS@2576@1अम्ब श्राम्यसि तिष्ठ गोरसमहं मथ्नामि मन्थानकं प्रालम्ब्य स्थितमीश्वरं सरभसं दीनाननो वासुकिः ।
ENMSS@2576@2सासूयं कमलालया सुरगणः सानन्दमुद्यद्भयं राहुः प्रैक्षत यं स वोऽस्तु शिवदो गोपालबालो हरिः ॥ २५७६॥
ENMSS@2577@1अम्बा कुप्यति तात मूर्ध्नि विधृता गङ्गेयमुत्सृज्यतां विद्वन् षण्मुख का गतिर्मम चिरं मूर्ध्नि स्थिताया वद ।
ENMSS@2577@2कोपावेशवशादशेषवदनैः प्रत्युत्तरं दत्तवान् अम्भोधिर्जलधिः पयोधिरुदधिर्वारां निधिर्वारिधिः ॥ २५७७॥
ENMSS@2578@1अम्बा तुष्यति न मया न स्नुषया सापि नाम्बया न मया ।
ENMSS@2578@2अहमपि न तया न तया वद राजन् कस्य दोषोऽयम् ॥ २५७८॥
ENMSS@2579@1अम्बामथार्घजलपात्रभृतं निरीक्ष्य दूरादपासरदसौ जनता विहस्ता ।
ENMSS@2579@2पूर्णादिवान्धतमसानि तुषारकान्तेरार्यात् पृथग्जनशतानि हि संभ्रमन्ति ॥ २५७९॥
ENMSS@2580@1अम्बायाश्च पितुश्च सद्गुणगणो यस्मिन्नभिव्यज्यते तस्मिन् स्वप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
ENMSS@2580@2सा वाणि विनयः स एव सहजः पुण्यानुभावः स च श्लाघायाः सदनं सुखस्य वसतिस्तेनैव पुत्री पिता ॥ २५८०॥

ENMSS@2581@1अम्बा येन सरस्वती सुतवती तस्यार्पयन्ती रसान् नानाचाटुमुखी स दुर्लडितवान्

खेलाभिरुच्छृङ्खलः ।

ENMSS@2581@2जिह्वादुर्व्यसनैरुपद्रवरुजः कुर्वन्ति ये दुःसुताम् तान् दृष्ट्वार्थमितस्ततो निखनति स्वं निःस्वमातन्वती ॥ २५८१॥

ENMSS@2582@1अम्बा शेतेऽत्र वृद्धा परिणतवयसामग्रणीरत्र तातो

निःशेषागारकर्मश्रमशिथिलतनुः कुम्भदासी तथेह ।

ENMSS@2582@2अस्मिन् पापाहमेका कतिपयदिवसप्रोषितप्राणनाथा पान्थायेत्थं युवत्या कथितमभिमतं व्याहृतिव्याजपूर्वम् ॥ २५८२॥

ENMSS@2583@1अम्बुजमम्बुनि जातं नहि दृष्टं जातमम्बुजादम्बु ।

ENMSS@2583@2अधुना तद्विपरीतं चरणसरोजाद्विनिर्गता गङ्गा ॥ २५८३॥

ENMSS@2584@1अम्बुजमम्बुनि मग्नं त्रासादाकाशमाश्रितश्चन्द्रः ।

ENMSS@2584@2सम्प्रति कः परिपन्थी यं प्रति कोपारुणं वदनम् ॥ २५८४॥

ENMSS@2585@1अम्बुदः कृतपदो नभस्तले तोयपूरपरिपूरितोदधिः ।

ENMSS@2585@2गोष्पदस्य भरणेऽप्मशक्तिमान् इत्यसत्यमभिधीयते कथम् ॥ २५८५॥

ENMSS@2586@1अम्बुधेरुदगमद्विधुभङ्ग्या नूनमौर्वशिखिभास्मनपिण्डः ।

ENMSS@2586@2यत्किलास्य घटते नहि तृप्तिः खण्डिताजनदृगम्बुसरिद्भिः ॥ २५८६॥

ENMSS@2587@1अम्बेयं नेयमम्बा नहि खरकपिशं श्मश्रु तस्या मुखार्धे तातोऽयं नैष तातः स्तनमुरसि पितुर्दृष्टवान्नाहमत्र ।

ENMSS@2587@2केयं कोऽयं किमेतद्युवतिरथ पुमान् वस्तु किं स्यात् तृतीयं शंभोः संवीक्ष्य रूपादपसरति गुहः शङ्कितः पातु युष्मान् ॥ २५८७॥

ENMSS@2588@1अम्भः कर्दमतामुपैति सहसा पङ्कद्रवः पांशुतां

पांशुर्वारणकर्णतालपवनैर्दिक्प्रान्तनीहारताम् ।

ENMSS@2588@2निम्नत्वं गिरयः समं विषमतां शून्यं जनस्थानकं निर्याते त्वयि राज्यपाल भवति त्यक्तस्वभावं जगत् ॥ २५८८॥

ENMSS@2589@1अम्भः कुम्भाम्भोरुह- चामरभृङ्गारहेमरूप्याणि ।

ENMSS@2589@2फलताम्बूलवराम्बर- मदिरामीनाज्यभोज्यानि ॥ २५८९॥

ENMSS@2590@1अम्भःसंभृतिमन्थराम्बुदरवैः शालूरगर्जाभर-

प्रारब्धप्रियविप्रयुक्तयुवतीजीवग्रहे भीषणाः ।

ENMSS@2590@2विद्युद्दन्तुरितान्धकारपटला गाम्भीर्यबद्धारव- स्थैर्योन्मूलनशक्तयः कथममी निर्यान्ति वर्षानिशाः ॥ २५९०॥

ENMSS@2591@1अम्भसः परिमाणेन उन्नतं कमलं भवेत् ।
ENMSS@2591@2स्वस्वामिना बलवता भृत्यो भवति गर्वितः ॥ २५९१॥
ENMSS@2592@1अम्भसः प्रसृतीरष्टौ रवावनुदिते पिबेत् ।
ENMSS@2592@2वातपित्तकफान् हत्वा जीवेद्वर्षशतं सुखी ॥ २५९२॥
ENMSS@2593@1अम्भसा भिद्यते सेतुस्तथा मन्त्रोऽप्यरक्षितः ।
ENMSS@2593@2पैशुन्याद् भिद्यते स्नेहो वाग्भिर्भिद्येत कातरः ॥ २५९३॥
ENMSS@2594@1अम्भसा शममायाति मुष्टिमेयशिखः शिखी ।
ENMSS@2594@2प्रवृद्धोऽधःस्थितैः पश्चात् संततैरेव दृश्यते ॥ २५९४॥
ENMSS@2595@1अम्भसि तरणिसुतायाः स्तम्भिततरणिः स देवकीसूनुः ।
ENMSS@2595@2आतरविरहितगोप्याः कातरमुखमीक्षते स्मेरः ॥ २५९५॥
ENMSS@2596@1अम्भस्तत्त्वं भूमितत्त्वं च वायोस्तत्त्वं तेजस्तत्त्वमाकाशतत्त्वम् ।
ENMSS@2596@2पञ्चैतानि प्राणवायुं मिलित्वा नाडीयुग्मे प्राणिनां संचरन्ति ॥ २५९६॥
ENMSS@2597@1अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम् ।
ENMSS@2597@2स्वभूमिः श्वापदादीनां राज्ञां सैन्यं परं बलम् ॥ २५९७॥
ENMSS@2598@1अम्भोजगर्भसुकुमारतनुस्तदासौ कण्ठग्रहे प्रथमरागघने विलीय ।
ENMSS@2598@2सद्यः पतन्मदनमार्गणरन्ध्रमार्गैर्मन्ये मम प्रियतमा हृदयं
प्रविष्टा ॥ २५९८॥
ENMSS@2599@1अम्भोजपत्रायतलोचनानाम् अम्भोधिदीर्घास्विह दीर्घिकासु ।
ENMSS@2599@2समागतानां कुटिलैरपाङ्गैरनङ्गबाणैः प्रहता युवानः ॥ २५९९॥
ENMSS@2600@1अम्भोजप्रकरोऽथ केतककुलं कुन्दोत्करः कैरव- व्रातो मल्लिगणोऽथ
चम्पकचयो जातीगणो वाथवा ।
ENMSS@2600@2नो चेदादरमातनोति पिक तत्खेदं वृथा मा कृथा यस्मात् क्वापि
कदापि
कोऽपि भविता यस्त्वद्गुणं ज्ञास्यति ॥ २६००॥
ENMSS@2601@1अम्भोजाक्ष्याः पुरवनलता धाम्नि संकेतभाजश्चेतोनाथे चिरयति
भृशं मोहनिद्रां गतायाः ।
ENMSS@2601@2स्वच्छं नाभिह्रदवलयितं कान्तरत्नांशुजालं तोयभ्रान्त्या पिबति
हरिणी विस्मयं च प्रयाति ।
ENMSS@2602@1अम्भोजानि घनाघनव्यवहितोऽप्युल्लाघयत्यंशुमान् दूरस्थोऽपि
पयोधरोऽतिशिशिरस्पर्शं करोत्यातपम् ।
ENMSS@2602@2शक्तिः काप्यपरिक्षतास्ति महतां स्वैरं दविष्ठान्यहो यन्माहात्म्यवशेन

यान्ति घटनां कार्याणि निर्यन्त्रणाम् ॥ २६०२॥

ENMSS@2603@1अम्भोजिनीवनविलासनिवासमेव हंसस्य हन्ति नितरां कुपितो विधाता ।

ENMSS@2603@2न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ २६०३॥

ENMSS@2604@1अम्भोदस्तनितं निशम्य करिणां बृंहेति रंहोयुतस्सद्यस्त्यक्तमहीध्रकन्दरगृहः कौतूहली निर्गतः ।

ENMSS@2604@2एतस्मिन् क्षण एव चण्डमशनेराकर्ण्य शब्दं क्रुधा तं प्रत्युत्पतति स्वगर्जितजितं धीरो मृगाणां पतिः ॥ २६०४॥

ENMSS@2605@1अम्भोधिः स्थलतां स्थलं जलधितां धूलीवलः शैलतां मेरुर्मृत्कणतां तृणं कुलिशतां वज्रं तृणक्लीबताम् ।

ENMSS@2605@2वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया लीलादुर्ललिताद्भुतव्यसनिने दैवाय तस्मै नमः ॥ २६०५॥

ENMSS@2606@1अम्भोधिक्षिप्तमुक्तारुचिहरिचरणोद्गीर्णगङ्गाम्बुतुल्यं कालिन्दीफेनकान्तिस्फुरितफणधरोन्मुक्तनिर्मोकरोचिः ।

ENMSS@2606@2कर्णाटीकुन्तलान्तर्विगलितसुमनोदामरम्यं समन्ताच्छ्रीखण्डालेपलक्ष्मीमुपनयति यशो यस्य खड्गप्रसूतम् ॥ २६०६॥

ENMSS@2607@1अम्भोधीनां तमालप्रभवकिसलयश्यामवेलावनानाम् आ पारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानाम् ।

ENMSS@2607@2मालेवाम्लानपुष्पा तव नृपतिशतैरुह्यते या शिरोभिः सा मय्येव स्खलन्ती कथयति विनयालंकृतं ते प्रभुत्वम् ॥ २६०७॥

ENMSS@2608@1अम्भोधेरेव जाताः कति जगति न ते हन्त सन्तीह शङ्खा यान् संगृह्य भ्रमन्ति प्रतिभवनममी भिक्षवो जीवनाय ।

ENMSS@2608@2एकः श्रीपाञ्चजन्यो हरिहरकमलक्रोडहंसायमानो यस्याध्वानैरमानैरसुरवरवधूवर्गगर्भा गलन्ति ॥ २६०८॥

ENMSS@2609@1अम्भोधेर्जलयन्त्रमन्दिरपरिस्पन्देऽपि निद्राणयोः श्रीनारायणयोर्घनं विघटयत्यूष्मा समालिङ्गनम् ।

ENMSS@2609@2किं चोत्तप्तवियत्कपालफलके कङ्कालशेषश्रियं चन्द्रं मर्मरयन्ति पर्पटमिव क्रूरा रवेरंशवः ॥ २६०९॥

ENMSS@2610@1अम्भोधेर्वडवामुखानलझलाज्वालोपगूढान्तरा व्यामोहादपिबन्नपः स्फुटममी

तर्षेण पर्याविलाः ।

ENMSS@2610@2उद्देशस्फुरदिन्द्रचापवलयज्वालापदेशादहो दह्यन्ते

कथमन्यथार्धमलिनाङ्गारद्युतस्तोयदाः ॥ २६१०॥

ENMSS@2611@1अम्भोधौ विहरन्तमन्तरहितैः कीर्तिं वहन्तं गुणैस्तं

मैनाकमवज्रगर्वविषयौ पक्षौ दधानं नुमः ।

ENMSS@2611@2आसन्ने सुरलोकमानुषजगत्पातालपारात्यये यः पाथोनिधिलङ्घिनः पथि

मरुत्सूनोर्व्यनैषीत् क्लमम् ॥ २६११॥

ENMSS@2612@1अम्भोनिधेरनवगीतगुणैकराशेरुच्चैःश्रवप्रभृतिषु प्रसभं

हृतेषु ।

ENMSS@2612@2आश्वासनं यदवकृष्टमभून्महर्षे तोयं त्वया तदपि निष्करुणेन

पीतम् ॥ २६१२॥

ENMSS@2613@1अम्भोऽपि प्रवहत्स्वभावमशनैराश्यानमश्मायते ग्रावाम्भः स्रवति

द्रवत्वमुदितोद्रेकेषु चावेयुषः ।

ENMSS@2613@2कालस्यास्खलितप्रभावरभसं भाति प्रभुत्वेऽद्भुते कस्यामुत्र

विधातृशक्तिघटिते मार्गे निसर्गः स्थिरः ॥ २६१३॥

ENMSS@2614@1अम्भोबिन्दुग्रहणरभसांश्चातकान् वीक्षमाणाः श्रेणीभूताः परिगणनया

निर्दिशन्तो वलाकाः ।

ENMSS@2614@2त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः सोत्कम्पानि

प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २६१४॥

ENMSS@2615@1अम्भो भजस्व चिरमस्य यथाभिलाषम् एतन्न ताण्डवय सैरिभ कानन

च ।

ENMSS@2615@2दुश्चेष्टितेन यदनेन भृशं तवैष ध्वस्ताशयो भवति

निष्कलुषस्तडागः ॥ २६१५॥

ENMSS@2616@1अम्भोभिस्तनकुम्भयोस्तव घनश्लेषात् समुत्कीर्णतां याताया

शुकवक्रिमप्रणयिनी सेयं न लुप्ता लिपिः ।

ENMSS@2616@2किं चैतां कुसुमेषु कुञ्जरशिरोनक्षत्रमालां तिरो- धित्सुर्निष्फलमेव

मज्जसि नभः स्वच्छे सरोवारिणि ॥ २६१६॥

ENMSS@2617@1अम्भोमुचां सलिलमुद्गिरतां निशीथे ताडीवनेषु निभृतस्थितकर्णतालाः
।

ENMSS@2617@2आकर्णयन्ति करिणोऽर्धनिमीलिताक्षा धारारवं दशनकोटिनिषण्णहस्ताः

॥ २६१७॥

ENMSS@2618@1अम्भोराशिरिवासि सत्त्वनिलयो नो मन्दरक्षो भवान् कल्याणप्रकृतिः सुमेरुरिव किं देवः सुरापाश्रयः ।

ENMSS@2618@2सच्छायो न तु रूढदुस्तरलतस्त्वं कल्पवृक्षो यथा तैः कुर्वन्ति तुलां तथापि भवतो मूढाः कवीनां धियः ॥ २६१८॥

ENMSS@2619@1अम्भोरुहं वदनमम्बकमिन्दुकान्तः पाथोनिधिः कुसुमचापभृतो विकारः ।

ENMSS@2619@2प्रादुर्बभूव सुभग त्वयि दूरसंस्थे चण्डालचन्द्रधवलासु निशासु तस्याः ॥ २६१९॥

ENMSS@2620@1अम्भोरुहमये स्नात्वा वापीपयसि कामिनी ।

ENMSS@2620@2ददाति भक्तिसंपन्ना पुष्पसौभाग्यकाम्यया ॥ २६२०॥

ENMSS@2621@1अम्भोरुहाक्षि शंभोश्चरणावाराधितौ केन ।

ENMSS@2621@2यस्मै विचलितवदना मदनाकूतं विभावयसि ॥ २६२१॥

ENMSS@2622@1अम्भोवाहमुरद्विषो निवसनं ध्वान्ताद्रिदिव्यौषधी कन्दर्पस्य विलासचम्पकधनुर्वर्षालतामञ्जरी ।

ENMSS@2622@2लेखा व्योमकशोपले विरचिता चामीकरस्य स्फुरद् धाम्नः पान्थिविलासिनीजनमनः कम्पाय शम्पाभवत् ॥ २६२२॥

ENMSS@2623@1अम्लानपङ्कजा माला कण्ठे रामस्य सीतया ।

ENMSS@2623@2मुधा बुधा भ्रमन्त्यत्र प्रत्यक्षेऽपि क्रियापदे ॥ २६२३॥

ENMSS@2624@1अम्लानमाल्याभरणाम्बरस्य वराङ्गनानन्दनमन्दिरस्य ।

ENMSS@2624@2नित्यप्रकाशोत्सवसेवितस्य स्वर्गस्य वित्तस्य च को विशेषः ॥ २६२४॥

ENMSS@2625@1अम्लानस्तबकन्ति कुन्तलभरे सीमन्तसीमास्विमाः सिन्दूरन्ति कपोलभित्तिषु मिलन्मैरेयरागन्ति च ।

ENMSS@2625@2प्रौढेर्ष्याद्युतिविश्रमन्ति नयनोपान्ते कुरङ्गीदृशः बिम्बोष्ठे क्षितिपाल बालतरणेर्लाक्षारसन्ति त्विषः ॥ २६२५॥

ENMSS@2626@1अम्लानिरामोदभरश्च दिव्यः पुष्पेषु भूयाद्भवदङ्गसङ्गात् ।

ENMSS@2626@2दृष्टं प्रसूनोपमया मयान्यन् न धर्मशर्मोभयकर्मठं यत् ॥ २६२६॥

ENMSS@2627@1अम्लानो बलवाञ्शूरश्छायेवानुगतः सदा ।

ENMSS@2627@2सत्यवादी मृदुर्दान्तः स राजवसतिं वसेत् ॥ २६२७॥

ENMSS@2628@1अयं कनकनिर्मितः सकलभूधरादुन्नतः सहस्रनयनाश्रयः सपदि लब्धभाग्योदयः ।

ENMSS@2628@2कुचोपरि परिस्फुरत्तरुणिचारुचेलाञ्चलं मनागपि निवारय त्यजतु गर्वमुर्वीधरः ॥ २६२८॥

ENMSS@2629@1अयं काणः शुक्रो विषमचरणः सूर्यतनयः क्षताङ्गोऽयं राहुर्विकलमहिमा शीतकिरणः ।

ENMSS@2629@2अजानानस्तेषामपि नियतकर्मस्वकफलं ग्रहग्रामग्रस्ता वयमिति जनोऽयं प्रलपति ॥ २६२९॥

ENMSS@2630@1अयं कामो निजामो वा त्वया किमवधारितम् ।

ENMSS@2630@2इति दृष्टिरिव प्रष्टुं श्रुतिं श्रयति सुभ्रुवाम् ॥ २६३०॥

ENMSS@2631@1अयं खलु मृणालिनीनवविलासवैहासिकस्त्विषां वितपते पतिः सपदि दृश्यमाना निजाः ।

ENMSS@2631@2स्तनौ पुलकयन्ति चोत्पलदृशां प्रियोरःस्थले विपर्यसितवृत्तयो घुसृणपङ्कपत्राङ्कुराः ॥ २६३१॥

ENMSS@2632@1अयं च सुरतज्वालः कामाग्निः प्रणयेन्धनः ।

ENMSS@2632@2नराणां यत्र हूयन्ते यौवनानि धनानि च ॥ २६३२॥

ENMSS@2633@1अयं ज्योत्स्नाजानिस्तव वदनदूनोऽम्बरगुहां प्रविष्टस्तत्रापि प्रसृतमिदमेनं दृढतमः ।

ENMSS@2633@2इति त्रासोद्रेकक्रमगलितसत्त्वः क्षयगदी विधिर्दग्धो दीनं व्यथयति निदानं हि मृदुता ॥ २६३३॥

ENMSS@2634@1अयं तस्या रथक्षोभाद् अंसेनांसो निपीडितः ।

ENMSS@2634@2एकः कृती शरीरेऽस्मिञ् शेषमङ्गं भुवो भरः ॥ २६३४॥

ENMSS@2635@1अयं तावद् बाष्पस्त्रुटित इव मुक्तामणिसरो विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः ।

ENMSS@2635@2निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया परेषामुन्नेयो भवति च भराध्मातहृदयः ॥ २६३५॥

ENMSS@2636@1अयं ते विद्रुमच्छायो मरुमार्ग इवाधरः ।

ENMSS@2636@2करोति कस्य नो बाले पिपासाकुलितं मनः ॥ २६३६॥

ENMSS@2637@1अयं त्रयाणां ग्रामाणां निधानं मधुरध्वनिः ।

ENMSS@2637@2रेखात्रयमितीवास्याः सूत्रितं कण्ठकन्दले ॥ २६३७॥

ENMSS@2638@1अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।

ENMSS@2638@2मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नलः ॥ २६३८॥

ENMSS@2639@1अयं दूतार्थसंक्षेपः प्रत्यर्थनियता गिरः ।
ENMSS@2639@2प्रयोजनं क्रियोत्पादि कियच्छक्येत भाषितुम् ॥ २६३९॥
ENMSS@2640@1अयं दूरभ्रान्तः पटुतरपिपासाकुलमनाः कपोले ते मत्तद्विप निपतितः षद्वदयुवा ।
ENMSS@2640@2त्वमप्येतां पीनश्रवणदरदोलाव्यसनितां विमुञ्च स्वाच्छन्द्यादपनयतु तावत् तृषमिमाम् ॥ २६४०॥
ENMSS@2641@1अयं द्वीपी प्रियां लेढि जिह्वाग्रेण पुनः पुनः ।
ENMSS@2641@2प्रीतिमायाति च तया लिह्यमानः स्वकान्तया ॥ २६४१॥
ENMSS@2642@1अयं धारावाह्स्तडिदियमियं दग्धकरका स चायं निर्घोषः स च रववशो भेकनिचयः ।
ENMSS@2642@2इतीव प्रत्यङ्गप्रथितमदनाग्निं कृशतनुर्घनश्वासोत्क्षेपैर्ज्वलयति मुहुर्मृत्युवशिनी ॥ २६४२॥
ENMSS@2643@1अयं धूर्तो मायाविनयमधुरादस्य चरितात् सखि प्रत्यूषि त्वं प्रकृतिसरले पश्यसि न किम् ।
ENMSS@2643@2कपोले यल्लाक्षारसबहलरागप्रणयिनीम् इमां धत्ते मुद्रामनतिचिरवृत्तान्तपिशुनाम् ॥ २६४३॥
ENMSS@2644@1अयं निजः परो वेति गणना लघुचेतसाम् ।
ENMSS@2644@2उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ २६४४॥
ENMSS@2645@1अयं नेत्रादत्रेरजनि रजनीवल्लभ इति भ्रमः कोऽयं प्रज्ञापरिचयपराधीनमनसाम् ।
ENMSS@2645@2सुधानामाधारः स खलु रतिबिम्बाधरसुधा- रसासेकस्निग्धादजनि नयनात्
पुष्पधनुषः ॥ २६४५॥
ENMSS@2646@1अयं पटः सूत्रदरिद्रतां गतो ह्ययं पटश्छिद्रशतैरलंकृतः ।
ENMSS@2646@2अयं पटः प्रावरितुं न शक्यते ह्ययं पटः संवृत एव शोभते ॥ २६४६॥
ENMSS@2647@1अयं पटो मे पितुरङ्गभूषणं पितामहाद्यैरुपभुक्तयौवनः ।
ENMSS@2647@2अलंकरिष्यत्यथ पुत्रपौत्रकान् मयाधुना पुष्पवदेव धार्यते ॥ २६४७॥
ENMSS@2648@1अयं पद्मासनासीनश्चक्रवाको विराजते ।
ENMSS@2648@2युगादौ भगवान् वेधा विनिर्मित्सुरिव प्रजाः ॥ २६४८॥
ENMSS@2649@1अयं पीनस्तनाभोगसौभाग्यविभवोचितः ।

ENMSS@2649@2द्रविणोपार्जनस्यैव कालः कुवलयेक्षणे ॥ २६४९॥
ENMSS@2650@1अयं पुरः पार्वणशर्वरीशः किं दर्पणोऽयं रजनीरमण्याः ।
ENMSS@2650@2यतस्तदीयं प्रतिबिम्बमस्मिन् संलक्ष्यते लाञ्छनकैतवेन ॥ २६५०॥
ENMSS@2651@1अयं प्रभुरयं भृत्य इति या जगतः स्थितिः ।
ENMSS@2651@2फलं विजयते तत्र श्रीप्रसादाप्रसादयोः ॥ २६५१॥
ENMSS@2652@1अयं बन्धुः परश्चायं ममायमयमन्यतः ।
ENMSS@2652@2इति ब्रह्मन्न जानामि तेन जीवाम्यनामयः ॥ २६५२॥
ENMSS@2653@1अयं मन्दद्युतिर्भास्वान् अस्तं प्रति यियासति ।
ENMSS@2653@2उदयः पतनायेति श्रीमतो बोधयन् नरान् ॥ २६५३॥
ENMSS@2654@1अयं मम दहत्यङ्गम् अम्भोजदलसंस्तरः ।
ENMSS@2654@2हुताशनप्रतिनिधिर्दाहात्मा ननु युज्यते ॥ २६५४॥
ENMSS@2655@1अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
ENMSS@2655@2कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥ २६५५॥
ENMSS@2656@1अयं मुखसरोरुहभ्रमरविभ्रमः सुभ्रुवां कुचस्थलकुरङ्गकः पृथुनितम्बलीलाशिखी ।
ENMSS@2656@2न यौवनमदोदयश्चरति चारुकान्तिच्छटा-कुलत्रिवलिकूलिनीपुलिनराजहंसश्चिरम् ॥ २६५६॥
ENMSS@2657@1अयं मृगः समायाति मृगात् सिंहः पलायते ।
ENMSS@2657@2ततो वेगात् पलायस्व त्वरितैस्त्वरितैः पदैः ॥ २६५७॥
ENMSS@2658@1अयं मेघव्यूहे बलिनि परिपन्थिन्यपसृते शरज्जन्याः स्वैरं हसितमिव हर्षादविरतम् ।
ENMSS@2658@2पयःपूरभ्रंशक्रमजनितसोपानसिकते नदीतीरे धीरं चरति विशदः खञ्जनगणः ॥ २६५८॥
ENMSS@2659@1अयं मे वाग्गुम्फो विशदपदवैदग्ध्यमधुरः स्फुरद्बन्धो वन्ध्यः परहृदि कृतार्थः कविहृदि ।
ENMSS@2659@2कटाक्षो वामाक्ष्या दरदलितनेत्रान्तगलितः कुमारे निःसारः स तु किमपि
यूनः सुखयति ॥ २६५९॥
ENMSS@2660@1अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया ।

ENMSS@2660@2धनं दूरेऽस्तु वदनम् अपूरि क्षारवारिभिः ॥ २६६०॥
ENMSS@2661@1अयं रसालः सुकृतैकसालः प्रवालमालोल्लसदालवालः ।
ENMSS@2661@2मुदः प्रदाता भविता कथं मे वराङ्गनेत्यश्रुमुखी शुशोच ॥ २६६१॥
ENMSS@2662@1अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः समीरोऽयं वेलावनविदलदेलापरिमलः ।
ENMSS@2662@2इयं प्रावृड् धन्या नवजलदविन्यासचतुरा स्मराधीनं चेतः सखि किमपि कर्तुं मृगयते ॥ २६६२॥
ENMSS@2663@1अयं लोलन्मुक्तावलिकिरणमालापरिकरः स्फुटस्येन्दोर्लक्ष्मीं क्षपयितुमलं मन्मथसुहृत् ।
ENMSS@2663@2विशालः श्यामायाः स्खलितघननीलांशुकवृतिः स्तनाभोगः स्निह्यन्मसृणघुसृणालेपसुभगः ॥ २६६३॥
ENMSS@2664@1अयं वहति धातारं यद्वा देवीं सरस्वतीम् ।
ENMSS@2664@2पक्षद्वयमपि स्थाने राजहंसस्य निर्मलम् ॥ २६६४॥
ENMSS@2665@1अयं वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
ENMSS@2665@2क एवं जानीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥ २६६५॥
ENMSS@2666@1अयं विपाको वद कस्य यूनः कल्याणि कल्याणपरंपराणाम् ।
ENMSS@2666@2यदक्षिकोणस्रवदच्छधारा हारावतारो गुणमन्तरेण ॥ २६६६॥
ENMSS@2667@1अयं शून्यो ग्रामः सुरसदनमेतन्नु पतितं पुरः शुष्का वापी तरुरयमितः शीर्णविटपः ।
ENMSS@2667@2वयं चैते पान्थाः परिकृशदशाभाग्यगतयः समानः संयोगः कटुरपि मनो मे रमयति ॥ २६६७॥
ENMSS@2668@1अयं स कालः संप्राप्तो धार्त्तराष्ट्रोपजीविनाम् ।
ENMSS@2668@2निवेष्टव्यं मया तत्र प्राणानपरिरक्षता ॥ २६६८॥
ENMSS@2669@1अयं स ते तिष्ठति संगमोत्सुको विशङ्कसे भीरु यतोऽवधीरणाम् ।
ENMSS@2669@2लभेत वा प्रार्थयिता न वा श्रियं श्रियो दुरापः कथमीप्सितो भवेत् ॥ २६६९॥
ENMSS@2670@1अयं स भुवनत्रयप्रथितसंयमः शंकरो बिभर्ति वपुषाधुना विरहकातरः कामिनीम् ।

ENMSS@2670@2अनेन किल निर्जिता वयमिति प्रियायाः करं करेण परिताडयन् जयति

जातहासः स्मरः ॥ २६७०॥

ENMSS@2671@1अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।

ENMSS@2671@2नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ २६७१॥

ENMSS@2672@1अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।

ENMSS@2672@2सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥ २६७२॥

ENMSS@2673@1अयं सेनोत्तंसः करकृतकृपाणो रणभुवि द्विषद्भूमीपालाः किमपसरत

प्राणकृपणाः ।

ENMSS@2673@2किमभ्यर्थ्यः पृथ्वीधरकुहरवासोऽद्य भवतां न किं हृद्या

विद्याधरनगरनीलोत्पलदृशः ॥ २६७३॥

ENMSS@2674@1अयं स्निग्धश्यामो य इह विहरत्यम्बुजवने विनिद्रे व्यागुञ्जन्मधुप इति

तं जल्पतु जनः ।

ENMSS@2674@2अहं शङ्के पङ्केरुहकुहरवासव्यसनिनीं श्रियं भृङ्गच्छद्मा

मुररिपुरुपेतो रमयितुम् ॥ २६७४॥

ENMSS@2675@1अयं स्वभावः स्वत एव यत् पर- श्रमापनोदप्रवणं महात्मनाम् ।

ENMSS@2675@2सुधांशुरेष स्वयमर्ककर्कश- प्रभाभितप्तामवति क्षितिं किल

॥ २६७५॥

ENMSS@2676@1अयं स्वार्थः परार्थोऽयम् इत्येवं वा न कल्पयेत् । विबुधा नैव मन्यन्ते

स्वं परं वा पृथक् पृथक् । नियुञ्जीत परस्यार्थे प्रोत्सहेत स्वकर्मणि ॥ अयं हि

तीव्रेण जगन्ति तेजसा

ENMSS@2677@2प्रताप्य भासां पतिरस्तमागतः ।

ENMSS@2677@2प्रतापमात्रोपनता विभूतयश्चिरं न तिष्ठन्ति परोपतापिनाम् ॥ २६७७॥

ENMSS@2678@1अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ।

ENMSS@2678@2देहिनो विविधक्लेशसंतापकृदुदाहृतः ॥ २६७८॥

ENMSS@2679@1अयं हि प्रथमो रागः समस्तजनरञ्जने ।

ENMSS@2679@2यस्य नास्ति द्वितीयोऽपि स कथं पञ्चमो भवेत् ॥ २६७९॥

ENMSS@2680@1अयःपिण्ड इवोत्तप्ते खलानां हृदये क्षणात् ।

ENMSS@2680@2पतिता अपि नेक्ष्यन्ते गुणास्तोयकना इव ॥ २६८०॥

ENMSS@2681@1अयथाविहितानां यन् मनोज्ञतासंपादौ न स्तः ।

ENMSS@2681@2कथयाम्यतस्तरूणां रोपविधानं यथोद्दिष्टम् ॥ २६८१॥

ENMSS@2682@1अयने विषुवे चैव षडशीतिमुखेषु च ।

ENMSS@2682@2चन्द्रसूर्योपरागे च दत्तमक्षयमश्नुते ॥ २६८२॥

ENMSS@2683@1अयमक्षुण्णकान्तश्रीरधरो हरिणीदृशः ।

ENMSS@2683@2प्रवालपद्मरागादेरुपरि प्रतिगर्जति ॥ २६८३॥

ENMSS@2684@1अयमङ्कुरभाव एव तावत् कुचयोः कर्षति लोकलोचनानि ।

ENMSS@2684@2इतरेतरपीडनीमवस्थां गतयोः श्रीरनयोः कथं भवित्री ॥ २६८४॥

ENMSS@2685@1अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः ।

ENMSS@2685@2सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति ॥ २६८५॥

ENMSS@2686@1अयमपरलतायाः सादरं हन्त पीत्वा मधु मम मकरन्दं पातुमायाति

भृङ्गः ।

ENMSS@2686@2इति मनसि विषादं मल्लिके मा कुरु त्वं बत वद मधुपानां मानसे
को

विवेकः ॥ २६८६॥

ENMSS@2687@1अयमपि खरयोषित्कर्णकाषायमीषद् विसृमरतिमिरोर्णाजर्जरोपान्तमर्चिः
।

ENMSS@2687@2मदकलकलविङ्कीकाकुनान्दीकरेभ्यः क्षितिरुहशिखरेभ्यो भानुमानुच्चिनोति

॥ २६८७॥

ENMSS@2688@1अयमपि पुरुहूतप्रेयसीमूर्ध्नि पूर्णः कलश इव सुधांशुः साधुरुल्लालसीति
।

ENMSS@2688@2मदनविजययात्राकालविज्ञापानाय स्फुरति जलधिमध्ये ताम्रपात्रीव
भानुः

॥ २६८८॥

ENMSS@2689@1अयमभिनवमेघश्यामलोत्तुङ्गसानुर्मदमुखरमयूरीमुक्तसंसक्तकेकः ।

ENMSS@2689@2शकुनिशबलनीडानोकहस्निग्धवर्ष्मा वितरति बृहदश्मा पर्वतः

प्रीतिमक्ष्णोः ॥ २६८९॥

ENMSS@2690@1अयममृतनिधानं नायकोऽप्योषधीनाम् अमृतमयशरीरः कान्तियुक्तोऽपि

चन्द्रः ।

ENMSS@2690@2भवति विगतरश्मिर्मण्डलं प्राप्य भानोः परसदननिविष्टः को लघुत्वं

न याति ॥ २६९०॥

ENMSS@2691@1अयममृतनिधानं नायकोऽप्योषधीनां शतभिषगनुयातः

शंभुमूर्धावतंसः ।

ENMSS@2691@2विरहयति न चैनं राजयक्ष्मा शशाङ्कं हतविधिपरिपाकः केन वा लङ्घनीयः ॥ २६९१॥

ENMSS@2692@1अयमयमसावाकर्ण्यारात् प्रतिद्विपडिण्डिमं मदकलुषिते नेत्रे मार्जन्नुदस्तकरार्गलः ।

ENMSS@2692@2अगणितसृणिः क्रोधस्तब्धायतश्रुतिपल्लवः प्रविशति नृपस्यान्तःकक्षां जवादरिमुद्गरः ॥ २६९२॥

ENMSS@2693@1अयमयोगिवधूवधपातकैर्भ्रमिमवाप्य दिवः खलु पात्यते ।

ENMSS@2693@2शितिनिशादृषदि स्फुटदुत्पतत्- कणगणाधिकतारकिताम्बरः ॥ २६९३॥

ENMSS@2694@1अयमरविवरेभ्यश्चातकैर्निष्पतद्भिर्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।

ENMSS@2694@2गतमुपरि घनानां वारिगर्भोदराणां पिशुनयति रथस्तं शीकरक्लिन्ननेमिः ॥ २६९४॥

ENMSS@2695@1अयमलघुविसारिस्फारिजिह्वाकलापो ज्वलति यदि न मध्ये वाडवो हव्यवाहः ।

ENMSS@2695@2मुहुरुपचितसारो वारिभिर्निम्नगानां त्रिभुवनमपि किं न प्लावयत्यम्बुराशिः ॥ २६९५॥

ENMSS@2696@1अयमवसरः सरस्ते सलिलैरुपकर्तुमर्थिनामनिशम् ।

ENMSS@2696@2इदमपि च सुलभमम्भो भवति पुरा जलधराभ्युदये ॥ २६९६॥

ENMSS@2697@1अयमवसर उपकृतये प्रकृतिचला यावदस्ति संपदियम् ।

ENMSS@2697@2विपदि सदाभ्युदयिन्यां पुनरुपकर्तुं कुतोऽवसरः ॥ २६९७॥

ENMSS@2698@1अयमविचारितचारुतया संसारो भाति रमणीयः ।

ENMSS@2698@2अत्र पुनः परमार्थदृशां न किमपि सारमणीयः ॥ २६९८॥

ENMSS@2699@1अयमसौ गगनाङ्गणदीपकस्तरलकालभुजंगशिखामणिः ।

ENMSS@2699@2क्षणविडम्बितवाडवविग्रहः पतति वारिनिधौ विधुरो रविः ॥ २६९९॥

ENMSS@2700@1अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना ।

ENMSS@2700@2समधिरूढमजेन नु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः ॥ २७००॥

ENMSS@2701@1अयमहो रजनीचरकेसरी गिरिदरीशयनात् सहसोत्थितः ।

ENMSS@2701@2तिमिरवारणकुम्भविदारणोच्- छलितरक्तभरैरिव लोहितः ॥ २७०१॥

ENMSS@2702@1अयमात्मा स्वयं साक्षाद् गुणरत्नमहार्णवः ।

ENMSS@2702@2सर्वज्ञः सर्वदृक् सार्वः परमेष्ठी निरञ्जनः ॥ २७०२॥

ENMSS@2703@1अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।

ENMSS@2703@2उत्पादयति सर्वस्य प्रीतिं मलयमारुतः ॥ २७०३॥

ENMSS@2704@1अयमालोहितच्छायो मदेन मुखचन्द्रमाः ।

ENMSS@2704@2संनद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥ २७०४॥

ENMSS@2705@1अयमिह मुग्धो मधुपः परिहृतसहकारमञ्जरीपुञ्जः ।

ENMSS@2705@2असरलमरसमसारं शाखोटकविटपमनुसरति ॥ २७०५॥

ENMSS@2706@1अयमुदयति कोकीशोकशल्यैर्मयूखैः शतमखपुरनारीनेत्रगण्डूषपेयः ।

ENMSS@2706@2उदयगिरिमृगेन्द्रोद्गारभिन्नाङ्करङ्कु- श्रवणरुधिरधारापाटलः पार्वणेन्दुः ॥ २७०६॥

ENMSS@2707@1अयमुदयति चन्द्रश्चन्द्रिकाधौतविश्वः परिणतविमलिम्नि व्योम्नि कर्पूरगौरः ।

ENMSS@2707@2ऋजुरजतशलाकास्पर्धिभिर्यस्य पादैर्जगदमलमृणालीपञ्जरस्थं विभाति ॥ २७०७॥

ENMSS@2708@1अयमुदयति चन्द्रो वारिधेरम्बुगर्भाद् अमृतकणकरालैरंशुभिर्दीप्यमानः ।

ENMSS@2708@2भुजगशयनवक्षोहर्म्यदेशे ललन्त्या वदनमिव यदृच्छोत्तानितं विश्वमातुः ॥ २७०८॥

ENMSS@2709@1अयमुदयति मुद्राभञ्जनः पद्मिनीनाम् उदयगिरिवनालीबालमन्दारपुष्पम् ।

ENMSS@2709@2विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥ २७०९॥

ENMSS@2710@1अयमुदयमहीध्रधातुरागैररुणकरारुणिताम्बराभिरामः ।

ENMSS@2710@2वितरसि न दृशौ कृशाङ्गि ताराम् इव दिवि वन्दितुमिन्दुरभ्युपैति ॥ २७१०॥

ENMSS@2711@1अयमुदयमहीभृन्मूर्ध्नि पाणिं गृहीत्वा दिवसपतिरहौषीदिन्दुपादान् हवींषि ।

ENMSS@2711@2अरुणकिरणवह्नौ कन्यका पौरुहूती हरिदपि किमकार्षीत् तारकालाजहोमम् ॥ २७११॥

ENMSS@2712@1अयमुदितो हिमरश्मिर्वनितावदनस्य कीदृशः सदृशः ।

ENMSS@2712@2नीलादिकोपलम्भः स्फुरति प्रत्यक्षतः कस्य ॥ २७१२॥

ENMSS@2713@1अयमुपगतकृष्णः कृष्णसाराक्षिपातैर्यमकृ(विकसि?)तनवनीलाम्भोजवक्त्रश्चकास्ति ।

ENMSS@2713@2जलयुवतिकुचानुप्रासितोत्तुङ्गकुम्भ- स्थलमदकलगर्जन्नीरनागस्तटाकः ॥ २७१३॥

ENMSS@2714@1अयमुषसि विनिद्रद्राविडीतुङ्गपीन- स्तनपरिसरसान्द्रस्वेदबिन्दूपमर्दी ।

ENMSS@2714@2स्रुतमलयजवृक्षक्षीरसौरभ्यसभ्यो वहति सखि भुजङ्गीभुक्तशेषः समीरः ॥ २७१४॥

ENMSS@2715@1अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।

ENMSS@2715@2नव वारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥ २७१५॥

ENMSS@2716@1अयमेकोऽहमेकेति ज्ञानं तत्संगमे न मे ।

ENMSS@2716@2राग एवाधिकस्तत्र हरिद्राचूर्णयोरिव ॥ २७१६॥

ENMSS@2717@1अयमेव परो धर्मो ह्ययमेव परं तपः ।

ENMSS@2717@2पतिशुश्रूषणं यत्र तत् स्त्रीणां स्वर्गहेतुकम् ॥ २७१७॥

ENMSS@2718@1अयशः प्राप्यते येन येन चाधोगतिर्भवेत् ।

ENMSS@2718@2स्वार्थाच्च भ्रश्यते येन तत् कर्म न समाचरेत् ॥ २७१८॥

ENMSS@2719@1अयशस्यम् अनायुष्यं परदाराभिमर्शनम् ।

ENMSS@2719@2अर्थक्षयकरं घोरं पापस्य च पुनर्भवम् ॥ २७१९॥

ENMSS@2720@1अयशोभिदुरालोके कोपधामरणादृते ।

ENMSS@2720@2अयशोभिदुरा लोके कोपधा मरणादृते ॥ २७२०॥

ENMSS@2721@1अयश्चणकचर्वणं फणिफणामणेः कर्षणं करेण गिरितोलनं जलनिधेः पदा लङ्घनम् ।

ENMSS@2721@2प्रसुप्तहरिबोधनं निशितखड्गसंस्पर्शनं कदाचिदखिलं भवेन्न च शठाद्धनस्यार्जनम् ॥ २७२१॥

ENMSS@2722@1अयस्तु काकतुण्डेन चर्म आरामुखेन हि ।

ENMSS@2722@2मृत्पिण्डं च घटं चैव विध्येत् सूचीमुखेन हि ॥ २७२२॥

ENMSS@2723@1अयाचतः सीदतश्च सर्वोपायैर्निमन्त्रय ।

ENMSS@2723@2आनृशंस्यं परो धर्मोऽयाचते यत् प्रदीयते ॥ २७२३॥

ENMSS@2724@1अयाचितः सुखं दत्ते याचितश्च न यच्छति ।

ENMSS@2724@2सर्वस्वं चापि हरते विधिरुच्छृङ्खलो नृणाम् ॥ २७२४॥

ENMSS@2725@1अयाचितारं नहि देवदेवम् अद्रिः सुतां ग्राहयितुं शशाक ।

ENMSS@2725@2अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थमिष्टेऽप्यवलम्बतेऽर्थे ॥ २७२५॥

ENMSS@2726@1अयाचितो मया लब्धो मत्प्रेषितः पुनर्गतः ।

ENMSS@2726@2यत्रागतस्तत्र गतस्तत्र का परिवेदना ॥ २७२६॥

ENMSS@2727@1अयाच्यं चैव याचन्तेऽभोज्यान् व्याहारयन्ति च ।

ENMSS@2727@2उत्कोचैर्वञ्चनाभिश्च कार्याणि घ्नन्ति चास्यति ॥ २७२७॥

ENMSS@2728@1अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणाम् ।

ENMSS@2728@2कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः ॥ २७२८॥

ENMSS@2729@1अयि कठोर यशः किल ते प्रियं किमयशो ननु घोरमतःपरम् ।

ENMSS@2729@2किमभवद्विपिने हरिणीदृशः कथय नाथ कथं बत मन्यसे ॥ २७२९॥

ENMSS@2730@1अयि कान्त पश्य मेघं नहि नहि पापं तवातिपुण्यायाः ।

ENMSS@2730@2नहि नहि पश्य पयोधरम् अपसारय कञ्चुकीमुरसः ॥ २७३०॥

ENMSS@2731@1अयि किं गुणवति मालति जीवति भवतीं विना मधुपाः ।

ENMSS@2731@2अथ यदि जीवति जीवतु जीवनमपि जीवनाभासः ॥ २७३१॥

ENMSS@2732@1अयि कुरङ्गि तपोवनविभ्रमाद् उपगतासि किरातपुरीमिमाम् ।

ENMSS@2732@2इह न पश्यसि दारय मारय ग्रस पिबेति शुकानपि जल्पतः ॥ २७३२॥

ENMSS@2733@1अयि कुरङ्गि तुरङ्गमविक्रमे त्यज वनं जवनं गमनं कुरु ।

ENMSS@2733@2इह वने विचरन्ति हि नायकाः सुरभिलोहितलोहितसायकाः ॥ २७३३॥

ENMSS@2734@1अयि कुलनिचूलमूलोच्- छेदनदुःशीलवीचिवाचाले ।

ENMSS@2734@2बकविघसपङ्कसारा न चिरात् कावेरि भवितासि ॥ २७३४॥

ENMSS@2735@1अयि क्षुद्रो माभून् मतिमहिमगर्वो मनसि वः करी यातो बन्धं यदिह विनयस्तत्र विजयी ।

ENMSS@2735@2अयं क्रोधाध्मातस्त्यजति विनयं चेन् मदवशात् ततः स्कन्धावारं न किमखिलमेवाकुलयति ॥ २७३५॥

ENMSS@2736@1अयि खलु बधिराधिराज कीरं तुदसि शलाकनिपातनेन मोहात् ।

ENMSS@2736@2अनिशमपि सुधानिधानवाणीं रचयतु मौनमुखोऽस्तु वा समस्ते ॥ २७३६॥

ENMSS@2737@1अयि खलु विषमः पुराकृतानां भवति हि जन्तुषु कर्मणां विपाकः ।

ENMSS@2737@2हरशिरसि शिरांसि यानि रेजुः शिव शिव तानि लुठन्ति गृध्रपादाः ॥ २७३७॥

ENMSS@2738@1अयि चकितमुग्धचातक मरुभुवि धावसि मुधा किमुद्ग्रीवम् ।

ENMSS@2738@2ग्रीष्मे दवाग्निवलितस्तापिच्छोऽयं न विद्युत्वान् ॥ २७३८॥

ENMSS@2739@1अयि चकोरकुटुम्बिनि कातरे तिरय पक्षपुटेन कुटुम्बकम् ।
ENMSS@2739@2बहु गतं कियदप्यवशिष्यते व्यपगतं तिमिरैरुदितः शशी ॥ २७३९॥
ENMSS@2740@1अयि चातक चञ्चुपुटात् स्खलयति जलदोदबिन्दुमनिलश्चेत् ।
ENMSS@2740@2द्विज एव भाग्यहीनो जीवनदाता कृती जलदः ॥ २७४०॥
ENMSS@2741@1अयि चित्त वित्तलेशे सहजप्रेम्णा कियन्नु लुब्धमसि ।
ENMSS@2741@2न तथापि तद्वियोगः केवलमास्ते शिवेनापि ॥ २७४१॥
ENMSS@2742@1अयि चेतोविहग त्वं विषयारण्ये भ्रमन्नसि श्रान्तः ।
ENMSS@2742@2विश्रामकामना चेच्छिवकल्परुहे चिरं तिष्ठ ॥ २७४२॥
ENMSS@2743@1अयि जलद यदि न दास्यसि कतिचित् त्वं चातकाय जलकणिकाः
।
ENMSS@2743@2तदयमचिरेण भविता सलिलाञ्जलिदानयोग्यस्ते ॥ २७४३॥
ENMSS@2744@1अयि त्यक्तासि कस्तूरि पामरैः पङ्कशङ्कया ।
ENMSS@2744@2अलं खेदेन भूपालाः किं न सन्ति महीतले ॥ २७४४॥
ENMSS@2745@1अयि दयिते तव वदनं पायं पायं मनोभवो गर्जन् ।
ENMSS@2745@2स्मितमवलम्ब्य तमिस्रास्वपि हतकान् हन्त नो हन्ति ॥ २७४५॥
ENMSS@2746@1अयि दलदरविन्द स्यन्दमानं मरन्दं तव किमपि लिहन्तो मञ्जु गुञ्जन्तु
भृङ्गाः ।
ENMSS@2746@2दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन् परिमलमयमन्यो बान्धवो
गन्धवाहः ॥ २७४६॥
ENMSS@2747@1अयि दीनदयार्द्रनाथ हे मथुरानाथ कदावलोक्यसे ।
ENMSS@2747@2हृदयं त्वदलोककातरं दयित भ्राम्यति किं करोम्यहम् ॥ २७४७॥
ENMSS@2748@1अयि दुर्जनगर्जितेन किं सरले नम्रमुखी विषीदसि त्वम् ।
ENMSS@2748@2परिपन्थिनि देवकीसुते परिवादोऽपि तपोभिरुन्नतैः ॥ २७४८॥
ENMSS@2749@1अयि दुष्कृतकेन केन वत्से हलिकद्वारि लवङ्गि पुष्पितासि ।
ENMSS@2749@2स्तबकास्तव पांसुभिः परीताः परितः प्राङ्गणसीम्नि यल्लुठन्ति ॥
२७४९॥
ENMSS@2750@1अयि दूति सखी त्वमेव मे मदनो हन्ति शितैः शिलीमुखैः ।
ENMSS@2750@2दयितं तमुपानयाशु तत् सुशको जीवितनिर्गमोऽन्यथा ॥ २७५०॥
ENMSS@2751@1अयि नन्दतनूज किंकरं पतितं मां विषमे भवाम्बुधौ ।
ENMSS@2751@2कृपया तव पादपङ्कज- स्थितधूलीसदृशं विभावय ॥ २७५१॥
ENMSS@2752@1अयि पतङ्गि लवङ्गलतावने पिब मधूनि विधूय मधुव्रतान् ।

ENMSS@2752@2इह वने च वनेचरसंकुले न च सतामसातां च निरूपणम् ॥ २७५२॥

ENMSS@2753@1अयि परारि परुन्मलयानिला ववुरमी जगुरेव च कोकिलाः ।

ENMSS@2753@2कलमलोत्कलितं तु न मे मनः सखि बभूव वृथैव यथैषमः ॥ २७५३॥

ENMSS@2754@1अयि पिबत चकोराः कृत्स्नमुन्नामिकण्ठ-

क्रमसरलितचञ्चच्चञ्चवश्चन्द्रिकाम्भः ।

ENMSS@2754@2विरहविधुरितानां जीवितत्राणहेतोर्भवति हरिणलक्ष्मा ये न तेजोदरिद्रः

॥ २७५४॥

ENMSS@2755@1अयि बत गुरु गर्वं मा स्म कस्तूरि यासीरखिलपरिमलानां मौलिना सौरभेण ।

ENMSS@2755@2गिरिगहनगुहायां लीनमत्यन्तदीनं स्वजनकममुनैव प्राणहीनं करोषि

॥ २७५५॥

ENMSS@2756@1अयि मकरन्दस्यन्दिनि पद्मिनि मन्ये तवैव सुभगत्वम् ।

ENMSS@2756@2पुष्पवतीमपि भवतीं त्यजति न वृद्धः शुचिर्हंसः ॥ २७५६॥

ENMSS@2757@1अयि मदन न दग्धस्त्वं किमीशेन कोपात् किमुत रतिवियोगे नान्वभूर्मूर्ख

दुःखम् ।

ENMSS@2757@2अविदितपरपीडो येन मामुत्पलाक्षी- रहितमहितपात्रैः पत्रिवर्षैर्दुनोषि

॥ २७५७॥

ENMSS@2758@1अयि मन्मथचूतमञ्जरि श्रवणायतलोचने प्रिये ।

ENMSS@2758@2अपहृत्य मनः क्व यासि मे किमराजकमत्र वर्तते ॥ २७५८॥

ENMSS@2759@1अयि ममैष चकोरशिशुर्मुनेर्व्रजति सिन्धुपिबस्य न शिष्यताम् ।

ENMSS@2759@2अशितुमब्धिमधीतवतोऽस्य च शशिकराः पिबतः कति शीकराः ॥ २७५९॥

ENMSS@2760@1अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते ।

ENMSS@2760@2उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥ २७६०॥

ENMSS@2761@1अयि मालति सौरभसारविनिर्- जितसंविकसत्कमलानिलये ।

ENMSS@2761@2मधुपानविधौ मधुपस्य पुनर्भुवने भवतीमहमाकलये ॥ २७६१॥

ENMSS@2762@1अयि मृगाक्षि तवाधरपल्लवे दयितदन्तपदं न भवत्यदः ।

ENMSS@2762@2भुवनमोहनमन्त्रपदाङ्कितं किमुत यन्त्रमिदं स्मरयोगिनः ॥ २७६२॥

ENMSS@2763@1अयि रोषमुरीकरोषि नो चेत् किमपि त्वां प्रति वारिधे वदामः ।

ENMSS@2763@2जलदेन तवार्थिना विमुक्तान्यपि तोयानि महान् न हा जहासि ॥ २७६३॥

ENMSS@2764@1अयि लङ्घितमर्याद स्मर स्मर हरानलम् ।

ENMSS@2764@2दग्धं दग्धुमयुक्तं ते जनं विरहकातरम् ॥ २७६४॥

ENMSS@2765@1अयि वरोरु हतस्मरदीपिके यदि गतासि मदीक्षणगोचरात् ।

ENMSS@2765@2असमसायकसायककीलिता वद गमिष्यसि मे हृदयात् कथम् ॥ २७६५॥

ENMSS@2766@1अयि विजहीहि दृढोपगूहनं त्यज नवसंगमभीरु वल्लभम् ।

ENMSS@2766@2अरुणकरोद्गम एष वर्तते वरतनु संप्रवदन्ति कुक्कुटाः ॥ २७६६॥

ENMSS@2767@1अयि विधुं परिपृच्छ गुरोः कुतः स्फुटमशिक्ष्यत दाहवदान्यता ।

ENMSS@2767@2ग्लपितशंभुगलाद् गरलात् त्वया किमुदधौ जड वा वडवानलात् ॥ २७६७॥

ENMSS@2768@1अयि शाकुनिक कृतोऽञ्जलिरितरे न कतीह जीवनोपायाः ।

ENMSS@2768@2हत्वा शुकान् किमेतद् विपिनमसारस्वतं कुरुषे ॥ २७६८॥

ENMSS@2769@1अयि संप्रति देहि दर्शनं स्मर पर्युत्सुक एष माधवः ।

ENMSS@2769@2दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ॥ २७६९॥

ENMSS@2770@1अयि संप्रसीद पार्वति शिवोऽपि तव पादयोर्निपतितोऽहम् ।

ENMSS@2770@2शिव इति कथं हि जल्पसि सरुधिरगजचर्मसंवीतः ॥ २७७०॥

ENMSS@2771@1आयि सखि कुरु क्षिप्रं रम्भादलैः शिशिरानिलं सहचरि तनौ
सत्कर्पूरं द्रुतं परिलेपय ।

ENMSS@2771@2सरसबिसिनीपत्रैस्तल्पं प्रिये परिकल्पय स्फुटमिति विभो तस्या गेहे

भवन्ति किलोक्तयः ॥ २७७१॥

ENMSS@2772@1अयि सखि निशा किं वा घस्रः शशी किमु भास्करः स्फुरति पुरतः कामः

किं वा ममास्ति स वल्लभः ।

ENMSS@2772@2प्रतिपलमिति प्राणाधीश प्रिया विरहातुरा कथयति मुहुर्मन्दं मन्दं
सखीं सविधस्थिताम् ॥ २७७२॥

ENMSS@2773@1अयि सखि परिदोषो जायते चुम्बने किं किमु कुचपरिरम्भे किं रते

ब्रूहि तथ्यम् ।

ENMSS@2773@2इतिनिगदति नाथे दीपमालोकयन्ती हरि हरि हरिणाक्षी ह्रीसमुद्रे निमग्ना

॥ २७७३॥

ENMSS@2774@1अयि सखि मम प्राणाधीशो गतो विषयान्तरं
कुसुमविशिखस्तस्मादुच्चैर्दुनोति तनुं शरैः ।

ENMSS@2774@2लघु कुरु तथा यत्नं येन स्मराधिनिवारणे पटुतरमतेस्तस्याशु
स्यादिहागमनं ततः ॥ २७७४॥

ENMSS@2775@1अयि सखि शस्तः सखिवत् पतिरिति किं त्वं न जानासि ।

ENMSS@2775@2शस्तोऽतिसखिवदुपपतिरित्यालि कथं त्वयापि नाबोधि ॥ २७७५॥

ENMSS@2776@1अयि सरसिज सायं संनिधानं त्वदीयं भ्रमर उपगतोऽयं चूतमालां
विहाय ।

ENMSS@2776@2अनुपममधुलोभाद् दूरतः सांप्रतं तद् इदमनुचितमेतन् मुद्रणं
यन्मुखस्य ॥ २७७६॥

ENMSS@2777@1अयि सरले तावदिमा उपदेशगिरो विशन्ति कर्णान्तः ।

ENMSS@2777@2यावन्नान्तर्भूतं तच्चेतसि मामकं चेतः ॥ २७७७॥

ENMSS@2778@1अयि सुतनुशरीरे तल्पमारुह्य तूर्णं विरचय मम कण्ठे बन्धनं
बाहुवल्ल्या ।

ENMSS@2778@2इतिनिगदति नाथे दीपमालोकयन्ती हरि हरि हरिणाक्षी ह्रीसमुद्रे
निमग्ना

॥ २७७८॥

ENMSS@2779@1अयि सुन्दरि तव वदनं नित्यं पूर्णं सुधानिधिर्मत्वा ।

ENMSS@2779@2हन्त पतत्युपरिष्टान् मध्येऽम्बुधि नित्यमेवासौ ॥ २७७९॥

ENMSS@2780@1अयि सुन्दरि संप्रति पश्य पुरश्चरमाचलमस्तकमेति रविः ।

ENMSS@2780@2समुपैति तमःपटलीजटिला रजनी कुरु कामकलाः सकलाः ॥
२७८०॥

ENMSS@2781@1अयि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं बतोदिता ।

ENMSS@2781@2मुखानि लोलाक्षि दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि
॥ २७८१॥

ENMSS@2782@1अयि हस्तगतैः प्राणैरमीभिः कन्दुकैरिव ।

ENMSS@2782@2अपर्यन्तरसं मुग्धे कियत् क्रीडितुमिच्छसि ॥ २७८२॥

ENMSS@2783@1अयि हारलते संहर हरहुंकृतिदग्धदेहसंक्षोभम् ।

ENMSS@2783@2सद्भावजानुरक्तिर्नहि रम्या पण्यनारीणाम् ॥ २७८३॥

ENMSS@2784@1अयि हृदय दयां मयि कुरु कुरङ्गनयनां विना बधान धृतिम् ।

ENMSS@2784@2टसदिति झटिति स्फुट वा स्फुटमिदमुक्तं गतिर्नान्या ॥ २७८४॥

ENMSS@2785@1अयुक्तं बहु भाषन्ते यत्र कुत्रापि शेरते ।
ENMSS@2785@2नग्ना विक्षिप्य गात्राणि सञ्चरा इव मद्यपाः ॥ २७८५॥
ENMSS@2786@1अयुक्तं युक्तं वा यदभिहितमज्ञेन विभुना स्तुयादेतन्नित्यं जडमपि गुरुं तस्य विनुयात् ।
ENMSS@2786@2विवत्सुर्नैःस्पृह्यं कथमपि सभायामभिनयेत् स्वकार्यं संतुष्टे क्षितिभृति रहस्येव कथयेत् ॥ २७८६॥
ENMSS@2787@1अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम् ।
ENMSS@2787@2अमृतं राहवे मृत्युर्विषं शंकरभूषणम् ॥ २७८७॥
ENMSS@2788@1अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः ।
ENMSS@2788@2विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २७८८॥
ENMSS@2789@1अयुक्तचारं दुर्दर्शम् अस्वाधीनं नराधिपम् ।
ENMSS@2789@2वर्जयन्ति नरा दूरान् नदीपङ्कमिव द्विपाः ॥ २७८९॥
ENMSS@2790@1अयुक्तरूपं किमतःपरं भवेत् त्रिनेत्रवक्षः सुलभं तवापि यत् ।
ENMSS@2790@2स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति ॥ २७९०॥
ENMSS@2791@1अयुतं नियुतं वापि प्रदिशन्तु प्राकृताय भोगाय ।
ENMSS@2791@2क्रीणन्ति न बिल्वदलैः कैवल्यं पञ्चषैर्मूढाः ॥ २७९१॥
ENMSS@2792@1अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः ।
ENMSS@2792@2दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ॥ २७९२॥
ENMSS@2793@1अये कीरश्रेणीपरिवृढ वृथा वासरशतं तरोरस्य स्कन्धे गमयति फलाशारभसतः ।
ENMSS@2793@2यदा पुष्पारम्भे मुखमलिनिमा किंशुकतरोस्तदैवाभिज्ञातं फलिपरिचयो दुर्लभ इतः ॥ २७९३॥
ENMSS@2794@1अये केयं धन्या धवलगृहवातायनगता तुलाकोटिक्काणैर्विषमविशिखं जागरयति ।
ENMSS@2794@2पुरा या प्राणेशे गतवति कृता पुष्पधनुषा शरासारै रात्रिंदिवमकृपमुज्ञागरकृशा ॥ २७९४॥
ENMSS@2795@1अये केयं लीलाधवलगृहवातायनतले तुलाकोटिक्काणैः कुसुमधनुषं जागरयति ।
ENMSS@2795@2अहो नेत्रद्वन्द्वं विलसति विलङ्घ्य श्रुतिपथं कथं न त्रैलोक्यं जयति मदनः स्मेरवदनः ॥ २७९५॥

ENMSS@2796@1अये केलीगृहस्तम्भ किं कृतं सुकृतं त्वया ।
ENMSS@2796@2पर्यङ्के वल्लभं त्यक्त्वा त्वामालिङ्गति मानिनी ॥ २७९६॥
ENMSS@2797@1अये को जानीते निजपुरुषसङ्गो हि न तथा यथा चेतः स्त्रीणां परपुरुषसङ्गो रमयते ।
ENMSS@2797@2अपि स्वैरं भुक्ता दिवसमखिलं वासरकृता करस्पर्शादिन्दोर्मुकुलयति नेत्राणि नलिनी ॥ २७९७॥
ENMSS@2798@1अये कोऽयं वृद्धो गृहपरिवृढः किं तव पिता न मे भर्ता किंतु व्यपगतदृगन्यच्च बधिरः ।
ENMSS@2798@2हहुं श्रान्तोऽद्याहं शिशयिषुरिहैवापवरके क्व यामिन्यां यामि स्वपिमि ननु निर्दंशमशके ॥ २७९८॥
ENMSS@2799@1अये जलधिनन्दिनीनयननीरजालम्बन-
ज्वलज्ज्वलनजित्वरज्वरभरत्वराभङ्गुरम् ।
ENMSS@2799@2प्रभातजलजोन्नमद्गरिमगर्वसर्वंकषैर्जगत्त्रितयरोचनैः शिशिरयाशु मां लोचनैः ॥ २७९९॥
ENMSS@2800@1अये ताल व्रीडां व्रज गुरुतया भाति न भवान् फले न च्छाया नो कठिनपरिवारो हि भवतः ।
ENMSS@2800@2इयं धन्या धन्या सरलकदली सुन्दरदला परात्मानं मन्ये सुखयति फलेनामृतवता ॥ २८००॥
ENMSS@2801@1अये दिष्ट्या नष्टो मम गृहपिशाचीपरिचयः परावृत्तं मोहात् स्फुरति च मनाग् ब्रह्मणि मनः ।
ENMSS@2801@2विकारोऽप्यक्षाणां गलित इव निर्भाति विषयात् तथापि क्षेत्रज्ञः स्पृहयति वनाय प्रति मुहुः ॥ २८०१॥
ENMSS@2802@1अये दूरभ्रान्तं विषयविषमारण्यविपथे परिभ्रान्तं चेतो मम विधुरितं स्वैरमधुना ।
ENMSS@2802@2निरावर्ते नित्ये स्थिरनिरवधानभ्रममये
विवेकप्रभ्रश्यद्विकृतिपरमानन्दजलधौ ॥ २८०२॥
ENMSS@2803@1अये नीलग्रीव क्व कथय सखे तेऽद्य मुनयः परं तोषं येषां तव वरविलासो वितनुते ।
ENMSS@2803@2अमी दूरात् क्रूराः क्वणितमिदमाकर्ण्य सहसा त्वरन्ते हन्तुं त्वामहह शबराः पुङ्खितशराः ॥ २८०३॥
ENMSS@2804@1अये नृपतिमण्डलीमुकुटरत्न युष्मद्भुजा- महोष्मततिसंजुषा बत

भवत्प्रतापार्चिषा ।

ENMSS@2804@2द्विषामतिभृशं यशः प्रकटपारदो ध्मापनाद् उदुस्फुटत तारकाः कपटतो विहायस्तटे ॥ २८०४॥

ENMSS@2805@1अये पाथोवाह स्थगय ककुभोऽन्यास्तत इतस्त्यजैतां सीमानं वसति मुनिरस्यां कलशभूः ।

ENMSS@2805@2उदश्चत्कोपेऽस्मिन् स जलधिरपि स्थास्यति न ते यतः पायं पायं सलिलमिह शौर्यं प्रथयसि ॥ २८०५॥

ENMSS@2806@1अये मधुप मा कृथा बत वृथा मनोदीनतां तुषारसमये लताशतनिषेवणव्याकुलः ।

ENMSS@2806@2इयं पुरत एव ते सरसपुष्पमासोदये रसालनवमञ्जरी मधुझरी जरीजृम्भते ॥ २८०६॥

ENMSS@2807@1अये ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने ।

ENMSS@2807@2गरौ गिरः पल्लवनार्थलाघवे मितं च सारं च वचो हि वाग्मिता ॥ २८०७॥

ENMSS@2808@1अये मातर्दृष्ट्वा मुखममृतभानुभ्रमवशात् कचच्छद्मा राहुर्वसति किमु तृष्णातरलितः ।

ENMSS@2808@2किमेवं कन्दर्पान्तकतरुणि सिन्दूरसरणिच्- छलाद्घोक्तुं भूयो बहिरिव रसज्ञां कलयति ॥ २८०८॥

ENMSS@2809@1अये मातस्तातः क्व गत इति यद्वैरिशिशुना दरीगेहे लीना निभृतमिह पृष्टा स्वजननी ।

ENMSS@2809@2करेणास्यं तस्य द्रुतमथ निरुद्ध्याश्रुभृतया विनिःश्वस्य स्फारं शिव शिव दृशैवोत्तरयति ॥ २८०९॥

ENMSS@2810@1अये मुक्तारत्न प्रसर बहिरुद्योतय गृहान् अपि क्षोणीन्द्राणां कुरु फलवतः स्वानपि गुणान् ।

ENMSS@2810@2किमत्रैवात्मानं जरयसि मुधा शुक्तिकुहरे महागम्भीरोऽयं जलधिरिह कस्त्वां गणयति ॥ २८१०॥

ENMSS@2811@1अये यदि समीहसे परपुरावरोधं प्रभो तदाकलय मद्वचः किमपि दर्पनारायण ।

ENMSS@2811@2प्रतीपनृपनागरीनयननीरकल्लोलिनी- समुत्तरणचातुरीं तुरगराजिमध्यापय ॥ २८११॥

ENMSS@2812@1अये लाजा उच्चैः पथि वचनमाकर्ण्य गृहिणी शिशोः कर्णौ यत्नात्

सुपिहितवती दीनवदना ।

ENMSS@2812@2मयि क्षीणोपाये यदकृत दृशावश्रुबहुले तदन्तःशल्यं मे त्वमसि पुनरुद्धर्तुमुचितः ॥ २८१२॥

ENMSS@2813@1अये वापीहंसा निजवसतिसंकोचपिशुनं कुरुध्वं मा चेतो वियति चलतो

वीक्ष्य विहगान् ।

ENMSS@2813@2अमी ते सारङ्गा भुवनमहनीयव्रतभृतां निरीहाणांयेषां तृणमिव भवन्त्यम्बुनिधयः ॥ २८१३॥

ENMSS@2814@1अये वारां राशे कतिपयपयोबिन्दुविभवैरमीभिर्मा गर्वं वह निरवलेपा हि कृतिनः ।

ENMSS@2814@2न किं लोपामुद्रासहचरकरक्रोडकुहरे भवान् दृष्टः कष्टं प्रचलजलजन्तुव्यतिकरः ॥ २८१४॥

ENMSS@2815@1अये वारां राशे कुलिशकरकोपप्रतिभयाद् अयं पक्षप्रेम्णा गिरिपतिसुतस्त्वामुपगतः ।

ENMSS@2815@2त्वदन्तर्वास्तव्यो यदि पुनरयं वाडवशिखी प्रदीप्तः प्रत्यङ्गं ग्लपयति ततः कोऽस्य शरणम् ॥ २८१५॥

ENMSS@2816@1अये सुधाकैरविणि व्यधायि मुधा सुधाधामनि बन्धुभावः ।

ENMSS@2816@2जनापवादः परितः प्रयातः समागमो हन्त न जातु जातः ॥ २८१६॥

ENMSS@2817@1अयेऽस्तमयते शशी नहि कृशीभवत्याग्रहो विनश्यति तमो हठं किमणुमप्यपास्ते मनः ।

ENMSS@2817@2सखि प्रकटितोऽरुणो न करुणोदयस्ते मनाक् प्रयाति खलु यामिनी न

विमनीकृथा नायकम् ॥ २८१७॥

ENMSS@2818@1अये स्वर्गः स्वर्गः कतिदिवसमार्गः प्रवसतां पुरस्तुङ्गौ स्यातां यदि न कुचकुम्भौ मृगदृशः ।

ENMSS@2818@2अयाचं पाथेयं सुलभ[मुभयं] मूलफलयोः पयः स्थाने स्थाने पथि पथि च विश्रामतरवः ॥ २८१८॥

ENMSS@2819@1अये हेलावेलातुलितकुलशैले जलनिधौ कुतो वारामोघं बत जलद मोघं

वितरसि ।

ENMSS@2819@2समन्तादुत्तालज्वलदनलकीलाकवलन- क्लमोपेतानेतानुपचर पयोभिर्विटपिनः ॥ २८१९॥

ENMSS@2820@1अयोगजामन्वभवं न वेदनां हिताय मेऽभूदियमुन्मदिष्णुता ।
ENMSS@2820@2उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनसः ॥ २८२०॥
ENMSS@2821@1अयोग्यवस्तुभरणात् भजेद्योग्योऽपि दुष्टताम् ।
ENMSS@2821@2रक्षणायेन्द्रदत्तासिं वहन् व्याधोऽभवन्मुनिः ॥ २८२१॥
ENMSS@2822@1अयोध्यामटवीभूतां पित्रा भ्रात्रा च वर्जिताम् ।
ENMSS@2822@2पिपासार्तोऽनुधावामि क्षीणतोयां नदीमिव ॥ २८२२॥
ENMSS@2823@1अय्ययि साहसकारिणि किं तव चङ्क्रमणेन ।
ENMSS@2823@2टसदिति भङ्गमवाप्स्यसि कुचयुगभारभरेण ॥ २८२३॥
ENMSS@2823A@1अरक्ते न सुखं वेत्ति नारक्तो दुःखमश्नुते ।
ENMSS@2823A@2दुःखानां च सुखानां च रक्त एवास्पदं सदा ॥
ENMSS@2824@1अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
ENMSS@2824@2जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति ॥ २८२४॥
ENMSS@2825@1अरक्षितं भवेत् सत्यं दैवं तमेव रक्षति ।
ENMSS@2825@2दैवेन नाशितं यत्तु तस्य रक्षा न दृश्यते ॥ २८२५॥
ENMSS@2826@1अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
ENMSS@2826@2आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥ २८२६॥
ENMSS@2827@1अरक्षितारं राजानं बलिषड्भागहारिणम् ।
ENMSS@2827@2तमाहुः सर्वलोकस्य समग्रमलहारकम् ॥ २८२७॥
ENMSS@2828@1अरक्ष्यमानाः कुर्वन्ति यत्किंचित् किल्विषं प्रजाः ।
ENMSS@2828@2तस्मात्तु नृपतेरर्धं यस्माद् गृह्णात्यसौ करान् ॥ २८२८॥
ENMSS@2829@1अरण्यं रक्षितं सिंहात् तस्मात् सिंहः सुरक्षितः ।
ENMSS@2829@2इत्यन्योन्यस्योपकारे मित्रत्वं तन्निबन्धनम् ॥ २८२९॥
ENMSS@2830@1अरण्यं सारङ्गैर्गिरिकुहरगर्भाश्च हरिभिर्दिशो दिङ्मातङ्गैः सलिलमुषितं पङ्कजवनैः ।
ENMSS@2830@2प्रियाचक्षुर्मध्यस्तनवदनसौन्दर्यविजितैः सतां माने म्लाने मरणमथवा दूरगमनम् ॥ २८३०॥
ENMSS@2831@1अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
ENMSS@2831@2यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीत लोचने ॥ २८३१॥
ENMSS@2832@1अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम् ।

ENMSS@2832@2श्वपुच्छमवनामितं बधिरकर्णजापः कृतः कृतान्धमुखमण्डना यदबुधो जनः सेवितः ॥ २८३२॥

ENMSS@2833@1अरण्यहरिणग्रामम् आचक्राम हुताशनः ।

ENMSS@2833@2इन्दोः क्रोडमृगं धर्तुम् इव धूमो नभो ययौ ॥ २८३३॥

ENMSS@2834@1अरण्यानी क्वेयं धृतकनकसूत्रः क्व च मृगः क्व मुक्ताहारोऽयं क्व च स पतगः क्वेयमबला ।

ENMSS@2834@2क्व तत्कन्यारत्नं ललितमहिभर्तुः क्व च वयं स्वमाकूतं धाता किमपि निभृतं पल्लवयति ॥ २८३४॥

ENMSS@2835@1अरण्ये पुष्पिता वृक्षा दूरस्थाने च बान्धवाः ।

ENMSS@2835@2समृद्धेनापि किं तेन यः काले नोपतिष्ठति ॥ २८३५॥

ENMSS@2836@1अरतिरियमुपैति मां न निद्रा गणयति तस्य गुणान् मनो न दोषान् ।

ENMSS@2836@2विगलति रजनी न संगमाशा व्रजति तनुस्तनुतां न चानुरागः ॥ २८३६॥

ENMSS@2837@1अरत्नालोकसंहार्यम् अवार्यं सूर्यरश्मिभिः ।

ENMSS@2837@2दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥ २८३७॥

ENMSS@2838@1अरयोऽपि हि मित्रत्वं यान्ति दण्डवतो ध्रुवम् ।

ENMSS@2838@2दण्डप्रायो हि नृपतिर्भुनक्त्याक्रम्य मेदिनीम् ॥ २८३८॥

ENMSS@2839@1अरयोऽपि हि संधेयाः सति कार्यार्थगौरवे ।

ENMSS@2839@2अहिमूषकवद् देवा ह्यर्थस्य पदवीं गतैः ॥ २८३९॥

ENMSS@2840@1अरलूवृक्षपत्राणां लेपो गोमुखरोगहृत् ।

ENMSS@2840@2गोनाससंभवः क्षारो हन्ति पुष्पं चिरोद्भवम् ॥ २८४०॥

ENMSS@2841@1अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम् ।

ENMSS@2841@2स्मरामि वदनं तस्याश्चारु चञ्चललोचनम् ॥ २८४१॥

ENMSS@2842@1अरविन्दवृन्दमकरन्दतुन्दिलो मरुदेति मन्दमिह मन्दराचलात् ।

ENMSS@2842@2सुरतान्ततान्तसुदतीमतल्लिका- कबरीपरीमलझरी परीवृतः ॥ २८४२॥

ENMSS@2843@1अरविन्देषु कुन्देषु रमितं कालयोगतः ।

ENMSS@2843@2अये माकन्द जानीहि तवैवायं मधुव्रतः ॥ २८४३॥

ENMSS@2844@1अरश्मि बिम्बं सूर्यस्य वह्निं चैवांशुमालिनम् ।

ENMSS@2844@2दृष्ट्वैकादशमासात्तु नरो नोर्ध्वं तु जीवति ॥ २८४४॥

ENMSS@2845@1अरसापि हि वाग् भाति प्रोक्तावसर एव हि ।

ENMSS@2845@2सर्वचित्तप्रमोदाय गालिदानं करग्रहे ॥ २८४५॥

ENMSS@2846@1अरसिकजनभाषणतो रसिकजनैः सह वरं कलहः ।
ENMSS@2846@2लम्बकुचालिङ्गनतो लिकुचकुचापादताडनं श्रेयः ॥ २८४६॥
ENMSS@2847@1अराजके जीवलोके दुर्बला बलवत्तरैः ।
ENMSS@2847@2बाध्यन्ते न च वित्तेषु प्रभुत्वमिह कस्यचित् ॥ २८४७॥
ENMSS@2848@1अराजके तु लोकेऽस्मिंस्तस्माद् राजा विधीयताम् ।
ENMSS@2848@2राजा राज्ये चिरं रक्षां कृत्वा स्वर्गमवाप्नुयात् ॥ २८४८॥
ENMSS@2849@1अराजकेषु राष्ट्रेषु धर्मो न ह्यवतिष्ठते ।
ENMSS@2849@2परस्परं च बाधन्ते सर्वथा धिगराजकम् ॥ २८४९॥
ENMSS@2850@1अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
ENMSS@2850@2रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः ॥ २८५०॥
ENMSS@2851@1अरातिभिर्युधि सहयुध्वनो हताञ् जिघृक्षवः श्रुतरणतूर्यनिःस्वनाः ।
ENMSS@2851@2अकुर्वत प्रथमसमागमोचितं चिरोज्झितं सुरगणिकाः प्रसाधनम् ॥ २८५१॥
ENMSS@2852@1अरातिविक्रमालोकविकस्वरविलोचनः ।
ENMSS@2852@2कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥ २८५२॥
ENMSS@2853@1अरालकेश्या अलके विधात्रा विधीयमाने चलतूलिकाग्रात् ।
ENMSS@2853@2च्युतस्य बिन्दोरसितस्य मार्ग- रेखेव रेजे नवरोमराजी ॥ २८५३॥
ENMSS@2854@1अरावप्युचितं कार्यम् आतिथ्यं गृहमागते ।
ENMSS@2854@2छेत्तुमप्यागते छायां नोपसंहरते द्रुमः ॥ २८५४॥
ENMSS@2855@1अरिं मित्रमुदासीनं मध्यस्थं स्थविरं गुरुम् ।
ENMSS@2855@2यो न बुध्यति मन्दात्मा स च सर्वत्र नश्यति ॥ २८५५॥
ENMSS@2856@1अरिणा सह संवासाद् विषेण सह भोजनात् ।
ENMSS@2856@2पाप्मना सह सौहार्दान् मरणं प्रतिपद्यते ॥ २८५६॥
ENMSS@2857@1अरितोऽभ्यागतो दोषः शत्रुसंवासकारितः ।
ENMSS@2857@2सर्पसंवासधर्मित्वान् नित्योद्वेगेन दूषितः ॥ २८५७॥
ENMSS@2858@1जायते प्लक्षबीजाशात् कपोतादिव शाल्मलेः ।
ENMSS@2858@2उद्वेगजननो नित्यं पश्चादपि भयावहः ॥ २८५८॥
ENMSS@2859@1अरिपक्षाश्रिते मित्रे मर्मवेदिप्रियंवदे ।
ENMSS@2859@2विश्वासो नैव कर्तव्यः यदि साक्षाद् बृहस्पतिः ॥ २८५९॥
ENMSS@2860@1अरिभिर्जितैरशक्तैर्विज्ञाप्यं सेवकैः प्रभोर्नीतिः ।
ENMSS@2860@2विषयैर्जितोऽस्मि शंभो तव यच्छ्लाघ्यं तदारचय ॥ २८६०॥

ENMSS@2861@1अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः ।
ENMSS@2861@2भाति सदानत्यागः स्थिरतायामवनितलतिलकः ॥ २८६१॥
ENMSS@2862@1अरिश्च मित्रं भवति मित्रं चापि प्रदुष्यति ।
ENMSS@2862@2अनित्यचित्तः पुरुषस्तस्मिन् को नाम विश्वसेत् ॥ २८६२॥
ENMSS@2863@1अरिषड्वर्ग एवायम् अस्यास्तात पदानि षट् ।
ENMSS@2863@2तेषामेकमपि च्छिन्दन् खञ्जय भ्रमरीं श्रियम् ॥ २८६३॥
ENMSS@2864@1अरिष्टानि महाराज शृणु वक्ष्यामि तानि ते ।
ENMSS@2864@2येषामालोकनान् मृत्युः निजं जानाति योगवित् ॥ २८६४॥
ENMSS@2865@1अरुंतुदं परुषं रूक्षवाचं वाक्कण्टकैर्वितुदन्तं मनुष्यान् ।
ENMSS@2865@2विद्यादलक्ष्मीकतमं जनानां मुखे निबद्धां निर्ऋतिं वहन्तम् ॥ २८६५॥
ENMSS@2866@1अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः ।
ENMSS@2866@2उभयेन विना मनोभव- स्फुरितं नैव चकास्ति कामिनोः ॥ २८६६॥
ENMSS@2867@1अरुणकिरणजालैरन्तरिक्षे गतर्क्षे चलति शिशिरवाते मन्दमन्दं प्रभाते ।
ENMSS@2867@2युवतिजनकदम्बे नाथमुक्तौष्ठबिम्बे चरमगिरिनितम्बे चन्द्रबिम्बं ललम्बे ॥ २८६७॥
ENMSS@2868@1अरुणकिरणे वह्नौ लाजानुडूनि जुहोति या परिणयति तां संध्यामेतामवैमि मणिर्दिवः ।
ENMSS@2868@2इयमिव स एवाग्निभ्रान्तिं करोति पुरायतः करमपि न कस्तस्यैवोत्कः सकौतुकमीक्षितुम् ॥ २८६८॥
ENMSS@2869@1अरुणजलजराजीमुग्धहस्ताग्रपादा बहुलमधुपमालाकज्जलेन्दीवराक्षी ।
ENMSS@2869@2अनुपतति विरावैः पत्रिणां व्याहरन्ती रजनिमचिरजाता पूर्वसंध्या सुतेव ॥ २८६९॥
ENMSS@2870@1अरुणदलनलिन्या स्निग्धपादारविन्दा कठिनतनुधरण्यां यात्यकस्मात् स्खलन्ती ।
ENMSS@2870@2अवनि तव सुतेयंपादविन्यासदेशे त्यज निज कठिनत्वं जानकी यात्यरण्यम्
॥ २८७०॥
ENMSS@2871@1अरुणनयनं सभ्रूभङ्गं दरस्फुरिताधरं सुतनु शशिनः क्लिष्टां कान्तिं करोतु तवाननम् ।
ENMSS@2871@2कृतमनुनयैः कोपोऽयं ते मनस्विनि वर्धताम् इति गदितयाश्लिष्टो

देव्या शिवाय शिवोऽस्तु वः ॥ २८७१॥
ENMSS@2872@1अरुणमपि विद्रुमद्रुं मृदुलतरं चापि किसलयं बाले ।
ENMSS@2872@2अधरीकरोति नितरां तवाधरो मधुरिमातिशयात् ॥ २८७२॥
ENMSS@2873@1अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।
ENMSS@2873@2परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ॥ २८७३॥
ENMSS@2874@1अरुणिताखिलशैलवना मुहुर्विदधती पथिकान् परितापिनः ।
ENMSS@2874@2विकचकिंशुकसंहतिरुच्चकैरुदवहद्दवहव्यवहश्रियम् ॥ २८७४॥
ENMSS@2875@1अरुणे च तरुणि नयने तव मलिनं च प्रियस्य मुखम् ।
ENMSS@2875@2मुखमानतं च सखिते ज्वलितश्चास्यान्तरे स्मरज्वलनः ॥ २८७५॥
ENMSS@2876@1अरुणोदयवेलायां दशाहेन फलं लभेत् ।
ENMSS@2876@2गोविसर्जनवेलायां सद्यः फलद इष्यते ॥ २८७६॥
ENMSS@2877@1अरुन्धतीकामपुरंध्रिलक्ष्मी- जम्भद्विषद्दारनवाम्बिकानाम् ।
ENMSS@2877@2चतुर्दशीयं तदिहोचितैव गुल्फद्वयाप्ता यददृश्यसिद्धिः ॥ २८७७॥
ENMSS@2878@1अरुष्यन् क्रुश्यमानस्य सुकृतं नाम विन्दति ।
ENMSS@2878@2दुष्कृतं चात्मनो मर्षी रुष्यत्येवापमार्ष्टि वै ॥ २८७८॥
ENMSS@2879@1अरूपोऽपि सुरूपोऽपि आढ्योऽपि द्रव्यवर्जितः ।
ENMSS@2879@2दुःशीलः शीलयुक्तो वा स्त्रीणां भर्ताधिदेवता ॥ २८७९॥
ENMSS@2880@1अरे चेतोमत्स्य भ्रमणमधुना यौवनजले त्यज त्वं स्वच्छन्दं युवतिजलधौ पश्यसि न किम् ।
ENMSS@2880@2तनूजालीजालं स्तनयुगलतुम्बीफलयुतं मनोभूः कैवर्तः क्षिपति रतितन्तु प्रतिमुहुः ॥ २८८०॥
ENMSS@2881@1अरे दैव त्वदायत्तं कामं वित्तादि गच्छतु ।
ENMSS@2881@2ममायत्तं पुनर्वृत्तं हर्तुं कस्येह योग्यता ॥ २८८१॥
ENMSS@2882@1अरे यमभटाः शठाः कपटविग्रहे तूद्भटा निवेदयत वो यमं न च तवाधिकारो मयि ।
ENMSS@2882@2अहं च शिवसुन्दरीचरणयुग्मपङ्केरुह- स्खलन्मधुसुधारसं समपिबं न जानीथ रे ॥ २८८२॥
ENMSS@2883@1अरे रामाहस्ताभरण भसलश्रेणिशरण स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन ।
ENMSS@2883@2सरोहंसोत्तंस प्रचलदल नीलोत्पल सखे सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदन ॥ २८८३॥

ENMSS@2884@1अरे वद हरेर्नाम क्षेमधाम क्षणे क्षणे ।

ENMSS@2884@2बहिः सरति निःश्वासे विश्वासः कः प्रवर्तते ॥ २८८४॥

ENMSS@2885@1अरैः संधार्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः ।

ENMSS@2885@2स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्तते ॥ २८८५॥

ENMSS@2886@1अरोदि मधुपैर्भृशं कमलमालया मीलितं व्यकम्पि जलवीचिभिर्विदलितं मुखं कैरवैः ।

ENMSS@2886@2विलोक्य रजनौ ह्रदे विरहिकोकशोकं घनं परव्यसनकातराः किमिव कुर्वते साधवः ॥ २८८६॥

ENMSS@2887@1अर्ककर्पासयोर्मूलं जलपीतं जयेद्विषम् ।

ENMSS@2887@2पटोलमूलनस्येन कालदष्टोऽपि जीवति ॥ २८८७॥

ENMSS@2888@1अर्कच्छायं तिरयति सुधालिप्तविद्युन्मतल्ली चक्रप्रख्यं महति सुषमामण्डले दूरमग्नम् ।

ENMSS@2888@2रक्तादर्शप्रतिफलमिव श्रीसदङ्गं वहन्ती दृष्टा काचित् तरलनयना देवतेव स्मरस्य ॥ २८८८॥

ENMSS@2889@1अर्काः किं फलसंचयेन भवतां किं वः प्रसूनैर्नवैः किं वा भूरिलताचयेन महता गोत्रेण किं भूयसा ।

ENMSS@2889@2येषामेकतमो बभूव स पुनर्नैवास्ति कश्चित् कुले छायायामुपविश्य यस्य पथिकास्तृप्तिं फलैः कुर्वते ॥ २८८९॥

ENMSS@2890@1अर्काः केचन केचिदक्षतरवः केचिद्दलक्ष्मारुहाः निम्बाः केचन केचिदत्र विपिने क्रूराः करीरद्रुमाः ।

ENMSS@2890@2माकन्दो मकरन्दतुन्दिलमिलद्भृङ्गालिश्रृङ्गारितः कोऽप्यत्रास्ति न मित्र यत्र तनुते कर्णामृतं कोकिलः ॥ २८९०॥

ENMSS@2891@1अर्काभिमुख्यसलिलस्थितिसाधनानि रक्ताम्बुजस्य फलितान्यधुना तपांसि ।

ENMSS@2891@2यद्भीरु तस्य परिभूतिकरं पदं त्वं लाक्षारसान्तरितरागमिदं करोषि ॥ २८९१॥

ENMSS@2892@1अर्घायाम्बुधिरिन्दुमण्डलमपि श्रीचन्दनं तण्डुलास्तारा बिल्वदलं नभःसुरधुनी धूपः प्रदीपो रविः ।

ENMSS@2892@2खेटाः पञ्चफलानि किं च ककुभस्ताम्बूलमारात्रिकं मेरुः श्रीजगतीपते तव यशोयोगेश्वरस्यार्चने ॥ २८९२॥

ENMSS@2893@1अर्घ्यं दत्त्वाथ देवाय भास्कराय समाहितः ।

ENMSS@2893@2ततोऽलंकृतगात्रः सन् वृत्तमालोक्य मन्त्रवत् ॥ २८९३॥
ENMSS@2894@1अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।
ENMSS@2894@2क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥ २८९४॥
ENMSS@2895@1अर्चकस्य तपोयोगाद् अर्चनस्यातिशायनात् ।
ENMSS@2895@2आभिरूप्याच्च मूर्तीनां देवः सांनिध्यमृच्छति ॥ २८९५॥
ENMSS@2896@1अर्चामः सततं गणाधिपमथाप्याखून् निहन्मः शतं ध्यायामो हृदि
भैरवं तदपि तु प्रोत्सारयामः शुनः ।
ENMSS@2896@2भूतेशं प्रणुमस्तथापि शतशो भूतान् निगृह्णीमहे नह्येकस्य गुणः
परस्य महतो दोषानपि प्रोर्णुते ॥ २८९६॥
ENMSS@2897@1अर्चामीति धिया यदेव कुसुमं क्षिप्त्वा जनो मुच्यते विध्यामीति
धिया
तदेव विकिरन् भस्मीकृतो मन्मथः ।
ENMSS@2897@2इत्याभ्यन्तरवृत्तिमात्ररसिको बाह्यानपेक्षश्च यः स स्वामी मम दैवतं
तदितरो नाम्नापि नाम्नायते ॥ २८९७॥
ENMSS@2898@1अर्चिर्मालाकरालाद्दिवमभिलिहतो दाववह्नेरदूराद् उड्डीयोड्डीय
किंचिच्छलभकवलनानन्दमन्दप्रचाराः ।
ENMSS@2898@2अग्रेऽग्रे संरटन्तः प्रचुरतरमसीपातदुर्लक्षधूम्रा धूम्याटाः पर्यटन्ति
प्रतिविटपममी निष्ठुराः स्वस्थलीषु ॥ २८९८॥
ENMSS@2899@1अर्चिष्मन्ति विदार्य वक्त्रकुहराण्यासृक्कणो वासुकेस्तर्जन्या विषकर्बुरान्
गणयतः संस्पृश्य दन्ताङ्कुरान् ।
ENMSS@2899@2एकं त्रीणि नवाष्ट सप्त षडिति व्यस्तास्तसंख्याक्रमा वाचः शक्तिधरस्य
शैशवकलाः कुर्वन्तु वो मङ्गलम् ॥ २८९९॥
ENMSS@2900@1अर्च्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा
वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिः ।
ENMSS@2900@2श्रीविष्णोर्नाम्नि मन्त्रे सकलकलुषहे शब्दसामान्यबुद्धिर्विष्णौ
सर्वेश्वरेशे तदितरसमधीर्यस्य वा नारकी सः ॥ २९००॥
ENMSS@2901@1अर्जयेज्ज्ञानमर्थांश्च पुमानमरवत् सदा ।
ENMSS@2901@2केशेष्विव गृहीतः सन् मृत्युना धर्ममाचरेत् ॥ २९०१॥
ENMSS@2902@1अर्जितं स्वेन वीर्येण नान्यमाश्रित्य कंचन ।
ENMSS@2902@2फलशाकमपि श्रेयो भोक्तुं ह्यकृपणं गृहे ॥ २९०२॥
ENMSS@2903@1परस्य नु गृहे भोक्तुः परिभूतस्य नित्यशः ।

ENMSS@2903@2सुमृष्टमपि न श्रेयो विकल्पोऽयमतः सताम् ॥ २९०३॥
ENMSS@2904@1अर्जुनः कृष्णसंयुक्तः कर्णं यत्रानुधावति ।
ENMSS@2904@2तन्नेत्रं तु कुरुक्षेत्रम् इति मुग्धे मृशामहे ॥ २९०४॥
ENMSS@2905@1अर्जुनः फल्गुनः पार्थः किरीटी श्वेतवाहनः ।
ENMSS@2905@2बीभत्सुर्विजयी कृष्णः सव्यसाची धनंजयः ॥ २९०५॥
ENMSS@2906@1अर्जुनस्य इमे बाणा नेमे बाणाः शिखण्डिनः ।
ENMSS@2906@2सीदन्ति मम गात्राणि माघमा सेगवा इव ॥ २९०६॥
ENMSS@2907@1अर्जुनस्य प्रतिज्ञे द्वे न दैन्यं न पलायनम् ।
ENMSS@2907@2आयू रक्षति मर्माणि आयुरन्नं प्रयच्छति ॥ २९०७॥
ENMSS@2908@1अर्जुनान्ते वरारोहे भीमान्ते च वरानने ।
ENMSS@2908@2पाण्डवैः सह योद्धव्यं रक्षणीयो धनंजयः ॥ २९०८॥
ENMSS@2909@1अर्जुनीयति यदर्जने जनो वर्जनीयजनतर्जनादिभिः ।
ENMSS@2909@2मङ्क्षु नश्यति चिराय संचिता वञ्चिता जगति के न संपदा ॥ २९०९॥
ENMSS@2910@1अर्थं धिगस्तु बहुवैरिकरं नराणां राज्यं धिगस्तु भयदं बहु चिन्तनीयम् ।
ENMSS@2910@2स्वर्गं धिगस्तु पुनरागमनप्रवृत्तिं धिग् धिक् शरीरमपि रोगसमाश्रयं च ॥ २९१०॥
ENMSS@2911@1अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा ।
ENMSS@2911@2विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥ २९११॥
ENMSS@2912@1अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।
ENMSS@2912@2दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥ २९१२॥
ENMSS@2913@1अर्थः कामो धर्मो मोक्षः सर्वे भवन्ति पुरुषस्य ।
ENMSS@2913@2तावद्यावत् पीडां जाठरवह्निर्न विदधाति ॥ २९१३॥
ENMSS@2914@1अर्थः सुखं कीर्तिरपीह मा भूद् अनर्थ एवास्तु तथापि धीराः ।
ENMSS@2914@2निजप्रतिज्ञामनुरुध्यमाना महोद्यमाः कर्मसमारभन्ते ॥ २९१४॥
ENMSS@2915@1अर्थ एव हि केषांचिद् अनर्थो भविता नृणाम् ।
ENMSS@2915@2अर्थश्रेयसि चासक्तो न श्रेयो विन्दते नरः ॥ २९१५॥
ENMSS@2916@1अर्थग्रहणे न तथा दुनोति कटुकूजितैर्यथा पिशुनः ।
ENMSS@2916@2रुधिरादानादधिकं दुनोति कर्णे क्वणन् मशकः ॥ २९१६॥
ENMSS@2917@1अर्थज्ञात् संशयच्छेत्ता ततः श्रेयान् स्वकर्मकृत् ।
ENMSS@2917@2मुक्तसङ्गस्ततो भूयान् अदोग्धा धर्ममात्मनः ॥ २९१७॥

ENMSS@2918@1अर्थत्यागो हि कार्यः स्याद् अर्थं श्रेयांसमिच्छता ।
ENMSS@2918@2बीजौपम्येन कौन्तेय मा ते भूदत्र संशयः ॥ २९१८॥
ENMSS@2919@1अर्थधर्मौ परित्यज्य यः काममनुवर्तते ।
ENMSS@2919@2एवमापद्यते क्षिप्रं राजा दशरथो यथा ॥ २९१९॥
ENMSS@2920@1अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
ENMSS@2920@2वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ॥ २९२०॥
ENMSS@2921@1अर्थपतौ भूमिपतौ बाले वृद्धे तपोऽधिके विदुषि ।
ENMSS@2921@2योषिति मूर्खे गुरुषु च विदुषा नैवोत्तरं देयम् ॥ २९२१॥
ENMSS@2922@1अर्थप्रश्नकृतौ लोके सुलभौ तौ गृहे गृहे ।
ENMSS@2922@2दाता चोत्तरदश्चैव दुर्लभौ पुरुषौ भुवि ॥ २९२२॥
ENMSS@2923@1अर्थप्राणविनाशसंशयकरीं प्राप्यापदं दुस्तरां प्रत्यासन्नभयो न वेत्ति विभवं स्वं जीवितं काङ्क्षति ।
ENMSS@2923@2उत्तीर्णस्तु ततो धनार्थमपरां भूयो विशत्यापदं प्राणानां च धनस्य चाधमधियामन्योन्यहेतुः पणः ॥ २९२३॥
ENMSS@2924@1अर्थप्रियतयात्मानम् अप्रियाय ददाति या ।
ENMSS@2924@2कामात्मन्यपि निःस्नेहां कोऽनुरक्तेति मन्यते ॥ २९२४॥
ENMSS@2925@1अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
ENMSS@2925@2पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २९२५॥
ENMSS@2926@1अर्थयुक्तस्य करणम् अनर्थस्य च वर्जनम् ।
ENMSS@2926@2न्यायतश्च करादानं स्वयं च प्रतिमोक्षणम् ॥ २९२६॥
ENMSS@2927@1अर्थयुक्तिमविज्ञाय यः शुभे कुरुते मतिम् ।
ENMSS@2927@2मित्रे वा यदि वा शत्रौ तस्यापि चलिता मतिः ॥ २९२७॥
ENMSS@2928@1अर्थयेदेव मित्राणि सति वासति वा धने ।
ENMSS@2928@2नानर्थयन् विजानाति मित्राणां सारफल्गुताम् ॥ २९२८॥
ENMSS@2929@1अर्थरक्षापरो भृत्यः कृत्याकृत्यविवेकवित् ।
ENMSS@2929@2सान्धिविग्रहिकः कार्यो राज्ञा नयविशारदः ॥ २९२९॥
ENMSS@2930@1अर्थवन्तः प्रशस्यन्ते निन्द्यन्ते तद्विनाकृताः ।
ENMSS@2930@2आगेमेष्वपि चेदेवम् अद्भुतं किं शरीरिषु ॥ २९३०॥
ENMSS@2931@1अर्थवानर्थमर्थिभ्यो न ददात्यत्र को गुणः ।
ENMSS@2931@2एकैव गतिरर्थस्य दानमन्या विपत्तयः ॥ २९३१॥
ENMSS@2932@1अर्थवानेव लोकेऽस्मिन् पूज्यते मित्रबान्धवैः ।

ENMSS@2932@2अर्थहीनस्तु पुरुषो जीवन्नपि मृतोपमः ॥ २९३२॥
ENMSS@2933@1अर्थवान् दुष्कुलीनोऽपि लोके पूज्यतमो नरः ।
ENMSS@2933@2शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥ २९३३॥
ENMSS@2934@1अर्थश्चेत् सर्वथा रक्ष्य इति कैश्चिदुदाहृतम् ।
ENMSS@2934@2तत्कथं न हरिश्चन्द्रोऽरक्षत् कुशिकनन्दने ॥ २९३४॥
ENMSS@2935@1धर्मस्तु रक्षितः सर्वैरपि देहव्ययेन च ।
ENMSS@2935@2शिबिप्रभृतिभूपालैर्दधीचिप्रमुखैर्द्विजैः ॥ २९३५॥
ENMSS@2936@1अर्थसंपद्विमोहाय बहुशोकाय चैव हि ।
ENMSS@2936@2तस्मादर्थमनर्थक्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥ २९३६॥
ENMSS@2937@1अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः ।
ENMSS@2937@2साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥ २९३७॥
ENMSS@2938@1अर्थसिद्धिं परामिच्छन् धर्ममेवादितश्चरेत् ।
ENMSS@2938@2नहि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतम् ॥ २९३८॥
ENMSS@2939@1अर्थस्य निश्चयो दृष्टो विचारेण हितोक्तितः ।
ENMSS@2939@2न स्नानेन न दानेन प्राणायामशतेन वा ॥ २९३९॥
ENMSS@2940@1अर्थस्य पुरुषो दासः स च जातु न कस्यचित् ।
ENMSS@2940@2यदर्जनपरा लोके सर्वेऽपि भुवनत्रये ॥ २९४०॥
ENMSS@2941@1अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
ENMSS@2941@2इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥ २९४१॥
ENMSS@2942@1अर्थस्य मूलं प्रकृतिर्नयश्च धर्मस्य कारुण्यमकैतवं च ।
ENMSS@2942@2कामस्य वित्तं च वपुर्वयश्च मोक्षस्य सर्वार्थनिवृत्तिरेव ॥ २९४२॥
ENMSS@2943@1अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
ENMSS@2943@2शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य चेक्षणे ॥ २९४३॥
ENMSS@2944@1अर्थस्य सदोत्थानं नियमपरीपालनं क्रियाज्ञानम् ।
ENMSS@2944@2स्थानत्यागः पटुता- ऽनुद्वेगः स्त्रीष्वविश्वासः ॥ २९४४॥
ENMSS@2945@1अर्थस्य साधने सिद्ध उत्कर्षे रक्षणे व्यये ।
ENMSS@2945@2नाशोपभोग आयासस्त्रासश्चिन्ता भ्रमो नृणाम् ॥ २९४५॥
ENMSS@2946@1अर्थस्यानर्थपूर्णस्य कोऽवसीदतु संग्रहे ।
ENMSS@2946@2तत्संतुष्टैर्न्नचेदिष्टैर्दुष्टैः स्यान्नयनोत्सवः ॥ २९४६॥
ENMSS@2947@1अर्थस्योपार्जनं कष्टं कष्टमस्य गृहागमः ।
ENMSS@2947@2तस्यागतस्य बन्धुभ्यो विनियोगः सुखावहः ॥ २९४७॥

ENMSS@2948@1अर्थस्योपार्जनं कृत्वा नैवाभाग्यः समश्नुते ।
ENMSS@2948@2अरण्यं महदासाद्य मूढः सोमिलको यथा ॥ २९४८॥
ENMSS@2949@1अर्थस्योपार्जने दुःखं पालने च क्षये तथा ।
ENMSS@2949@2नाशे दुःखं व्यये दुःखं घ्नन्ति चैवार्थकारणात् ॥ २९४९॥
ENMSS@2950@1अर्थहीनोऽपि मधुरः शब्दो लोकप्रियंकरः ।
ENMSS@2950@2वीणावेणुमृदङ्गादीन्यत्रोदाहरणानि नः ॥ २९५०॥
ENMSS@2951@1अर्थांश्च दुर्लभांल्लोके क्लेशांश्च सुलभांस्तथा ।
ENMSS@2951@2दुःखं चैव कुटुम्बार्थे यः पश्यति स मुच्यते ॥ २९५१॥
ENMSS@2952@1अर्थांस्त्यजत पात्रेभ्यः सुतान् प्राप्नुत कामजान् ।
ENMSS@2952@2प्रियं प्रियेभ्यश्चरत राजा हि त्वरते जये ॥ २९५२॥
ENMSS@2953@1अर्थाः खलु समृद्धा हि बाढं दुःखं विजानताम् ।
ENMSS@2953@2असमृद्धास्त्वपि सदा मोहयन्त्यविचक्षणान् ॥ २९५३॥
ENMSS@2954@1अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं मानुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवनम् ।
ENMSS@2954@2धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते ॥ २९५४॥
ENMSS@2955@1अर्थाः साधारणा एव वियुज्यन्ते स्वभावतः ।
ENMSS@2955@2ममतां त्यजतां तेषु महदुत्पद्यते यशः ॥ २९५५॥
ENMSS@2956@1अर्थाकृष्टधियः पदं रचयतः शब्दावधानात्मनः संधिच्छेदविधाननिर्गमविधिव्यापारमातन्वतः ।
ENMSS@2956@2मा मां कश्चिदिह ग्रहीदिति मुहुः साशङ्कमापश्यतश्चौरस्येव कवेर्भयं भवति यत्तद्विद्विषामस्तु वः ॥ २९५६॥
ENMSS@2957@1अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
ENMSS@2957@2वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥ २९५७॥
ENMSS@2958@1अर्था गृहे निवर्तन्ते श्मशाने चैव बान्धवाः ।
ENMSS@2958@2सुकृतं दुष्कृतं चापि गच्छन्तमनुगच्छति ॥ २९५८॥
ENMSS@2959@1अर्थातुराणां न सुहृन् न बन्धुः कामातुराणां न भयं न लज्जा ।
ENMSS@2959@2विद्यातुराणां न सुखं न निद्रा क्षुधातुराणां न वपुर्न तेजः ॥ २९५९॥
ENMSS@2960@1अर्थात् पलायते ज्ञानं मार्जारान्मूषिको यथा ।
ENMSS@2960@2वकवत् ज्ञायतामर्थः सिंहवच्च जयेद्रिपुम् ॥ २९६०॥

ENMSS@2961@1अर्था दुःखं परित्यक्तुं पालिताश्चापि तेऽसुखाः ।
ENMSS@2961@2दुःखेन चाधिगम्यन्ते तेषां नाशं न चिन्तयेत् ॥ २९६१॥
ENMSS@2962@1अर्थाद्धर्मश्च कामश्च स्वर्गश्चैव नराधिप ।
ENMSS@2962@2प्राणयात्रा हि लोकस्य विनार्थं न प्रसिध्यति ॥ २९६२॥
ENMSS@2963@1अर्थाद् भ्रष्टस्तीर्थयात्रां तु गच्छेत् सत्याद् भ्रष्टो रौरवं वै व्रजेच्च ।
ENMSS@2963@2योगाद् भ्रष्टः सत्यधृतिं च गच्छेद् राज्याद् भ्रष्टो मृगयायां व्रजेच्च ॥ २९६३॥
ENMSS@2964@1अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते ।
ENMSS@2964@2घातयन्ति हि कर्याणि दूताः पण्डितमानिनः ॥ २९६४॥
ENMSS@2965@1अर्थानर्थौ विनिश्चित्य व्यवसायं भजेत ह ।
ENMSS@2965@2गुणतः संग्रहं कुर्याद् दोषतस्तु विसर्जयेत् ॥ २९६५॥
ENMSS@2966@1अर्था न सन्ति न च मुञ्चति मां दुराशा त्यागे रतिं वहति दुर्ललितं मनो मे ।
ENMSS@2966@2याञ्चा च लाघवकरी स्ववधे च पापं प्राणाः स्वयं व्रजत किं परिदेवनेन ॥ २९६६॥
ENMSS@2967@1अर्था न स्युर्यदि विजहिमो धर्ममर्थैकसाध्यं कायक्लेशैः कतिकतिविधः साधनीयो न धर्मः ।
ENMSS@2967@2कायः श्रान्तो यदि भवति कस्तावता धर्मलोपश्चित्तं दत्त्वा सकृदिव शिवे चिन्तितं साधयामः ॥ २९६७॥
ENMSS@2968@1अर्थानामधिकानां राज्ञा चौरेण वा नाशः ।
ENMSS@2968@2अन्ने खल्वतिभुक्ते वमनं वा स्याद्विरेको वा ॥ २९६८॥
ENMSS@2969@1अर्थानामननुष्ठाता कामचारी विकत्थनः ।
ENMSS@2969@2अपि सर्वां महीं लब्ध्वा क्षिप्रमेव विनश्यति ॥ २९६९॥
ENMSS@2970@1अर्थानामर्जनं कार्यं वर्धनं रक्षणं तथा ।
ENMSS@2970@2भक्ष्यमाणो निरादायः सुमेरुरपि हीयते ॥ २९७०॥
ENMSS@2971@1अर्थानामर्जने दुःखम् अर्जितानां च रक्षणे ।
ENMSS@2971@2नाशे दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥ २९७१॥
ENMSS@2972@1अर्थानामार्जनं कार्यं वर्धनं रक्षणं तथा ।
ENMSS@2972@2भक्ष्यमाणो निरादायः क्षीयते हिमवानपि ॥ २९७२॥
ENMSS@2973@1अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदित्थं शूरस्त्वं

वाग्मिदर्पज्वरशमनविधावक्षयं पाटवं नः ।

ENMSS@2973@2सेवन्ते त्वां धनान्धा मतिमलहतये मामपि श्रोतुकामा मय्यप्यास्था न ते

चेत् त्वयि मम सुतरामेष राजन् गतोऽस्मि ॥ २९७३॥

ENMSS@2974@1अर्थानामीश्वरो यः स्याद् इन्द्रियाणामनीश्वरः ।

ENMSS@2974@2इन्द्रियाणामनैश्वर्याद् ऐश्वर्याद् भ्रश्यते हि सः ॥ २९७४॥

ENMSS@2975@1अर्थानाहरतोऽनर्थाः समायान्ति प्रमादिनः ।

ENMSS@2975@2अप्रमत्तस्ततो मार्गे नित्यमेवास्तु वित्तवान् ॥ २९७५॥

ENMSS@2976@1अर्थानुलापान् व्रजसुन्दरीणाम् अकृत्रिमाणां च सरस्वतीनाम् ।

ENMSS@2976@2आर्द्राशयेन श्रवणाञ्चलेन संभावयन्तं तरुणं गृणीमः ॥ २९७६॥

ENMSS@2977@1अर्थान् केचिदुपासते कृपणवत् केचित् त्वलंकुर्वते वेश्यावत् खलु धातुवादिन इवोद्बध्नन्ति केचिद् रसान् ।

ENMSS@2977@2अर्थालंकृतिसद्रसद्रवमुचां वाचां प्रशस्तिस्पृशां कर्तारः कवयो भवन्ति कतिचित् पुण्यैरगण्यैरिह ॥ २९७७॥

ENMSS@2978@1अर्थान् ब्रूयान् न चासत्सु गुणान् ब्रूयान् न चात्मनः ।

ENMSS@2978@2आदद्यान् न च साधुभ्यो नासत्पुरुषमाश्रयेत् ॥ २९७८॥

ENMSS@2979@1अर्था भाग्योदये जन्तुं विशन्ति शतशः स्वयम् ।

ENMSS@2979@2दिग्भ्योऽभ्युपेत्य सर्वाभ्यः सायं तरुमिवाण्डजाः ॥ २९७९॥

ENMSS@2980@1अर्थाभावे तु यज्ज्ञानं प्रत्यक्षमिव दृश्यते ।

ENMSS@2980@2गन्धर्वनगराकारं स्वप्नं तदुपलक्षयेत् ॥ २९८०॥

ENMSS@2981@1अर्थाभावे मृदुता काठिन्यं भवति चार्थबाहुल्ये ।

ENMSS@2981@2नैकत्रार्थमृदुत्वे प्रायः श्लोके च लोके च ॥ २९८१॥

ENMSS@2982@1अर्थार्थिना प्रिया एव श्रीहर्षोदीरिता गिरः ।

ENMSS@2982@2सारस्वते तु सौभाग्ये प्रसिद्धा तद्विरुद्धता ॥ २९८२॥

ENMSS@2983@1अर्थार्थिनी देवपूजास्पप्नोपश्रुतितत्परा ।

ENMSS@2983@2सदा गणकगेहं सा प्रष्टुं याति ग्रहस्थितिम् ॥ २९८३॥

ENMSS@2984@1अर्थार्थी जीवलोकोऽयं ज्वलन्तमुपसर्पति ।

ENMSS@2984@2क्षीणक्षीरां निराजीव्यां वत्सस्त्यजति मातरम् ॥ २९८४॥

ENMSS@2985@1अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते ।

ENMSS@2985@2जनितारमपि त्यक्त्वा निःस्वं गच्छति दूरतः ॥ २९८५॥

ENMSS@2986@1अर्थार्थी यानि कष्टानि मूढोऽयं सहते जनः ।

ENMSS@2986@2शतांशेनापि मोक्षार्थी तानि चेन् मोक्षमाप्नुयात् ॥ २९८६॥
ENMSS@2987@1अर्थार्थी यानि कष्टानि सहते कृपणो जनः ।
ENMSS@2987@2तान्येव यदि धर्मार्थी न भूयः क्लेशभाजनम् ॥ २९८७॥
ENMSS@2988@1अर्थालाभेऽपि महति स्वाध्यायं न समुत्सृजेत् ।
ENMSS@2988@2कुलान्यकुलतां यान्ति स्वाध्यायस्य विवर्जनात् ॥ २९८८॥
ENMSS@2989@1अर्थाहरणकौशल्यं किं स्तुमः शास्त्रवादिनाम् ।
ENMSS@2989@2अव्ययेभ्योऽपि ये चार्थान् निष्कर्षन्ति सहस्रशः ॥ २९८९॥
ENMSS@2990@1अर्था हसन्त्युचितदानविहीनचित्तं भूमिर्नरं च मम भूमिरिति ब्रुवाणम् ।
ENMSS@2990@2जारा हसन्ति तनयानुपलालयन्तं मृत्युर्हसत्यवनिपं रणरङ्गभीरुम् ॥ २९९०॥
ENMSS@2991@1अर्थिको व्याधितो मूर्खः प्रवासी परसेवकः ।
ENMSS@2991@2जीवन्तोऽपि मृताः पञ्च पञ्चैते दुखभागिनः ॥ २९९१॥
ENMSS@2992@1अर्थिता विभवस्त्यागः स्वातन्त्र्यमुचितज्ञता ।
ENMSS@2992@2इति पञ्चगुणोपतेम् आश्रयेदाश्रयं नरः ॥ २९९२॥
ENMSS@2993@1अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया ।
ENMSS@2993@2उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः स्त्रीरत्नं च जगत्पतिर्दशमुखो दृप्तः कथं मृष्यते ॥ २९९३॥
ENMSS@2994@1अर्थिनस्त्वरितदानेन तृप्तिर्भवति यादृशी ।
ENMSS@2994@2बहुदानं विलम्बेन न तादृक् तृप्तिकारकम् ॥ २९९४॥
ENMSS@2995@1अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत् ।
ENMSS@2995@2तदवस्था पुनर्देव नान्यस्य मुखमीक्षते ॥ २९९५॥
ENMSS@2996@1अर्थिनां मित्रवर्गस्य विद्विषां च पराङ्मुखः ।
ENMSS@2996@2यो न याति पिता तेन पुत्री माता च वीरसूः ॥ २९९६॥
ENMSS@2997@1अर्थिनामुपपन्नानां पूर्वं चाप्युपकारिणाम् ।
ENMSS@2997@2आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥ २९९७॥
ENMSS@2998@1अर्थिनि कवयति कवयति पठति च पठति स्तवोन्मुखे स्तौति ।
ENMSS@2998@2पश्चाद्यामीत्युक्ते मौनी दृष्टिं निमीलयति ॥ २९९८॥
ENMSS@2999@1अर्थिने न तृणवद्धनमात्रं किं तु जीवनमपि प्रतिपाद्यम् ।
ENMSS@2999@2एवमाह कुशवज्जलदापी द्रव्यदानविधिरुक्तिविदग्धः ॥ २९९९॥

ENMSS@3000@1अर्थिनो जठरज्वालादग्धा वाक् कंचिदश्नति ।
ENMSS@3000@2तां चाशमयतो वित्तं किन्निमित्तं न विद्महे ॥ ३०००॥
ENMSS@3001@1अर्थिप्रत्यर्थिलक्षैरप्यपराङ्मुखचेतसम् ।
ENMSS@3001@2त्वां पराङ्मुखतां निन्युः केवलं परयोषितः ॥ ३००१॥
ENMSS@3002@1अर्थिभुक्तावशिष्टं यत् तदश्नीयान् महाशयः ।
ENMSS@3002@2श्वेतोऽर्थिरहितं भुक्त्वा निजमांसाशनोऽभवत् ॥ ३००२॥
ENMSS@3003@1अर्थिभ्यः कनकस्य दीपकपिशा विश्राणिता राशयो वादे वादिविषाणिनां प्रतिहताः शास्त्रोक्तिगर्वा गिरः ।
ENMSS@3003@2उत्खातप्रतिरोपितैर्नृपतिभिः शारैरिव क्रीडितं कर्तव्यं कृतमर्थिता यदि विधेस्तत्रापि सज्जा वयम् ॥ ३००३॥
ENMSS@3004@1अर्थिभ्यश्च द्विषद्भ्यश्च वैमुख्यं यस्य नास्त्यसौ ।
ENMSS@3004@2महोदारः सदा शान्तः कृतज्ञः कोऽपि दुर्लभः ॥ ३००४॥
ENMSS@3005@1अर्थिभ्रंशबहूभवत्फलभरव्याजेन कुब्जायितः सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः ।
ENMSS@3005@2आस्ते निर्व्ययरत्नसंपदुदयोदग्रः कथं याचक-
श्रेणीवर्जनदुर्यशोनिबिडितव्रीडस्तु रत्नाचलः ॥ ३००५॥
ENMSS@3006@1अर्थी करोति दैन्यं लब्धार्थो गर्वमपरितोषं च ।
ENMSS@3006@2नष्टधनश्च सशोकः सुखमास्ते निःस्पृहः पुरुषः ॥ ३००६॥
ENMSS@3007@1अर्थी येनार्थकृत्येन संव्रजत्यविचारयन् ।
ENMSS@3007@2तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याश्च लक्ष्मण ॥ ३००७॥
ENMSS@3008@1अर्थी लाघवमुच्छ्रितो निपतनं कामातुरो लाञ्छनं
लुब्धोऽकीर्तिमसंगरः परिभवं दुष्टोऽन्यदोषे रतिम् ।
ENMSS@3008@2निःस्वो वञ्चनमुन्मना विकलतां शोकाकुलः संशयं दुर्वागप्रियतां दुरोदरवशः प्राप्नोति कष्टं मुहुः ॥ ३००८॥
ENMSS@3009@1अर्थेन किं कृपणहस्तगतेन तेन रूपेण किं गुणपराक्रमवर्जितेन ।
ENMSS@3009@2मित्रेण किं व्यसनकालपराङ्मुखेन ज्ञानेन किं बहुशठाधिकमत्सरेण ॥ ३००९॥
ENMSS@3010@1अर्थेन परिहीणं तु नरमस्पृश्यतां गतम् ।
ENMSS@3010@2त्यजन्ति बान्धवाः सर्वे मृतं सत्त्वमिवासवः ॥ ३०१०॥
ENMSS@3011@1अर्थेन रक्षितमिदं राज्यं पुनरर्थमर्पयति ।
ENMSS@3011@2अर्थैकपरो नृपतिः परिहरति पुनः क्षणादुभयम् ॥ ३०११॥

ENMSS@3012@1अर्थेन हि विहीनस्य पुरुषस्याल्पमेधसः ।

ENMSS@3012@2व्युच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ ३०१२॥

ENMSS@3013@1अर्थेन हीनः पुरुषस्त्यज्यते मित्रबान्धवैः ।

ENMSS@3013@2त्यक्तलोकक्रियाहारः परासुरिव निष्प्रभः ॥ ३०१३॥

ENMSS@3014@1अर्थेनापि हि किं तेन यस्यानर्थे तु संगतिः ।

ENMSS@3014@2को हि नाम शिखाजातं पन्नगस्य मणिं हरेत् ॥ ३०१४॥

ENMSS@3015@1अर्थेनोपार्ज्यते धर्मो धर्मेणार्थ उपार्ज्यते ।

ENMSS@3015@2अन्योन्याश्रयणं ह्येतद् उभयोत्पत्तिसाधनम् ॥ ३०१५॥

ENMSS@3016@1अर्थेन्द्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् ।

ENMSS@3016@2भ्रंशितो ज्ञानविज्ञानाद् येनाविशति मुख्यताम् ॥ ३०१६॥

ENMSS@3017@1अर्थे प्रत्युपलब्धे च परदोषे च कीर्तिते ।

ENMSS@3017@2आत्मानं साधु कर्तव्यं शीलवृत्तमभीप्सितम् ॥ ३०१७॥

ENMSS@3018@1अर्थेभ्यो हि विवृत्तेभ्यः संभृतेभ्यस्ततस्ततः ।

ENMSS@3018@2क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः ॥ ३०१८॥

ENMSS@3019@1अर्थेषु काममुपलभ्य मनोरथो मे स्त्रीणां धनेष्वनुचितं प्रणयं करोति ।

ENMSS@3019@2माने च कार्यकरणे च विलम्बमानो धिग् भोः कुलं च पुरुषस्य दरिद्रतां च ॥ ३०१९॥

ENMSS@3020@1अर्थेष्वलभ्येष्वकृतप्रयत्नं कृतादरं नित्यमुपायवत्सु ।

ENMSS@3020@2जितेन्द्रियं नानुतपन्ति रोगास्तत्कालयुक्तं यदि नास्ति दैवम् ॥ ३०२०॥

ENMSS@3021@1अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।

ENMSS@3021@2ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ३०२१॥

ENMSS@3022@1अर्थैरनेकैर्जननीममुष्याश्चित्तं च दत्त्वा चिरकालचिन्त्यम् ।

ENMSS@3022@2संतोषयेयं सहसैव भद्रे न चेत् कथं स्याद् इह नः प्रवेशः ॥ ३०२२॥

ENMSS@3023@1अर्थैरर्था निबध्यन्ते गजैरिव महागजाः ।

ENMSS@3023@2न ह्यनर्थवता शक्यं वाणिज्यं कर्तुमीहया ॥ ३०२३॥

ENMSS@3024@1अर्थैर्विहीनः पुरुषो जीवन्नपि मृतोपमः ।

ENMSS@3024@2धर्मार्थविद्यार्जनतो मतिर्यस्य निवर्तते ॥ ३०२४॥

ENMSS@3025@1अर्थो गिरामपिहितः पिहितश्च कश्चित् सौभाग्यमेति मरहट्टवधूकुचाभः ।

ENMSS@3025@2नान्ध्रीपयोधर इवातितरां प्रकाशो नो गुर्जरीस्तन इवातितरां निगूढः ॥ ३०२५॥

ENMSS@3026@1अर्थोत्कण्ठावकुण्ठप्रमुषितविनयैर्लुठ्यतां नाकिशुण्ठैः प्रत्नो रत्नोच्चयः किं त्वतिविषमदशां तामनुध्याय खिद्ये ।

ENMSS@3026@2सिन्धो मन्थाद्रिमन्थात् तरलतरबृहद्भङ्गसंघातघात-प्रभ्रश्यन्मूलवेलागिरिगणपतनोद्दामधामन्धमीका ॥ ३०२६॥

ENMSS@3027@1अर्थो नराणां पतिरङ्गनानां वर्षा नदीनामृतुराट् तरूणाम् ।

ENMSS@3027@2स्वधर्मचारी नृपतिः प्रजानां गतं गतं यौवनमानयन्ति ॥ ३०२७॥

ENMSS@3028@1अर्थो न संभृतः कश्चिन् न विद्या काचिदर्जिता ।

ENMSS@3028@2न तपः संचितं किंचिद् गतं च सकलं वयः ॥ ३०२८॥

ENMSS@3029@1अर्थो नाम जनानां जीवितमखिलक्रियाकलापश्च ।

ENMSS@3029@2तमपि हरन्त्यतिधूर्ताः छगलगला गायना लोके ॥ ३०२९॥

ENMSS@3030@1अर्थोपचयविज्ञानम् अस्ति यस्य स पण्डितः ।

ENMSS@3030@2सरः सलिलसंपूर्णम् आश्रयन्ति विहङ्गमाः ॥ ३०३०॥

ENMSS@3031@1अर्थोपार्जनदक्षश्च क्षान्तिशीलः सदा भवेत् ।

ENMSS@3031@2न तत्र परकार्याणि विद्वानापि विशेषयेत् ॥ ३०३१॥

ENMSS@3032@1अर्थोऽप्यर्थेन चेत् साध्यः का वार्ता धर्मकामयोः ।

ENMSS@3032@2अर्थः सर्वजगन्मूलम् अनर्थोऽर्थविपर्ययः ॥ ३०३२॥

ENMSS@3033@1अर्थो विनैवार्थनयोपसीदन् नाल्पोऽपि धीरैरवधीरणीयः ।

ENMSS@3033@2मान्येन मन्ये विधिना वितीर्णः स प्रीतिदायो बहु मन्तुमर्हः ॥ ३०३३॥

ENMSS@3034@1अर्थोष्मा पितृलालनं विटघटामेलः प्रियंमन्यता तारुण्यं नगरे स्थितिस्तरलता धीः कामशास्त्रं प्रति ।

ENMSS@3034@2संगीतं रजनी विधुर्मधुमदः स्पर्धा सपत्नैस्तथा वेश्यानामनुरक्तवित्तहरणे कुर्वन्ति साहायकम् ॥ ३०३४॥

ENMSS@3035@1अर्थोऽस्ति चेन्न पदशुद्धिरथास्ति सापि नो रीतिरस्ति यदि सा घटना कुतस्त्या ।

ENMSS@3035@2साप्यस्ति चेन्न नववक्रगतिस्तदेतद् व्यर्थं विना रसमहो गहनं कवित्वम् ॥ ३०३५॥

ENMSS@3036@1अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।

ENMSS@3036@2जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥ ३०३६॥

ENMSS@3037@1अर्थो हि नष्टकार्यार्थैरयत्नेनाधिगम्यते ।
ENMSS@3037@2उत्साहो बलवानार्य नास्त्युत्साहात् परं बलम् ॥ ३०३७॥
ENMSS@3038@1अर्थौचित्यवता सूक्तिरलंकारेण शोभते ।
ENMSS@3038@2पीनस्तनस्थितेनेव हारेण हरिणेक्षणा ॥ ३०३८॥
ENMSS@3039@1अर्धं कलङ्करहिता करुणैव शंभोरर्धं गुणास्तदितरे सकलाः समेताः ।
ENMSS@3039@2इत्यम्ब संप्रति किल स्फुरितं रहस्यं संपश्यतो मम भवन्मयमैशमर्धम् ॥ ३०३९॥
ENMSS@3040@1अर्धं जितं त्रिपुरमम्ब तव स्मितं चेद् अर्धान्तरेण च तथा भवितव्यमेव ।
ENMSS@3040@2तच्चिन्तये जननि कारणसूक्ष्मरूप- स्थूलात्मकत्रिपुरशान्तिकृते स्मितं ते ॥ ३०४०॥
ENMSS@3041@1अर्धं दन्तच्छदस्य स्फुरति जपवशादर्धमप्युत्प्रकोपाद् एकः पाणिः प्रणन्तुं शिरसि कृतपदः क्षेप्तुमन्यस्तमेव ।
ENMSS@3041@2एकं ध्यानान्निमीलत्यपरमविकसद्वीक्षते नेत्रमित्थं तुल्यानिच्छाविधित्सा तनुरवतु स वो यस्य संध्याविधाने ॥ ३०४१॥
ENMSS@3042@1अर्धं दानववैरिणा गिरिजयाप्यर्धं शिवस्याहृतं देवेत्थं जगतीतले पुरहराभावे समुन्मीलति ।
ENMSS@3042@2गङ्गा सागरमम्बरं शशिकला नागाधिपः क्ष्मातलं सर्वज्ञत्वमधीश्वरत्वमगमत् त्वां मां तु भिक्षाटनम् ॥ ३०४२॥
ENMSS@3043@1अर्धं नीत्वा निशायाः सरभससुरतायाससंश्लेषयोगैः प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ।
ENMSS@3043@2संभोगक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतो ज्योत्स्नाभिन्नाच्छधारं न पिबति सलिलं शारदं मन्दभाग्यः ॥ ३०४३॥
ENMSS@3044@1अर्धं प्रेमनिबद्धमर्धमपरं लज्जाश्रितं मानसं एवं नेत्रसरोरुहं प्रियमुखे चान्यद् गवाक्षेऽर्पितम् ।
ENMSS@3044@2पर्यङ्के पदमेकमेव धरणौ पृष्ठे च कृत्वापरं स्थातुं गन्तुमपि प्रभातसमये शक्नोति नैवाबला ॥ ३०४४॥
ENMSS@3045@1अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा ।
ENMSS@3045@2भार्या मूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः ॥ ३०४५॥
ENMSS@3046@1अर्धं सज्जनसंपर्काद् अविद्याया विनश्यति ।

ENMSS@3046@2चतुर्भागस्तु शास्त्रार्थैश्चतुर्भागं स्वयत्नतः ॥ ३०४६॥
ENMSS@3047@1अर्धं स्त्रियस्त्रिभुवने सचराचरेऽस्मिन् अर्धं पुमांस इति दर्शयितुं भवत्या ।
ENMSS@3047@2स्त्रीपुंसलक्षणमिदं वपुरादृतं यत् तेनासि देवि विदिता त्रिजगच्छरीरा ॥ ३०४७॥
ENMSS@3048@1अर्धचन्द्रं च चक्रं च शकटं मकरं तथा ।
ENMSS@3048@2कमलं श्रेणिकां गुल्मं व्यूहानेवं प्रकल्पयेत् ॥ ३०४८॥
ENMSS@3049@1अर्धचन्द्रवदाकारं स्त्रीनामार्थं च त्र्यक्षरम् ।
ENMSS@3049@2नकारादि रिकारान्तं यो जानाति स पण्डितः ॥ ३०४९॥
ENMSS@3050@1अर्धचन्द्रसमायुक्तं पुंनाम चतुरक्षरम् ।
ENMSS@3050@2ककारादि लकारान्तम् इह जानाति पण्डितः ॥ ३०५०॥
ENMSS@3051@1अर्धचन्द्राकृतिर्यस्मिन् खड्गे स्वाभाविकी भवेत् ।
ENMSS@3051@2अपि दोषसहस्राणि हन्ति चन्द्रस्तमो यथा ॥ ३०५१॥
ENMSS@3052@1अर्धपञ्चमहस्तं तु श्रेष्ठं चापं प्रकीर्तितम् ।
ENMSS@3052@2तद्विज्ञेयं धनुर्दिव्यं शंकरेण धृतं पुरा ॥ ३०५२॥
ENMSS@3053@1अर्धपीतमदिरा मणिपारी शोभतां कथमतीव तरुण्याः ।
ENMSS@3053@2चुम्बितैरधिकपाटलभासा पूरिताधरमयूखभरेण ॥ ३०५३॥
ENMSS@3054@1अर्धपीतस्तनं मातुरामर्दाक्लिष्टकेसरम् ।
ENMSS@3054@2प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥ ३०५४॥
ENMSS@3055@1अर्धपुरुषे च मत्स्यः पारावतसंनिभश्च पाषाणः ।
ENMSS@3055@2मृद्भवति तत्र नीला दीर्घं कालं च बहुतोयम् ॥ ३०५५॥
ENMSS@3056@1अर्धप्रोथस्थिता रेखा दृश्यन्ते यस्य वाजिनः ।
ENMSS@3056@2तस्य मृत्युः समुद्दिष्टो दशमं प्राप्य वत्सरम् ॥ ३०५६॥
ENMSS@3057@1अर्धप्लुष्टं बहुभ्यः शवपिशितमुपाहृत्य हृष्टश्चिताभ्यो जातग्रासातिरेकः स्फुटतरधमनीनद्धशुष्कार्द्रकायः ।
ENMSS@3057@2प्रेतः संतर्ज्य दृष्ट्या कुटिलपरुषया मज्ञनिष्कर्षशुष्कैराहन्त्याहारलुब्धान्मुहुरभिपततो जम्बुकानस्थिखण्डैः ॥ ३०५७॥
ENMSS@3058@1अर्धमीलितविलोलतारके सा दृशौ निधुवनक्लमालसा ।
ENMSS@3058@2यन्मुहूर्तमवहन्न तत्पुनस्तृप्तिरास्त दयितस्य पश्यतः ॥ ३०५८॥
ENMSS@3059@1तत्क्लमस्तमदिदीक्षत क्षणं तालवृन्तचलनाय नायकम् ।
ENMSS@3059@2तद्विधा हि भवदैवतं प्रिया वेधसोऽपि विदधाति चापलम् ॥ ३०५९॥

ENMSS@3060@1अर्धरात्रे दिनस्यार्धे त्वर्धचन्द्रेऽर्धभास्करे ।
ENMSS@3060@2रावणेन हृता सीता कृष्णपक्षे सिताष्टमी ॥ ३०६०॥
ENMSS@3061@1अर्धसिद्धेषु कार्येषु आत्मगुह्यं प्रकाशयेत् ।
ENMSS@3061@2स एव निधनं याति बकः कर्कटकाद्यथा ॥ ३०६१॥
ENMSS@3062@1अर्धस्मितेन विनिमन्त्र्य दशार्धबाणम् अर्धं विधूय वसनाञ्चलमर्धमार्गे ।
ENMSS@3062@2अर्धेन नेत्रविशिखेन निवृत्य सार्धम् अर्धार्धमेव तरुणी तरुणं चकार ॥ ३०६२॥
ENMSS@3063@1अर्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः ।
ENMSS@3063@2ततो हस्तेन हीनश्च हीन एव स्मृतो हयः ॥ ३०६३॥
ENMSS@3064@1अर्धाङ्गनापुंवपुषः पुरारेर्मूर्त्तिः श्रियं नौरिव वस्तनोतु ।
ENMSS@3064@2प्रेमातिभारादपरं यदर्धं ममज्ज श‍ृङ्गाररसाम्बुराशौ ॥ ३०६४॥
ENMSS@3065@1अर्धाङ्गाहितपौर्वकीर्तिवनितादीव्यत्सितांशुप्रभं कैलासीकृतदिक्करीन्द्रशिरसि न्यस्तस्वपादाम्बुजम् ।
ENMSS@3065@2विश्वव्याप्यविनाशि शंकरपदं यायात्त्वदीयं यशो न स्यादस्य यदि क्षितीश भवतो दानादिकेभ्यो जनिः ॥ ३०६५॥
ENMSS@3066@1अर्धाङ्गुलपरीणाहजिह्वाग्रायासभीरवः ।
ENMSS@3066@2सर्वाङ्गक्लेशजननम् अबुधाः कर्म कुर्वते ॥ ३०६६॥
ENMSS@3067@1अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
ENMSS@3067@2कस्याश्चिदासीद् रशना तदानीम् अङ्गुष्ठमूलार्पितसूत्रशेषा ॥ ३०६७॥
ENMSS@3068@1अर्धाधीताश्च यैर्वेदास्तथा शूद्रान्नभोजनाः ।
ENMSS@3068@2ते द्विजाः किं करिष्यन्ति निर्विषा इव पन्नगाः ॥ ३०६८॥
ENMSS@3069@1अर्धासने समधिरोप्य सुरद्विपस्य शक्रोऽपि यद्युधि शचीं कवचीकरोति ।
ENMSS@3069@2धीरस्य तस्य सहते दशकन्धरस्य कः साहसैकरसिकः करवालधाराम् ॥ ३०६९॥
ENMSS@3070@1अर्धेन जलदश्यामम् अर्धेनातपपिङ्गलम् ।
ENMSS@3070@2अर्धनारीश्वराकारं न को मन्येत वासरम् ॥ ३०७०॥
ENMSS@3071@1अर्धोक्ते भयमागतोऽसि किमिदं कण्ठश्च किं गद्गदश्चाटोरस्य न च क्षणोऽयमनुपक्षिप्तेयमास्तां कथा ।
ENMSS@3071@2ब्रूहि प्रस्तुतमस्तु संप्रति महत् कर्णे सखीनां

मुखैस्तृप्तिर्निर्भरमेभिरक्षरपदैः प्रागेव मे संभृता ॥ ३०७१॥
ENMSS@3072@1अर्धोद्गतेन कदली मृदुताम्रतलेन गर्भकोषेण ।
ENMSS@3072@2पिबति निदाघज्वरिता घनधारां करपुटेनैव ॥ ३०७२॥
ENMSS@3073@1अर्धोन्मीलितलोचनस्य पिबतः पर्याप्तमेकं स्तनं सद्यः प्रस्नुतदुग्धदिग्धमपरं हस्तेन संमार्जतः ।
ENMSS@3073@2मात्रा चाङ्गुलिलालितस्य वदने स्मेरायमाने मुहुर्विष्णोः क्षीरकणोरुधामधवला दन्तद्युतिः पातु वः ॥ ३०७३॥
ENMSS@3074@1अर्पयति प्रतिदिवसं प्रियस्य पथि लोचने बाला ।
ENMSS@3074@2निक्षिपति कमलमालाः कोमलमिव कर्तुमध्वानम् ॥ ३०७४॥
ENMSS@3075@1अर्पयन्त्यर्थिने प्राणान् न प्रणाममरातये ।
ENMSS@3075@2न नास्तीत्युत्तरं जातु सुहृदे सुमनोजनाः ॥ ३०७५॥
ENMSS@3076@1अर्पितं रसितवत्यपि नाम- ग्राहमन्ययुवतेर्दयितेन ।
ENMSS@3076@2उज्झति स्म मदमप्यपिबन्ती वीक्ष्य मद्यमितरा तु ममाद ॥ ३०७६॥
ENMSS@3077@1अर्पिताः प्रथमतस्त्वयि गावो गोपशावक इति प्रणयेन ।
ENMSS@3077@2दीयते पुनरिदं धनहीनैर्वेतनं गरुडकेतन चेतः ॥ ३०७७॥
ENMSS@3078@1अर्वागभ्येत्य गर्वादिव सरिदवरा सेयमित्युद्दिधीर्षाः कालिन्दीं कोपवेगाकलितहलहठोत्क्षेपिणः क्षेमहेतुः ।
ENMSS@3078@2तालाङ्कस्याशु दालारसविवशहृदः स्रंसदंसोत्तरीयं तिर्यग्व्यस्ताङ्घ्रि भूयः सुवलनमथ लघूत्थानमाधावनं तत् ॥ ३०७८॥
ENMSS@3079@1अर्वाचीनवचः प्रपञ्चसुखिनां दुःशिक्षितानां पुरो गम्भीरं कविपुङ्गवस्य किमहो सर्वस्वमुद्घाट्यते ।
ENMSS@3079@2व्यर्थं कर्दमगन्धगौरवहृतग्रामीणगोष्ठीमुखे कोऽयं नाम सचेतनोऽस्ति य इह प्रस्तौति कस्तूरिकाम् ॥ ३०७९॥
ENMSS@3080@1अर्वाश्वत्पश्चशाखः स्फुरदुपरिजटामण्डलः संश्रितानां नित्यापर्णोऽपि तापत्रितयमपनयन् स्थाणुरव्यादपूर्वः ।
ENMSS@3080@2यः प्रोन्मीलत्कपर्दैः शिरसि विरचिताबालबन्धे द्युसिन्धोः पाथोभिर्लब्धसेकः फलति फलशतं वाञ्छितं भक्तिभाजाम् ॥ ३०८०॥
ENMSS@3081@1अलंकरोति यः श्लोकं शुक एव न मध्यमः ।
ENMSS@3081@2अलं करोति यः श्लोकं शुक एव नमध्यमः ॥ ३०८१॥
ENMSS@3082@1अलंकरोति हि जरा राजामात्यभिषग्यतीन् ।
ENMSS@3082@2विडम्बयति पण्यस्त्रीमल्लगायनसेवकान् ॥ ३०८२॥

ENMSS@3083@1अलंकर्तुं कर्णौ भृशमनुभवन्त्या नवरुजं ससीत्कारं तिर्यग्वलितवदनाया मृगदृशः ।
ENMSS@3083@2कराब्जव्यापारानतिसुकृतसारान् रसयतो जनुः सर्वश्लाघ्यं जयति ललितोत्तंस भवतः ॥ ३०८३॥
ENMSS@3084@1अलंकारः शङ्काकरनरकपालं परिजनो विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः ।
ENMSS@3084@2अवस्थेयं स्थाणोरपि भवति सर्वामरगुरोर्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ॥ ३०८४॥
ENMSS@3085@1अलंकारप्रियो विष्णुर्जलधाराप्रियः शिवः ।
ENMSS@3085@2नमस्कारप्रियो भानुर्ब्राह्मणो भोजनप्रियः ॥ ३०८५॥
ENMSS@3086@1अलंकारभृतो रीतिमन्तः सिद्धा रसोन्नतौ ।
ENMSS@3086@2लक्षणैर्लक्षितात्मानः कृतिनो ननु केचन ॥ ३०८६॥
ENMSS@3087@1अलंकारो हि नारीणां क्षमा तु पुरुषस्य वा ।
ENMSS@3087@2दुष्करं तच्च वः क्षान्तं त्रिदशेषु विशेषतः ॥ ३०८७॥
ENMSS@3088@1यादृशी वः क्षमा पुत्र्यः सर्वासामविशेषतः ।
ENMSS@3088@2क्षमा दानं क्षमा यज्ञः क्षमा सत्यं च पुत्रिकाः ॥ ३०८८॥
ENMSS@3089@1क्षमा यशः क्षमा धर्मः क्षमायां विष्ठितं जगत् ॥
ENMSS@3090@1अलंकृतः काञ्चनकोटिमूल्यैर्महार्हरत्नैर्गजवाजिवाहैः ।
ENMSS@3090@2निमेषमात्रं लभते न जीवं कालेन काले शिखया गृहीतः ॥ ३०९०॥
ENMSS@3091@1अलंक्रियन्ते शिखिनः केकया मदरक्तया ।
ENMSS@3091@2वाचा विपश्चितोऽत्यर्थं माधुर्यगुणयुक्तया ॥ ३०९१॥
ENMSS@3092@1अलंक्रिया शक्तिसमन्वितानां तपोधनानां बलशक्तिरग्र्या ।
ENMSS@3092@2व्यापाददावानलवारिधारा प्रत्येह च क्षान्तिरनर्थशान्तिः ॥ ३०९२॥
ENMSS@3093@1अलं त्रिदिववार्तया किमिति सार्वभौमश्रिया विदूरतरवर्तिनी भवतु मोक्षलक्ष्मीरपि ।
ENMSS@3093@2कलिन्दगिरिनन्दिनीतटनिकुञ्जपुञ्जोदरे मनो हरति केवलं नवतमालनीलं महः ॥ ३०९३॥
ENMSS@3094@1अलं नलं रोद्धुममी किलाभवन् गुणा विवेकप्रमुखा न चापलम् ।
ENMSS@3094@2स्मरः स रत्यामनिरुद्धमेव यत् सृजत्ययं सर्गनिसर्ग ईदृशः ॥ ३०९४॥
ENMSS@3095@1अलं परिग्रहेणेह दोषवान् हि परिग्रहः ।

ENMSS@3095@2कृमिर्हि कोशकारस्तु बध्यते स्वपरिग्रहात् ॥ ३०९५॥
ENMSS@3096@1अलं वा बहु यो ब्रूते हितवाक्यावमानिनः ।
ENMSS@3096@2स तस्माल्लभते दोषं कपेः सूचीमुखो यथा ॥ ३०९६॥
ENMSS@3097@1अलं वा बहुवादेन यत्र यत्रानुरज्यसे ।
ENMSS@3097@2तत्र तत्रैव ते दुःखदावपावकपङ्क्तयः ॥ ३०९७॥
ENMSS@3098@1अलं विलङ्घ्य प्रियविज्ञ याञ्चां कृत्वापि वाम्यं विविधं विधेये ।
ENMSS@3098@2यशःपथादाश्रवतापदोत्थात् खलु स्खलित्वास्तखलोक्तिखेलात् ॥ ३०९८॥
ENMSS@3099@1अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः ।
ENMSS@3099@2गुरूपदेशं प्रतिभेव तीक्ष्णा प्रतीक्षते जातु न कालमर्तिः ॥ ३०९९॥
ENMSS@3100@1अलं विवादेन यथा श्रुतं त्वया तथाविधस्तावदशेषमस्तु सः ।
ENMSS@3100@2ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥ ३१००॥
ENMSS@3101@1अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले ।
ENMSS@3101@2कङ्कालबहुले घोरे सर्वप्राणिभयंकरे ॥ ३१०१॥
ENMSS@3102@1न पुनर्जीवितः कश्चित् कालधर्ममुपागतः ।
ENMSS@3102@2प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥ ३१०२॥
ENMSS@3103@1अलं हिमानीपरिदीर्णगात्रः समापितः फाल्गुनसंगमेन ।
ENMSS@3103@2अत्यन्तमाकाङ्क्षितकृष्णवर्त्मा भीष्मो महात्माजनि माघतुल्यः ॥ ३१०३॥
ENMSS@3104@1अलकतमः परिपीतं सुस्मितसुषमापुरस्कृतं मधुरम् ।
ENMSS@3104@2को न सुधानिधिसहजं सुमुखि मुखं हन्त संमनुताम् ॥ ३१०४॥
ENMSS@3105@1अलकाश्च खलाश्चैव मूर्ध्नि भीरुजनैर्धृताः ।
ENMSS@3105@2उपर्युपरि सत्कारेऽप्याविष्कुर्वन्ति वक्रताम् ॥ ३१०५॥
ENMSS@3106@1अलकेषु चूर्णभासः स्वेदलवाभान् कपोलफलकेषु ।
ENMSS@3106@2नवघनकौतुकिनीनां वारिकणान् पश्यति कृतार्थः ॥ ३१०६॥
ENMSS@3107@1अलक्तको यथा रक्तो नरः कामी तथैव च ।
ENMSS@3107@2हृतसारस्तथा सोऽपि पादमूले निपात्यते ॥ ३१०७॥
ENMSS@3108@1अलक्तको यथा रक्तो निष्पीड्य पुरुषस्तथा ।
ENMSS@3108@2अबलाभिर्बलाद् रक्तः पादमूले निपात्यते ॥ ३१०८॥
ENMSS@3109@1अलक्षितकुचाभोगं भ्रमन्ती नृत्यभूमिषु ।
ENMSS@3109@2स्मरेणापि सरोजाक्षी न लक्ष्यीक्रियते शरैः ॥ ३१०९॥
ENMSS@3110@1अलक्षितगतागतैः कुलवधूकटाक्षैरिव क्षणानुनयशीतलैः

प्रणयकेलिकोपैरिव ।
ENMSS@3110@2सुवृत्तमसृणोन्नतैर्मृगदृशामुरोजैरिव त्वदीयतुरगैरिदं धरणिचक्रमाक्रम्यते ॥ ३११०॥
ENMSS@3111@1अलक्ष्मीराविशत्येनं शयानमलसं नरम् ।
ENMSS@3111@2निःसंशयं फलं लब्ध्वा दक्षो भूतिमुपाश्नुते ॥ ३१११॥
ENMSS@3112@1अलघुता जठरस्य कुचौ गता चरणचञ्चलता नयने गता ।
ENMSS@3112@2सखि विलोकय मे तनुचेष्टितं विनिमयप्रगतं नवयौवनम् ॥ ३११२॥
ENMSS@3113@1अलघूपलपङ्क्तिशालिनीः परितो रुद्धनिरन्तराम्बराः ।
ENMSS@3113@2अधिरूढनितम्बभूमयो न विमुञ्चन्ति चिराय मेखलाः ॥ ३११३॥
ENMSS@3114@1अलङ्घ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृताम् ।
ENMSS@3114@2प्रियतां ज्यायसीं मा गान् महतां केन तुङ्गता ॥ ३११४॥
ENMSS@3115@1अलङ्घ्यं सर्वेषामिह खलु फलं कर्मजनितं विपत् कर्मप्रैष्या व्यथयति न जातासि हृदयम् ।
ENMSS@3115@2यदज्ञाः कुर्वन्ति प्रसभमुपहासं धनमदाद् इदं त्वन्तर्गाढं परमपरितापं जनयति ॥ ३११५॥
ENMSS@3116@1अलब्धं चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः ।
ENMSS@3116@2रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ॥ ३११६॥
ENMSS@3117@1अलब्धदुग्धादिरसो रसावहं तदुद्भवो निम्बरसं कृमिर्यथा ।
ENMSS@3117@2अदृष्टजैनेन्द्रवचोरसायनस्तथा कुतत्त्वं मनुते रसायनम् ॥ ३११७॥
ENMSS@3118@1अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया ।
ENMSS@3118@2रक्षितं वर्धयेद् वृद्ध्या वृद्धं पात्रेषु निक्षिपेत् ॥ ३११८॥
ENMSS@3119@1अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत् ।
ENMSS@3119@2पालितं वर्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत् ॥ ३११९॥
ENMSS@3120@1अलब्धलिप्सा न्यायेन लब्धस्य च विवर्धनम् ।
ENMSS@3120@2परिवृद्धस्य विधिवत् पात्रे संप्रतिपादनम् ॥ ३१२०॥
ENMSS@3121@1अलब्धवेतनो लुब्धो मानी चाप्यवमानितः ।
ENMSS@3121@2क्रुद्धश्च कोपितोऽकस्मात् तथा भीतश्च भीषितः ॥ ३१२१॥
ENMSS@3122@1यथाभिलषितैः कामैर्भिन्द्यादेतांश्चतुर्विधान् ।
ENMSS@3122@2परपक्षे स्वपक्षे च यथावत् प्रशमं नयेत् ॥ ३१२२॥
ENMSS@3123@1अलब्धान्तः प्रवेशस्य तारमाक्रन्दतो बहिः ।
ENMSS@3123@2प्रभो करुणया कर्णे क्रियन्तां कृपणोक्तयः ॥ ३१२३॥

ENMSS@3124@1अलब्धे रागिणो लोका अहो लब्धे विरागिणः ।
ENMSS@3124@2हेमन्ते तापमीहन्ते हन्त ग्रीष्मे हिमं पुनः ॥ ३१२४॥
ENMSS@3125@1अलब्ध्वापि धनं राज्ञः संश्रिता यान्ति संपदम् ।
ENMSS@3125@2महाह्रदसमीपस्थं पश्य नीलं वनस्पतिम् ॥ ३१२५॥
ENMSS@3126@1अलब्ध्वा यदि वा लब्ध्वा नानुशोचन्ति पण्डिताः ।
ENMSS@3126@2आनन्तर्यं चारभते न प्राणानां धनायते ॥ ३१२६॥
ENMSS@3127@1अलभन्त नभःक्षेत्रे तारास्तरलकान्तयः ।
ENMSS@3127@2त्विषं तुषारबीजानां नूतनाङ्कुरशालिनाम् ॥ ३१२७॥
ENMSS@3128@1अलभ्यं लप्स्यमानेन तत्त्वं जिज्ञासुना चिरम् ।
ENMSS@3128@2जिगीषुणा ह्रियं त्यक्त्वा कार्यं कोलाहलो महान् ॥ ३१२८॥
ENMSS@3129@1अलभ्यं लब्धुकामस्य जनस्य गतिरीदृशी ।
ENMSS@3129@2अलब्धेषु मनस्तापः संचितार्थो विनश्यति ॥ ३१२९॥
ENMSS@3130@1अलभ्यलाभाय च लब्धवृद्धये यथार्हतीर्थप्रतिपादनाय च ।
ENMSS@3130@2यशस्विनं वेदविदं विपश्चितं बहुश्रुतं ब्राह्मणमेव वासय ॥ ३१३०॥
ENMSS@3131@1अलमतिचपलत्वात् स्वप्नमायोपमत्वात् परिणतिविरसत्वात् संगमेनाङ्गनायाः ।
ENMSS@3131@2इति यदि शतकृत्वस्तत्त्वमालोचयामस्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥ ३१३१॥
ENMSS@3132@1अलमथवा बहुवादैर्विरचय लोकानुरागनिर्बन्धम् ।
ENMSS@3132@2तत्रैकत्र समग्रं तन्निहितं यन्न जातु संनिहितम् ॥ ३१३२॥
ENMSS@3133@1अलमन्ध भुजायष्टिभ्रान्त्या भ्रातर्जडस्य ते ।
ENMSS@3133@2दंशाय दंदशूकोऽयं दंशमुद्रां न मुञ्चति ॥ ३१३३॥
ENMSS@3134@1अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् ।
ENMSS@3134@2प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥ ३१३४॥
ENMSS@3135@1अलमन्यैरुपालम्भैः कीर्तितैश्च व्यतिक्रमैः ।
ENMSS@3135@2पेशलं चानुरूपं च कर्तव्यं हितमात्मनः ॥ ३१३५॥
ENMSS@3136@1अलमप्रियाण्युदित्वा रुचिरार्थाः किमिह न स्थिता वाचः ।
ENMSS@3136@2अमृतमिति वचसि सत्यपि विषमिति हि किमुच्यते वारि ॥ ३१३६॥
ENMSS@3137@1अलमभिमुखैर्बद्धैर्भोगैरलं भ्रमिभिर्दृशोरलमविरलैर्गर्जोद्गारैरलं विषवृष्टिभिः ।
ENMSS@3137@2किमिह भुजगाः कोपावेगैरमीभिरमुद्रितैर्ननु भगवतस्तार्क्ष्यस्यैते

वयं स्तुतिपाठकाः ॥ ३१३७॥

ENMSS@3138@1अलमलमघृणस्य तस्य नाम्ना पुनरपि सैव कथा गतः स कालः ।

ENMSS@3138@2कथय कथय वा तथापि दूति प्रतिवचनं द्विषतोऽपि माननीयम् ॥ ३१३८॥

ENMSS@3139@1अलमलमतिमात्रं साहसेनामुना ते त्वरितमयि विमुञ्च त्वं लतापाशमेनम् ।

ENMSS@3139@2चलितमपि निरोद्धुं जीवितं जीवितेशे क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥ ३१३९॥

ENMSS@3140@1अलमलमतिवृद्ध्या स्थीयतां तस्य पश्यस्यकरुण करभोरोर्भज्यते मध्यमेतत् ।

ENMSS@3140@2इति गुरुजघनाज्ञाचोदिता रोमराजिः स्तनयुगमसिताक्ष्या वक्तुमारोहतीव ॥ ३१४०॥

ENMSS@3141@1अलमलमनुगम्य प्रस्थितं प्राणनाथं प्रथमविरहशोके न प्रतीकार एषः ।

ENMSS@3141@2सपदि रमणयात्रा श्रेय इत्यारटन्त्या चरणपतनपूर्वं सा निरुद्धेव काञ्च्या ॥ ३१४१॥

ENMSS@3142@1अलमलमियमेव प्राणिनां पातकानां निरसनविषये या कृष्ण कृष्णेति वाणी ।

ENMSS@3142@2यदि भवति मुकुन्दे भक्तिरानन्दसान्द्रा विलुठति चरणाब्जे मोक्षसाम्राज्यलक्ष्मीः ॥ ३१४२॥

ENMSS@3143@1अलमात्मीयं विदितं विदितं धनिकस्य याचकोऽवहितः ।

ENMSS@3143@2चन्द्रं ब्रवीति चटकं चटकं चन्द्रं च लोभलोलमना ॥ ३१४३॥

ENMSS@3144@1अलमादिवराहेण वटुदासं परं स्तुमः ।

ENMSS@3144@2जगदुद्धरता येन न वक्रीकृतमाननम् ॥ ३१४४॥

ENMSS@3145@1अलमुदकेन तृणैर्वा मनस्विना प्राणधारणा कार्या ।

ENMSS@3145@2नासंस्कृतश्च पुरुषः प्राकृतसत्त्वः प्रणयितव्यः ॥ ३१४५॥

ENMSS@3146@1अललितगतिरुच्चैः स्थूलवक्राङ्गुलीकं वहति चरण युग्मं कन्धरां ह्रस्वपीनाम् ।

ENMSS@3146@2कपिलकचकलापा क्रूरचेष्टातिपीना द्विरदमदविगन्धिः स्वाङ्केऽनङ्के च ॥ ३१४६॥

ENMSS@3147@1द्विगुणकटुकषायप्रायभुग् वीतलज्जा लुलदतिविपुलोष्ठी दुःखसाध्या प्रयोगे ।

ENMSS@3147@2बहिरपि बहुरोमात्यन्तमन्तर्विशालं वहति जघनरन्ध्रं हस्तिनी गद्गदोक्तिः ॥ ३१४७॥

ENMSS@3148@1अलसं मुखरं स्तब्धं क्रूरं व्यसनिनं शठम् ।

ENMSS@3148@2असंतुष्टमभक्तं च त्यजेद् भृत्यं नराधिपः ॥ ३१४८॥

ENMSS@3149@1अलसं वपुषि श्लथं दुकूले चपलं चेतसि धूसरं कपोले ।

ENMSS@3149@2चकितं नयने स्तने विलोलं तव नामश्रवणं तनूदरीणाम् ॥ ३१४९॥

ENMSS@3150@1अलसं विक्रमश्रान्तं विहतोपायचेष्टितम् ।

ENMSS@3150@2क्षयव्ययप्रवासैश्च श्रमेण विपरिद्रुतम् ॥ ३१५०॥

ENMSS@3151@1भीरुं मूर्खं स्त्रियं बालं धार्मिकं दुर्जनं पशुम् ।

ENMSS@3151@2मैत्रीप्रधानं कल्याणबुद्धिं सान्त्वेन साधयेत् ॥ ३१५१॥

ENMSS@3152@1अलसभुजलताभिर्नाहृतो नागरीभिर्भवनदमनकानां नातिथिर्वा बभूव ।

ENMSS@3152@2त्वदरिनगरमध्ये संचरंश्चैत्रजन्मा जरदजगरपीतः क्षीयते गन्धवाहः ॥ ३१५२॥

ENMSS@3153@1अलसमधुरा स्निग्धा दृष्टिर्घनत्वमुपागता किसलयरुचिर्निस्ताम्बूलस्वभावधरोधरः ।

ENMSS@3153@2त्रिवलिवलया लेखोन्नेया घटन्त इवैकतः प्रकृतिसुभगा गर्भेणासौ किमप्युपपादिता ॥ ३१५३॥

ENMSS@3154@1अलसमुकुलिताक्षं वक्रमालोक्य तस्या मयि विलुलितचित्ते मूकभावं प्रपन्ने ।

ENMSS@3154@2श्रवणकुवलयान्तश्चारिणा षट्पदेन क्षणमनुगतनादं गीतमन्तः स्मरामि ॥ ३१५४॥

ENMSS@3155@1अलसयति गात्रमधिकं भ्रमयति चेतस्तनोति संतापम् ।

ENMSS@3155@2मोहं च मुहुः कुरुते विषमविषं वीक्षितं तस्याः ॥ ३१५५॥

ENMSS@3156@1अलसलुलितमुग्धान्यध्वसंपातखेदाद् अशिथिलपरिरम्भैर्दत्तसंवाहनानि ।

ENMSS@3156@2परिमृदितमृणालीदुर्बलान्यङ्गकानि त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ ३१५६॥

ENMSS@3157@1अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।

ENMSS@3157@2हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः कथय सुकृती कोऽयं मुग्धे त्वयाद्य विलोक्यते ॥ ३१५७॥

ENMSS@3158@1अलसविलसन्मुग्धस्निग्धस्मितं व्रजसुन्दरीम् अदनकदनस्विन्नं धन्यं महद्वदनाम्बुजम् ।
ENMSS@3158@2तरुणमरुणज्योत्स्नाकार्त्स्न्यस्मितस्नपिताधरं जयति विजयश्रेणीमेणीदृशां मदयन्महः ॥ ३१५८॥
ENMSS@3159@1अलसविलसितानामुल्लसद्भ्रूलतानां मसृणमुकुलितानां प्रान्तविस्तारितानाम् ।
ENMSS@3159@2प्रतिनयननिपाते किंचिदाकुञ्चितानां विविधमहमभूवं पात्रमालोकितानाम् ॥ ३१५९॥
ENMSS@3160@1अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
ENMSS@3160@2अधनस्य कुतो मित्रम् अमित्रस्य कुतः सुखम् ॥ ३१६०॥
ENMSS@3161@1अलसस्याल्पदोषस्य निर्विद्यस्याकृतात्मनः ।
ENMSS@3161@2प्रदानकाले भवति मातापि हि पराङ्मुखी ॥ ३१६१॥
ENMSS@3162@1अलसानपि न् न् रक्षेन् न कृतघ्नान् कदाचन ।
ENMSS@3162@2द्विषतोऽपि गुणाः काम्याः सुहृदोऽपि न दुर्गुणाः ॥ ३१६२॥
ENMSS@3163@1अलसारुणलोचनारविन्दां परिभोगोचितधूसरैकचेलाम् ।
ENMSS@3163@2शिथिलाकुलवेणिबन्धरम्याम् अबलामन्तिकशायिनीं दिदृक्षे ॥ ३१६३॥
ENMSS@3164@1अलसैर्मदेन सुदृशः शरीरकैः स्वगृहान् प्रति प्रतिययुः शनैः शनैः ।
ENMSS@3164@2अलघुप्रसारितविलोचनाञ्जलि- द्रुतपीतमाधवरसौघनिर्भरैः ॥ ३१६४॥
ENMSS@3165@1अलसो मन्दबुद्धिश्च सुखी च व्याधिपीडितः ।
ENMSS@3165@2निद्रालुः कामुकश्चैव षडेते शास्त्रवर्जिताः ॥ ३१६५॥
ENMSS@3166@1अलाबुं वर्तुलाकारं वार्ताकं कुन्दसंनिभम् ।
ENMSS@3166@2प्राणान्तेऽपि न चाश्नीयान् मसूरान्नं सवल्कलम् ॥ ३१६६॥
ENMSS@3167@1अलाबुबीजं त्रपुसस्य बीजं तस्यैव तोयेन च तन्निषिक्तम् ।
ENMSS@3167@2आलेपनाद्यैर्विधिवत् प्रयुक्तं हन्याद्विषं तक्षकसंभवं च ॥ ३१६७॥
ENMSS@3168@1अलाभात् पुरुषाणां हि भयात् परिजनस्य च ।
ENMSS@3168@2वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः ॥ ३१६८॥
ENMSS@3169@1अलिकुलमञ्जुलकेशी परिमलबहुला रसावहा तन्वी ।
ENMSS@3169@2किशलयपेशलपाणिः कोकिलकलभाषिणी प्रियतमा मे ॥ ३१६९॥
ENMSS@3170@1अलिनीलालकलतं कं न हन्ति घनस्तनि ।
ENMSS@3170@2आननं नलिनच्छायनयनं शशिकान्ति ते ॥ ३१७०॥

ENMSS@3171@1अलिपटलैरनुयातां सहृदयहृदयज्वरं विलुम्पन्तीम् ।
ENMSS@3171@2मृगमदपरिमललहरीं समीर पामरपुरे किरसि ॥ ३१७१॥
ENMSS@3172@1अलिभिरञ्जनबिन्दुमनोहरैः कुसुमपङ्क्तिनिपातिभिरङ्कितः ।
ENMSS@3172@2न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलकः प्रमदामिव ॥ ३१७२॥
ENMSS@3173@1अलियुवा विललास चिराय यस्त्रिदशशैवलिनीकमलोदरे ।
ENMSS@3173@2विधिवियोगनियोगवशीकृतो गततरौ स मरौ रमते कथम् ॥ ३१७३॥
ENMSS@3174@1अलिरनुसरति परिमलं लक्ष्मीरनुसरति नयगुणसमृद्धिम् ।
ENMSS@3174@2निम्नमनुसरति सलिलं विधिलिखितं बुद्धिरनुसरति ॥ ३१७४॥
ENMSS@3175@1अलिरयं नलिनीदलमध्यगः कमलिनीमकरन्दमदालसः ।
ENMSS@3175@2विधिवशात् परदेशमुपागतः कुटजपुष्परसं बहु मन्यते ॥ ३१७५॥
ENMSS@3176@1अलिर्मृगो वा नेत्रं वा यत्र किंचिद् विभासते ।
ENMSS@3176@2अरविन्दं मृगाङ्को वा मुखं वेदं मृगीदृशः ॥ ३१७६॥
ENMSS@3177@1अलिवलयैरलकैरिव कुसुमस्तबकैः स्तनैरिव वसन्ते ।
ENMSS@3177@2भान्ति लता ललना इव पाणिभिरिव किसलयैः सपदि ॥ ३१७७॥
ENMSS@3178@1अलीक एव त्वद्भावो मद्भावोऽलीक एव च ।
ENMSS@3178@2अनुभूतोऽप्यसद्रूपः स्वप्ने स्वमरणं यथा ॥ ३१७८॥
ENMSS@3179@1अलीकरूपो यदि मध्यभागः पयोधराकारभृतश्च केशाः ।
ENMSS@3179@2उत्सङ्गशोभापि सरोरुहाक्ष्याः करस्य शोभां कलयेन्न कस्मात् ॥ ३१७९॥
ENMSS@3180@1अलीकव्यामुक्तप्रचुरकबरीबन्धनमिषाद्
उदञ्चद्दोर्वल्लीद्वयधृतपरीवेशनिहितः ।
ENMSS@3180@2अयं जृम्भारम्भस्फटिकशुचिदन्तांशुनिचयो मुखेन्दुर्गौराङ्ग्या
गलितमृगजक्ष्मा विजयते ॥ ३१८०॥
ENMSS@3181@1अलीनां मालाभिर्विरचितजटाभारमहिमा परागैः
पुष्पाणामुपरचितभस्मव्यतिकरः ।
ENMSS@3181@2वनानामाभोगे कुसुमवति पुष्पोच्चयपरो मरुन् मन्दं मन्दं विचरति
परिव्राजक इव ॥ ३१८१॥
ENMSS@3182@1अलुप्तसत्त्वकोशानां महत्त्वं महतां हि किम् ।
ENMSS@3182@2आकर्णितां परस्यार्तिं न चेच्छिन्दन्ति तत्क्षणम् ॥ ३१८२॥
ENMSS@3183@1अलुब्धैः सह सौहार्दं पण्डितैः सह संकथा ।
ENMSS@3183@2उत्तमैः सह सङ्गश्च विधेयाः सुखमिच्छता ॥ ३१८३॥

ENMSS@3184@1अलोभः परमं वित्तम् अहिंसा परमं तपः ।
ENMSS@3184@2अमाया परमा विद्या निरवद्या मनीषिणाम् ॥ ३१८४॥
ENMSS@3185@1अलोमशं पूर्णशशाङ्कशोभं मुखं तु यूनां कतिचिद् दिनानि ।
ENMSS@3185@2जाते ततः श्मश्रुविशालजाले शेवाललीनाब्जतुलां बिभर्ति ॥ ३१८५॥
ENMSS@3186@1अलौकिकमहालोकप्रकाशितजगत्रयः ।
ENMSS@3186@2स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान् ॥ ३१८६॥
ENMSS@3187@1अलौल्यमारोग्यमनिष्ठुरत्वं गन्धः शुभो मूत्रपुरीषमल्पम् ।
ENMSS@3187@2कान्तिः प्रसादः स्वरसौम्यता च योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥ ३१८७॥
ENMSS@3188@1अल्पं किंचिच्छ्रियं प्राप्य नीचो गर्वायते लघु ।
ENMSS@3188@2पद्मपत्रतले भेको मन्यते दण्डधारिणम् ॥ ३१८८॥
ENMSS@3189@1अल्पं दर्पबलं दैत्य स्थिरमक्रोधज बलम् ।
ENMSS@3189@2हतस्त्वं दर्पजैर्दोषैर्हित्वा यो भाषसे क्षमाम् ॥ ३१८९॥
ENMSS@3190@1अल्पं निर्मितमाकाशम् अनालोच्यैव वेधसा ।
ENMSS@3190@2इदमेवंविधं भावि भवत्याः स्तनजृम्भनम् ॥ ३१९०॥
ENMSS@3191@1अल्पतोऽधिकतः साध्यं लघुनैव प्रसाधयेत् ।
ENMSS@3191@2भूप्रदक्षिणतोऽहल्यां गौतमः कपिलां भ्रमन् ॥ ३१९१॥
ENMSS@3192@1अल्पतोयश्चलत्कुम्भो ह्यल्पदुग्धाश्च धेनवः ।
ENMSS@3192@2अल्पविद्यो महागर्वी कुरूपी बहुचेष्टितः ॥ ३१९२॥
ENMSS@3193@1अल्पप्रभोस्तु सेवायां भुक्तिमात्रं प्रयोजनम् ।
ENMSS@3193@2अनुग्रहमजामूल्यं निग्रहं प्राणसंकटम् ॥ ३१९३॥
ENMSS@3194@1अल्पमप्यवमन्येत न शत्रुर्बलदर्पितः ।
ENMSS@3194@2रामेण रामः शिशुना ब्राह्मण्यदययोज्झितः ॥ ३१९४॥
ENMSS@3195@1अल्पश्रुतलव एव प्रायः प्रकटयति वाग्विभवमुच्चैः ।
ENMSS@3195@2सर्वत्र कुनट एव हि नाटकमधिकं विडम्बयति ॥ ३१९५॥
ENMSS@3196@1अल्पसारोऽपि यो मोहाद् विस्तारं कर्तुमिच्छति ।
ENMSS@3196@2पश्चाच्छोचति दुर्बुद्धिर्नालिकेरबको यथा ॥ ३१९६॥
ENMSS@3197@1अल्पाक्षररमणीयं यः कथयति निश्चितं स खलु वाग्मी ।
ENMSS@3197@2बहुवचनमल्पसारं यः कथयति विप्रलापी सः ॥ ३१९७॥
ENMSS@3198@1अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
ENMSS@3198@2तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ ३१९८॥

ENMSS@3199@1अल्पापकारमपि पार्श्वगतं निहन्ति नीचो न दूरमसमागसमप्यरातिम् ।
ENMSS@3199@2श्वा निर्दशत्युपलमन्तिकमापतन्तं तत्त्यागिनं न तु विदूरगमुग्ररोषः ॥ ३१९९॥

ENMSS@3200@1अल्पायां वा महत्यां वा सेनायामिति निश्चयः ।
ENMSS@3200@2हर्षो योधगणस्यैको जयलक्षणमुच्यते ॥ ३२००॥

ENMSS@3201@1अल्पाश्च गुणाः स्फीता भवन्ति गुणसमुदितेषु पुरुषेषु ।
ENMSS@3201@2श्वेतगिरिशिखरकेष्विव निशासु चन्द्रांशवः पतिताः ॥ ३२०१॥

ENMSS@3202@1अल्पाश्रयं समासाद्य महानप्यल्पको भवेत् ।
ENMSS@3202@2गजेन्द्रः पर्वताकारो यथा दर्पणमाश्रितः ॥ ३२०२॥

ENMSS@3203@1अल्पीयःस्खलनेन यत्र पतनं कृच्छ्रेण यत्रोन्नतिर्द्वारि वेत्रलतावितानगहने कष्टः प्रवेशक्रमः ।
ENMSS@3203@2हे सारङ्ग मनोरमा वनभुवस्त्यक्त्वा विशेषार्थिना किं भूभृत्कटकस्थितिव्यसनिना व्यर्थं खुराः शातिताः ॥ ३२०३॥

ENMSS@3204@1अल्पीयसामेव निवासभूमि- त्यागाद्विपत्तिर्महतां न जातु ।
ENMSS@3204@2रत्नाकरात् सन्मणयोऽभियान्ति राज्ञां शिरः काकमुखानि भेकाः ॥ ३२०४॥

ENMSS@3205@1अल्पीयसैव पयसा यत्कुम्भः पूर्यते प्रसिद्धं तत् ।
ENMSS@3205@2ब्राह्मं तेजः पश्यत कुम्भोद्भूतः पपौ वार्धिम् ॥ ३२०५॥

ENMSS@3206@1अल्पेच्छुर्धृतिमान् प्राज्ञश्छायेवानुगतः सदा ।
ENMSS@3206@2आदिष्टो न विकल्पेत स राजवसतिं वसेत् ॥ ३२०६॥

ENMSS@3207@1अल्पेन विभवेनैव व्ययाधिक्यं न युक्तितः ।
ENMSS@3207@2क्षीणेन वाससाच्छन्ने पादविस्तारणं यथा ॥ ३२०७॥

ENMSS@3208@1अल्पेनापि सुरक्तेन साधनेन प्रयोजनम् ।
ENMSS@3208@2ओष्ठद्वयसहायेन कान्तास्येन जगज्जितम् ॥ ३२०८॥

ENMSS@3209@1अल्पेनैव गुणेन हि कश्चिल्लोके प्रसिद्धिमुपयाति ।
ENMSS@3209@2एकेन करेण गजः करी न सूर्यः सहस्रेण ॥ ३२०९॥

ENMSS@3210@1अल्पेऽपि नृपतिदत्ते प्रतिश्रुते वापि दातुमेतेन ।
ENMSS@3210@2उत्थायाशीर्देया क्वचिदुपविश्यापि परिषदौचित्यात् ॥ ३२१०॥

ENMSS@3211@1अल्पेऽप्यपकृते मोहान् न शान्तिमुपगच्छति ।
ENMSS@3211@2तादृशैः संगतं नीचैर्नृशंसैरकृतात्मभिः ।
ENMSS@3211@3निशाम्य निपुणं बुद्ध्या विद्वान् दूराद् विवर्जयेत् ॥ ३२११॥

ENMSS@3212@1अल्पे वयसि हे बाले कुचयोः पतनः कुतः ।
ENMSS@3212@2अधस्तात् खनने मूढ गिरयो न पतन्ति किम् ॥ ३२१२॥
ENMSS@3213@1अल्पोऽपि ह्यरिरत्यन्तं वर्धमानपराक्रमः ।
ENMSS@3213@2वल्मीको मूलज इव ग्रसते वृक्षमन्तिकात् ॥ ३२१३॥
ENMSS@3214@1अवंशपतितो राजा मूर्खपुत्रश्च पण्डितः ।
ENMSS@3214@2अधनी हि धनं प्राप्य तृणवन्मन्यते जगत् ॥ ३२१४॥
ENMSS@3215@1अवकाशः सुवृत्तानां हृदयान्तर्न योषिताम् ।
ENMSS@3215@2इतीव विहितौ धात्रा सुवृत्तौ तद्बहिः कुचौ ॥ ३२१५॥
ENMSS@3216@1अवकेशिनोऽस्य युक्तं जानामि तरोरशोक इति नाम ।
ENMSS@3216@2फलपाकविधुरितात्मा यतोऽन्यथासौ सशोकः स्यात् ॥ ३२१६॥
ENMSS@3217@1अवक्रस्तारकाधीशः परिपूर्णप्रियोदयः ।
ENMSS@3217@2प्राचीं दिशमतिक्रम्य पतनं प्रतिपद्यते ॥ ३२१७॥
ENMSS@3218@1अवक्रे मांसहीने च वाजिजङ्घे सुशोभने ।
ENMSS@3218@2कूर्चं समं सुसंधि स्याद् ग्रन्थिव्रणविवार्जितम् ॥ ३२१८॥
ENMSS@3219@1अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
ENMSS@3219@2स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥ ३२१९॥
ENMSS@3220@1अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः ।
ENMSS@3220@2बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति ॥ ३२२०॥
ENMSS@3221@1अवचनं वचनं प्रियसंनिधावनवलोकनमेव विलोकनम् ।
ENMSS@3221@2अवयवावरणं च यदञ्चल- व्यतिकरेण तदङ्गसमर्पणम् ॥ ३२२१॥
ENMSS@3222@1अवचयपरिभोगवन्ति हिंस्रैः सहचरितान्यमृगाणि काननानि ।
ENMSS@3222@2अभिदधुरभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः
॥ ३२२२॥
ENMSS@3223@1अवचितकुसुमा विहाय वल्लीर्युवतिषु कोमलमाल्यमालिनीषु ।
ENMSS@3223@2पदमुपदधिरे कुलान्यलीनां नपरिचयो मलिनात्मनां प्रधानम् ॥
३२२३॥
ENMSS@3224@1अवचितबलिपुष्पा वेदिसंमार्गदक्षा नियमविधिजलानां बर्हिषां चोपनेत्री
।
ENMSS@3224@2गिरिशमुपचचार प्रत्यहं सा सुकेशी नियमितपरिखेदा
तच्छिरश्चन्द्रपादैः ॥ ३२२४॥
ENMSS@3225@1अवजितमधुना तवाहमक्ष्णो रुचिरतयेत्यवनम्य लज्जयेव ।
ENMSS@3225@2श्रवणकुवलयं विलासवत्या भ्रमररुतैरुपकर्णमाचचक्षे ॥ ३२२५॥

ENMSS@3226@1अवज्ञया दीयते यत् तथैवाश्रद्धयापि च ।
ENMSS@3226@2तदाहुरधमं दानं मुनयः सत्यवादिनः ॥ ३२२६॥
ENMSS@3227@1अवज्ञया न दातव्यं कस्य चिल्लीलयापि वा ।
ENMSS@3227@2अवज्ञया कृतं हन्याद् दातारं नात्र संशयः ॥ ३२२७॥
ENMSS@3228@1अवज्ञया यदहसदुच्चकैर्बलः समुल्लसद्दशनमयूखमण्डलः ।
ENMSS@3228@2रुषारुणीकृतमपि तेन तत्क्षणं निजं वपुः पुनरनयन्निजां रुचिम् ॥ ३२२८॥
ENMSS@3229@1अवज्ञातोऽपि दुष्टेन गुणो दोषो न मन्यते ।
ENMSS@3229@2नहि चम्पकसौगन्ध्यं पूतिर्भृङ्गावहेलया ॥ ३२२९॥
ENMSS@3230@1अवज्ञानसहस्रैस्तु दोषाः कष्टतरा धने ।
ENMSS@3230@2धने सुखकला या च सापि दुःखैर्विधीयते ॥ ३२३०॥
ENMSS@3231@1अवज्ञास्फुटितं प्रेम समीकर्तुं क ईश्वरः ।
ENMSS@3231@2संधिं न याति स्फुटितं लाक्षालेपेन मौक्तिकम् ॥ ३२३१॥
ENMSS@3232@1अवतारा ह्यसंखेया हरेः सत्त्वनिधेर्द्विजाः ।
ENMSS@3232@2यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ ३२३२॥
ENMSS@3233@1अवति निखिललोकं यः पितेवादृतात्मा दहति दुरितराशिं पावको वेन्धनौकम् ।
ENMSS@3233@2वितरति शिवसौख्यं हन्ति संसारशत्रुं विदधतु शुभबुद्ध्या तं बुधा धर्ममत्र ॥ ३२३३॥
ENMSS@3234@1अवतु वः सवितुस्तुरगावली स्फुरति मध्यगतारुणनायका ।
ENMSS@3234@2समभिलम्बिततुङ्गपयोधरा मरकतैकलतेव नभःश्रियः ॥ ३२३४॥
ENMSS@3235@1अवद्यजम्बालगवेषणाय कृतोद्यमानां खलसैरिभाणाम् ।
ENMSS@3235@2कवीन्द्रवाङ्निर्जरनिर्झरिण्यां संजायते व्यर्थमनोरथत्वम् ॥ ३२३५॥
ENMSS@3236@1अवद्यमुक्ते पथि यः प्रवर्तते प्रवर्तयत्यन्यजनं च निःस्पृहः ।
ENMSS@3236@2स सेवितव्यः स्वहितैषिणा गुरुः स्वयं तरंस्तारयितुं क्षमः परम् ॥ ३२३६॥
ENMSS@3237@1अवधानेन मौनेन काषायेण जटाजिनैः ।
ENMSS@3237@2विश्वासयित्वा द्वेष्टारम् अवलुम्पेद् यथा वृकः ॥ ३२३७॥
ENMSS@3238@1अवधारय धर्मेषु प्रधानमवधानतः ।
ENMSS@3238@2निर्भरानन्दकन्दाय गोविन्दाय मनोऽर्पय ॥ ३२३८॥
ENMSS@3239@1अवधार्य कार्यगुरुतामभवन् न भयाय सान्द्रतमसंतमसम् ।

ENMSS@3239@2सुतनोः स्तनौ च दयितोपगमे तनुरोमराजिपथवेपथवे ॥ ३२३९॥
ENMSS@3240@1अवधिदिनावधिजीवाः प्रसीद जीवन्तु पथिकजनजायाः ।
ENMSS@3240@2दुर्लङ्घ्यवर्त्मशैलौ स्तनौ पिधेहि प्रपापालि ॥ ३२४०॥
ENMSS@3241@1अवधिदिवसः प्राप्तश्चायं तनोर्विरहस्य वा रविरयमुपैत्यस्तं सख्यो ममापि च जीवितम् ।
ENMSS@3241@2तदलमफलैराशाबन्धैः प्रसीद नमोऽस्तु ते हृदय सहसा पाकोत्पीडं विडम्बय दाडिमम् ॥ ३२४१॥
ENMSS@3242@1अवधिदिवसः सोऽयं नात्रागतः किमियत् क्षणं वितर नयने पश्यैतन्मे पुरः सखि साहसम् ।
ENMSS@3242@2इयमियमहं रूढज्वालाकरालितरोदसीं मलयजरसाभ्यक्तैरङ्गैः पताम्यभि कौमुदीम् ॥ ३२४२॥
ENMSS@3243@1अवधीरणां कृतवती भवती मयि यत्कुकर्ममहिमा स हि मे ।
ENMSS@3243@2यदि चातको न लभतेऽम्बु घनाद् वचनीयता भवति काम्बुमुचः ॥ ३२४३॥
ENMSS@3244@1अवधीरय धनविकलं कुरु गौरवमकृशसंपदः पुंसः ।
ENMSS@3244@2अस्मादृशं हि मुग्धे धनसिद्धै रूपनिर्माणम् ॥ ३२४४॥
ENMSS@3245@1अवधूतप्रणिपाताः पश्चात् संतप्यमानमनसोऽपि ।
ENMSS@3245@2निभृतैर्व्यपत्रपन्ते दयितानुनयैर्मनस्विन्यः ॥ ३२४५॥
ENMSS@3246@1अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम् ।
ENMSS@3246@2अन्योन्यस्यापि जिह्रीमः किं पुनः सहवासिनाम् ॥ ३२४६॥
ENMSS@3247@1अवधेहि क्षणमेहि भ्रातर्भाविज्ञ भावय गिरं नः ।
ENMSS@3247@2चरमे चकास्ति चेतसि मूकस्वप्नोपमो भावः ॥ ३२४७॥
ENMSS@3248@1अवधौ दिवसावसानकाले भवनद्वारि विलोचने दधाना ।
ENMSS@3248@2अवलोक्य समागतं तदा माम् अथ रामा विकसन्मुखी बभूव ॥ ३२४८॥
ENMSS@3249@1अवध्यं वाथवागम्यम् अकृत्यं नास्ति किंचन ।
ENMSS@3249@2लोके बुद्धिमतामत्र तस्मात्तां योजयाम्यहम् ॥ ३२४९॥
ENMSS@3250@1अवध्या ब्राह्मणा गावो स्त्रियो बालाश्च ज्ञातयः ।
ENMSS@3250@2येषां चान्नानि भुञ्जीत ये च स्युः शरणागताः ॥ ३२५०॥
ENMSS@3251@1अवध्यैरिन्दुपादानाम् असाध्यैश्चन्दनाम्भसाम् ।
ENMSS@3251@2देहोष्मभिः सुबोधं ते सखि कामातुरं मनः ॥ ३२५१॥
ENMSS@3252@1अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगभाक् ।

ENMSS@3252@2येषां चान्नानि भुक्तानि ये च स्युः शरणं गताः ॥ ३२५२॥

ENMSS@3253@1अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगभाक् ।

ENMSS@3253@2विहिता व्यङ्गिता तेषाम् अपराधे गरीयसि ॥ ३२५३॥

ENMSS@3254@1अवनतवदनेन्दुरिच्छतीव व्यवधिमधीरतया यदस्थितास्मै ।

ENMSS@3254@2अहरत सुतरामतोऽस्य चेतः स्फुटमभिभूषयति स्त्रियस्त्रपैव ॥ ३२५४॥

ENMSS@3255@1अवनतशिरसः प्रयाम शीघ्रं पथि वृषभा इव वर्षताडिताक्षाः ।

ENMSS@3255@2मम हि सदसि गौरवप्रियस्य कुलजनदर्शनकातरं हि चक्षुः ॥ ३२५५॥

ENMSS@3256@1अवनम्य वक्षसि निमग्नकुच- द्वितयेन गाढमुपगूढवता ।

ENMSS@3256@2दयितेन तत्क्षणचलद्रशना- कलकिंकिणीरवमुदासि वधूः ॥ ३२५६॥

ENMSS@3257@1अवनौ शनैः शनैस्त्वं निदधासि पदद्वयं स्वस्य ।

ENMSS@3257@2लक्ष्यं पश्यसि न वदसि भजसि जलं बक ततोऽसि सितः ॥ ३२५७॥

ENMSS@3258@1अवन्तिः काव्यमानर्च भर्चोर्मौखरिशेखरः (?) ।

ENMSS@3258@2शिष्यो बाणश्च संक्रान्तकान्तवेद्यवचाः कविः ॥ ३२५८॥

ENMSS@3259@1अवन्तिनाथोऽयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः ।

ENMSS@3259@2आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ॥ ३२५९॥

ENMSS@3260@1अवन्ति ये जनकसमा मुनीश्वराश्चतुर्विधं गणमनवद्यवृत्तयः ।

ENMSS@3260@2स्वदेहवद्दलितमदाष्टकारयो भवन्तु ते मम गुरवो भवान्तकाः ॥ ३२६०॥

ENMSS@3261@1अवन्ध्यं दिवसं कुर्याद् धर्मतः कामतोऽर्थतः ।

ENMSS@3261@2गते हि दिवसे तस्मिंस्तदूनं तस्य जीवितम् ॥ ३२६१॥

ENMSS@3262@1अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।

ENMSS@3262@2अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ ३२६२॥

ENMSS@3263@1अवमानहतं यच्च दत्तमश्रद्धया धनम् ।

ENMSS@3263@2ऊषरे निष्फलं बीजं क्षिप्तमक्षिप्तमेव तत् ॥ ३२६३॥

ENMSS@3264@1अवमानारणिमथितं दुर्वागिन्धनविवर्धितज्वालम् ।

ENMSS@3264@2सत्पुरुषाः कोपाग्निं ज्ञानाम्बुघटैः प्रशमयन्ति ॥ ३२६४॥

ENMSS@3265@1अवमानेन महतां प्रहर्षक्रोधविस्मयैः ।

ENMSS@3265@2तपांसि क्षयमायान्ति यशांसीव सुदुर्नयैः ॥ ३२६५॥

ENMSS@3266@1अवमुक्तमपक्रान्तमुख्यं तन्न क्षमं युधि ।

ENMSS@3266@2पितृपैतामहं मौलं तत् क्रुद्धं सान्त्वितं क्षमम् ॥ ३२६६॥

ENMSS@3267@1अवयः केवलकवयः कीराः स्युः केवलं धीराः ।

ENMSS@3267@2वीराः पण्डितकवयस्तानवमन्ता तु केवलं गवयः ॥ ३२६७॥

ENMSS@3268@1अवयवेषु परस्परबिंबितेष्वतुलनिर्मलकान्तिषु तत्तनोः ।

ENMSS@3268@2अयमयं प्रविभाग इति स्फुटं जगति निश्चिनुते चतुरोऽपि कः ॥ ३२६८॥

ENMSS@3269@1अवलम्बितविष्णुपदः कर्षितजनचक्षुरतुलगतिः ।

ENMSS@3269@2पत्रमयोऽपि पदार्थः पतङ्गतामेति गुणयोगात् ॥ ३२६९॥

ENMSS@3270@1अवलिप्तेषु मूर्खेषु रौद्रसाहसिकेषु च ।

ENMSS@3270@2तथैवापेतधर्मेषु न मैत्रीमाचरेद् बुधः ॥ ३२७०॥

ENMSS@3271@1अवलेपमनङ्गस्य वर्धयन्ति बलाहकाः ।

ENMSS@3271@2कर्शयन्ति तु धर्मस्य मारुतोद्धूतशीकराः ॥ ३२७१॥

ENMSS@3272@1अवलोकनमपि सुखयति कुवलयदलचारुचपलनयनायाः ।

ENMSS@3272@2किं पुनरलकचलद्युति- सरभसमालिङ्गनं तन्व्याः ॥ ३२७२॥

ENMSS@3273@1अवलोकितमनुमोदित- मालिङ्गितमङ्गनाभिरनुरागैः ।

ENMSS@3273@2अधिवृन्दावनकुञ्जं मरकतपुञ्जं नमस्यामः ॥ ३२७३॥

ENMSS@3274@1अवलोक्य नर्तितशिखण्डिमण्डलैर्नवनीरदैर्निचुलितं नभस्तलम् ।

ENMSS@3274@2दिवसेऽपि वञ्जुलनिकुञ्जमित्वरी विशति स्म वल्लभवतंसितं रसात् ॥ ३२७४॥

ENMSS@3275@1अवलोक्य स्तनौ वध्वा गुञ्जाफलविभूषितौ ।

ENMSS@3275@2निःश्वस्य रोदिति क्लिष्टा कुतो व्याधकटुम्बिनी ॥ ३२७५॥

ENMSS@3276@1अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया ।

ENMSS@3276@2दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ ३२७६॥

ENMSS@3277@1अवश्यं कोपाग्निस्तव सुतनु निर्वास्यति चिरात् स्वशोभामारूढं मुखमपि

च ते हास्यति शुचम् ।

ENMSS@3277@2भवद्गोष्ठीशून्या मम तु दिवसा यान्ति य इमे न तेषामावृत्तिः पुनरपि मनो दूयत इति ॥ ३२७७॥

ENMSS@3278@1अवश्यं निधनं सर्वैर्गन्तव्यमिह मानवैः ।

ENMSS@3278@2अवश्यभाविन्यर्थे वै संतापो नेह विद्यते ॥ ३२७८॥

ENMSS@3279@1अवश्यं पितुराचारं पुत्रः समनुवर्तते ।

ENMSS@3279@2नहि केतकवृक्षस्य भवत्यामलकीफलम् ॥ ३२७९॥

ENMSS@3280@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@3280@2अवश्यं प्राणिनां प्राणा रक्षितव्या यथाबलम् ॥ ३२८०॥
ENMSS@3281@1अवश्यं भाविनं नाशं भावित्वाद् विध्युपस्थितम् ।
ENMSS@3281@2अयमेव हि ते कालः पूर्वमासीदनागतः ॥ ३२८१॥
ENMSS@3282@1अवश्यं भाविनो भावा भवन्ति महातमपि ।
ENMSS@3282@2नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ ३२८२॥
ENMSS@3283@1अवश्यंभाविभावानां प्रतीकारो भवेद् यद ।
ENMSS@3283@2तदा दुःखैर्न बाध्यन्ते नलरामयुधिष्ठिराः ॥ ३२८३॥
ENMSS@3284@1अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत् स्वममून् ।
ENMSS@3284@2व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥ ३२८४॥
ENMSS@3285@1अवश्यं लभते कर्ता फलं पापस्य कर्मणः ।
ENMSS@3285@2घोरं पर्यागते काले द्रुमः पुष्पमिवार्तवम् ॥ ३२८५॥
ENMSS@3286@1अवश्यकारणैः प्राणान् धारयत्येव चातकः ।
ENMSS@3286@2प्रार्थनाभङ्गभीतोऽपि शक्रादपि न याचते ॥ ३२८६॥
ENMSS@3287@1अवश्यगत्वरैः प्राणैर्मृत्युकाले महात्मनाम् ।
ENMSS@3287@2परोपकारश्चेत् कश्चित् सिध्येत् तदमृतं मृतम् ॥ ३२८७॥
ENMSS@3288@1अवश्यनिष्पत्तिमहाफलाढ्याम् अदीर्घसूत्रां परिणामकल्याम् ।
ENMSS@3288@2कामं व्ययायासकरीमुपेयान् न त्वेव जातु क्षयदोषयुक्ताम् ॥ ३२८८॥
ENMSS@3289@1अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा ।
ENMSS@3289@2तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना ॥ ३२८९॥
ENMSS@3290@1अवश्यमायान्ति वशं विपश्चिताम् उपायसंदंशबलेन संपदः ।
ENMSS@3290@2भवत्युदारं विधिवत् प्रयोजिते फलं हि राज्ञां क्वचिदर्थसिद्धये ॥ ३२९०॥
ENMSS@3291@1अवश्यमिन्द्रियैस्तात वर्तितव्यं स्वगोचरे ।
ENMSS@3291@2चण्डरागस्तु यस्तत्र तं बुधः परिवर्जयेत् ॥ ३२९१॥
ENMSS@3292@1अवश्यमेव भोक्तव्यं कर्मणां त्वक्षयं फलम् ।
ENMSS@3292@2नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ ३२९२॥
ENMSS@3293@1अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
ENMSS@3293@2कृतकर्मक्षयो नास्ति कल्पकोटिशतैरपि ॥ ३२९३॥

ENMSS@3294@1अवश्यायकणैः प्राणान् संधारयति तित्तिरिः ।
ENMSS@3294@2याञ्चाभङ्गभयाद् भीतो न दैवमपि याचते ॥ ३२९४॥
ENMSS@3295@1अवसरपठितं सर्वं सुभाषितत्वं प्रयाति यत् किंचित् ।
ENMSS@3295@2चाषः प्रयाणसमये खरनिनदो मङ्गलो भवति ॥ ३२९५॥
ENMSS@3296@1अवसरपठितं सर्वं सुभाषितत्वं प्रयात्यसूक्तमपि ।
ENMSS@3296@2क्षुधि कदशनमपि नितरां भोक्तुः संपद्यते स्वादु ॥ ३२९६॥
ENMSS@3297@1अवसरपठिता वाणी गुणगणरहितापि शोभते पुंसाम् ।
ENMSS@3297@2रतिसमये रमणीनां भूषणहानिस्तु भूषणं भवति ॥ ३२९७॥
ENMSS@3298@1अवसरमधिगम्य तं हरन्त्यो हृदयमयत्नकृतोज्ज्वलस्वरूपाः ।
ENMSS@3298@2अवनिषु पदमङ्गनास्तदानीं न्यदधत विभ्रमसंपदोऽङ्गनासु ॥ ३२९८॥
ENMSS@3299@1अवसितं हसितं प्रसितं मुदा विलसितं ह्वसितं स्मरभासितम् ।
ENMSS@3299@2न समदाः प्रमदा हतसंमदाः पुरहितं विहितं न समीहितम् ॥ ३२९९॥
ENMSS@3300@1अवस्कन्दप्रदानस्य सर्वे कालाः प्रकीर्तिताः ।
ENMSS@3300@2व्यसने वर्तमानस्य शत्रोच्छिद्रान्वितस्य च ॥ ३३००॥
ENMSS@3301@1अवस्कन्दभयाद् राजा प्रजागरकृतश्रमम् ।
ENMSS@3301@2दिवासुप्तं सदा हन्यान् निद्राव्याकुलसैनिकम् ॥ ३३०१॥
ENMSS@3302@1अवस्था पूज्यते राजन् न शरीरं शरीरिणाम् ।
ENMSS@3302@2तदा वनचरो राम इदानीं नृपतां गतः ॥ ३३०२॥
ENMSS@3303@1अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः ।
ENMSS@3303@2पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ ३३०३॥
ENMSS@3304@1अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं पतेत् ।
ENMSS@3304@2यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्मनिश्चये ॥ ३३०४॥
ENMSS@3305@1अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः ।
ENMSS@3305@2निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३३०५॥
ENMSS@3306@1अवाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।
ENMSS@3306@2असंवरे शम्बरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ॥ ३३०६॥
ENMSS@3307@1अवापुस्तापमत्यर्थं शफर्यः पल्वलोदके ।
ENMSS@3307@2पुत्रक्षेत्रादिसक्तेन ममत्वेन यथा गृही ॥ ३३०७॥
ENMSS@3308@1अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।

ENMSS@3308@2अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥ ३३०८॥

ENMSS@3309@1अवाप्तैर्द्राघिम्णा परिचयमुदन्वत्तटभुवाम् असौ भाति श्यामद्युतिभिरुदकैर्मेखलभुवः ।

ENMSS@3309@2अगस्त्यस्याकार्षीद् वचनमिति कोपादुदधिना गृहीतः केशेषु प्रसभमिव विन्ध्यक्षितिधरः ॥ ३३०९॥

ENMSS@3310@1अवाप्यते वा किमियद्भवत्या चित्तैकपद्यामपि विद्यते यः ।

ENMSS@3310@2यत्रान्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ॥ ३३१०॥

ENMSS@3311@1अवाप्यान् कामयस्वार्थान् नानवाप्यान् कदाचन ।

ENMSS@3311@2प्रत्युत्पन्नाननुभवन् मा शुचस्त्वमनागतान् ॥ ३३११॥

ENMSS@3312@1अवामभागेन यदा वलित्वा श्वा पृष्ठकण्डूतिमपाकरोति ।

ENMSS@3312@2तदह्नि तत्रैव कृतान्तगेहे रोगाभिभूतो नियतं प्रयाति ॥ ३३१२॥

ENMSS@3313@1अवालुकाश्लक्ष्णमृदा पूरिते गर्तशोधनम् ।

ENMSS@3313@2कोदण्डार्धमिते खाते जलसिक्ते वपेत्तरुम् ।

ENMSS@3313@3कदलीक्षीरिणौ रोप्यौ मूले दत्त्वा तु गोमयम् ॥ ३३१३॥

ENMSS@3314@1अवाहिता विनश्यन्ति सर्वकर्मक्षमा अपि ।

ENMSS@3314@2कृशा व्याधिपरीताङ्गा जायन्तेऽत्यन्तवाहनात् ॥ ३३१४॥

ENMSS@3315@1अविकारिणमपि सज्जनम् अनिशमनार्यः प्रबाधतेऽत्यर्थम् ।

ENMSS@3315@2कमलिन्या किमिह कृतं हिमस्य यत्तां सदा दहति ॥ ३३१५॥

ENMSS@3316@1अविकृतकृतभौमरवा सुस्थानस्था सुचेष्टिता वामे ।

ENMSS@3316@2यात्रासु दृष्टमात्रा दुर्गा दुर्गाणि तारयति ॥ ३३१६॥

ENMSS@3317@1अविक्रियां चैव समाश्रिताः समं हरन्ति जालं मम पक्षिणो ह्यमी ।

ENMSS@3317@2विवादमेष्यन्ति परस्परं यदा समागमिष्यन्ति च मद्वशं तदा ॥ ३३१७॥

ENMSS@3318@1अविक्रेयं लवणं पक्वमन्नं दधि क्षीरं मधु तैलं घृतं च ।

ENMSS@3318@2तिला मांसं मूलफलानि शाकं रक्तं वासः सर्वगन्धा गुडश्च ॥ ३३१८॥

ENMSS@3319@1अविग्रहस्याप्यतुलेन हेतुना समेतभिन्नद्वयमूर्ति तिष्ठतः ।

ENMSS@3319@2तवैव नान्यस्य जगत्सु दृश्यते विरुद्धवेषाभरणस्य कान्तता ॥ ३३१९॥

ENMSS@3320@1अविचारयतो युक्तिकथनं तुषखण्डनम् ।

ENMSS@3320@2नीचेषूपकृतं राजन् बालुकास्विव मूत्रितम् ॥ ३३२०॥

ENMSS@3321@1अविचारेण यत् कर्म कृतं तन्मर्मकृन्तनम् ।

ENMSS@3321@2प्रसह्य सीताहरणाद् अतीता रावणश्रियः ॥ ३३२१॥

ENMSS@3322@1अविजित्य य आत्मानम् अमात्यान् विजिगीषते ।

ENMSS@3322@2अमित्रान् वाजितामात्यः सोऽवशः परिहीयते ॥ ३३२२॥

ENMSS@3323@1अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि ।

ENMSS@3323@2व्रजत्यफलतामेव नयद्रुह इवेहितम् ॥ ३३२३॥

ENMSS@3324@1अविज्ञातप्रयुक्तेन धर्षिता मम वाससा ।

ENMSS@3324@2संवृता शरदभ्रेण चन्द्रलेखेव शोभते ॥ ३३२४॥

ENMSS@3325@1अविज्ञातविशेषस्य सर्वतेजोऽपहारिणः ।

ENMSS@3325@2स्वामिनो निर्विवेकस्य तमसश्च किमन्तरम् ॥ ३३२५॥

ENMSS@3326@1अविज्ञातस्य विज्ञानं विज्ञातस्य च निश्चयः ।

ENMSS@3326@2आरम्भः कर्मणां शश्वद् आरब्धस्यान्तदर्शनम् ॥ ३३२६॥

ENMSS@3327@1अविज्ञातस्य विज्ञानं विज्ञातस्य विनिश्चयः ।

ENMSS@3327@2अर्थद्वैधस्य संदेहच्छेदनं शेषदर्शनम् ॥ ३३२७॥

ENMSS@3328@1अविज्ञातावसक्तेन दूषिता मम वाससा ।

ENMSS@3328@2छादिता शरदभ्रेण चन्द्रलेखेव दृश्यते ॥ ३३२८॥

ENMSS@3329@1अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला ।

ENMSS@3329@2विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला ॥ ३३२९॥

ENMSS@3330@1अविज्ञातो धृतः खड्गः शुभसंपत्तिनाशकः ।

ENMSS@3330@2विज्ञातः सकलैश्वर्यदायको भवति प्रभोः ।

ENMSS@3330@3तस्मात् तेषां गुणान् वक्ष्ये यथोक्तं मुनिपुंगवैः ॥ ३३३०॥

ENMSS@3331@1अविज्ञानाद् राज्ञो भवति मतिहीनः परिजनस्ततस्तत्प्राधान्याद् भवति न

समीपे बुधजनः ।

ENMSS@3331@2बुधैस्त्यक्ते राज्ये भवति हि न नीतिर्गुणवती प्रनष्टायां नीतौ

सनृपमवशं नश्यति कुलम् ॥ ३३३१॥

ENMSS@3332@1अविज्ञाय फलं यो हि कर्म त्वेवानुधावति ।

ENMSS@3332@2स शोचेत् फलवेलायां यथा किंशुकसेचकः ॥ ३३३२॥

ENMSS@3333@1अविज्ञायान्यसामर्थ्यं स्वसामर्थ्यं प्रदर्शयेत् ।

ENMSS@3333@2उपहासमवाप्नोति तथैवायमिहाचलः ॥ ३३३३॥

ENMSS@3334@1अवितथमनोरथपथ- प्रथनेषु प्रगुणगरिमगीतश्रीः ।

ENMSS@3334@2सुरतरुसदृशः स भवान् अभिलषणीयः क्षितीश्वर न कस्य ॥ ३३३४॥

ENMSS@3335@1अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति ।

ENMSS@3335@2अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसंपदः ॥ ३३३५॥

ENMSS@3336@1अविदग्धः पतिः स्त्रीणां प्रौढाणां नायको गुणी ।

ENMSS@3336@2गुणिनां त्यागिनां स्तोको विभवश्चेति दुःखकृत् ॥ ३३३६॥

ENMSS@3337@1अविदग्धः श्रमकठिनो दुर्लभयोषिद्युवा जडो विप्रः ।

ENMSS@3337@2अपमृत्युरुपक्रान्तः कामिव्याजेन मे रात्रौ ॥ ३३३७॥

ENMSS@3338@1अविदितगुणान्तराणां नो दोषः प्राप्तदेशवासानाम् ।

ENMSS@3338@2स्वाधीनकुङ्कुमा अपि यद्विदधति बहुमतिं नीले ॥ ३३३८॥

ENMSS@3339@1अविदितगुणापि सत्कवि- भणितिः कर्णेषु वमति मधुधाराम् ।

ENMSS@3339@2अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥ ३३३९॥

ENMSS@3340@1अविदितपरमानन्दो वदति जनो विषयमेव रमणीयम् ।

ENMSS@3340@2तिलतैलमेव मिष्टं येन न दृष्टं घृतं क्वापि ॥ ३३४०॥

ENMSS@3341@1अविदितपरवेदनो मनोभूर्ध्रुवमयमेवमनङ्ग एव नित्यम् ।

ENMSS@3341@2यदि पुनरभविष्यदस्य चाङ्गं न खलु तदा व्यथयिष्यदन्यदेहम् ॥ ३३४१॥

ENMSS@3342@1अविदितशषसविशेषा वाणी निःसरति वक्रतो येषाम् ।

ENMSS@3342@2गुदवदनविवरभेदो रदनैरनुमीयते तेषाम् ॥ ३३४२॥

ENMSS@3343@1अविदितसुखदुःखं निर्गुणं वस्तु किंचिज्जडमतिरिह कश्चिन् मोक्ष इत्याचचक्षे ।

ENMSS@3343@2मम तु मतमनङ्गस्मेरतारुण्यघूर्णन् मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥ ३३४३॥

ENMSS@3344@1अविदित्वात्मनः शक्तिं परस्य न समुत्सुकः ।

ENMSS@3344@2गच्छन्नभिमुखो वह्नौ नाशं याति पतङ्गवत् ॥ ३३४४॥

ENMSS@3345@1अविद्यं जीवनं शून्यं दिक्शून्या चेदबान्धवा ।

ENMSS@3345@2पुत्रहीनं गृहं शून्यं सर्वशून्या दरिद्रता ॥ ३३४५॥

ENMSS@3346@1अविद्यः पुरुषः शोच्यः शोच्यं मिथुनमप्रजम् ।

ENMSS@3346@2निराहाराः प्रजाः शोच्याः शोच्यं राष्ट्रमराजकम् ॥ ३३४६॥

ENMSS@3347@1अविद्याकामकर्मादिपाशबन्धं विमोचितुम् ।

ENMSS@3347@2कः शक्नुयाद् विनात्मानं कल्पकोटिशतैरपि ॥ ३३४७॥

ENMSS@3348@1अविद्यानाशिनी विद्या भावना भवनाशिनी ।
ENMSS@3348@2दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम् ॥ ३३४८॥
ENMSS@3349@1अविद्याबीजविध्वंसाद् अयमार्षेण चक्षुषा ।
ENMSS@3349@2कालौ भूतभविष्यन्तौ वर्तमानमवीविशत् ॥ ३३४९॥
ENMSS@3350@1अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् ।
ENMSS@3350@2प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ ३३५०॥
ENMSS@3351@1अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
ENMSS@3351@2प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥ ३३५१॥
ENMSS@3352@1अविद्वानपि भूपालो विद्यावृद्धोपसेवया ।
ENMSS@3352@2परां श्रियमवाप्नोतिजलासन्नतरुर्यथा ॥ ३३५२॥
ENMSS@3353@1अविधेये जने पुंसां कोपः किमुपजायते ।
ENMSS@3353@2विधेयेऽपि च कः कोपस्तन्निवेशितजीविते ॥ ३३५३॥
ENMSS@3354@1अविधेयो भृत्यजनः शठानि मित्राण्यदायकः स्वामी ।
ENMSS@3354@2विनयरहिता च भार्या मस्तकशूलानि चत्वारि ॥ ३३५४॥
ENMSS@3355@1अविनयभुवामज्ञानानां शमाय भवन्नपि प्रकृतिकुटिलाद्विद्याभ्यासः खलत्वविवृद्धये ।
ENMSS@3355@2फणिभयभृतामस्तूच्छेदक्षमस्तमसामसौ विषधरफणारत्नालोको भयं तु भृशायते ॥ ३३५५॥
ENMSS@3356@1अविनयरतमादराद्दते वशमवशं हि नयन्ति विद्विषः ।
ENMSS@3356@2श्रुतविनयनिधिं समाश्रितस्तनुरपि नैति पराभवं क्वचित् ॥ ३३५६॥
ENMSS@3357@1अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
ENMSS@3357@2विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥ ३३५७॥
ENMSS@3358@1अविनाशिनमग्राम्यम् अकरोत् सातवाहनः ।
ENMSS@3358@2विशुद्धजातिभिः कोशं रत्नैरिव सुभाषितैः ॥ ३३५८॥
ENMSS@3359@1अविनीतः सुतो जातः कथं न दहनात्मकः ।
ENMSS@3359@2विनीतस्तु सुतो जातः कथं न पुरुषोत्तमः ॥ ३३५९॥
ENMSS@3360@1अविनीतस्य या विद्या सा चिरं नैव तिष्ठति ।
ENMSS@3360@2मर्कटस्य गले बद्धा मणीनां मालिका यथा ॥ ३३६०॥
ENMSS@3361@1अविनीतो भृत्यजनो नृपतिरदाता शठानि मित्राणि ।
ENMSS@3361@2अविनयवती च भार्या मस्तकशूलानि चत्वारि ॥ ३३६१॥
ENMSS@3362@1अविभावितेषुविषयः प्रथमं मदनोऽपि नूनमभवत् तमसा ।

ENMSS@3362@2उदिते दिशः प्रकटयत्यमुना यदधर्मधाम्नि धनुराचकृषे ॥ ३३६२॥

ENMSS@3363@1अविभाव्यतारकमदृष्टहिम- द्युतिबिम्बमस्तमितभानु नभः ।

ENMSS@3363@2अवसन्नतापमतमिस्रमभाद् अपदोषतैव विगुणस्य गुणः ॥ ३३६३॥

ENMSS@3364@1अविभ्रमालोकनदुर्भगाणि प्रव्यक्तवक्रस्तनमण्डलानि ।

ENMSS@3364@2अङ्गानि रे पामरकामिनीनाम् अपुण्यतारुण्य किमाश्रितानि ॥ ३३६४॥

ENMSS@3365@1अविमृष्यमेतदभिलष्यति स द्विषतां वधेन विषयाभिरतिम् ।

ENMSS@3365@2भववीतये नहि तथा स विधिः क्व शरासनं क्व च विमुक्तिपथः ॥ ३३६५॥

ENMSS@3366@1अविरतं परकार्यकृतां सतां मधुरिमातिशयेन वचोऽमृतम् ।

ENMSS@3366@2अपि च मानसमम्बुनिधिर्यशो विमलशारदचन्दिरचन्द्रिका ॥ ३३६६॥

ENMSS@3367@1अविरतकुसुमावचायखेदान् निहितभुजालतयैकयोपकण्ठम् ।

ENMSS@3367@2विपुलतरनिरन्तरावलग्न- स्तनपिहितप्रियवक्षसा ललम्बे ॥ ३३६७॥

ENMSS@3368@1अविरततरुणीसहस्रमध्य- स्थितिविगलत्पुरुषव्रता इवैते ।

ENMSS@3368@2प्रतिपदमतिकातराः क्षितीशाः परिकलयन्ति भयं समन्ततोऽपि ॥ ३३६८॥

ENMSS@3369@1अविरतमक्लममुद्धृत- धरातलं सुस्मितोल्लसद्वदनम् ।

ENMSS@3369@2जगदानन्दविधायिनम् उपैमि शरणं प्रभुं शेषम् ॥ ३३६९॥

ENMSS@3370@1अविरतमधुपानागारमिन्दिन्दिराणाम् अभिसरणनिकुञ्जं राजहंसीकुलस्य ।

ENMSS@3370@2प्रविततबहुशालं सद्म पद्मालयाया वितरति रतिमक्ष्णोरेष लीलातडागः ॥ ३३७०॥

ENMSS@3371@1अविरतमिदमम्भः स्वेच्छयोच्चालयन्त्या विकचकमलकान्तोत्तानपाणिद्वयेन ।

ENMSS@3371@2परिकलित इवार्घ्यः कामबाणातिथिभ्यः सलिलमिव वितीर्णं बाललीलासुखानाम् ॥ ३३७१॥

ENMSS@3372@1अविरतरतलीलायासजातश्रमाणाम् उपशममुपयान्तं निःसहेऽङ्गेऽङ्गनानाम् ।

ENMSS@3372@2पुनरुषसि विविक्तैर्मातरिश्वावचूर्य ज्वलयति मदनाग्निं मालतीनां रजोभिः ॥ ३३७२॥

ENMSS@3373@1अविरतविरुतकपोतीम् अर्पितरसमावृणोति घनवलनः ।

ENMSS@3373@2नवलतिकामतिकातर- तरलितमदिरद्वयीं मुदिरः ॥ ३३७३॥

ENMSS@3374@1अविरताम्बुजसंगतिसंगलद्- बहलकेसरसंवलितेव या ।

ENMSS@3374@2ललितवस्तुविधानसुखोल्लसत्- तनुरुहा तनुरात्मभुवोऽवतात् ॥ ३३७४॥

ENMSS@3375@1अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।

ENMSS@3375@2रम्योऽयमेति संप्रति लोकोत्कण्ठाकरः कालः ॥ ३३७५॥

ENMSS@3376@1अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।

ENMSS@3376@2ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥ ३३७६॥

ENMSS@3377@1अविरलधारानिकरं जलदैर्जलमुत्सृजद्भिरतिमात्रम् ।

ENMSS@3377@2मानिवधूहृदयेभ्यः कालुष्यमशेषतो मृष्टम् ॥ ३३७७॥

ENMSS@3378@1अविरलपतद्बाष्पोत्पीडप्रसिक्तकपोलया वचनविषयः संदेशोऽन्यस्तया विहितो न ते ।

ENMSS@3378@2मनसि किमपि ध्यायन्त्या तु क्षणं तव कान्तया पथिक निहिता दृष्टिः

कष्टं नवे करुणाङ्कुरे ॥ ३३७८॥

ENMSS@3379@1अविरलपरागसैकत- मकरन्दतरङ्गिणीमनुवनान्तम् ।

ENMSS@3379@2पिकयुवतिजानुदघ्नीं गाहन्ते मधुपयोषितस्तृषिताः ॥ ३३७९॥

ENMSS@3380@1अविरलपरिवाहैरश्रुणः सारणीनां स्मरदहनशिखोष्णश्वासपूरैश्च तस्याः ।

ENMSS@3380@2सुभग बत कृशाङ्ग्याः स्पर्धयान्योन्यमेभिः क्रियत इव पुरो भूः पङ्किला पांसुला च ॥ ३३८०॥

ENMSS@3381@1अविरलपुलकः सह व्रजन्त्याः प्रतिपदमेकतरः स्तनस्तरुण्याः ।

ENMSS@3381@2घटितविघटितः प्रियस्य वक्षस्- तटभुवि कन्दुकविभ्रमं बभार ॥ ३३८१॥

ENMSS@3382@1अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः ।

ENMSS@3382@2गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः ॥ ३३८२॥

ENMSS@3383@1अविरलमदजलनिवहं भ्रमरकुलानीकसेवितकपोलम् ।

ENMSS@3383@2अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥ ३३८३॥

ENMSS@3384@1अविरलमदधाराधौतकुम्भः शरण्यः फणिवरवृतगात्रः सिद्धसाध्यादिवन्द्यः ।

ENMSS@3384@2त्रिभुवनजनविघ्नध्वान्तविध्वंसदक्षो वितरतु गजवक्त्रः संततं मङ्गलं वः ॥ ३३८४॥

ENMSS@3385@1अविरलमिव दाम्ना पौण्डरीकेण नद्धः स्नपित इव च दुग्धस्रोतसा निर्भरेण ।

ENMSS@3385@2कवलित इव कृत्स्नश्चक्षुषा स्फारितेन प्रसभममृतमेघेनेव

सान्द्रेण सिक्तः ॥ ३३८५॥

ENMSS@3386@1अविरलविगलन्मदजल- कपोलपालीनिलीनमधुपकुलः ।

ENMSS@3386@2उद्भिन्नवश्मश्रु- श्रेणिरिव द्विपमुखो जयति ॥ ३३८६॥

ENMSS@3387@1अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः ।

ENMSS@3387@2अयमायातः कालो हन्त मृताः पथिकगेहिन्यः ॥ ३३८७॥

ENMSS@3388@1अविरुद्धं सुखस्थं यो दुःखमार्गे नियोजयेत् ।

ENMSS@3388@2जन्मजन्मान्तरे दुःखी स नरः स्यादसंशयम् ॥ ३३८८॥

ENMSS@3389@1अविलम्बि सुवृत्तं च उदरं चातिपूजितम् ।

ENMSS@3389@2नातिदीर्घं समं पृष्ठं किंचिच्च विनतं शुभम् ॥ ३३८९॥

ENMSS@3390@1अविलम्बे कृत्यसिद्धौ मान्त्रिकैराप्यते यशः ।

ENMSS@3390@2विलम्बे कर्मबाहुल्यं विख्याप्यावाप्यते धनम् ॥ ३३९०॥

ENMSS@3391@1अविविक्तावतिस्तब्धौ स्तनावाढ्याविवावृतौ ।

ENMSS@3391@2विविक्तावानतावेव दरिद्राविव गर्हितौ ॥ ३३९१॥

ENMSS@3392@1अविवेकमतिर्नृपतिर्मन्त्री गुणवत्सु वक्रितग्रीवः ।

ENMSS@3392@2यत्र खलाश्च प्रबलास्तत्र कथं सज्जनावसरः ॥ ३३९२॥

ENMSS@3393@1अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रितानुरागम् ।

ENMSS@3393@2विजिगीषुमिवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तम् ॥ ३३९३॥

ENMSS@3394@1अविवेकि कुचद्वंद्वं हन्तु नाम जगत्त्रयम् ।

ENMSS@3394@2श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणम् ॥ ३३९४॥

ENMSS@3395@1अविवेकिनि भूपाले नश्यन्ति गुणिनां गुणाः ।

ENMSS@3395@2प्रवासरसिके कान्ते यथा साध्व्याः स्तनोन्नतिः ॥ ३३९५॥

ENMSS@3396@1अविवेकिनि भूपे यः करोत्याशां समृद्धये ।

ENMSS@3396@2यास्याम्यहमनेनेति करोत्याशां स मृद्धये ॥ ३३९६॥

ENMSS@3397@1अविवेको हि सर्वेषाम् आपदां परमं पदम् ।

ENMSS@3397@2विवेकरहितो लोके पशुरेव न संशयः ॥ ३३९७॥

ENMSS@3398@1अविशदचलं नेत्रप्रान्तावलोकनमस्फुटं चकितचकिता वाचः स्पर्शः क्वचिज्जनसंकुले ।

ENMSS@3398@2इति तव मया प्रेमारम्भे य एव निरीक्षिताः कठिनमनसो दृष्टा भावास्त

एव विरज्यतः ॥ ३३९८॥

ENMSS@3399@1अविशीर्णकान्तपात्रे नव्यदशे सुमुखि संभृतस्नेहे ।

ENMSS@3399@2मद्गेहदीपकलिके कथमुपयातासि निर्वाणम् ॥ ३३९९॥

ENMSS@3400@1अविशुद्धकुलोत्पन्ना देहार्पणजीविका शठाचरणा ।

ENMSS@3400@2क्वाहं रूपाजीवा क्व भवन्तः श्लाघनीयजन्मगुणाः ॥ ३४००॥

ENMSS@3401@1अविश्रान्तो वातो दहन इव सोयं जनयति प्रसक्तं सातत्याद् दलयति

कुलाद्रीनपि जलम् ।

ENMSS@3401@2प्रसूते कृत्येषु व्यवसितिरनिर्व्यूढसुदृढा फलावाप्तिं लोके

प्रतिकलमसंभाव्यविभवाम् ॥ ३४०१॥

ENMSS@3402@1अविश्रामं वहेद् भारं शीतोष्णं च न विन्दति ।

ENMSS@3402@2ससंतोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥ ३४०२॥

ENMSS@3403@1अविश्राममपाथेयम् अनालम्भमदेशकम् ।

ENMSS@3403@2तमःकान्तारमध्वानं कथमेको गमिष्यसि ॥ ३४०३॥

ENMSS@3404@1अविश्वसन् धूर्तधुरंधरोऽपि नरः पुरंध्रीपुरतोऽन्ध एव ।

ENMSS@3404@2अशेषशिक्षाकुशलोऽपि काकः प्रतार्यते किं न पिकाङ्गनाभिः ॥ ३४०४॥

ENMSS@3405@1अविश्वस्ता स्त्रियः सर्वा अधमोत्तममध्यमाः ।

ENMSS@3405@2यः कश्चिद् विश्वसेत् तासां पश्चात्तापैः स दह्यते ॥ ३४०५॥

ENMSS@3406@1अविश्वासं सदा तिष्ठेत् संधिना विग्रहेण च ।

ENMSS@3406@2द्वैधीभावं समाश्रित्य पापे शत्रौ बलीयसि ॥ ३४०६॥

ENMSS@3407@1अविश्वासविधानाय महापातकहेतवे ।

ENMSS@3407@2पितापुत्रविरोधाय हिरण्याय नमोऽस्तु ते ॥ ३४०७॥

ENMSS@3408@1अविषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।

ENMSS@3408@2विषं हन्ति किलैकं च ब्रह्मस्वं पुत्रपौत्रकम् ॥ ३४०८॥

ENMSS@3409@1अविसंवादको दक्षः कृतज्ञो मतिमानृजुः ।

ENMSS@3409@2अपि संक्षीणकोशोऽपि लभते परिवारणम् ॥ ३४०९॥

ENMSS@3410@1अविसंवादनं दानं समयस्याव्यतिक्रमः ।

ENMSS@3410@2आवर्तयन्ति भूतानि सम्यक्प्रणिहिता च वाक् ॥ ३४१०॥

ENMSS@3411@1अविसृष्टोऽपि सन् प्राज्ञः सर्वेण च समं व्रजेत् ।

ENMSS@3411@2प्रविशेदप्यनाहूतस्त्वन्यदा भर्त्तुराज्ञया ॥ ३४११॥

ENMSS@3412@1अविस्मृतोपकारः स्यान् न कुर्वीत कृतघ्नताम् ।

ENMSS@3412@2हत्वोपकारिणं विप्रो नाडीजङ्घमधश्च्युतः ॥ ३४१२॥

ENMSS@3413@1अवीरोऽपि चमूवीरसाहाय्येन द्विषो जयेत् ।

ENMSS@3413@2चमूसाहाय्यशून्यानां जयश्रीर्व्याकुलायते ॥ ३४१३॥

ENMSS@3414@1अवृत्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।

ENMSS@3414@2हन्ति नितयं क्षमा क्रोधम् आचारो हन्त्यलक्षणम् ॥ ३४१४॥

ENMSS@3415@1अवृत्तिकं त्यजेद् देशं वृत्तिं सोपद्रवां त्यजेत् ।

ENMSS@3415@2त्यजेन् मायाविनं मित्रं धनं प्राणहरं त्यजेत् ॥ ३४१५॥

ENMSS@3416@1अवृत्तिकं प्रभुं भृत्या अपुष्पं भ्रमरास्तरुम् ।

ENMSS@3416@2अजलं च सरो हंसा मुञ्चन्त्यपि चिरोषितम् ॥ ३४१६॥

ENMSS@3417@1अवृत्तिर्भयमन्त्यानां मध्यानां मरणाद् भयम् ।

ENMSS@3417@2उत्तमानां तु मर्त्यानाम् अवमानात् परं भयम् ॥ ३४१७॥

ENMSS@3418@1अवृत्तिव्याधिशोकार्तान् अनुवर्तेत शक्तितः ।

ENMSS@3418@2आत्मवत्सततं पश्येद् अपि कीटपिपीलकाः ॥ ३४१८॥

ENMSS@3419@1अवेक्ष्य स्वात्मानं विगुणमपरानिच्छति तथा फलत्येतन्नो चेद् विलपति न सन्तीह गुणिनः ।

ENMSS@3419@2निमार्ष्टुं शस्तुं वा परिभवितुमुद्यच्छति ततोऽप्यहो नीचे रम्या सगुणविजिगीषा विधिकृता ॥ ३४१९॥

ENMSS@3420@1अवेमव्यापाराकलनमतुरीस्पर्शमचिराद्
अनुन्मीलत्तन्तुप्रकरघटनायासमसकृत् ।

ENMSS@3420@2विषीदत्पाञ्चालीविपदपनयैकप्रणयिनः पटानां निर्माणं पतगपतिकेतोरवतु नः ॥ ३४२०॥

ENMSS@3421@1अवैति तत्त्वं सदसत्त्वलक्षणं विना विशेषं विपरीतरोचनः ।

ENMSS@3421@2यदृच्छया मत्तवदस्तचेतनो जनो जिनानां वचनात् पराङ्मुखः ॥ ३४२१॥

ENMSS@3422@1अवैतु शास्त्राणि नरो विशेषतः करोतु चित्राणि तपांसि भावतः ।

ENMSS@3422@2अतत्त्वसंसक्तमनास्तथापि नो विमुक्तिसौख्यं गतबाधमश्नुते ॥ ३४२२॥

ENMSS@3423@1अवैमि चैनामनघेति किं तु लोकापवादो बलवान् मतो मे ।

ENMSS@3423@2छाया हि भूमेः शशिनो मलत्वे- नारोपिता शुद्धिमतः प्रजाभिः ॥ ३४२३॥

ENMSS@3424@1अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ।

ENMSS@3424@2व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥ ३४२४॥

ENMSS@3425@1अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।

ENMSS@3425@2मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥ ३४२५॥

ENMSS@3426@1अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः ।

ENMSS@3426@2करोति लक्ष्यं चिरमस्य चक्षुषो न वक्रमात्मीयमरालपक्ष्मणः ॥ ३४२६॥
ENMSS@3427@1अवैमि हंसावलयो वलक्षास्त्वत्कान्तिकीर्तेश्चपलाः पुलाकाः ।
ENMSS@3427@2उड्डीय युक्तं पतिताः स्रवन्ती- वेशन्तपूरं परितः प्लवन्ते ॥ ३४२७॥
ENMSS@3428@1अवैष्णवो हतो विप्रो हतं श्राद्धमदक्षिणम् ।
ENMSS@3428@2अब्रह्मण्यं हतं क्षेत्रम् अनाचारं कुलं हतम् ॥ ३४२८॥
ENMSS@3429@1अव्यक्तमक्षरमुपास्य बभूव कश्चित् स्वं लब्धवर्णमवगत्य कृतार्थमानी ।
ENMSS@3429@2सद्यस्त्रिभङ्गललितस्फुरणादमन्द- नन्दोत्थया जडतयैव वयं कृतार्थाः ॥ ३४२९॥
ENMSS@3430@1अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
ENMSS@3430@2अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ ३४३०॥
ENMSS@3431@1अव्ययवतोऽपि धनिनः स्वजनसहस्रं भवेत् पदस्थस्य ।
ENMSS@3431@2भ्रष्टधनस्य हि सततं बन्धुरपि मुखं न दर्शयति ॥ ३४३१॥
ENMSS@3432@1अव्यये व्ययमायाति व्यये याति सुविस्तरम् ।
ENMSS@3432@2अपुर्वः कोऽपि भाण्डारस्तव भारति दृश्यते ॥ ३४३२॥
ENMSS@3433@1अव्यवसायिनमलसं दैवपरं सहसाच्च परिहीणम् ।
ENMSS@3433@2प्रमदेव हि वृद्धपतिं नेच्छत्यवगूहितुं लक्ष्मीः ॥ ३४३३॥
ENMSS@3434@1अव्यवस्थितचित्तस्य प्रसादोऽपि भयंकरः ।
ENMSS@3434@2व्यवस्थितप्रसन्नात्मा कुपितोऽप्यभयंकरः ॥ ३४३४॥
ENMSS@3435@1अव्यवस्थितवृत्तानाम् अभिन्नश्रुतिचक्षुषाम् ।
ENMSS@3435@2अधर्मार्जितभोगानाम् आशीरप्यहितोचिता ॥ ३४३५॥
ENMSS@3436@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@3436@2अव्यवस्थौ हि दृश्येते युद्धे जयपराजयौ ॥ ३४३६॥
ENMSS@3437@1अव्याकरणमधीतं भिन्नद्रोण्या तरङ्गिणीतरणम् ।
ENMSS@3437@2भेषजमपथ्यसहितं त्रयमिदमकृतं वरं न कृतम् ॥ ३४३७॥
ENMSS@3438@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@3438@2अन्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ ३४३८॥
ENMSS@3439@1अव्याख्येयां वितरति परां प्रीतिमन्तर्निमग्ना कण्ठे लग्ना हरति नितरां यान्तरध्वान्तजालम् ।
ENMSS@3439@2तां द्राक्षाद्यैरपि बहुमतां माधुरीमुद्गिरन्तीं कृष्णेत्याख्यां कथय

रसने यद्यसि त्वं रसज्ञा ॥ ३४३९॥
ENMSS@3440@1अव्याजसुन्दरमनुत्तरमप्रमेयम् अप्राकृतं परममङ्गलमङ्घ्रिपद्मम् ।
ENMSS@3440@2संदर्शयेदपि सकृद्भवती दयार्द्रा द्रष्टास्मि केन तदहं तु विलोचनेन ॥ ३४४०॥
ENMSS@3441@1अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता ।
ENMSS@3441@2परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः ॥ ३४४१॥
ENMSS@3442@1अव्यात् स वो यस्य निसर्गवक्रः स्पृशत्यधिज्यस्मरचापलीलाम् ।
ENMSS@3442@2जटापिनद्धोरगराजरत्न- मरीचिलीढोभयकोटिरिन्दुः ॥ ३४४२॥
ENMSS@3443@1अव्यात् स्वर्लोकचूडामणिपटलशिखाश्रेणिशोणीकृताङ्घ्रिः क्षोणीभारं विनेतुं जठरजुषि जगद्बान्धवे देवकी वः ।
ENMSS@3443@2राज्ञामुद्दामदोष्णां रणशिरसि रणत्कीकसच्छेदभीमाः शस्त्राणां खणत्कारः प्रतिहतिगुरवो यच्छ्रुतेर्दोहदोऽभूत् ॥ ३४४३॥
ENMSS@3444@1अव्याद् वो वज्रसारस्फुरदुरुनखरक्रूरचक्रक्रमाग्र-प्रोद्भिन्नेन्द्रारिवक्षःस्थलगलदसृगासारकाश्मीरगौरः ।
ENMSS@3444@2प्रस्फूर्जत्केशराग्रग्रथितजलधरश्रेणिनीलाब्जमाल्यः सूर्याचन्द्रावतंसो नरहरिरसमाबद्धश‍ृङ्गारलीलः ॥ ३४४४॥
ENMSS@3445@1अव्याद् वो वलिताङ्घ्रिपातविचलद्भूगोलहेलोन्मुख-भ्राम्यद्दिक्करिकल्पितानुकरणो नृत्यन् गणग्रामणीः ।
ENMSS@3445@2यस्योद्दण्डितशुण्डपुष्करमरुद्याकृष्टसृष्टं मुहुस्ताराचक्रमुदक्तशीकरपृषल्लीलामिवाभ्यस्यति ॥ ३४४५॥
ENMSS@3446@1अव्याद् वो वामनो यस्य कौस्तुभप्रतिबिम्बिता ।
ENMSS@3446@2कौतुकालोकिनी जाता जाठरीव जगत्त्रयी ॥ ३४४६॥
ENMSS@3447@1अव्याधिगात्रमनुकूलतरं कलत्रं वेश्म प्रसिद्धविभवं निशिता च विद्या ।
ENMSS@3447@2श्लाघ्यं कुलं चरमकालगतिः समर्थो मातुः कटाक्षपरिणामविभूतयस्ते ॥ ३४४७॥
ENMSS@3448@1अव्याधिजं कटुकं शीर्षरोगं पापानुबन्धं परुषं तीक्ष्णमुग्रम् ।
ENMSS@3448@2सतां पेयं यन्न पिबन्त्यसन्तो मन्युं महाराज पिब प्रशाम्य ॥ ३४४८॥
ENMSS@3449@1अव्याधिना शरीरेण मनसा च निराधिना ।
ENMSS@3449@2पूरयन्नर्थिनामाशां त्वं जीव शरदां शतम् ॥ ३४४९॥
ENMSS@3450@1अव्यापरेषु व्यापारं यो नरः कर्तुमिच्छति ।

ENMSS@3450@2स एव निधनं याति कीलोत्पटीव वानरः ॥ ३४५०॥
ENMSS@3451@1अव्यापाररता वसन्तसमये ग्रीष्मे व्यवायप्रियाः सक्ताः प्रमृषि पल्वलाम्भसि नवे कूपोदकद्वेषिणः ।
ENMSS@3451@2कद्वम्लोष्णरताः शरद्यधिभुजो हेमन्तनिद्रालसाः स्वैर्दोषैरपचीयमानवपुषो नश्यन्तु ते शत्रवः ॥ ३४५१॥
ENMSS@3452@1अव्याहति न शक्या गौर्विना दण्डेन रक्षितुम् ।
ENMSS@3452@2इति प्रत्येति मुग्धोऽपि वल्लवः किमु राजकम् ॥ ३४५२॥
ENMSS@3453@1अव्याहृतं व्याहृताच्छ्रेय आहुः सत्यं वदेद् व्याहृतं तद्द्वितीयम् ।
ENMSS@3453@2प्रियं वदेद् व्याहृतं तत्तृतीयं धर्म्यं वदेद् व्याहृतं तच्चतुर्थम् ॥ ३४५३॥
ENMSS@3454@1अव्युत्पन्नस्वभावानां नारीणमिव सांप्रतम् ।
ENMSS@3454@2सीत्काराचार्यकं कर्तुम् अयं प्राप्तो हिमागमः ॥ ३४५४॥
ENMSS@3455@1अव्युत्पन्ने श्रोतरि वक्तृत्वमनर्थकं पुंसाम् ।
ENMSS@3455@2नेत्रविहीने भर्तरि लावण्यमनर्थकं स्त्रीणाम् ॥ ३४५५॥
ENMSS@3456@1अव्रतस्यापि ते धर्मः कार्य एवान्तरान्तरा ।
ENMSS@3456@2मेधीभूतोऽपि हि भ्राम्यन् घासग्रासं करोति गौः ॥ ३४५६॥
ENMSS@3457@1अशक्तः सततं साधुः कुरूपा च पतिव्रता ।
ENMSS@3457@2व्याधितो देवभक्तश्च निर्धना ब्रह्मचारिणः ॥ ३४५७॥
ENMSS@3458@1अशक्तस्तस्करः साधुः कुरूपा चेत् पतिव्रता ।
ENMSS@3458@2रोगी च देवताभक्तो वृद्धा वेश्या तपस्विनी ॥ ३४५८॥
ENMSS@3459@1अशक्तस्तु भवेत् साधुर्ब्रह्मचारी व निर्धनः ।
ENMSS@3459@2व्याधितो देवभक्तश्च वृद्धा नारी पतिव्रता ॥ ३४५९॥
ENMSS@3460@1अशक्ताः शक्तिमात्मीयां श्लाघन्ते ये च दुर्जनाः ।
ENMSS@3460@2ते भवन्त्युपहासाय महतामेव संनिधौ ॥ ३४६०॥
ENMSS@3461@1अशक्ते रौद्रतातैक्ष्ण्यं तीव्रपापेषु धीरता ।
ENMSS@3461@2छद्मधीर्वाचि पारुष्यं नीचानां शौर्यमीदृशम् ॥ ३४६१॥
ENMSS@3462@1अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम् ।
ENMSS@3462@2संश्रितव्योऽथवा दुर्गो नान्या तेषां गतिर्भवेत् ॥ ३४६२॥
ENMSS@3463@1अशक्तो यः क्षान्तिं सततमपकारिण्यपि जने विधत्ते सोऽवश्यं भुजग इव दंष्ट्राविरहितः ।
ENMSS@3463@2प्रभुः सत्यां शक्तौ क्षमत इह यस्मात् सुचरितः स तेजस्वी

लोकद्वितयविजिगीषुर्विजयते ॥ ३४६३॥

ENMSS@3464@1अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम् ।

ENMSS@3464@2प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद् दिवसानि कौशिकः ॥ ३४६४॥

ENMSS@3465@1अशक्यं नारभेत् प्राज्ञः अकार्यं नैव कारयेत् ।

ENMSS@3465@2असत्यं नैव वक्तव्यम् आलस्यं नैव कारयेत् ॥ ३४६५॥

ENMSS@3466@1अशक्यं नारभेत् प्राज्ञो अकार्यं नैव कारयेत् ।

ENMSS@3466@2यथादेशगतं धर्मं यथाकालं च जीवयेत् ॥ ३४६६॥

ENMSS@3467@1अशक्यः सहसा राजन् भावो वेत्तुं परस्य वै ।

ENMSS@3467@2अन्तःस्वभावैर्गीतैस्तैर्नैपुण्यं पश्यता भृशम् ॥ ३४६७॥

ENMSS@3468@1अशक्यारम्भवृत्तीनां कुतः क्लेशादृते फलम् ।

ENMSS@3468@2आकाशमास्वादयतः कुतस्तु कवलग्रहः ॥ ३४६८॥

ENMSS@3469@1अशङ्कितमतिः स्वस्थो न शठः परिसर्पति ।

ENMSS@3469@2न चास्य दुष्टा वाक् चापि तस्मान् नास्तीह संशयः ॥ ३४६९॥

ENMSS@3470@1अशङ्कितेभ्यः शङ्केत शङ्कितेभ्यश्च सर्वशः ।

ENMSS@3470@2अशङ्क्याद्भयमुत्पन्नम् अपि मूलं निकृन्तति ॥ ३४७०॥

ENMSS@3471@1अशङ्क्यमपि शङ्केत नित्यं शङ्केत शङ्कितात् ।

ENMSS@3471@2भयं हि शङ्किताज्जातं समूलमपि कृन्तति ॥ ३४७१॥

ENMSS@3472@1अशठमलोलमजिह्मं त्यागिनमनुरागिणं विशेषज्ञम् ।

ENMSS@3472@2यदि नाश्रयति नरं श्रीः श्रीरेव हि वञ्चिता तत्र ॥ ३४७२॥

ENMSS@3473@1अशठहृदयः कृतज्ञः सानुक्रोशः स्थितः सतां मार्गे ।

ENMSS@3473@2अपरापवादकर्मा शुचिकर्मरतः स खल्वार्यः ॥ ३४७३॥

ENMSS@3474@1अशनं मे वसनं मे जाया मे बन्धुवर्गो मे ।

ENMSS@3474@2इति मे मे कुर्वाणं कालवृको हन्ति पुरुषाजम् ॥ ३४७४॥

ENMSS@3475@1अशनं वसनं वासो यस्य काश्याममार्गतः ।

ENMSS@3475@2कीकटेन समा काशी गङ्गाप्यङ्गारवाहिनी ॥ ३४७५॥

ENMSS@3476@1अशनमात्रकृतज्ञतया गुरोर्न पिशुनोऽपि शुनो लभते तुलाम् ।

ENMSS@3476@2अपि बहूपकृते सखिता खले न खलु खेलति खे लतिका यथा ॥ ३४७६॥

ENMSS@3477@1अशनादिन्द्रियाणीव स्युः कार्याण्यखिलान्यपि ।

ENMSS@3477@2एतस्मात् कारणाद् वित्तं सर्वसाधनमुच्यते ॥ ३४७७॥

ENMSS@3478@1अशनैरशनैर्बाल्ये यौवने घस्मरात् स्मरात् ।

ENMSS@3478@2कल्यवैकल्यतः शेषे स्फुटं नष्टं वयो नृणाम् ॥ ३४७८॥
ENMSS@3479@1अशरणशरणप्रमोदभूतैर्वनतरुभिः क्रियमाणचारुकर्म ।
ENMSS@3479@2हृदयमिव दुरात्मनामगुप्तं नवमिव राज्यमनिर्जितोपभोग्यम् ॥ ३४७९॥
ENMSS@3480@1अशर्मदहनज्वलत्कटुकटाक्षरूक्षेक्षण- क्षणक्षपितशात्रवे जयति सिन्धुराधीश्वरे ।
ENMSS@3480@2वयं न बहु मन्महे निजभुजानमद्गाण्डिव-
च्युतास्त्रशिखिताण्डवज्वलितखाण्डवं पाण्डवम् ॥ ३४८०॥
ENMSS@3481@1अशस्त्रं पुरुषं हत्वा नरः संजायते खरः ।
ENMSS@3481@2कृमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते ॥ ३४८१॥
ENMSS@3482@1अशस्त्रपूतमव्याजं पुरुषाङ्गोपकल्पितम् ।
ENMSS@3482@2विक्रीयते महामांसं गृह्यतां गृह्यतामिदम् ॥ ३४८२॥
ENMSS@3483@1अशान्तहुतभुक्शिखाकवलितं जगन्मन्दिरं सुखं
विषमवातभुग्ग्रसनवच्चलं कामजम् ।
ENMSS@3483@2जलस्थशशिचञ्चला भुवि विलोक्य लोकस्थितिं विमुञ्चत जनाः सदा विषयमूर्छनां तत्त्वतः ॥ ३४८३॥
ENMSS@3484@1अशान्तान्तस्तृष्णा धनलवणवारिव्यतिकरैर्गतच्छायः
कायश्चिरविरसरूक्षाशनतया ।
ENMSS@3484@2अनिद्रा मन्दोऽग्निर्नृपसलिलचौरानलभयात् कदर्याणां कष्टं
स्फुटमधनकष्टादपि परम् ॥ ३४८४॥
ENMSS@3485@1अशाश्वतमिदं सर्वं चिन्त्यमानं हि भारत ।
ENMSS@3485@2कदलीसंनिभो लोकः समो ह्यस्य न विद्यते ॥ ३४८५॥
ENMSS@3486@1अशासंस्तस्करान् यस्तु बलिं गृह्णाति पार्थिवः ।
ENMSS@3486@2तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते ॥ ३४८६॥
ENMSS@3487@1अशास्त्रचक्षुनृपतिरन्ध इत्यभिधीयते ।
ENMSS@3487@2वरमन्धो न चक्षुष्मान् मदादाक्षिप्तसत्पथः ॥ ३४८७॥
ENMSS@3488@1अशास्त्रविदुषां तेषां न कार्यमहितं वचः ।
ENMSS@3488@2अर्थशास्त्रानभिज्ञानां विपुलां श्रियमिच्छताम् ॥ ३४८८॥
ENMSS@3489@1अशिक्षितानां काव्येषु शास्त्राभ्यासो निरर्थकः ।
ENMSS@3489@2किमस्त्यनुपनीतस्य वाजपेयादिभिर्मखैः ॥ ३४८९॥
ENMSS@3490@1अशिथिलपरिस्पन्दः कुन्दे तथैव मधुव्रतो नयनसुहृदो वृक्षाश्चैते न कुड्मलशालिनः ।

ENMSS@3490@2दलति कलिका चौती नास्मिंस्तथा मृगचक्षुषाम् अथ च हृदये मानग्रन्थिः स्वयं शिथिलायते ॥ ३४९०॥
ENMSS@3491@1अशिथिलमपरावसज्य कण्ठे दृढपरिरब्धबृहद्बहिः स्तनेन ।
ENMSS@3491@2हृषिततनुरुहा भुजेन भर्तुर्मृदुममृदु व्यतिविद्धमेकबाहुम् ॥ ३४९१॥
ENMSS@3492@1अशिराः पुरुषः कार्यो ललाटे ब्रह्मघातिनः ।
ENMSS@3492@2असम्भाष्यश्च कर्तव्यस्तन् मनोरनुशासनम् ॥ ३४९२॥
ENMSS@3493@1राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता ।
ENMSS@3493@2आचक्षाणेन तत् स्तेयम् एवंकर्मास्मि शाधि माम् ॥ ३४९३॥
ENMSS@3494@1अशिष्यं शास्ति यो राजन् यश्च शून्यमुपासते ।
ENMSS@3494@2कदर्यं भजते यश्च तमाहुर्मूढचेतसम् ॥ ३४९४॥
ENMSS@3495@1अशीतास्तरणो माघे फाल्गुने पशुपक्षिणौ ।
ENMSS@3495@2चैत्रे जलचराः सर्वे वैशाखे नरवानरौ ॥ ३४९५॥
ENMSS@3496@1अशीतेनाम्भसा स्नानं पयःपानं वराः स्त्रियः ।
ENMSS@3496@2एतद्वो मानुषाः पथ्यं स्निग्धमुष्णं च भोजनम् ॥ ३४९६॥
ENMSS@3497@1अशीमहि वयं भिक्षाम् आशावासो वसीमहि ।
ENMSS@3497@2शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ ३४९७॥
ENMSS@3498@1अशीला भिन्नमर्यादा नित्यसंकीर्णमैथुनाः ।
ENMSS@3498@2अल्पायुषो भवन्तीह तथा निरयगामिनः ॥ ३४९८॥
ENMSS@3499@1अशुचितानिलयं प्रलयं श्रियाम् अयशसां विभवं प्रभवं रुजाम् ।
ENMSS@3499@2सुकृतनिर्दलनं चलनं धृतेः परिहरेत् परवल्लभया रतम् ॥ ३४९९॥
ENMSS@3500@1अशुचिर्वचनाद् यस्यशुचिर्भवति पूरुषः ।
ENMSS@3500@2शुचिश्चैवाशुचिः सद्यः कथं राजा न दैवतम् ॥ ३५००॥
ENMSS@3501@1अशुचीक्षणेऽश्रुपाते कलहे श्वासकासयोः ।
ENMSS@3501@2रथ्याप्रसर्पणेऽभ्यङ्गे क्षुते नर्मण्युपस्पृशेत् ॥ ३५०१॥
ENMSS@3502@1अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते ।
ENMSS@3502@2यथा गृध्रसमासन्नः कलहंसः समाचरेत् ॥ ३५०२॥
ENMSS@3503@1अशुद्धा तु भवेन् नारी यावच्छल्यं न मुञ्चति ।
ENMSS@3503@2निःसृते तु ततः शल्ये रजसा शुध्यते ततः ॥ ३५०३॥
ENMSS@3504@1अशुद्धीनां तु सर्वासाम् आलयाः कुत्सिताः स्त्रियः ।
ENMSS@3504@2सदा शौचं न कुर्वन्ति भुञ्जतेऽन्नं तथाविधाः ॥ ३५०४॥

ENMSS@3505@1अशुभपुषि कलावप्यप्रमत्ताः स्वधर्माद् अनुदिनमुपकारानाचरन्ते बुधानाम् ।

ENMSS@3505@2बहुजनपरिपुष्टा बद्धदीक्षास्त एते तनुसुखमपि हित्वा तन्वते राजसेवाम्

॥ ३५०५॥

ENMSS@3506@1अशुभोदये जनानां नश्यति बुद्धिर्न विद्यते रक्षा ।

ENMSS@3506@2सुहृदोऽपि सन्ति रिपवो विषमविषं जायतेऽप्यमृतम् ॥ ३५०६॥

ENMSS@3507@1अशृण्वन्नपि बोद्धव्यो मन्त्रिभिः पृथिवीपतिः ।

ENMSS@3507@2यथा स्वदोषनाशाय विदुरेणाम्बिकासुतः ॥ ३५०७॥

ENMSS@3508@1अशेषचक्षुःश्रवणं प्रतिकूलो भवन्नपि ।

ENMSS@3508@2विनतानन्दहेतुर्यः स पुमानाप्तनन्दनः ॥ ३५०८॥

ENMSS@3509@1अशेषदोषापगमप्रकाश- मित्रागमोत्साहमहोत्सवार्हम् ।

ENMSS@3509@2विकासशोभां जनयत्यजस्रं धनं जनानां दिनमम्बुजानाम् ॥ ३५०९॥

ENMSS@3510@1अशेषलङ्कापतिसैन्यहन्ता श्रीरामसेवाचरणैककर्ता ।

ENMSS@3510@2अनेकदुःखाहतलोकगोप्ता त्वसौ हनूमांस्तव सौख्यकर्ता ॥ ३५१०॥

ENMSS@3511@1अशेषविघ्नप्रतिषेधदक्ष- मन्त्राक्षतानामिव दिङ्मुखेषु ।

ENMSS@3511@2विक्षेपलीला करशीकराणां करोतु वः प्रीतिमिभाननस्य ॥ ३५११॥

ENMSS@3512@1अशोकनिर्भर्त्सितपद्मरागम् आकृष्टहेमद्युतिकर्णिकारम् ।

ENMSS@3512@2मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती ॥ ३५१२॥

ENMSS@3513@1अशोके शोकार्तः किमसि बकुलेऽप्याकुलमना निरानन्दः कुन्दे सह च

सहकारैर्न रमसे ।

ENMSS@3513@2कुसुम्भे विश्रम्भं यदिह भजसे कण्टकशतैरसंदिग्धं दग्धभ्रमर

भवितासि क्षतवपुः ॥ ३५१३॥

ENMSS@3514@1अशोच्यः शोचते शोच्यं किं वा शोच्यो न शोच्यते ।

ENMSS@3514@2कश्च कस्येह शोच्योऽस्ति देहेऽस्मिन् बुद्बुदोपमे ॥ ३५१४॥

ENMSS@3515@1अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।

ENMSS@3515@2गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ३५१५॥

ENMSS@3516@1अशोच्यानीह भूतानि यो मूढस्तानि शोचति ।

ENMSS@3516@2तद्दुःखाल्लभते दुःखं द्वावनर्थौ निषेवते ॥ ३५१६॥

ENMSS@3517@1अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितबान्धवः ।

ENMSS@3517@2अशोच्या विधवा नारी पुत्रपौत्रप्रतिष्ठिता ॥ ३५१७॥

ENMSS@3518@1अश्नाति यः संस्कुरुते निहन्ति ददाति गृह्णात्यनुमन्यते च ।

ENMSS@3518@2एते षडप्यत्र विनिन्दनीया भ्रमन्ति संसारवने निरन्तम् ॥ ३५१८॥
ENMSS@3519@1अश्नाति यो मांसमसौ विधत्ते वधानुमोदं त्रसदेहभाजाम् ।
ENMSS@3519@2गृह्णाति रेपांसि ततस्तपस्वी तेभ्यो दुरन्तं भवमेति जन्तुः ॥ ३५१९॥
ENMSS@3520@1अश्नाभ्याच्छादयामीति प्रापश्यन् पापपूरुषः ।
ENMSS@3520@2नामर्षं कुरुते यस्तु पुरुषः सोऽधमः स्मृतः ॥ ३५२०॥
ENMSS@3521@1अश्नीत पिबत खादत जाग्रत संविशत तिष्ठत वा ।
ENMSS@3521@2सकृदपि चिन्तयताह्नः सावधिको देहबन्ध इति ॥ ३५२१॥
ENMSS@3522@1अश्मना साधयेल्लोहं लोहेनाश्मानमेव च ।
ENMSS@3522@2बिल्बानिव करे बिल्वैर्म्लेच्छान् म्लेच्छैः प्रसाधयेत् ॥ ३५२२॥
ENMSS@3523@1अश्मातकस्य वामे बदरी वा दृश्यतेऽहिनिलयो वा ।
ENMSS@3523@2षड्भिरुदग्वास्य करैः सार्धे पुरुषत्रये तोयम् ॥ ३५२३॥
ENMSS@3524@1अश्मानमप्युपायेन लोहं वा जरयेन् नरः ।
ENMSS@3524@2न तु कश्चिद् उपायोऽस्ति ब्रह्मस्वं येन जीर्यते ॥ ३५२४॥
ENMSS@3525@1अश्माप्यहृदयो यस्य गुणसारं परीक्षते ।
ENMSS@3525@2उचितैव सुवर्णस्य तस्याग्निपतने रुचिः ॥ ३५२५॥
ENMSS@3526@1अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
ENMSS@3526@2असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह ॥ ३५२६॥
ENMSS@3527@1अश्रद्धादर्शनं भान्तिर्दुःखं च त्रिविधं ततः ।
ENMSS@3527@2दौर्मनस्यमयोग्येषु विषयेषु च योगता ॥ ३५२७॥
ENMSS@3528@1अश्रद्धेयं न वक्तव्यं प्रत्यक्षमपि यद् भवेत् ।
ENMSS@3528@2यथा वानरसंगीतं तथैव प्लवते शिला ॥ ३५२८॥
ENMSS@3529@1अश्रान्तं दृढयन्त्रणेन
कुचयोरत्यक्तकाठिन्ययोराबद्धस्फुटमण्डलोन्नतिमिलच्चोलं विमुच्योरसः ।
ENMSS@3529@2नीवीविच्छुरितं विधाय तममुं वामस्तनालम्बिनीं वेणीं पाणिनखाञ्चलैः
शिथिलयत्याक्रम्य पीठं पदा ॥ ३५२९॥
ENMSS@3530@1अश्रान्तविश्राणितयज्ञयूप- स्तम्भावलीर्द्राग‍वलम्बमानः ।
ENMSS@3530@2यस्य स्वभावाद् भुवि संचचार कालक्रमादेकपदोऽपि धर्मः ॥ ३५३०॥
ENMSS@3531@1अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना ।
ENMSS@3531@2पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥ ३५३१॥

ENMSS@3532@1अश्रान्तिर्बन्धुतां धत्ते कष्टं नष्टस्य नश्वरः ।
ENMSS@3532@2स्कन्धेन पङ्गुना पङ्गुर्नहि वर्त्मनि नीयते ॥ ३५३२॥
ENMSS@3533@1अश्रावि भूमिपतिभिः क्षणवीतनिद्रैरश्नन् पुरो हरितकं मुदमादधानः ।
ENMSS@3533@2ग्रीवाग्रलोलकलकिङ्किणिकानिनाद- मिश्रं दधद्दशनचर्चुरशब्दमश्वः ॥ ३५३३॥
ENMSS@3534@1अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः ।
ENMSS@3534@2अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव ॥ ३५३४॥
ENMSS@3535@1अश्रुतमिव खलजल्पितम् अदृष्टमिव गुरुमुखेन्दुमालिन्यम् ।
ENMSS@3535@2अगणितनिजापमानं भामिनि भवदर्थमच्युतः सहते ॥ ३५३५॥
ENMSS@3536@1अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।
ENMSS@3536@2अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ॥ ३५३६॥
ENMSS@3537@1अश्रुभिः पाद्यमाकल्प्य प्रणीय हृदयासनम् ।
ENMSS@3537@2उपेते दयिते कान्ता परिष्वङ्गमुपानयत् ॥ ३५३७॥
ENMSS@3538@1अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।
ENMSS@3538@2अजापुत्रं बलिं दद्याद् देवो दुर्बलघातकः ॥ ३५३८॥
ENMSS@3539@1अश्वं स्नातं गजं मत्तं वृषभं काममोहितम् ।
ENMSS@3539@2शूद्रमक्षरसंयुक्तं दूरतः परिवर्जयेत् ॥ ३५३९॥
ENMSS@3540@1अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
ENMSS@3540@2पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ ३५४०॥
ENMSS@3541@1अश्वः सुप्तो गजो मत्तो गावः प्रथमसूतिकाः ।
ENMSS@3541@2अन्तःपुरगतो राजा दूरतः परिवर्जयेत् ॥ ३५४१॥
ENMSS@3542@1अश्वगन्धापलं त्रिंशच्चूर्णयित्वा विचक्षणः ।
ENMSS@3542@2वृद्धदारुकचूर्णेन समभागं च कारयेत् ॥ ३५४२॥
ENMSS@3543@1अश्वत्थचलपत्राग्रलीनतोयकणोपमे ।
ENMSS@3543@2स्थिराशा जीविते यस्य तत्समो नास्त्यचेतनः ॥ ३५४३॥
ENMSS@3544@1अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश चिञ्चिणीकाः ।
ENMSS@3544@2कपित्थबिल्वामलकत्रयं च पञ्चाम्रवापी नरकं न पश्येत् ॥ ३५४४॥
ENMSS@3545@1अश्वत्थस्य महत्त्वं को ननु वक्तुं नरः प्रभवेत् ।
ENMSS@3545@2सवितरि यत्रालक्ष्मीर्मन्दे लक्ष्मीरमन्दास्ते ॥ ३५४५॥
ENMSS@3546@1अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।

ENMSS@3546@2कृपः परशुरामश्च सप्तैते चिरजीविनः ॥ ३५४६॥
ENMSS@3547@1अश्वत्थामा हत इति युधि गिरमनृतां युधिष्ठिरोऽवादीत् ।
ENMSS@3547@2पुनरनुतापमवापत् पापं कृत्वानुतप्येत ॥ ३५४७॥
ENMSS@3548@1अश्वपृष्ठं गजस्कन्धो नारीणां च पयोधरः ।
ENMSS@3548@2दन्तधावनशस्त्रं च यथा स्थूलं तथा सुखम् ॥ ३५४८॥
ENMSS@3549@1अश्वप्रशंसा विख्याता धनुर्वेदस्ततःपरम् ।
ENMSS@3549@2गान्धर्वशास्त्रमपरं वृक्षायुर्वेद एव च ॥ ३५४९॥
ENMSS@3550@1अश्वप्लुतं वासवगर्जितं च स्त्रीणां च चित्तं पुरुषस्य भाग्यम् ।
ENMSS@3550@2अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्यः ॥ ३५५०॥
ENMSS@3551@1अश्वमध्ये कृतरवा शिवा युद्धप्रपञ्चकृत् ।
ENMSS@3551@2शिवा सप्तस्वरा ग्राह्या बहुशब्दाश्च निष्फलाः ॥ ३५५१॥
ENMSS@3552@1अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
ENMSS@3552@2अत्यरिच्यत सत्यं च इति वेदविदो विदुः ॥ ३५५२॥
ENMSS@3553@1अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
ENMSS@3553@2अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ३५५३॥
ENMSS@3554@1अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
ENMSS@3554@2तुलयित्वा तु पश्यामि सत्यमेवातिरिच्यते ॥ ३५५४॥
ENMSS@3555@1अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
ENMSS@3555@2नाभिजानामि यद्यस्य सत्यस्यार्धमवाप्नुयात् ॥ ३५५५॥
ENMSS@3556@1अश्वमेधसहस्रस्य फलं सत्यं तुलान्तरे ।
ENMSS@3556@2धृत्वा संलोड्यते राजन् सत्ये भवति गौरवम् ॥ ३५५६॥
ENMSS@3557@1अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ।
ENMSS@3557@2नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यते ॥ ३५५७॥
ENMSS@3558@1अश्वयानं गजं मत्तं गावश्चैव प्रसूतिकाः ।
ENMSS@3558@2तथा चान्तःपुरे दासीं दूरतः परिवर्जयेत् ॥ ३५५८॥
ENMSS@3559@1अश्वशालां समासाद्य यदान्तर्मधुमक्षिकाः ।
ENMSS@3559@2मधुजालं प्रबध्नन्ति म्रियन्तेऽश्वास्तदा ध्रुवम् ॥ ३५५९॥
ENMSS@3560@1अश्वस्य लक्षणं वेगो मदो मातङ्गलक्षणम् ।
ENMSS@3560@2चातुर्यं लक्षणं नार्या उद्योगः पुरुषलक्षणम् ॥ ३५६०॥
ENMSS@3561@1अश्वानां च पताकानां बालानां पण्ययोषिताम् ।
ENMSS@3561@2विदूषकपटानां च चापल्यमतिमण्डनम् ॥ ३५६१॥

ENMSS@3562@1अश्वा नागाः स्यन्दनानां च सङ्घा मन्त्राः सिद्धा दैवतं चानुकूलम् ।
ENMSS@3562@2एतान्याहुः साधनानि स्म राज्ञां येभ्यश्चेयं बुद्धिरुत्कृष्यते मे ॥ ३५६२॥

ENMSS@3563@1अश्वा यस्य जयस्तस्य यस्याश्वास्तस्य मेदिनी ।
ENMSS@3563@2अश्वा यस्य यशस्तस्य यस्याश्वास्तस्य काश्चनम् ॥ ३५६३॥

ENMSS@3564@1अश्वारूढं पयःपानं गजारूढं तु मैथुनम् ।
ENMSS@3564@2शिबिकीमर्दनं चैव पादचारी तु भोजनम् ॥ ३५६४॥

ENMSS@3565@1अश्वारूढं यतिं दृष्ट्वा खट्वारूढां रजस्वलाम् ।
ENMSS@3565@2सकेशां विधवां दृष्ट्वा सचैलं स्नानमाचरेत् ॥ ३५६५॥

ENMSS@3566@1अश्वाश्चतुष्कोटिमिता लक्षाण्येकादशैव च ।
ENMSS@3566@2सप्तत्रिंशत्सहस्राणि तथा शतचतुष्टयम् ॥ ३५६६॥

ENMSS@3567@1सप्ततिश्चैव संख्याताः प्रोच्यन्ते पत्तयस्ततः ।
ENMSS@3567@2षट्कोट्योऽशीतिलक्षाणि पश्चाधिकमितानि च ॥ ३५६७॥

ENMSS@3568@1द्विषष्टि च सहस्राणि तथा शतचतुष्टयम् ।
ENMSS@3568@2पश्चाशदिति संख्याता महाक्षौहिनिका बुधैः ॥ ३५६८॥

ENMSS@3569@1अश्विनीमैत्ररेवत्यो मृगो मूलं पुनर्वसुः ।
ENMSS@3569@2पुष्यो ज्येष्ठा तथा हस्तः प्रस्थाने श्रेष्ठ उच्यते ॥ ३५६९॥

ENMSS@3570@1अश्विनी सूयते वत्सं कामधेनुस्तुरंगमम् ।
ENMSS@3570@2तथैव सागरो वह्निं यथा राजा तथा प्रजा ॥ ३५७०॥

ENMSS@3571@1अश्वीये यमवाहनस्य नकुलस्याशीविषाणां कुले मार्जारस्य च मूषकेषु घटते या प्रीतिरात्यन्तिकी ।
ENMSS@3571@2क्षीणेऽर्थे विधुरेषु बन्धुषु दृढे लोकापवादे शनैर्ज्ञेया कामिजनेषु सैव गणिकावर्गस्य नैसर्गिकी ॥ ३५७१॥

ENMSS@3572@1अश्वे जवो वृषे धौर्यं मणौ कान्तिः क्षमा नृपे ।
ENMSS@3572@2हावभावौ च वेश्यायां गायके मधुरस्वरः ॥ ३५७२॥

ENMSS@3573@1दातृत्वं धनिके शौर्यं सैनिके बहुदुग्धता ।
ENMSS@3573@2गोषु दमस्तपस्विषु विद्वत्सु वावदूकता ॥ ३५७३॥

ENMSS@3574@1सभ्येष्वपक्षपातस्तु तथा साक्षिषु सत्यवाक् ।
ENMSS@3574@2अनन्यभक्तिर्भृत्येषु सुहितोक्तिश्च मन्त्रिषु ॥ ३५७४॥

ENMSS@3575@1मौनं मूर्खेषु च स्त्रीषु पातिव्रत्यं सुभूषणम् ।
ENMSS@3575@2महादुर्भूषणं चैतद् विपरीतममीषु च ॥ ३५७५॥

ENMSS@3576@1अश्वैर्यानं यानं स्त्रीभिर्लीलैव प्रोच्यते लीला ।
ENMSS@3576@2मांसां भुक्तं भुक्तं चान्यद् अयानमलीलाभुक्तम् ॥ ३५७६॥
ENMSS@3577@1अष्टकुलाचलसप्तसमुद्रा ब्रह्मपुरंदरदिनकररुद्राः ।
ENMSS@3577@2न त्वं नाहं नायं लोकस्तदपि किमर्थं क्रियते शोकः ॥ ३५७७॥
ENMSS@3578@1अष्टधा देवतायोनिस्तिर्यग्योनिश्च पञ्चधा ।
ENMSS@3578@2एकधा मानुषी योनिरिमे भूताश्चतुर्दश ॥ ३५७८॥
ENMSS@3579@1अष्टपादश्चतुष्कर्णो द्विमुखी द्विमुखस्तथा ।
ENMSS@3579@2राजद्वारे पठेद् घोरो न च देवो न राक्षसः ॥ ३५७९॥
ENMSS@3580@1अष्टमं ब्रह्मरन्ध्रं स्यात् परं निर्वाणसूचकम् । तद्ध्यात्वा सूचिकाग्राभं धूमाकारं विमुच्यते ।
ENMSS@3580@2तच्च जालंधरं ज्ञेयं मोक्षदं लीनचेतसाम् ॥ ३५८०॥ अष्टमी च अमावास्या वर्जनीया चतुर्दशी ।
ENMSS@3581@2पूर्णिमार्धदिनं यावन् निषिद्धा सर्वकर्मसु ॥ ३५८१॥
ENMSS@3582@1अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी ।
ENMSS@3582@2आमावास्योऽभयं हन्ति प्रतिपत् पाठनाशिनी ॥ ३५८२॥
ENMSS@3583@1अष्टमे द्वादशे वापि शाकं यः पचते गृहे ।
ENMSS@3583@2कुमित्राण्यनपाश्रित्य किं वै सुखतरं ततः ॥ ३५८३॥
ENMSS@3584@1अष्टाङ्गयोगपरिशीलनकीलनेन दुःसाधसिद्धिसविधं विदधद् विदूरे ।
ENMSS@3584@2आसादयन्नभिमतामधुना विवेक- ख्यातिं समाधिधनमौलिमणिर्विमुक्तः ॥ ३५८४॥
ENMSS@3585@1अष्टाङ्गुलस्य कथितो वायोर्मानो विचक्षणैः ।
ENMSS@3585@2चतुरङ्गुलमानं च तेजस्तत्त्वं निगद्यते ॥ ३५८५॥
ENMSS@3586@1अष्टादश तथा मध्ये हीने चैव चतुर्दश ।
ENMSS@3586@2सप्ताङ्गुलः खुरः प्रोक्त उत्तमाश्वस्य पण्डितैः ॥ ३५८६॥
ENMSS@3587@1अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
ENMSS@3587@2परोपकारः पुण्याय पापाय परपीडनम् ॥ ३५८७॥
ENMSS@3588@1अष्टादशापि स्मृतयो वदन्ति यस्यापराधः खलु तस्य दण्डः ।
ENMSS@3588@2स्वस्यापराधः खलु नाभिमूले शिरः कुतो मुण्डयते मृगाक्षि ॥ ३५८८॥
ENMSS@3589@1अष्टानां लोकपालानां संभवत्यंशतो नृपः ।
ENMSS@3589@2तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ ३५८९॥

ENMSS@3590@1अष्टाभिः किल दण्डनीतिनिपुणैः सत्प्राड्विवाकैः समं
मध्येसौधमनुत्तमासनगतः कार्याणि कुर्वन् नृणाम् ।
ENMSS@3590@2विष्णुर्भूपवपुर्विधाय किमसौ दिक्पालयुक् पालयत्येवं भ्रान्तिमतो मनाङ्
न कुरुते कास्कानयं माधवः ॥ ३५९०॥
ENMSS@3591@1अष्टावङ्गानि योगस्य यमो नियम आसनम् ।
ENMSS@3591@2प्राणायामः प्रत्याहारो धारणा ध्यानतन्मयः ॥ ३५९१॥
ENMSS@3592@1अष्टाविमानि हर्षस्य नवनीतानि भारत ।
ENMSS@3592@2वर्तमानानि दृश्यन्ते तान्येव सुसुखान्यपि ॥ ३५९२॥
ENMSS@3593@1समागमश्च सखिभिर्महांश्चैव धनागमः ।
ENMSS@3593@2पुत्रेण च परिष्वङ्गः संनिपातश्च मैथुने ॥ ३५९३॥
ENMSS@3594@1समये च प्रियालापः स्वयूथेषु च संनतिः ।
ENMSS@3594@2अभिप्रेतस्य लाभश्च पूजा च जनसंसदि ॥ ३५९४॥
ENMSS@3595@1अष्टोत्तरशतं श्लोकं चाणक्येन यथोदितम् ।
ENMSS@3595@2यस्य विज्ञानमात्रेण न् णां प्रज्ञा प्रवर्धते ॥ ३५९५॥
ENMSS@3596@1अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।
ENMSS@3596@2पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ ३५९६॥
ENMSS@3597@1अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
ENMSS@3597@2हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ ३५९७॥
ENMSS@3598@1अष्टौ नृपेमानि मनुष्यलोके स्वर्गस्य लोकस्य निदर्शनानि ।
ENMSS@3598@2चत्वार्येषामन्ववेतानि सद्भिश्चत्वार्येषामन्ववयन्ति सन्तः ॥ ३५९८॥
ENMSS@3599@1यज्ञो दानमध्ययनं तपश्च चत्वार्येतान्यन्ववेतानि सद्भिः ।
ENMSS@3599@2दमः सत्यमार्जवमानृशंस्यं चत्वार्येतान्यन्ववयन्ति सन्तः ॥ ३५९९॥
ENMSS@3600@1अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः ।
ENMSS@3600@2ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ ३६००॥
ENMSS@3601@1ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
ENMSS@3601@2रमते निन्दया चैषां प्रशंसां नाभिनन्दति ॥ ३६०१॥
ENMSS@3602@1नैतान् स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
ENMSS@3602@2एतान् दोषान् नरः प्राज्ञो बुद्ध्या बुद्ध्वा विवर्जयेत् ॥ ३६०२॥
ENMSS@3603@1अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः ।
ENMSS@3603@2तथा हरेत् करं राष्ट्रान् नित्यमर्कव्रतं हि तत् ॥ ३६०३॥

ENMSS@3604@1अष्टौ यदा तु दृश्यन्ते समन्ताद् देवयोनयः ।
ENMSS@3604@2उपसर्गं तमित्याहुर्दैवमुन्मत्तवद् बुधाः ॥ ३६०४॥
ENMSS@3605@1अष्टौ यस्य दिशो दलानि विपुलः कोशः सुवर्णाचलः कान्तं केसरजालमर्ककिरणा भृङ्गाः पयोदावली ।
ENMSS@3605@2नालं शेषमहोरगः प्रविततं वारांनिधेर्लीलया तद्वः पातु समुद्धरन् कुवलयं क्रोडाकृतिः केशवः ॥ ३६०५॥
ENMSS@3606@1अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः पञ्चाशन्मधुगन्धमत्तमधुपाः क्रोधोद्धताः सिन्धुराः ।
ENMSS@3606@2अश्वानामयुतं प्रपञ्चचतुरं वाराङ्गनानां शतं दत्तं पाण्ड्यनृपेण यौतकमिदं वैतालिकायार्प्यताम् ॥ ३६०६॥
ENMSS@3607@1असंकल्पाज्जयेत् कामं क्रोधं कामविवर्जनात् ।
ENMSS@3607@2अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ ३६०७॥
ENMSS@3608@1असंकल्पितमेवेह यदकस्मात् प्रवर्तते ।
ENMSS@3608@2निवर्त्यारम्भमारब्धं ननु दैवस्य कर्म तत् ॥ ३६०८॥
ENMSS@3609@1असंख्यपुष्पोऽपि मनोभवस्य पञ्चैव बाणार्थमयं ददाति ।
ENMSS@3609@2एवं कदर्यत्वमिवावधार्य सर्वस्वमग्राहि मधोर्वधूभिः ॥ ३६०९॥
ENMSS@3610@1असंख्याः परदोषज्ञा गुणज्ञा अपि केचन ।
ENMSS@3610@2स्वयमेव स्वदोषज्ञा विद्यन्ते यदि पञ्चषाः ॥ ३६१०॥
ENMSS@3611@1असंगतेनोन्नतिमागतेन चलेन वक्रेण मलीमसेन ।
ENMSS@3611@2सा दुर्जनेनेव समस्तमेतं प्रबाधते भ्रूयुगलेन लोकम् ॥ ३६११॥
ENMSS@3612@1असंगृहीतस्य पुनर्मन्त्रस्य शृणु यत्फलम् ।
ENMSS@3612@2अहीनं धर्मकामाभ्याम् अर्थं प्राप्नोति केवलम् ॥ ३६१२॥
ENMSS@3613@1असंचयादपूर्वस्य क्षयात् पूर्वार्जितस्य च ।
ENMSS@3613@2कर्मणो बन्धमाप्नोति शारीरं न पुनः पुनः ॥ ३६१३॥
ENMSS@3614@1असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशः ।
ENMSS@3614@2स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवावकीर्यते ॥ ३६१४॥
ENMSS@3615@1असंतुष्टा द्विजा नष्टाः संतुष्टाश्च महीभृतः ।
ENMSS@3615@2सलज्जा गणिका नष्टा निर्लज्जाश्च कुलाङ्गना ॥ ३६१५॥
ENMSS@3616@1असंतुष्टाश्च्युताः स्थानान् मानात् प्रत्यवरोपिताः ।
ENMSS@3616@2स्वयं चोपहृता भृत्या ये चाप्युपहताः परैः ॥ ३६१६॥
ENMSS@3617@1असंतुष्टोऽसकृल्लोकान् आप्नोत्यपि सुरेश्वरः ।

ENMSS@3617@2अकिंचनोऽपि संतुष्टः शेते सर्वाङ्गविज्वरः ॥ ३६१७॥
ENMSS@3618@1असंतोषः परं दुःखं संतोषः परमं सुखम् ।
ENMSS@3618@2सुखार्थी पुरुषस्तस्मात् संतुष्टः सततः भवेत् ॥ ३६१८॥
ENMSS@3619@1असंतोषः परं पापम् इत्याह भगवान् हरिः ।
ENMSS@3619@2लोभः पापस्य बीजोऽयं मोहो मूलं च तस्य वै ।
ENMSS@3619@3असत्यं तस्य हि स्कन्धो महाशाखा सुविस्तरा ॥ ३६१९॥
ENMSS@3620@1असंतोषपरा मूढाः संतोषं यान्ति पण्डिताः ।
ENMSS@3620@2असन्तोषस्य नास्त्यन्तस्तुष्टिस्तु परमं सुखम् ॥ ३६२०॥
ENMSS@3621@1असंतोषोऽसुखायैव लोभादिन्द्रियविभ्रमः ।
ENMSS@3621@2ततोऽस्य नश्यति प्रज्ञा विद्येवाभ्यासवर्जिता ॥ ३६२१॥
ENMSS@3622@1असंत्यागात् पापकृतामपापांस्तुल्यो दण्डः स्पृशते मिश्रभावात् ।
ENMSS@3622@2शुष्केणार्द्रं दह्यते मिश्रभावात् तस्मात् पापैः सह संधिं न कुर्यात् ॥ ३६२२॥
ENMSS@3623@1असंदधानो मानान्धः समेनापि हतो भृशम् ।
ENMSS@3623@2आमकुम्भमिवाभित्त्वा नावतिष्ठेत शक्तिमान् ॥ ३६२३॥
ENMSS@3624@1असंदिग्धमना भूत्वा वदेदिक्षुरसो यथा ।
ENMSS@3624@2विक्षुब्धो वचसा यो हि वाक्यशल्येन हन्यते ॥ ३६२४॥
ENMSS@3625@1असंपत्तौ परो लाभो गुह्यस्य कथनं तथा ।
ENMSS@3625@2आपद्विमोक्षणं चैव मित्रस्यैतत् फलत्रयम् ॥ ३६२५॥
ENMSS@3626@1असंपन्नः कथं बन्धुरसहिष्णुः कथं प्रभुः ।
ENMSS@3626@2अनात्मवित् कथं विद्वान् असंतुष्टः कथं सुखी ॥ ३६२६॥
ENMSS@3627@1असंपादयतः कंचिदर्थं जातिक्रियागुणैः ।
ENMSS@3627@2यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥ ३६२७॥
ENMSS@3628@1असंप्राप्तरजा गौरी प्राप्ते रजसि रोहिणी ।
ENMSS@3628@2अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका ॥ ३६२८॥
ENMSS@3629@1असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
ENMSS@3629@2प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥ ३६२९॥
ENMSS@3630@1असंभवगुणस्तुत्या जायते स्वात्मनस्त्रपा ।
ENMSS@3630@2कर्णिकारं सुगन्धीति वदन् को नोपहस्यते ॥ ३६३०॥
ENMSS@3631@1असंभाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते ।
ENMSS@3631@2शिला तरति पानीयं गीतं गायति वानरः ॥ ३६३१॥

ENMSS@3632@1असंभाष्यं न भाषेत भाषसे यदि तत्तथा ।
ENMSS@3632@2परेषां हि समुद्वेगे नात्मनश्च शुभं फलम् ॥ ३६३२॥
ENMSS@3633@1असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
ENMSS@3633@2कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साथ वयः प्रपेदे ॥ ३६३३॥
ENMSS@3634@1असंभेद्यः शुचिर्दक्षः कृतान्नस्य परीक्षकः ।
ENMSS@3634@2सूदानां च विशेषज्ञः सूदाध्यक्षो विधीयते ॥ ३६३४॥
ENMSS@3635@1असंभोगेन सामान्यं कृपणस्य धनं परैः ।
ENMSS@3635@2अस्येदमिति संबन्धो हानौ दुःखेन गम्यते ॥ ३६३५॥
ENMSS@3636@1असंभ्रमो विलज्जत्वम् अवज्ञा प्रतिवादिनि ।
ENMSS@3636@2हासो राज्ञः स्तवश्चेति पञ्चैते जयहेतवः ॥ ३६३६॥
ENMSS@3637@1असंमतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात् प्रपन्नः ।
ENMSS@3637@2बद्धश्चिरं तिष्ठतु सुन्दरीणाम् आरेचितभ्रूचतुरैः कटाक्षैः ॥ ३६३७॥
ENMSS@3638@1असंमाने तपोवृद्धिः संम्मानाच्च तपःक्षयः ।
ENMSS@3638@2पूजया पुण्यहानिः स्यान् निन्दया सद्गतिर्भवेत् ॥ ३६३८॥
ENMSS@3639@1असंमुखालोकनमाभिमुख्यं निषेध एवानुमतिप्रकारः ।
ENMSS@3639@2प्रत्युत्तरं मुद्रणमेव वाचां नवाङ्गनानां नव एव पन्थाः ॥ ३६३९॥
ENMSS@3640@1असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः ।
ENMSS@3640@2तादृङ्नराधमो लोके वर्जनीयो नराधिप ॥ ३६४०॥
ENMSS@3641@1असंवृतस्य कार्याणि प्राप्तान्यपि विशेषतः ।
ENMSS@3641@2निःसंशयं विपद्यन्ते भिन्नप्लव इवोदधौ ॥ ३६४१॥
ENMSS@3642@1असंवृताकारतया भिन्नमन्त्रस्य भूपतेः ।
ENMSS@3642@2सकृच्छिद्रघटस्येव न तिष्ठत्युदयोदकम् ॥ ३६४२॥
ENMSS@3643@1असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
ENMSS@3643@2सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥ ३६४३॥
ENMSS@3644@1असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रामणीभिरञ्जनम् ।
ENMSS@3644@2हृतेऽपि तस्मिन् सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियम् ॥ ३६४४॥
ENMSS@3645@1असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
ENMSS@3645@2अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३६४५॥
ENMSS@3646@1असंशयं विजानीहि काले सर्वं फलिष्यति ।
ENMSS@3646@2धृतिं धारय विस्रब्धं भवेत् सर्वं समञ्जसम् ॥ ३६४६॥

ENMSS@3647@1असकलकलिकाकुलीकृतालि- स्खलनविकीर्णविकासिकेशराणाम् ।

ENMSS@3647@2मरुदवनिरुहां रजो वधूभ्यः समुपहरन् विचकार कोरकाणि ॥ ३६४७॥

ENMSS@3648@1असकलनयनावलोकनेन स्मितपरिहासमनोहरैर्वचोभिः ।

ENMSS@3648@2कमलमुखि मुरारिरेवमेवं कथय कियन्ति दिनानि वञ्चनीयः ॥ ३६४८॥

ENMSS@3649@1असकलनयनेक्षितानि लज्ञा गतमलसं परिपाण्डुता विषादः ।

ENMSS@3649@2इति विविधमियाय तासु भूषां प्रभवति मण्डयितुं वधूरनङ्गः ॥ ३६४९॥

ENMSS@3650@1असकृदसकृन्नष्टां नष्टां मृगो मृगतृष्णिकां

श्रमपरिगतोऽप्युत्पक्ष्माक्षः परैति पुनः पुनः ।

ENMSS@3650@2गणयति न तन्मायातोयं हतः सलिलाशया भवति हि मतिस्तृष्णान्धानां

विवेकपराङ्मुखी ॥ ३६५०॥

ENMSS@3651@1असकृन् न नेऽति सावधि- निषेधबोधिश्रुतिर्मया कलिता ।

ENMSS@3651@2गमयति परमनवरतं या तमखण्डार्थरूपमानन्दम् ॥ ३६५१॥

ENMSS@3652@1असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता ।

ENMSS@3652@2दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषाम् ॥ ३६५२॥

ENMSS@3653@1असकृद् युधि विजितादपि भीतो बार्हद्रथाज्ञ्जले दुर्गम् ।

ENMSS@3653@2कृत्वा हरिर्न्यवात्सीद् विजितोऽप्याशङ्कनीयोऽरिः ॥ ३६५३॥

ENMSS@3654@1असकृन् न वदेदाशां प्रार्थयेद् देवतां सकृत् ।

ENMSS@3654@2नालायनी पञ्च पतीन् प्रापोचार्य पुनः पुनः ॥ ३६५४॥

ENMSS@3655@1असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।

ENMSS@3655@2गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ॥ ३६५५॥

ENMSS@3656@1असङ्गसंगदोषेण सत्याश्च मतिविभ्रमः ।

ENMSS@3656@2एकरात्रप्रसङ्गेन काष्ठघण्टाविडम्बना ॥ ३६५६॥

ENMSS@3657@1असज्जनः सज्जनसङ्गिसङ्गात् करोति दुःसाध्यमपीह साध्यम् ।

ENMSS@3657@2पुष्पाश्रयाच्छंभुशिरोऽधिरूढा पिपीलिका चुम्बति चन्द्रबिम्बम् ॥ ३६५७॥

ENMSS@3658@1असज्जनायाशु वरं न दद्यात् प्रीतितो नृपः ।

ENMSS@3658@2वरं भस्मासुरायेशः दत्त्वा नीलिफलं गतः ॥ ३६५८॥

ENMSS@3659@1असज्जनाश्चेन् मधुरैर्वचोभिः शक्यन्त एव प्रतिकर्तुमार्यैः ।

ENMSS@3659@2तत्केतकीरेणुभिरम्बुराशेर्बन्धक्रियायामपि कः प्रयासः ॥ ३६५९॥
ENMSS@3660@1असज्जनेन संपर्काद् अनयं यान्ति साधवः ।
ENMSS@3660@2मधुरं शीतलं तोयं पावकं प्राप्य तप्यते ॥ ३६६०॥
ENMSS@3661@1असतः श्रीमदान्धस्य दारिद्र्यं परमाञ्जनम् ।
ENMSS@3661@2आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥ ३६६१॥
ENMSS@3662@1असतां च परिक्षेपः सतां च परिगूहनम् ।
ENMSS@3662@2अभूतानां च हिंसानाम् अधर्माणां च वर्जनम् ॥ ३६६२॥
ENMSS@3663@1असतां धर्मबुद्धिश्चेत् सतां संतापकारणम् ।
ENMSS@3663@2उपोषितस्य व्याघ्रस्य पारणं पशुमारणम् ॥ ३६६३॥
ENMSS@3664@1असतां प्रग्रहः कामः कोपश्चावग्रहः सताम् ।
ENMSS@3664@2व्यसनं दोषबाहुल्याद् अत्यन्तमुभयं मतम् ॥ ३६६४॥
ENMSS@3665@1असतां बत सत्तापि न न्यायानुगता यदा ।
ENMSS@3665@2ततस्तेभ्योर्थपूर्त्याशा सुधालिप्सेव भोगिनः ॥ ३६६५॥
ENMSS@3666@1असतां सङ्गदोषेण सती याति मतिर्भ्रमम् ।
ENMSS@3666@2एकरात्रिप्रवासेन काष्ठं मुञ्जे प्रलम्बितम् ॥ ३६६६॥
ENMSS@3667@1असतां सङ्गदोषेण साधवो यान्ति विक्रियाम् ।
ENMSS@3667@2दुर्योधनप्रसङ्गेन भीष्मो गोहरणे गतः ॥ ३६६७॥
ENMSS@3668@1असतां सङ्गमुत्सृज्य सत्सु सङ्गं समाचरेत् ।
ENMSS@3668@2असतां सङ्गदोषेण माण्डव्यः शूलमाप्तवान् ॥ ३६६८॥
ENMSS@3669@1असतां सहजो भावश्छन्नः केनापि हेतुना ।
ENMSS@3669@2संस्कार इव बीजानां फलेन सह जायते ॥ ३६६९॥
ENMSS@3670@1असतामुपभोगाय दुर्जनानां विभूतयः ।
ENMSS@3670@2पिचुमन्दः फलाढ्योऽपि काकैरेवोपभुज्यते ॥ ३६७०॥
ENMSS@3671@1असता सह सङ्गेन को न यात्यधमां गतिम् ।
ENMSS@3671@2पयोऽपि शौण्डनीहस्ते मद्यमित्यभिधीयते ॥ ३६७१॥
ENMSS@3672@1असतीचरितं तद्वद् वसन्तादेश्चवर्णनम् ।
ENMSS@3672@2ग्रीष्मादेर्वर्णनं तद्वद् वर्षादेरपि वर्णनम् ॥ ३६७२॥
ENMSS@3673@1असती भवति सलज्जा क्षारं नीरं च शीतलं भवति ।
ENMSS@3673@2दम्भी भवति विवेकी प्रियवक्ता भवति धूर्तजनः ॥ ३६७३॥
ENMSS@3674@1असतोऽपि भवति गुणवान् सद्भ्योऽपि परं भवन्त्यसद्वृत्ताः ।
ENMSS@3674@2पङ्कादुदेति कमलं क्रिमयः कमलादपि भवन्ति ॥ ३६७४॥

ENMSS@3675@1असतो वा सतो वापि स्वयं स्वान् वर्णयन् गुणान् ।
ENMSS@3675@2हास्यतां याति शक्रोऽपि किं पुनः प्राकृतो जनः ॥ ३६७५॥
ENMSS@3676@1असत्कार्यरतोऽधीर आरम्भी विषयी च यः ।
ENMSS@3676@2स राजसो मनुष्येषु मृतो जन्माधिगच्छति ॥ ३६७६॥
ENMSS@3677@1असत्प्रतिग्रहीता च नरके यात्यधोमुखे ।
ENMSS@3677@2एको मिष्टान्नभुग् यः स याति पूयवहं नरः ॥ ३६७७॥
ENMSS@3678@1असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा ।
ENMSS@3678@2चत्वारि वाचा राजेन्द्र न जल्पेन् नानुचिन्तयेत् ॥ ३६७८॥
ENMSS@3679@1असत्यः सर्वलोकेऽस्मिन् सततं सत्कृताः प्रियैः ।
ENMSS@3679@2भर्तारं नानुमन्यंते विनिपातगतं स्त्रियः ॥ ३६७९॥
ENMSS@3680@1असत्यता निष्ठुरताकृतज्ञता भयं प्रमादोऽलसता विषादिता ।
ENMSS@3680@2वृथाभिमानोऽपि च दीर्घसूत्रता तथाङ्गनाक्षादि विनाशनं श्रियः ॥ ३६८०॥
ENMSS@3681@1असत्यमप्रत्ययमूलकारणं कुवासनासद्मसमृद्धिवारणम् ।
ENMSS@3681@2विपन्निदानं परवञ्चनोर्जितं कृतापराधं कृतिभिर्विवर्जितम् ॥ ३६८१॥
ENMSS@3682@1असत्यमेतद् विदितं समस्तम् अकार्यकारीति मृषा प्रपञ्चः ।
ENMSS@3682@2कुचापलापक्रममेव कर्तुम् आच्छादनं ते हृदयस्य शश्वत् ॥ ३६८२॥
ENMSS@3683@1असत्यशीला विकृता दुर्ग्राह्यहृदयाः सदा ।
ENMSS@3683@2युवत्यः पापसंकल्पाः क्षणमात्राद् विरागिणः ॥ ३६८३॥
ENMSS@3684@1असत्यसंधस्य सतश्चलस्यास्थिरचेतसः ।
ENMSS@3684@2नैव देवा न पितरः प्रतीच्छन्तीति नः श्रुतम् ॥ ३६८४॥
ENMSS@3685@1असत्यस्य वणिग्मूलं शाखास्तस्य वराङ्गनाः ।
ENMSS@3685@2कायस्थाः पत्रपुष्पाणि फलानि द्यूतकारिणः ॥ ३६८५॥
ENMSS@3686@1असत्याः सत्यसंकाशाः सत्याश्चासत्यरूपिणः ।
ENMSS@3686@2दृश्यन्ते विविधा भावास्तस्माद् युक्तं परीक्षणम् ॥ ३६८६॥
ENMSS@3687@1असत्या च हता वाणी तथा पैशुन्यवादिनी ।
ENMSS@3687@2संदिग्धोऽपि हतो मन्त्रो व्यग्रचित्तो हतो जपः ॥ ३६८७॥
ENMSS@3688@1असत्यात्मगुणे शस्त्रं हस्ताभ्यां विनिवार्यते ।
ENMSS@3688@2एषापि न गतिः क्षेम्या न चान्या विद्यते क्वचित् ॥ ३६८८॥
ENMSS@3689@1असत्येनैव जीवन्ति वेश्याः सत्यविवर्जिताः ।
ENMSS@3689@2एताः सत्येन नश्यन्ति मद्येनेव कुलाङ्गनाः ॥ ३६८९॥

ENMSS@3690@1असत्संपर्कदोषेण अधस्ताद् यान्ति साधवः ।
ENMSS@3690@2मार्गस्तिमिरदोषेण समोऽपि विषमायते ॥ ३६९०॥
ENMSS@3691@1असत्सङ्गाद् गुणज्ञोऽपि विषयासक्तमानसः ।
ENMSS@3691@2अकस्मात् प्रलयं याति गीतरक्तो यथा मृगः ॥ ३६९१॥
ENMSS@3692@1असदृशजनेषु याच्ञा महतां नहि लाघवाय सुहृदर्थे ।
ENMSS@3692@2हरिरपि पाण्डुसुतेभ्यः स्वयमर्थी धार्तराष्ट्रेषु ॥ ३६९२॥
ENMSS@3693@1असद्धर्मस्त्वयं स्त्रीणाम् अस्माकं भवति प्रभो ।
ENMSS@3693@2पापीयसो नरान् यद्वै लज्जां त्यक्त्वा भजामहे ॥ ३६९३॥
ENMSS@3694@1असद्भिः सेवितो राजा स्वयं सन्नपि दूष्यते ।
ENMSS@3694@2किं सेव्यो भोगिसंवीतो गन्धवानपि चन्दनः ॥ ३६९४॥
ENMSS@3695@1असद्भिरसतामेव भुज्यन्ते धनसंपदः ।
ENMSS@3695@2फलं किम्पाकवृक्षस्य ध्वाङ्क्षा भक्षन्ति नेतरे ॥ ३६९५॥
ENMSS@3696@1असद्वृत्तो नायं न च सखि गुणैरेष रहितः प्रियो मुक्ताहारस्तव चरणमूले निपतितः ।
ENMSS@3696@2गृहाणैनं मुग्धे व्रजतु तव कण्ठप्रणयिताम् उपायो नास्त्यन्यो हृदयपरितापोपशमने ॥ ३६९६॥
ENMSS@3697@1असन्तोऽभ्यर्थिताः सद्भिः किंचित्कार्यं कदाचन ।
ENMSS@3697@2मन्यन्ते सन्तमात्मानम् असन्तमपि वितश्रुम् ॥ ३६९७॥
ENMSS@3698@1असन्तो ये निवर्तन्ते वेदेभ्य इव नास्तिकाः ।
ENMSS@3698@2नरकं भजमानास्ते प्रतिपद्यन्ति किल्बिषम् ॥ ३६९८॥
ENMSS@3699@1असन्थितपदा सुविह्वलाङ्गी मदस्खलितचेष्टितैर्मनोज्ञा ।
ENMSS@3699@2क्व यास्यसि वरोरु सुरतकाले विषमा किं वानवासिका त्वम् ॥ ३६९९॥
ENMSS@3700@1असभ्यः पिशुनश्चैव कृतघ्नो दीर्घवैरिणः ।
ENMSS@3700@2चत्वारः कर्मचण्डालाः जातिचण्डालपञ्चमाः ॥ ३७००॥
ENMSS@3701@1असमग्रविलोकितेन किं ते दयितं पश्य वरोरु निर्विशङ्कम् ।
ENMSS@3701@2नहि जातु कुशाग्रपीतमम्भः सुचिरेणापि करोत्यपेततृष्णम् ॥ ३७०१॥
ENMSS@3702@1असमञ्जसमसमञ्जस- मसञ्जसमेतदापतितम् ।
ENMSS@3702@2वल्लवकुमारबुद्ध्या हरि हरि हरिरीक्षतः कुतुकात् ॥ ३७०२॥
ENMSS@3703@1असमर्थं परित्यज्य समर्थाः परिभुञ्जते ।
ENMSS@3703@2नृपाणां नास्ति दायाद्यं वीरभोग्या वसुन्धरा ॥ ३७०३॥

ENMSS@3704@1असमये मतिरुन्मिषति ध्रुवं करगतैव गता यदियं कुहूः ।
ENMSS@3704@2पुनरुपैति निरुध्य निवास्यते सखि मुखं न विधोः पुनरीक्ष्यते ॥ ३७०४॥
ENMSS@3705@1असमर्थाः प्रकुर्वन्ति मुनयोऽप्यर्थसंचयम् ।
ENMSS@3705@2किं न कुर्वन्ति भूपाला येषां कोशवशाः प्रजाः ॥ ३७०५॥
ENMSS@3706@1असमर्थो भवेत् साधुर्निर्धनो ब्रह्मचार्यपि ।
ENMSS@3706@2व्याधिमान् देवपूजी च कुरूपा च पतिव्रता ॥ ३७०६॥
ENMSS@3707@1असमसमरसम्पल्लम्पटानां भटानाम् अवधिरवधि युद्धे येन हम्पीरवीरः ।
ENMSS@3707@2स किल सकलदृप्तक्षत्रनक्षत्रलक्ष्मी- हरणकिरणमाली कस्य न स्यान् नमस्यः ॥ ३७०७॥
ENMSS@3708@1असमसाहससुव्यवसायिनः सकललोकचमत्कृतिकारिणः ।
ENMSS@3708@2यदि भवन्ति न वाञ्छितसिद्धयो हतविधेरयशो न मनस्विनः ॥ ३७०८॥
ENMSS@3709@1असमाने समानत्वं भविता कलहे मम ।
ENMSS@3709@2इति मत्वा ध्रुवं मानी मृगात् सिंहः पलायते ॥ ३७०९॥
ENMSS@3710@1असमापितकृत्यसंपदां हतवेगं विनयेन तावता ।
ENMSS@3710@2प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥ ३७१०॥
ENMSS@3711@1असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
ENMSS@3711@2अनाक्रम्य जगत् कृत्स्नं नो संध्यां भजते रविः ॥ ३७११॥
ENMSS@3712@1असमैः समीयमानः समैश्च परिहीयमाणसत्कारः ।
ENMSS@3712@2अधुरि विनियुज्यमानस्त्रिभिरर्थपतिं त्यजति भृत्यः ॥ ३७१२॥
ENMSS@3713@1असम्यगुपयुक्तं हि ज्ञानं सुकुशलैरपि ।
ENMSS@3713@2उपलभ्याप्यविदितं विदितं चाप्यनुष्ठितम् ॥ ३७१३॥
ENMSS@3714@1असहायः पुमानेकः कार्यान्तं नाधिगच्छति ।
ENMSS@3714@2तुषेणापि विनिर्मुक्तस्तण्डुलो न प्ररोहति ॥ ३७१४॥
ENMSS@3715@1असहायः समर्थोऽपि तेजस्वी किं करिष्यति ।
ENMSS@3715@2रामः सुग्रीवसाहाय्यात् लङ्कां निर्दग्धवान् पुरा ॥ ३७१५॥
ENMSS@3716@1असहायः समर्थोऽपि तेजस्व्यपि करोति किम् ।
ENMSS@3716@2निवाते पतितो वह्निः स्वयमेवोपशाम्यति ॥ ३७१६॥
ENMSS@3717@1असहायः समर्थोऽपि न कार्यं कर्तुमर्हति ।
ENMSS@3717@2तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥ ३७१७॥

ENMSS@3718@1असहायः सहायार्थी मामनुध्यातवान् ध्रुवम् ।
ENMSS@3718@2पीड्यमानः शरैस्तीक्ष्णैर्द्रोणद्रौणिकृपादिभिः ॥ ३७१८॥
ENMSS@3719@1असहायस्य कार्याणि सिद्धिं नायान्ति कानिचित् ।
ENMSS@3719@2तस्मात् समस्तकार्येषु सहायो भूपतेर्गतिः ॥ ३७१९॥
ENMSS@3720@1असहायोऽसमर्थो वा तेजस्वी किं करिष्यति ।
ENMSS@3720@2अतृणे पतितो वह्निः स्वयमेवोपशाम्यते ॥ ३७२०॥
ENMSS@3721@1असहाश्चैव विज्ञेयाः प्रभावन्तो विदेहजाः ।
ENMSS@3721@2अङ्गदेशोद्भवास्तीक्ष्णाः सुहस्ताः सुदृढास्तथा ॥ ३७२१॥
ENMSS@3722@1असह्यवातोद्धतरेणुमण्डला प्रचण्डसूर्यातपतापिता मही ।
ENMSS@3722@2न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्धमानसैः ॥ ३७२२॥
ENMSS@3723@1असह्यान्यपि सोढानि गदितान्यप्रियाण्यपि ।
ENMSS@3723@2स्थितः परगृहद्वारि तृष्णे निवृत्तिमाप्नुहि ॥ ३७२३॥
ENMSS@3724@1असाधना वित्तहीना बुद्धिमन्तः सुहृन्मताः ।
ENMSS@3724@2साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥ ३७२४॥
ENMSS@3725@1असाधुः साधुर्वा भवति खलु जात्यैव पुरुषो न सङ्गाद् दौर्जन्यं न हि सुजनता कस्यचिदपि ।
ENMSS@3725@2प्ररूढे संसर्गे मणिभुजगयोर्जन्मजनिते मणिर्नाहेर्दोषान् स्पृशति न तु सर्पो मणिगुणान् ॥ ३७२५॥
ENMSS@3726@1असाधु परिगन्तव्यं न च साधु च संवलम् ।
ENMSS@3726@2संवलं कुरु यत्नेन मरणं ध्रुवनिश्चयम् ॥ ३७२६॥
ENMSS@3727@1असाध्यं नारभेत् प्राज्ञः अकार्यं नैव कारयेत् ।
ENMSS@3727@2अनृतं नैव जल्पेत अभक्ष्यं नैव भक्षयेत् ॥ ३७२७॥
ENMSS@3728@1असाध्यं शत्रुमालोक्य दायादं तस्य भेदयेत् ।
ENMSS@3728@2राज्यकामं समर्थं च यथा रामो विभीषणम् ॥ ३७२८॥
ENMSS@3729@1असाध्यं साधुमन्त्राणां तीव्रं वाग्विषमुत्सृजत् ।
ENMSS@3729@2द्विजिह्वं वदनं धत्ते दुष्टो दुर्जनपन्नगः ॥ ३७२९॥
ENMSS@3730@1असाध्यमन्यथा दोषं परिच्छिद्य शरीरिणाम् ।
ENMSS@3730@2यथा वैद्यस्तथा राजा शस्त्रपाणिर्विषह्यति ॥ ३७३०॥
ENMSS@3731@1असाध्यायाः सुखं सिद्धिः सिद्धायाश्चानुरञ्जनम् ।
ENMSS@3731@2रक्तायाश्च रतिः सम्यक् कामशास्त्रप्रयोजनम् ॥ ३७३१॥

ENMSS@3732@1असामान्योल्लेखं विरसहृतहेवाकिनमलं विधिं वन्दे निन्दाम्युत बत न

जाने किमुचितम् ।

ENMSS@3732@2अनर्घं निर्माणं ललिततनु यस्येह भवती न यः कृत्वापि त्वां परिहरति

सर्गव्यसनिताम् ॥ ३७३२॥

ENMSS@3733@1असारं संसारं परिमुषितरत्नं त्रिभुवनं निरालोकं लोकं

मरणशरणं बान्धवजनम् ।

ENMSS@3733@2अदर्पं कन्दर्पं जननयननिर्माणमफलं जगज्जीर्णारण्यं कथमसि

विधातुं व्यवसितः ॥ ३७३३॥

ENMSS@3734@1असारः संसारः सरसकदलीसारसदृशो लसद्विद्युल्लेखाचकितचपलं

जीवितमिदम् ।

ENMSS@3734@2यदेतत् तारुण्यं नगगतनदीवेगसदृशम् अहो धार्ष्ट्यं पुंसां तदपि

विषयान् धावति मनः ॥ ३७३४॥

ENMSS@3735@1असारः सर्वतः सारो वाचा सारसमुच्चयः ।

ENMSS@3735@2वाचा सा चलिता येन सुकृतं तेन हारितम् ॥ ३७३५॥

ENMSS@3736@1असारभूते संसारे सारं सारङ्गलोचना ।

ENMSS@3736@2तदर्थं धनमिच्छन्ति तत्त्यागे च धनेन किम् ॥ ३७३६॥

ENMSS@3737@1असारभूते संसारे सारभूता नितम्बिनी ।

ENMSS@3737@2इति संचिन्त्य वै शंभुरर्धाङ्गे कामिनीं दधौ ॥ ३७३७॥

ENMSS@3738@1असाराः सन्त्येते विरतिविरसा वाथ विषया जुगुप्सन्तां यद् वा ननु

सकलदोषास्पदमिति ।

ENMSS@3738@2तथाप्यन्तस्तत्त्वप्रणिहितधियामप्यतिबलस्तदीयोऽनाख्येयः स्फुरति

हृदये कोऽपि महिमा ॥ ३७३८॥

ENMSS@3739@1असारे खलु संसारे सारं श्वशुरमन्दिरम् ।

ENMSS@3739@2क्षीराब्धौ च हरिः शेते शिवः शेते हिमालये ॥ ३७३९॥

ENMSS@3740@1असारे खलु संसारे सारं श्वशुरमन्दिरम् ।

ENMSS@3740@2हरो हिमालये शेते विष्णुः शेते महोदधौ ॥ ३७४०॥

ENMSS@3741@1असारे खलु संसारे सारमेतच्चतुष्टयम् ।

ENMSS@3741@2काश्यां वासः सतां सङ्गो गङ्गाम्भः शंभुसेवनम् ॥ ३७४१॥

ENMSS@3742@1असारे खलु संसारे सुखभ्रान्तिः शरीरिणाम् ।

ENMSS@3742@2लालापानमिवाङ्गुष्ठे बालानां स्तन्यविभ्रमः ॥ ३७४२॥

ENMSS@3743@1असारे बत संसारे कर्मतन्त्रः शरीरिणाम् ।
ENMSS@3743@2जायन्ते प्रियसंयोगा वियोगे हृदयच्छिदः ॥ ३७४३॥
ENMSS@3744@1असारे संसारे विषमविषपाके नृपसुखे कृतान्तेनाचान्ते प्रकृतिचपले जीवितबले ।
ENMSS@3744@2ध्रुवापाये काये विषयमृगतृष्णाहतहृदः क्षरप्राणैः प्राणानहह परिमुष्णन्ति कुधियः ॥ ३७४४॥
ENMSS@3745@1असारे संसारे सुमतिशरणे काव्यकरणे यथेष्टं चेष्टन्ते कति न कवयः स्वस्वरुचयः ।
ENMSS@3745@2परं दुग्धस्निग्धं मधुररचनं यस्तु वचनं प्रसूते ब्रूते वा भवति विरलः कोऽपि सरलः ॥ ३७४५॥
ENMSS@3746@1असारो निर्गुणो वक्रश्चित्ररूपतयान्वितः ।
ENMSS@3746@2अवाप न चिराद् भ्रंशं शक्रचापः खलो यथा ॥ ३७४६॥
ENMSS@3747@1असावधाने पाण्डित्यं क्रयक्रीतं च मैथुनम् ।
ENMSS@3747@2भोजनं च पराधीनं तिस्रः पुंसां विडम्बनाः ॥ ३७४७॥
ENMSS@3748@1असावनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्नपि ।
ENMSS@3748@2उपैति शुष्यन् कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम् ॥ ३७४८॥
ENMSS@3749@1असावनुपनीतोऽपि वेदानधिजगे गुरोः ।
ENMSS@3749@2स्वभावशुद्धः स्फटिको न संस्कारमपेक्षते ॥ ३७४९॥
ENMSS@3750@1असावन्तश्चञ्चद्विकचनवलीलाब्जयुगल-स्तलस्फूर्जत्कम्बुर्विलसदलिसंघात उपरि ।
ENMSS@3750@2विना दोषासङ्गं सततपरिपूर्णाखिलकलः कुतः प्राप्तश्चन्द्रो विगलितकलङ्कः सुमुखि ते ॥ ३७५०॥
ENMSS@3751@1असावहं लोहमयी स यस्याः क्रूरः सखि प्रस्तर एष कान्तः ।
ENMSS@3751@2आकर्षकद्रावकचुम्बकेषु नैकोऽप्यसौ भ्रामक इत्यवैहि ॥ ३७५१॥
ENMSS@3752@1असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
ENMSS@3752@2राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥ ३७५२॥
ENMSS@3753@1असावुद्वेललावण्यरत्नाकरसमुद्भवः ।
ENMSS@3753@2जगद्विजयमाङ्गल्यशङ्खः कुसुमधन्वनः ॥ ३७५३॥
ENMSS@3754@1असावेकद्वित्रिप्रभृतिपरिपाट्या प्रकटयन् कलाः स्वैरं स्वैरं नवकमलकन्दाङ्कुररुचः ।

ENMSS@3754@2पुरन्ध्रीणां प्रेयोविरहदहनोद्दीपितदृशां कटाक्षेभ्यो बिभ्यन्निभृतमिव चन्द्रोऽभ्युदयते ॥ ३७५४॥
ENMSS@3755@1असिः शरा वर्म धनुश्च नोच्चकैर्विविच्य किं प्रार्थितमीश्वरेण ते ।
ENMSS@3755@2अथास्ति शक्तिः कृतमेव याञ्चया न दूषितः शक्तिमतां स्वयंग्रहः ॥ ३७५५॥
ENMSS@3756@1असिजीवी मषीजीवी देवलो ग्रामयाजकः ।
ENMSS@3756@2धावकः पाचकश्चैव षड् विप्राः शूद्रजातयः ॥ ३७५६॥
ENMSS@3757@1असितखुरचतुष्कः श्यामलग्रन्थिपादः स्रवति करसमीपे मूत्रधारां सवेगाम् ।
ENMSS@3757@2दशनचलखलीनः कुक्कुटस्कन्धबन्धः किटिवरकठिनोरुर्दूरगः स्यात् तुरुङ्गः ॥ ३७५७॥
ENMSS@3758@1असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
ENMSS@3758@2लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति ॥ ३७५८॥
ENMSS@3759@1असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।
ENMSS@3759@2अधररुचिरशोभां बन्धुजीवे प्रियाणां पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥ ३७५९॥
ENMSS@3760@1असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्णचारः ।
ENMSS@3760@2पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ॥ ३७६०॥
ENMSS@3761@1असितभुजगशिशुवेष्टितम् अभिनवमाभाति केतकीकुसुमम् ।
ENMSS@3761@2आयसवलयालंकृत- विषाणमिव दन्तिनः पतितम् ॥ ३७६१॥
ENMSS@3762@1असितमेकसुराशितमप्यमून् न पुनरेष विधुर्विशदं विषम् ।
ENMSS@3762@2अपि निपीय सुरैर्जनितक्षयं स्वयमुदेति पुनर्नवमार्णवम् ॥ ३७६२॥
ENMSS@3763@1असितवसनस्रग्संवीता घनागुरुसारवन् मृगमदमषीस्नाता जातां त्वमेव तमस्विनी ।
ENMSS@3763@2अभिसर सुखं दन्तोद्योतं न तन्वि विकासयेः श्वसितमथवा मुञ्चेश्चञ्चद्द्विरेफघनोद्गमम् ॥ ३७६३॥
ENMSS@3764@1असितात्मा सुसंनद्धः समाविष्कृतचापलः ।
ENMSS@3764@2भुजंगकुटिलस्तस्या भ्रूविक्षेपः खलायते ॥ ३७६४॥

ENMSS@3765@1असिद्धसाधनं सद्भिः शासनं दण्ड उच्यते ।
ENMSS@3765@2तं युक्त्यैव नयेद् दण्डं युक्तदण्डः प्रशस्यते ॥ ३७६५॥
ENMSS@3766@1असिधारां विषं वह्निं समत्वे यः प्रपश्यति ।
ENMSS@3766@2मालासुधातुषाराणां स योगी कथ्यते बुधैः ॥ ३७६६॥
ENMSS@3767@1असिधाराक्रमक्रीता वरमेकापि काकिणी ।
ENMSS@3767@2न परभ्रूविनिर्दिष्टा सागरान्तापि मेदिनी ॥ ३७६७॥
ENMSS@3768@1असिधारापथे नाथ शत्रुशोणितपिच्छिले ।
ENMSS@3768@2आजगाम कथं लक्ष्मीर्निर्जगाम कथं यशः ॥ ३७६८॥
ENMSS@3769@1असिधेनुरियं विभाति ते जितसर्वक्षितिपालमण्डला ।
ENMSS@3769@2प्रलये जगतीमिवाशितुं स्फुरती कालकरालजिह्वका ॥ ३७६९॥
ENMSS@3770@1असिन्दूरेण सीमन्तो मा भून्नो योषितामिति ।
ENMSS@3770@2अतः परिहरन्त्याजावसिं दूरेण तेऽरयः ॥ ३७७०॥
ENMSS@3771@1असिमात्रसहायस्य प्रभूतारिपराभवे ।
ENMSS@3771@2अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥ ३७७१॥
ENMSS@3772@1असीव्यद् देहे स्वे पशुपतिरुमाङ्कं समघनो विगुप्तो गोपीभिर्दुहितरमयात् सा कमलभूः ।
ENMSS@3772@2यदादेशादेतज्जगदपि मृगीदृक्परवशं स वश्यः कस्य स्यादहह विषमो मन्मथभरः ॥ ३७७२॥
ENMSS@3773@1असुखमथ सुखं वा कर्मणां पक्तिवेलास्वहह नियतमेते भुञ्जते देहभाजः ।
ENMSS@3773@2तदिह पुरत एव प्राह मौहुर्तिकश्चेत् कथय फलममीषामन्ततः किं ततः स्यात् ॥ ३७७३॥
ENMSS@3774@1असुखैश्च विनालापो गुह्यस्य कथनं तथा ।
ENMSS@3774@2विपद्विमोक्षणं चैव मित्रतायाः फलत्रयम् ॥ ३७७४॥
ENMSS@3775@1असुभिरशुभं त्यक्त्वा देहं निजं किल योगविद् विशति विशदं ज्ञानालोकात् परस्य कलेवरम् ।
ENMSS@3775@2नयनविवरैः सूक्ष्मैः साक्षादहो तव नैपुणं विशसि हृदयं द्रष्टुं स्पष्टं बहिश्च विचेष्टसे ॥ ३७७५॥
ENMSS@3776@1असुभृतां वधमाचरति क्षमाद् वदति वाक्यमसह्यमसूनृतम् ।
ENMSS@3776@2परकलत्रधनान्यपि वाञ्छति न कुरुते किमु मद्यमदाकुलः ॥ ३७७६॥
ENMSS@3777@1असुररचितप्रयत्नाद् विज्ञाता दिविरवञ्चना येन ।

ENMSS@3777@2संरक्षिता मतिमता रत्नवती वसुमती तेन ॥ ३७७७॥

ENMSS@3778@1असुरसमरदक्षैर्वज्रसंधृष्टचापैरनुपमबलवीर्यैः स्वैः कुलैस्तुल्यवीर्यः ।

ENMSS@3778@2रघुरिव स नरेन्द्रो यज्ञविश्रान्तकोशो भव जगति गुणानां भाजनं भ्राजितानाम् ॥ ३७७८॥

ENMSS@3779@1असुरसुरनरेशां यो न भोगेषु तृप्तः कथमिह मनुजानां तस्य भोगेषु तृप्तिः ।

ENMSS@3779@2जलनिधिजलपाने यो न जातो वितृष्णस्तृणशिखरगताम्भम्भःपानतः किं स तृप्येत् ॥ ३७७९॥

ENMSS@3780@1असुरहितमप्यादित्योत्थं विपत्तिमुपागतं दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत् तमः ।

ENMSS@3780@2पठति लुठतीं कण्ठे विद्यामयं मृतजीवनीं यदि न वहते संध्यामौनव्रतव्ययभीरुताम् ॥ ३७८०॥

ENMSS@3781@1असुरो हितमुपदिष्टः प्रह्लादो नारदेन गर्भस्थः ।

ENMSS@3781@2तत्त्वविदुषां वरोऽभूद्- धितोपदेशं सदा श‍ृणुयात् ॥ ३७८१॥

ENMSS@3782@1असुलभा सकलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितम् ।

ENMSS@3782@2अभिमुखीष्विव वाञ्छितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः ॥ ३७८२॥

ENMSS@3783@1असुहृत्ससुहृच्चापि सशत्रुर्मित्रवानपि ।

ENMSS@3783@2सप्रज्ञः प्रज्ञया हीनो दैवेन लभते सुखम् ॥ ३७८३॥

ENMSS@3784@1असूचिभेद्यामासाद्य बालां प्रौढाभिलापिणीम् ।

ENMSS@3784@2हा कष्टं मुषितोऽस्मीति प्रभाते वक्ति कामुकः ॥ ३७८४॥

ENMSS@3785@1असूचीसंचारे तमसि नभसि प्रौढजलद- ध्वनिप्राज्ञंमन्ये पतति पृषतानां निचये ।

ENMSS@3785@2इदं सौदामिन्याः कनककमनीयं विलसितं मुदं च म्लानिं च प्रथयति पथि स्वैरसुदृशाम् ॥ ३७८५॥

ENMSS@3786@1असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि ।

ENMSS@3786@2पादेन नापैक्षत सुन्दरीणां संपर्कमाशिञ्जितनूपुरेण ॥ ३७८६॥

ENMSS@3787@1असूत सा नागवधूपभोग्यं मैनाकमम्भोनिधिबद्धसख्यम् ।

ENMSS@3787@2क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्राववेदनाज्ञं कुलिशक्षतानाम् ॥ ३७८७॥

ENMSS@3788@1असूयको दन्दशूको निष्ठुरो वैरकृन्नरः ।
ENMSS@3788@2स कृच्छ्रं महदाप्नोति नचिरात् पापमाचरन् ॥ ३७८८॥
ENMSS@3789@1असूयया हतेनैव पूर्वोपायोद्यमैरपि ।
ENMSS@3789@2कर्त् णां गृह्यते संपत् सुहृद्भिर्मन्त्रिभिस्तथा ॥ ३७८९॥
ENMSS@3790@1असूयाविष्टे मनसि यदि संपत् प्रवर्तते ।
ENMSS@3790@2तुषाग्निं वायुसम्योगम् इव जानीहि सुव्रत ॥ ३७९०॥
ENMSS@3791@1असूयैकपदं मृत्युरतिवादः श्रियो वधः ।
ENMSS@3791@2अशुश्रूषा त्वरा श्लाघा विद्यायाः शत्रवस्त्रयः ॥ ३७९१॥
ENMSS@3792@1असेकतोऽत्यन्तनिषेकतश्च शाखाविशोषं फलिनो निरूप्य ।
ENMSS@3792@2सप्ताहमात्रं श्रृतमेव सर्पिर्विडङ्गदुग्धाम्बु निषेचनीयम् ॥ ३७९२॥
ENMSS@3793@1असेवके चानुरक्तिर्दानं सप्रियभाषणम् ।
ENMSS@3793@2अनुरक्तस्य चिह्नानि दोषेऽपि गुणसंग्रहः ॥ ३७९३॥
ENMSS@3794@1असेवितेश्वरद्वारम् अदृष्टविरहव्यथम् ।
ENMSS@3794@2अनुक्तक्लीबवचनं धन्यं कस्यापि जीवितम् ॥ ३७९४॥
ENMSS@3795@1असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः ।
ENMSS@3795@2प्रमोदं वो दिश्यात् कपटबटुवेषापनयने त्वराशथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥ ३७९५॥
ENMSS@3796@1असौ गतः सौगत एव यस्मात् कुर्यान् निरालम्बनतां ममैव ।
ENMSS@3796@2सखि प्रियस्ते क्षणिकः किमन्यन् निरात्मकः शून्यतमः स वन्द्यः ॥ ३७९६॥
ENMSS@3797@1असौ गिरेः शीतलकन्दरस्थः पारावतो मन्मथचाटुदक्षः ।
ENMSS@3797@2धर्मालसाङ्गीं मधुराणि कूजन् संवीजते पक्षपुटेन कान्ताम् ॥ ३७९७॥
ENMSS@3798@1असौजन्यश्चेतोभवसमुचितं भावयति तद् वृथा संसारेऽस्मिन्नहह समयं किं गमयसि ।
ENMSS@3798@2चिराद् भूयो भूयः कलयसि सखेदो भवसुखं ततो मन्ये त्यागात् प्रभवति
परा निर्वृतिरिति ॥ ३७९८॥
ENMSS@3799@1असौ नास्तीवेन्दुः क्वचिदपि रविः प्रोषित इव ग्रहोडूनां चक्रं नभसि लिखितप्रोञ्छितमिव ।
ENMSS@3799@2अहर्वा रात्रिर्वा द्वयमपि प्रलुप्तप्रविचयं घनैर्बद्धव्यूहैः किमिदमतिघोरं व्यवसितम् ॥ ३७९९॥

ENMSS@3800@1असौ बिभ्रत्ताम्रत्विषमुदयशैलस्य शिरसि स्खलन् प्रालेयांशुर्यदि भवति मत्तो हलधरः ।

ENMSS@3800@2तदानीमेतत् तु प्रतिनवतमालद्युतिहरं तमोऽपि व्यालोलं विगलति तदीयं
निवसनम् ॥ ३८००॥

ENMSS@3801@1असौभाग्यं धत्ते परमसुखभोगास्पदमयं विचित्रं तद्गेहं भवति पृथुकार्तस्वरमयम् ।

ENMSS@3801@2निविष्टः पल्यङ्के कलयति स कान्तारतरणं प्रसादं कोपं वा जननि भवती यत्र तनुते ॥ ३८०१॥

ENMSS@3802@1असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः ।

ENMSS@3802@2वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः ॥ ३८०२॥

ENMSS@3803@1असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः ।

ENMSS@3803@2तमिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ॥ ३८०३॥

ENMSS@3804@1असौ महेन्द्रद्विपदानगन्धिस्त्रिमार्गगावीचिविमर्दशीतः ।

ENMSS@3804@2आकाशवायुर्दिनयौवनोत्थान् आचामति स्वेदलवान् मुखे ते ॥ ३८०४॥

ENMSS@3805@1असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च ।

ENMSS@3805@2यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ॥ ३८०५॥

ENMSS@3806@1असौ रसौचित्यगुणोज्ज्वलोऽपि गुम्फो न काव्यव्यपदेशयोग्यः ।

ENMSS@3806@2धत्ते खलस्यापि न दुर्विषह्य- द्वेषग्रहोत्सारणमन्त्रतां यः ॥ ३८०६॥

ENMSS@3807@1असौ विद्याशाली शिशुरपि विनिर्गत्य भवनाद् इहायातः संप्रत्यविकलशरच्चन्द्रवदनः ।

ENMSS@3807@2यदालोकस्थाने भवति पुरमुन्मादतरलैः कटाक्षैर्नारीणां कुवलयितवातायनमिव ॥ ३८०७॥

ENMSS@3808@1असौ समरसाहसं वितनुतेऽग्रिमश्रेयसे मुकुन्दममुमात्मनि स्थिरयितुं न किं वाञ्छति ।

ENMSS@3808@2अतः परतरं कुतः प्रतरणाय वारांनिधेर्निदानमिह संसृतेः सुखसृतेश्च किं कारणम् ॥ ३८०८॥

ENMSS@3809@1असौ समालोकितकाननान्तरे विकीर्णविस्पष्टमरीचिकेसरः ।

ENMSS@3809@2विनिर्गतः सिंह इवोदयाचलाद् गृहीतनिष्पन्दमृगो निशाकरः ॥ ३८०९॥

ENMSS@3810@1असौ हि दत्त्वा तिमिरावकाशम् अस्तं व्रजत्युन्नतकोटिरिन्दुः ।

ENMSS@3810@2जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टम् ॥ ३८१०॥

ENMSS@3811@1असौ हि रामा रतिविग्रहप्रिया रहःप्रगल्भा रमणं रहोगतम् ।
ENMSS@3811@2रतेन शत्रौ रमयेत् परेन वा नो चेदुदेष्यत्यरुणः पुरो रिपुः ॥ ३८११॥
ENMSS@3812@1असौ हि संकेतसमुत्सुकाभिर्विलासिनीभिर्मदनातुराभिः ।
ENMSS@3812@2सरोषदृष्टः स्फुरिताधराभिर्द्रुतं रविर्भीत इवास्तमेति ॥ ३८१२॥
ENMSS@3813@1अस्तंगतभारविरवि कालवशात् कालिदासविधुविधुरम् ।
ENMSS@3813@2निर्वाणबाणदीपं जगदिदमद्योति रत्नेन ॥ ३८१३॥
ENMSS@3814@1अस्तं गतवति सवितरि पायसपिण्डं सुधाकरं प्राची ।
ENMSS@3814@2व्यरचयदम्बरकुशभुवि चरति कलङ्कस्तदन्तरे काकः ॥ ३८१४॥
ENMSS@3815@1अस्तं गतवति सवितरि भर्तरि मधुपं निवेश्य कोशान्ते ।
ENMSS@3815@2कमलिन्योऽपि रमन्ते किमत्र चित्रं मृगाक्षीणाम् ॥ ३८१५॥
ENMSS@3816@1अस्तंगते दिवानाथे नलिनी मधुपच्छलात् ।
ENMSS@3816@2गिलन्ति स्वविनाशाय गुटिकां कालकूटजाम् ॥ ३८१६॥
ENMSS@3817@1अस्तंगते निजरिपावपि कुम्भयोनौ संकोचमाप जलधिर्न तु माद्यति स्म ।
ENMSS@3817@2गम्भीरतागुणचमत्कृतविष्टपानां शत्रुक्षयेऽपि महतामुचितं ह्यदः स्यात् ॥ ३८१७॥
ENMSS@3818@1अस्तंगते भास्वति नान्धकारान् शनैश्चरो हन्ति विधौ बुधश्च ।
ENMSS@3818@2पितुर्गुणैर्न प्रतिभाति पुत्रो गुणान्वितो यः स गुणेन भाति ॥ ३८१८॥
ENMSS@3819@1अस्तंगतोऽयमरविन्दवनैकबन्धुर्भास्वान्न लङ्घयति कोऽपि विधिप्रणीतम् ।
ENMSS@3819@2हे चक्र धैर्यमवलम्ब्य विमुञ्च शोकं धीरास्तरन्ति विपदं न तु दीनचित्ताः ॥ ३८१९॥
ENMSS@3820@1अस्तं भास्वति लोकलोचनकलालोके गते भर्तरि स्त्रीलोकोचितमाचरन्ति सुकृतं वह्नौ विलीय त्विषः ।
ENMSS@3820@2अप्येतास्तु चिकीर्षयेव तपसांताराक्षमाला दिशो मन्ये खञ्जनकण्ठकोमलतमःकृष्णाजिनं बिभ्रति ॥ ३८२०॥
ENMSS@3821@1अस्तं मुक्तिरुपैतु यत्र न तनूसाध्या हरेर्भक्तयस्तन्नः संसृतिरेधतां निरवधिर्यस्याः प्रसादोदयात् ।
ENMSS@3821@2मूर्ध्नि श्रीपुरुषोत्तमप्रणतयः श्रीरामनामानने हृद्देशे यदुनन्दनस्य जलदश्यामाभिरामाकृतिः ॥ ३८२१॥
ENMSS@3822@1अस्तं यतापि किल मस्तकवर्तिनासावस्ताचलोऽहिमरुचा रुचिमप्यलम्भि ।

ENMSS@3822@2प्रायः परोपकृतये कृतिनोऽनेपेक्ष्य स्वार्थं विपत्कवलिता अपि भावयन्ति ॥ ३८२२॥
ENMSS@3823@1अस्तं यातस्तिमिरपटलीदत्तभङ्गः पतंगः प्राप्तो नैवोदयगिरिशिरोमूलमेणावचूलः ।
ENMSS@3823@2तत्ते कालं कतिपलमयं भाति खद्योतपोत द्योतं द्योतं पुनरपि पुनर्द्योततां को विलम्बः ॥ ३८२३॥
ENMSS@3824@1अस्तं शशी याति शशाङ्कवदने मानं विमुञ्चाधुना किं मानेन मुधा नतभ्रु गगनाद् भ्रश्यन्त्यमूस्तारकाः ।
ENMSS@3824@2इत्थं त्वामनुशिक्षयन् क्षितितलादुन्नम्य पादं शनैः क्षीणां वीक्ष्य निशां निसर्गसुभगं गायत्यसौ कुक्कुटः ॥ ३८२४॥
ENMSS@3825@1अस्तग्रस्तगभस्तिमत्करततिन्यङ्गीतचञ्चूपुटी पाटीराद्रिमथो हिमाचलमधः प्रक्षिप्य पक्षद्वयम् ।
ENMSS@3825@2पश्चादुन्नतपुच्छपुञ्जमुदयत्प्राचीप्रकाशच्छलाद् अण्डं मण्डलमैन्दवं जनयति व्यक्तं बकोटीवियत् ॥ ३८२५॥
ENMSS@3826@1अस्तप्रत्युपकारगन्धमकृतस्वप्रार्थनापेक्षम- प्यम्भोभिर्भुवमार्द्रयन्ति जलदा जीवन्त्यमी जन्तवः ।
ENMSS@3826@2दैवज्ञः पुनरस्ति वृष्टिरिति वागेका मयोक्तेति यद् विश्वं क्रीतमिवाधिगच्छति तदेवाघूर्णते मर्मणि ॥ ३८२६॥
ENMSS@3827@1अस्तब्धः पूजयेन् मान्यान् गुरून् सेवेदमायया ।
ENMSS@3827@2अर्चेद् देवान्नदम्भेन श्रियमिच्छेदकुत्सिताम् ॥ ३८२७॥
ENMSS@3828@1अस्तब्धतामचापल्यं वैराणां चाप्यकर्तृताम् ।
ENMSS@3828@2प्रत्यक्षतो विजानीयाद् भद्रतां क्षुद्रतामपि ॥ ३८२८॥
ENMSS@3829@1अस्तब्धमक्लीबमदीर्घसूत्रं सानुक्रोशं श्लक्ष्णमहार्यमन्यैः ।
ENMSS@3829@2अरोगजातीयमुदारवाक्यं दूतं वदन्त्यष्टगुणोपपन्नम् ॥ ३८२९॥
ENMSS@3830@1अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा ।
ENMSS@3830@2पीनस्तनस्थिताताम्रकम्रवस्त्रेव वारुणी ॥ ३८३०॥
ENMSS@3831@1अस्तमितविषयसङ्गा मुकुलितनयनोत्पला मृदुश्वसिता ।
ENMSS@3831@2ध्यायति किमप्यलक्ष्यं नित्यं योगाभियुक्तेव ॥ ३८३१॥
ENMSS@3832@1अस्तमीयुषि निशाकरे सती रागतोऽतिविधुरा कुमुद्वती ।
ENMSS@3832@2षद्पदं गरलमग्रहीन् मुखे संमुखेऽपि खगशब्दवारिता ॥ ३८३२॥
ENMSS@3833@1अस्तव्यस्तमितस्ततः पथि पतन् मद्यं महादुद्वमन् हस्ताभ्यां मुखमक्षिकाः

परिणुदन् गालीर्गदन् गद्गदन् ।

ENMSS@3833@2उत्तालैः शिशुभिर्भृशं वलयितो बीभत्समूर्तिर्महान् मत्तो दक्षिणतः क्षणं क्षिप दृशं मत्तोऽयमागच्छति ॥ ३८३३॥

ENMSS@3834@1अस्तव्यस्तसमीरकम्पिततया दृष्टेस्तिरस्कारिणीं हस्तेनालकवल्लरीमकुटिलामानीय कर्णान्तिकम् ।

ENMSS@3834@2उद्वीक्ष्य प्रियमार्गमध्वगवधूरस्तं गते भास्वति छिन्नाशा स्वनिवेशमेति शनकैः स्वप्रेक्षणाशंसिनी ॥ ३८३४॥

ENMSS@3835@1अस्तव्यस्तान् क्रमततगतीन् पत्रिमालातरङ्गान् वेणीदण्डानिव धृतवती मुक्तसंध्याङ्गरागा ।

ENMSS@3835@2ध्वान्तम्लानांशुकपरिचयच्छन्नलावण्यशोच्या द्यौः प्रत्यग्रद्युमणिविरहाद्वान्तमक्ष्णोर्न याति ॥ ३८३५॥

ENMSS@3836@1अस्ताद्रिपार्श्वमुपजग्मुषि तिग्मभासि जानीत शीतकिरणोऽभ्युदितो न वेति ।

ENMSS@3836@2चारा इवाथ रजनीतिमिरप्रयुक्ताश्चेरुश्चिरं चरणभूमिषु चञ्चरीकाः ॥ ३८३६॥

ENMSS@3837@1अस्ताद्रिशिरोविनिहित- रविमण्डलसरसयावघट्टाङ्कम् ।

ENMSS@3837@2नयतीव कालकौलः क्वापि नभःसैरिभं सिद्ध्यै ॥ ३८३७॥

ENMSS@3838@1अस्ताभिमुखे सूर्ये उदिते संपूर्णमण्डले चन्द्रे ।

ENMSS@3838@2गमनं बुधस्य लग्ने उदितास्तमिते च केतौ ॥ ३८३८॥

ENMSS@3839@1अस्तावलम्बिरविबिम्बतयोदयाद्रि- चूडोन्मिषत्सकलचन्द्रतया च सायम् ।

ENMSS@3839@2संध्याप्रनृत्तहरहस्तगृहीतकांस्य- तालद्वयेव समलक्ष्यत नाकलक्ष्मीः ॥ ३८३९॥

ENMSS@3840@1अस्ताविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः ।

ENMSS@3840@2प्रचलच्चिपिटविषाणा करटाः खरसदृशवर्णाश्च ॥ ३८४०॥

ENMSS@3841@1अस्ति कारणमव्यक्तं सर्वव्यापि परापरम् ।

ENMSS@3841@2सांनिध्यादपि दुर्ग्राह्यं विश्वमूर्त्योपलक्षितम् ॥ ३८४१॥

ENMSS@3842@1अस्ति कोऽपि तिमिरस्तनंधयः किंचिदञ्चितपदं स गायति ।

ENMSS@3842@2यन्मनागपि निशम्य का वधूर्नावधूतहृदयोपजायते ॥ ३८४२॥

ENMSS@3843@1अस्ति ग्रीवा शिरो नास्ति द्वौ भुजौ करवर्जितौ ।

ENMSS@3843@2सीताहरणसामर्थ्यो न रामो न च रावणः ॥ ३८४३॥

ENMSS@3844@1अस्ति जलं जलराशौ क्षारं तत् किं विधीयते तेन ।

ENMSS@3844@2लघुरपि वरं स कूपो यत्राकण्ठं जनः पिबति ॥ ३८४४॥

ENMSS@3845@1अस्ति पुत्रो वशे यस्य भृत्यो भार्या तथैव च ।

ENMSS@3845@2अभावे सति संतोषः स्वर्गस्थोऽसौ महीतले ॥ ३८४५॥

ENMSS@3846@1अस्ति भयमस्ति कौतुकम् अस्ति च मन्दाक्षमस्ति चोत्कण्ठा ।

ENMSS@3846@2बालानां प्रणयिजने भावः कोऽप्येष नैकरसः ॥ ३८४६॥

ENMSS@3847@1अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम् ।

ENMSS@3847@2मोदते न तु हंसस्य मानसं मानसं विना ॥ ३८४७॥

ENMSS@3848@1अस्ति श्रीस्तनपत्रभङ्गमकरीमुद्राङ्कितोरःस्थलो देवः

सर्वजगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः ।

ENMSS@3848@2क्रीडाक्रोडतनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भूर्भाति स्म

प्रलयाब्धिपल्वलतलोत्खातैकमुस्ताकृतिः ॥ ३८४८॥

ENMSS@3849@1अस्ति स्वर्णमयोऽद्रिरस्ति विषयः क्षुत्तृड्जरावर्जितः सन्ति

क्षीरघृताकरा जलधयः सन्ति द्रुमाः कामदाः ।

ENMSS@3849@2किं नस्तच्चरिताद्भुतश्रवणतः साध्यं क्षुधा ताम्यतां दृष्टं

यत्सविधे विधेहि सुमते तत्रैव सर्वं श्रमम् ॥ ३८४९॥

ENMSS@3850@1अस्ति स्वादुफलं किमस्ति किमथाघ्रातुं क्षमः कोरकस्तद्विश्राम्यतु नाम

भोक्तुमुचितं पत्रं किमस्त्यन्ततः ।

ENMSS@3850@2सेव्यो हन्त यदीदृशोऽपि मनुजैर्वृक्षाधमः पिप्पलो दुःस्वातन्त्र्यमिदं

विधेः कथय तत् कस्याग्रतो रुद्यताम् ॥ ३८५०॥

ENMSS@3851@1अस्तीत्येव कृषिं कुर्यात् अस्ति नास्तीति वाणिजम् ।

ENMSS@3851@2नास्तीत्येव ऋणं दद्यात् नाहमस्मीति साहसम् ॥ ३८५१॥

ENMSS@3852@1अस्तु तावदगस्त्येन जह्नोर्महिमनिह्नवः ।

ENMSS@3852@2का कथा तस्य बालस्य विश्वग्रासेऽप्यतृप्यतः ॥ ३८५२॥

ENMSS@3853@1अस्तु स्वस्त्ययनाय दिग्धनपते कैलासशैलाश्रय-

श्रीकण्ठाभरणेन्दुविभ्रमदिवानक्तंभ्रमत्कौमुदी ।

ENMSS@3853@2यत्रालं नलकूबराभिसरणारम्भाय रम्भास्फुरत् पाण्डिम्नैव तनोस्तनोति

विरहव्यग्रापि वेशग्रहम् ॥ ३८५३॥

ENMSS@3854@1अस्ते शिवा पश्चिमायां परचक्रभयाय सा ।

ENMSS@3854@2शुभा कुबेरदिश्यस्ते ग्रामान्तः शून्यकारिणी ॥ ३८५४॥

ENMSS@3855@1अस्तोकविस्मयमपस्मृतपूर्ववृत्तम् उद्भूतनूतनभयज्वरजर्जरं नः ।

ENMSS@3855@2एकक्षणत्रुटितसंघटितप्रमोहम् आनन्दशोकशबलत्वमुपैति चेतः

॥ ३८५५॥

ENMSS@3856@1अस्तोदयाचलविलम्बिरवीन्दुबिम्ब- व्याजात् क्षणं श्रवणयोर्निहितारविन्दा
।

ENMSS@3856@2ताराच्छलेन कुसुमानि समुत्क्षिपन्ती संध्येयमागतवती प्रमदेव काचित्

॥ ३८५६॥

ENMSS@3857@1अस्तोदयाद्रिगतमर्कशशाङ्कबिम्बम् अह्नोऽतिवार्धकदशामवलम्बितस्य
।

ENMSS@3857@2ताराक्षराणि पठितुं तपनीयशैल- नासावसक्तमुपनेत्रमिवाबभासे

॥ ३८५७॥

ENMSS@3858@1अस्तोपधानविनिहित- रविबिम्बशिरोनिकुञ्चितदिगङ्गः ।

ENMSS@3858@2वस्तेऽन्धकारकम्बलम् अम्बरशयने दिनाध्वन्यः ॥ ३८५८॥

ENMSS@3859@1अस्त्यत्रैव किलार्णवे तदमृतं तत्रैव हालाहलः सन्त्यस्मिन् मलये
पटीरतरवस्तत्रैव वाताशनाः ।

ENMSS@3859@2यद्यद्वस्त्वभिजातमस्ति सविधे तत्तद् दुरापं नृणां प्राप्तव्यं
रसनाञ्चले करतले भाले च वेधा न्यधात् ॥ ३८५९॥

ENMSS@3860@1अस्त्यद्यापि चतुःसमुद्रपरिखापर्यन्तमुर्वीतलं वर्तन्तेऽपि च तत्र
तत्र रसिका गोष्ठीषु सक्ता नृपाः ।

ENMSS@3860@2एकस्तत्र निरादरो भवति चेदन्यो भवेत् सादरो वाग्देवी वदनाम्बुजे
वसति

चेत् को नाम दीनो जनः ॥ ३८६०॥

ENMSS@3861@1अस्त्यप्रतिसमाधेयं स्तनद्वन्द्वस्य दूषणम् ।

ENMSS@3861@2स्फुटतां कञ्चुकानां यन् नायात्यावरणीयताम् ॥ ३८६१॥

ENMSS@3862@1अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।

ENMSS@3862@2पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥ ३८६२॥

ENMSS@3863@1अस्त्येकं भुवनं सूक्ष्मं क्षमध्वे यत्र वीक्षितुम् ।

ENMSS@3863@2विषयांश्चित्रविद्यायाश्चित्राणां चलतां तथा ॥ ३८६३॥

ENMSS@3864@1नाटकाख्यायिकानां च शक्यान् सर्वविधानपि ।

ENMSS@3864@2स्फुरणा जायते प्रायस्तत एव कलाकृताम् ॥ ३८६४॥

ENMSS@3865@1अस्त्येव भूभृतां मूर्ध्नि दिवि वा द्योततेऽम्बुदः ।

ENMSS@3865@2मरुद्भिर्भज्यमानोऽपि स किमेति रसातलम् ॥ ३८६५॥

ENMSS@3866@1अस्त्येवोद्दामदावानलविकलतरं काननं यत्र तत्र प्रौढोत्तापाभिभूतं

जगदपि सकलं निर्जला एव नद्यः ।

ENMSS@3866@2किं रे निर्लज्ज गर्जं कलयसि बहुशस्तर्जयन् पान्थबालाः पर्जन्य त्वाममी किं क्वचिदपि गणयन्त्यम्बुदत्वेन लोकाः ॥ ३८६६॥

ENMSS@3867@1अस्त्रं विमुच्य सकलं प्रथमप्रयोगे भूयोऽपि हन्तुमबलां विहितोद्यमस्य ।

ENMSS@3867@2पुष्पायुधस्य वपुरेव तदीयमेकं लक्ष्यं च हन्त शरधिश्च तदा बभूव ॥ ३८६७॥

ENMSS@3868@1अस्त्रं स्त्री वामनो मर्त्यः पशुरेभ्योऽथवेतरः ।

ENMSS@3868@2विधियोगाद् भवेत् कामं पौरुषं न परित्यजेत् ॥ ३८६८॥

ENMSS@3869@1अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे सेनानाथे स्थितेऽस्मिन् मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।

ENMSS@3869@2कर्णालं संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्यशङ्कां ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः ॥ ३८६९॥

ENMSS@3870@1अस्त्रप्रयोगखुरलीकलहे गणानां सैन्यैर्वृतोऽपि जित एव मया कुमारः ।

ENMSS@3870@2एतावतापि परिरभ्य कृतप्रसादः प्रादादिमं प्रियगुणो भगवान् गुरुर्मे ॥ ३८७०॥

ENMSS@3871@1अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः कृत्तोत्तमाङ्गे क्षणं व्यूढासृक्सरिति स्वनत्प्रहरणे वर्मोद्वमद्वाह्निनि ।

ENMSS@3871@2आहूयाजिमुखे स कोसलपतिर्भग्ने प्रधाने बले एकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः ॥ ३८७१॥

ENMSS@3872@1अस्त्राणि प्लवगाधिपेन विहिताः पौलस्त्यवक्षःस्थली- संघट्टानलदत्तदावविपदः सीदन्ति भूमीरुहाः ।

ENMSS@3872@2उत्पाट्य प्रहितश्च शैलशिखरो लङ्केन्द्रहस्तावली- निष्पिष्टो निजकुञ्जनिर्झरजलैर्जम्बालपिण्डायते ॥ ३८७२॥

ENMSS@3873@1अस्त्रामास तृणं प्रियाद्रुहि तृणामास स्मरारेर्धनुर्दारामास मुनेः शिलापि नृवरामास स्वयं पादुका ।

ENMSS@3873@2कुल्यामास महार्णवोऽपि कपयो योधांबभूवुस्तदा पौलस्त्यो मशकीबभूव भगवंस्त्वं मानुषामासिथाः ॥ ३८७३॥

ENMSS@3874@1अस्त्रौघप्रसरेण रावणिरसौ यं दुर्यशोभागिनं चक्रे गौतमशापयन्त्रितभुजस्थेमानमाखण्डलम् ।

ENMSS@3874@2कच्छावर्तकुलीरतां गमयता वीर त्वया रावणं तत्संमृष्टमहो विशल्यकरणी जागर्ति सत्पुत्रता ॥ ३८७४॥

ENMSS@3875@1अस्त्वक्षरग्रहविधिर्जनुषां सहस्रैरापाततो भवतु वापि ततोऽर्थबोधः ।

ENMSS@3875@2दुर्वादिकल्पितविकल्पतरङ्गसान्द्रान् दुष्पूर्वपक्षजलधीन् कथमुत्तरेयुः ॥ ३८७५॥

ENMSS@3876@1अस्थानगामिभिरलंकरणैरुपेता भूयः पदस्खलननिह्नुतिरप्रसन्ना ।

ENMSS@3876@2वाणीव कापि कुकवेर्जनहस्यमाना द्राङ्निर्गता निजगृहाद् वनिता मदान्धा

॥ ३८७६॥

ENMSS@3877@1अस्थानाभिनिवेशिता रतिपतेरौचित्यभङ्गो रतेर्वैयर्थ्यं नवयौवनस्य किमपि प्रेम्णः कलङ्काङ्कुरः ।

ENMSS@3877@2सौभाग्यस्य विमानना विगुणता सौन्दर्यसारश्रियः शृङ्गारस्य विडम्बना किमपरं वेश्यारताडम्बरः ॥ ३८७७॥

ENMSS@3878@1अस्थानाभिनिवेशी प्रायो जड एव भवति नो विद्वान् ।

ENMSS@3878@2बालादन्यः कोऽम्भसि जिघृक्षतीन्दोः स्फुरद्बिम्बम् ॥ ३८७८॥

ENMSS@3879@1अस्थाने गमिता लयं हतधियां वाग्देवता कल्पते धिक्काराय पराभवाय महते तापाय पापाय वा ।

ENMSS@3879@2स्थाने तु व्ययिता सतां प्रभवति प्रख्यातये भूतये चेतोनिर्वृतये परोपकृतये प्रान्ते शिवावाप्तये ॥ ३८७९॥

ENMSS@3880@1अस्थाने जनसंकटे मयि मनाक् काञ्चीं समास्कन्दति व्यालोले रशनांशुके

विगलिते नीते च नाभेरधः ।

ENMSS@3880@2धन्योऽयं स करः कुरङ्गकदृशा तस्मिन्नवस्थान्तरे कम्पातङ्ककरंबिताङ्गलतया यस्यावकाशः कृतः ॥ ३८८०॥

ENMSS@3881@1अस्थाने ताडितो वाजी बहून् दोषानवाप्नुयात् ।

ENMSS@3881@2तावद्भवन्ति ते दोषा यावज्जीवत्यसौ हयः ॥ ३८८१॥

ENMSS@3882@1अस्थानेऽभिनिविष्टान् मूर्खानस्थान एव संतुष्टान् ।

ENMSS@3882@2अनुवर्तन्ते धीराः पितर इव क्रीडतो बालान् ॥ ३८८२॥

ENMSS@3883@1अस्थाने ह्यपि च स्थाने सततं चानुगामिनि ।

ENMSS@3883@2क्रुद्धो दण्डान् प्रणयति विविधांस्तेजसा वृतः ॥ ३८८३॥

ENMSS@3884@1अस्थिक्षोदवतीव कुन्दमुकुलैः फुल्लैः पलाशद्रुमैः साङ्गारप्रकरेव

धूमकलुषेवोत्पातिभिः षद्वदैः ।
ENMSS@3884@2रक्ताक्षद्युतिभिः सशेषदहनालातेव पुंस्कोकिलैर्दृष्टा प्राणसमाचितेव पथिकैराराद् वनान्तस्थली ॥ ३८८४॥
ENMSS@3885@1अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः ।
ENMSS@3885@2नास्ति पादद्वयं गाढम् अङ्गमालिङ्गति स्वयम् ॥ ३८८५॥
ENMSS@3886@1अस्थिरं जीवितं लोके यौवनं धनमस्थिरम् ।
ENMSS@3886@2अस्थिरं पुत्रदारादि धर्मः कीर्तिर्द्वयं स्थिरम् ॥ ३८८६॥
ENMSS@3887@1अस्थिरः कुलसंबन्धः सदा विद्या विवादिनी ।
ENMSS@3887@2मदो मोहाय मिथ्यैव मुहूर्तनिधनं धनम् ॥ ३८८७॥
ENMSS@3888@1अस्थिरमनेकरागं गुणरहितं नित्यवक्रदुष्प्रापम् ।
ENMSS@3888@2प्रावृषि सुरेन्द्रचापं विभाव्यते युवतिचित्तमिव ॥ ३८८८॥
ENMSS@3889@1अस्थिरेण शरीरेण स्थिरं कर्म समाचरेत् ।
ENMSS@3889@2अवश्यमेव यास्यन्ति प्राणाः प्राघूर्णका इव ॥ ३८८९॥
ENMSS@3890@1अस्थिवद् दधिवच्चैव शङ्खवद् बकवत् तथा ।
ENMSS@3890@2राजंस्तव यशो भाति पुनः संन्यासिदन्तवत् ॥ ३८९०॥
ENMSS@3891@1अस्थिष्वर्थाः सुखं मांसे त्वचि भोगाः स्त्रियोऽक्षिषु ।
ENMSS@3891@2गतौ यानं स्वरे चाज्ञा सर्वं सत्त्वे प्रतिष्ठितम् ॥ ३८९१॥
ENMSS@3892@1अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
ENMSS@3892@2चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥ ३८९२॥
ENMSS@3893@1जराशोकसमाविष्टं रोगायतनमातुरम् ।
ENMSS@3893@2रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ ३८९३॥
ENMSS@3894@1नदीकूलं यथा वृक्षं वृक्षं वा शकुनिर्यथा ।
ENMSS@3894@2तथा त्यजन्निमं देहं कृच्छ्राद् ग्राहाद् विमुच्यते ॥ ३८९४॥
ENMSS@3895@1अस्थीनि मज्जा शुक्लं च पितुरंशास्त्रयो मताः ।
ENMSS@3895@2रक्तं रोमाणि पललम् अंशा मातुरमी मता ॥ ३८९५॥
ENMSS@3896@1अस्थीन्यस्थीन्यजिनमजिनं भस्म भस्मेन्दुरिन्दुर्गङ्गा गङ्गोरग उरग इत्याकुलाः संभ्रमेण ।
ENMSS@3896@2भूषावेषोपकरणगणप्रापणव्यापृतानां नृत्तारम्भप्रणयिनि शिवे पान्तु वाचो गणानाम् ॥ ३८९६॥
ENMSS@3897@1अस्नाताशी मलं भुङ्क्ते अजपी पूयभक्षणम् ।
ENMSS@3897@2अहुताशी विषं भुङ्क्ते अदाता विषमश्नुते ॥ ३८९७॥

ENMSS@3898@1अस्पृश्यसंगतिमिह प्रविधाय सोढा दण्डाहतीः पटह् बन्धमपि प्रपद्य ।

ENMSS@3898@2दोषं प्रकाशयसि यत्प्रतिरथ्यमेव लोकस्य तद्विमुखतां प्रकटीकरोषि ॥ ३८९८॥

ENMSS@3899@1अस्पृश्योऽस्तु मलीमसोऽस्त्वनियताहारोऽस्त्वतोऽप्युद्भटैर्दोषैरस्तु परःशतैः परिवृतः काकस्ततः का क्षतिः ।

ENMSS@3899@2भुङ्क्ते भोज्यमुपस्थितं समुपहूयैव स्वयं बान्धवान् यः सीदन् क्षुधया विचिन्तय ततो धन्यश्च पुण्यश्च कः ॥ ३८९९॥

ENMSS@3900@1अस्पृष्टे राहुभीत्याहनि निशि च समे कल्मषच्छाययोने हासत्रासाद् विदूरे समुपचितविभावैभवे हृद्यगन्धे ।

ENMSS@3900@2पाथोदाच्छादहीने धरणितलगतादुर्लभे सर्वलोका- ह्लादं चाप्यादधाने सुमुखि तव मुखौपम्यलेशः सुधांशौ ॥ ३९००॥

ENMSS@3901@1अस्मत्पूर्वैः सुरपतिहृतं द्रष्टुकामैस्तुरङ्गं भित्त्वा क्षोणीमगणितबलैः सागरो वर्धितात्मा ।

ENMSS@3901@2सत्कारार्थं तव यदि गिरीनादिशेद् गुप्तपक्षा न श्रान्तोऽपि प्रणयमुचितं नैव बन्धोर्विहन्याः ॥ ३९०१॥

ENMSS@3902@1अस्मत्प्रयाणसमये कुरु मङ्गलानि किं रोदिषि प्रियतमे वद कारणं मे ।

ENMSS@3902@2भोः प्राणनाथ विरहानलतीव्रताप- धूमेन वारि गलितं मम लोचनानाम् ॥ ३९०२॥

ENMSS@3903@1अस्मदीश्वरविश्वासप्रमाणेन प्रभोः कृपा ।

ENMSS@3903@2विधातुं प्रभवेत् कार्यं साहाय्यं च तथैव नः ॥ ३९०३॥

ENMSS@3904@1अस्मद्रिपूणामनिलाशनानां दत्तो निवासः खलु चन्दनेन ।

ENMSS@3904@2इतीव रोषाद् व्यजनस्य वायुर्व्यशोषयच्चन्दनमङ्गसंस्थम् ॥ ३९०४॥

ENMSS@3905@1अस्मद्वैरी शशभृदमुना जीयते ह्यन्धकारः सारङ्गाक्ष्या मुखमनुगतः केशपाशच्छलेन ।

ENMSS@3905@2तं संश्रुत्य प्रगलितमहाः शीतरश्मिस्तदैव प्राप्तः सेवाघटनविधये मालतीदामभङ्ग्या ॥ ३९०५॥

ENMSS@3906@1अस्माकं जलजीविनां जलमिदं सद्वाजिराजिव्रजैः पातव्यं पररक्तरक्तमनसां तृप्तिः पतीनां क्षयः ।

ENMSS@3906@2मत्वैवं किल राजराज नृपते त्वज्जैत्रयात्रोत्सवे मत्सी रोदिति मक्षिका च हसति ध्यायन्ति वैरिस्त्रियः ॥ ३९०६॥

ENMSS@3907@1अस्माकं परमन्दिरस्य चरितं यद्यप्यवाच्यं भवेत् स्वामी त्वं कथयामि तेन भवतः किंचित् प्रियादूषणम् ।

ENMSS@3907@2श्रीमद् राम नृप त्वया रणमुखे पाणिग्रहः सादरं यस्याः सासिलता परस्य हृदये दृष्टा लुठन्ती मया ॥ ३९०७॥

ENMSS@3908@1अस्माकं बत मण्डले प्रथमतः पत्या करः पात्यते काञ्चीकुन्तलमध्यदेशविषयान् संत्यज्य भूरिश्रियः ।

ENMSS@3908@2इत्यालोक्य कुचौ पयोरुहदृशां जातौ सुनीलाननौ नो नीचोऽपि पराभवं

विषहते किं तादृशावुन्नतौ ॥ ३९०८॥

ENMSS@3909@1अस्माकं वदरीचक्रं बदरी च तवाङ्गणे ।

ENMSS@3909@2वादरायणसम्बन्धाद् यूयं यूयं वयं वयम् ॥ ३९०९॥

ENMSS@3910@1अस्माकं व्रतमेतदेव यदयं कुञ्जोदरे जागरः शुश्रूषा मदनस्य वक्रमधुभिः संतर्पणीयोऽतिथिः ।

ENMSS@3910@2निस्त्रिंशाः शतशः पतन्तु शिरसश्छेदोऽथवा जायताम् आत्मीयं कुलवर्त्म पुत्रि न मनागुल्लङ्घनीयं त्वया ॥ ३९१०॥

ENMSS@3911@1अस्माकं सखि वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं नो वक्रा गतिरुद्धतं

न हसितं नैवास्ति कश्चिन्मदः ।

ENMSS@3911@2किन्त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम् ॥ ३९११॥

ENMSS@3912@1अस्माकमङ्गमङ्गं पण्योपनतं महाधननिधानम् ।

ENMSS@3912@2दासीसुताः किमेते स्वादन्ति विटाः प्रसङ्गेन ॥ ३९१२॥

ENMSS@3913@1अस्माकमध्यासितमेतदन्तस्तावद्भवत्या हृदयं चिराय ।

ENMSS@3913@2बहिस्त्वयालंक्रियातमिदानी- मुरो मुरं विद्विषतः श्रियेव ॥ ३९१३॥

ENMSS@3914@1अस्माकमात्मभूर्भूत्वा हन्तास्मानेव हंसि यत् ।

ENMSS@3914@2रे रे कन्दर्प तन्नित्यम् अनङ्गत्वं सदास्तु ते ॥ ३९१४॥

ENMSS@3915@1अस्माकमेकपद एव मरुद्विकीर्ण- जीमूतजालरसितानुकृतिर्निनादः
।

ENMSS@3915@2गम्भीरमङ्गलमृदङ्गसहस्रजन्मा शब्दान्तरग्रहणशक्तिमपाकरोति
॥ ३९१५॥

ENMSS@3916@1अस्मात् परं बत यथाश्रुति संभृतानि को नः कुले निवपनानि नियच्छतीति ।

ENMSS@3916@2नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ति ॥ ३९१६॥

ENMSS@3917@1अस्मादृशां नूनमपुण्यभाजां न स्वोपयोगी न परोपयोगी ।

ENMSS@3917@2सन्नप्यसद्रूपतयैव वेद्यो दारिद्र्यमुद्रो गुणरत्नकोषः ॥ ३९१७॥

ENMSS@3918@1अस्मानवेहि कलमानलमाहतानां येषां प्रचण्डमुसलैरवदाततैव ।

ENMSS@3918@2स्नेहं विमुच्य सहसा खलतां प्रयान्ति ये स्वल्पपीडनवशान्न वयं तिलास्ते ॥ ३९१८॥

ENMSS@3919@1अस्मान् मा भज कालकूटभगिनि स्वप्नेऽपि पद्मालये व्याधीभूय कदर्थयन्ति

बहुशो मातर्विकारा इमे ।

ENMSS@3919@2यच्चक्षुर्न निरीक्षतेच्छविषयं नैवं शृणोति श्रुतिः प्राणा

एव वरं प्रयान्ति न पुनर्निर्यान्ति वाचो बहिः ॥ ३९१९॥

ENMSS@3920@1अस्मान् विचित्रवपुषश्चिरपृष्ठलग्नान् को वा विमुञ्चति सखे यदि वा विमुञ्च ।

ENMSS@3920@2हा हन्त केकिवर हानिरियं तवैव भूपालमूर्धनि पुनर्भविता स्थितिर्नः ॥ ३९२०॥

ENMSS@3921@1अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनस्त्वय्यस्याः

कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।

ENMSS@3921@2सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया भाग्यायत्तमतःपरं

न खलु तद्वाच्यं वधूबन्धुभिः ॥ ३९२१॥

ENMSS@3922@1अस्माभिः कलितं पुरा न भवती भुक्ता नृभिः कैरपि प्रौढा मानवशालिनीति

चलितं चेतः सकामं त्वयि ।

ENMSS@3922@2धिक् त्वां संप्रति सद्भुजङ्गजनतासंश्लेषमातन्वती गम्या सर्वजनस्य

वारवनितेवोत्क्षेपणीयासि नः ॥ ३९२२॥

ENMSS@3923@1अस्माभिः स्मयलोलमौलिफलकैर्मुक्ताविसाराधिपं वेदोद्धारपरः करस्तव

परं दानाम्बुपूतः स्तुतः ।

ENMSS@3923@2किन्तु क्ष्मातिलक क्षमस्व कविभिः किं नाम नालोक्यते दृष्टः स्पष्टतरं

तवापि निभृतः पाणौ स वैसारिणः ॥ ३९२३॥

ENMSS@3924@1अस्माभिश्चतुरम्बुराशिरशनावच्छेदिनीं मेदिनीं भ्राम्यद्भिर्न स कोऽपि

निस्तुषगुणो दृष्टो विशिष्टो जनः ।

ENMSS@3924@2यस्याग्रे चिरसंचितानि हृदये दुःखानि सौख्यानि वा संजल्प्य

क्षणमेकमर्धमथवा निःश्वस्य विश्राम्यते ॥ ३९२४॥

ENMSS@3925@1अस्माल्लोकादूर्ध्वममुष्य चाधो महत्तमस्तिष्ठति ह्यन्धकारम् ।

ENMSS@3925@2तद्वै महामोहनमिन्द्रियाणां बुध्यस्व मा त्वां प्रलभेत राजन् ॥ ३९२५॥

ENMSS@3926@1अस्मिंश्चन्द्रमसि प्रसन्नमहसि व्याकोषकुन्दत्विषि प्राचीनं खमुपेयुषि त्वयि मनाग्दूरं गते प्रेयसि ।

ENMSS@3926@2श्वासः कैरवकोरकीयति मुखं तस्याः सरोजीयति क्षीरोदीयति मन्मथो दृगपि च द्राक् चन्द्रकान्तीयति ॥ ३९२६॥

ENMSS@3927@1अस्मिंस्ते शिरसि तदा कान्ते वैदूर्यस्फटिकसुवर्णाढ्ये ।

ENMSS@3927@2शोभां स्वां न वहति तां बद्धा सुश्लिष्टा कुवलयमालेयम् ॥ ३९२७॥

ENMSS@3928@1अस्मिञ् जगति महत्यपि किमपि न तद्वस्तु वेधसा विहितम् ।

ENMSS@3928@2अनिमित्तवत्सलाया भवति यतो मातुरुपकारः ॥ ३९२८॥

ENMSS@3929@1अस्मिञ् जडे जगति को नु बृहत्प्रमाण- कर्णः करी ननु भवेद् दुरितस्य

पात्रम् ।

ENMSS@3929@2इत्यागतं तमपि योऽलिनमुन्ममाथ मातङ्ग एव किमतःपरमुच्यतेऽसौ

॥ ३९२९॥

ENMSS@3930@1अस्मिञ् जरामरणमृत्युमहातरङ्ग- मिश्रोदधौ महति संपरिवर्तमानः
।

ENMSS@3930@2पुण्यप्लवेन सुकृतेन नरास्तरन्तः संप्राप्य तीरमभयं सुखमाप्नुवन्ति

॥ ३९३०॥

ENMSS@3931@1अस्मिन् कः प्रभवेद्योगो ह्यसंधार्येऽमितात्मनि ।

ENMSS@3931@2लङ्घने कः समर्थः स्याद् ऋते देवं महेश्वरम् ॥ ३९३१॥

ENMSS@3932@1अस्मिन् करीन्द्रकरनिर्गलितारविन्द- कन्दानुकारिणि चिरं रुचिचक्रवाले
।

ENMSS@3932@2कस्मै फलाय कुलटाकुलकोटिहोमं हंहो मृगाङ्क कुरुषे करुणामपास्य

॥ ३९३२॥

ENMSS@3933@1अस्मिन् काले तु यद्युक्तं तदिदानीं विधीयताम् ।

ENMSS@3933@2गतं तु नानुशोचन्ति गतं तु गतमेव हि ॥ ३९३३॥

ENMSS@3934@1अस्मिन् कुञ्जे विनापि प्रचलति पवनं वर्तते कोऽपि नूनं पश्यामः किं

न गत्वेत्यनुसरति गणे भीतभीतेऽर्भकाणाम् ।

ENMSS@3934@2तस्मिन् राधासखो वः सुखयतु विलसन् क्रीडया कैटभारिर्व्यातन्वानो मृगारिप्रबलवुरघुरारावरौद्रोच्चनादान् ॥ ३९३४॥

ENMSS@3935@1अस्मिन् कुटिलकल्लोलदोलाविक्षोभितेऽम्भसि ।

ENMSS@3935@2हास्यहेतुः कथं सेतुः सिकतामुष्टिभिर्भवेत् ॥ ३९३५॥

ENMSS@3936@1अस्मिन् केलिवने सुगन्धपवने क्रीडत्पुरंध्रीजने गुञ्जद्भृङ्गकुले विशालबकुले कूजत्पिकीसंकुले ।

ENMSS@3936@2उन्मीलन्नवपाटलापरिमले मल्लीप्रसूनाकुले यद्येकापि न मालती विकसिता तत्किं न रम्यो मधुः ॥ ३९३६॥

ENMSS@3937@1अस्मिन् दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायति कम्पं सात्त्विकभावश्चति रिपुक्षोणीन्द्रदारा धरा ।

ENMSS@3937@2अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्ध्वं निजः पन्था भास्वति दृश्यते बिलमयः प्रत्यर्थिभिः पार्थिवैः ॥ ३९३७॥

ENMSS@3938@1अस्मिन् नक्तमहर्विवेकविकले कालाधमे नीरदैः संनद्धैरभितो निरुद्धगगनाभोगासु दिग्भित्तिषु ।

ENMSS@3938@2भानोर्न प्रसरन्तु नाम किरणाः किं त्वस्य तेजस्विनः सत्तामात्रपरिग्रहेण विकसन्त्यद्यापि पद्माकराः ॥ ३९३८॥

ENMSS@3939@1अस्मिन्नगृह्यत पिनाकभृता सलीलम् आबद्धवेपथुरधीरविलोचनायाः ।

ENMSS@3939@2विन्यस्तमङ्गलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३९३९॥

ENMSS@3940@1अस्मिन्नभ्युदिते जगत्रयदिशामुल्लासहेतौ दिशाम् आस्यम्लानिहरे सुधारसनिधौ देवे निशास्वामिनि ।

ENMSS@3940@2वक्त्रं मुद्रितमम्बुजन्म भवता चेत् किं ततः शाश्वतं नैतस्येश्वरमौलिमण्डनमणेर्गायन्ति विश्वे यशः ॥ ३९४०॥

ENMSS@3941@1अस्मिन् न निर्गुणं गोत्रे अपत्यमुपजायते ।

ENMSS@3941@2आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥ ३९४१॥

ENMSS@3942@1अस्मिन्नम्भोदवृन्दध्वनिजनितरुषि प्रेक्षमाणेऽन्तरिक्षं मा काक व्याकुलो भूस्तरुशिरसि शवक्रव्यलेशानशान ।

ENMSS@3942@2धत्ते मत्तेभकुम्भव्यतिकरकरजग्रामवज्राग्रजाग्रद् ग्रासव्यासक्तमुक्ताधवलितकवलो न स्पृहामत्र सिंहः ॥ ३९४२॥

ENMSS@3943@1अस्मिन्नीषद्वलितविततस्तोकविच्छिन्नभुग्नः किंचिल्लीलोपचितविभवः

पुञ्जितश्चोत्थितश्च ।

ENMSS@3943@2धूमोद्गारस्तरुणमहिषस्कन्धनीलो दवाग्नेः स्वैरं सर्पन् सृजति गगने गत्वरान् पत्रभङ्गान् ॥ ३९४३॥

ENMSS@3944@1अस्मिन् परस्परद्वेषपरुषे पुरुषायुषे ।

ENMSS@3944@2केवलं मधुरा वाणी ददात्यानीय सौहृदम् ॥ ३९४४॥

ENMSS@3945@1अस्मिन् प्रकीर्णपटवासकृतान्धकारे दृष्टो मनाङ्मणिविभूषणरश्मिजालैः ।

ENMSS@3945@2पातालमुद्यतफणाकृतिशृङ्गकोऽयं मामद्य संस्मरयतीव भुजङ्गलोकः ॥ ३९४५॥

ENMSS@3946@1अस्मिन् प्रकृतिमनोज्ञे लग्ना प्रायेण मान्मथी दृष्टिः ।

ENMSS@3946@2सुन्दरि यतो भवत्याः प्रतिक्षणं क्षीयते मध्यः ॥ ३९४६॥

ENMSS@3947@1अस्मिन् भूवलये जनस्य महिमा भाग्येन संजायते नो तत्रास्ति हि कारणं

प्रयतता नैवाथ कश्चिद् गुणः ।

ENMSS@3947@2काकायाशुचिभोजिने हि वितरत्युच्चैस्तु लोको बलिं मुक्ताहारपरायणाय शुचये नो हन्त हंसाय यत् ॥ ३९४७॥

ENMSS@3948@1अस्मिन् मरौ किमपरं वचसामवाच्यं मा मुञ्च पान्थ मुहुराश्रितवत्सलो भूः ।

ENMSS@3948@2एतत् त्वया जललवामिषलालसेन दृष्टं ज्वलत्परिकरं सिकतावितानम् ॥ ३९४८॥

ENMSS@3949@1अस्मिन् महत्यनवधौ किल कालचक्रे धन्यास्तु ये कतिपये शुकयोगिमुख्याः ।

ENMSS@3949@2लीनास्त्वदङ्घ्रियुगले परिशुद्धसत्त्वास्तानात्मनस्तव नखानवधारयामः ॥ ३९४९॥

ENMSS@3950@1अस्मिन् महामोहमये कटाहे सूर्याग्निना रात्रिदिनेन्धनेन ।

ENMSS@3950@2मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता ॥ ३९५०॥

ENMSS@3951@1अस्मिन् वर्षमहे न वर्तत इदं यत्कामदेवोत्सवे स्थेयं पुत्रि निरन्नया तदधुना किंचिन् मुखे दीयताम् ।

ENMSS@3951@2इत्युक्ते जरतीजनेन कथमप्यध्वन्यवध्वा ततः पर्यस्तेऽहनि कल्पितश्च कवलो धौतश्च धाराश्रुभिः ॥ ३९५१॥

ENMSS@3952@1अस्मिन् वसन्ते न नराः सहन्ते वधूवियोगं च बलासरोगम् ।

ENMSS@3952@2कुरङ्गनाभिद्रवलेपभाभिर्भजन्तु दृप्ताः प्रमदाः प्रलिप्ताः ॥ ३९५२॥

ENMSS@3953@1अस्मिन् सखे ननु मणित्वमहासुभिक्षे चिन्तामणे त्वमुपलो भव मा मणिर्भूः ।

ENMSS@3953@2अद्येदृशा हि मणयः प्रभवन्ति लोके येषां तृणग्रहणकौशलमेव भूषा ॥ ३९५३॥

ENMSS@3954@1अस्मिन् स्थिते विपदभूद् इति संचिन्त्य वर्ज्यते ।

ENMSS@3954@2मूढैः परिवृढैरापत्सेवको मङ्गलेच्छुभिः ॥ ३९५४॥

ENMSS@3955@1अस्मि वीरजननीति जनन्याम् अस्मि वीररमणीति रमण्याम् ।

ENMSS@3955@2संमदं व्यदधदुत्सुकचेतास्तारतूर्यतरलश्चलितोऽन्यः ॥ ३९५५॥

ENMSS@3956@1अस्मि वीरतनया वरवीर- प्रेयसी च कुरु वीरसवित्रीम् ।

ENMSS@3956@2अद्य हृद्यसमरैरिति माता काचिदाह तिलकाक्षतपूर्वम् ॥ ३९५६॥

ENMSS@3957@1अस्मै करं प्रवितरन्तु नृपा न कस्माद् अस्यैव तत्र यदभूत् प्रतिभूः कृपाणः ।

ENMSS@3957@2दैवाद् यदा प्रवितरन्ति न ते तदैव नेदंकृपा निजकृपाणकरग्रहाय ॥ ३९५७॥

ENMSS@3958@1अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्त्तयः ।

ENMSS@3958@2गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरान् मूकानां प्रकरेण कूर्मरमणीदुग्धोदधेः रोधसि ॥ ३९५८॥

ENMSS@3959@1अस्यत्युच्चैः शकलितवपुश्चन्दनो नात्मगन्धं नेक्षुर्यन्त्रैरपि मधुरतां पीड्यमानो जहाति ।

ENMSS@3959@2यद्वत् स्वर्णं न चलति हितं छिन्नघृष्टोपतप्तं तद्वत् साधुः कुजननिहतोऽप्यन्यथात्वं न याति ॥ ३९५९॥

ENMSS@3960@1अस्य दग्धोदरस्यार्थे किं न कुर्वन्ति पण्डिताः ।

ENMSS@3960@2वानरीमिव वाग्देवीं नर्तयन्ति गृहे गृहे ॥ ३९६०॥

ENMSS@3961@1अस्य प्रचण्डभुजदण्डभवः कृशानुश्चण्डांशुचण्डकरजित् सुमहाप्रतापः ।

ENMSS@3961@2प्रत्यर्थिभूपतिपलाशवनं विदह्य प्रौढासु दिक्षु बहुदाहमुरीकरोति ॥ ३९६१॥

ENMSS@3962@1अस्य प्रयाणेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि ।

ENMSS@3962@2कुर्वन्ति सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ॥ ३९६२॥

ENMSS@3963@1अस्य श्रीभोजराजस्य द्वयमेव सुदुर्लभम् ।

ENMSS@3963@2शत्रूणां शृङ्खलैर्लोहं ताम्रं शासनपत्रकैः ॥ ३९६३॥

ENMSS@3964@1अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम् ।

ENMSS@3964@2इदं च मुखमाधुर्यं कथं दूषितमग्निना ॥ ३९६४॥

ENMSS@3965@1अस्यां नेत्रपथं मन्ये गतायां लोलचक्षुषि ।

ENMSS@3965@2भवन्ति पञ्चबाणस्य स्वबाणा एव वैरिणः ॥ ३९६५॥

ENMSS@3966@1अस्यां प्रावृषि चातकैर्जलकणा लब्धा न चेत् किं ततो भाविप्रावृषि दास्यते द्विगुणमित्यभ्र त्वया गम्यते ।

ENMSS@3966@2एतेऽद्यैव लयं व्रजन्ति पृथुकैरेतत् कुलीनो न चेद् एकः प्राणिति तावतैव कृतमस्त्यत्रैव नः संशयः ॥ ३९६६॥

ENMSS@3967@1अस्यां मुनीनामपि मोहमूहे भृगुर्महान् यत्कुचशैलशीली ।

ENMSS@3967@2नानारदाह्लादि मुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः ॥ ३९६७॥

ENMSS@3968@1अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवां स कामः ।

ENMSS@3968@2प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ॥ ३९६८॥

ENMSS@3969@1अस्यां सखे बधिरलोकनिवासभूमौ किं कूजितेन खलु कोकिल कोमलेन ।

ENMSS@3969@2एते हि दैवहतकास्तदभिन्नवर्णं त्वां काकमेव कलयन्ति कलानभिज्ञाः ॥ ३९६९॥

ENMSS@3970@1अस्याः कचानां शिखिनश्च किंनु विधिं कलापौ विमतेरगाताम् ।

ENMSS@3970@2तेनायमेभिः किमपूजि पुष्पैरभर्त्सि दत्त्वा स किमर्धचन्द्रम् ॥ ३९७०॥

ENMSS@3971@1अस्याः कररुहखण्डित- काण्डपटप्रकटनिर्गता दृष्टिः ।

ENMSS@3971@2पटविगलितनिष्कलुषा स्वदते पीयूषधारेव ॥ ३९७१॥

ENMSS@3972@1अस्याः करस्पर्धनगर्धनर्द्धिर्बालत्वमापत् खलु पल्लवो यः ।

ENMSS@3972@2भूयोऽपि नामाधरसाम्यगर्वं कुर्वन् कथं वास्तु न स प्रवालः ॥ ३९७२॥

ENMSS@3973@1अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् ।

ENMSS@3973@2तथैव शोभतेऽत्यर्थम् अस्याः श्रवणकुण्डलम् ॥ ३९७३॥

ENMSS@3974@1अस्याः कान्तस्य रूपस्य सवौपम्यातिशायिनः ।

ENMSS@3974@2एकैव गच्छेत् सादृश्यं स्वच्छाया दर्पणाश्रिता ॥ ३९७४॥

ENMSS@3975@1अस्याः कामनिवासरम्यभवनं वक्त्रं विलोक्यादरान् निश्चित्येव सुधाकरं प्रियतमं भूमीगतं शोभनम् ।

ENMSS@3975@2नासामौक्तिककैतवेन रुचिरा तारापि सा रोहिणी मन्ये तद्विरहासहिष्णुहृदया तत्संनिधिं सेवते ॥ ३९७५॥

ENMSS@3976@1अस्याः कुशेशयदृशः शशिशुभ्रशुभ्रं नासाग्रवर्ति
नवमौक्तिकमाचकास्ति ।
ENMSS@3976@2कैलासमानससरोवरराजहंस्या निःक्षिप्तमण्डमिव जाग्रति पुण्डरीके
॥ ३९७६॥
ENMSS@3977@1अस्याः खलु ग्रन्थिनिबद्धकेश- मल्लीकदम्बप्रतिबिम्बवेषात् ।
ENMSS@3977@2स्मरप्रशस्ती रजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ॥ ३९७७॥
ENMSS@3978@1अस्याः पदौ चारुतया महन्तावपेक्ष्य सौक्ष्म्याल्लवभावभाजः ।
ENMSS@3978@2जाता प्रवालस्य महीरुहाणां जानीमहे पल्लवशब्दलब्धिः ॥ ३९७८॥
ENMSS@3979@1अस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ निर्धौतोऽधरशोणिमा
विलुलितस्रस्तस्रजो मूर्धजाः ।
ENMSS@3979@2काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशोरेभिः
कामशरैस्तदद्भुतमभूद् यन्मे मनः कीलितम् ॥ ३९७९॥
ENMSS@3980@1अस्याः पीठोपविष्टाया अभ्यङ्गं वितनोत्यसौ ।
ENMSS@3980@2लसच्छ्रोणि चलद्वेणि नटद्गुरुपयोधरम् ॥ ३९८०॥
ENMSS@3981@1अस्याः पीनस्तनव्याप्ते हृदयेऽस्मासु निर्दये ।
ENMSS@3981@2अवकाशलवोऽप्यस्ति नात्र कुत्र बिभर्तु नः ॥ ३९८१॥
ENMSS@3982@1अस्याः संयमवान् कचो मधुकरैरभ्यर्थ्यमानो
मुहुर्भृङ्गीगोपनजाभिशापमचिरादुन्मार्ष्टुकामो निजम् ।
ENMSS@3982@2सीमन्तेन करेण कोमलरुचा सिन्दूरबिन्दुच्छलाद्
आतप्तायसपिण्डमण्डलमसावादातुमाकाङ्क्षति ॥ ३९८२॥
ENMSS@3983@1अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
ENMSS@3983@2अमूनि सूनैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥ ३९८३॥
ENMSS@3984@1अस्याः सपक्षैकविधोः कचौघः स्थाने मुखस्योपरि वासमाप ।
ENMSS@3984@2पक्षस्थतावद्बहुचन्द्रकोऽपि कलापिनां येन जितः कलापः ॥ ३९८४॥
ENMSS@3985@1अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तप्रभः शृङ्गारैकरसः
स्वयं नु मदनो मासो नु पुष्पाकरः ।
ENMSS@3985@2वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्
मनोहरमिदं रूपं पुराणो मुनिः ॥ ३९८५॥
ENMSS@3986@1अस्याः सर्गविधौ प्रजापतिरहो चन्द्रो न संभाव्यते नो देवः कुसुमायुधो
न च मधुर्दूरे विरिञ्चः प्रभुः ।
ENMSS@3986@2एतन्मे मतमुत्थितेयममृतात् काचित् स्वयं सिन्धुना या मन्थाचललोडितेन

हरये दत्त्वा श्रियं रक्षिता ॥ ३९८६॥

ENMSS@3987@1अस्याः सुगन्धिनवकुङ्कुमपङ्कदत्तो मुग्धश्चकास्ति तिलको मदिरेक्षणायाः ।

ENMSS@3987@2आविष्टरागमभिराममुखारविन्द- निष्यन्दलग्नमिव मे हृदयं द्वितीयम् ॥ ३९८७॥

ENMSS@3988@1अस्याः स्वेदाम्बुबिन्दुच्युततिलकतया व्यक्तवक्त्रेन्दुकान्तेर्वारंवारेण वेगप्रहणनगणनाकेलिवाचालितायाः ।

ENMSS@3988@2तत्पातोत्पाततालक्रमनमितदृशस्ताण्डवोत्तालताली- लालित्याल्लोभिताः स्मः

प्रतिपदममुना कन्दुकक्रीडितेन ॥ ३९८८॥

ENMSS@3989@1अस्याङ्के कषपट्टभासिचपला श्रीः स्वर्णरेखायते धारासारघनं सुदर्शनमदश्चक्रं जगत्पश्यति ।

ENMSS@3989@2प्रोदश्चद्वनमालमञ्जनरुचा देहेन पीताम्बरं

दूरोन्नीतशिखण्डमण्डलमिदं रूपं हरेरम्बुदः ॥ ३९८९॥

ENMSS@3990@1अस्या धामसरोवरे भुजबिसे वक्त्रारविन्दे भ्रमन् नेत्रभ्रूभ्रमरे सुयौवनजले कस्तूरिकापङ्किले ।

ENMSS@3990@2वक्षोजप्रतिकुम्भिकुम्भदलनक्रोधादुपेत्य द्रुतं मग्नश्चित्तमतंगजः कथमसावुत्थाय निर्यास्यति ॥ ३९९०॥

ENMSS@3991@1अस्याननस्य भवतः खलु कोटिरेषा कण्टारिका यदि भवेदविशीर्णपर्णा ।

ENMSS@3991@2योग्या क्व ते करभ कल्पतरोर्लतायास्ते पल्लवा विमलविद्रुमभङ्गभाजः ॥ ३९९१॥

ENMSS@3992@1अस्याभ्यासाद् ग्रन्थवर्यस्य शिष्यः सर्वज्ञः स्याद् विस्फुरच्चारुबुद्धिः ।

ENMSS@3992@2अर्थं कामं वेत्ति धर्मं च मोक्षं निःसंदेहं शीलितुं पण्डितोऽपि ॥ ३९९२॥

ENMSS@3993@1अस्या मनोहराकारकबरीभारतर्जिताः ।

ENMSS@3993@2लज्जयेव वने वासं चक्रुश्चमरबर्हिणः ॥ ३९९३॥

ENMSS@3994@1अस्यामपूर्व इव कोऽपि कलङ्करिक्तश्चन्द्रोऽपरः किमुत तन्मकरध्वजेन ।

ENMSS@3994@2रोमावलीगुणमिलत्कुचमन्दरेण निर्मथ्य नाभिजलधिं ध्रुवमुद्धृतः स्यात् ॥ ३९९४॥

ENMSS@3995@1अस्या मुखं हिमरुचिर्ननु यद्विधात्रा संपूर्य सर्वमवशेषतयात्र मुक्तः ।

ENMSS@3995@2आश्यानतामुपगतोऽस्य रुचा चकास्ति नासाग्रमौक्तिकमिषादमृतस्य बिन्दुः

॥ ३९९५॥

ENMSS@3996@1अस्या मुखश्रीप्रतिबिम्बमेव जलाच्च तातान्मुकुराच्च मित्रात् ।

ENMSS@3996@2अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित्

॥ ३९९६॥

ENMSS@3997@1अस्या मुखस्यास्तु न पूर्णमास्यं पूर्णस्य जित्वा महिमा हिमांशुम् ।

ENMSS@3997@2भ्रूलक्ष्मखण्डं दधदर्धमिन्दुर्भालस्तृतीयः खलु यस्य भागः

॥ ३९९७॥

ENMSS@3998@1अस्या मुखेन लोकानां हृतपङ्कजकान्तिना ।

ENMSS@3998@2निशासु नाशिता निद्रा कुमुदानामिवेन्दुना ॥ ३९९८॥

ENMSS@3999@1अस्या मुखेनैव विजित्य नित्य- स्पर्धी मिलत्कुङ्कुमरोषभासा ।

ENMSS@3999@2प्रसह्य चन्द्रः खलु नह्यमानः स्यादेव तिष्ठत्परिवेषपाशः ॥ ३९९९॥

ENMSS@4000@1अस्या मुखेन्दावधरः सुधाभूर्बिम्बस्य युक्तः प्रतिबिम्ब एषः ।

ENMSS@4000@2तस्याथवा श्रीर्द्रुमभाजि देशे संभाव्यमानास्य तु विद्रुमे सा ॥ ४०००॥

ENMSS@4001@1अस्यामोषधयो ज्वलन्तु दधतु ज्योतींषि कीटा अपि प्रोन्मीलन्तु भुजङ्गमौलिमणयः क्रीडन्तु दीपाङ्कुराः ।

ENMSS@4001@2प्रष्टव्याः खलु यूयमेव यदि कोऽप्यस्तं गते भास्वति प्रौढ्ःअध्वान्तपयोधिमग्नजगतीहस्तावलम्बक्षमः ॥ ४००१॥

ENMSS@4002@1अस्या यदष्टादश संविभज्य विद्याः श्रुती दध्रतुरर्धमर्धम् ।

ENMSS@4002@2कर्णान्तरुत्कीर्णगभीररेखः किं तस्य संख्यैव नवा नवाङ्कः ॥ ४००२॥

ENMSS@4003@1अस्या यदास्येन पुरस्तिरश्च तिरस्कृतं शीतरुचान्धकारम् ।

ENMSS@4003@2स्फुटस्फुरद्भङ्गिकचच्छलेन तदेव पश्चादिदमस्ति बद्धम् ॥ ४००३॥

ENMSS@4004@1अस्यारिप्रकरः शरश्च नृपतेः संख्ये पतन्तावुभौ सीत्कारं च न संमुखौ रचयतः कम्पं च न प्राप्नुतः ।

ENMSS@4004@2तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्ति यन्मुक्तयोरेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम् ॥ ४००४॥

ENMSS@4005@1अस्या ललाटे रचिता सखीभिर्विभाव्यते चन्दनपत्रलेखा ।

ENMSS@4005@2आपाण्डुरक्षामकपोलभित्तावनङ्गबाणव्रणपट्टिकेव ॥ ४००५॥

ENMSS@4006@1अस्या वपुषि तारुण्यं शैशवं वा कृतास्पदम् ।

ENMSS@4006@2जातिः कापालिकस्येव न केनाप्यवधार्यते ॥ ४००६॥

ENMSS@4007@1अस्या वपुषि तुलायां शैशवगुञ्जां च यौवनं हेम ।

ENMSS@4007@2तुलयति कुतुकिनि कामे न नमति मध्यान्मनःसूची ॥ ४००७॥

ENMSS@4008@1अस्याश्चेदलकावली कृतमलिश्रेणीभिरेणीदृशः सौन्दर्यं यदि चक्षुषोस्तरलयोः किं मन्मथस्यायुधैः ।

ENMSS@4008@2का प्रीतिः कनकारविन्दमुकुले पीनौ स्तनौ चेदतो मन्ये काचिदियं मनोभवकृता माया जगन्मोहिनी ॥ ४००८॥

ENMSS@4009@1अस्याश्चेद् गतिसौकुमार्यमधुना हंसस्य गर्वैरलं संलापो यदि धार्यतां परभृतैर्वाचंयमत्वव्रतम् ।

ENMSS@4009@2अङ्गानामकठोरता यदि दृषत्प्रायैव सा मालती कान्तिश्चेत् कमला किमत्र

बहुना काषायमालम्बताम् ॥ ४००९॥

ENMSS@4010@1अस्यासिर्भुजगः स्वकोशसुषिराकृष्टः स्फुरत्कृष्णिमा कम्पोन्मीलदराललीलवलनस्तेषां भिये भूभुजाम् ।

ENMSS@4010@2संग्रामेषु निजाङ्गुलीमयमहासिद्धौषधीवीरुधः पर्वास्ये विनिवेश्य जाङ्गुलिकता यैर्नाम नालम्बिता ॥ ४०१०॥

ENMSS@4011@1अस्यास्तनिमा मध्ये प्रथिमा कुचयोर्दृशोश्च चाञ्चल्यम् ।

ENMSS@4011@2ऊर्वोः क्रमेण वृत्तो- न्नाहश्च तुल्यतां दधति ॥ ४०११॥

ENMSS@4012@1अस्यास्तनुस्यन्दनसंस्मितो वै स मीनकेतुर्जगतीं विजेतुम् ।

ENMSS@4012@2सकुङ्कुमालेखमिषेण वीरो व्यमोचयच्चारुतरां पताकाम् ॥ ४०१२॥

ENMSS@4013@1अस्यास्तनौ विरहताण्डवरङ्गभूमौ स्वेदोदबिन्दुकुसुमाञ्जलिमाविकीर्य ।

ENMSS@4013@2नान्दीं पपाठ पृथुवेपथुवेपमान- काञ्चीलताकलरवैः स्मरसूत्रधारः ॥ ४०१३॥

ENMSS@4014@1अस्यास्तुङ्गमिव स्तनद्वयमिदं निम्नेव नाभिः स्थिता दृश्यन्ते विषमोन्नताश्च वलयो भित्तौ समायामपि ।

ENMSS@4014@2अङ्गे च प्रतिभाति मार्दवमिदं स्निग्धस्वभावश्चिरं प्रेम्णा मन्मुखचन्द्रमीक्षत इव स्मेरेव वक्तीति च ॥ ४०१४॥

ENMSS@4015@1अस्यास्त्राणमहो वियोगदुरितादस्मासु कृत्वा कृती स्वैरं गच्छसि तत्तु

किं विमृशसि त्रासावहं हन्त नः ।

ENMSS@4015@2वाचालेषु दिनेषु कोकिलरुतैरुत्पञ्चमप्रक्रमैः सज्योत्स्नासु च यामिनीष्वशरणाः किं नाम कुर्मो वयम् ॥ ४०१५॥

ENMSS@4016@1अस्यैकस्यापि कायस्य सहजा अस्थिखण्डकाः ।

ENMSS@4016@2पृथक् पृथग् गमिष्यन्ति किमुतान्यः प्रियो जनः ॥ ४०१६॥

ENMSS@4017@1अस्यैव रम्भोरु तावननस्य दृशैव संजीवितमन्मथस्य ।

ENMSS@4017@2वनं विधाता ननु नीरजानां नीराजनार्थं किमु निर्मिमीते ॥ ४०१७॥

ENMSS@4018@1अस्यैव सर्गाय भवत्करस्य सरोजसृष्टिर्मम हस्तलेखः ।

ENMSS@4018@2इत्याह धाता हरिणेक्षणायां किं हस्तलेखीकृतया तयास्याम् ॥ ४०१८॥

ENMSS@4019@1अस्योदरस्य प्रतितुल्यशोभं नास्तीति धात्रा भुवनत्रयेऽपि ।

ENMSS@4019@2संख्यानरेखा इव संप्रयुक्तास्तिस्रो विरेजुर्वलयः सुदत्याः ॥ ४०१९॥

ENMSS@4020@1अस्योर्वीरमणस्य पार्वणविधुद्वैराज्यसज्ञं यशः सर्वाङ्गोज्ज्वलशर्वपर्वतसितश्रीगर्वनिर्वासि यत् ।

ENMSS@4020@2तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः पर्यायः किमु दुग्धसिन्धुपयसां सर्वानुवादः किमु ॥ ४०२०॥

ENMSS@4021@1अस्रं लोचनकोण एव कृपणद्रव्यायते सर्वदा कण्ठे काकुवचः प्रसुप्तकमलक्रोडस्थभृङ्गायते ।

ENMSS@4021@2हा रावो हृदये वियोगिकुलजाकामाभिलाषायते वैदेहीविरहज्वरो रघुपतेरापाकतापायते ॥ ४०२१॥

ENMSS@4022@1अस्रमजस्रं मोक्तुं धिङ् नः कर्णायते नयने ।

ENMSS@4022@2द्रष्टव्यं परिदृष्टं तत्कैशोरं व्रजस्त्रीभिः ॥ ४०२२॥

ENMSS@4023@1अस्रस्रोतस्तरङ्गभ्रमिषु तरलिता मांसपङ्के लुठन्तः स्थूलास्थिग्रन्थिभङ्गैर्धवलबिसलताग्रासमाकल्पयन्तः ।

ENMSS@4023@2मायासिंहस्य शौरेः स्फुरदरुणहृदम्भोजसंश्लेषभाजः पायासुर्दैत्यवक्षःस्थलकुहरसरोराजहंसा नखा वः ॥ ४०२३॥

ENMSS@4024@1अस्राक्षीन्नवनीलनीरजदलोपान्तातिसूक्ष्मायत- त्वङ्गात्रान्तरितामिषं यदि वपुर्नैतत् प्रजानां पतिः ।

ENMSS@4024@2प्रत्यग्रक्षरदस्रविस्रपिशितग्रासग्रहं गृह्णतो गृध्रध्वाङ्क्षवृकांस्तनौ निपततः को वा कथं वारयेत् ॥ ४०२४॥

ENMSS@4025@1अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् ।

ENMSS@4025@2विषयेषु च सज्जन्त्यः संस्थाप्य ह्यात्मनो वशे ॥ ४०२५॥

ENMSS@4026@1अस्वाध्यायः पिकानां मदनमखसमारम्भणस्याधिमासो निद्राया जन्मलग्नं किमपि मधुलिहां कोऽपि दुर्भिक्षकालः ।

ENMSS@4026@2ऋष्टिर्यात्रोत्सुकानां मलयजमरुतां पान्थकान्ताकृतान्तः प्रालेयोन्मूलमूलं समजनि समयः कश्चिदौत्पातिकोऽयम् ॥ ४०२६॥

ENMSS@4027@1अहंकार क्वापि व्रज वृजिन हे मा त्वमिह भूरभूमिर्दर्पाणामहमपसर त्वं पिशुन हे ।

ENMSS@4027@2अरे क्रोध स्थानान्तरमनुसरानन्यमनसां त्रिलोकीनाथो नः स्फुरति हृदि

देवो हरिरसौ ॥ ४०२७॥

ENMSS@4028@1अहंकारो धियं ब्रूते मैनं सुप्तं प्रबोधय ।

ENMSS@4028@2उत्थिते परमानन्दे न त्वं नाहं न वै जगत् ॥ ४०२८॥

ENMSS@4029@1अहं किमम्बा किमभीष्टतापदे तवेति मातुर्धुरि तातपृच्छया ।

ENMSS@4029@2प्रलोभ्यतुल्यं प्रवदन्तमर्भकं मुदा हसञ् जिघ्रति मूर्ध्नि पुण्यभाक् ॥ ४०२९॥

ENMSS@4030@1अहंकृतेः परिच्छेदान् अविद्यामचितिं तथा ।

ENMSS@4030@2जहि येनोपलब्धिस्ते कापि स्यान्निस्तुलाद्भुता ॥ ४०३०॥

ENMSS@4031@1अहं च त्वं च राजेन्द्र लोकनाथावुभावपि ।

ENMSS@4031@2बहुव्रीहिरहं राजन् षष्ठीतत्पुरुषो भवान् ॥ ४०३१॥

ENMSS@4032@1अहं च देवनन्दी च कुशाग्रीयधियावुभौ ।

ENMSS@4032@2नैव शब्दाम्बुधेः पारं किमन्ये जडबुद्धयः ॥ ४०३२॥

ENMSS@4033@1अहं तनीयानतिकोमलश्च स्तनद्वयं वोढुमलं न तावत् ।

ENMSS@4033@2इतीव तत्संवहनार्थमस्या वलित्रयं पुष्यति मध्यभागः ॥ ४०३३॥

ENMSS@4034@1अहं तावन् महाराजे पितृत्वं नोपलक्षये ।

ENMSS@4034@2भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ॥ ४०३४॥

ENMSS@4035@1अहं तेनाहूता किमपि कथयामीति विजने समीपे चासीना सरलहृदयत्वादवहिता ।

ENMSS@4035@2ततः कर्णोपान्ते किमपि वदताघ्राय वदनं गृहीत्वा धम्मिल्लं मम सखि निपीतोऽधररसः ॥ ४०३५॥

ENMSS@4036@1अहं न चेत् स्यां मयि दुष्टभावनाम् इमे व्रजेयुर्न निराश्रया जनाः ।

ENMSS@4036@2तदेनसा योजयतः परान् स्वयं ममैव युक्ता खलु नन्वपत्रपा ॥ ४०३६॥

ENMSS@4037@1अहं नयनजं वारि निरोद्धुमपि न क्षमः ।

ENMSS@4037@2रामः सीतावियोगार्तो बबन्ध सरितां पतिम् ॥ ४०३७॥

ENMSS@4038@1अहं नश्यामि मानेन मानेन कलहं कृथाः ।

ENMSS@4038@2विरोधमेत्य कान्तेन कान्ते न परितप्यते ॥ ४०३८॥

ENMSS@4039@1अहंभावात्ययो जातु सुकरो न कथंचन ।

ENMSS@4039@2चेतनायामहम्भावो भौतिक्यां विजितः सकृत् ।

ENMSS@4039@3आध्यात्मिक्यां पुनश्चैष स्फीतः स्फुरति नोऽग्रतः ॥ ४०३९॥

ENMSS@4040@1अहं ममेत्येव भवस्य बीजं न मे न चाहं भवबीजशान्तिः ।

ENMSS@4040@2बीजे प्रनष्टे कुत एव जन्म निरिन्धनो वह्निरुपैति शान्तिम् ॥ ४०४०॥

ENMSS@4041@1अहं महानसायातः कल्पितो नरकस्तव ।

ENMSS@4041@2मया मांसादिकं भुक्तं भीमं जानीहि मां बक ॥ ४०४१॥

ENMSS@4042@1अहंयुवरवर्णिनीजनमदायतोदव्रत-

स्फुरच्चतुरपञ्चमस्वरजितान्यपक्षिव्रजः ।

ENMSS@4042@2रसालतरुणा कृतामसमतुल्यतामात्मनो विहन्तुमिह कोकिलः

फलिनमन्यमुद्वीक्षते ॥ ४०४२॥

ENMSS@4043@1अहं रथाङ्गनामेव प्रिया सहचरीव मे ।

ENMSS@4043@2अननुज्ञातसंपर्का धारिणी रजनीव नौ ॥ ४०४३॥

ENMSS@4044@1अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः ।

ENMSS@4044@2स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥ ४०४४॥

ENMSS@4045@1अहं सदा प्राणसमं महीभुजाम् अयं तु मां वेत्ति नृपस्तृणोपमम् ।

ENMSS@4045@2इतीव कर्णेषु सुवर्णमर्थिनां स्वखेदमाख्यातुमभूत् कृतास्पदम् ॥ ४०४५॥

ENMSS@4046@1अहं हि संमतो राज्ञो य एवं मन्यते कुधीः ।

ENMSS@4046@2बलीवर्दः स विज्ञेयो विषाणपरिवर्जितः ॥ ४०४६॥

ENMSS@4047@1अहन्यहनि बोद्धव्यं किमद्य सुकृतं कृतम् ।

ENMSS@4047@2दत्तं वा दापितं वापि वाक्साह्यमपि वाक्कृतम् ॥ ४०४७॥

ENMSS@4048@1अहन्यहनि भूतानि गच्छन्ति चरमालयम् ।

ENMSS@4048@2शेषाः स्थावरमिच्छन्ति किमाश्चर्यमतःपरम् ॥ ४०४८॥

ENMSS@4049@1अहन्यहनि भूतानि सृजत्येव प्रजापतिः ।

ENMSS@4049@2अद्यापि न सृजत्येकं योऽर्थिनं नावमन्यते ॥ ४०४९॥

ENMSS@4050@1अहन्यहनि याचन्तं कोऽवमन्येद् गुरुं यथा ।

ENMSS@4050@2मार्जनं दर्पणस्येव यः करोति दिने दिने ॥ ४०५०॥

ENMSS@4051@1अहन्यहन्यात्मन एव तावज्ज्ञातुं प्रमादस्खलितं न शक्यम् ।
ENMSS@4051@2प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः ॥ ४०५१॥
ENMSS@4052@1अहमपि परेऽपि कवयस्तथापि महदन्तरं परिज्ञेयम् ।
ENMSS@4052@2ऐक्यं रलयोर्यद्यपि तत् किं करभायते कलभः ॥ ४०५२॥
ENMSS@4053@1अहमस्मि नीलकण्ठस्तव खलु तुष्यामि शब्दमात्रेण ।
ENMSS@4053@2नाहं जलधर भवतश्चातक इव जीवनं याचे ॥ ४०५३॥
ENMSS@4054@1अहमहमिकाबद्धोत्साहं रतोत्सवशंसिनि प्रसरति मुहुः प्रौढस्त्रीणां कथामृतदुर्दिने ।
ENMSS@4054@2कलितपुलका सद्यः स्तोकोद्गतस्तनकोरके वलयति शनैर्बाला वक्षःस्थले तरलां दृशम् ॥ ४०५४॥
ENMSS@4055@1अहमिव दिनलक्ष्मीः प्रोषितप्राणनाथा त्वमिव पथिक पन्था मुक्तपान्थानुबन्धः ।
ENMSS@4055@2अयमपि परदेशः सोऽपि यत्रासि गन्ता मदनमधुरमूर्ते किं वृथा सत्वरोऽसि ॥ ४०५५॥
ENMSS@4056@1अहमिव शून्यमरण्यं वयमिव तनुतां गतानि तोयानि ।
ENMSS@4056@2अस्माकमिवोच्छ्वासा दिवसा दीर्घाश्च तप्ताश्च ॥ ४०५६॥
ENMSS@4057@1अहमिह कृतविद्यो वेदिता सत्कलानां धनपतिरहमेको रूपलावण्ययुक्तः ।
ENMSS@4057@2इति कृतगुरुगर्वः खिद्यते किं जनोऽयं कतिपयदिनमध्ये सर्वमेतन्न किंचित् ॥ ४०५७॥
ENMSS@4058@1अहमिह स्थितवत्यपि तावकी त्वमपि तत्र वसन्नपि मामकः ।
ENMSS@4058@2न तनुसंगतमार्य सुसंगतं हृदयसंगतमेव सुसंगतम् ॥ ४०५८॥
ENMSS@4059@1अहमेको न मे कश्चिन् नाहमन्यस्य कस्यचित् ।
ENMSS@4059@2न तं पश्यामि यस्याहं न हि सोऽस्ति न यो मम ॥ ४०५९॥
ENMSS@4060@1अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते ।
ENMSS@4060@2चतुरैः सुरकामिनीजनैः प्रिय यावन्न विलोभ्यसे दिवि ॥ ४०६०॥
ENMSS@4061@1अहमेव गुरुः सुदारुणानाम् इति हालाहल तात मा स्म दृप्यः ।
ENMSS@4061@2ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम् ॥ ४०६१॥
ENMSS@4062@1अहमेव बली न चापर इति बुद्धिः प्रलयंकरी नृणाम् ।
ENMSS@4062@2नहि सन्ति महीतले कति प्रबलैर्ये विजिता बलोद्धताः ॥ ४०६२॥
ENMSS@4063@1अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।

ENMSS@4063@2उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥ ४०६३॥
ENMSS@4064@1अहरन् कस्यचिद् द्रव्यं यो नरः सुखमावसेत् ।
ENMSS@4064@2सर्वतः शङ्कितः स्तेनो मृगोग्राममिवागतः ॥ ४०६४॥
ENMSS@4065@1अहर्निशं जागरणोद्यतो जनः श्रमं विधत्ते विषयेच्छया यथा ।
ENMSS@4065@2तपःश्रमं चेत् कुरुते तथा क्षणं किमश्नुतेऽनन्तसुखं न पावनम् ॥ ४०६५॥
ENMSS@4066@1अहर्निशा वेति रताय पृच्छति क्रमोष्णशीतान्नकरार्पणाद् विटे ।
ENMSS@4066@2ह्रिया विदग्धा किल तन्निषेधिनी न्यधत्त संध्यामधुरेऽधरेऽङ्गुलिम् ॥ ४०६६॥
ENMSS@4067@1अहल्याकेलिकालेऽभूत् कन्दर्पाणां शतद्वयम् ।
ENMSS@4067@2तत्पञ्चबाणभिन्नाक्षः सहस्राक्षोऽन्धतां गतः ॥ ४०६७॥
ENMSS@4068@1अहस्तानि सहस्तानाम् अपदानि चतुष्पदाम् ।
ENMSS@4068@2फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥ ४०६८॥
ENMSS@4069@1अहह कर्मकरीयति भूपतिं नरपतीयति कर्मकरं नरः ।
ENMSS@4069@2जलनिधीयति कूपमपां निधिं गतजलीयति मद्यमदाकुलः ॥ ४०६९॥
ENMSS@4070@1अहह किमधुना मुधैव बध्नास्यनुचितकारिणि कर्णदन्तपत्रम् ।
ENMSS@4070@2ननु तव चटुलभ्रु कर्णपालिर्भुवनविलोचनकालसारपाशः ॥ ४०७०॥
ENMSS@4071@1अहह गृही क्व नु कुशली बद्धः संसारसागरे क्षिप्तः ।
ENMSS@4071@2कथमपि लभते पोतं तेनापि निमज्जति नितान्तम् ॥ ४०७१॥
ENMSS@4072@1अहह चण्ड समीरण दारुणं किमिदमाचरितं चरितं त्वया ।
ENMSS@4072@2यदिह चातकचञ्चुपुटोदरे पतति वारि तदेव निवारितम् ॥ ४०७२॥
ENMSS@4073@1अहह नयने मिथ्यादृग्वत् सदीक्षणवर्जिते श्रवणयुगलं दुष्पुत्रो वा श्रृणोति न भाषितम् ।
ENMSS@4073@2स्खलति चरणद्वन्द्वं मार्गे मदाकुललोकवद् वपुषि जरसा जीर्णे वर्णो व्यपैति कलत्रवत् ॥ ४०७३॥
ENMSS@4074@1अहह सहजमोहा देहगेहप्रपञ्चे नवरतमतिमग्ना कामिनीविग्रहाप्तिः ।
ENMSS@4074@2तदहमिह विहर्तुं संततामोदमुग्धा स्वहितमहितकृत्यं हन्त नान्तः स्मरामि ॥ ४०७४॥
ENMSS@4075@1अहान्यस्तमयान्तानि उदयान्ता च शर्वरी ।
ENMSS@4075@2सुखस्यान्तः सदा दुःखं दुःखस्यान्तः सदा सुखम् ॥ ४०७५॥

ENMSS@4076@1अहापयन् नृपः कालं भृत्यानामनुवर्तिनाम् ।
ENMSS@4076@2कर्मणामानुरूप्येण वृत्तिं समनुकल्पयेत् ॥ ४०७६॥
ENMSS@4077@1अहार्यः सर्वमध्यस्थः काञ्चनद्युतिमुद्वहन् ।
ENMSS@4077@2सत्प्रदक्षिणयोग्यत्वम् उपयाति महोन्नतः ॥ ४०७७॥
ENMSS@4078@1अहार्येण कदाप्यन्यैरसंहार्येण केनचित् ।
ENMSS@4078@2तितिक्षाकवचेनैव सर्वं जयति संवृतः ॥ ४०७८॥
ENMSS@4079@1अहिं नृपं च शार्दूलं वृद्धं च बालकं तथा ।
ENMSS@4079@2परश्वानं च मूर्खं च सप्त सुप्तान् न बोधयेत् ॥ ४०७९॥
ENMSS@4080@1अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ।
ENMSS@4080@2वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥ ४०८०॥
ENMSS@4081@1अहिंसा धाम धर्मस्य दुःखस्यायतनं स्पृहा ।
ENMSS@4081@2सङ्गत्यागः पदं मुक्तेर्योगाभ्यासः पदं शुचः ॥ ४०८१॥
ENMSS@4082@1अहिंसा परमो धर्मः अहिंसा परमा गतिः ।
ENMSS@4082@2अहिंसा परमा प्रीतिस्त्वहिंसा परमं पदम् ॥ ४०८२॥
ENMSS@4083@1अहिंसा परमो धर्मस्तथाहिंसा परो दमः ।
ENMSS@4083@2अहिंसा परमं दानम् अहिंसा परमं तपः ॥ ४०८३॥
ENMSS@4084@1अहिंसा परमो यज्ञस्तथाहिंसा परं बलम् ।
ENMSS@4084@2अहिंसा परमं मित्रम् अहिंसा परमं सुखम् ।
ENMSS@4084@3अहिंसा परमं सत्यम् अहिंसा परमं श्रुतम् ॥ ४०८४॥
ENMSS@4085@1अहिंसा परमो धर्मो ह्यहिंसैव परं तपः ।
ENMSS@4085@2अहिंसा परमं दानम् इत्याहुर्मुनयः सदा ॥ ४०८५॥
ENMSS@4086@1अहिंसापूर्वको धर्मो यस्मात् सर्वहिते रतः ।
ENMSS@4086@2यूकामत्कुणदंशादींस्तस्मात् तानपि रक्षयेत् ॥ ४०८६॥
ENMSS@4087@1अहिंसा प्रथमं पुष्पं द्वितीयेन्द्रियनिग्रहम् ।
ENMSS@4087@2तृतीयं तु दया पुष्पं तुरीयं दानपुष्पकम् ॥ ४०८७॥
ENMSS@4088@1अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम् ।
ENMSS@4088@2पञ्चस्वेतेषु वाक्येषु सर्वे धर्माः प्रतिष्ठिताः ॥ ४०८८॥
ENMSS@4089@1अहिंसा सत्यमस्तेयं ब्रह्मचर्यपरिग्रहः ।
ENMSS@4089@2इष्टानिष्टपरा चिन्ता यम एष प्रकीर्तितः ॥ ४०८९॥
ENMSS@4090@1अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
ENMSS@4090@2एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥ ४०९०॥

ENMSS@4091@1अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
ENMSS@4091@2दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ॥ ४०९१॥
ENMSS@4092@1अहिंसा सत्यवचनं सर्वभूतानुकम्पनम् ।
ENMSS@4092@2शमो दानं यथाशक्ति गार्हस्थ्यो धर्म उत्तमः ॥ ४०९२॥
ENMSS@4093@1अहिंसा सत्यवचनं सर्वभूतेषु चार्जवम् ।
ENMSS@4093@2क्षमा चैवाप्रमादश्च यस्यैते स सुखी भवेत् ॥ ४०९३॥
ENMSS@4094@1अहिंसा सत्यवचनम् आनृशंस्यं दमो घृणा ।
ENMSS@4094@2एतत् तपो विदुर्धीरा न शरीरस्य शोषणम् ॥ ४०९४॥
ENMSS@4095@1अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा ।
ENMSS@4095@2वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते ॥ ४०९५॥
ENMSS@4096@1अहिंसासूनृतास्तेयब्रह्माकिंचनतारतम् ।
ENMSS@4096@2सुपात्रं मुनिभिः प्रोक्तं राजद्वेषविवर्जितम् ॥ ४०९६॥
ENMSS@4097@1अहिंस्रस्य तपोऽक्षय्यम् अहिंस्रो यजते सदा ।
ENMSS@4097@2अहिंस्रः सर्वभूतानां यथा माता यथा पिता ॥ ४०९७॥
ENMSS@4098@1अहितं च हिताकारं धार्ष्ट्याज्जल्पन्ति ये नराः ।
ENMSS@4098@2अवेक्ष्य मन्त्रबाह्यास्ते कर्तव्याः कृत्यदूषणाः ॥ ४०९८॥
ENMSS@4099@1अहितहितविचारशून्यबुद्धेः श्रुतिसमयैर्बहुभिर्बहिष्कृतस्य ।
ENMSS@4099@2उदरभरणमात्रकेवलेच्छोः पुरुषपशोश्च पशोश्च को विशेषः
॥ ४०९९॥
ENMSS@4100@1अहितात् प्रतिषेधश्च हिते चानुप्रवर्तनम् ।
ENMSS@4100@2व्यसने चापरित्यागस्त्रिविधं मित्रलक्षणम् ॥ ४१००॥
ENMSS@4101@1अहितादनपत्रपस्त्रसन्न् अतिमात्रोज्झितभीरनास्तिकः ।
ENMSS@4101@2विनयोपहितस्त्वया कुतः सदृशोऽन्यो गुणवानविस्मयः ॥ ४१०१॥
ENMSS@4102@1अहितुण्डिकदृष्टीनाम् अशेषा भोगिनः पदम् ।
ENMSS@4102@2न संवर्ताग्निसारथ्ये स्थाता यन्मुखमारुतः ॥ ४१०२॥
ENMSS@4103@1अहिते प्रतिषेधश्च हिते चानुप्रवर्तनम् ।
ENMSS@4103@2व्यसने चापरित्यागस्त्रिविधं मित्रलक्षणम् ॥ ४१०३॥
ENMSS@4104@1अहिते हितबुद्धिरल्पधीरवमन्येत मतानि मन्त्रिणाम् ।
ENMSS@4104@2चपलः सहसैव संपतन्न् अरिखड्गाभिहतः प्रबुध्यते ॥ ४१०४॥
ENMSS@4105@1अहिते हितमिच्छन्ति निसर्गात् सरसास्तु ये ।
ENMSS@4105@2पीडितोऽपीक्षुदण्डो हि रसमेव ददात्यरम् ॥ ४१०५॥

ENMSS@4106@1अहिभवनविधानान्यायुधीकृत्य शैलान् अमरजयिनि सैन्ये रक्षसामात्तकक्ष्ये
।
ENMSS@4106@2कथमिव रणभूमौ वर्तते वानराणाम् उपवनतरुवल्लीपल्लवोन्माथि यूथम्
॥ ४१०६॥
ENMSS@4107@1अहिभूषणोऽप्यभयदः सुकलितहालाहलोऽपि यो नित्यः ।
ENMSS@4107@2दिग्वसनोऽप्यखिलेशस्तं शशधरशेखरं वन्दे ॥ ४१०७॥
ENMSS@4108@1अहिरण्यमदासीकं गृहं गोरसवर्जितम् ।
ENMSS@4108@2प्रतिकूलकलत्रं च नरकस्यापरो विधिः ॥ ४१०८॥
ENMSS@4109@1अहिरहिरिति संभ्रमपदम् इतरजनः किमपि कातरो भवतु ।
ENMSS@4109@2विहगपतेराहारः स तु सरलमृणालदलरुचिरः ॥ ४१०९॥
ENMSS@4110@1अहिराजः पुरुषेऽस्मिन् धूम्रा धात्री कुलत्थवर्णोऽश्मा ।
ENMSS@4110@2माहेन्द्री वहति शिरा भवति सफेनं सदा तोयम् ॥ ४११०॥
ENMSS@4111@1अहिरिपुपतिकान्तातातसंबद्धकान्ता- हरतनयनिहन्तृप्राणदातृध्वजस्य
।
ENMSS@4111@2सखिसुतसुतकान्तातातसम्पूज्यकान्ता- पितृशिरसि पतन्ती जाह्नवी नः
पुनातु ॥ ४१११॥
ENMSS@4112@1अहिरिव जनयोगं सर्वदा वर्जयेद् यः कुणमिव वसु नारीं त्यक्तकामो विरागी ।
ENMSS@4112@2विषमिव विषयार्थान् मन्यमानो दुरन्ताञ् जयति परमहंसो मुक्तिभावं
समेति ॥ ४११२॥
ENMSS@4113@1अहिर्बिडालो जामाता एडका च सपुत्रिणी ।
ENMSS@4113@2आत्मभाग्यं न पश्यन्ति भागिनेयस्तु पञ्चमः ॥ ४११३॥
ENMSS@4114@1अहीनकालं राजार्थं स्वार्थं प्रियहितैः सह ।
ENMSS@4114@2परार्थं देशकाले च ब्रूयाद् धर्मार्थसंहितम् ॥ ४११४॥
ENMSS@4115@1अहीनभुजगाधीशवपुर्वलयकङ्कणम् ।
ENMSS@4115@2शैलादिनन्दिचरितं क्षतकन्दर्पदर्पकम् ॥ ४११५॥
ENMSS@4116@1वृषपुंगवलक्ष्माणं शिखिपावकलोचनम् ।
ENMSS@4116@2ससर्वमङ्गलं नौमि पार्वतीसखमीश्वरम् ॥ ४११६॥
ENMSS@4117@1अहीन्द्रान् पातालाद् विषमिव निमज्ज्योद्धरति यः य आरुह्य स्वर्गं कवलयति
सेन्द्रान् सुरगणान् ।

ENMSS@4117@2महीं भ्रान्त्वा भ्रान्त्वा रघुनलनृपा येन विजिताः स मृत्युः कालं न क्षमत इति मा कार्ष्ट मनसि ॥ ४११७॥

ENMSS@4118@1अहृतहृदयाः सन्तः सत्यं ब्रवीमि निशम्यतां विपिनमधुना गत्वा वासो

मृगैः सह कल्प्यताम् ।

ENMSS@4118@2सुजनचरितध्वंसिन्यस्मिन् खलोदयशालिनि प्रभवति कलौ नायं कालो

गृहेषु भवादृशाम् ॥ ४११८॥

ENMSS@4119@1अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।

ENMSS@4119@2स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥ ४११९॥

ENMSS@4120@1अहेतु भ्रूकुटिं नैव सदा कुर्वीत पार्थिवः ।

ENMSS@4120@2विना दोषेण यो भृत्यान् राजा धर्मेण पालयेत् ॥ ४१२०॥

ENMSS@4121@1अहेरिव गुणाद्भीतो मिष्टान्नाद्या विषादिव ।

ENMSS@4121@2राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ ४१२१॥

ENMSS@4122@1अहो अनौचितीयं ते हृदि शुद्धेऽप्यशुद्धवत् ।

ENMSS@4122@2अङ्कः खलैरिवाकल्पि नखैस्तीक्ष्णमुखैर्मम ॥ ४१२२॥

ENMSS@4123@1अहो अहं नमो मह्यं यदहं वीक्षितोऽनया ।

ENMSS@4123@2बालया त्रस्तसारङ्गचपलायतनेत्रया ॥ ४१२३॥

ENMSS@4124@1अहो अहीनामपि लेहनं स्याद् दुःखानि नूनं नृपसेवनानि ।

ENMSS@4124@2एकोऽहिना दष्टमुपैति मृत्युं क्ष्मापेन दष्टस्तु सगोत्रमित्रः ॥ ४१२४॥

ENMSS@4125@1अहो अहोभिर्न कलेर्विदूयते सुधासुधारामधुरं पदे पदे ।

ENMSS@4125@2दिने दिने चन्दनचन्द्रशीतलं यशो यशो दातनयस्य गीयते ॥ ४१२५॥

ENMSS@4126@1अहो अहोभिर्महिमा हिमागमे- ऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम् ।

ENMSS@4126@2तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे ॥ ४१२६॥

ENMSS@4127@1अहो ऐश्वर्यमत्तानां मत्तानामिव मानिनाम् ।

ENMSS@4127@2असंबद्धा गिरो रूक्षाः कः सहेतानुशासिता ॥ ४१२७॥

ENMSS@4128@1अहो कथमसीमेदं हिमनाम विजृम्भते ।

ENMSS@4128@2चरत्येव सहस्रांशौ धवलं तिमिरान्तरम् ॥ ४१२८॥

ENMSS@4129@1अहो कनकमाहात्म्यं वक्तुं केनापि शक्यते ।

ENMSS@4129@2नामसाम्यादहो चित्रं धत्तूरोऽपि मदप्रदः ॥ ४१२९॥

ENMSS@4130@1अहो कालस्य सूक्ष्मोऽयं कोऽप्यलक्ष्यक्रमः क्रमः ।
ENMSS@4130@2यत्पाकपरिणामेन सर्वं यात्यन्यरूपताम् ॥ ४१३०॥
ENMSS@4131@1अहो किमपि ते शुद्धं यशःकुसुममुद्गतम् ।
ENMSS@4131@2यस्यायममृतस्यन्दी बालेन्दुर्बाह्यपल्लवः ॥ ४१३१॥
ENMSS@4132@1अहो कुटिलबुद्धीनां दुर्ग्राह्यमसतां मनः ।
ENMSS@4132@2अन्यद्वचसि कण्ठेऽन्यद् अन्यदोष्ठपुटे स्थितम् ॥ ४१३२॥
ENMSS@4133@1अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता ।
ENMSS@4133@2त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् ॥ ४१३३॥
ENMSS@4134@1अहो खलभुजंगस्य विचित्रोऽयं वधक्रमः ।
ENMSS@4134@2अन्यस्य दशति श्रोत्रम् अन्यः प्राणैर्वियुज्यते ॥ ४१३४॥
ENMSS@4135@1अहो खलभुजंगस्य विपरीतो वधक्रमः ।
ENMSS@4135@2कर्णे लगति चान्यस्य प्राणैरन्यो वियुज्यते ॥ ४१३५॥
ENMSS@4136@1अहो गुणाः सौम्यता च विद्वत्ता जन्म सत्कुले ।
ENMSS@4136@2दारिद्याम्बुधिमग्नस्य सर्वमेतन्न शोभते ॥ ४१३६॥
ENMSS@4137@1अहो गुणानां प्राप्त्यर्थं यतन्ते बहुधा नरः ।
ENMSS@4137@2मुक्ता यदर्थं भग्नास्या इतरेषां च का कथा ॥ ४१३७॥
ENMSS@4138@1अहो तम इवेदं स्यान् न प्रज्ञायेत किंचन ।
ENMSS@4138@2राजा चेन्न भवेल्लोके विभजन् साध्वसाधुनी ॥ ४१३८॥
ENMSS@4139@1अहोऽतिनिर्मोहि जनस्य चित्रं परं चरित्रं गदितुं न योग्यम् ।
ENMSS@4139@2मुखे हि चान्यद्धृदि भावमन्यत् देवो न जानाति कुतो मनुष्यः ॥ ४१३९॥
ENMSS@4140@1अहोऽतिबलवद्दैवं विना तेन महात्मना ।
ENMSS@4140@2यदसामर्थ्ययुक्तेऽपि नीचवर्गे जयप्रदम् ॥ ४१४०॥
ENMSS@4141@1अहो तृष्णावेश्या सकलजनतामोहनकरी विदग्धा मुग्धानां हरति विवशानां शमधनम् ।
ENMSS@4141@2विपद्दीक्षादक्षासहतरलतारैः प्रणयिनी- कटाक्षैः कूटाक्षैः कपटकुटिलैः कामकितवः ॥ ४१४१॥
ENMSS@4142@1अहो दानमहो वीर्यम् अहो धैर्यमखण्डितम् ।
ENMSS@4142@2उदारवीरधीराणां हरिश्चन्द्रो निदर्शनम् ॥ ४१४२॥
ENMSS@4143@1अहो दिव्यं चक्षुर्वहसि तव सापि प्रणयिनी पराक्ष्णामग्राह्यं युवतिषु वपुः संक्रमयति ।

ENMSS@4143@2समानाभिज्ञानं कथमितरथा पश्यति पुरो भवानेकस्तस्याः प्रतिकृतिमयीरेव रमणीः ॥ ४१४३॥
ENMSS@4144@1अहो दुःखमहोदुःखमहो दुःखं दरिद्रता ।
ENMSS@4144@2तत्रापि पुत्रभार्याणां बाहुल्यमतिदुःखदम् ॥ ४१४४॥
ENMSS@4145@1अहो दुरन्ता जगतो विमूढता विलोक्यतां संसृतिदुःखदायिनी ।
ENMSS@4145@2सुसाध्यमप्यन्नविधानतस्तपो यतो जनो दुःखकरोऽवमन्यते ॥ ४१४५॥
ENMSS@4146@1अहो दुरन्ता संसारे भोगतृष्णा यया हृताः ।
ENMSS@4146@2अनौचित्यादकीर्तेश्च देवा अपि न बिभ्यति ॥ ४१४६॥
ENMSS@4147@1अहो दुर्जसंसर्गान् मानहानिः पदे पदे ।
ENMSS@4147@2पावको लोहसङ्गेन मुद्गरैरभिहन्यते ॥ ४१४७॥
ENMSS@4148@1अहो दुर्जनसर्पस्य सर्पस्य महदन्तरम् ।
ENMSS@4148@2कर्णमन्यस्य दशति अन्यः प्राणैर्वियुज्यते ॥ ४१४८॥
ENMSS@4149@1अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः ।
ENMSS@4149@2यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ ४१४९॥
ENMSS@4150@1अहो धनमदान्धस्तु पश्यन्नपि न पश्यति ।
ENMSS@4150@2यदि पश्यत्यात्महितं स पश्यति न संशयः ॥ ४१५०॥
ENMSS@4151@1अहो धनानां महती विदग्धता सुखोषितानां कृपणस्य वेश्मनि ।
ENMSS@4151@2व्रजन्ति न त्यागदशां न भोग्यतां परां च कांचित् प्रथयन्ति निर्वृतिम् ॥ ४१५१॥
ENMSS@4152@1अहो धनुषि नैपुण्यं मन्मथस्य महात्मनः ।
ENMSS@4152@2शरीरमक्षतं कृत्वा भिनत्त्यन्तर्गतं मनः ॥ ४१५२॥
ENMSS@4153@1अहो धात्रा पुरः सृष्टं साहसं तदनु स्त्रियः ।
ENMSS@4153@2नैतासां दुष्करं किंचिन् निसर्गादिह विद्यते ॥ ४१५३॥
ENMSS@4154@1अहो धार्ष्ट्यमसाधूनां निन्दतामनघाः स्त्रियः ।
ENMSS@4154@2मुष्णतामिव चौराणां तिष्ठ चौरेति जल्पताम् ॥ ४१५४॥
ENMSS@4155@1अहो नक्षत्रराजस्य साभिमानं विचेष्टितम् ।
ENMSS@4155@2परिक्षीणस्य वक्रत्वं संपूर्णस्य सुवृत्तता ॥ ४१५५॥
ENMSS@4156@1अहो नु कष्टं सततं प्रवासम् ततोऽतिकष्टः परगेहवासः ।
ENMSS@4156@2कष्टाधिका नीचजनस्य सेवा ततोऽतिकष्टा धनहीनता च ॥ ४१५६॥
ENMSS@4157@1अहो नु चित्रं पद्मोत्थैर्बद्धास्तन्तुभिरद्रयः ।
ENMSS@4157@2अविद्यमाना याविद्या तया सर्वे वशीकृताः ॥ ४१५७॥

ENMSS@4158@1अहो पूर्णं सरः स्पष्टम् असि नात्र विचारणा ।
ENMSS@4158@2लुठन्तस्त्वयि यत् सर्वे स्नान्ति जातु कथंचन ॥ ४१५८॥
ENMSS@4159@1अहो प्रकृतिसादृश्यं श्लेष्मणो दुर्जनस्य च ।
ENMSS@4159@2मधुरैः कोपमायाति कटुकैरुपशाम्यति ॥ ४१५९॥
ENMSS@4160@1अहो प्रच्छादिताकार्यनैपुण्यं परमं खले ।
ENMSS@4160@2यत्तुषाग्निरिवानर्चिर्दहन्नपि न लक्ष्यते ॥ ४१६०॥
ENMSS@4161@1अहो प्रभावो वाग्देव्या यन्मातंगदिवाकरः ।
ENMSS@4161@2श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः ॥ ४१६१॥
ENMSS@4162@1अहो प्रमादी भगवान् प्रजापतिः कृशातिमध्या घटिता मृगेक्षणा ।
ENMSS@4162@2यदि प्रमादादनिलेन भज्यते कथं पुनः शक्ष्यति कर्तुमीदृशम् ॥ ४१६२॥
ENMSS@4163@1अहो बत खलः पुण्यैर्मूर्खोऽप्यश्रुतपण्डितः ।
ENMSS@4163@2स्वगुणोदीरणे शेषः परनिन्दासु वाक्पतिः ॥ ४१६३॥
ENMSS@4164@1अहो बत महत् कष्टं विपरीतमिदं जगत् ।
ENMSS@4164@2येनापत्रपते साधुरसाधुस्तेन तुष्यति ॥ ४१६४॥
ENMSS@4165@1अहो बत विचित्राणि चरितानि महात्मनाम् ।
ENMSS@4165@2लक्ष्मीं तृणाय मन्यन्ते तद्भारेण नमन्ति च ॥ ४१६५॥
ENMSS@4166@1अहो बत सभा सभ्यैरियं मौनादधः कृता ।
ENMSS@4166@2सन्तो वदन्ति यत्सत्यं सभां न प्रविशन्ति वा ॥ ४१६६॥
ENMSS@4167@1अहो बत सरित्पतेरिदमनार्यरूपं परं यदुज्ज्वलरुचीन् मणीन् सुचिरचर्चितास्थागुणान् ।
ENMSS@4167@2जडैरनुपयोगिभिः परत एत्य लब्धास्पदैः क्षपत्यनिशमूर्जितैर्झगिति तन्मयत्वं गतः ॥ ४१६७॥
ENMSS@4168@1अहो बाणस्य संधानं शरदि स्मरभूपतेः ।
ENMSS@4168@2अपि सोऽयं त्विषामीशः कन्याराशिमुपागतः ॥ ४१६८॥
ENMSS@4169@1अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ।
ENMSS@4169@2यद्दरिद्रतमो लक्ष्मीम् आश्लिष्टो बिभ्रतोरसि ॥ ४१६९॥
ENMSS@4170@1अहो भवति सादृश्यं मृदङ्गस्य च खलस्य च ।
ENMSS@4170@2यावन्मुखगतौ तौ हि तावन्मधुरभाषिणौ ॥ ४१७०॥
ENMSS@4171@1अहो भार्या अहो पुत्रः अहो आत्मा अहो सुखम् ।
ENMSS@4171@2अहो माता अहो भ्राता पश्य मायाविमोहितम् ॥ ४१७१॥

ENMSS@4172@1अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
ENMSS@4172@2गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥ ४१७२॥
ENMSS@4173@1अहो मदावलेपोऽयम् असाराणां दुरात्मनाम् ।
ENMSS@4173@2कौरवाणां महीपत्वम् अस्माकं किल कालजम् ॥ ४१७३॥
ENMSS@4174@1अहो महच्चित्रमिदं कालगत्या दुरत्यया ।
ENMSS@4174@2आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितम् ॥ ४१७४॥
ENMSS@4175@1अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।
ENMSS@4175@2यथास्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ॥ ४१७५॥
ENMSS@4176@1अहो महीयसां पुंसाम् उपर्युपरि पौरुषम् ।
ENMSS@4176@2रामेणाजगवं शंभोर्भग्नमम्भोजनालवत् ॥ ४१७६॥
ENMSS@4177@1अहो मायाजालं हृदयहरिणो यत्र पतितः समुत्थातुं भूयः प्रभवति न किंचित् कथमपि ।
ENMSS@4177@2न चेत् तस्य च्छेत्ता परमगुरुवाक्योपनमितो
निजात्मज्ञानाखुर्विविधदृढसद्युक्तिदशनैः ॥ ४१७७॥
ENMSS@4178@1अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥
ENMSS@4179@1क्क देहो भौतिकोऽनात्मा क्क चात्मा प्रकृतेः परः ।
ENMSS@4179@2कस्य के पतिपुत्राद्या मोह एव हि कारणम् ॥ ४१७९॥
ENMSS@4180@1अहो मे सौभाग्यं मम च भवभूतेश्च भणितं घटायामारोप्य प्रतिफलति तस्यां लघिमनि ।
ENMSS@4180@2गिरां देवी सद्यः श्रुतिकलितकल्हारकलिका- मधूलीमाधुर्यं क्षिपति परिपूर्त्यै भगवती ॥ ४१८०॥
ENMSS@4181@1अहो मोहः पुंसामिह जगति जातिः किल शुभा जरामृत्युव्याधीनपि जयति
या निष्प्रभतया ।
ENMSS@4181@2परस्माज्ज्ञातानां व्यसनशतमेतेऽपि दधति स्वयं सुत्वा तेभ्यो विदिशति सुतान् सा विशसितुम् ॥ ४१८१॥
ENMSS@4182@1अहो मोहो वराकस्य काकस्य यदसौ पुरः ।
ENMSS@4182@2सरीसर्ति नरीनर्ति यदयं शिखिहंसयोः ॥ ४१८२॥
ENMSS@4183@1अहो येषां वरं जन्म सर्वप्राण्युपजीवनम् ।
ENMSS@4183@2सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥ ४१८३॥
ENMSS@4184@1अहो रघुशिरोमणेरभिनवप्रतापावलि-

प्रचण्डकिरणप्रथाप्रसरसाध्वसादाश्वयम् ।
ENMSS@4184@2सुराधिपतिरम्बुदान् कमलमिन्दिरा सेवते हिमांशुरपि चन्द्रमाः सततमम्भुधौ मज्ञति ॥ ४१८४॥
ENMSS@4185@1अहोरात्रमये लोके जरारूपेण संचरन् ।
ENMSS@4185@2मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा ॥ ४१८५॥
ENMSS@4186@1अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह ।
ENMSS@4186@2आयूंषि क्षपयन्त्याशु ग्रीष्मे जलमिवांशवः ॥ ४१८६॥
ENMSS@4187@1अहोरात्रे विभजते सूर्यो मानुषदैविके ।
ENMSS@4187@2रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥ ४१८७॥
ENMSS@4188@1अहो रूपमहो रूपम् अहो मुखमहो मुखम् ।
ENMSS@4188@2अहो मध्यमहो मध्यम् अस्याः सारङ्गचक्षुषः ॥ ४१८८॥
ENMSS@4189@1अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्टप्रतिरूपमीहसे ।
ENMSS@4189@2परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥ ४१८९॥
ENMSS@4190@1न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ।
ENMSS@4190@2यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥ ४१९०॥
ENMSS@4191@1अहो विधात्रा हतकेन नार्थात् कृतो वियोगोऽपि वियोगिनां नः ।
ENMSS@4191@2रथाङ्गनाम्नामिव येन सीमा न विद्यते नापि सपक्षवत्त्वम् ॥ ४१९१॥
ENMSS@4192@1अहो विशालं भूपाल भुवनत्रितयोदरम् ।
ENMSS@4192@2माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ ४१९२॥
ENMSS@4193@1अहो विषादप्यधिकाः स्त्रियो रक्तविमानिताः ।
ENMSS@4193@2अहो असेव्याः साधूनां राजानोऽतत्त्वदर्शिनः ॥ ४१९३॥
ENMSS@4194@1अहो वैचित्र्यमेतस्य संसारस्य किमुच्यते ।
ENMSS@4194@2गुणोऽपि क्लेशहेतुः स्याद् विश्रान्तः कण्ठकन्दले ॥ ४१९४॥
ENMSS@4195@1अहो संसारवैरस्यं वैरस्यकारणं स्त्रियः ।
ENMSS@4195@2दोलालोला च कमला रोगाभोगगेहं देहम् ॥ ४१९५॥
ENMSS@4196@1अहो संसृतिवेश्येयं रागाद्युद्दीपनोद्यता ।
ENMSS@4196@2रसमुत्पाद्य सर्वेषाम् अन्ते वैरस्यकारिणी ॥ ४१९६॥
ENMSS@4197@1अहो सत्संगतिर्लोके किं पापं न विनाशयेत् ।
ENMSS@4197@2न ददाति सुखं किं वा नराणां पुण्यकर्मणाम् ॥ ४१९७॥
ENMSS@4198@1अहो समुद्रगम्भीरधीरचित्तमनस्विनः ।

ENMSS@4198@2कृत्वाप्यनन्यसामान्यम् उल्लेखं नोद्गिरन्ति ये ॥ ४१९८॥
ENMSS@4199@1अहो साहजिकं प्रेम दूरादपि विराजते ।
ENMSS@4199@2चकोरनयनद्वन्द्वम् आह्लादयति चन्द्रमाः ॥ ४१९९॥
ENMSS@4200@1अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ।
ENMSS@4200@2स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ॥ ४२००॥
ENMSS@4201@1अहो स्त्रीप्रेरणा नाम रजसालङ्घितात्मनाम् ।
ENMSS@4201@2पुंसां वात्येव सरसामाशयक्षोभकारिणी ॥ ४२०१॥
ENMSS@4202@1अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते ।
ENMSS@4202@2उपेक्षते यः श्लथबन्धलम्बिनीर्जटाः कपोले कलमाग्रपिङ्गलाः ॥ ४२०२॥
ENMSS@4203@1अहो स्थैर्यं तेषां प्रकृतिनियमेभ्यः सुकृतिनां प्रतिज्ञातत्यागो नहि भवति कृच्छ्रेऽपि महति ।
ENMSS@4203@2तथा हि त्वत्सेनाभरनमितधात्रीभरदलत्- कटाहोऽपि स्वाङ्गं किमु कमठनाथश्चलयति ॥ ४२०३॥
ENMSS@4204@1अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
ENMSS@4204@2त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः ॥ ४२०४॥
ENMSS@4205@1अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा मणौ वा लोष्टे वा कुसुमशयने
वा दृषदि वा ।
ENMSS@4205@2तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ॥ ४२०५॥
ENMSS@4206@1अह्नस्त्रिश्चतुरम्बुभिः स्नपयसि स्वं पुष्करावर्जितैर्भुङ्क्षे मेध्यतराणि भद्र तरुणान्यश्वत्थपत्राणि च ।
ENMSS@4206@2पुण्यारण्यचरोऽसि न प्रविशसि ग्रामं सकृत्कुञ्जर ज्ञानं चेत् कियदप्युदेति न समा ब्रह्मर्षयोऽपि त्वया ॥ ४२०६॥
ENMSS@4207@1अह्नि भास्करमिच्छन्ति रात्रावमृततेजसम् ।
ENMSS@4207@2अह्नि रात्रौ च राजानम् इच्छन्ति गुणिनं प्रजाः ॥ ४२०७॥
ENMSS@4208@1अह्नि रविर्दहति त्वचि वृद्धः पुष्पधनुर्दहति प्रबलोढम् ।
ENMSS@4208@2रात्रिदिनं पुनरन्तरमन्तः संवृतिरस्ति रवेर्न तु कन्तोः ॥ ४२०८॥
ENMSS@4209@1आं ज्ञातं नृपते त्वमेव निखिलां नित्यं बिभर्षि क्षितिं शैलेन्द्राः स्वयमेव दुर्भरभरास्तैः प्रत्युताधो व्रजेत् ।

ENMSS@4209@2अस्याश्चोद्धरणे क्षमोऽपि न परस्त्वत्तो वराहादिकः
पश्चादेर्भरणक्रियानिपुणता नैव प्रभागोचरः ॥ ४२०९॥
ENMSS@4210@1आः कष्टं वनवासिसाम्यकृतया सिद्धाश्रमश्रद्धया पल्लीं बालकुरङ्ग संप्रति कुतः प्राप्तोऽसि मृत्योर्मुखम् ।
ENMSS@4210@2यत्रानेककुरङ्गकोटिकदनक्रीडोल्लसल्लोहित- स्रोतोभिः परिपूरयन्ति परिखामुड्डामराः पामराः ॥ ४२१०॥
ENMSS@4211@1आः कष्टं सुविवेकशून्यहृदयैः संसर्गमात्तं च तैर्विक्रीतं
बदरैः समं क्षितितले कुग्रामसीम्नि स्फुटम् ।
ENMSS@4211@2संविष्टंशठगाढमूढवदने धूत्कारदूरीकृतं किं जानात्यगुणो
जनो गुणमतो मुक्ताफलं रोदिति ॥ ४२११॥
ENMSS@4212@1आः कष्टमप्रःऋष्टाः शिष्टा अपि वित्तचापलाविष्टाः ।
ENMSS@4212@2अध्यापयन्ति वेदान् आदाय चिराय मासि मासि भृतिम् ॥ ४२१२॥
ENMSS@4213@1आः किमर्थमिदं चेतः सतामम्भोधिदुर्भरम् ।
ENMSS@4213@2इति क्रुधेव दुर्वेधाः परदुःखैरपूरयत् ॥ ४२१३॥
ENMSS@4214@1आः पाकं न करोषि पापिनि कथं पापी त्वदीयः पिता रण्डे जल्पसि किं
तवैव जननी रण्डा त्वदीया स्वसा ।
ENMSS@4214@2निर्गच्छ त्वरितं गृहाद् बहिरितो नेदं त्वदीयं गृहं हा हा नाथ
ममाद्य देहि मरणं जारस्य भाग्योदयः ॥ ४२१४॥
ENMSS@4215@1आः पात्री स्यामकृतकघनप्रेमविस्फारितानां सव्रीडानां
सकलकरणानन्दनाडिंधमानाम् ।
ENMSS@4215@2तेषां तेषां हृदयनिहिताकूतनिष्यन्दिनेत्र- व्यापाराणां पुनरपि तथा सुभ्रुवो विभ्रमाणाम् ॥ ४२१५॥
ENMSS@4216@1आः सर्वतः स्फुरतु कैरवमापिबन्तु ज्योत्स्नाकरम्भमुदरंभरयश्चकोराः ।
ENMSS@4216@2यातो यदेष चरमाचलमूलचुम्बी पङ्केरुहप्रकरजागरणप्रदीपः ॥ ४२१६॥
ENMSS@4217@1आः सीते पतिगर्वविभ्रमभरभ्रान्तभ्रमद्बान्धव- प्रध्वंसस्मितकान्तिमत् तव तदा जातं यदेतन्मुखम् ।
ENMSS@4217@2संप्रत्येव हठात् तदेष कुरुते केशोच्चयाकर्षण-
त्रासोत्तानितलोललोचनपतद्बाष्पप्लुतं रावणः ॥ ४२१७॥
ENMSS@4218@1आकण्ठदृष्टशिरसाप्यविभाव्यपार्श्व- पृष्ठोदरेण
चिरमृग्भिरुपास्यमानः ।

ENMSS@4218@2नाभीसरोरुहजुषा चतुराननेन शेते किलात्र भगवानरविन्दनाभः ॥ ४२१८॥

ENMSS@4219@1आकण्ठार्पितकञ्चुकाञ्चलमुरो हस्ताङ्गुलीमुद्रणा-

मात्रासूत्रितहास्यमास्यमलसाः पञ्चालिकाकेलयः ।

ENMSS@4219@2तिर्यग्लोचनचेष्टितानि वचसां च्छेकोक्तिसंक्रान्तयस्तस्याःसीदति

शैशवे प्रतिकलं कोऽप्येष केलिक्रमः ॥ ४२१९॥

ENMSS@4220@1आकम्पयन् फलभरानतशालिजालम् आनर्तयंस्तरुवरान् कुसुमावनम्रान् ।

ENMSS@4220@2उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन् यूनां मनश्चलयति प्रसभं

नभस्वान् ॥ ४२२०॥

ENMSS@4221@1आकम्पितक्षितिभृता महता निकामं हेलाभिभूतजलधित्रितयेन यस्य ।

ENMSS@4221@2वीर्येण संहतिभिदा विहतोन्नतेन कल्पान्तकालविसृतः पवनोऽनुचक्रे ॥ ४२२१॥

ENMSS@4222@1आकम्पितानि हृदयानि मनस्विनीनां वातैः प्रफुल्लसहकारकृताधिवासैः ।

ENMSS@4222@2संबाधितं परभृतस्य मदाकुलस्य श्रोत्रप्रियैर्मधुकरस्य च

गीतनादैः ॥ ४२२२॥

ENMSS@4223@1आकरः कारणं जन्तोर्दौर्जन्यस्य न जायते ।

ENMSS@4223@2कालकूटः सुधासिन्धोः प्राणिनां प्राणहारकः ॥ ४२२३॥

ENMSS@4224@1आकरः सर्वशास्त्राणां रत्नानामिव सागरः ।

ENMSS@4224@2गुणैर्न परितुष्यामो यस्य मत्सरिणो वयम् ॥ ४२२४॥

ENMSS@4225@1आकरप्रभवः कोशः कोशाद्दण्डः प्रजायते ।

ENMSS@4225@2पृथिवी कोशदण्डाभ्यां प्राप्यते कोशभूषणा ॥ ४२२५॥

ENMSS@4226@1आकर्णपलितः श्यामो वयसाशीतिपञ्चकः ।

ENMSS@4226@2रणे पर्यचरद् द्रोणो वृद्धः षोडशवर्षवत् ॥ ४२२६॥

ENMSS@4227@1आकर्णमुल्लसति मातरपाङ्गदेशे कालाञ्जनेन घटिता तव भाति रेखा ।

ENMSS@4227@2शैवालपङ्क्तिरिव संततनिर्जिहान- कारुण्यपूरपदवी कलितानुबन्धा ॥ ४२२७॥

ENMSS@4228@1आ कर्णमूलमपकृत्य धनुः सबाणं मय्येव किं प्रहरसि स्मर बद्धकोपः ।

ENMSS@4228@2तस्यां मुहुः क्षिप शरान् हरिणेक्षणायां तन्मन्मथोऽपि भव मन्मथ

एव मा भूः ॥ ४२२८॥

ENMSS@4229@1आकर्णय त्वमिममभ्युपगम्य वादं जानातु कोऽपि यदि वा हृदयं श्रुतीनाम् ।

ENMSS@4229@2तस्याप्यसंख्यभवबन्धशतार्जितोऽयं द्वैतभ्रमो गलतु जन्मशतैः कियद्भिः ॥ ४२२९॥

ENMSS@4230@1आकर्णय सरोजाक्षि वचनीयमिदं भुवि ।

ENMSS@4230@2शशाङ्कस्तव वक्त्रेण पामरैरुपमीयते ॥ ४२३०॥

ENMSS@4231@1आकर्णान्तविसर्पिणः कुवलयच्छायामुषश्चक्षुषः क्षेपा एव तवाहरन्ति हृदयं किं संभ्रमेणामुना ।

ENMSS@4231@2मुग्धे केवलमेतदाहितनखोत्खाताङ्कमुत्पांशुलम् बाह्वोर्मूलमलीकमुक्तकबरीबन्धच्छलाद् दर्शितम् ॥ ४२३१॥

ENMSS@4232@1आकर्णितानि रसितानि यया प्रसर्पत् प्रद्युम्नराजरथनिःस्वनसोदराणि ।

ENMSS@4232@2उच्चै रणच्चरणनूपुरया पुरन्ध्र्या क्षिप्रं प्रियं कुपितयापि तयाभिसस्रे ॥ ४२३२॥

ENMSS@4233@1आकर्ण्य गर्जितं घोरं जलदानां समागमे ।

ENMSS@4233@2बाला विधूतलज्जेव सत्रासं श्लिष्यति प्रियम् ॥ ४२३३॥

ENMSS@4234@1आकर्ण्य गर्जितरवं घनगर्जितुल्यं सिंहस्य यान्ति वनमन्यदिभा भयार्ताः ।

ENMSS@4234@2तत्रैव पौरुषनिधिः स्वकुलेन सार्धं दर्पोद्धुरो वसति वीतभयो वराहः ॥ ४२३४॥

ENMSS@4235@1आकर्ण्य जयदेवस्य गोविन्दानन्दिनीर्गिरः ।

ENMSS@4235@2बालिशाः कालिदासाय स्पृहयन्तु वयं तु न ॥ ४२३५॥

ENMSS@4236@1आकर्ण्यन्ते तपनतनयग्रामसंलापघोषा मन्दं मन्दं ग्रसति नियतः कालपाशोऽपि कण्ठे ।

ENMSS@4236@2आपृच्छ्यन्ते कृतजिगमिषासंभ्रमाः प्राणवाता नैवेदानीमपि विषयवैमुख्यमभ्येति चेतः ॥ ४२३६॥

ENMSS@4237@1आकर्ण्य भूपाल यशस्त्वदीयं विधूनयन्तीह न के शिरांसि ।

ENMSS@4237@2विश्वंभराभङ्गभयेन धात्रा नाकारि कर्णौ भुजगेश्वरस्य ॥ ४२३७॥

ENMSS@4238@1आकर्ण्य मामवादीद् धन्यास्ता युवतयः सखि कठोराः ।

ENMSS@4238@2या विषहन्ते दीर्घ- प्रियतमविरहानलासारम् ॥ ४२३८॥

ENMSS@4239@1आकर्ण्य वाणीः पौराणीर्मयैतदवधारितम् ।
ENMSS@4239@2तिष्ठन्तु देवा देव्योऽपि सेव्यो नारायणः परः ॥ ४२३९॥
ENMSS@4240@1आकर्ण्य वारवनितापठितं सभायां संपूरणं सपदि पादमुदारभावः ।
ENMSS@4240@2यः कालिदासमरणं हृदि निश्चिकाय भोजः स एव परमं भुवि भावबोद्धा
॥ ४२४०॥
ENMSS@4241@1आकर्ण्य संगरमहार्णवचेष्टितानि गोष्ठीरसाहृतजनस्य मनोविकारः ।
ENMSS@4241@2अङ्गे करोति पुलकं नयने विकाशं कान्तिं च कामपि मुखे स्फुरणं च बाह्वोः ॥ ४२४१॥
ENMSS@4242@1आकर्ण्य स्मरयौवराज्यपटहं जीमूतनूत्नध्वनिं नृत्यत्केकिकुटुम्बकस्य दधतं मन्द्रां मृदङ्गक्रियाम् ।
ENMSS@4242@2उन्मीलन्नवनीलकन्दलदलव्याजेन रोमाञ्चिता हर्षेणेव समुच्छ्रितान् वसुमती दध्रे शिलीन्ध्रध्वजान् ॥ ४२४२॥
ENMSS@4243@1आकर्ण्याम्रफलस्तुतिं जलमभूत् तन्नारिकेलान्तरं प्रायः कण्टकितं तथैव पनसं जातं द्विधोर्वारुकम् ।
ENMSS@4243@2आस्तेऽधोमुखमेव कादलफलं द्राक्षाफलं क्षुद्रतां श्यामत्वं बत जाम्बवं गतमहो मात्सर्यदोषादिह ॥ ४२४३॥
ENMSS@4244@1आकर्षतेवोर्ध्वमतिक्रशीयान् अत्युन्नतत्वात् कुचमण्डलेन ।
ENMSS@4244@2ननाम मध्योऽतिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम् ॥ ४२४४॥
ENMSS@4245@1आकर्षन्ति न केषाम् अन्तःकरणं प्रवालशालिन्यः ।
ENMSS@4245@2ललना इवात्र लतिकाः कुसुमेषु शिलीमुखैर्निचिताः ॥ ४२४५॥
ENMSS@4246@1आकर्षन्निव गां वमन्निव खुरान् पश्चार्धमुज्झन्निव स्वीकुर्वन्निव खं पिबन्निव दिशश्छायाममर्षन्निव ।
ENMSS@4246@2साङ्गारप्रकरां स्पृशन्निव धरां वातं समश्नन्निव श्रीमन्नाथ
स वाजिराट् तव कथं मादृग्गिरां गोचरः ॥ ४२४६॥
ENMSS@4247@1आकर्षेत् कैशिकव्याये न शिखां चालयेत् ततः ।
ENMSS@4247@2पूर्वापरौ समौ कार्यौ समांसौ निश्चलौ करौ ॥ ४२४७॥
ENMSS@4248@1आकलितोरुक्रमपद- पद्मालंकृत्यनल्पपुण्यभवम् ।
ENMSS@4248@2निजगुणगुरुस्वरूपं काव्यञ्जयति प्रसन्नमतिमधुरम् ॥ ४२४८॥
ENMSS@4249@1आकल्पं मुरजिन्मुखेन्दुमधुरोन्मीलन्मरुन्माधुरी- धीरोदात्तमनोहरः सुखयतु त्वां पाञ्चजन्यध्वनिः ।

ENMSS@4249@2लीलालङ्घितमेघनादविभवो यः कुम्भकर्णव्यथा- दायी दानवदन्तिनां दशमुखं दिक्क्रक्रमाक्रामति ॥ ४२४९॥

ENMSS@4250@1आकल्पं यदि वर्षसि प्रतिदिनं धारासहस्रैस्तथाप्य्- अम्भोधौ कलयत्यगाधजठरे कस्तावकीनं श्रमम् ।

ENMSS@4250@2अम्भोद क्षणमात्रमुज्झसि पयः पृष्ठे यदि क्ष्माभृतां तत् किं न प्रसरन्ति निर्झरसरिद्व्याजेन ते कीर्तयः ॥ ४२५०॥

ENMSS@4251@1आकाल्प्य तल्पं शशिकान्तिकल्पम् उद्ग्रथ्य वीटीः सुरपुष्पगर्भाः ।

ENMSS@4251@2द्वारे दृगन्तान् परिकल्पयन्ती मनो मनोजस्य चमच्चकार ॥ ४२५१॥

ENMSS@4252@1आ कल्याद् आ निशीथाच्च कुक्ष्यर्थं व्याप्रियामहे ।

ENMSS@4252@2न च निर्वृणुमो जातु शान्तास्तु सुखमासते ॥ ४२५२॥

ENMSS@4253@1आकस्मिकस्मितमुखीषु सखीषु विज्ञा विज्ञास्वपि प्रणयनिह्नवमाचरन्ती ।

ENMSS@4253@2तत्रैव रङ्कुनयना नयनारविन्दम् अस्पन्दमाहितवती दयिते गतेऽपि ॥ ४२५३॥

ENMSS@4254@1आकाङ्क्षिणं क्ष्मापतिमन्दिराणि प्रविश्य पातालसहोदराणि ।

ENMSS@4254@2अधोगतेर्नान्यदुपार्जयन्ति फलं भुजङ्गा इव वायुभक्ष्याः ॥ ४२५४॥

ENMSS@4255@1आकाङ्क्षोच्चपदेऽहमात्मकमतिः कार्ये मनोधारणा इत्येवंविधभावजातमुचितं धर्तुं न चित्तान्तरे ।

ENMSS@4255@2वैषम्यस्य निवारणाय मृगयेस्तत्कारणं नापरे स्वात्मन्येव गवेषयेत्यतितरां श्रेयस्करं ते सदा ॥ ४२५५॥

ENMSS@4256@1आकारं विनिगूहतां रिपुबलं जेतुं समुत्तिष्ठतां तन्त्रं चिन्तयतां कृताकृतशतव्यापारशाखाकुलम् ।

ENMSS@4256@2मन्त्रिप्रोक्तनिषेविणां क्षितिभुजामाशङ्किनां सर्वतो दुःखाम्भोनिधिवर्तिनां सुखलवः कान्तासमालिङ्गनम् ॥ ४२५६॥

ENMSS@4257@1आकारः कमनीयताकुलगृहं लीलालसा सा गतिः संपर्कः कमलाकरैः कलतया लोकोत्तरं कूजितम् ।

ENMSS@4257@2यस्येयं गुणसंपदस्ति महती तस्यापि भव्यस्य ते संरब्धत्वमसद्द्रुमद्गुकलहे नाहं सहे हंस हे ॥ ४२५७॥

ENMSS@4258@1आकारः स मनोहरः स महिमा तद्वैभवं तद्वयः सा कान्तिः स च विश्वविस्मयकरः सौभाग्यभाग्योदयः ।

ENMSS@4258@2एकैकस्य विशेषवर्णनविधौ तस्याः स एव क्षमो यस्यास्मिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रद्वयम् ॥ ४२५८॥

ENMSS@4259@1आकारणाय मान्त्रिकम् आगतदूतस्य वचनमादाय ।
ENMSS@4259@2कृत्वा प्रमाणमादावभिमन्त्र्य च तत्र मन्त्रण ॥ ४२५९॥
ENMSS@4260@1आकारदारुणोऽयं भयमस्मादित्यनिश्चयोऽयमपि ।
ENMSS@4260@2भवति महाभैरवमपि शिवस्य रूपं शिवायैव ॥ ४२६०॥
ENMSS@4261@1आकारपरिवृत्तिस्तु बुद्धेः परिभवः पुनः ।
ENMSS@4261@2आशाहानिरिवार्थित्वं परासुत्वमिवापरम् ॥ ४२६१॥
ENMSS@4262@1आकारमात्रविज्ञानसंपादितमनोरथाः ।
ENMSS@4262@2धन्यास्ते ये न शृण्वन्ति दीनाः क्वाप्यर्थिनां गिरः ॥ ४२६२॥
ENMSS@4263@1आकारवेषसौभाग्यैः कन्दर्पप्रतिमोऽपि सन् ।
ENMSS@4263@2यासां संगममासाद्य प्राप्तः को वा न वञ्चनाम् ॥ ४२६३॥
ENMSS@4264@1आकारश्छाद्यमानोऽपि न शक्यो विनिगूहितुम् ।
ENMSS@4264@2बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥ ४२६४॥
ENMSS@4265@1आकारसंवृतिः कार्या सुरक्तेनापि कामिना ।
ENMSS@4265@2रक्तः परिभवं याति परिभूतः कथं प्रियः ॥ ४२६५॥
ENMSS@4266@1आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
ENMSS@4266@2आगमैः सदृशारम्भ आरम्भसदृशोऽदयः ॥ ४२६६॥
ENMSS@4267@1आकारालापसंभोगैर्यदीयैर्लज्ञते जनः ।
ENMSS@4267@2अहो वक्रोद्धुरग्रीवस्तैरेव करभोऽधमः ॥ ४२६७॥
ENMSS@4268@1आकाराहीनकान्तिर्निधनविरहितो योगदोल्लासभागी विक्रान्तो विश्वतुल्यः
कमलकलितदृग्विभ्रमोत्कृष्टमूर्तिः ।
ENMSS@4268@2नानाशापूर्णकीर्तिः सुखरसमयितो वारणाक्रान्तदेहो यादृग्देव त्वमेवं
भवतु रिपुगणोऽप्यादिवर्णप्रलोपात् ॥ ४२६८॥
ENMSS@4269@1आकारेण तथा गत्या चेष्टया भाषितैरपि ।
ENMSS@4269@2नेत्रवक्त्रविकाराभ्यां ज्ञायतेऽन्तर्हितं मनः ॥ ४२६९॥
ENMSS@4270@1आकारेण नरेण वानरयुवा वाहेन वालेयको व्याघ्रेणैवरथो (?) गवापि
गवयः सिंहेन कौलेयकः ।
ENMSS@4270@2श्यामाङ्गेन पिकेन काक इति [च] स्पर्धानुबद्धादरा यद्यप्यत्र तथापि
तद्गुणगणस्यांशं लभन्ते न ते ॥ ४२७०॥
ENMSS@4271@1आकारेण शशी गिरा परभृतः पारावतश्चुम्बने हंसश्चङ्क्रमणे
समं दयितया रत्या विमर्दे गजः ।

ENMSS@4271@2इत्थं भर्तरि मे समस्तयुवतिश्लाघ्यैर्गुणैः सेविते क्षुण्णं नास्ति विवाहितः पतिरिति स्यान्नैष दोषो यदि ॥ ४२७१॥

ENMSS@4272@1आकारेणैव चतुरास्तर्कयन्ति परेङ्गितम् ।

ENMSS@4272@2गर्भस्थं केतकीपुष्पम् आमोदेनेव षट्पदाः ॥ ४२७२॥

ENMSS@4273@1आकारे मदनः सुकाव्यरचनाचातुर्ययुक्तौ गुरुः षड्भाषास्वपि दृश्यते व्यसनिता तं दृष्टवत्यः स्त्रियः ।

ENMSS@4273@2स्वप्राणेश्वरसङ्गमं सुखकरं हित्वा न जीवन्त्यहो तस्यान्ते क्रियतेऽनया तनययाभ्यासः कलानां कथम् ॥ ४२७३॥

ENMSS@4274@1आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।

ENMSS@4274@2नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥ ४२७४॥

ENMSS@4275@1आकारैर्न विदन्ति वक्रफणितीर्बोद्धुं न मेधाविनः शब्दाख्येयनिजाशयं कुलवधूवर्गस्य नैतद् व्रतम् ।

ENMSS@4275@2ग्रामेऽस्मिन् ऋजुवाच्यवाचकहतात्मानो युवानो जडास्तत्त्वज्ञोपगताध्वगावधिरयं कामज्वरः सह्यताम् ॥ ४२७५॥

ENMSS@4276@1आकारो न मनोहरः श्रवणयोः शल्योपमं कूजितं वक्त्रं विड्विकृतं कृतान्तसमयालम्बीदमालोकितम् ।

ENMSS@4276@2क्रीडासंवनने पृथग्जनचिते वासस्तरौ कुत्सिते तत् केनास्तु वराक काक

कनकागारे तवावेशनम् ॥ ४२७६॥

ENMSS@4277@1आकाशकुण्डे सतडिद्धुताशे करोति होमं झषकेतुदेवः ।

ENMSS@4277@2उच्चाटनायेव वियोगिनीनां यद्गर्जितं सैष हि मन्त्रपाठः ॥ ४२७७॥

ENMSS@4278@1आकाशतः पतितमेत्य नदादिमध्यं तत्रापि धावनसमुत्थमलावलिप्तम् ।

ENMSS@4278@2नानाविधावनिगताशुचिपूर्णमर्णो यत्तेन शुद्धिमुपयाति कथं शरीरम् ॥ ४२७८॥

ENMSS@4279@1आकाशदेशात् परिपातुकानि लङ्केशशीर्षाणि सकुन्तलानि ।

ENMSS@4279@2क्षणं नभः प्रांशुमहीरुहस्य शिक्याश्रितानीव फलानि रेजुः ॥ ४२७९॥

ENMSS@4280@1आकाशधारणां कुर्वन् मृत्युं जयति निश्चितम् ।

ENMSS@4280@2यत्र तत्र स्थितो वापि सुखमत्यन्तमश्नुते ॥ ४२८०॥

ENMSS@4281@1आकाश प्रसर प्रसर्पत दिशस्त्वं पृथ्वि पृथ्वी भव प्रत्यक्षीकृतमादिराजयशसां युष्माभिरुज्जृम्भितम् ।

ENMSS@4281@2श्रीमुद्दाफरशाहपार्थिवयशोराशेः समुज्जृम्भणाद्

बीजोच्छ्वासविदीर्णदाडिमदशां ब्रह्माण्डमारोक्ष्यति ॥ ४२८१॥

ENMSS@4282@1आकाशमानसविगाहनराजहंसं नारीजनग्रहिलतानलिनीमहेभम् ।

ENMSS@4282@2आघ्रायमानरतिनायकसंप्रदाय- दीक्षागुरुं दृशि निवेशय सुन्दरीन्दुम्

॥ ४२८२॥

ENMSS@4283@1आकाशमुत्पततु गच्छतु वा दिगन्तम् अम्भोनिधिं विशतु तिष्ठतु वा यथेच्छम् ।

ENMSS@4283@2जन्मान्तरार्जितशुभाशुभकृन्नराणाम् छायेव न त्यजति कर्मफलानुबन्धः

॥ ४२८३॥

ENMSS@4284@1आकाशयानतटकोटिकृतैकपादास्तद्धेमदण्डयुगलान्यवलम्ब्य हस्तैः ।

ENMSS@4284@2कौतूहलात् तव तरङ्गविघट्टितानि पश्यन्ति देवि मनुजाः स्वकलेवराणि

॥ ४२८४॥

ENMSS@4285@1आकाशवापीसितपुण्डरीकं शाणोपलं मन्मथसायकानाम् ।

ENMSS@4285@2पश्योदितं शारदमुत्पलाक्षि संध्याङ्गनाकन्दुकमिन्दुबिंबम् ॥ ४२८५॥

ENMSS@4286@1आकाशश्यामिमानं जलधरघटनां वा दधानं सुधांशुं नूनं मन्ये प्रियास्यं शिरसि शिरसिजैराहितापूर्वशोभम् ।

ENMSS@4286@2यद्दृष्ट्वा हन्त हर्षं मनसि कलयसे ज्ञानशान्त्यादिभव्या- रामोर्वीजच्छिदायै निशिततरमसिं तं महान्तो ब्रुवन्ति ॥ ४२८६॥

ENMSS@4287@1आकाशसौधमधिरुह्य दिगङ्गनानाम् अङ्गेषु निक्षिपति काम्यमिवाङ्गरागम् ।

ENMSS@4287@2तारावरोधवलितो ललितात्मजश्रीर्ज्योत्स्नाच्छलेन मुदिताखिललोक इन्दुः

॥ ४२८७॥

ENMSS@4288@1आकाशसौधे शशिसंपटस्थं तमालनीलं शिवलिङ्गमुच्चैः ।

ENMSS@4288@2सिद्धाङ्गनेयं रजनी सकामा नक्षत्ररत्नैः परिपूजतीव ॥ ४२८८॥

ENMSS@4289@1आकाशात् पतितं तोयं यथा गच्छति सागरम् ।

ENMSS@4289@2सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥ ४२८९॥

ENMSS@4290@1आकाशात् पतितं पुनर्जलनिधौ मध्ये चिरं संस्थितं पश्चाद् दुःसहदेहरन्ध्रजनितक्लेशान्वितं मौक्तिकम् ।

ENMSS@4290@2बाले बालकुरङ्गलोचनयुगे घोरं तपः संचरन् नासाभूषणतामुपैति सखि ते बिम्बाधरापेक्षया ॥ ४२९०॥

ENMSS@4291@1आकाशे नटनं सरोरुहयुगे मञ्जीरमञ्जुध्वनिः शीतांशौ कलकूजितं

किसलये पीयूषपानोत्सवः ।
ENMSS@4291@2स्वर्गक्षोणिधरे नखात् परिभवो ध्वान्ते कराकर्षणं रम्भायां रसनारवस्तरुणयोः पुण्यानि मन्यामहे ॥ ४२९१॥
ENMSS@4292@1आकाशे पश्य नेमा निबिडघनघटाः संभृताग्नेयचूर्णा मञ्जूषा भान्ति तासामुपरि सुरधनुः कैतवात् केतवोऽमी ।
ENMSS@4292@2विद्युन्नो नालयन्त्रश्रुतिमुखनिपतद्दीप्तवर्त्तिप्रकाशः सैन्यं मारस्य मन्ये स्फुरति विमथितुं मानिनी मानदुर्गम् ॥ ४२९२॥
ENMSS@4293@1आकिंचन्यं च राज्यं च तुलया समतोलयम् ।
ENMSS@4293@2अत्यरिच्यत दारिद्यं राज्यादपि गुणाधिकम् ॥ ४२९३॥
ENMSS@4294@1आकिंचन्यं सुखं लोके पथ्यं शिवमनामयम् ।
ENMSS@4294@2अनमित्रमथो ह्येतद् दुर्लभं सुलभं सताम् ॥ ४२९४॥
ENMSS@4295@1आकिंचन्यं सुसंतोषो निराशीष्ट्वमचापलम् ।
ENMSS@4295@2एतदाहुः परं श्रेय आत्मज्ञस्य जितात्मनः ॥ ४२९५॥
ENMSS@4296@1आकिंचन्यादतिपरिचयाज्ञाययोपेक्ष्यमाणो भूपालानामननुसरणाद् बिभ्यदेवाखिलेभ्यः ।
ENMSS@4296@2गेहे तिष्ठन् कुमतिरलसः कूपकूर्मैः सधर्मा किं जानीते भुवनचरितं किं सुखं चोपभुङ्क्ते ॥ ४२९६॥
ENMSS@4297@1आकिंचन्ये च राज्ये च विशेषः सुमहानयम् ।
ENMSS@4297@2नित्योद्विग्नो हि धनवान् मृत्योरास्यगतो यथा ॥ ४२९७॥
ENMSS@4298@1आकीर्णः शोभते राजा न विविक्तः कदाचन ।
ENMSS@4298@2ये तं विविक्तमिच्छन्ति ते तस्य रिपवः स्मृताः ॥ ४२९८॥
ENMSS@4299@1आकुञ्चिताग्राङ्गुलिना ततोऽन्यः किंचित्समावर्जितनेत्रशोभः ।
ENMSS@4299@2तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठम् ॥ ४२९९॥
ENMSS@4300@1आकुञ्चितैकजङ्घं दरावृतोर्ध्वोरु गोपितार्धोरु ।
ENMSS@4300@2सुतनोः श्वसितक्रमनमद्- उदरस्फुटनाभि शयनमिदम् ॥ ४३००॥
ENMSS@4301@1आकुञ्चितोरू द्वौ यत्र जानुभ्यां धरणिं गतौ ।
ENMSS@4301@2दर्दुरक्रममित्याहुः स्थानकं दृढभेदने ॥ ४३०१॥
ENMSS@4302@1आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे ।
ENMSS@4302@2तारस्वनं प्रथितथूत्कमदात् प्रहारं हाहा हतोऽहमिति रोदिति विष्णुशर्मा ॥ ४३०२॥

ENMSS@4303@1आकुञ्च्याग्रं नखविलिखने पश्यति भ्रूविभङ्ग्या गाढाश्लेषे वदति च ह हा मुञ्च मुञ्चेति वाचम् ।
ENMSS@4303@2केशाकृष्टावरुणनयना ताडने साश्रुनेत्रा नानाभावं श्रयति तरुणी नाटके मन्मथस्य ॥ ४३०३॥
ENMSS@4304@1आकुञ्चीकृतपृष्ठमुन्नतवलद्वक्राग्रपुच्छं भयाद् अन्तर्वेश्मनिवेशितैकनयनं निष्कम्पकर्णद्वयम् ।
ENMSS@4304@2लालाकीर्णविदीर्णसृक्कविकचद्दंष्ट्राकरालाननः श्वा निःश्वासनिरोधपीवरगलो मार्जारमास्कन्दति ॥ ४३०४॥
ENMSS@4305@1आकुमारमुपदेष्टुमिच्छवः संनिवृत्तिमपथान्महापदः ।
ENMSS@4305@2योगशक्तिजितजन्ममृत्यवः शीलयन्ति यतयः सुशीलताम् ॥ ४३०५॥
ENMSS@4306@1आकुलश्चलपतत्रिकुलानाम् आरवैरनुदितौषसरागः ।
ENMSS@4306@2आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः ॥ ४३०६॥
ENMSS@4307@1आकृतिप्रेमसरसा विलासालसगामिनी ।
ENMSS@4307@2विसारे हन्त संसारे सारं सारङ्गलोचना ॥ ४३०७॥
ENMSS@4308@1आकृतेः किंचिदुल्लेखो विभावयति लक्षणम् ।
ENMSS@4308@2महतोपप्लवेनेव पीडितं चन्द्रमण्डलम् ॥ ४३०८॥
ENMSS@4309@1आकृष्टः शिखया नखैर्विलिखितः स्पृष्टः कपोलस्थले मौलौ दामभिराहतः प्रतिदिशं क्रामन् सलीलं पथि ।
ENMSS@4309@2इत्थं वारविलासिनीकृतपरीहासस्य दैत्याध्वरे विष्णोर्वामनवेषविभ्रमभृतो हासोर्मयः पान्तु वः ॥ ४३०९॥
ENMSS@4310@1आकृष्टकरवालोऽसौ संपराये परिभ्रमन् ।
ENMSS@4310@2प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥ ४३१०॥
ENMSS@4311@1आकृष्टप्रतनुवपुर्लतैस्तरद्भिस्तस्याम्भस्तदथ सरोमहार्णवस्य ।
ENMSS@4311@2अक्षोभि प्रसृतविलोलबाहुपक्षैर्योषाणामुरुभिरुरोजगण्डशैलैः ॥ ४३११॥
ENMSS@4312@1आकृष्टश्चक्रवाकैर्नयनकलनया बन्धकीभिर्निरस्तो नास्तं द्रागेति भानुर्निवसति नलिनीबोधनिद्रान्तराले ।
ENMSS@4312@2सन्ध्यादीपप्ररोहं बहुलतिलरसव्याप्तपत्रान्तरालं वासागारे दिशन्ती हसति नववधूक्रोधदृष्टा भुजिष्या ॥ ४३१२॥
ENMSS@4313@1आकृष्टिः कृतचेतसां सुमहतामुच्चाटनं चांहसाम् आचण्डालममूकलोकसुलभो वश्यश्च मोक्षश्रियः ।
ENMSS@4313@2नो दीक्षां न च दक्षिणां न च पुरश्चर्यां मनागीक्षते मन्त्रोऽयं

रसानास्पृगेव फलति श्रीकृष्णनामात्मकः ॥ ४३१३॥

ENMSS@4314@1आकृष्टिभग्नकटकं केन तव प्रकृतिकोमलं सुभगे ।

ENMSS@4314@2धन्येन भुजमृणालं ग्राह्यं मदनस्य राज्यमिव ॥ ४३१४॥

ENMSS@4315@1आकृष्टे कवचादहीन्द्ररसनाकल्पे कृपाणे त्वया श्रीमन्नायक रामचन्द्र भवतः प्रत्यर्थिनां वेश्मसु ।

ENMSS@4315@2गाहन्ते सहसा लुलायचमरीशार्दूलशाखाचरी-
यक्षोरक्षश्शृगालकोलशलभृद्भल्लूकभिल्लादयः ॥ ४३१५॥

ENMSS@4316@1आकृष्टे युधि कार्मुके रघुपतेर्वामोऽब्रवीद् दक्षिणं दानादानसुभोजनेषु पुरतो युक्तं किमित्थं तव ।

ENMSS@4316@2कामान्यः पुनरब्रवीन्मम न भीः प्रष्टुं जगत्स्वामिनं छेत्तुं रावणवक्त्रपंक्तिमिति यो दद्यात् स वो मंगलम् ॥ ४३१६॥

ENMSS@4317@1आकृष्टे युधि कार्मुके समवदद् वामः करो दक्षिणं रे रे दक्षिणहस्त भोजनमहादानादि ते कुर्वतः ।

ENMSS@4317@2पश्चाद् गंन्तुमयुक्तमित्यथ पुनः सोऽप्यब्रवीदद्रवं प्रष्टुं राघवमाशुरावणशिरोवृन्दानि भिन्दानि किम् ॥ ४३१७॥

ENMSS@4318@1आकृष्टे वसनाञ्चले कुवलयश्यामा त्रपाधःकृता दृष्टिः संवलिता रुचा कुचयुगे स्वर्णप्रभे श्रीमति ।

ENMSS@4318@2बालः कश्चन चूतपल्लव इति प्रान्तस्मितास्यश्रियं श्लिष्यंस्तामथ रुक्मिणीं नतमुखीं कृष्णः स पुष्णातु नः ॥ ४३१८॥

ENMSS@4319@1आकृष्यन्ते करिणः पङ्कनिमग्ना महद्विपैरेव ।

ENMSS@4319@2प्राप्तापदो महान्त उद्धरणीया महापुंभिः ॥ ४३१९॥

ENMSS@4320@1आकृष्यादावमन्दग्रहमलकचयं वक्रमासज्य वक्रे कण्ठे लग्नः सुकण्ठः पुनरपि कुचयोर्दत्तगाढाङ्गसङ्गः ।

ENMSS@4320@2बद्धासक्तिर्नितम्बे पतति चरणयोर्यः स तादृक् प्रियो मे बाले लज्जा प्रणष्टा नहि नहि कुटिले चोलकः किं त्रपाकृत् ॥ ४३२०॥

ENMSS@4321@1आ केशग्रहणान्मित्रम् अकार्यात् संनिवर्तयन् ।

ENMSS@4321@2अवाच्यः कस्यचिद् भवति कृतयत्नो यथाबलम् ॥ ४३२१॥

ENMSS@4322@1आकोपितोऽपि कुलजो न वदत्यवाच्यं निष्पीडितो मधुरमेव वमेत् किलेक्षुः ।

ENMSS@4322@2नीचो जनो गुणशतैरपि सेव्यमानो हास्येषु यद् वदति तत् कलहेष्ववाच्यम् ॥ ४३२२॥

ENMSS@4323@1आकौमारं समरजयिना कुर्वतोर्वीमवीराम् एतेनामी कथमिव दिशामीशितारो विमुक्ताः ।

ENMSS@4323@2अन्तर्ज्ञातं वपुषि कलया तस्य तेऽष्टौ प्रविष्टाः प्रह्वीभूते प्रभवति नहि क्षत्रियाणां कृपाणः ॥ ४३२३॥

ENMSS@4324@1आ कौमाराद् गुरुचरणशुश्रूषया ब्रह्मविद्या- स्वास्थायास्थामहह, महतीमर्जितं कौशलं यत् ।

ENMSS@4324@2निद्राहेतोर्निशि निशि कथाः शृण्वतां पार्थिवानां कालक्षेपौपयिकमिदमप्याः कथं पर्यणंसीत् ॥ ४३२४॥

ENMSS@4325@1आक्रन्दाः स्तनितैर्विलोचनजलान्यश्रान्तधाराम्बुभिस्तद्विच्छेदभुवश्च शोकशिखिनस्तुल्यास्तडिद्विभ्रमैः ।

ENMSS@4325@2अन्तर्मे दयितामुखं तव शशी वृत्तिः समैवावयोस्तत्किं मामनिशं सखे जलधर त्वं दग्धुमेवोद्यतः ॥ ४३२५॥

ENMSS@4326@1आक्रन्दितं रुदितमाहतमानने वा कस्यार्द्रमस्तु हृदयं किमतः फलं वा ।

ENMSS@4326@2यस्या मनो द्रवति या जगतां स्वतन्त्रा तस्यास्तवाम्ब पुरतः कथयामि खेदम् ॥ ४३२६॥

ENMSS@4327@1आक्रम्य यद् द्विजैर्भुक्तं परिक्षीणैश्च बान्धवैः ।

ENMSS@4327@2गोभिश्च नृपशार्दूल राजसूयाद् विशिष्यते ॥ ४३२७॥

ENMSS@4328@1आक्रम्य यस्य दोर्दण्डम् अरिचक्रं प्रकाशते ।

ENMSS@4328@2प्राप्नोति पुरुषो लोके स वैकुण्ठ इति प्रथाम् ॥ ४३२८॥

ENMSS@4329@1आक्रम्य सर्वः कालेन परलोकं च नीयते ।

ENMSS@4329@2कर्मपाशवशो जन्तुस्तत्र का परिदेवना ॥ ४३२९॥

ENMSS@4330@1आक्रम्याक्रम्य साधूनां दारांश्चैव धनानि च ।

ENMSS@4330@2भोक्ष्यन्ति निरनुक्रोशा रुदतामपि भारत ॥ ४३३०॥

ENMSS@4331@1आक्रम्याजेरग्रिमस्कन्धमुच्चैरास्थायाथो वीतशङ्कं शिरश्च ।

ENMSS@4331@2हेलालोला वर्त्म गत्वातिमर्त्यं द्यामारोहन् मानभाजः सुखेन ॥ ४३३१॥

ENMSS@4332@1आक्रम्यैकामग्रपादेन जङ्घाम् अन्यामुच्चैराददानः करेण ।

ENMSS@4332@2सास्थिस्वानं दारुवद्दारुणात्मा कंचिन्मध्यात् पाटयामास दन्ती ॥ ४३३२॥

ENMSS@4333@1आक्रम्योच्चैः शिरसि वसतिर्भूभृतामुन्नतानां तोयादानं तदपि जलधेर्लोकसंतापशान्त्यै ।

ENMSS@4333@2दीर्घा छाया प्रकृतिमहति व्योम्नि चाभोगबन्धो हे हे मेघ स्पृहयति न ते कः किलेत्थं व्रताय ॥ ४३३३॥

ENMSS@4334@1आक्रान्तं वलिभिः प्रसह्य पलितैरत्यन्तमास्कन्दितं वार्धक्यं श्लथसंधिबन्धनतया निःस्थाम निर्धाम च ।

ENMSS@4334@2एतन्मे वपुरस्थिकेवलजरत्कङ्कालमालोकय - - स्थूलशिराकरालपरुषत्वङ्गात्रपात्रीकृतम् ॥ ४३३४॥

ENMSS@4335@1आक्रान्तपूर्वा रभसेन सैनिकैर्दिगङ्गनाव्योमरजोऽभिदूषिता ।

ENMSS@4335@2भेरीरवाणां प्रतिशब्दितैर्घनैर्जगर्ज गाढं गुरुमत्सरादिव ॥ ४३३५॥

ENMSS@4336@1आक्रान्तमन्तररिभिर्मदमत्सराद्यैर्गात्रं वलीपलितरोगशतानुविद्धम् ।

ENMSS@4336@2दारैः सुतैश्च गृहमावृतमुत्तमर्णैर्मातः कथं भवतु मे मनसः प्रसादः ॥ ४३३६॥

ENMSS@4337@1आक्रान्तासु वसुन्धरासु यवनैरासेतुहेमाचलं विद्राणे क्षितिभृद्गणे विकरुणे निद्राति नारायणे ।

ENMSS@4337@2निर्विघ्नप्रसरे कलावपि बलान्निष्कण्टकं वैदिकं पन्थानं किल तत्र तत्र परिपात्येको हि लोकोत्तरः ॥ ४३३७॥

ENMSS@4338@1आक्रान्तेव महोपलेन मुनिना शप्तेव दुर्वाससा सातत्यं बत मुद्रितेव जतुना
नीतेव मूर्च्छां विषैः ।

ENMSS@4338@2बद्धेवातनुरज्जुभिः परगुणान् वक्तुं न शक्ता सती जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥ ४३३८॥

ENMSS@4339@1आक्रान्ते शैशवेऽस्मिन्नभिनववयसा शासनान्मीनकेतोर्बालाया नेत्रयुग्मं श्रुतियुगमविशद् भ्रूयुगेनापि सार्धम् ।

ENMSS@4339@2वक्षोजद्वन्द्वमुच्चैर्बहिरिह निरगाच्छ्रोणबिम्बेन साकं मध्यः संगृह्य बद्धस्त्रिवलिभिरभितः कार्श्यमङ्गीकरोति ॥ ४३३९॥

ENMSS@4340@1आक्रामन्तु तमेव चूतमपि च क्रोशन्तु रेफोत्तरं डिम्भोऽस्माकमपीति वाभिदधतां काका वराकाः स्वयम् ।

ENMSS@4340@2गन्तव्यं क्व ततोऽन्यतः परभृत क्षन्तव्यमेतावदप्यग्रे कस्य निवेद्यतामिदमतिक्रान्तो वसन्तोऽधुना ॥ ४३४०॥

ENMSS@4341@1आक्रुश्यमानो नाक्रोशेन् मन्युरेव तितिक्षतः ।

ENMSS@4341@2आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ४३४१॥

ENMSS@4342@1आक्रुष्टोऽपि व्रजति न रुषं भाषते नापभाष्यं नोत्कृष्टोऽपि

प्रवहति मदं शौर्यधैर्यादिधर्मैः ।

ENMSS@4342@2यो यातोऽपि व्यसनमनिशं कातरत्वं न याति सन्तः प्राहुस्तमिह सुजनं

तत्त्वबुद्ध्या विवेच्य ॥ ४३४२॥

ENMSS@4343@1आक्रोशकसमो लोके सुहृदन्यो न विद्यते ।

ENMSS@4343@2यस्तु दुष्कृतमादाय सुकृतं स्वं प्रयच्छति ॥ ४३४३॥

ENMSS@4344@1आक्रोशन्नाह्वयन्नन्यान् आधावन् मण्डलं रुदन् ।

ENMSS@4344@2गाः कालयति दण्डेन डिम्भः सस्यावतारिणीः ॥ ४३४४॥

ENMSS@4345@1आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् ।

ENMSS@4345@2वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥ ४३४५॥

ENMSS@4346@1आक्रोशेन न दूयते न च पटुः प्रोक्तः समानन्द्यते दुर्गन्धेन न बाध्यते न च समं मोदेन संजीयते ।

ENMSS@4346@2स्त्रीरत्नेन न रज्यते न च मृतस्नानेन विद्वेष्यते माध्यस्थेन विराजितो विजयते कोऽप्येष योगीश्वरः ॥ ४३४६॥

ENMSS@4347@1आक्षिपन्त्यरविन्दानि मुग्धे तव मुखश्रियम् ।

ENMSS@4347@2कोषदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥ ४३४७॥

ENMSS@4348@1आक्षिपसि कर्णमक्ष्णा बलिरपि बद्धस्त्वया त्रिधा मध्ये ।

ENMSS@4348@2इति जितसकलवदान्ये तनुदाने लज्जसे सुतनु ॥ ४३४८॥

ENMSS@4349@1आक्षिप्तसंपातमपेतशोभम् उद्वह्नि धूमाकुलदिग्विभागम् ।

ENMSS@4349@2वृतं नभो भोगिकुलैरवस्थां परोपरुद्धस्य पुरस्य भेजे ॥ ४३४९॥

ENMSS@4350@1आक्षिप्ता चामरश्रीः प्रसभमपहृतः पौण्डरीको विलासः प्रच्छन्नो वीरकम्बुः समजनि विहितः कण्ठभाराय हारः ।

ENMSS@4350@2लुप्तो हासप्रकाशः कमपि परिभवं प्रापितः पुष्पराशिश्चन्द्राभैर्यद्यशोभिः प्रतिधरणिभुजां निह्नुता किं च कीर्तिः ॥ ४३५०॥

ENMSS@4351@1आक्षिप्तैः प्रतिपक्षभूमिपतिभिः क्रुद्धेन देव त्वया वित्रस्तैर्न महायुधानि विविधान्याविष्क्रियन्ते युधि ।

ENMSS@4351@2दूरावर्जितमौलयस्तव पुरस्तन्वन्ति ते केवलं नानाकारकिरीटरत्ननिकरैरिन्द्रायुधानि क्षितौ ॥ ४३५१॥

ENMSS@4352@1आक्षेपचरणलङ्घन- केशग्रहकेलिकुतुकतरलेन ।

ENMSS@4352@2स्त्रीणां पतिरपि गुरुरिति धर्मं न श्राविता सुतनुः ॥ ४३५२॥

ENMSS@4353@1आक्षेपवचनं तस्य न वक्तव्यं कदाचन ।

ENMSS@4353@2अनुकूलं प्रियं चास्य वक्तव्यं जनसंसदि ॥ ४३५३॥
ENMSS@4354@1आखुः कैलासशैलं तुलयति करटस्ताक्ष्र्यमांसाभिलाषी
बभ्रुर्लाङ्गूलमूलं चलयति चपलस्तक्षकाहिं जिघांसुः ।
ENMSS@4354@2भेकः पारं यियासुर्भुजगमपि महाघस्मरस्याम्बुराशेः प्रायेणासन्नपातः
स्मरति समुचितं कर्म न क्षुद्रकर्मा ॥ ४३५४॥
ENMSS@4355@1आखुना भक्षितस्याथ नामोच्चार्य समुद्धरेत् ।
ENMSS@4355@2मार्गधूलिं क्षिपेद् दूरं तस्य शीघ्रं सुखं भवेत् ॥ ४३५५॥
ENMSS@4356@1आखुभ्यः किं खलैर्ज्ञातं खलेभ्यश्च किमाखुभिः ।
ENMSS@4356@2अन्यत् परगृहोत्खातात् कर्म येषां न विद्यते ॥ ४३५६॥
ENMSS@4357@1आखुर्वाञ्छति भस्मसूत्रहरणं व्यालस्तथा मूषकं व्यालं बर्हिरयं
हरिश्च वृषभं गङ्गा तथा चन्द्रकम् ।
ENMSS@4357@2इत्थं दुःखमहर्निशं शृणु विभो सोढव्यमेतत् कथं
शंभोरात्मदशानिबोधनपरं त्वां पातु दीनं वचः ॥ ४३५७॥
ENMSS@4358@1आखेटकं वृथाक्लेशं मूर्खं व्यसनसंस्थितम् ।
ENMSS@4358@2समालापेन यो युङ्क्ते स गच्छति पराभवम् ॥ ४३५८॥
ENMSS@4359@1आखेटकस्य धर्मेण विभवाः स्युर्वशे नृणाम् ।
ENMSS@4359@2नृप्रजाः प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव ॥ ४३५९॥
ENMSS@4360@1आख्यातनामरचनाचतुरस्रसंधि- सद्धात्वलंकृतिगुणं सरसं
सुवृत्तम् ।
ENMSS@4360@2आसेदुषामपि दिवं कविपुंगवानां तिष्ठत्यखण्डमिह काव्यमयं शरीरम्
॥ ४३६०॥
ENMSS@4361@1आख्याते हसितं पितामह इति त्रस्तं कपालीति च व्यावृत्तं गुरुरित्यसौ
दहन इत्याविष्कृता भीरुता ।
ENMSS@4361@2पौलोमीपतिरित्यसूयितमथ व्रीडावनम्रं श्रिया पायाद् वः पुरुषोत्तमोऽयमिति
च न्यस्तः स पुष्पाञ्जलिः ॥ ४३६१॥
ENMSS@4362@1आख्यायिकानुरागी व्रजति सदा पुण्यपुस्तकं श्रोतुम् ।
ENMSS@4362@2दष्ट इव कृष्णसर्पैः पलायते दानधर्मेभ्यः ॥ ४३६२॥
ENMSS@4363@1आख्यास्तदीया रुचिरार्थपोषा गायन्ति कोशाधिकृताः सतोषाः ।
ENMSS@4363@2परंतु पुण्यैरिह हर्षधाम प्राप्तं त्वया संप्रति चूतनाम ॥ ४३६३॥
ENMSS@4364@1आगच्छतां च तुच्छानाम् अतुच्छानां च गच्छताम् ।
ENMSS@4364@2यदध्वनि न संघट्टो घटानां तद् वृथा सरः ॥ ४३६४॥

ENMSS@4365@1आगच्छतानवेक्षित- पृष्ठेनार्थी वराटकेनेव ।
ENMSS@4365@2मुषितास्मि तेन जघनां- शुकमपि वोढुं नशक्तेन ॥ ४३६५॥
ENMSS@4366@1आगच्छदुत्सवो भाति यथैव न तथा गतः ।
ENMSS@4366@2हिमांशोरुदयः सायं चकास्ति न तथोषसि ॥ ४३६६॥
ENMSS@4367@1आगच्छदुर्वीन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः ।
ENMSS@4367@2विस्पष्टमाचष्ट हरिद्वधूनां रूपं पतित्यागदशानुरूपम् ॥ ४३६७॥
ENMSS@4368@1आगच्छन्त्यवगुण्ठयन्त्यथ पुनः पश्यन्ति जिघ्रन्ति च स्वारब्धं मधुमक्षिकां न कणमप्यस्य स्वयं भुञ्जते ।
ENMSS@4368@2धन्यस्त्वन्य उपेत्य निर्भयममूरुत्सारयन् दूरतः स्वादंस्वादमिदं स्वसंभृतमिव स्वच्छन्दमानन्दति ॥ ४३६८॥
ENMSS@4369@1आगच्छन् सूचितो येन येनानीतो गृहं प्रति ।
ENMSS@4369@2प्रथमं सखि कः पूज्यः किं काकः किं क्रमेलकः ॥ ४३६९॥
ENMSS@4370@1आगच्छागच्छ सज्जं कुरु वरतुरगं संनिधेहि द्रुतं मे खङ्गः क्वासौ कृपाणीमुपनय धनुषा किं किमङ्ग प्रविष्टम् ।
ENMSS@4370@2संरम्भोन्निद्रितानां क्षितिभृति गहनेऽन्योऽन्यमेवं प्रतीच्छन् वादः स्वप्नाभिदृष्टे त्वयि चकितदृशां विद्विषामाविरासीत् ॥ ४३७०॥
ENMSS@4371@1आगच्छामि झटित्यहं प्रियतमे कार्यं विधायाल्पकं गत्वेतस्त्वमिहैव तिष्ठ विजने तावद्गृहे सुन्दरे ।
ENMSS@4371@2इत्युक्त्वा सखि वञ्चकः स तु गतस्तत्र स्थिता या निशा सर्वा सा हि गता
ममातिकुटिलो नो वै तथाप्यागतः ॥ ४३७१॥
ENMSS@4372@1आगतं विग्रहं विद्वान् उपायैः प्रशमं नयेत् ।
ENMSS@4372@2विजयस्य ह्यनित्यत्वाद् रभसेन न संपतेत् ॥ ४३७२॥
ENMSS@4373@1आगतः पतिरितीरितं जनैः शृण्वती चकितमेत्य देहलीम् ।
ENMSS@4373@2कौमुदीव शिशिरीकरिष्यते लोचने मम कदा मृगेक्षणा ॥ ४३७३॥
ENMSS@4374@1आगतः पाण्डवाः सर्वे दुर्योधनसमीहया ।
ENMSS@4374@2तस्मै गां च सुवर्णं च रत्नानि विविधानि च ॥ ४३७४॥
ENMSS@4375@1आगतव्ययशीलस्य कृशत्वमतिशोभते ।
ENMSS@4375@2द्वितीयश्चन्द्रमा वन्द्यो न वन्द्यः पूर्णचन्द्रमाः ॥ ४३७५॥
ENMSS@4376@1आगतश्च गतश्चैव गत्वा यः पुनरागतः ।
ENMSS@4376@2अकर्णहृदयो मूर्खस्तत्रैव निधनं गतः ॥ ४३७६॥

ENMSS@4377@1आगतानगणितप्रतियातान् वल्लभानभिसिसारयिषूणाम् ।
ENMSS@4377@2प्रापि चेतसि सविप्रतिसारे सुभ्रुवामवसरः सरकेण ॥ ४३७७॥
ENMSS@4378@1आगतानामपूर्णानां पूर्णानामपि गच्छताम् ।
ENMSS@4378@2यदध्वनि न संघट्टो घटानां तत् सरोऽवरम् ॥ ४३७८॥
ENMSS@4379@1आगते कुसुमधन्विनि तन्व्या मानसाद् बहिरभूत् कुचकोकः ।
ENMSS@4379@2तिष्ठतास्य सरसीरुहचक्षुः खञ्जनेन चकितं सहसैव ॥ ४३७९॥
ENMSS@4380@1आगत्य प्रणिपातसान्त्वितसखीदत्तान्तरे सागसि स्वैरं कुर्वति तल्पपार्श्वनिभृते धूर्तेऽङ्गसंवाहनम् ।
ENMSS@4380@2ज्ञात्वा स्पर्शवशात् तया किल सखीभ्रान्त्या स्ववक्षः शनैः खिन्नासीत्यभिधाय मीलितदृशा सानन्दमारोपितः ॥ ४३८०॥
ENMSS@4381@1आगत्य संप्रति वियोगविसंष्ठुलाङ्गीम् अम्भोजिनीं क्वचिदपि क्षपितत्रियामः ।
ENMSS@4381@2एतां प्रसादयति पश्य शनैः प्रभाते तन्वङ्गि पादपतनेन सहस्ररश्मिः ॥ ४३८१॥
ENMSS@4382@1आगत्य सम्प्रति शरत्समयः प्रसादाद् ईषद्विहस्य विकसत्कुमुदच्छलेन ।
ENMSS@4382@2उत्सार्य रोषमिव वारिधरोपरोधम् एष प्रसादयति दिग्वनितामुखानि ॥ ४३८२॥
ENMSS@4383@1आगत्य सत्वरमसी रविरम्बरान्तम् उल्लास्य पादपतनैः स्फुटसांध्यरागः ।
ENMSS@4383@2पश्य प्रसादयति रागवतीं प्रतीची- दिक्कामिनीं प्रकुपितामिव मन्यमानः ॥ ४३८३॥
ENMSS@4384@1आगत्यैव कुतश्चिदेव गगनाभोगं च कृत्वात्मसात् भावाभावविलोकनास्पदममून् नीत्वेन्दुमुख्यानपि ।
ENMSS@4384@2जाज्वल्यं जगतो विधाय किमपि प्राप्तः प्रियोऽह्नां पतिर्यात्वस्तं प्रविशत्वथाब्धिमथवा मेरौ परिभ्राम्यतु ॥ ४३८४॥
ENMSS@4385@1आगन्तौ जाङ्घिके चैव सर्वे काकाः समाः स्मृताः ।
ENMSS@4385@2क्षेत्रजे शकुने ग्राह्यः काकोलस्तेषु सर्वदा ॥ ४३८५॥
ENMSS@4386@1आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ ।
ENMSS@4386@2विचार्य सर्वपण्यानां कारयेत् क्रयविक्रयौ ॥ ४३८६॥
ENMSS@4387@1आगमरूपविचारिण्यधिकरणसहस्रशिक्षितविपक्षे ।
ENMSS@4387@2स्वामिनिजैमिनियोगिन्युपरज्यति हृदयमस्मदीयमिदम् ॥ ४३८७॥

ENMSS@4388@1आगमादेव नरकाः श्रूयन्ते रौरवादयः ।
ENMSS@4388@2विषयित्वं दरिद्राणां प्रत्यक्षं नरकं विदुः ॥ ४३८८॥
ENMSS@4389@1आगमार्थं हि यतते रक्षणार्थं हि सर्वदा ।
ENMSS@4389@2कुटुम्बपोषणे स्वामी तदन्ये तस्करा इव ॥ ४३८९॥
ENMSS@4390@1आगमिष्यन्ति ते भावा ये भावा मयि भाविनः ।
ENMSS@4390@2अहं तैरनुसर्तव्यो न तेषामन्यतो गतिः ॥ ४३९०॥
ENMSS@4391@1आगमेन च युक्त्या च योऽर्थः समभिगम्यते ।
ENMSS@4391@2परीक्ष्य हेमवद् ग्राह्यः पक्षपातग्रहेण किम् ॥ ४३९१॥
ENMSS@4392@1आगमे यस्य चत्वारि निर्गमे सार्धपञ्च च ।
ENMSS@4392@2अतिविस्तारविस्तीर्णाश्चिरं तिष्ठन्ति नो श्रियः ॥ ४३९२॥
ENMSS@4393@1आगमोऽभ्यधिको भोगाद् विना पूर्वक्रमागतात् ।
ENMSS@4393@2आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो ॥ ४३९३॥
ENMSS@4394@1आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुत्तम्भयन् ।
ENMSS@4394@2वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुवं
तृप्यत्कालकरालवक्त्रविघसव्याकीर्यमाणामिव ॥ ४३९४॥
ENMSS@4395@1आगर्भमाबद्धममर्षशीलः पितुः स्मरन् क्षत्रकृतापराधम् ।
ENMSS@4395@2परश्वधेनैव भृगुप्रवीरः प्राणैर्वियोज्यापि रिपूंश्छिनत्ति ॥ ४३९५॥
ENMSS@4396@1आ गर्भाद् आ कुलपरिवृढाद् आ चतुर्वक्त्रतोऽपि त्वत्पादाब्जप्रपदनपरान् वेत्सि नश्चन्द्रमौले ।
ENMSS@4396@2मायायाश्च प्रपदनपरेष्वप्रवृत्तिं त्वमात्थ स्वामिन्नेवं सति यदुचितं तत्र देवः प्रमाणम् ॥ ४३९६॥
ENMSS@4397@1आगस्कारिणि कैटभप्रमथने तत्ताडनार्थं रुषा नाभीपङ्कजमस्त्रतां गमयितुं जाते प्रयत्ने श्रियः ।
ENMSS@4397@2स्वावासोन्मथनोपपादितभयभ्रान्तात्मनस्तत्क्षण् आद अब्रह्मण्यपराः पुरातनमुनेर्वाग्वृत्तयः पान्तु वः ॥ ४३९७॥
ENMSS@4398@1आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः ।
ENMSS@4398@2रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥ ४३९८॥
ENMSS@4399@1आगुल्फमालम्बितवल्गुवेणी विभाति बाला कनकाङ्गयष्टिः ।
ENMSS@4399@2उत्तीर्णमौर्वीव वशीकृतोर्वी मनोभुवश्चम्पकचापवल्ली ॥ ४३९९॥
ENMSS@4400@1आग्नेयास्त्रप्रवीणप्रबलमृगभटाः शत्रुसंक्षोभदक्षा यस्य

प्रौढप्रतापानलबहलशिखास्विन्धनत्वं प्रयान्ति ।
ENMSS@4400@2सोऽयं प्राचीपयोधिप्रहितकरततीतूर्णसंपूर्णकोपो
बाङ्गालक्षोणिपालस्त्रिभुवनजनतागीतकीर्ति प्ररोहः ॥ ४४००॥
ENMSS@4401@1आग्नेयीमेति शीतादिव दिशमरुणो वासराः संकुचन्ती- वासंस्तर्षेऽपि
तोयाद् वहति तनुशिखी शीतपीडां प्रमार्ष्टि (?) ।
ENMSS@4401@2तल्पेऽनल्पप्रकोपप्रविदलितदृढालिङ्गनग्रन्थिबन्धे लब्ध्वा
संधानरन्ध्रं निबिडयति जडो दम्पती मातरिश्वा ॥ ४४०१॥
ENMSS@4402@1आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवति कूपः ।
ENMSS@4402@2नित्यं स करोति भयं दाहं च समानुषं प्रायः ॥ ४४०२॥
ENMSS@4403@1आग्नेय्यामनलाजी- विकयुवतिप्रवरधातुलाभश्च ।
ENMSS@4403@2याम्ये माषकुलत्थं भोज्यं गान्धर्विकैर्योगः ॥ ४४०३॥
ENMSS@4404@1आघट्टयति मन्त्राणि ब्रुवन् हास्यं प्रपद्यते ।
ENMSS@4404@2संभावयति दोषेण वृत्तिच्छेदं करोति च ॥ ४४०४॥
ENMSS@4405@1आघातं नीयमानस्य वध्यस्येव पदे पदे ।
ENMSS@4405@2आसन्नतरतां याति मृत्युर्जन्तोर्दिने दिने ॥ ४४०५॥
ENMSS@4406@1आघूर्णद्वपुषः स्खलन्मृदुगिरः किञ्चिल्लसद्वाससो रेवत्यां
सनिषण्णनिःसहभुजस्याताम्रनेत्रद्युतेः ।
ENMSS@4406@2श्वासामोदमदान्धषट्पदकुलव्यादष्टक् अण्ठस्रजः पायासुः परिमन्थराणि
हलिनो मत्तस्य यातानि वः ॥ ४४०६॥
ENMSS@4407@1आघूर्णितं पक्ष्मलमक्षिपद्मं प्रान्तद्युतिश्वैत्यजितामृतांशु ।
ENMSS@4407@2अस्या इवास्याश्चलदिन्द्रनील- गोलामलश्यामलतारतारम् ॥ ४४०७॥
ENMSS@4408@1आघ्राणश्रवणावलोकनरसास्वादादयश्चुम्बन- श्रद्धा वाग्विषवर्षणं
च शिरसो दोषा इमे यैर्जनः ।
ENMSS@4408@2मूढो लङ्घितसत्पथोऽयमिति संक्रुद्धः शठानां हठाद् यः शीर्षाणि
कृपाणपाणिरलुनात् तस्मै नमः कल्किने ॥ ४४०८॥
ENMSS@4409@1आघ्रातं कमलं प्रियेण सुदृशा स्मित्वापनीतं मुखं दत्तं
विभ्रमकन्दुके नखपदं सीत्कृत्य गूढौ स्तनौ ।
ENMSS@4409@2दत्ता चम्पकमालिकोरसि भुजानिर्भिन्नरोमाञ्चया मीलल्लोचनया स्थितं
प्रणयिनोर्दूरेऽपि पूर्णो रसः ॥ ४४०९॥
ENMSS@4410@1आघ्रातं परिलीढमुग्रनखरैः क्षुण्णं च यच्चर्वितं क्षिप्तं यद्
भुवि नीरसत्वकुपितेनेति व्यथां मा कृथाः ।

ENMSS@4410@2हे माणिक्य तवैतदेव कुशलं यद्वानरेणाग्रहाद् अन्तःसत्त्वनिरूपणाय सहसा चूर्णीकृतं नाश्मना ॥ ४४१०॥

ENMSS@4411@1आघ्रातं मरणेन जन्म जरया यात्युज्ज्वलं यौवनं संतोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ।

ENMSS@4411@2लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैरस्थैर्येण विभूतिरप्यपहृता ग्रस्तं न किं केन वा ॥ ४४११॥

ENMSS@4412@1आघ्रातक्षोणिपीठः खुरशिखरसमाकृष्टरेणुस्तुरङ्गः पुञ्जीकृत्याखिलाङ्गीन् क्रमवशविनमज्ञानुरुन्मुक्तकायः ।

ENMSS@4412@2पृष्ठान्तःपार्श्वकण्डूव्यपनयनर साद् द्वित्रिरुद्वर्तिताङ्गः प्रोत्थाय द्राङ् निरीहः क्षणमथ वपुरास्यानुपूर्व्यां धुनोति ॥ ४४१२॥

ENMSS@4413@1आघ्राय पुस्तकं धन्याः सर्वं विद्म इति स्थिताः ।

ENMSS@4413@2शतकृत्वोऽपि शृण्वन्तो हा न विद्मो जडा वयम् ॥ ४४१३॥

ENMSS@4414@1आघ्राय श्रमजमनिन्द्यगन्धबन्धुं निश्वासश्वसनमसक्तमङ्गनानाम् ।

ENMSS@4414@2आरण्याः सुमनस ईषिरे न भृङ्गैरौचित्यं गणयति को विशेषकामः ॥ ४४१४॥

ENMSS@4415@1आघ्रायाघ्राय गन्धं विकृतमुखपुटो दर्शयन् दन्तपङ्क्तिं धावन्नुन्मुक्तनादो मुहुरपि रभसाकृष्टया पृष्ठलग्नः ।

ENMSS@4415@2गर्दभ्याः पादघातद्विगुणितसुरतप्रीतिराकृष्टशिश्नो वेगादारुह्यमुह्यन्नवतरति खरः खण्डितेच्छश्चिराय ॥ ४४१५॥

ENMSS@4416@1आचक्ष्महे बत किमद्यतनीमवस्थां तस्याद्य विन्ध्यशिखरस्य महोन्नतस्य ।

ENMSS@4416@2यत्रैव सप्त मुनयस्तपसा निषेदुः सोऽयं किलाद्य वसतिह् पिशिताशनानाम् ॥ ४४१६॥

ENMSS@4417@1आचम्याधरसिन्धुवारि कबरीसंभारसंमार्जिते स्वेदाम्भःस्नपिते कपोलविगलत्काश्मीरपङ्कोज्ज्वले ।

ENMSS@4417@2काञ्चीमन्त्ररुतेन निर्भरगलन्मुक्ताकलापस्रजा धन्यस्योरसि घूर्णमाननयना पञ्चेषुमभ्यर्चति ॥ ४४१७॥

ENMSS@4418@1आचरति दुर्जनो यत् सहसा मनसोऽप्यगोचरानर्थान् ।

ENMSS@4418@2तन्न न जाने जाने स्पृशति मनः किं तु नैव निष्ठुरताम् ॥ ४४१८॥

ENMSS@4419@1आचरन् बहुभिर्वैरम् अल्पकैरपि नश्यति ।

ENMSS@4419@2जनैः प्रत्यायितोऽमात्यं प्रेतमित्यत्यजन्नृपः ॥ ४४१९॥

ENMSS@4419A@1आचरेच्च सकलां रतिचर्यां कामसूत्रविहितामनवद्याम् ।
ENMSS@4419A@2देशकालबलशक्त्यनुरोधाद् वैद्यतन्त्रसमयोक्त्यविरुद्धाम् ॥
ENMSS@4420@1आचान्तकान्तिरुन्निद्रैर्मयूखैरहिमत्विषः ।
ENMSS@4420@2धूसरापि कला चान्द्री किं न बध्नाति लोचनम् ॥ ४४२०॥
ENMSS@4421@1आचारं भजते त्यजत्यपि मदं वैराग्यमालम्बते कर्तुं वाञ्छति सङ्गभङ्गगलितोत्तुङ्गाभिमानं तपः ।
ENMSS@4421@2दैवन्यस्तविपर्ययैः सुखशिखाभ्रष्टः प्रणष्टो जनः प्रायस्तापविलीनलोहसदृशीमायाति कर्मण्यताम् ॥ ४४२१॥
ENMSS@4422@1आचारः कुलमाख्याति देशमाख्याति भाषणम् ।
ENMSS@4422@2संभ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ॥ ४४२२॥
ENMSS@4423@1आचारः कुलमाख्याति वपुराख्याति भोजनम् ।
ENMSS@4423@2वचनं श्रुतमाख्याति स्नेहमाख्याति लोचनम् ॥ ४४२३॥
ENMSS@4424@1आचारः खलु कर्तव्यः प्राणैः कण्ठगतैरपि ।
ENMSS@4424@2आचारैः शुध्यते देहो वस्त्रं क्षारोदकैरिव ॥ ४४२४॥
ENMSS@4425@1आचारः परमो धर्म आचारः परमं तपः ।
ENMSS@4425@2आचारः परमं ज्ञानम् आचारात् किं न साध्यते ॥ ४४२५॥
ENMSS@4426@1आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।
ENMSS@4426@2तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ॥ ४४२६॥
ENMSS@4427@1आचारः परमो धर्मः सर्वेषामिति निश्चयः ।
ENMSS@4427@2हीनाचारपरीतात्मा प्रेत्य चेह च नश्यति ॥ ४४२७॥
ENMSS@4428@1आचारः प्रथमो धर्मो नृणां श्रेयस्करो महान् ।
ENMSS@4428@2इहलोके परा कीर्तिः परत्र परमं सुखम् ॥ ४४२८॥
ENMSS@4429@1आचार इत्यवहितेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
ENMSS@4429@2काले गते बहुतिथे मम सैव जाता प्रस्थानविक्लवगतेरवलम्बनाय ॥ ४४२९॥
ENMSS@4430@1आचारधाराधवलीकृतानां राधाधवाराधनमानसानाम् ।
ENMSS@4430@2विद्याविवेकोन्नतिभूषितानां भवादृशानामिह का प्रशंसा ॥ ४४३०॥
ENMSS@4431@1आचारप्रभवो धर्मो नृणां श्रेयस्करो महान् ।
ENMSS@4431@2इहलोके परा कीर्तिः परत्र परमं सुखम् ॥ ४४३१॥
ENMSS@4432@1आचारप्रेरको राजा ह्येतत् कालस्य कारणम् ।
ENMSS@4432@2यदि कालह् प्रमाणं हि कस्माद् धर्मोऽस्ति कर्तृषु ॥ ४४३२॥

ENMSS@4433@1आचारमाचर चिराद् आलस्यमपास्य जात्युचितम् ।
ENMSS@4433@2लोकानुरागसाधनम् आराधनमेतदेव हरेः ॥ ४४३३॥
ENMSS@4334@1आचारसंभवो धर्मो धर्माद् वेदाः समुत्थिताः ।
ENMSS@4334@2वेदैर्यज्ञाः समुत्पन्ना यज्ञैर्देवाः प्रतिष्ठिताः ॥ ४३३४॥
ENMSS@4435@1आचारहीनं न पुनन्ति वेदा यद्यप्यधीता सह षड्भिरङ्गैः ।
ENMSS@4435@2छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ॥ ४४३५॥
ENMSS@4436@1आचारहीनस्य तु ब्राह्मणस्य वेदाः षडङ्गास्त्वखिलाः सयज्ञाः ।
ENMSS@4436@2कां प्रीतिमुत्पादयितुं समर्था अन्धस्य दारा इव दर्शनीयाः ॥ ४४३६॥
ENMSS@4437@1आचारात् फलते धर्म आचारात् फलते धनम् ।
ENMSS@4437@2आचाराच्छ्रियमाप्नोति आचारो हन्त्यलक्षणम् ॥ ४४३७॥
ENMSS@4438@1आचाराद् विच्युतो विप्रो न वेदफलमश्नुते ।
ENMSS@4438@2आचारेण तु संयुक्तः संपूर्णफलभाक् स्मृतः ॥ ४४३८॥
ENMSS@4439@1आचाराल्लभते धर्मम् आचाराल्लभते धनम् ।
ENMSS@4439@2आचाराच्छ्रियमाप्नोति आचारो हन्त्यलक्षणम् ॥ ४४३९॥
ENMSS@4440@1आचाराल्लभते ह्यायुराचारादीप्सितां प्रजाम् ।
ENMSS@4440@2आचाराद् धनमक्षय्यम् आचारो हन्त्यलक्षणम् ॥ ४४४०॥
ENMSS@4441@1आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
ENMSS@4441@2आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च ॥ ४४४१॥
ENMSS@4443@1आचारो ग्रामवासान्तो गृहान्ता प्रभुता स्त्रियः ।
ENMSS@4443@2नृपश्रीर्ब्रह्मशापान्ता फलान्तं ब्रह्मवर्चसम् ॥ ४४४३॥
ENMSS@4444@1आचार्यः सप्तयुद्धः स्याच्चतुर्युद्धस्तु भार्गवः ।
ENMSS@4444@2द्वाभ्यां चैव भवेद् योध एकेन गणको भवेत् ॥ ४४४४॥
ENMSS@4445@1आचार्यः सर्वचेष्टासु लोक एव हि धीमतः ।
ENMSS@4445@2अनुकुर्यात् तमेवातो लौकिकार्थे परीक्षकः ॥ ४४४५॥
ENMSS@4446@1आचार्यमानीय शुभेऽह्नि कार्यं पैष्टं श्वयुग्मं शुचिरर्चयित्वा ।
ENMSS@4446@2क्षीरेण भोज्यं भषणस्य तुष्ट्यै दद्यात् कुमारीशिशुबान्धवेभ्यः ॥ ४४४६॥
ENMSS@4447@1आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
ENMSS@4447@2नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ॥ ४४४७॥
ENMSS@4448@1आचार्या नरपतयश्च तुल्यशीला न ह्येषां परिचितिरस्ति सौहृदं वा ।

ENMSS@4448@2शुश्रूषां चिरमपि सम्चितां प्रयत्नात् संक्रुद्धा रज इव नाशयन्ति मेघाः ॥ ४४४८॥
ENMSS@4449@1आचार्येण धनुर्देयं ब्राह्मणे सुपरीक्षिते ।
ENMSS@4449@2लुब्धे धूर्ते कृतघ्ने च मन्दबुद्धौ न दीयते ॥ ४४४९॥
ENMSS@4450@1आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता ।
ENMSS@4450@2तत्कर्मणामनुष्ठानं सङ्गः सद्भिर्गिरः शुभाः ॥ ४४५०॥
ENMSS@4451@1स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम् ।
ENMSS@4451@2त्यागः परिग्रहाणां च जीर्णकाषायधारणम् ॥ ४४५१॥
ENMSS@4452@1विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् ।
ENMSS@4452@2शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनम् ॥ ४४५२॥
ENMSS@4453@1नीरजस्तमसा सत्त्वशुद्धिर्निःस्पृहता शमः ।
ENMSS@4453@2एतैरुपायैः संशुद्धः स हि योग्यमृतीभवेत् ॥ ४४५३॥
ENMSS@4454@1आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
ENMSS@4454@2भ्राता मरुत्पतेमूर्तिर्माता साक्षात् क्षितेस्तनुः ॥ ४४५४॥
ENMSS@4455@1दयाया भगिनी मूर्तिर्धर्मस्यात्मातिथिः स्वयम् ।
ENMSS@4455@2अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ४४५५॥
ENMSS@4456@1आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
ENMSS@4456@2माता पृथिव्या मूर्तिश्च भ्राता स्वो मूर्तिरात्मनः ॥ ४४५६॥
ENMSS@4457@1आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ।
ENMSS@4457@2अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः ॥ ४४५७॥
ENMSS@4458@1आचार्यौ द्वारिहेतौ (?) शरकलशभरौ (?) द्रोणभूस्तत्समानो भीष्मस्तातस्य तातो धनुषि न सदृशाः कर्णदुर्योधनाद्याः ।
ENMSS@4458@2इत्थं हन्तव्यचिन्ताकुलहृदयतला कौरवाणां पुरस्ताद् दीव्यद्दोःस्तम्भशाली समिति विजयते पाण्डवह् खाण्डवारिः ॥ ४४५८॥
ENMSS@4459@1आचिन्वानमहन्यहन्यहनि साकारान् विहारक्रमान् आरुन्धानमरुन्धतीहृदयमप्यार्द्रस्मितार्द्रश्रिया ।
ENMSS@4459@2आतन्वानमनन्यजन्मनयनश्लाघ्यामनर्घ्यां दशाम् आनन्दं व्रजसुन्दरीस्तनतटीसाम्राज्यमुज्जृम्भते ॥ ४४५९॥
ENMSS@4460@1आचीर्णमशुभं कर्म द्विजा भोगाय कल्पते ।
ENMSS@4460@2अवेष्टितगलो नागः किमदष्ट्वा हि गच्छति ॥ ४४६०॥
ENMSS@4461@1आचुम्बितं कामिवरेण हर्षात् सकामवामाचिबुकं मनोज्ञम् ।

ENMSS@4461@2शृङ्गारसत्संपुटपद्ममध्ये भृङ्गाभिधः (?) कोरकवद् विभाति
॥ ४४६१॥

ENMSS@4462@1आचुम्ब्य बिम्बाधरमङ्गवल्लीम् आलिङ्ग्य संस्पृश्य कपोलपालिम् ।

ENMSS@4462@2श्रीखण्डमादाय करेण कान्तः संत्रासयामास सरोरुहाक्षीम् ॥ ४४६२॥

ENMSS@4463@1आचूडमाचरणमम्ब तवानुवारम् अन्तःस्मरन् भुवनमङ्गलमङ्गमङ्गम्
।

ENMSS@4463@2आनन्दसागरतरङ्गपरम्पराभिरान्दोलितो न गणयामि गतान्यहानि ॥
४४६३॥

ENMSS@4464@1आच्छिन्ने क्षितितेजसी मनसिजव्यापारमेयं मनः स्वात्मा च द्वयमेतदस्ति
दशमं द्रव्यं परेषां तमः ।

ENMSS@4464@2कालाकाशदिशां निरस्तमधुना नामापि वर्षागमे द्रव्यं वारि गुणश्च
वारिदरवः कर्मापि वारिक्रिया ॥ ४४६४॥

ENMSS@4465@1आच्छादयसि किं मुग्धे वस्त्रेणाधरपल्लवम् ।

ENMSS@4465@2खण्डिता एव शोभन्ते वीराधरपयोधराः ॥ ४४६५॥

ENMSS@4466@1आच्छादितायतदिगम्बरमुच्चकैर्गाम् आक्रम्य
संस्थितमुदग्रविशालशृङ्गम् ।

ENMSS@4466@2मूर्ध्निस्खलत्तुहिनदीधितिकोटिमेनम् उद्वीक्ष्य को भुवि न विस्मयते
नगेशम्
॥ ४४६६॥

ENMSS@4467@1आच्छाद्य पुष्पपटमेष महान्तमन्त- रावर्तिभिर्गृहकपोतशिरोधराभैः
।

ENMSS@4467@2स्वाङ्गानि धूमरुचिमागुरवीं दधानैर्धूपायतीव पटलैर्नवनीरदानाम्
॥ ४४६७॥

ENMSS@4468@1आच्छिद्य प्रियतः कदम्बकुसुमं यस्यारिदारैर्नवं यात्राभङ्गविधायिनो
जलमुचां कालस्य चिह्नं महत् ।

ENMSS@4468@2हृष्यद्भिः परिचुम्बितं नयनयोर्न्यस्तं हृदि स्थापितं सीमन्ते
निहितं कथंचन ततः कर्णावतंसीकृतम् ॥ ४४६८॥

ENMSS@4469@1आच्छिद्य लक्ष्मीमित एव पूर्वम् अत्रैव विस्रम्भसुखप्रसुप्तः ।

ENMSS@4469@2एकः परं वेद स कैटभारिर्महाशयत्वं मकरालयस्य ॥ ४४६९॥

ENMSS@4470@1आच्छिद्योरगमण्डलीकबलनाकाङ्क्षारसं पत्रिणां भर्तुर्येन
शरीरदानविधिना मन्ये जगद्रक्षितम् ।

ENMSS@4470@2नो चेत् तेन गरुत्मता कबलिते शेषे निरालम्बना क्व क्षोणी क्व पयोधराः

क्व गिरयः क्वैते दिशां नायकाः ॥ ४४७०॥

ENMSS@4471@1आजगाम यदा लक्ष्मीर्नारिकेलफलाम्बुवत् ।

ENMSS@4471@2निर्जगाम यदा लक्ष्मीर्गजभुक्तकपित्थवत् ॥ ४४७१॥

ENMSS@4472@1आजननादामरणा- दभ्यस्यतु वायसस्तपस्यतु वा ।

ENMSS@4472@2एकामपि काकलिकां कोकिलकान्तेव नाकलयेत् ॥ ४४७२॥

ENMSS@4473@1आजननादामरणा- दभ्यस्यतु वायसस्तपस्यतु वा ।

ENMSS@4473@2केकिवदेकां केकां कोकिलवत् पञ्चमं च किं कुरुते ॥ ४४७३॥

ENMSS@4474@1आजन्मकल्पतरुकाननकामचारी यत्कौतुकादुपगतः कुटजं मिलिन्दः ।

ENMSS@4474@2तत्कर्मणः सुसदृशं फलमेतदेव यत्प्राप्य साम्यमधुना मधुमक्षिकाभिः ॥ ४४७४॥

ENMSS@4475@1आ जन्मनः कुशलमण्वपि रे कुजन्मन् पांसो त्वया यदि कृतं वद तत्त्वमेतत् ।

ENMSS@4475@2उत्थापितोऽस्यनलसारथिना यदर्थं दुष्टेन तत्कुरु कलङ्कय विश्वमेतत् ॥ ४४७५॥

ENMSS@4476@1आ जन्मनः प्रतिमुहूर्तविशेषरम्याण्याचेष्टितानि तव संप्रति तानि तानि ।

ENMSS@4476@2चाटूनि चारुमधुराणि च संस्मृतानि देहं दहन्ति हृदयं च विदारयन्ति ॥ ४४७६॥

ENMSS@4477@1आ जन्मनः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य ।

ENMSS@4477@2परातिसम्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः ॥ ४४७७॥

ENMSS@4478@1आ जन्मनः सहजतुल्यर्विवर्तमान- दौर्गत्यतोऽस्ति परमो न सुहृन्ममान्यः ।

ENMSS@4478@2येनात्मनोऽपरिगणय्य विनाशमाशु देव त्वदाश्रयणपुण्यधनः कृतोऽस्मि ॥ ४४७८॥

ENMSS@4479@1आ जन्मनः सह निवासितया मयैव मातुः पयोधरपयोऽपि समं निपीय ।

ENMSS@4479@2त्वं पुण्डरीकमुख बन्धुतया निरस्तम् एको निवापसलिलं पिबसीत्ययुक्तम् ॥ ४४७९॥

ENMSS@4480@1आ जन्मनो विहितभक्तिरनन्यनाथः सारथ्यकर्मणि च दक्षतया नियुक्तः ।

ENMSS@4480@2नाद्याप्यवाप चरणावरुणोऽपि सूर्यात् पुण्यैर्विना नहि भवन्ति मनीषितानि ॥ ४४८०॥

ENMSS@4481@1आजन्मब्रह्मचारी पृथुलभुजशिलास्तम्भविभ्राजमान-ज्याघातश्रेणिसम्ज्ञान्तरितवसुमती चक्रजैत्रप्रशस्तिः ।

ENMSS@4481@2वक्षः पीठे घनास्त्रव्रणकिणकठिने संक्ष्णुवानः पृषत्कान् प्राप्तो राजन्यगोष्ठीवनगजमृगया कौतुकी जामदग्न्यः ॥ ४४८१॥

ENMSS@4482@1आजन्मब्रह्मचारी सकलरिपुकुलानल्पकालाग्निकल्पः कल्पान्तः कल्पकर्ता कपिशतनुरुचिः कामगः कामदाता ।

ENMSS@4482@2कान्तः कामारिबन्धुः कपिकुलतिलकः कोपनः कोमलाङ्गः कौशल्यासूनुदूतः कलयतु कुशलं वायुपुत्रश्चिरं वः ॥ ४४८२॥

ENMSS@4483@1आजन्मविषसंभोगात् कन्या विषमयी कृता ।

ENMSS@4483@2स्पर्शोच्छ्वासादिभिर्हन्ति तस्यास्त्वेतत् परीक्षणम् ॥ ४४८३॥

ENMSS@4484@1आजन्मव्यवसायिना क्रतुशतैराराध्य पुष्पायुधं केनाकारि पुरा तनूदरि तनुत्यागः प्रयागभ्रमे ।

ENMSS@4484@2यस्यार्थे सखि लोलनेत्रनलिनीनालायमानस्खलद्-बष्पाम्भःपतनान्तरालवलितग्रीवं पथः पश्यसि ॥ ४४८४॥

ENMSS@4485@1आजन्मसिद्धं कौटिल्यं खलस्य च हलस्य च ।

ENMSS@4485@2सोढुं तयोर्मूखाक्षेपम् अलमेकैव सा क्षमा ॥ ४४८५॥

ENMSS@4486@1आजन्मसेवितं दानैर्मानैश्च परिपोषितम् ।

ENMSS@4486@2तीक्ष्णवाक्यान्मित्रमपि तत्कालं याति शत्रुताम् ।

ENMSS@4486@3वक्रोक्तिशल्यमुद्धर्तुं न शक्यं मानसं यतः ॥ ४४८६॥

ENMSS@4487@1आजन्मस्थितयो महीरुह इमे कूले समुन्मूलिताः कल्लोलाः क्षणभङ्गुराः पुनरमी नीताः परामुन्नतिम् ।

ENMSS@4487@2अन्तः प्रस्तरसंग्रहो बहिरपि भ्रश्यन्ति गन्धद्रुमा भ्रातः शोण न सोऽस्तियो न हसति त्वत्संपदां विप्लवे ॥ ४४८७॥

ENMSS@4488@1आजन्मानुगतेऽप्यस्मिन् नाले विमुखमम्बुजम् ।

ENMSS@4488@2प्रायेण गुणपूर्णेषु रीतिर्लक्ष्मीवतामियम् ॥ ४४८८॥

ENMSS@4489@1आजन्मैव तमः सुहृत्कुटिलता वक्रे गिरां निर्गमो ग्रामोत्सादकरः श्मशानविटपी प्रायेण यस्याश्रयः ।

ENMSS@4489@2धिग् धातः ससृजे स एव मलिनः क्रूरः कथं कौशिकः सृष्टो वा किमकल्प्यतास्य भवता कल्पान्तमायुः स्थिरम् ॥ ४४८९॥

ENMSS@4490@1आजानुलम्बिबाहुः कम्बुग्रीवो बली चतुर्दंष्ट्रः ।

ENMSS@4490@2भाग्यनिधिः पृथुवक्षा लघुमधुराशी च पद्माक्षः ॥ ४४९०॥

ENMSS@4491@1आजावसौ चोडनृपस्य सेना महावनस्याश्वमृगाकुलस्य ।

ENMSS@4491@2मत्तेभसारद्रुमपूर्णितस्य दावानलोऽभूच्चलमूर्तिचण्डः ॥ ४४९१॥

ENMSS@4492@1आजीवः कपटानुरागकलया दोषो न दुःशीलता वैधव्यं न च बाधते सदसतोः संभावनाव्यत्ययात् ।

ENMSS@4492@2यत्किंचित्करणे परस्वहरण व्रीडा न पीडाकरी नो वा राजभयं च ही

बत सुखं जीवन्ति वारस्त्रियः ॥ ४४९२॥

ENMSS@4493@1आ जीवनास्तात् प्रणयाः कोपास्तत्क्षणभङ्गुराः ।

ENMSS@4493@2परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनाम् ॥ ४४९३॥

ENMSS@4494@1आजीवितान्ताः प्रणयाः कोपाश्च क्षणभङ्गुराः ।

ENMSS@4494@2परित्यागाश्च निःसङ्गा न भवन्ति महात्मनाम् ॥ ४४९४॥

ENMSS@4495@1आजीवोच्छित्तये यासां प्रीतिद्वेषावुभौ हि तौ ।

ENMSS@4495@2कथं नु खलु तौ तासां स्यातामुपरि कस्यचित् ॥ ४४९५॥

ENMSS@4496@1आजीव्यः सर्वभूतानां राजा पर्जन्यवद् भवेत् ।

ENMSS@4496@2निराजीव्यं त्यजन्त्येनं शुष्कं सर इवाण्डजाः ॥ ४४९६॥

ENMSS@4497@1आजीव्यैकतरं भावं यस्त्वन्यमुपजीवति ।

ENMSS@4497@2न तस्माद् विन्दते क्षेमं जारान्नार्यसती यथा ॥ ४४९७॥

ENMSS@4498@1आजौ त्वद्वाजिराजिप्रखरखुरतरन्यासलीलाभिरुर्व्यां दीर्णायां देव निर्यन्नविरलमवनीपाल पातालवह्निः ।

ENMSS@4498@2अश्नीयाद् विश्वमेव प्रतिनृपतिवधूनेत्रधाराम्बुधारा- वारा यद्येनमारादरिकुलदमन द्राङ् न निर्वापयेयुः ॥ ४४९८॥

ENMSS@4499@1आज्ञां मन्मथचक्रवर्तिनृपतेरादाय निःशङ्कधीर्भ्राम्यद्भृङ्गमहाजनान् पिकगिरा साकूतमाकारयन् ।

ENMSS@4499@2कुञ्जाटे च्युतपत्रसंस्तरवति श्रीमान् वसन्ताभिधो व्यापारी सुमनोमरन्दवसुभिर्वाणिज्यमालम्बते ॥ ४४९९॥

ENMSS@4500@1आज्ञाकरश्च ताडन- परिभवसहनश्च सत्यमहमस्याः ।

ENMSS@4500@2न तु शीलशीतलेयं प्रियेतरद्वक्तुमपि वेद ॥ ४५००॥

ENMSS@4501@1आज्ञा काकुर्याच्ञा- क्षेपो हसितं च शुष्करुदितं च ।
ENMSS@4501@2इति निधुवनपाण्डित्यं ध्यायंस्तस्या न तृप्यामि ॥ ४५०१॥
ENMSS@4502@1आज्ञा कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च ।
ENMSS@4502@2येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ४५०२॥
ENMSS@4503@1आज्ञा तेजः पार्थिवानां सा च वाचि प्रतिष्ठिता ।
ENMSS@4503@2यत्ते ब्रूयुरसत् सद्वा स धर्मो व्यवहारिणाम् ॥ ४५०३॥
ENMSS@4504@1आज्ञापयिष्यसि पदं दास्यसि दयितस्य शिरसि किं त्वरसे ।
ENMSS@4504@2असमयमानिनि मुग्धे मा कुरु भग्नाङ्कुरं प्रेम ॥ ४५०४॥
ENMSS@4505@1आज्ञाभङ्गकरान् राजा न क्षमेत सुतानपि ।
ENMSS@4505@2विशेषः को नु राज्ञश्च राज्ञश्चित्रगतस्य च ॥ ४५०५॥
ENMSS@4506@1आज्ञाभङ्गो नरेन्द्राणां ब्राह्मणानामनादरः ।
ENMSS@4506@2पृथक् शय्या च नारीणाम् अशस्त्रविहितो वधः ॥ ४५०६॥
ENMSS@4507@1आज्ञामवाप्य महतीं द्विषतां निखातान्- निर्वर्त्य तां सपदि लब्धमुखप्रसादः ।
ENMSS@4507@2उच्चैः प्रमोदमनुमोदितदर्शनः सन् धन्यो नमस्यति पदाम्बुरुहं प्रभूणाम् ॥ ४५०७॥
ENMSS@4508@1आज्ञामात्रफलं राज्यं ब्रह्मचर्यफलं तपः ।
ENMSS@4508@2ज्ञानमात्रफला विद्या दत्तभुक्तफलं धनम् ॥ ४५०८॥
ENMSS@4509@1आज्ञामेव मुनेर्निधाय शिरसा विन्ध्याचल स्थीयताम् अत्युच्चैः पदमिच्छता पुनरियं नो लङ्घनीया त्वया ।
ENMSS@4509@2मैनाकादिमहीध्रलब्धवसतिं यः पीतवानम्बुधिं तस्य त्वां गिलतः कपोलमिलनक्लेशोऽपि किं जायते ॥ ४५०९॥
ENMSS@4510@1आज्ञा मौलिषु भूभुजां भयरुजा चित्तेषु दुर्मेधसां प्रीतिः सत्सु दिशासु कीर्तिरतुला येनार्पिता सर्वतः ।
ENMSS@4510@2सर्वं राज्यमकण्टकं च विहितं ध्वस्ता द्विषां संपदः सोऽसौ संमतवैभवो विजयते श्रीराजनारायणः ॥ ४५१०॥
ENMSS@4511@1आज्ञारूपेण या शक्तिः सर्वेषां मूर्धनि स्थिता ।
ENMSS@4511@2प्रभुशक्तिर्हि सा ज्ञेया प्रभावमहितोदया ॥ ४५११॥
ENMSS@4512@1आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
ENMSS@4512@2उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग् वरो लभ्यते स्याच्चेदेष न

रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥ ४५१२॥

ENMSS@4513@1आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम् ।

ENMSS@4513@2योऽदृष्टदोषां त्यजति सोऽक्षयं नरकं व्रजेत् ॥ ४५१३॥

ENMSS@4514@1आज्ञेव शम्बररिपोरवलङ्घनीया वाञ्छेव विग्रहवती वशगा दृशोर्मे ।

ENMSS@4514@2अन्यार्थमेव किमुतापणमभ्युपैति संदेशमानयति सा किमु सारसाक्ष्याः ॥ ४५१४॥

ENMSS@4515@1आज्ञस्यं व्यवहाराणाम् आर्जवं परमं धियाम् ।

ENMSS@4515@2स्वातन्त्र्यमपि तन्त्रेषु सूते काव्यपरिश्रमः ॥ ४५१५॥

ENMSS@4516@1आटीकसेऽङ्ककरिघोटीपदातिजुषि वाटीभुवि क्षितिभुजां चेटी भवंस्तदपि शाटीनते वपुषि वीटीनवाधिवदनं ।

ENMSS@4516@2कोटीररत्नपरिपाटी भृशारुणितजूटीविधुन्तनुलसन्

पाटीरलिप्तिमिभधाटीजुषं सुरवधूटीनुतां भज शिवम् ॥ ४५१६॥

ENMSS@4517@1आटोपेन पटीयसा यदपि सा वाणी कवेरामुखे खेलन्ती प्रथते तथापि कुरुते

नो सन्मनोरञ्जनम् ।

ENMSS@4517@2न स्याद् यावदमन्दसुन्दरगुणालंकारझंकारितः

सप्रस्यन्दिलसद्रसायनरसासारानुसारी रसः ॥ ४५१७॥

ENMSS@4518@1आढ्यराजकृतोत्साहैर्हृदयस्थैः स्मृतैरपि ।

ENMSS@4518@2जिह्वान्तःकृष्यमाणेव न कवित्वे प्रवर्तते ॥ ४५१८॥

ENMSS@4519@1आढ्यस्य किं च दानेन सुहितस्याशनेन किम् ।

ENMSS@4519@2किं शशाङ्केन शीतालोः किं घनेन हिमागमे ॥ ४५१९॥

ENMSS@4520@1आढ्यानां मांसपरमं मध्यानां गोरसोत्तरम् ।

ENMSS@4520@2तैलप्रायं दरिद्राणां भोजनं भरतर्षभ ॥ ४५२०॥

ENMSS@4521@1आढ्यान्निवापलम्भो निकेतगामी च पिच्छिलः पन्थाः ।

ENMSS@4521@2द्वयमाकुलयति चेतः स्कन्धावारद्विजातीनाम् ॥ ४५२१॥

ENMSS@4522@1आढ्यो वापि दरिद्रो वा दुःखितः सुखितोऽपि वा ।

ENMSS@4522@2निर्दोषो वा सदोषो वा वयस्यः परमा गतिः ॥ ४५२२॥

ENMSS@4523@1आततायिनमायान्तं हन्यादेवाविचारयन् ।

ENMSS@4523@2हननादेव निस्तारो नरकात् तस्य दुष्कृतेः ॥ ४५२३॥

ENMSS@4524@1आततायिनमायान्तम् अपि वेदान्तपारगम् ।

ENMSS@4524@2जिघांसन्तं जिघांसीयान् न तेन ब्रह्महा भवेत् ॥ ४५२४॥

ENMSS@4525@1आतन्वद्भिर्दिक्षु पत्राग्रनादं प्राप्तैर्दूरादाशु तीक्ष्णैर्मुखाग्रैः ।

ENMSS@4525@2आदौ रक्तं सैनिकानामजीवैर्जीवैः पश्चात् पत्रिपूगैरपायि ॥ ४५२५॥

ENMSS@4526@1आतपत्यविदुषाममृतांशुम् अंशुमन्तमपि रश्मिसहस्रे ।

ENMSS@4526@2रागिणां भवति लक्षणमिन्दोरिन्द्रनीलशकलच्छविलक्ष्म ॥ ४५२६॥

ENMSS@4527@1आतपासहनः पाण्डुः शाखाहीनो मुहुर्यदि ।

ENMSS@4527@2अकालफलपाकी स्याच्छाखी पित्तात्मकः कृशः ॥ ४५२७॥

ENMSS@4528@1आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ।

ENMSS@4528@2सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम् ॥ ४५२८॥

ENMSS@4529@1आतरलाघवहेतोर्मुरहर तरिं तवावलम्बे ।

ENMSS@4529@2अपणं पणमिह कुरुषे नाविकपुरुषे न विश्वासः ॥ ४५२९॥

ENMSS@4530@1आताम्रतामपनयामि विवर्ण एष लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना ।

ENMSS@4530@2कोपोपरागजनितां तु मुखेन्दुबिम्बे हर्तुं क्षमो यदि परं करुणामयि स्यात् ॥ ४५३०॥

ENMSS@4531@1आताम्राः किरणा रवेर्नवदलत्वक्पल्लवाः पादपाः वल्ल्यस्तारकतुल्यकान्तिसुमनःसौरभ्यसंभाविताः ।

ENMSS@4531@2वात्यस्मिन् मधुमत्तषट्पदपदव्याधूतचूतद्रुम-प्राग्भारप्रपतत्परागपटलामोदी मरुद् दाक्षिणः ॥ ४५३१॥

ENMSS@4532@1आताम्राभा रोषभाजः कटान्ताद् आशूत्खाते मार्गणे धूर्गतेन ।

ENMSS@4532@2निश्च्योतन्ती नागराजस्य जज्ञे दानस्याहो लोहितस्येव धारा ॥ ४५३२॥

ENMSS@4533@1आताम्रायतलोचनांशुलहरीलीलासुधाप् यायितैः गीताम्रेडितदिव्यकेलिभरितैः स्फीतं व्रजस्त्रीजनैः ।

ENMSS@4533@2स्वेदाम्भःकणभूषितेन किमपि स्मेरेण वक्रेन्दुना पादाम्भोजमृदुप्रचारसुभगं पश्यामि दृश्यं महः ॥ ४५३३॥

ENMSS@4534@1आताम्रे नयने स्फुरन् कुचभरः श्वासो न विश्राम्यति स्वेदाम्भःकणदन्तुरं तव मुखं हेतुस्तु नो लक्ष्यते ।

ENMSS@4534@2धिक् को वेद मनः स्त्रिया इति गिरा रुष्टां प्रियां भीषयंस्तस्यास्तत्क्षणकातरेक्षणपरिस्पृष्टो हरिः पातु वः ॥ ४५३४॥

ENMSS@4535@1आताम्रौ पूजितावोष्ठौ लेलिहानौ मृदुत्वचौ ।

ENMSS@4535@2जिह्वा रक्ता च तन्वी च तालु रक्तं प्रशस्यते ॥ ४५३५॥

ENMSS@4536@1आतारुण्योद्भेदात् कान्ते दृष्टिर्यथा न्यस्ता ।

ENMSS@4536@2सामाजिकमध्यस्था कथमन्या समुपयाति परभागम् ॥ ४५३६॥
ENMSS@4537@1आतिथ्यं ब्राह्मणानां तु कुर्यात् प्रतिदिनं गृहे ।
ENMSS@4537@2आतिथ्ये रन्तिदेवस्य मधुपर्कं गवां शतम् ॥ ४५३७॥
ENMSS@4538@1आतिथ्ये श्राद्धयज्ञेषु देवयात्रोत्सवेषु च ।
ENMSS@4538@2महाजने च सिद्धार्थो न गच्छेद् योगवित् क्वचित् ॥ ४५३८॥
ENMSS@4539@1आतुरस्य कुतो निद्रा त्रस्तस्यामर्षितस्य च ।
ENMSS@4539@2अर्थं चिन्तयतो वापि कामयानस्य वा पुनः ॥ ४५३९॥
ENMSS@4540@1आतुराद् वित्तहरणं मृताच्च प्रपलायनम् ।
ENMSS@4540@2एतद् वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥ ४५४०॥
ENMSS@4541@1आतुरे च पिता वैद्यः स्वस्थीभूते च बान्धवः ।
ENMSS@4541@2गते रोगे कृते स्वास्थ्ये वैद्यो भवति पालकः ॥ ४५४१॥
ENMSS@4542@1आतुरे नियमो नास्ति बाले वृद्धे तथैव च ।
ENMSS@4542@2पराचाररते चैव एष धर्मः सनातनः ॥ ४५४२॥
ENMSS@4543@1आत्तमात्तमधिकान्तमुक्षितुं कातरा शफरशङ्किनी जहौ ।
ENMSS@4543@2अञ्जलौ जलमधीरलोचना लोचनप्रतिशरीरलाञ्छितम् ॥ ४५४३॥
ENMSS@4544@1आत्ते वाससि रोद्धुमक्षमतया दोःकन्दलीभ्यां स्तनौ
तस्योरःस्थलमुत्तरीयविषये सद्यो मया सञ्जितम् ।
ENMSS@4544@2श्रोणीं तस्य करेऽधिरोहति पुनर्व्रीडाम्बुधौ मामथो
मज्जन्तीमुदतारयन्मनसिजो देवः स मूर्च्छागुरुः ॥ ४५४४॥
ENMSS@4545@1आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे लुप्तायां मेखलायां
झटिति मणितुलाकोटियुग्मे गृहीते ।
ENMSS@4545@2शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये राजन्
गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥ ४५४५॥
ENMSS@4546@1आत्मकार्यं महाकार्यं परकार्यं न केवलम् ।
ENMSS@4546@2आत्मकार्यस्य दोषेण कूपे पतति मानवः ॥ ४५४६॥
ENMSS@4547@1आत्मच्छन्देन वर्तन्ते नार्यो मन्मथचोदिताः ।
ENMSS@4547@2न च दह्यन्ति गच्छन्त्यः सुतप्तैरपि पांसुभिः ॥ ४५४७॥
ENMSS@4548@1आत्मच्छिद्रं न जानाति परच्छिद्राणि पश्यति ।
ENMSS@4548@2श्वच्छिद्रं यदि जानाति परच्छिद्रं न पश्यति ॥ ४५४८॥
ENMSS@4549@1आत्मजन्मास्पदं वंशं कामं दहन वार्यसे ।
ENMSS@4549@2किं तु संनिहितानेताण् अप्यग्ने किं दहस्यहो ॥ ४५४९॥

ENMSS@4550@1आत्मजादिपरिक्लेशम् आत्मन्यारोप्य मूढधीः ।
ENMSS@4550@2प्रतिकर्तुमशक्तोऽपि वार्द्धक्ये शोचते परम् ॥ ४५५०॥
ENMSS@4551@1आत्मज्ञः शौचवान् दान्तस्तपस्वी विजितेन्द्रियः ।
ENMSS@4551@2धर्मकृद् वेदविद्यावित् सात्त्विको देवयोनिताम् ॥ ४५५१॥
ENMSS@4552@1आत्मज्ञानं समारम्भस्तितिक्षा धर्मनित्यता ।
ENMSS@4552@2यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ ४५५२॥
ENMSS@4553@1आत्मज्ञानमनायासस्तितिक्षा धर्मनित्यता ।
ENMSS@4553@2वाक् चैव गुप्ता दानं च नैतान्यन्त्येषु भारत ॥ ४५५३॥
ENMSS@4554@1आत्मज्ञानी यतो धन्यो मध्यः पितृपितामहैः ।
ENMSS@4554@2मातृपक्षेण मात्रा च ख्यातिं याति नराधमः ॥ ४५५४॥
ENMSS@4555@1आत्मतत्त्वं न जानाति करोति बहुविस्तरम् ।
ENMSS@4555@2स एव निधनं याति नालिकेरोदकं यथा ॥ ४५५५॥
ENMSS@4556@1आत्मदेहस्य मांसानि भोक्तुं ब्रह्मन्न शक्यते ।
ENMSS@4556@2देहिनां वद यद्योग्यं संतुष्टिर्जायते यतः ॥ ४५५६॥
ENMSS@4557@1आत्मदोषैर्नियच्छन्ति सर्वे दुःखमुखे जनाः ।
ENMSS@4557@2मन्ये दुश्चरितं तेऽस्ति तस्येयं निष्कृतिः कृता ॥ ४५५७॥
ENMSS@4558@1आत्मद्वेषाद् भवेन् मृत्युः परद्वेषाद् धनक्षयः ।
ENMSS@4558@2राजद्वेषाद् भवेन् नाशो ब्रह्मद्वेषात् कुलक्षयः ॥ ४५५८॥
ENMSS@4559@1आत्मनः प्रतिकूलानि परेभ्यो यदि नेच्छसि ।
ENMSS@4559@2परेषां प्रतिकूलेभ्यो निवर्तय ततो मनः ॥ ४५५९॥
ENMSS@4560@1आत्मनः प्रीयते नात्मा परतः स्वत एव वा ।
ENMSS@4560@2लक्षयेऽलब्धकामं त्वां चिन्तया शबलं मुखम् ॥ ४५६०॥
ENMSS@4561@1आत्मनः शक्तिमुद्वीक्ष्य मानोत्साहौ तु यो व्रजेत् ।
ENMSS@4561@2शत्रूनेकोऽपि हन्याच्च क्षत्रियान् भार्गवो यथा ॥ ४५६१॥
ENMSS@4562@1आत्मनश्च परित्राणे दक्षिणानां च संगरे ।
ENMSS@4562@2स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति ॥ ४५६२॥
ENMSS@4563@1आत्मनश्च परेषां च प्रतापस्तव कीर्तिनुत् ।
ENMSS@4563@2भयकृद् भूपतेर्बाहुर्द्विषां च सुहृदां च ते ॥ ४५६३॥
ENMSS@4564@1आत्मनश्च परेषां च यः समीक्ष्य बलाबलम् ।
ENMSS@4564@2अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः ॥ ४५६४॥
ENMSS@4565@1आत्मनश्चपलो नास्ति कुतोऽन्येषां भविष्यति ।

ENMSS@4565@2तस्मात् सर्वाणि कार्याणि चपलो हन्त्यसंशयम् ॥ ४५६५॥
ENMSS@4566@1आत्मनश्च प्रजायाश्च दोषदर्श्युत्तमो नृपः ।
ENMSS@4566@2विनियच्छति चात्मानम् आदौ भृत्यांस्ततः प्रजाः ॥ ४५६६॥
ENMSS@4567@1आत्मनात्मानमन्विच्छेन् मनोबुद्धीन्द्रियैर्यतैः ।
ENMSS@4567@2आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ४५६७॥
ENMSS@4568@1आत्मनानर्थयुक्तेन पापे निविशते मनः ।
ENMSS@4568@2स कर्म कलुषं कृत्वा क्लेशे महति धीयते ॥ ४५६८॥
ENMSS@4569@1आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
ENMSS@4569@2आयुष्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः ॥ ४५६९॥
ENMSS@4570@1आत्मना विहितं दुःखम् आत्मना विहितं सुखम् ।
ENMSS@4570@2गर्भशय्यामुपादाय भुज्यते पौर्वदेहिकम् ॥ ४५७०॥
ENMSS@4571@1आत्मनाशाय नोन्नत्यै छिद्रेण परिपूर्णता ।
ENMSS@4571@2भूयो भूयो घटीपात्रं निमज्जत् किं न पश्यसि ॥ ४५७१॥
ENMSS@4572@1आत्मना संगृहीतेन शत्रुणा शत्रुमुद्धरेत् ।
ENMSS@4572@2पदलग्नं करस्थेन कण्टकेनैव कण्टकम् ॥ ४५७२॥
ENMSS@4573@1आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः ।
ENMSS@4573@2अनाचरितमार्याणां वृत्तमेतच्चतुर्विधम् ॥ ४५७३॥
ENMSS@4574@1आत्मनीनमुपतिष्ठते गुणाः संभवन्ति विरमन्ति चापदः ।
ENMSS@4574@2इत्यनेकफलभाजि मा स्म भूद् अर्थिता कथमिवार्यसंगमे ॥ ४५७४॥
ENMSS@4575@1आत्मनैव गुणदोषकोविदः किं न वेत्सि करणीयवस्तुषु ।
ENMSS@4575@2यत्तथापि न गुरून् न पृच्छसि त्वं क्रमोऽयमिति तत्र कारणम् ॥ ४५७५॥
ENMSS@4576@1आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः ।
ENMSS@4576@2यत् प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते ॥ ४५७६॥
ENMSS@4577@1आत्मनो न सहायार्थं पिता माता च तिष्ठति ।
ENMSS@4577@2न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलम् ॥ ४५७७॥
ENMSS@4578@1आत्मनो बलमज्ञात्वा धर्मार्थपरिवर्जितम् ।
ENMSS@4578@2अलभ्यमिच्छन् नैष्कर्म्यान् मूढबुद्धिरिहोच्यते ॥ ४५७८॥
ENMSS@4579@1आत्मनोऽभ्युदयाकाङ्क्षी पीड्यमानः परेण वा ।
ENMSS@4579@2देशकालबलोपेतः प्रारभेतैव विग्रहम् ॥ ४५७९॥
ENMSS@4580@1आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः ।

ENMSS@4580@2बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥ ४५८०॥
ENMSS@4581@1आत्मनोऽर्धमिति श्रौतं सा रक्षति धनं प्रजा ।
ENMSS@4581@2शरीरं लोकयात्रां वै धर्मं स्वर्गमृषीन् पित् न् ॥ ४५८१॥
ENMSS@4582@1आत्मनो वधमाहर्ता क्वासौ विहगतस्करः ।
ENMSS@4582@2येन तत् प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ॥ ४५८२॥
ENMSS@4583@1आत्मनो विक्रियमिव कुर्वन् दद्यात् समीहितम् ।
ENMSS@4583@2जलवत् पर्वताञ्छत्रून् भिन्द्यादनुपलक्षितः ॥ ४५८३॥
ENMSS@4584@1आत्मन्निच्छसि हन्त शाश्वतपुरीमार्गे विहर्तुं यदि भ्रातः संयमवर्मणा कुरु तदा रक्षाविधिं सर्वतः ।
ENMSS@4584@2नो चेदिन्द्रियतस्करैस्तव हठात् तीक्ष्णाग्रभूरिस्फुरच्-
चिन्ताभल्लशतैर्विभिद्य मनसो ग्राह्यो विवेको मणिः ॥ ४५८४॥
ENMSS@4585@1आत्मन्यपि न विश्वासस्तावान् भवति सत्सु यः ।
ENMSS@4585@2तस्मात् सत्सु विशेषेण सर्वः प्रणयमिच्छति ॥ ४५८५॥
ENMSS@4586@1आत्मन्यस्य समुच्छ्रितीकृतगुणस्याहोतरामौचिती
यद्गात्रान्तरवर्जनादजनयद् भूजानिरेष द्विषाम् ।
ENMSS@4586@2भूयोऽहंक्रियते स्म येन च हृदा स्कन्धो न यश्चानमत् तन्मर्माणि दलं दलं समिदलंकर्मीणबाणव्रजः ॥ ४५८६॥
ENMSS@4587@1आत्मपक्षक्षयायैव परपक्षोदयाय च ।
ENMSS@4587@2मन्त्रद्वैधममात्यानां तन्न स्यादिह भूतये ॥ ४५८७॥
ENMSS@4588@1आत्मपक्षपरित्यागात् परपक्षेषु यो रतः ।
ENMSS@4588@2स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥ ४५८८॥
ENMSS@4589@1आत्मपितृभ्रातरश्च तत् स्त्रीपुत्राश्च शत्रवः ।
ENMSS@4589@2स्नुषा श्वश्रूः सपत्नी च ननान्दा यातरस्तथा ॥ ४५८९॥
ENMSS@4590@1आत्मपितृमातृगुणैः प्रख्यातश्चोत्तमोत्तमः ।
ENMSS@4590@2गुणैरात्मभवैः ख्यातः पैतृकैर्मातृकैः पृथक् ॥ ४५९०॥
ENMSS@4591@1आत्मप्रतीतिर्दृढता विरक्तिरिति त्रयं स्वात्मनि यो दधाति ।
ENMSS@4591@2नेता स एवास्ति समस्तशिष्ट- गुणाश्रयत्वान्निखिलप्रजानाम् ॥ ४५९१॥
ENMSS@4592@1आत्मप्रशंसा मरणं परनिन्दा च तादृशी ।
ENMSS@4592@2तथापि वक्ष्ये काकुत्स्थ नास्ति मत्सदृशः कपिः ॥ ४५९२॥
ENMSS@4593@1आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् ।
ENMSS@4593@2सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम् ॥ ४५९३॥

ENMSS@4594@1आत्मबुद्धिः सुखं चैव गुरुबुद्धिर्विशेषतः ।
ENMSS@4594@2परबुद्धिरर्विनाशाय स्त्रीबुद्धिः प्रलयंकरी ॥ ४५९४॥
ENMSS@4595@1आत्मबुद्ध्या सुखी भूयात् गुरुबुद्ध्या विशेषतः ।
ENMSS@4595@2बहुबुद्ध्या विनाशः स्यात् स्त्रीबुद्ध्या प्रलयो भवेत् ॥ ४५९५॥
ENMSS@4596@1आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः ।
ENMSS@4596@2अर्थतः पुरुषो नारी या नारी सार्थतः पुमान् ॥ ४५९६॥
ENMSS@4597@1आत्मरक्षा हि सततं पूर्वं कार्या विजानता ।
ENMSS@4597@2अग्नाविव हि संप्रोक्ता वृत्ती राजोपजीविनाम् ॥ ४५९७॥
ENMSS@4598@1एकदेशंदहेद् अग्निः शरीरं वा परं गतः ।
ENMSS@4598@2सपुत्रदारं राजा तु घातयेद् अर्धयेत वा ॥ ४५९८॥
ENMSS@4599@1आत्मरक्षिततन्त्राणां सुपरीक्षितकारिणाम् ।
ENMSS@4599@2आपदो नोपपद्यन्ते पुरुषाणां स्वदोषजाः ॥ ४५९९॥
ENMSS@4600@1आत्मरतिः परशाठ्यं सज्ञनबन्धुवर्जनम् ।
ENMSS@4600@2रिपौ श्रद्धा स्त्रियां भक्तिः तस्य निन्दा भवेद् ध्रुवम् ॥ ४६००॥
ENMSS@4601@1आत्मरुतादपि विरुतं कुर्वाणाः स्पर्धया सह मयूरैः ।
ENMSS@4601@2किं जानन्ति वराकाः काकाः केकारवान् कर्तुम् ॥ ४६०१॥
ENMSS@4602@1आत्मवत् सततं पश्येद् अपि कीटपिपीलिकम् ।
ENMSS@4602@2आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ ४६०२॥
ENMSS@4603@1आत्मवत् सर्वभूतानि परद्रव्याणि लोष्टवत् ।
ENMSS@4603@2मातृवत् परदारांश्च यः पश्यति स पश्यति ॥ ४६०३॥
ENMSS@4604@1आत्मवत् सर्वभूतानि पश्यतां शान्तचेतसाम् ।
ENMSS@4604@2अभिन्नमात्मनः सर्वं को दाता दीयते च किम् ॥ ४६०४॥
ENMSS@4605@1आत्मवर्गं परित्यज्य परवर्गं समाश्रयेत् ।
ENMSS@4605@2स्वयमेव लयं याति यथा राजान्यधर्मतः ॥ ४६०५॥
ENMSS@4606@1आत्मवर्गं परित्यज्य परवर्गेषु ये रताः ।
ENMSS@4606@2वानवन्नहं रोदिमि आत्मानं नैव रोद्यते ॥ ४६०६॥
ENMSS@4607@1आत्मवर्गं परित्यज्य परवर्गेषु ये रताः ।
ENMSS@4607@2सर्वे तेऽपि विनश्यन्ति यथा राजा कुकर्दमः ॥ ४६०७॥
ENMSS@4608@1आत्मवांस्त्वल्पदेशोऽपि युक्तः प्रकृतिसंपदा ।
ENMSS@4608@2नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते ॥ ४६०८॥
ENMSS@4609@1आत्मविक्रयिणि क्लीबे सदा शङ्कितचेतसि ।

ENMSS@4609@2नित्यमिष्टवियोगार्ते किं सेवकपशौ सुखम् ॥ ४६०९॥
ENMSS@4610@1आत्मवित् सह तया दिवानिशं भोगभागपि न पापमाप सः ।
ENMSS@4610@2आहृता हि विषयैकतानता ज्ञानधौतमनसं न लिम्पति ॥ ४६१०॥
ENMSS@4611@1आत्मसंपद्गुणैः सम्यक् संयुक्तं युक्तकारिणम् ।
ENMSS@4611@2महेन्द्रमिव राजानं प्राप्य लोको विवर्धते ॥ ४६११॥
ENMSS@4612@1आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
ENMSS@4612@2यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ ४६१२॥
ENMSS@4613@1आत्मस्त्रीधनगुह्यानां गोप्ता बन्धुस्तु मित्रवत् ।
ENMSS@4613@2धनदस्तु कुबेरः स्याद् यमः स्याच्च सुदण्डकृत् ॥ ४६१३॥
ENMSS@4614@1आत्मस्त्रीधनगुह्यानां शरणं समये सुहृत् ।
ENMSS@4614@2प्रोक्तोत्तमोऽयमन्यश्च त्रिद्व्येकपदमित्रकः ॥ ४६१४॥
ENMSS@4615@1आत्महेतोः परार्थे वा नर्महास्याश्रयात् तथा ।
ENMSS@4615@2ये मृषा न वदन्तीह ते नराः स्वर्गगामिनः ॥ ४६१५॥
ENMSS@4616@1आत्मा कायश्च द्वावेतौ मित्ररूपावुभावपि ।
ENMSS@4616@2कायं मित्रं परित्यज्य आत्मा याति सुनिश्चितम् ॥ ४६१६॥
ENMSS@4617@1आत्मा जन्मशतैर्धनार्जनधिया मिथ्या किमायास्यते पङ्गोः श्रीर्गृहमेति लङ्घितभुवो दैवेच्छया निर्धनाः ।
ENMSS@4617@2इत्येताः पुरुषार्थमूलहतयः कैश्चित् समुत्सारिता मुग्धानामलसोत्कटाः प्रतिपदं कुर्वन्ति चित्तभ्रमम् ॥ ४६१७॥
ENMSS@4618@1आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः ।
ENMSS@4618@2अजितात्मा नरपतिर्विजयेत कथं रिपून् ॥ ४६१८॥
ENMSS@4619@1आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः ।
ENMSS@4619@2तस्माद् भार्यां नरः पश्येन् मातृवत् पुत्रमातरम् ॥ ४६१९॥
ENMSS@4620@1आत्माधीनशरीराणां स्वपतां निद्रया स्वया ।
ENMSS@4620@2कदन्नमपि मर्त्यानाम् अमृतत्वाय कल्पते ॥ ४६२०॥
ENMSS@4621@1आत्मानं कुपथेन निर्गमयितुं यः सूकलाश्वायते कृत्याकृत्यविवेकजीवितहृतौ यः कृष्णसर्पायते ।
ENMSS@4621@2यः पुण्यद्रुमखण्डखण्डनविधौ स्फूर्जत्कुठारायते तं लुप्तव्रतमुद्रमिन्द्रियगणं जित्वा शुभंयुर्भव ॥ ४६२१॥
ENMSS@4622@1आत्मानं च जगत् सर्वं दृशा नित्याविभिन्नया ।
ENMSS@4622@2चिदाकाशमयं ध्यायन् योगी याति परां गतिम् ॥ ४६२२॥

ENMSS@4623@1आत्मानं च परं चैव त्रायते महतो भयात् ।
ENMSS@4623@2क्रुध्यन्तमप्रतिक्रुध्यन् द्वयोरेष चिकित्सकः ॥ ४६२३॥
ENMSS@4624@1आत्मानं च परं चैव पलायन् हन्ति संयुगे ।
ENMSS@4624@2द्रव्यनाशो व्ययोऽकीर्तिरयशश्च पलायने ॥ ४६२४॥
ENMSS@4625@1आत्मानं च परं चैव वीक्ष्य धीरः समुत्पतेत् ।
ENMSS@4625@2एतदेव हि विज्ञानं यदात्मपरवेदनम् ॥ ४६२५॥
ENMSS@4626@1आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् ।
ENMSS@4626@2देवतातिथिभृत्यांश्च स कदर्य इति स्मृतः ॥ ४६२६॥
ENMSS@4627@1आत्मानं नावमन्येत पूर्वाभिरसमृद्धिभिः ।
ENMSS@4627@2आमृत्योः श्रियमन्विच्छेन् नैनां मन्येत दुर्लभाम् ॥ ४६२७॥
ENMSS@4628@1आत्मानं नियमैस्तैस्तैः कर्षयित्वा प्रयत्नतः ।
ENMSS@4628@2प्राप्यते निपुणैर्धर्मो न सुखाल्लभ्यते सुखम् ॥ ४६२८॥
ENMSS@4629@1आत्मानं परमं प्रमाणनिकरैरप्राप्यमव्याहतं ज्ञेयं यद् गुरुवीक्षणादपि जना मूढास्तु मुक्त्वैव तत् ।
ENMSS@4629@2कोशेषु प्रमितेषु पञ्चसु परिज्ञातुं समुद्युञ्जते नष्टेभाः कलशान्तरेष्वपि करं कृत्वा विचिन्वन्ति हि ॥ ४६२९॥
ENMSS@4630@1आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।
ENMSS@4630@2ततः पुत्रांस्ततोऽमात्यांस्ततो भृत्यांस्ततः प्रजाम् ॥ ४६३०॥
ENMSS@4631@1आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।
ENMSS@4631@2ततोऽमात्यांस्ततो भृत्यांस्ततः पुत्रांस्ततः प्रजाः ॥ ४६३१॥
ENMSS@4632@1आत्मानं भावयेन्नित्यं ज्ञानेन विनयेन च ।
ENMSS@4632@2न पुनर्म्रियमाणस्य पश्चात्तापो भविष्यति ॥ ४६३२॥
ENMSS@4633@1आत्मानं मन्त्रिणं दूतम् अमात्यवचनं क्रमम् ।
ENMSS@4633@2आकारं ब्रुवते षष्ठम् एतावान् मन्त्रनिश्चयः ॥ ४६३३॥
ENMSS@4634@1आत्मानं मन्त्रिदूतं च च्छन्नं त्रिषवणक्रमम् ।
ENMSS@4634@2आकारं ब्रुवते षष्ठम् एतावान् मन्त्रनिश्चयः ॥ ४६३४॥
ENMSS@4635@1आत्मानं सततं रक्षेद् दारैरपि धनैरपि ।
ENMSS@4635@2पुनर्दाराः पुनर्वित्तं न शरीरं पुनः पुनः ॥ ४६३५॥
ENMSS@4636@1आत्मानं सर्वथा रक्षेद् राजा रक्षेच्च मेदिनीम् ।
ENMSS@4636@2आत्ममूलमिदं सर्वम् आहुर्हिविदुषो जनाः ॥ ४६३६॥
ENMSS@4637@1आत्मानं सुस्थिरं लक्ष्यं चैव स्थिरं बुधः ।

ENMSS@4637@2वेधयेत् त्रिप्रकारं तु स्थिरवेधी स उच्यते ॥ ४६३७॥
ENMSS@4638@1आत्मा नदी भारत पुण्यतीर्था सत्योदका धृतिकूला दमोर्मिः ।
ENMSS@4638@2तस्यां स्नातः पूयते पुण्यकर्मा पुण्यो ह्यात्मा नित्यमम्भोऽम्भ एव ॥ ४६३८॥
ENMSS@4639@1आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलसमाधियुक्ता ।
ENMSS@4639@2तस्यां स्नातः पुण्यकर्मा पुनाति न वारिणा शुद्ध्यति चान्तरात्मा ॥ ४६३९॥
ENMSS@4640@1आत्मानन्दरसज्ञानाम् अलं शास्त्रावलोकनम् ।
ENMSS@4640@2भक्षितव्या ह्यपूपाः किं गण्यानि सुषिराणि किम् ॥ ४६४०॥
ENMSS@4641@1आत्मानमनुशोच त्वं किमन्यमनुशोचसि ।
ENMSS@4641@2आयुस्ते हीयते यस्य स्थितस्य च गतस्य च ॥ ४६४१॥
ENMSS@4642@1आत्मानमन्यमथ हन्ति जहाति धर्मं पापं समाचरति युक्तमपाकरोति ।
ENMSS@4642@2पूज्यं न पूजयति वक्ति विनिन्द्यवाक्यं किं किं करोति न नरः खलु कोपयुक्तः ॥ ४६४२॥
ENMSS@4643@1आत्मानमम्भोनिधिरेतु शोषं ब्रह्माण्डमासिश्चतु वा तरङ्गैः ।
ENMSS@4643@2नास्ति क्षतिर्नोपचितः कदापि पयोदवृत्तेः खलु चातकस्य ॥ ४६४३॥
ENMSS@4643A@1आत्मानमाख्याति हि कर्मभिर्नरः स्वशीलचारित्रकृतैः शुभाशुभैः ।
ENMSS@4643A@2प्रनष्टमप्यात्मकुलं तथा नरः पुनः प्रकाशं कुरुते स्वकर्मभिः ॥
ENMSS@4644@1आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
ENMSS@4644@2आत्मना कृतिना च त्वम् आत्मन्येव प्रलीयसे ॥ ४६४४॥
ENMSS@4645@1आत्मानमालोक्य च शोभमानम् आदर्शबिम्बे स्तिमितायताक्षी ।
ENMSS@4645@2हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः ॥ ४६४५॥
ENMSS@4646@1आत्मानमेव प्रथमं देशरूपेण यो जयेत् ।
ENMSS@4646@2ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ॥ ४६४६॥
ENMSS@4647@1आत्मानमेव प्रथमम् इच्छेद् गुणसमन्वितम् ।
ENMSS@4647@2कुर्वीत गुणसंपन्नस्ततः शेषपरीक्षणम् ॥ ४६४७॥
ENMSS@4649@1आत्मापि चायं न मम सर्वा वा पृथिवी मम ।
ENMSS@4649@2यथा मम तथान्येषाम् इति बुद्ध्या न मे व्यथा ॥ ४६४९॥
ENMSS@4650@1आत्मा प्रयत्नादर्थेभ्यो मनः समधितिष्ठति ।
ENMSS@4650@2संयोगादात्ममनसोः प्रवृत्तिरुपजायते ॥ ४६५०॥

ENMSS@4651@1आत्माभिधं सुखमनन्तमखण्डमेकं यज्ञादिकर्मजनितेन सुखेन तुल्यम्
।
ENMSS@4651@2मा ब्रूहि कर्म सुखदं तदपीति बुद्ध्या रत्नाकरस्य सदृशं नु
कुलालकुण्डम् ॥ ४६५१॥
ENMSS@4652@1आत्मा मनश्च तद्विद्यैरन्तःकरणमुच्यते ।
ENMSS@4652@2ताभ्यां तु सप्रयत्नाभ्यां संकल्प उपजायते ॥ ४६५२॥
ENMSS@4653@1आत्मा बुद्धीन्द्रियाण्यर्था बहिष्करणमुच्यते ।
ENMSS@4653@2संकल्पाध्यवसायाभ्यां सिद्धिरस्य प्रकीर्त्तिता ॥ ४६५३॥
ENMSS@4654@1उभे एते हि करणे यत्नानन्तर्यके स्मृते ।
ENMSS@4654@2तस्मात् प्रयत्नसंरोधाद् भावयेन्निर्मनस्कताम् ॥ ४६५४॥
ENMSS@4655@1आत्मायत्ते गुणग्रामे नैर्गुण्यं वचनीयता ।
ENMSS@4655@2दैवायत्तेषु वित्तेषु पुंसां का नाम वाच्यता ॥ ४६५५॥
ENMSS@4656@1आत्मायमात्मनि गतो हृदयेऽतिसूक्ष्मो ग्राह्योऽचलेन मनसा सतताभियोगात्
।
ENMSS@4656@2यो यं विचिन्तयति याति स तन्मयत्वं यस्मादतः सुभगमेव गता
युवत्यः
॥ ४६५६॥
ENMSS@4657@1आत्मा यस्य वशे नास्ति कुतस्तस्य परे जनाः ।
ENMSS@4657@2आत्मानं वशमानीय त्रैलोक्यं वर्तते वशे ॥ ४६५७॥
ENMSS@4658@1आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला ।
ENMSS@4658@2ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः ॥ ४६५८॥
ENMSS@4659@1आत्मारामा विहितरतयो निर्विकल्पे समाधौ ज्ञानोद्रेकाद् विघटिततमोग्रन्थयः
सत्त्वनिष्ठाः ।
ENMSS@4659@2यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात् तं मोहान्धः
कथमयममुं वेत्तु देवं पुराणम् ॥ ४६५९॥
ENMSS@4660@1आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
ENMSS@4660@2परं परोपकारार्थं यो जीवति स जीवति ॥ ४६६०॥
ENMSS@4661@1आत्मार्थं यः पशून् हन्यात् सोऽवश्यं नरकं व्रजेत् ।
ENMSS@4661@2देवान् पित् न् समभ्यर्च्य खादन् मांसं न दोषभाक् ॥ ४६६१॥
ENMSS@4662@1आत्मार्थं युक्तवित्तानां मित्रमण्डलभेदिनाम् ।
ENMSS@4662@2अतिलङ्घितलोकानां न बन्धः केनचित् क्वचित् ॥ ४६६२॥
ENMSS@4663@1आत्मार्थत्वेन हि प्रेयान् विषयो न स्वतः प्रियः ।

ENMSS@4663@2स्वत एव हि सर्वेषाम् आत्मा प्रियतमो यतः ।

ENMSS@4663@3तत आत्मा सदानन्दो नास्य दुःखं कदाचन ॥ ४६६३॥

ENMSS@4664@1आत्मार्थे संततिस्त्याज्या राज्यं रत्नं धनं तथा ।

ENMSS@4664@2अपि सर्वस्वमुत्सृज्य रक्षेदात्मानमात्मना ॥ ४६६४॥

ENMSS@4665@1॥। ॥। ॥। ॥। ॥। ॥। ।

ENMSS@4665@2आत्मा वै यमितो येन स यमस्तु विशिष्यते ॥ ४६६५॥

ENMSS@4666@1आत्मा समस्तजगतां भवतीति सम्यग् विज्ञाय यद् वितनुते त्वयि भावबन्धम् ।

ENMSS@4666@2सा भक्तिरित्यभिमतं यदि सिद्धमिष्टं व्यर्थं विशेष्यमलमस्तु

विशेषणं नः ॥ ४६६६॥

ENMSS@4667@1आत्मा सहैति मनसा मन इन्द्रियेण स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः ।

ENMSS@4667@2योगोऽयमेव मनसः किमगम्यमस्ति यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा

॥ ४६६७॥

ENMSS@4668@1आत्मास्ति सर्वजगताम् आधारः पूर्वमिति विचिन्त्यैव ।

ENMSS@4668@2पश्चात् तत्त्वविचारः कुड्ये सत्येव चित्रकर्म स्यात् ॥ ४६६८॥

ENMSS@4669@1आत्मा हि दाराः सर्वेषां दारसंग्रहवर्तिनाम् ।

ENMSS@4669@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ४६६९॥

ENMSS@4670@1आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि स्वीयेनैव करेण

कर्षति तरोः पुष्पं श्रमाशङ्कया ।

ENMSS@4670@2तल्पे किं च मृगत्वचा विरचिते निद्राति भागैर्निजैरन्तःप्रेमभरालसां

प्रियतमामङ्गे दधानो हरः ॥ ४६७०॥

ENMSS@4671@1आत्मैव तातस्य चतुर्भुजस्य जातश्चतुर्दोरुचितः स्मरोऽपि ।

ENMSS@4671@2तच्चापयोः कर्णलते भ्रुवोर्ज्ये वंशत्वगंशौ चिपिटे किमस्याः ॥ ४६७१॥

ENMSS@4672@1आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।

ENMSS@4672@2आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ॥ ४६७२॥

ENMSS@4673@1आत्मैव भार इति तं त्वयि यो निधत्ते सोऽङ्गानि कानि कलयत्वलसः

प्रपत्तेः ।

ENMSS@4673@2विश्वत्र सात्र सविलक्षणलक्षणाया विस्रम्भसंपदियमेव समस्तमङ्गि

॥ ४६७३॥

ENMSS@4674@1आत्मैव यदि नात्मानम् अहितेभ्यो निवारयेत् ।

ENMSS@4674@2कोऽन्यो हितकरस्तस्माद् आत्मानं वारयिष्यति ॥ ४६७४॥
ENMSS@4675@1आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः ।
ENMSS@4675@2मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ॥ ४६७५॥
ENMSS@4676@1आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
ENMSS@4676@2आत्मैव चात्मनः साक्षी कृतस्याप्यकृतस्य च ॥ ४६७६॥
ENMSS@4677@1अत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ।
ENMSS@4677@2तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतीयते ॥ ४६७७॥
ENMSS@4678@1आत्मोपकारचतुरा नरा न गणयन्ति गुरुकुलक्लेशम् ।
ENMSS@4678@2वेधव्यथैव कियती श्रवसो ह्यवतंसभूषणीयस्य ॥ ४६७८॥
ENMSS@4679@1आत्मोपमश्च भूतेषु यो वै भवति पूरुषः ।
ENMSS@4679@2न्यस्तदण्डो जितक्रोधः स प्रेत्य सुखमेधते ॥ ४६७९॥
ENMSS@4680@1आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
ENMSS@4680@2स एव वञ्च्यते तेन ब्राह्मणाश्छागतो यथा ॥ ४६८०॥
ENMSS@4681@1आत्म्यौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
ENMSS@4681@2सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ४६८१॥
ENMSS@4682@1आददानः प्रतिदिनं कलाः सम्यङ् महीपतिः ।
ENMSS@4682@2शुक्लपक्षे प्रविचरन् शशाङ्क इव वर्द्धते ॥ ४६८२॥
ENMSS@4683@1आदरं राजसदसि धनेन लभते नरः ।
ENMSS@4683@2सुभटः शत्रुसंग्रामे विक्रमेण यथा जयम् ॥ ४६८३॥
ENMSS@4684@1आदरणीयगुणा सखि महता निहितासि तेन शिरसि त्वम् ।
ENMSS@4684@2तव लाघवदोषोऽयं सौधपताकेव यच्चलसि ॥ ४६८४॥
ENMSS@4685@1आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
ENMSS@4685@2तथा चेद् विश्वकर्तारं को न मुच्येत बन्धनात् ॥ ४६८५॥
ENMSS@4686@1आदरेणार्जवेनैव शौर्याद् दानेन विद्यया ।
ENMSS@4686@2प्रत्युत्थानाभिगमनैरानन्दस्मितभाषणैः ।
ENMSS@4686@3उपकारैः स्वाशयेन वशीकुर्याज्ञगत् सदा ॥ ४६८६॥
ENMSS@4687@1आ दर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम् ।
ENMSS@4687@2बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ॥ ४६८७॥
ENMSS@4688@1आदर्शाय शशाङ्कमण्डलमिदं हर्म्याय हेमाचलं दीपाय द्युमणिं महीमिव कथं नो भिक्षवे दत्तवान् ।
ENMSS@4688@2दित्सापल्लवितप्रमोदसलिलव्याकीर्णनेत्राम्बुजो जानीमो भृगुनन्दनस्तदखिलं

न प्रायशो दृष्टवान् ॥ ४६८८॥
ENMSS@4689@1आदातव्यं न दातव्यं प्रियं ब्रूयन् निरर्थकम् ।
ENMSS@4689@2आशां कालवतीं कुर्यात् कालं विघ्नेन योजयेत् ॥ ४६८९॥
ENMSS@4690@1आदातुं सकृदीक्षितेऽपि कुसुमे हस्ताग्रमालोहितं लाक्षारञ्जनवार्तयापि सहसा रक्तं तलं पादयोः ।
ENMSS@4690@2अङ्गानामनुलेपनस्मरणमप्यत्यन्तखेदावहं हन्ताधीरदृशः किमन्यदलकामोदोऽपि भारायते ॥ ४६९०॥
ENMSS@4691@1आदानं चैव तूणीरात् संधानं कर्षणं तथा ।
ENMSS@4691@2क्षेपणं च त्वरायुक्तो बाणस्य कुरुते तु यः ।
ENMSS@4691@3नित्याभ्यासवशात् तस्य शीघ्रसंधानता भवेत् ॥ ४६९१॥
ENMSS@4692@1आदानपानलेपैः काश्चिद् गरलोपतापहारिण्यः ।
ENMSS@4692@2सदसि स्थितैव सिद्धौ- षधिवल्ली कापि जीवयति ॥ ४६९२॥
ENMSS@4693@1आदानमप्रियकरं दानं च प्रियकारकम् ।
ENMSS@4693@2अभीप्सितानामर्थानां काले युक्तं प्रशस्यते ॥ ४६९३॥
ENMSS@4694@1आदाय करमाढ्येभ्यः कीकटेष्वपि वर्षसि ।
ENMSS@4694@2प्रपीय वारि सिन्धुभ्यः स्थलेष्विव घनाघनः ॥ ४६९४॥
ENMSS@4695@1आदाय चापमचलं कृत्वाहीनं गुणं विषमदृष्टिः ।
ENMSS@4695@2यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै ॥ ४६९५॥
ENMSS@4696@1आदाय दण्डं सकलासु दिक्षु योऽयं परिभ्राम्यति भानुभिक्षुः ।
ENMSS@4696@2अब्धौ निमज्जन्निव तापसोऽयं संध्याभ्रकाषायमधत्त सायम् ॥ ४६९६॥
ENMSS@4697@1आदाय धनमनल्पं ददानया सुभग तावकं वासः ।
ENMSS@4697@2मुग्धा रजकगृहिण्या कृता दिनैः कतिपयैर्निःस्वा ॥ ४६९७॥
ENMSS@4698@1आदाय पत्रं त्वरितं यदि श्वा दूर्वां नवां वा नवगोमयं वा ।
ENMSS@4698@2प्रयाति यातुः परतस्तदानीं राजप्रसादं नियतं ब्रवीति ॥ ४६९८॥
ENMSS@4699@1आदाय प्रतिपक्षकीर्तिनिवहान् ब्रह्माण्डमूषान्तरे निर्विघ्नं धमता नितान्तमुदितैः स्वैरेव तेजोऽग्निभिः ।
ENMSS@4699@2तत्तादृक्पुटपाकशोधितमिव प्राप्तं गुणोत्कर्षिणां पिण्डस्थं च महत्तरं च भवता निःक्षारतारं यशः ॥ ४६९९॥
ENMSS@4700@1आदाय मांसमखिलं स्तनवर्जमङ्गान् मां मुञ्च वागुरिक यामि कुरु प्रसादम् ।
ENMSS@4700@2सीदन्ति शष्पकवलग्रहणानभिज्ञा मन्मार्गवीक्षणपराः शिशवो मदीयाः

॥ ४७००॥

ENMSS@4701@1आदाय वकुलगन्धान् अन्धीकुर्वन् पदे पदे भ्रमरान् ।

ENMSS@4701@2अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ॥ ४७०१॥

ENMSS@4702@1आदाय वारि परितः सरितां मुखेभ्यः किं तावदर्जितमनेन दुर्णवेन ।

ENMSS@4702@2क्षारीकृतं च वडवादहने हुतं च पातालकुक्षिकुहरे विनिवेशितं च ॥ ४७०२॥

ENMSS@4703@1आदाय वारि यत एव जहाति भूयस्तत्रैव यः स जलदः प्रथमो जडानाम् ।

ENMSS@4703@2वान्तं प्रतीप्सति तदेव तदेव यस्तु स्रोतःपतिः स निरपत्रपसार्थवाहः ॥ ४७०३॥

ENMSS@4704@1आदाय विप्रस्वमपि नाशयेद् राज्यघातिनः ।

ENMSS@4704@2आदायास्थि दधीचेस्तु शक्रो दैत्यान् जघान हि ॥ ४७०४॥

ENMSS@4705@1आदायादाय मुक्तास्तदनु शिखिधियादाय माणिक्यवर्गं धूमभ्रान्तिं वहन्त्यः

स्ववदनकमलामोदलुब्धालिवृन्दे ।

ENMSS@4705@2पक्तुं भिल्ल्यः प्रवृत्ताः सरभसमसकृद् यद्विषत्पत्तनेषु ब्रूमः

किं कीर्तिपूरं धवलितवसुधं मल्लशाहस्य तस्य ॥ ४७०५॥

ENMSS@4706@1आदायामृतपूर्णमर्कचषकं शोणारविन्दप्रभे पाणाविन्द्रवधूर्विलोक्य च पुनस्तस्मिन् नभःश्यामिकाम् ।

ENMSS@4706@2चिक्षेपोपरि कोपतः परिजनेऽसंशोध्य दत्ता सुधेत्येनं तं शशिनं प्रशंसति जनस्तत्पाणिमुक्तार्जुनम् ॥ ४७०६॥

ENMSS@4707@1आदावघटितं कार्यं मध्ये सुघटितं मम ।

ENMSS@4707@2भूयो विघटितं भूयो भूयाद् घटयितुं प्रभुः ॥ ४७०७॥

ENMSS@4708@1आदावङ्कुरितं पुनः प्रतिपदं पत्रावृतं त्वां मुदा

सौरभ्यस्फुरितप्रसूनकलितं दृष्ट्वाथ हृष्टोऽस्म्यहम् ।

ENMSS@4708@2किं ब्रूमः फलिते त्वयि द्रुततरं हा हन्त किम्पाक हे भूयो व्याकुलयन्ति कण्टकभराः सर्वत्र तत् किं ब्रुवे ॥ ४७०८॥

ENMSS@4709@1आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित- प्रोत्सर्पद्विरहानलेन च ततः संतापितानां दृशाम् ।

ENMSS@4709@2संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ॥ ४७०९॥

ENMSS@4710@1आदावप्युपचारचाटुविनयालंकारशोभान्वितं मध्ये चापि विचित्रवाक्यकुसुमैरभ्यर्चितं निष्फलैः ।

ENMSS@4710@2पैशुन्याविनयावमानमलिनं बीभत्समन्ते च यद् दूरे वोऽस्त्वकुलीनसंगतमसद्धर्मार्थमुत्पादितम् ॥ ४७१०॥

ENMSS@4711@1आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात् पन्नगशायिनो भगवतः
पादोदकं पावनम् ।

ENMSS@4711@2भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ ४७११॥

ENMSS@4712@1आदावायुः परीक्षेत पश्चाल्लक्षणमुत्तमम् ।

ENMSS@4712@2आयुर्हीननराणां च लक्षणैः किं प्रयोजनम् ॥ ४७१२॥

ENMSS@4713@1आदावुत्सृज्य कार्याणि पश्चाच्च प्रार्थयन्ति ये ।

ENMSS@4713@2ते लोके हास्यतां यान्ति पलाण्डुहरणादिव ॥ ४७१३॥

ENMSS@4714@1आदावेव गजेन्द्रमौलिविलसद्दण्डा पताकावली पश्चाद् वारणराजधोरणिरतिप्रोद्दामयोधाश्रिता ।

ENMSS@4714@2उद्दण्डध्वजलाञ्छिताप्यथ घनीभूता रथानां ततिस्तत्पश्चात् तुरगावली विजयते योधैः समं सर्वतः ॥ ४७१४॥

ENMSS@4715@1आदावेव मनुष्येण वर्तितव्यं यथा क्षमम् ।

ENMSS@4715@2यथा नातीतमर्थं वै पश्चात्तापेन युज्यते ॥ ४७१५॥

ENMSS@4716@1आदिकवी चतुरास्यौ कमलजवल्मीकजौ वन्दे ।

ENMSS@4716@2लोकश्लोकविधात्रोर्ययोर्भिदा लेशमात्रेण ॥ ४७१६॥

ENMSS@4717@1आदितामजननाय देहिनाम् अन्ततां च दधतेऽनपायिने ।

ENMSS@4717@2बिभ्रते भुवमधः सदाथ च ब्रह्मणोऽप्युपरि तिष्ठते नमः ॥ ४७१७॥

ENMSS@4718@1आदितालो जयन्तः स्याच्छृङ्गाररससंयुतः ।

ENMSS@4718@2रुद्रसंख्याक्षरपदैरायुर्वृद्धिकरः परः ।

ENMSS@4718@3एक एव लघुर्यस्मिन्न् आदितालः स कथ्यते ॥ ४७१८॥

ENMSS@4719@1आदित्यचन्द्रहरिशंकरवासवाद्याः शक्ता न जेतुमतिदुःखकराणि यानि
।

ENMSS@4719@2तानीन्द्रियाणि बलवन्ति सुदुर्जयानि ये निर्जयन्ति भुवने बलिनस्त एके ॥ ४७१९॥

ENMSS@4720@1आदित्यचन्द्रावनिजज्ञजीवः शुक्रार्कपुत्रा अपि राहुकेतू ।

ENMSS@4720@2कुर्वन्तु नित्यं धनधान्यसौख्यं दीर्घायुरारोग्यशुभान्यमी वः ॥ ४७२०॥

ENMSS@4721@1आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च ।
ENMSS@4721@2अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्
॥ ४७२१॥
ENMSS@4722@1आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ।
ENMSS@4722@2दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं
प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ४७२२॥
ENMSS@4723@1आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
ENMSS@4723@2जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥ ४७२३॥
ENMSS@4724@1आदित्यस्योदयो गानं ताम्बूलं भारतीकथा ।
ENMSS@4724@2इष्टा भार्या सुमित्रं च अपूर्वाणि दिने दिने ॥ ४७२४॥
ENMSS@4725@1आदित्याः किं दशैते प्रलयभयकृतः स्वीकृताकाशदेशाः किं
वोल्कामण्डलानि त्रिभुवनदहनायोद्यतानीति भीतैः ।
ENMSS@4725@2पायासुर्नारसिंहं वपुरमरगणैर्बिभ्रतः शार्ङ्गपाणेर्दृष्टा
दृप्तासुरोरस्तलदरणगलद्रक्तरक्ता नखा वः ॥ ४७२५॥
ENMSS@4726@1आदित्यादपि नित्यदीप्तममृतप्रस्यन्दि चन्द्रादपि त्रैलोक्याभरणं मणेरपि
तमःकाषं हुताशादपि ।
ENMSS@4726@2विश्वालोकि विलोचनादपि परब्रह्मस्वरूपादपि स्वान्तानन्दनमस्तु
धाम
जगतस्तोषाय सारस्वतम् ॥ ४७२६॥
ENMSS@4727@1आदित्यादिग्रहाः सर्वे नक्षत्राणि च राशयः ।
ENMSS@4727@2आयुः कुर्वन्तु ते नित्यं यस्यैषा जन्मपत्रिका ॥ ४७२७॥
ENMSS@4728@1आदित्याद्या ग्रहाः सर्वे यथा तुष्यन्ति दानतः ।
ENMSS@4728@2सर्वस्वेऽपि न तुष्येत जामाता दशमो ग्रहः ॥ ४७२८॥
ENMSS@4728A@1आदित्याय तमः सृष्टं मेघाय ग्रीष्मशोषणम् ।
ENMSS@4728A@2मार्गश्रमस्तु वृक्षाय दुःखिनस्तूपकारिणे ॥
ENMSS@4729@1आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत मा भयम् ।
ENMSS@4729@2बहुरूपो मुहूर्तश्च जीवेतापि कदाचन ॥ ४७२९॥
ENMSS@4730@1आदिमत्स्यः स जयताद् यः श्वासोच्छ्वासितैर्जलैः ।
ENMSS@4730@2गगने विदधेऽम्भोधिं गगनं च महोदधौ ॥ ४७३०॥
ENMSS@4731@1आदिमध्यनिधनेषु सौहृदं सज्जने भवति नेतरे जने ।

ENMSS@4731@2छेदतापननिघर्षताडनैर्नान्यभावमुपयाति काञ्चनम् ॥ ४७३१॥

ENMSS@4732@1आदिमध्यान्तरहितं दशाहीनं पुरातनम् ।

ENMSS@4732@2अद्वितीयमहं वन्दे मद्वस्त्रसदृशं हरिम् ॥ ४७३२॥

ENMSS@4733@1आदिमध्यावसाने च नैव गच्छति विक्रियाम् ।

ENMSS@4733@2अत एव कुलीनानां नृपाः कुर्वन्ति संग्रहम् ॥ ४७३३॥

ENMSS@4734@1आदिराजयशोबिम्बम् आदर्शं प्राप्य वाङ्मयम् ।

ENMSS@4734@2तेषामसंनिधानेऽपि न स्वयं पश्य नश्यति ॥ ४७३४॥

ENMSS@4735@1आदीप्तवह्निसदृशैर्मरुतावधूतैः सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।

ENMSS@4735@2सद्यो वसन्तसमयेन समागतेयं रक्तांशुका नववधूरिव भाति भूमिः

॥ ४७३५॥

ENMSS@4736@1आदीर्घेण चलेन वक्रगतिना तेजस्विना योगिना नीलाब्जद्युतिनाहिना वरमहं

दृश्यो न तच्चक्षुषा ।

ENMSS@4736@2दष्टे सन्ति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो

मुग्धाक्षीक्षणवीक्षितस्य नहि मे वैद्यो न चाप्यौषधम् ॥ ४७३६॥

ENMSS@4737@1आदूरात् प्रतिपान्थमाहितदृशः प्रत्याशयोन्मीलति ध्वान्ते स्वान्तमहर्व्ययेऽपि

न परावृत्तं कुरङ्गीदृशः ।

ENMSS@4737@2तस्या निःसहबाहुवल्लिविगलद्धम्मिल्लवद् भङ्गुर- ग्रीवं दीर्घमजीववत्

प्रियसखीवर्गेण नीतं वपुः ॥ ४७३७॥

ENMSS@4738@1आदृतकुपितभवानी- कृतकरमालादिबन्धनव्यसनः ।

ENMSS@4738@2केलिकलाकलहादौ देवो वः शंकरः पायात् ॥ ४७३८॥

ENMSS@4739@1आदृता नखपदैः परिरम्भाश्चुम्बितानि घनदन्तनिपातैः ।

ENMSS@4739@2सौकुमार्यगुणसंभृतकीर्तिर्वाम एव सुरतेष्वपि कामः ॥ ४७३९॥

ENMSS@4740@1आ दृष्टिप्रसरात् प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया विश्रान्तेषु

पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति ।

ENMSS@4740@2गत्वैकं सशुचा गृहं प्रति पदं पान्थस्त्रियास्मिन् क्षणे मा भूदागत

इत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥ ४७४०॥

ENMSS@4741@1आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः ।

ENMSS@4741@2क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ ४७४१॥

ENMSS@4742@1आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्यकथादरिद्रम् ।

ENMSS@4742@2त्वदङ्गशिल्पात् पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ॥ ४७४२॥

ENMSS@4743@1आदौ कुलं परीक्षेत ततो विद्यां ततो वयः ।

ENMSS@4743@2शीलं धनं ततो रूपं देशं पश्चात् विवाहयेत् ॥ ४७४३॥

ENMSS@4744@1आदौ गृहीतपाणिः पश्चादारूढजघनकटिभागा ।

ENMSS@4744@2नखमुखलालनसुखदा सा किं रामास्ति नैव भोः पामा ॥ ४७४४॥

ENMSS@4745@1आदौ चित्ते ततः काये सतां संजायते जरा ।

ENMSS@4745@2असतां च पुनः काये नैव चित्ते कदाचन ॥ ४७४५॥

ENMSS@4746@1आदौ छायातिदीर्घापि प्राच्यामल्पतरा ततः ।

ENMSS@4746@2तथा मैत्र्यसतामादौ दीर्घाप्यल्पतरा भवेत् ॥ ४७४६॥

ENMSS@4747@1आदौ तद्धितकृत् स्नेहं कार्यं स्नेहमनन्तरम् ।

ENMSS@4747@2कृत्वा सधर्मवादं च मध्यस्थः साधयेद्धितम् ॥ ४७४७॥

ENMSS@4748@1आदौ तन्व्यो बृहन्मध्या विस्तारिण्यः पदे पदे ।

ENMSS@4748@2यायिन्यो न निवर्तन्ते सतां मैत्र्यः सरित्समाः ॥ ४७४८॥

ENMSS@4749@1आदौ तातो वरं पश्येत् ततो वित्तं ततः कुलम् ।

ENMSS@4749@2यदि कश्चिद् वरे दोषः किं धनेन कुलेन किम् ॥ ४७४९॥

ENMSS@4750@1आदौ तावद् व्यापारस्था यमवरुणधनदसदृशा भवन्त्यतिगर्विता मानोन्मत्ता

दर्पोत्सिक्ताः परिभवहरणनिरता भवन्त्यतिदारुणाः ।

ENMSS@4750@2भ्रष्टास्तेभ्यो व्यापारेभ्यो हतिनिगडनियतचरणास्तथा लगुडार्दिता लम्बैः

कूर्चैर्दीनैर्वक्रैर्मुनय इव शमदमरता भवन्त्यतिभद्रकाः ॥ ४७५०॥

ENMSS@4751@1आदौ तु मन्दमन्दानि मध्ये समरसानि च ।

ENMSS@4751@2अन्ते स्नेहायमानानि संगतान्युत्तमैः सह ॥ ४७५१॥

ENMSS@4752@1आदौ तु रमणीयानि मध्ये तु विरसानि च ।

ENMSS@4752@2अन्ते वैरायमाणानि संगतानि खलैः सह ॥ ४७५२॥

ENMSS@4753@1आदौ दर्शयति नतिं यान्ती यान्ती समुन्नतिं धत्ते ।

ENMSS@4753@2अनुकूलापि वराही चिरेण तुच्छं फलं धत्ते ॥ ४७५३॥

ENMSS@4754@1आदौ धर्मे प्रमाणं विविधविधिभिदाशेषतां च प्रयुक्तिं

पौर्वापर्याधिकारौ तदनु बहुविधं चातिदेशं तथोहम् ।

ENMSS@4754@2बाधं तन्त्रं प्रसङ्गं नयमनयशतैः सम्यगालोचयद्भ्यो भिन्ना

मीमांसकेभ्यो विदधति भुवि के सादरं वेदरक्षाम् ॥ ४७५४॥

ENMSS@4755@1आदौ नमस्कृतिः पश्चाद् आशंसावचनानि च ।

ENMSS@4755@2सुभाषितप्रशंसा च कविकाव्यस्तुतिस्ततः ॥ ४७५५॥

ENMSS@4756@1आदौ नम्रस्ततह् स्तब्धः कार्यकाले च निष्ठुरः ।

ENMSS@4756@2कृते कार्ये पुनर्नम्रः शिश्नतुल्यो वणिग्जनः ॥ ४७५६॥

ENMSS@4757@1आदौ नम्राः पुनर्वक्राः स्वीयकार्येषु तत्पराः ।

ENMSS@4757@2कार्यान्ते च पुनर्वक्राः काण्वास्तु प्राणघातकाः ॥ ४७५७॥

ENMSS@4758@1आदौ न वाप्रणयिनां प्रणयो विधेयो दत्तोऽथवा प्रतिदिनं परिपोषणीयः
।

ENMSS@4758@2उत्क्षिप्य यत् क्षिपति तत् प्रकरोति लज्ज्ञां भूमौ स्थितस्य पतनाद्
भयमेव
नास्ति ॥ ४७५८॥

ENMSS@4759@1आदौ नेच्छति नोज्झति स्मरकथां व्रीडाविमिश्रालसा मध्ये
ह्रीपरिवर्जिताभ्युपरमे लज्ज्ञाविनम्रानना ।

ENMSS@4759@2भावैर्नैकविधैः करोत्यभिनयं भूयश्च या सादरा बुद्ध्वा पुंप्रकृतिं
यानुचरति ग्लानेतरैश्चेष्टितैः ॥ ४७५९॥

ENMSS@4760@1आदौ पत्रविचित्रितः पुनरसौ मुग्धप्रसूनाङ्कितः पश्चात् स्निग्धफलोद्गमे
घनरसैः सिक्तो मया सर्वतः ।

ENMSS@4760@2दानोन्मत्तदुरन्तवारणकटीसंघट्टनैः केवलं सोऽयं घूर्णित एव
दैववशतो माकन्दभूमीरुहः ॥ ४७६०॥

ENMSS@4761@1आदौ प्रेमकषायिता हरमुखव्यापारलोला शनैर्व्रीडाभारविधूर्णिता मुकुलिता
धूमोद्गमव्याजतः ।

ENMSS@4761@2पत्युः संमिलिता दृशा सरभसव्यावर्तनव्याकुला पार्वत्याः
परिणीतिमङ्गलविधौ दृष्टिः शिवायास्तु वः ॥ ४७६१॥

ENMSS@4762@1आदौ बुध्येत पणितः पणमानश्च कारणम् ।

ENMSS@4762@2ततो वितर्क्योभयतो मतः श्रेयस्ततो व्रजेत् ॥ ४७६२॥

ENMSS@4763@1आदौ मज्ज्ञनचीरहारतिलकं नेत्राञ्जनं कुण्डलं
नासामौक्तिकमालतीविकरणं झंकारकं नूपुरम् ।

ENMSS@4763@2अङ्गे चन्दनचर्चितं मणिगणः क्षुद्रावलिर्घण्टिका ताम्बूलं करकङ्कणं
चतुरता शृङ्गारकाः षोडश ॥ ४७६३॥

ENMSS@4764@1आदौ माता गुरोः पत्नी ब्रह्मणी राजपत्निका ।

ENMSS@4764@2धेनुर्धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥ ४७६४॥

ENMSS@4765@1आदौ मानपरिग्रहेण गुरुणा दूरं समारोपिता पश्चात्तापभरेण तानवकृता
नीता परं लाघवम् ।

ENMSS@4765@2उत्सङ्गान्तरवर्तिनामनुगमात् संपीडिता गामिमां सर्वाङ्गप्रणयप्रियामिव

तरुच्छाया समालम्बते ॥ ४७६५॥
ENMSS@4766@1आदौ यादोनिवासोक्तिः पारावारवरोक्तयः ।
ENMSS@4766@2क्षीरनीरनिधेरुक्तिर्नद्युक्तिर्जाह्नव्युक्तयः ॥ ४७६६॥
ENMSS@4767@1आदौ रक्तं पुना रक्तं मध्य उञ्ज्वलभास्वरम् ।
ENMSS@4767@2दुर्निरीक्ष्यप्रभावं तं दृश्यं द्रष्टारमाश्रये ॥ ४७६७॥
ENMSS@4768@1आदौ राजेत्यधीराक्षि पार्थिवः कोऽपि गीयते ।
ENMSS@4768@2सनातनश्च नैवासौ राजा नापि सनातनः ॥ ४७६८॥
ENMSS@4769@1आदौ रूपविनाशिनी कृशकरी कामस्य विध्वंसिनी प्रज्ञामान्द्यकरी तपःक्षयकरी धर्मस्य निर्मूलिनी ।
ENMSS@4769@2पुत्रभ्रातृकलत्रभेदनकरी लज्जाङ्कुरच्छेदिनी सा मां पीडति सर्वदोषजननी प्राणापहन्त्री क्षुधा ॥ ४७६९॥
ENMSS@4770@1आदौ रूपविनाशिनी कृशकरी कामाङ्कुरच्छेदिनी पुत्रामित्रकलत्रभेदनकरी गर्वाङ्कुरच्छेदिनी ।
ENMSS@4770@2कामं मन्दकरी तपःक्षयकरी धर्मस्य निर्मूलनी सा मां संप्रति सर्वरोगजननी प्राणापहन्त्री क्षुधा ॥ ४७७०॥
ENMSS@4771@1आदौ लज्जयति कृतं मध्ये परिभवति रिक्तमवसाने ।
ENMSS@4771@2खलसंगतस्य कथयत यदि सुस्थितमस्ति किंचिदपि ॥ ४७७१॥
ENMSS@4772@1आदौ वरं निर्धनत्वं धनिकत्वमनन्तरम् ।
ENMSS@4772@2तथादौ पादगमनं यानगत्वमनन्तरम् ।
ENMSS@4772@3सुखाय कल्पते नित्यं दुःखाय विपरीतकम् ॥ ४७७२॥
ENMSS@4773@1आदौ वितत्य चरणौ विनमय्य कण्ठम् उत्थाप्य वक्रमभिहत्य मुहुश्च वत्साः ।
ENMSS@4773@2मात्रा विवर्तितमुखं मुखलिह्यमान- पश्चार्धसुस्थमनसः स्तनमुत्पिबन्ति ॥ ४७७३॥
ENMSS@4774@1आदौ विस्मयनिस्तरङ्गमनु च प्रेङ्खोलितं साध्वसैर्व्रीडानम्रमथ क्षणं प्रविकसत्तारं दिदृक्षारसैः ।
ENMSS@4774@2आकृष्टं सहजाभिजात्यकलनात् प्रेम्णा पुरह् प्रेरितं चक्षुर्भूरि कथंकथंचिदगमत् प्रेयांसमेणीदृशः ॥ ४७७४॥
ENMSS@4775@1आदौ वेश्या पुनर्दासी पश्चाद् भवति कुट्टिनी ।
ENMSS@4775@2सर्वोपायपरिक्षीणा वृद्धा नारी पतिव्रता ॥ ४७७५॥
ENMSS@4776@1आदौ हालाहलहुतभुजा दत्तहस्तावलम्बो बाल्ये शंभोर्निटिलमहसा

बद्धमैत्रीनिरूढः ।

ENMSS@4776@2प्रौढो राहोरपि मुखविषेणान्तरङ्गीकृतो यः सोऽयं चन्द्रस्तपति किरणैर्मामिति प्राप्तमेतम् ॥ ४७७६॥

ENMSS@4777@1आद्यः कोपस्तदनु मदनस्त्वद्वियोगस्तृतीयः शान्त्यै दूतीवचनमपरः पञ्चमः शीतभानुः ।

ENMSS@4777@2इत्थं बाला निरवधि परं त्वां फलं प्रार्थयन्ती हा हा पञ्चज्वलनमधुना सेवते योगिनीव ॥ ४७७७॥

ENMSS@4778@1आद्यः प्रवेशसमयः स कलेर्युगस्य प्राप्तस्तिरस्कृतबहूदकहंससार्थः ।

ENMSS@4778@2आहूय सादरतया तपसोऽन्ति मेऽह्नि काणो द्विजः प्रतिगृहं बत यत्र पूज्यः ॥ ४७७८॥

ENMSS@4779@1आद्यकालिकया बुद्ध्या दूरे श्व इति निर्भयाः ।

ENMSS@4779@2सर्वभक्षा न पश्यन्ति कर्मभूमिं विचेतसः ॥ ४७७९॥

ENMSS@4780@1आद्यन्तौ च तदाद्यन्तौ तदाद्यन्तौ च मध्यमौ ।

ENMSS@4780@2वह्नीन्दुवायुवरुणपुत्रौ पितृसमप्रभौ ॥ ४७८०॥

ENMSS@4781@1आद्याद्यस्य गुणं तेषाम् अवाप्नोति परः परः ।

ENMSS@4781@2यो यो यावतिथश्चैषां स स तावद् गुणः स्मृतः ॥ ४७८१॥

ENMSS@4782@1आद्यूनस्तमसां चकोररमणीरागाब्धिमन्थाचलो जीवातुर्जलजस्य वासवदिशाशैलेन्द्रचूडामणिः ।

ENMSS@4782@2आदेष्टा श्रुतिकर्मणां कुमुदिनीशोकाग्निपूर्णाहुतिर्देवः सोमरसायनं विजयते विश्वस्य बीजं रविः ॥ ४७८२॥

ENMSS@4783@1आद्ये जग्मुषि ताम्रचूडरटिते श्रोत्रं प्रबुद्धा जवात् किंचिद् वासवदिङ्मुखं प्रविकसद् दृष्ट्वा गवाक्षाध्वना ।

ENMSS@4783@2संत्रासेन समीरिता प्रियतमप्रेम्णा च रुद्धा शनैरुत्थानोपनिवेशनानि कुरुते तल्पे मुहुः पांसुला ॥ ४७८३॥

ENMSS@4784@1आद्येन हीना जलधावदृश्यं मध्येन हीनं भुवि वर्णनीयम् ।

ENMSS@4784@2अन्तेन हीनं ध्वनते शरीरं हेमाभिधः स श्रियमातनोतु ॥ ४७८४॥

ENMSS@4785@1आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा शापस्यान्ते विगलितशुचा या

मयोद्वेष्टनीया ।

ENMSS@4785@2स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं गण्डाभोगात् कठिनविषयामेकवेणीं करेण ॥ ४७८५॥

ENMSS@4786@1आद्ये यामे तु शङ्खः स्यान् महाशङ्खो द्वितीयके ।
ENMSS@4786@2पद्मस्तृतीयके यामे महापद्मश्चतुर्थके ॥ ४७८६॥
ENMSS@4787@1आद्यैर्मद्विहितैः पद्यैः कियद्भिरपरैरपि ।
ENMSS@4787@2युता पद्धतिरेषास्तु सज्जनानन्ददायिनी ॥ ४७८७॥
ENMSS@4788@1आद्योऽध्रुवस्ततो मण्ठः प्रतिमण्ठो निसारुकः ।
ENMSS@4788@2अडतालस्ततो राग एकताली च संमता ॥ ४७८८॥
ENMSS@4789@1आद्योऽन्तस्थोऽप्यनन्तं दिशति फलमसावद्वितीयं द्वितीयस्तार्तीयीकः पवर्गप्रकृतिरपि बलेनापवर्गं प्रसूते ।
ENMSS@4789@2तुर्यश्चातुर्यभाजां विसृजति चतुरः श्रोत्रपान्थः पुमर्थान् राम त्वन्नामवर्णा जगति कतिपयं कौतुकं तन्वते न ॥ ४७८९॥
ENMSS@4790@1आ द्वीपात् परतोऽप्यमी नृपतयः सर्वे समभ्यागताः कन्येयं कलधौतकोमलरुचिः कीर्तेश्च लाभः परः ।
ENMSS@4790@2नाकृष्टं न च टङ्कितं न नमितं नोत्थापितं स्थानतः केनापीदमहो महद् धनुरिदं निर्वीरमुर्वीतलम् ॥ ४७९०॥
ENMSS@4791@1आधत्ते दनुसूनुसूदनभुजाकेयूरवज्राङ्कुर-
व्यूहोल्लेखपदावलीवलिमयैरङ्गैर्मुदं मन्दरः ।
ENMSS@4791@2आधारीकृतकूर्मपृष्ठकषणप्रक्षीणमूलोऽधुना जानीमः परतः पयोधिमथनादुच्चैस्तरोऽयं गिरिः ॥ ४७९१॥
ENMSS@4792@1आधर्मिकः कदर्यो गुणविमुखः परुषवागनेकमतिः ।
ENMSS@4792@2भुङ्क्ते संपदमीदृग् ब्रूत नृकारः किमस्ति दैवं वा ॥ ४७९२॥
ENMSS@4793@1आधातुं विनयं निरागसि नरे कुप्यन्तु नामेश्वरास्तेन स्वाशयशुद्धिरेव सुकरा प्रायः प्रभूणां पुरः ।
ENMSS@4793@2मिथ्यामानिनि मन्यसे यदि तदा नित्यं मनोवर्तिनी ध्याता तामरसाक्षि चित्रपटके का वा त्वदन्या मया ॥ ४७९३॥
ENMSS@4794@1आधातुर्भुवनं तदेतदखिलं चक्षुष्मदाकीटकाद् दिव्यं चक्षुरनन्यलभ्यमुभयत्रास्ते परं दुःसहम् ।
ENMSS@4794@2फाले भूतपतेर्मनोभवमुखक्षुद्रक्षयोज्ज्ञागरं बाणे च प्रतिराजदर्पदलनं बल्लालपृथ्वीपतेः ॥ ४७९४॥
ENMSS@4795@1आधाय कोमलकराम्बुजकेलिनालीम् आलीसमाजमधिकृत्य समालपन्ती ।
ENMSS@4795@2मन्दस्मितेन मयि साचिविलोकितेन चेतश्चकोरनयना चुलुकीचकार ॥ ४७९५॥

ENMSS@4796@1आधाय दुग्धकलशे मन्थानं श्रान्तदोर्लता गोपी ।
ENMSS@4796@2अप्राप्तपारिजाता दैवे दोषं निवेशयति ॥ ४७९६॥
ENMSS@4797@1आधाय द्रुतमाकृतेरुपशमाद् विश्वासनं संनिधौ एकैकं शफरं बकोटकपटाचार्यो जिघृक्षन् मुहुः ।
ENMSS@4797@2औदासीन्यनिवेदनाय निदधद् दिक्षु क्षणं चक्षुषी चञ्चा किञ्च परामृशन् वपुरयं गाम्भीर्यमभ्यस्यति ॥ ४७९७॥
ENMSS@4798@1आधाय मूर्धनि वृथैव भरं महान्तं मूर्खा निमज्जथ कथं भवसागरेऽस्मिन् ।
ENMSS@4798@2विन्यस्य भारमखिलं पदयोर्जनन्या विस्रब्धमुत्तरत पल्वलतुल्यमेनम् ॥ ४७९८॥
ENMSS@4799@1आधारः कन्दमित्युक्तं स्वाधिष्ठानं च जन्मभूः ।
ENMSS@4799@2नाभिस्तु मणिपूराख्यं हृदयं विद्धनाहतम् ॥ ४७९९॥
ENMSS@4800@1आधारजन्मभूतानि हृत्कण्ठस्तालुनासिके ।
ENMSS@4800@2भ्रूमध्ये मस्तकद्वारं दशस्थानेषु धारणा ॥ ४८००॥
ENMSS@4801@1आधाराय धरावकाशविधयेऽप्याकाशमालोकने भास्वानात्ममहत्त्वसाधनविधावन्ये गुणाः केचन ।
ENMSS@4801@2इत्यस्मिन्नुपकारकारिणि सदा वर्गे परं दुस्त्यजे दैन्यव्रीडकलङ्कमुज्झतु कथं चेतो महाचेतसाम् ॥ ४८०१॥
ENMSS@4802@1आधारे हृदये शिखापरिसरे संधाय मेधामयि त्रेधा बीजतनूमनूनकरुणापीयूषकल्लोलिनीम् ।
ENMSS@4802@2त्वां मातर्जपतो निरङ्कुशनिजाद्वैतामृतास्वादन- प्रज्ञाम्भश्चुलुकैः स्फुरन्तु पुलकैरङ्गानि तुङ्गानि मे ॥ ४८०२॥
ENMSS@4803@1आधिक्यादधरसुधा स्खलेदिति प्राप्तशङ्कया विधिना ।
ENMSS@4803@2रचितं तदुपष्टम्भे चिबुकं पाटीरमादधता ॥ ४८०३॥
ENMSS@4804@1आधिक्षामां विरहशयने संनिकीर्णैकपार्श्वां प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
ENMSS@4804@2नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ ४८०४॥
ENMSS@4805@1आधिव्याधिपरीताय अद्य श्वो वा विनाशिने ।
ENMSS@4805@2को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ ४८०५॥
ENMSS@4806@1आधिव्याधिशतैर्वयस्यतितरामारोग्यमुन्मूल्यते लक्ष्मीर्यत्र पतत्रिवच्च

विवृतद्वारा इव व्यापदः ।
ENMSS@4806@2जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात् तत् किं नाम निरङ्कुशेन विधिना यन् निर्मितं सुस्थिरम् ॥ ४८०६॥
ENMSS@4807@1आधूतकेसरो हस्ती तीक्ष्णशृङ्गस्तुरङ्गमः ।
ENMSS@4807@2गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥ ४८०७॥
ENMSS@4808@1आधूतसस्वेदकरोत्पलायाः स्मितावगूढप्रतिकूलवाचः ।
ENMSS@4808@2प्रियो विहायाधरमायताक्ष्याः पपौ चिराय प्रतिषेधमेव ॥ ४८०८॥
ENMSS@4809@1आ धूमाद् विनिवर्तन्ते सुहृदो बान्धवैः सह ।
ENMSS@4809@2येन तत् सह गन्तव्यं तत् कर्म सुकृतं कुरु ॥ ४८०९॥
ENMSS@4810@1आधोरणाङ्कुशभयात् करिकुम्भयुग्मं जातं पयोधरयुगं हृदयेऽङ्गनानाम् ।
ENMSS@4810@2तत्रापि वल्लभनखक्षतभेदभिन्नं नैवान्यथा भवति यल्लिखितं विधात्रा ॥ ४८१०॥
ENMSS@4811@1आधोरणानां गजसंनिपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः ।
ENMSS@4811@2हृतान्यपि श्येननखाग्रकोटि- व्यासक्तकेशानि चिरेण पेतुः ॥ ४८११॥
ENMSS@4812@1आध्मातोद्धतदाववह्निसुहृदः कीर्णोष्णरेणूत्कराः संतप्ताध्वगमुक्तखेदविषमश्वासोष्मसंवादिनः ।
ENMSS@4812@2तृष्णार्ताजगरायतास्यकुहरक्षिप्रप्रवेशोत्क् अटाः भ्रूभङ्गैरिव तर्जयन्ति पवनाः प्लुष्टस्थलीकज्जलैः ॥ ४८१२॥
ENMSS@4813@1आननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतम् ।
ENMSS@4813@2भ्रमद्भ्रमरसंभारं स्मरामि सरसीरुहम् ॥ ४८१३॥
ENMSS@4814@1आननर्त पुरा शंभुर्गोविन्दो रासकृत्तथा ।
ENMSS@4814@2ब्रह्मा पशुत्वमापन्नः स्त्रीभिः को न विडम्बितः ॥ ४८१४॥
ENMSS@4815@1आननस्य मम चेदनौचिती निर्दयं दशनदंशदायिनः ।
ENMSS@4815@2शोध्यते सुदति वैरमस्य तत् किं त्वया वद विदश्य नाधरम् ॥ ४८१५॥
ENMSS@4816@1आननानि हरिणीनयनानाम् अद्भुतानि च समीक्ष्य जगत्याम् ।
ENMSS@4816@2लज्जयेव घनमण्डललीनो मन्दमन्दमहहेन्दुरुदेति ॥ ४८१६॥
ENMSS@4817@1आननेन्दुशशलक्ष्म कपोले सादरं विरचितं तिलकं यत् ।
ENMSS@4817@2तत्प्रिये विरचितावधिभङ्गे धौतमीक्षणजलैस्तरलाक्ष्याः ॥ ४८१७॥
ENMSS@4818@1आननैर्विचकसे हृषिताभिर्वल्लभानभि तनूभिरभावि ।

ENMSS@4818@2आर्द्रतां हृदयमाप च रोषो लोलति स्म वचनेषु वधूनाम् ॥ ४८१८॥
ENMSS@4819@1आनन्दं कुमुदादीनाम् इन्दुः कन्दलयन्नयम् ।
ENMSS@4819@2लङ्घयत्यम्बराभोगं हनूमानिव सागरम् ॥ ४८१९॥
ENMSS@4820@1आनन्दं कृतमेव कैरवकुलं प्रोल्लासितो वारिधिः संतापं तपनोपलस्य शमितः कान्त्या दिशोऽलंकृताः ।
ENMSS@4820@2एतेनाभ्युदयेन चन्द्र भवता त्रैलोक्यमाप्यायितं कैवल्यं कमलस्य दैवघटितं नात्रापि निन्द्यो भवान् ॥ ४८२०॥
ENMSS@4821@1आनन्दं दधति मुखे करोदकेन श्यामाया दयिततमेन सिच्यमाने ।
ENMSS@4821@2ईर्ष्यन्त्या वदनमसिक्तमप्यनल्प- स्वेदाम्बुस्नपितमजायतेतरस्याः ॥ ४८२१॥
ENMSS@4822@1आनन्दं विदुषां तनोति तनुते कर्णज्वरं विद्विषां श्रीमानादिवराहपादसरसीजन्म प्रणामं मुहुः ।
ENMSS@4822@2सद्बन्धुर्गुणसिन्धुरन्धलगुडो धर्मस्य वर्त्मावनेः श्रीमल्लक्ष्मणसेनदक्षिणभुजादण्डोऽपि दण्डे कटुः ॥ ४८२२॥
ENMSS@4823@1आनन्दं सदनं सुताश्च सुधियः कान्ता न दुर्भाषिणी सन्मित्रं सुधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः ।
ENMSS@4823@2आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे साधोः सङ्गमुपासते च सततं धन्यो गृहस्थाश्रमः ॥ ४८२३॥
ENMSS@4824@1आनन्दकन्दमकरन्दकरम्बितानि पङ्केरुहाणि परिहृत्य समागतस्त्वम् ।
ENMSS@4824@2सौरभ्यसारि सहकारि तथा विधेयं येनोपहासविषयो न भवेद् द्विरेफः ॥ ४८२४॥
ENMSS@4825@1आनन्दकन्दमखिलश्रुतिसारमेकम् अध्यात्मदीपमतिदुस्तरमञ्जनाभम् ।
ENMSS@4825@2आकृष्य सान्द्रकुचयोः परिरभ्य कामं संप्राप्य गोपवनिता बत पुण्यपुञ्जाः ॥ ४८२५॥
ENMSS@4826@1आनन्दकारि मदनज्वरदर्पहारि पीयूषपङ्कपरिहासरसानुकारि ।
ENMSS@4826@2प्रेमप्रसारि परमाभ्युदयानुकारि वामभ्रुवां हरति किं न मनो विकारि ॥ ४८२६॥
ENMSS@4827@1आनन्द क्वचिदश्च मुञ्च हृदयं चातुर्य धैर्य त्वया स्थेयं क्वेति विचार्यतां रसिकते निर्याहि पर्याकुला ।

ENMSS@4827@2रक्ताम्भोजपरीतषद्वदनदत्पक्षोपमानक्षम-

क्षुभ्यत्पक्ष्मचलाचलेक्षणयुगं पश्यामि तस्या मुखम् ॥ ४८२७॥

ENMSS@4828@1आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद ।

ENMSS@4828@2गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यन्द इवावतीर्णः ॥ ४८२८॥

ENMSS@4829@1आनन्दताण्डवपुरे द्रविडस्य गेहे चित्रं वसिष्ठवनितासममाज्यपात्रम् ।

ENMSS@4829@2विद्युल्लतेव परिनृत्यति तत्र दर्वी धारां विलोकयति योगबलेन सिद्धः ॥ ४८२९॥

ENMSS@4830@1आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ।

ENMSS@4830@2यत् सद्व्रजस्थितिजुषां सुहृदां कुमारा- दीनामधीनमिव गोचरतामुपैति ॥ ४८३०॥

ENMSS@4831@1आनन्दबाष्परोमाञ्चौ यस्य स्वेच्छावशंवदौ ।

ENMSS@4831@2किं तस्य साधनैरन्यैः किंकराः सर्वपार्थिवाः ॥ ४८३१॥

ENMSS@4832@1आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।

ENMSS@4832@2विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ ४८३२॥

ENMSS@4833@1आनन्दमात्रमकरन्दमनन्तगन्धं योगीन्द्रसुस्थिरमिलिन्दमपास्तबन्धम् ।

ENMSS@4833@2वेदान्तसूर्यकिरणैकविकासशीलं हेरम्बपादशरदम्बुजमानतोऽस्मि ॥ ४८३३॥

ENMSS@4834@1आनन्दमादधतमायतलोचनानाम् आनीलमावलितकन्धरमात्तवंशम् ।

ENMSS@4834@2आपादमा मुकुटमाकलितामृतौघम् आकारमाकलयताममुमन्तरं नः ॥ ४८३४॥

ENMSS@4835@1आनन्दमिश्रमदनज्वरदीपनानि गाढानुरागरसवन्ति तदा तदा च ।

ENMSS@4835@2स्नेहाङ्कनानि मम मुग्धदृशश्च कण्ठे कष्टं स्मरामि तव तानि गतागतानि ॥ ४८३५॥

ENMSS@4836@1आनन्दमुग्धनयनां श्रियमङ्कभित्तौ बिभ्रत् पुनातु भवतो भगवान् नृसिंहः ।

ENMSS@4836@2यस्यावलोकनविलासवशादिवासीद् उत्सन्नलाञ्छनमृगः कमलामुखेन्दुः ॥ ४८३६॥

ENMSS@4837@1आनन्दमृगदावाग्निः शीलशाखिमदद्विपः ।

ENMSS@4837@2ज्ञानदीपमहावायुरयं खलसमागमः ॥ ४८३७॥

ENMSS@4838@1आनन्दयति कोऽत्यर्थं सज्ञनानेव भूतले ।

ENMSS@4838@2प्रबोधयति पद्मानि तमांसि च निहन्ति कः ॥ ४८३८॥

ENMSS@4839@1आनन्दयति सत्त्वानि यो हि मङ्गलमञ्जुवाक् ।

ENMSS@4839@2निन्दामेष्यति लोके सः परवाक्यनिगूहकः ॥ ४८३९॥

ENMSS@4840@1आनन्दयन्तमरविन्दवनानि धूपैरुद्वेजयन्तमसकृन्नवकैरवाणि ।

ENMSS@4840@2प्रक्षालयन्तमभितो भुवनानि धाम्ना भास्वन्तमन्तकमहं विपदां भजामि ॥ ४८४०॥

ENMSS@4841@1आनन्दयन्ति मदयन्ति विषादयन्ति यूनां मनांसि तव यानि विलोकनानि ।

ENMSS@4841@2किं मन्त्रमावहसि तादृशमौषधं वा किं वा कृशोदरि दृशोरियमेव रीतिः ॥ ४८४१॥

ENMSS@4842@1आनन्दयन्ति युक्त्या ताः सेविता घ्नन्ति चान्यथा ।

ENMSS@4842@2दुर्विज्ञेयाः प्रकृत्यैव तस्माद् वेश्या विषोपमाः ॥ ४८४२॥

ENMSS@4843@1आनन्दसिन्धुरतिचापलशालिचित्त- संदाननैकसदनं क्षणमप्यमुक्ता ।

ENMSS@4843@2या सर्वदैव भवता तदुदन्तचिन्ता तान्तिं तनोति तव संप्रति धिग्धिगस्मान् ॥ ४८४३॥

ENMSS@4844@1आनन्दसुन्दरपुरन्दरमुक्तमाल्यं मौलौ हठेन निहितं महिषासुरस्य ।

ENMSS@4844@2पादाम्बुजं भवतु मे विजयाय मञ्जु- मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥ ४८४४॥

ENMSS@4845@1आनन्दस्तिमिताः समाधिषु मुखे गौर्या विलासालसाः संभ्रान्ताः क्षणमद्भुताः

क्षणमथ स्मेरा निजे वैकृते ।

ENMSS@4845@2क्रूराः कृष्टशरासने मनसिजे दग्धे

घृणाकूणितास्तत्कान्तारुदितेश्रुपूरतरलाः शंभोर्दृशः पान्तु वः ॥ ४८४५॥

ENMSS@4846@1आनन्दस्रुतिरात्मनो नयनयोरन्तःसुधाभ्यञ्जनं प्रस्तारः प्रणयस्य मन्मथतरोः पुष्पं प्रसादो रतेः ।

ENMSS@4846@2आलानं हृदयद्विपस्य विषयारण्येषु संचारिणो दंपत्योरिह लभ्यते सुकृततः संसारसारः सुतः ॥ ४८४६॥

ENMSS@4847@1आनन्दानतमीलिताक्षियुगलं किं त्वं मुधा तिष्ठसि ज्ञातोऽसि प्रकटप्रकम्पपुलकैरङ्गैः स्थितं मुग्धया ।

ENMSS@4847@2मुञ्चैनां जड किं न पश्यसि गलद्बाष्पाम्बुधौताननां सख्यैवं गदिते विमुच्य रभसात् कण्ठे विलग्नो मया ॥ ४८४७॥

ENMSS@4848@1आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा वैतृष्ण्यं तु ममापि संप्रति कुतस्त्वद्दर्शने चक्षुषः ।
ENMSS@4848@2त्वत्सांगत्यसुखस्य नास्मि विषयस्तत्किं वृथा व्याहृतैरस्मिन् विश्रुतजामदग्न्यदमने पाणौ धनुर्जृम्भताम् ॥ ४८४८॥
ENMSS@4849@1आनन्दाय सतां भूयात् सुभाषितमिदं मम ।
ENMSS@4849@2पृथक्पद्धतिसंमिश्रपरिच्छेदैर्मनोरमम् ॥ ४८४९॥
ENMSS@4850@1आनन्दाश्रु प्रवृत्तं मे कथं दृष्ट्वैव कन्यकाम् ।
ENMSS@4850@2अक्षि मे पुष्परजसा वातोद्धूतेन दूषितम् ॥ ४८५०॥
ENMSS@4851@1आनन्दिनी रोदिति वा निकामं या दुःखिता हास्यरसं विधत्ते ।
ENMSS@4851@2रक्ता विरक्ता विरता रता च दुर्लक्ष्यचित्ता खलु वाणिनी या ॥ ४८५१॥
ENMSS@4852@1आनन्देन यशोदया समदनं गोपाङ्गनाभिश्चिरं साशङ्कं बलविद्विषा सकुसुमं सिद्धैः पृथिव्याकुलम् ।
ENMSS@4852@2सेर्ष्यं गोपकुमारकैः सकरुणं पौरैः सुरैः सस्मितं यो दृष्टः स पुनातु वो मधुरिपुः प्रोत्क्षिप्तगोवर्धनः ॥ ४८५२॥
ENMSS@4853@1आनन्दोद्गतबाष्पपूरपिहितं चक्षुः क्षमं नेक्षितुं बाहू स्वेदितयैव कम्पविधुरौ शक्तौ न कण्ठग्रहे ।
ENMSS@4853@2वाणी साध्वसगद्गदाक्षरपदा संक्षोभलोलं मनः सत्यं यत् प्रियसंगमोऽपि सुचिराज्जातो वियोगायते ॥ ४८५३॥
ENMSS@4854@1आनन्दोर्मिव्यतिकरदरस्मेरसंसक्तपक्ष्म प्रेमोद्गारप्रवणमसृणारेचितस्निग्धतारम् ।
ENMSS@4854@2अन्तश्चिन्ताभरपरिचयाकुञ्चितभ्रूलतान्तं चक्षुश्चेतो हरति हरिणीलोचनायाः तदेतत् ॥ ४८५४॥
ENMSS@4855@1आनम्राः स्तबकभरेण पल्लविन्यः शोभन्ते कति न लताः परागपूर्णाः ।
ENMSS@4855@2आमोदे मधुनि च मार्दवे च तासां यो भेदः स खलु मधुव्रतैकवेद्यः ॥ ४८५५॥
ENMSS@4856@1आनम्रास्याः पिहितवदना चित्तमध्ये निरीक्ष्ये मानारम्भः सुमुखि सफलो

मामकीनः कथं स्यात् ।
ENMSS@4856@2यस्यां यस्यां दिशि दिशि मुखं मानतोऽहं नयामि तस्यां तस्यां सजलजलदश्यामलो नन्दसूनुः ॥ ४८५६॥

ENMSS@4857@1आनयति पथिकतरुणं हरिण इह प्रापयन्निवात्मानम् ।
ENMSS@4857@2उपकलमगोऽपि कोमल- कलमावलिकवलनोत्तरलः ॥ ४८५७॥
ENMSS@4858@1आ नाभेः सरसि नतभ्रुवावगाढे चापल्यादथ पयसस्तरङ्गहस्तैः ।
ENMSS@4858@2उच्छ्रायि स्तनयुगमध्यरोहि लब्ध- स्पर्शानां भवति कुतोऽथवा व्यवस्था ॥ ४८५८॥
ENMSS@4859@1आनाम्य फलिनीं शाखां पक्वं पक्वं प्रशातयेत् ।
ENMSS@4859@2फलार्थोऽयं समारम्भो लोके पुंसां विपश्चिताम् ॥ ४८५९॥
ENMSS@4860@1आनायमिव मत्स्यानां पञ्जरं शकुनेरिव ।
ENMSS@4860@2समस्तपाशं मूढस्य बन्धनं वामलोचना ॥ ४८६०॥
ENMSS@4861@1आनीता नटवन्मया तव पुरः श्रीराम या भूमिका व्योमाकाशखखांबराब्धिवसवस्त्वत्प्रीतयेऽद्यावधि ।
ENMSS@4861@2प्रीतो यर्हि निरीक्षणात् त्वमधुना यत् प्रार्थितं देहि मे नो चेद् ब्रूहि कदापि मानय पुनर्मामीदृशीं भूमिकाम् ॥ ४८६१॥
ENMSS@4862@1आनीता शयनाङ्गने प्रियसखीवृन्दैः कथंचिच्छलाच्चित्राक्रान्तकुरङ्गिकेव विगलन्नेत्राम्बुधारातितिः ।
ENMSS@4862@2बाष्पोद्गासमुखी विधूनितकरा निक्षेपिताङ्घ्रिद्वया विष्वग्वेल्लितकुन्तला नववधूर्भाग्येन संभुज्यते ॥ ४८६२॥
ENMSS@4863@1आनीतैरिषुकार कारणमिह श्लाघ्यैः किमेभिः शरैः प्रख्यातामपि किं न पामरपुरीमेतां पुरः पश्यसि ।
ENMSS@4863@2दात्रं पात्रमिति ब्रवीति कुरुते स्तोत्राणि तोत्रे रसं धत्ते यत्र हले कुतूहलमपि ग्रामीणकग्रामणीः ॥ ४८६३॥
ENMSS@4864@1आनीतो मलयाचलान्मलयजो रत्नस्थले रोपितः पीयूषेण परिप्लुतः प्रतिदिनं
यत्नेन संवर्द्धितः ।
ENMSS@4864@2आरब्धं यदि तेन सौरभभरैर्भूमण्डलं वासितुं तस्मिन्नेव दिने विधातृवशतो वज्रेण चूर्णीकृतः ॥ ४८६४॥
ENMSS@4865@1आनीयते शरीरेण क्षीणोऽपि विभवः पुनः ।
ENMSS@4865@2विभवः पुनरानेतुं शरीरं क्षीणमक्षमः ॥ ४८६५॥
ENMSS@4866@1आनीलचूचुकशिलीमुखमुद्गतैक- रोमावलीविपुलनालमिदं प्रियायाः ।
ENMSS@4866@2उत्तुङ्गसंगतपयोधरपद्मयुग्मं नाभेरधः कथयतीव महानिधानम् ॥ ४८६६॥

ENMSS@4867@1आनीलां करपल्लवैरपनयन्नच्छां तमःकञ्चुकीम् आशां संप्रति वासवीमनुसरन्नक्षीणरागः शशी ।
ENMSS@4867@2अस्याश्च स्तनसङ्गिनीमिव वहन्नङ्केन कस्तूरिकाम् आलिङ्गत्ययमादरेण रजनीमर्धोन्मिषत्तारकाम् ॥ ४८६७॥
ENMSS@4868@1आनुकूल्येन दैवस्य वर्तितव्यं सुखार्थिना ।
ENMSS@4868@2दुस्तरं प्रतिकूलं हि प्रतिस्रोत इवाम्भसः ॥ ४८६८॥
ENMSS@4869@1आनृशंस्यं क्षमा सत्यम् अहिंसा दम आर्जवम् ।
ENMSS@4869@2प्रीतिः प्रसादो माधुर्यं मार्दवं च यमा दश ॥ ४८६९॥
ENMSS@4870@1आनृशंस्यं परो धर्मः क्षमा च परमं बलम् ।
ENMSS@4870@2आत्मज्ञानं परं ज्ञानं न सत्याद् विद्यते परम् ॥ ४८७०॥
ENMSS@4871@1आनृशंस्यं परो धर्मः सर्वप्राणभृतां मतः ।
ENMSS@4871@2तस्माद् राजानृशंस्येन पालयेत् कृपणं जनम् ॥ ४८७१॥
ENMSS@4872@1आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः ।
ENMSS@4872@2राघवं शोभयन्त्येते षड्गुणाः पुरुषोत्तमम् ॥ ४८७२॥
ENMSS@4873@1आनेतुं न गता किमु प्रियसखी भीतो भुजङ्गात् किमु क्रुद्धो वा प्रतिषेधवाचि किमसौ प्राणेश्वरो वर्तते ।
ENMSS@4873@2इत्थं कर्णसुवर्णकेतकरजःपातोपघातच्छलाद् अक्ष्णोः कापि नवोढनीरजमुखी बाष्पोदकं मुञ्चति ॥ ४८७३॥
ENMSS@4874@1आन्तरमपि बहिरिव हि व्यञ्जयितुं रसमशेषतः सततम् ।
ENMSS@4874@2असती सत्कविसूक्तिः काचघटीति त्रयं वेद ॥ ४८७४॥
ENMSS@4875@1आन्तरे चैव बाह्ये च राजा यश्चैव सर्वदा ।
ENMSS@4875@2आदिष्टो नैव कम्पेत स राजवसतिं वसेत् ॥ ४८७५॥
ENMSS@4876@1आन्तरेभ्यः परान् रक्षेत् परेभ्यः पुनरान्तरान् ।
ENMSS@4876@2परान् परेभ्यः स्वान् स्वेभ्यः सर्वान् रक्षेत सर्वदा ॥ ४८७६॥
ENMSS@4877@1आन्दोलनैर्मद्वपुषा लगन्तीं स्मरामि वेणीं पुरुषायितायाः ।
ENMSS@4877@2समाचरन्त्याः सुरतोपदेशं तस्याः कशावल्लिमिव प्रियायाः ॥ ४८७७॥
ENMSS@4878@1आन्दोलयन् गिरिनिकुञ्जकरञ्जराजीर्नाजीगणः कलभ कंचन पौरुषेण ।
ENMSS@4878@2ईषत्समुन्मिषितलोचनकोण एव कण्ठीरवे किमिति जीवितमुज्झहासि ॥ ४८७८॥
ENMSS@4879@1आन्दोलयन्ती वपुरायताक्षी हिन्दोलिकायां कनकाङ्गयष्टिः ।
ENMSS@4879@2अतर्कि लोकैर्गगनान्तरस्था स्वर्देवतेवाखिलरूपरम्या ॥ ४८७९॥

ENMSS@4880@1आन्दोलयस्यविरतं गगनार्कमङ्कं तारागणं च शशिनं च तथेतराणि ।
ENMSS@4880@2तेजांसि भासुरतडित्प्रभृतीनि साधो चित्रं तथापि न जहासि यदान्ध्यमन्तः ॥ ४८८०॥
ENMSS@4881@1आन्दोललोलकेशीं चलकाञ्चीकिङ्किणीगणक्वणिताम् ।
ENMSS@4881@2स्मरसि पुरुषायितां तां स्मरचामरचिह्नयष्टिमिव ॥ ४८८१॥
ENMSS@4882@1आन्ध्रत्वमान्ध्रभाषा च प्राभाकरपरिश्रमः ।
ENMSS@4882@2तत्रापि याजुषी शाखा नाल्पस्य तपसः फलम् ॥ ४८८२॥
ENMSS@4883@1आन्ध्री प्रीतिनिबन्धनैकनिपुणा लाटी विदग्धप्रिया कर्णाटी सुरतोपचारचतुरा नारी शुचिश्चोलिका ।
ENMSS@4883@2आभीरी पुरुषायितप्रियरता लज्जान्विता गूर्जरी काश्मीरी रतिलालसा निधुवने
धृष्टा महाराष्ट्रकी ॥ ४८८३॥
ENMSS@4884@1आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिं च पार्थिवः ।
ENMSS@4884@2तद्विद्यैस्तत्क्रियोपेतैश्चिन्तयेद् विनयान्वितः ॥ ४८८४॥
ENMSS@4885@1आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।
ENMSS@4885@2विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः ॥ ४८८५॥ ॥।
ENMSS@4886@1आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
ENMSS@4886@2अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयेतरौ ॥ ४८८६॥
ENMSS@4887@1आन्वीक्षिकीत्रयीवार्ताः सतीर्विद्याः प्रचक्षते ।
ENMSS@4887@2सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे ॥ ४८८७॥
ENMSS@4888@1दण्डनीतिर्यदा सम्यङ् नेतारमधितिष्ठति ।
ENMSS@4888@2तदा विद्याविदः शेषा विद्याः सम्यगुपासते ॥ ४८८८॥ ॥।
ENMSS@4889@1आन्वीक्षिक्यात्मविद्या स्याद् ईक्षणात् सुखदुःखयोः ।
ENMSS@4889@2ईक्षमाणस्तया तत्त्वं हर्षशोकौ व्युदस्यति ॥ ४८८९॥
ENMSS@4890@1आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।
ENMSS@4890@2विद्याश्चतस्र एवैता अभ्यसेद् नृपतिः सदा ॥ ४८९०॥
ENMSS@4891@1आन्वीक्षिक्यां तर्कशास्त्रं वेदान्ताद्यं प्रतिष्ठितम् ।
ENMSS@4891@2त्रय्यां धर्मो ह्यधर्मश्च कामोऽकामः प्रतिष्ठितः ॥ ४८९१॥
ENMSS@4892@1आन्वीक्षिक्यात्मविज्ञानाद् हर्षशोकौ व्युदस्यति ।
ENMSS@4892@2उभौ लोकाववाप्नोति त्रय्यां तिष्ठन् यथाविधि ॥ ४८९२॥
ENMSS@4893@1आपह् पवित्रं प्रथमं पृथिव्याम् अपां पवित्रं परमं च मन्त्राः ।

ENMSS@4893@2तेषां च सामग्र्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः ॥ ४८९३॥
ENMSS@4894@1आपज्ञलनिमग्नानां ह्रियतां व्यसनोर्मिभिः ।
ENMSS@4894@2वृद्धवाक्यैर्विना नूनं नैवोत्तारं कथंचन ॥ ४८९४॥
ENMSS@4895@1आपत्काले तु संप्राप्ते यन् मित्रं मित्रमेव तत् ।
ENMSS@4895@2वृद्धिकाले तु संप्राप्ते दुर्जनोऽपि सुहृद् भवेत् ॥ ४८९५॥
ENMSS@4896@1आपत्काले नृणां नूनं मरणं नैव लभ्यते ।
ENMSS@4896@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ४८९६॥
ENMSS@4897@1आपत्कालोपयुक्तासु कलासु स्यात् कृतश्रमः ।
ENMSS@4897@2नृत्यवृत्तिर्विराटस्य किरीटी भवनेऽभवत् ॥ ४८९७॥
ENMSS@4898@1आपत् तुला सहायानाम् आत्मनः पौरुषस्य च ।
ENMSS@4898@2अनापदि सुहृत् सर्वः स्वयं च पुरुषायते ॥ ४८९८॥
ENMSS@4899@1आपत्तौ पतितानां येषां वृद्धा न सन्ति शास्तारः ।
ENMSS@4899@2ते शोच्या बन्धूनां जीवन्तोऽपीह मृततुल्याः ॥ ४८९९॥
ENMSS@4900@1आपत्समुद्धरणधीरधियः परेषां जाता महत्यपि कुले न भवन्ति सर्वे
।
ENMSS@4900@2विन्ध्याटवीषु विरलाः खलु पादपास्ते ये दन्तिदन्तमुसलोल्लिखनं सहन्ते
॥ ४९००॥
ENMSS@4901@1आपत्सु किं विषादेन संपत्तौ विस्मयेन किम् ।
ENMSS@4901@2भवितव्यं भवत्येव कर्मणामेष निश्चयः ॥ ४९०१॥
ENMSS@4902@1आपत्सु च न मुह्यन्ति नराः पण्दितबुद्धयः ।
ENMSS@4902@2मनोदेहसमुत्थाभ्यां दुःखाभ्यामर्पितं जगत् ॥ ४९०२॥
ENMSS@4903@1आपत्सु मित्रं जानीयाद् रणे शूरं रहः शुचिम् ।
ENMSS@4903@2भार्यां च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम् ॥ ४९०३॥
ENMSS@4904@1आपत्स्वमूढो धृतिमान् यह् सम्यक् प्रतिपद्यते ।
ENMSS@4904@2कर्मण्यवश्यकार्याणि तमाहुः पण्डितं बुधाः ॥ ४९०४॥
ENMSS@4905@1आपत्स्वेव हि महतां शक्तिरभिव्यज्यते न संपत्सु ।
ENMSS@4905@2अगुरोस्तथा न गन्धः प्रागस्ति यथाग्निपतितस्य ॥ ४९०५॥
ENMSS@4906@1आपदं प्रतरिष्यामो यूयं युक्त्या वदिष्यथ ।
ENMSS@4906@2भवन्तो मम मित्राणि भवत्सु नास्ति भृत्यता ॥ ४९०६॥
ENMSS@4907@1आपदं प्राप्नुयात् स्वामी यस्य भृत्यस्य पश्यतः ।
ENMSS@4907@2प्राणेषु विद्यमानेषु स भृत्यो नरकं व्रजेत् ॥ ४९०७॥

ENMSS@4908@1आपदः क्षणमायान्ति संपदः क्षणमेव च ।

ENMSS@4908@2क्षणं जन्माथ मरणं मुने किमिव न क्षणम् ॥ ४९०८॥

ENMSS@4909@1आपदः सन्ति महतां महतामेव संपदः ।

ENMSS@4909@2इतरेषां मनुष्याणं नापदो न च संपदः ॥ ४९०९॥

ENMSS@4910@1आपदर्थे धनं रक्षेच् श्रीमतां कुत आपदः ।

ENMSS@4910@2कदाचिच्चलते लक्ष्मीः संचितं च विनश्यति ॥ ४९१०॥

ENMSS@4911@1आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।

ENMSS@4911@2आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥ ४९११॥

ENMSS@4912@1आपदां कथितः पन्था इन्द्रियाणामसंयमः ।

ENMSS@4912@2तज्जयः संपदां मार्गो येनेष्टं तेन गम्यताम् ॥ ४९१२॥

ENMSS@4913@1आपदामथ काले तु कुर्वीत न विचालयेत् ।

ENMSS@4913@2अशक्नुवंश्च युद्धाय निष्पतेत् सह मन्त्रिभिः ॥ ४९१३॥

ENMSS@4914@1आपदामपहर्तारं दातारं सर्वसंपदाम् ।

ENMSS@4914@2लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ४९१४॥

ENMSS@4915@1आपदामागमं दृष्ट्वा न विषण्णो भवेद् वशी ।

ENMSS@4915@2संपदं च सुविस्तीर्णां प्राप्य नोऽधृतिमान् भवेत् ॥ ४९१५॥

ENMSS@4916@1आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।

ENMSS@4916@2मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥ ४९१६॥

ENMSS@4917@1आपदास्थितपन्थानाम् इन्द्रियाणामसंयमात् ।

ENMSS@4917@2त्यज्यते संपदां मार्गो यो नेष्टस्तेन पश्यत ॥ ४९१७॥

ENMSS@4918@1आपदि मित्रपरीक्षा शूरपरीक्षा रणाङ्गणे भवति ।

ENMSS@4918@2विनये वंशपरीक्षा स्त्रियः परीक्षा तु निर्धने पुंसि ॥ ४९१८॥

ENMSS@4919@1आपदि येनोपकृतं येन च हसितं दशासु विषमासु ।

ENMSS@4919@2उपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥ ४९१९॥

ENMSS@4920@1आपदो महतामेव महतामेव संपदः ।

ENMSS@4920@2क्षीयते वर्धते चन्द्रः कदाचिन् नैव तारकाः ॥ ४९२०॥

ENMSS@4921@1आपद्गतं हससि किं द्रविणान्ध मूढ लक्ष्मीः स्थिरा न भवतीति किमत्र

चित्रम् ।

ENMSS@4921@2किं त्वं न पश्यसि न घटीर्जलयन्त्रचक्रे रिक्ता भवन्ति भरिताः

पुनरेव रिक्ताः ॥ ४९२१॥

ENMSS@4922@1आपद्गतः खलु महाशयचक्रवर्ती विस्तारयत्यकृतपूर्वमुदारभावम् ।
ENMSS@4922@2कालागुरुर्दहनमध्यगतः समन्ताल्लोकोत्तरं परिमलं प्रकटीकरोति ॥ ४९२२॥
ENMSS@4923@1आपद्ग्राहगृहीतानां वृद्धाः सन्ति न पण्डिताः ।
ENMSS@4923@2येषां मोक्षयितारो वै तेषां शान्तिर्न विद्यते ॥ ४९२३॥
ENMSS@4924@1आपद्भुजङ्गदष्टस्य मन्त्रहीनस्य सर्वदा ।
ENMSS@4924@2वृद्धवाक्यौषधा नूनं कुर्वन्ति किल निर्विषम् ॥ ४९२४॥
ENMSS@4925@1आपद्यपि दुरन्तायां नैव गन्तव्यमक्रमे ।
ENMSS@4925@2राहुरप्यक्रमेणैव पिबन्नप्यमृतं मृतः ॥ ४९२५॥
ENMSS@4926@1आपद्युन्मार्गगमने कार्यकालात्ययेषु च ।
ENMSS@4926@2अपृष्टोऽपि हितान्वेषी ब्रूयात् कल्याणभाषितम् ॥ ४९२६॥
ENMSS@4927@1आपन्नमहितं दृष्ट्वा न दूयेत कदाचन ।
ENMSS@4927@2तदुन्मूलनकालोऽयं विधिना ननु सूचितः ॥ ४९२७॥
ENMSS@4928@1आपन्नया सन्नगिरा वेपमानोरुमूलया ।
ENMSS@4928@2जातो मे जरया सार्धं नववध्वेव संगमः ॥ ४९२८॥
ENMSS@4929@1आपन्नवत्सल जगज्जनतैकबन्धो विद्वन्मरालकमलाकर रामचन्द्र ।
ENMSS@4929@2जन्मादिकर्मविधुरैः सुमनश्चकोरैराचम्यतां तव यशः शरदां सहस्रम् ॥ ४९२९॥
ENMSS@4930@1आपन्नाशाय विबुधैः कर्तव्याः सुहृदोऽमलाः ।
ENMSS@4930@2न तरत्यापदं कश्चिद् योऽत्र मित्रविवर्जितः ॥ ४९३०॥
ENMSS@4931@1आपन्नोऽस्मि शरण्योऽस्मि सर्वावस्थासु सर्वदा ।
ENMSS@4931@2भगवंस्त्वां प्रपन्नोऽस्मि रक्ष मां शरणागतम् ॥ ४९३१॥
ENMSS@4932@1आपन्मूलं खलु युवतयस्तन्निमित्तोऽवमानस्तासां यावत् सलिललहरीभङ्गुरः पक्षपातः ।
ENMSS@4932@2अप्येवं भो परिणतशरच्चन्द्रबिम्बाभिरामं दूरीकर्तुं वदनकमलं नालमस्मत्प्रियायाः ॥ ४९३२॥
ENMSS@4933@1आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
ENMSS@4933@2बलवदपि शिक्षितानाम् आत्मन्यप्रत्ययं चेतः ॥ ४९३३॥
ENMSS@4934@1आपस्काराल्लूनगात्रस्य भूमिं निःसाधारं गच्छतोऽवाङ्मुखस्य ।
ENMSS@4934@2लब्धायामं दन्तयोर्युग्ममेव स्वं नागस्य प्रापदुत्तम्भनत्वम् ॥ ४९३४॥
ENMSS@4935@1आपाटलाधरमधीरविलोलनेत्रम् आमोदनिर्भरितमद्भुतकान्तिपूरम् ।

ENMSS@4935@2आविस्मितामृतमनुस्मृतिलोभनीयम् आमुद्रिताननमहो मधुरं मुरारेः ॥ ४९३५॥

ENMSS@4936@1आपाटलैः प्रथममङ्कुरितैर्मयूखैरह्नां पतिः प्रथमशैलविहारिणीनाम् ।

ENMSS@4936@2सोऽयं करोति सुरपुङ्गवसुन्दरीणां कर्णेषु कल्पतरुपल्लवभङ्गलक्ष्मीम्

॥ ४९३६॥

ENMSS@4937@1आपाणिग्रहणादतिप्रणयिनी कण्ठस्थिताहं विभोः सर्वैरेव हरिप्रियेति

कमला सोऽप्युच्यते माधवः ।

ENMSS@4937@2नो तेनापि दुनोमि मत्सुतगणाः पद्मासुतस्यानुगा वाण्येत्याधिनिवारणाय सततं

संगीयते वीणया ॥ ४९३७॥

ENMSS@4938@1आपाण्डु पीनकठिनं वर्तुलं सुमनोहरम् ।

ENMSS@4938@2करैराकृष्यतेऽत्यर्थं किं वृद्धैरपि सस्पृहम् ॥ ४९३८॥

ENMSS@4939@1आपाण्डुराः शिरसिजास्त्रिवली कपोले दन्तावली विगलिता न च मे विषादः ।

ENMSS@4939@2एणीदृशो युवतयः पथि मां विलोक्य तातेति भाषणपराः खलु वज्रपातः

॥ ४९३९॥

ENMSS@4940@1आपाण्डुरा च मृत्स्ना गोरसवर्णश्च भवति पाषाणः ।

ENMSS@4940@2पुरुषार्धे कुमुदनिभो दृष्टिपथं मूषको याति ॥ ४९४०॥

ENMSS@4941@1आपातमात्ररमणीयमतृप्तिहेतुं किम्पाकपाकफलतुल्यमथो विपाके ।

ENMSS@4941@2नो शाश्वतं प्रचुरदोषकरं विदित्वा

पञ्चेन्द्रियार्थसुखमर्थधियस्त्यजन्ति ॥ ४९४१॥

ENMSS@4942@1आपातमात्ररसिके सरसीरुहस्य किं बीजमर्पयितुमिच्छसि वापिकायाम् ।

ENMSS@4942@2कालः कलिर्जगदिदं न कृतज्ञमज्ञे स्थित्वा हनिष्यति तवैव मुखस्य

शोभाम् ॥ ४९४२॥

ENMSS@4943@1आपातमात्रसौन्दर्यं कुत्र नाम न विद्यते ।

ENMSS@4943@2अत्यन्तप्रतिपत्त्या तु दुर्लभोऽलंकृतो जनः ॥ ४९४३॥

ENMSS@4944@1आपातरमणीयानां संयोगानां प्रियैः सह ।

ENMSS@4944@2अपथ्यानामिवान्नानां परिणामो हि दारुणः ॥ ४९४४॥

ENMSS@4945@1आपातालगभीरे मज्जति नीरे निदाघसंतप्तः ।

ENMSS@4945@2न स्पृशति पल्वलाम्भः पञ्जरशेषोऽपि कुञ्जरः क्वापि ॥ ४९४५॥

ENMSS@4946@1आपीनप्रविसारितोरुविकटैः
पश्चार्धभागैर्गुरुर्वेल्लत्पीवरकम्बलालसरसद्गम्भीरघण्टाकुलः ।
ENMSS@4946@2ग्रामान्तेषु नवीनसस्यहरितेषूद्दामचन्द्रातप- स्मेरासु क्षणदासु
धेनुधवलीवर्गः परिक्रामति ॥ ४९४६॥
ENMSS@4947@1आपीनभारोद्वहनप्रयत्नाद् गृष्टिर्गुरुत्वाद् वपुषो नरेन्द्रः ।
ENMSS@4947@2उभावलंचक्रतुरश्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥ ४९४७॥
ENMSS@4948@1आपीयमानमसकृद्भ्रमरायमाणैरम्भोधरैः स्फुरितवीचिसहस्रपत्रम् ।
ENMSS@4948@2क्षीराम्बुराशिमवलोकय शेषनालम् एकं जगत्त्रयसरः पृथुपुण्डरीकम्
॥ ४९४८॥
ENMSS@4949@1आपुङ्खाग्रममी शरा मनसि मे मग्नाः समं पञ्च ते निर्दग्धं विरहाग्निना
वपुरिदं तैरेव सार्धं मम ।
ENMSS@4949@2कष्टं काम निरायुधोऽसि भवता जेतुं न शक्यो जनो दुःखी स्यामहमेक
एव सकलो लोकः सुखं जीवतु ॥ ४९४९॥
ENMSS@4950@1आ पुष्पप्रसवान् मनोहरतया विश्वास्य विश्वं जनं हंहो दाडिम तावदेव
सहसे वृद्धिं स्वकीयामिह ।
ENMSS@4950@2यावन्नैति परोपभोगसहतामेषा ततस्तां तथा ज्ञात्वा ते हृदयं
द्विधा दलति यत्तेनैव वन्द्यो भवान् ॥ ४९५०॥
ENMSS@4951@1आपूजितैवास्तु गिरीन्द्रकन्या किं पक्षपातेन मनोभवस्य ।
ENMSS@4951@2यद्यस्ति दूती सरसोक्तिदक्षा नाथः पतेत् पादतले वधूनाम् ॥ ४९५१॥
ENMSS@4952@1आपूपयुग्मं मदनस्स्य धात्रा विनिर्मितं वल्युपहारहेतोः ।
ENMSS@4952@2गल्लद्वयं कान्तरसातिरम्यं तस्या महास्नेहभृतं विभाति ॥ ४९५२॥
ENMSS@4953@1आपूरितमिदं श्यामतमसंतमसैरलम् ।
ENMSS@4953@2ब्रह्माण्डमण्डलं भाति सकज्जलकरण्डवत् ॥ ४९५३॥
ENMSS@4954@1आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखं संजातश्च घनाघनो
जलधरः शीर्णश्च वायोर्जवात् ।
ENMSS@4954@2निर्वृत्तश्च फलेग्रहिर्द्रुमवरो दग्धश्च दावाग्निना त्वं चूडामणितां
गतश्च जगतः प्राप्तश्च मृत्योर्वशम् ॥ ४९५४॥
ENMSS@4955@1आपूर्यमाणपलितं सुभगत्वकामः सार्धं प्रयाति दयिता पलिताधिकेन
।
ENMSS@4955@2पुष्पेक्षणत्वमपि शश्वदपोह्य पाकं याति प्रियो निकटमेव विलोचनेन

(?) ॥ ४९५५॥

ENMSS@4956@1आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।

ENMSS@4956@2तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ४९५६॥

ENMSS@4957@1आपूर्येत पुनः स्फुरच्छफरिकासारोर्मिभिर्वारिभिर्भूयोऽपि प्रविभज्यमाननलिनं पश्येम तोयाशयम् ।

ENMSS@4957@2इत्याशाशततन्तुबद्धहृदयो नक्तंदिनं दीनधीः शुष्यत्यातपशोषितस्य सरसस्तीरे जरत्सारसः ॥ ४९५७॥

ENMSS@4958@1आ पूर्वस्माद् विडौजःकरिवमथुपयःसिक्तसानोर्गिरीन्द्राद् आ च प्रत्यक्पयोधेर्वरुणवरवधूनाभिनिष्पीतवारः ।

ENMSS@4958@2आ मेरोरा च सेतोरवनितलमिलन्मौलिविस्रंसमान- स्रग्दामानो यदीयं चरणमशरणाः पर्युपासन्नरेन्द्राः ॥ ४९५८॥

ENMSS@4959@1आपृच्छन्ते मलयजतरूनाश्वसन्त्येत्य वल्लीराभाषन्ते चिरपरिचितान् मालयान् निर्झरौघान् ।

ENMSS@4959@2अद्य स्थित्वा द्रविडमहिलामन्दिरे श्वः प्रभाते प्रस्थातारो मलयमरुतः कुर्वते संविधानम् ॥ ४९५९॥

ENMSS@4960@1आपृच्छस्व सखीं नमस्कुरु गुरून् नन्दस्व बन्धुस्त्रियः कावेरीतटसंनिविष्टनयने मुग्धे किमुत्ताम्यसि ।

ENMSS@4960@2आस्ते सुभ्रु समीप एव भवनादेलालतालिङ्गित- न्यञ्चत्तीरतमालदन्तुरदरी तत्रापि गोदावरी ॥ ४९६०॥

ENMSS@4961@1आपृष्टासि विनिर्गतोऽध्वगजनस्तन्वङ्गि गच्छाम्यहं स्वल्पैरेव दिनैः समागम इति ज्ञात्वा शुचं मा कृथाः ।

ENMSS@4961@2इत्याकर्ण्य वचः प्रियस्य सहसा तन्मुग्धया चेष्टितं येनाकाण्डसमाप्ततीव्रविरहक्लेशः कृतो वल्लभः ॥ ४९६१॥

ENMSS@4962@1आपृष्टासि व्यथयति मनो दुर्बला वासरश्रीरेह्यालिङ्ग क्षपय रजनीमेकिका चक्रवाकि ।

ENMSS@4962@2नान्यासक्तो न खलु कुपितो नानुरागच्युतो वा दैवायत्तस्तदिह भवतीमस्वतन्त्रस्त्यजामि ॥ ४९६२॥

ENMSS@4963@1आपेदिरेऽम्बरपथं परितः पतङ्गा भृङ्गा रसालमुकुलानि समाश्रयन्ति ।

ENMSS@4963@2संकोचमञ्चति सरस्त्वयि दीनदीनो मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ ४९६३॥

ENMSS@4964@1आपो वस्त्रं तिलास्तैलं गन्धो वा सयवा तथा ।
ENMSS@4964@2पुष्पाणामधिवासेन तथा संसर्गजा गुणाः ॥ ४९६४॥
ENMSS@4965@1आपो विमुक्ताः क्वचिद् आप एव क्वचिन् न किंचिद् गरलं क्वचिच्च ।
ENMSS@4965@2यस्मिन् विमुक्ताः प्रभवन्ति मुक्ताः पयोद तस्मिन् विमुखः कुतस्त्वम् ॥ ४९६५॥
ENMSS@4966@1आपोशनं चासनं च तैलाभ्यङ्गं तथैव च ।
ENMSS@4966@2स्वयं करकृतं चैव आयुःश्रीपुत्रनाशनम् ॥ ४९६६॥
ENMSS@4967@1आपोशनमकृत्वा तु यश्चान्नं परिमर्दयेत् ।
ENMSS@4967@2मर्दितं चापि तच्चान्नम् अमेध्यं मनुरब्रवीत् ॥ ४९६७॥
ENMSS@4968@1आप्तवाक्यमनादृत्य दर्पेणाचरितं यदि ।
ENMSS@4968@2फलितं विपरीतं तत् का तत्र परिदेवना ॥ ४९६८॥
ENMSS@4969@1आप्तस्य चाप्तस्तस्यातस्तस्याप्याप्तोऽस्ति कश्चन ।
ENMSS@4969@2सुगुप्तमपि मन्त्रं हि भिनत्त्याप्तपरंपरा ॥ ४९६९॥
ENMSS@4970@1आप्ताप्तसंततेर्मन्त्रं संरक्षेत् तत्परस्तु सः ।
ENMSS@4970@2अरक्ष्यमाणं मन्त्रं हि भिनत्त्याप्तपरंपरा ॥ ४९७०॥
ENMSS@4971@1आप्त्वाप्यात्मविनाशं गणयति न खलः परव्यसनकष्टम् ।
ENMSS@4971@2प्रायः सहस्रनाशे समरमुखे नृत्यति कबन्धः ॥ ४९७१॥
ENMSS@4972@1आ प्रपदमा शिरस्कं चान्तः कलिमलमलीमसे वपुषि ।
ENMSS@4972@2विफलं गङ्गाजलमपि मद्यघटे दर्भमुष्टिरिव ॥ ४९७२॥
ENMSS@4973@1आ प्रातर्घनतृष्णया कवलितं प्रोद्दण्डचण्डातपैर्दग्धं जीवनहानितः कलुषितं चिन्ताभरैः कीलितम् ।
ENMSS@4973@2प्रस्निग्धामृतधारया प्रतिदिनं संप्लावयंश्चातकं त्वत्तः कोऽपि न वारिवाह भुवने जागर्ति जानीमहे ॥ ४९७३॥
ENMSS@4974@1आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो यदि पदं मृगवैरिणः श्वा ।
ENMSS@4974@2मत्तेभकुम्भतटपाटनलम्पटस्य नादं करिष्यति कथं हरिणाधिपस्य ॥ ४९७४॥
ENMSS@4975@1आबद्धपद्ममुकुलाञ्जलि याचितो माम् उत्सृज्य संप्रति गतः कथमंशुमाली ।
ENMSS@4975@2अन्तर्निरुद्धमधुपक्कणितैरितीव स्वप्नायते स्म नलिनी निशि लब्धनिद्रा ॥ ४९७५॥

ENMSS@4976@1आबद्धभीमभृकुटीस्थपुटं ललाटं
बिभ्रत्पराङ्मुखरिपोर्विधुताधरोष्ठः ।
ENMSS@4976@2आत्मैव संगरमुखे निजमण्डलाग्र- च्छायाछलादभिमुखस्तव देव जातः ॥ ४९७६॥
ENMSS@4977@1आबद्धातिकठोरै रश्मिभरैः पीडिताश्मचयैः ।
ENMSS@4977@2आमर्दितापि चरणैः परमिह मधुरैव चूर्णितापि सिता ॥ ४९७७॥
ENMSS@4978@1आबद्धा मानुषाः सर्वे निर्बन्धाः कर्मणोर्द्वयोः ।
ENMSS@4978@2दैवे परुषकारे च परं ताभ्यां न विद्यते ॥ ४९७८॥
ENMSS@4979@1आबद्ध्य बाहुयुगलं भवनान्तरालाद् दूरीकृतोऽपि परिसुप्तजने निशीथे ।
ENMSS@4979@2आगत्य मन्दमनुगृह्य पदौ व्यलोकि धृष्टो मयाप्यतिभयात् सुरते सहासः ॥ ४९७९॥
ENMSS@4980@1आबध्नत् परिवेषमण्डलमलं वक्त्रेन्दुबिम्बाद् बहिः
कुर्वच्चम्पकजृम्भमाणकलिकाकर्णावतंसक्रियाम् ।
ENMSS@4980@2तन्वङ्ग्याः परिनृत्यतीव हसतीवोत्सर्पतीवोल्बणं लावण्यं ललतीव काञ्चनशिलाकान्ते कपोलस्थले ॥ ४९८०॥
ENMSS@4981@1आबाल्यं पतिरेष मे जगदिदं जानाति तत्त्वं पुनर्भूमध्ये समुपागता तदपि ते विख्यायते यः पतिः ।
ENMSS@4981@2वृद्धा नास्य गृहे वसामि सुचिरं तिष्ठन् स्थिरात्रेति तन्- मात्सर्यादिव राम भूप भवतः कीर्तिर्दिगन्तं गता ॥ ४९८१॥
ENMSS@4982@1आ बाल्यं भवता समीर कतिधा सार्धं मृणालीदलं भुक्तं
केलिकथामृतैरपि तथा नीतं रहः सादरम् ।
ENMSS@4982@2चित्तान्दोलनलालनैर्मृगदृशां वक्षःस्थलास्फालनैर्भूयः सप्रति
मां विना तव मनो रन्तुं कथं मोदते ॥ ४९८२॥
ENMSS@4983@1आ बाल्यादपि यो विदारितमदोन्मत्तेभकुम्भस्थली-
स्थालीमध्यकवोष्णरक्तरसवन्मुक्तापुलाकप्रियः ।
ENMSS@4983@2हस्तस्तस्य कथं प्रसर्पतु पुरः कृच्छ्रेऽप्यवस्थान्तरे
गर्तावर्तविवर्तमानशशकप्राणापहारे हरेः ॥ ४९८३॥
ENMSS@4984@1आ बाल्याद् देवबालाः सुरवरसदने किंनरीगीयमानं यन्नामाकर्ण्य कर्णेऽमरगुरुवचनोद्गीतगाथानिबद्धम् ।
ENMSS@4984@2दानौदार्याढ्यशौर्याद्वयविमलगुणं सर्वभोगैकसारं भर्तारं कामयन्त्यो

हरिहरगृहिणीपादमाराधयन्ति ॥ ४९८४॥

ENMSS@4985@1आबाल्याधिगमान् मयैव गमितः कोटिं परामुन्नतेरस्मत्संकथयैव पार्थिवसुतः संप्रत्यसौ लज्जते ।

ENMSS@4985@2इत्थं खिन्न इवात्मजेन यशसा दत्तावलम्बोऽम्बुधेर्यातस्तीरतपोवनानि भवतो वृद्धो गुणानां गणः ॥ ४९८५॥

ENMSS@4986@1आबाहूद्गतमण्डलाग्ररुचयः संनद्धवक्षःस्थलाः सोष्माणो व्रणिनो विपक्षहृदयप्रोन्माथिनः कर्कशाः ।

ENMSS@4986@2उत्सृष्टाम्बरदृष्टविग्रहभरा यस्य स्मराग्रेसरा मारा मारवधूस्तनाश्च न दधुः क्षोभं स वोऽव्याज्जिनः ॥ ४९८६॥

ENMSS@4987@1आब्रह्मकीटान्तमिदं निबद्धं पुंस्त्रीप्रयोगेन जगत् समस्तम् ।

ENMSS@4987@2व्रीडात्र का यत्र चतुर्मुखत्वम् ईशोऽपि लोभाद् गमितो युवत्याः ॥ ४९८७॥

ENMSS@4988@1आभङ्गुराग्रबहुगुण- दीर्घास्वादप्रदा प्रियादृष्टिः ।

ENMSS@4988@2कर्षति मनो मदीयं ह्रदमीनं बडिशरज्जुरिव ॥ ४९८८॥

ENMSS@4989@1आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।

ENMSS@4989@2उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥ ४९८९॥

ENMSS@4990@1आभाति चन्द्ररहिता न कदापि रात्रिश्चन्द्रोऽपि रात्रिरहितो गतकान्तिरेव ।

ENMSS@4990@2किं कारणं यदनयोः प्रतिमासमेको जातो निरन्तरतया परिरम्भयोगः ॥ ४९९०॥

ENMSS@4991@1आभाति धूसरतरं तिमिरं पुरस्ताद् अन्तःस्फुरद्विरलतारकभारमेतत् ।

ENMSS@4991@2दग्धुं वियोगिविपिनं सितरश्मिवह्नेर्धूमो ज्वलिष्यत इवानुगतस्फुलिङ्गः ॥ ४९९१॥

ENMSS@4992@1आभाति बालिकेयं पाणिस्पर्शेन पुलकितावयवा ।

ENMSS@4992@2अभिनववसन्तसङ्गाद् आविर्मुकुलेव बालचूतलता ॥ ४९९२॥

ENMSS@4993@1आभाति रोमराजिश्चलदलिकुलकोमला विशालाक्ष्याः ।

ENMSS@4993@2नाभीविवरान्तर्गत- मदनानलधूमलेखेव ॥ ४९९३॥

ENMSS@4994@1आभाति शोभातिशयप्रपञ्चाद् एणीदृशोऽस्या रमणीयशोभा ।

ENMSS@4994@2वेणी लसत्कुन्तलधोरणीनां श्रेणीव किं चारुहरिन्मणीनाम् ॥ ४९९४॥

ENMSS@4995@1आभात्येतद् द्विचन्द्रं वियदपि निखिलं हन्तिनस्तु त्रिदन्ता गङ्गापूरश्चतुर्धा प्रविलसति लसत्पञ्चदन्तः करीन्द्रः ।

ENMSS@4995@2षड्वक्त्रः (सप्तवक्त्रः) परिणमति तथा षड्गुणाः सप्तसंख्याः शङ्के त्वत्कीर्तिमूर्त्या नवमिव जगदालक्ष्यते क्षोणिपाल ॥ ४९९५॥

ENMSS@4996@1आभिचारिकहोमैस्तु मन्त्रैः षट्कर्मसाधकः ।

ENMSS@4996@2यन्त्रलेखनकैरुग्रैरुपांशुजपनादिभिः ॥ ४९९६॥

ENMSS@4997@1आभिमुख्यदशामात्राद् आदर्श इव सज्जनः ।

ENMSS@4997@2शीघ्रं रक्तमरक्तं वा गृह्णाति स्वप्रसादतः ॥ ४९९७॥

ENMSS@4998@1आभीरदारकमुदश्चितकिंकिणीकम् आताम्रपाणिचरणं पुरुषं पुराणम् ।

ENMSS@4998@2मञ्जीरमञ्जुमरुणाधरमम्बुजाक्षम् अद्वैतचिन्मयमनादिमनन्तमीडे ॥ ४९९८॥

ENMSS@4999@1आभीरनार्याः करमादधानो न शङ्कसे माधव किं ब्रवीषि ।

ENMSS@4999@2पल्लीपतिर्बल्लववल्लभायाः करग्रहे किं विदधीत शङ्काम् ॥ ४९९९॥

ENMSS@5000@1आभीरादिगिरः काव्येष्वप्रभ्रंश इति स्मृताः ।

ENMSS@5000@2शास्त्रेषु संस्कृतादन्यद् अपभ्रंशतयोदितम् ॥ ५०००॥

ENMSS@5001@1आभुग्नाङ्गुलिपल्लवौ कचभरे व्यापारयन्ती करौ बन्धोत्कर्षनिबद्धमानसतया शून्यां दधाना दृशम् ।

ENMSS@5001@2बाहूत्क्षेपसमुन्नते स्तनतटेपर्यस्तचीनांशुका ह्रीसङ्कोचितबाहुमूलसुभगं बध्नाति जूटिं वधूः ॥ ५००१॥

ENMSS@5002@1आभुज्येन्द्रदिशं कुबेरककुभं स्वाश्लिष्य गाढं करैर् आचुम्ब्याम्बुजिनीं समं कुमुदिनीमुल्लास्य तां दक्षिणाम् ।

ENMSS@5002@2एषोऽद्यापि परारुचिर्विजयते रात्रीश्वरो द्रागिति क्रोधादेव लयं जगाम
चतुरस्तारागणः सर्वतः ॥ ५००२॥

ENMSS@5003@1आभोगः स्तनयोर्महत्यतिमहान् मुक्तास्रजं भासुरो माहात्म्यावहितप्रभूतसुमनोबाणोऽपि तेऽन्तः स्थितः ।

ENMSS@5003@2भालं स्वच्छविरोचनं बलिरसावप्यास्त एवोदरे रोम्णां विक्रियया युवत्वभवया विन्ध्यावली वर्तते ॥ ५००३॥

ENMSS@5004@1आभोगभूषणवती कुचकुम्भसंपद् अन्तर्विकारमधुराणि विलोकितानि ।

ENMSS@5004@2अङ्गान्यनङ्गपिशुनानि कुलाङ्गनानां धीरात्मनामपि मनः परितापयन्ति ॥ ५००४॥

ENMSS@5005@1आभोगश्चैकखण्डः स्याद् द्वितीयं चोच्चखण्डकम् ।

ENMSS@5005@2तुल्यनामाङ्कितं चैतद् इति मध्यमलक्षणम् ॥ ५००५॥

ENMSS@5006@1आभोगिनः किमपि सम्प्रति वासरान्ते संपन्नशालिखलपल्लवितोपशल्याः ।
ENMSS@5006@2ग्रामास्तुषारभरबन्धुरगोमयाग्नि- धूमावलीवलयमेखलिनो हरन्ति ॥ ५००६॥
ENMSS@5007@1आभोगिनेत्रपरिवर्तनविभ्रमेण मूर्त्या नितम्बवलनाकुलतां वहन्त्या ।
ENMSS@5007@2यस्याशनैरविरलोत्कलिकाकलाप- पर्याकुलं हृदयमम्बुनिधिर्ममन्थ ॥ ५००७॥
ENMSS@5008@1आभोगिनौ मण्डलिनौ तत्क्षणोन्मुक्तकञ्चुकौ ।
ENMSS@5008@2वरमाशीविषौ स्पृष्टौ न तु तन्व्याः पयोधरौ ॥ ५००८॥
ENMSS@5009@1आभोगे च पदैकं स्यात् किंचिदुच्चं द्वितीयकम् ।
ENMSS@5009@2प्रभुनामाङ्कितं चैतत् कनिष्ठस्येति लक्षणम् ॥ ५००९॥
ENMSS@5010@1आभ्यन्तराद् भयं रक्षन् सुरक्षेद् बाह्यतो भयम् ।
ENMSS@5010@2आभ्यन्तराद् भयं जातं सद्यो मूलं निकृन्तति ॥ ५०१०॥
ENMSS@5011@1आभ्यां कुचाभ्यामिभकुम्भयोः श्रीर् आदीयतेऽसावनयोर्न ताभ्याम् ।
ENMSS@5011@2भयेन गोपायितमौक्तिकौ तौ प्रव्यक्तमुक्ताभरणाविमौ यत् ॥ ५०११॥
ENMSS@5012@1आमं विपच्यमानं च सम्यक् पक्वं च यो भिषक् ।
ENMSS@5012@2जानीयात् स भवेद् वैद्यः शेषस्तस्करवृत्तयः ॥ ५०१२॥
ENMSS@5013@1आमत्तभ्रमरकुलाकुलानि धुन्वन्न् उद्धूतग्रथितरजांसि पङ्कजानि ।
ENMSS@5013@2कान्तानां गगननदीतरङ्गशीतः संतापं विरमयति स्म मातरिश्वा ॥ ५०१३॥
ENMSS@5014@1आमत्तानां श्रवणसुभगैः कूजितैः कोकिलानां सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
ENMSS@5014@2अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥ ५०१४॥
ENMSS@5015@1आ मध्याह्नं नदीवासः समाजे देवतार्चनम् ।
ENMSS@5015@2सततं शुचिवेषश्चेत्येतद् दम्भस्य जीवितम् ॥ ५०१५॥
ENMSS@5016@1आमन्त्रणजयशब्दैः प्रतिपदहुंकारघर्घरारावैः ।
ENMSS@5016@2स्वयमुक्तसाधुवादैर् अन्तरयति गायनो गीतम् ॥ ५०१६॥
ENMSS@5017@1आमन्त्रणा सुरभिणा मरुता कृतादौ दत्तं फलं च पुरतः कटुकण्टकाख्यम् ।
ENMSS@5017@2भग्नं मुखं विमुखता च ततः शुकानां राज्ञां पुरः पनस कीर्तिरियं

तवैव ॥ ५०१७॥

ENMSS@5018@1आमन्त्रणोत्सवा विप्रा गावो नवतृणोत्सवाः ।

ENMSS@5018@2पत्युत्साहयुता नार्यः अहं कृष्ण रणोत्सवः ॥ ५०१८॥

ENMSS@5019@1आमन्त्र्य तेन देव त्वां तद्वैयर्थ्यं समर्थये ।

ENMSS@5019@2शपथः कर्कशोदर्कः सत्यं सत्योऽपि दैवतः ॥ ५०१९॥

ENMSS@5020@1आमन्थिनीकलश एष सदुग्धसिन्धुर् वेत्रं च वासुकिरयं गिरिरेष मन्थः ।

ENMSS@5020@2संप्रत्युपोढमदमन्थरबाहुदण्ड- कण्डूयनावसर एव सुरासुराणाम् ॥ ५०२०॥

ENMSS@5021@1आमयार्तिरिपुत्रास क्षुदादौ दृष्टवैकृतान् ।

ENMSS@5021@2लब्धोदया ह्रीभयेन क्ष्मापा घ्नन्त्यनुयायिनः ॥ ५०२१॥

ENMSS@5022@1आ मरणादपि विरुतं कुर्वाणाः स्पर्धया सह मयूरैः ।

ENMSS@5022@2किं जानन्ति वराकाः काकाः केकारवं कर्तुम् ॥ ५०२२॥

ENMSS@5023@1आमर्दयति पाणिभ्यां कान्ते कमलकोरके ।

ENMSS@5023@2सिन्दूरतिलके बाला कस्तूरीतिलकं व्यधात् ॥ ५०२३॥

ENMSS@5024@1आमर्द्य वक्षोजयुगं निपीय बिम्बाधरं मे कबरीं व्युदस्य ।

ENMSS@5024@2नीवीसमासन्नकरो निरुद्धः स्वप्ने वयस्योऽद्य रहस्यचेष्टः ॥ ५०२४॥

ENMSS@5025@1आमर्षान् मदनः सद्यो दीप्तश्चेतसि जायते ।

ENMSS@5025@2स वृद्धिं नीयते कामं तस्मिन् द्वेष्येऽपि योषिताम् ॥ ५०२५॥

ENMSS@5026@1आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।

ENMSS@5026@2विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥ ५०२६॥

ENMSS@5027@1आमीलन्नवनीलनीरजतुलामालम्बते लोचनं शैथिल्यं नवमल्लिकासहचरैरङ्गैरपि स्वीकृतम् ।

ENMSS@5027@2आलापादधरः स्फुरत्कलयति प्रेङ्खत्प्रवालोपमाम् आनन्दप्रभवाश्च बाष्पकणिका मुक्ताश्रियं बिभ्रति ॥ ५०२७॥

ENMSS@5028@1आमीलितनयनानां यत् सुरतरसोऽनुसंविदं कुरुते ।

ENMSS@5028@2मिथुनैर्मिथोऽवधारितम् अर्चितमिदमेव कामनिर्वहणम् ॥ ५०२८॥

ENMSS@5029@1आमीलितालसविवर्तिततारकाक्षीम् उत्कण्ठबन्धनदरश्लथबाहुवल्लीम् ।

ENMSS@5029@2प्रस्वेदवारिकणिकाचितगण्डबिम्बां संस्मृत्य तामनिशमेति न शान्तिमन्तः ॥ ५०२९॥

ENMSS@5030@1आमुक्तं हृदि मौक्तिकं मृगदृशां भिल्लै रदोप्याददे लुण्टाकैः

करटेऽवलुण्ठि पिशितं रक्तं न नक्तंचरैः ।

ENMSS@5030@2हे पारीन्द्र करीन्द्रकुम्भदलने भूतो भवानग्रणीः अन्यत्रैव फलोपधानमखिलं हस्ते यशस्ते परम् ॥ ५०३०॥

ENMSS@5031@1आमुक्तपुष्पसुरभीकृतकेशपाशा मुक्तालताप्रहसितस्तनभारखिन्नाः ।

ENMSS@5031@2पुण्येन कान्तधवलायतपक्ष्मलाक्ष्यो दास्यो नृणामुपनमन्ति बलात्तरुण्यः ॥ ५०३१॥

ENMSS@5032@1आमुष्मिकैहिकसुखेच्छुभिरर्चनीयं लिङ्गद्वयं पुररिपोरधिनाभितीर्थम् ।

ENMSS@5032@2प्रेयःकराग्ररुहभावितचन्द्ररेखं मोदाय कस्य कृतिनो न चिराय लोके ॥ ५०३२॥

ENMSS@5033@1आमूलं क्वचिदुद्धृता क्वचिदपि च्छिन्ना स्थली बर्हिषाम् आनम्रा कुसुमोच्चयाच्च सदयाकृष्टाग्रशाखा लता ।

ENMSS@5033@2एते पूर्वविलूनवल्कलतया रूढव्रणाः शाखिनः सद्यच्छेदममी वहन्ति समिधां प्रस्यन्दिनः पादपाः ॥ ५०३३॥

ENMSS@5034@1आमूलकण्टकितकोमलबाहुनालम् आर्द्राङ्गुलीदलमनङ्गनिदाघतप्तः ।

ENMSS@5034@2अस्याः करेण करमाकलयामि कान्तम् आरक्तपङ्कजमिव द्विरदः सरस्याः
॥ ५०३४॥

ENMSS@5035@1आ मूलतो वलितकुन्तलचारुचूड- चूर्णालकप्रकरलाञ्छितभालभागः ।

ENMSS@5035@2कक्षानिवेशनिविडीकृतनीविरेष वेषश्चिरं जयति कुन्तलकामिनीनाम् ॥ ५०३५॥

ENMSS@5036@1आ मूलतो विद्रुमरागताम्रं सपल्लवाः पुष्पचयं दधानाः ।

ENMSS@5036@2कुर्वन्त्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम् ॥ ५०३६॥

ENMSS@5037@1आमूलाग्रं सकलभुवनश्लाघ्यसौरभ्यलीला- खेलः कालागरुतरुवर क्वास्ति धन्यस्त्वदन्यः ।

ENMSS@5037@2दूयेऽप्येवं त्वयि विरचितं वीक्ष्य सङ्गं भुजङ्गैः प्रत्यासीदत्पथिकजनताप्राणघातैकतानैः ॥ ५०३७॥

ENMSS@5038@1आमूलाग्रनिबद्धकण्टकतनुर्निर्गन्धपुष्पोद्गमश् छाया न श्रमहारिणी न च फलं क्षुत्क्षामसंतर्पणम् ।

ENMSS@5038@2बुर्बूरद्रुम साधुसङ्गरहितस्तत्तावदास्तामहो अन्येषामपि शाखिनां

फलवतां गुप्त्यै वृतिर्जायसे ॥ ५०३८॥

ENMSS@5038A@1आ मूलाद् रत्नसानोर्मलयवलयितादा च कूलात् पयोधेर् यावन्तः सन्ति

काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु ।

ENMSS@5038A@2मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभ् आग्यभाजां वाचामाचार्यतायाः

पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ॥

ENMSS@5039@1आमूलान्तात् सायकेनायतेन स्यूते बाहौ मण्डुकश्लिष्टमुष्टेः ।

ENMSS@5039@2प्राप्यासह्यां वेदनामस्तधैर्याद् अप्यभ्रश्यच्चर्म नान्यस्य पाणेः ॥ ५०३९॥

ENMSS@5040@1आ मृत्युतो नैव मनोरथानां अन्तोऽस्ति विज्ञातमिदं मयाद्य ।

ENMSS@5040@2मनोरथासक्तिपरस्य चित्तं न जायते वै परमार्थसङ्गि ॥ ५०४०॥

ENMSS@5041@1आमृद्नन्तस्तम इव सरःसीम्नि संभूय पङ्कं तारासार्थैरिव पतिशुचा

फेनकैः श्लिष्टपादाः ।

ENMSS@5041@2भ्रान्त्यादष्टस्फुटबिसलताचुञ्चुभिश्चञ्चु चक्रैश् चक्रा

बन्दीकृतविरहकृच्चन्द्रलेखा इवैते ॥ ५०४१॥

ENMSS@5042@1आमृद्यन्ते श्वसितमरुतो यत्कुचोत्सेधकम्पैर् अन्तर्ध्यानात् त्रुटति च

दृशोर्यद्बहिर्लक्ष्यलाभः ।

ENMSS@5042@2पक्ष्मोत्क्षेपव्यतिकरहतो यच्च बाष्पस्तदेते भावाश्चण्डि

त्रुटितहृदयं मन्युमावदेयन्ति ॥ ५०४२॥

ENMSS@5043@1आमृशद्भिरभितो वलिवीचीर् लोलमानविततङ्गुलिहस्तैः

ENMSS@5043@2सुभ्रुवामनुभवात् प्रतिपेदे मुष्टिमेयमिति मध्यमभीष्टैः ॥ ५०४३॥

ENMSS@5044@1आमृश्य स्तनमण्डलं प्रतिमुहुः संचुम्ब्य गण्डस्थलीं ग्रीवां

प्रत्यवलम्ब्य संभ्रमबलैराहन्यमानः करैः ।

ENMSS@5044@2सुप्तस्याद्रिनदीनिकुञ्जगहने मत्तः पयोदानिलैः कर्णान्ते मशकः

किमप्यरिवधूसार्थस्य ते जल्पति ॥ ५०४४॥

ENMSS@5045@1आमेरुमलयमुर्वी- वलयमलङ्कृत्य कीर्तिकर्पूरैः ।

ENMSS@5045@2मङ्गलमाप्नुहि नित्यं गुणमय जय जीव यावदादित्यम् ॥ ५०४५॥

ENMSS@5045A@1आमोदं कुमुदाकरेषु विपदं पद्मेषु कालानलं पञ्चेषोर्विशिखेषु

सान्द्रशिशिरक्षारं शशिग्रावसु ।

ENMSS@5045A@2म्लानिं मानवतीमुखेषु विनयं चेतःसु वामभ्रुवां वृद्धिं वार्धिषु

निक्षिपन्नुदयते देवस्तमीकामुकः ॥

ENMSS@5046@1आमोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु ।

ENMSS@5046@2व्यामृष्टपत्रतिलकेषु विलासिनीनां शोभां बबन्ध वदनेषु मदावशेषः ॥ ५०४६॥

ENMSS@5047@1आमोदाहृतभृङ्गपक्षपवनप्रेङ्खद्रजःपिञ्जरे पद्म श्रीर्वसतीति नाद्भुतमिदं रम्यं प्रकृत्यैव तत् ।

ENMSS@5047@2तच्चित्रं यदरातिकण्ठरुधिरप्रक्लिन्नतीक्ष्णस्फुरद्- धारेऽसौ भवतश्चिरं निवसति स्त्रीत्वेऽपि हृष्टा सती ॥ ५०४७॥

ENMSS@5048@1आमोदिना समधुना परिधूसरेण सव्याकुलभ्रमवता पतता पुरस्तात् ।

ENMSS@5048@2आयासितास्मि सखि तेन दिवावसाने मत्तेन किं प्रणयिना न हि केसरेण ॥ ५०४८॥

ENMSS@5049@1आमोदीनि सुमेदुराणि च मृदुस्वादूनि च क्ष्मारुहाम् उद्यानेषु वनेषु लब्धजनुषां सन्तीतरेषामपि ।

ENMSS@5049@2किंतु श्रीफलता तवैव जयिनी मालूर दिङ्मण्डले यस्यैतानि फलानि यौवनवतीवक्षोजलक्ष्मीगृहाः ॥ ५०४९॥

ENMSS@5050@1आमोदेन कदम्बकन्दलभुवा लिम्पन्नशेषं नभः प्रीतिस्फीतमयूरवृन्दनटनप्रस्तावनापण्डितः ।

ENMSS@5050@2अम्भोदप्रथमोदबिन्दुरचनानिर्मृष्टघर्मः शनैर् वायुर्वाति भयंकरः प्रवसतां मेघंकराडम्बरः ॥ ५०५०॥

ENMSS@5051@1आमोदैर्मरुतो मृगाः किसलयोल्लासैस्त्वचा तापसाः पुष्पैः षड्चरणाः फलैः शकुनयो घर्मार्दिताश्छायया ।

ENMSS@5051@2स्कन्धैर्गन्धगजास्त्वयैव विहिताः सर्वे कृतार्थास्ततस् त्वं विश्वोपकृतिक्षमोऽसि भवता भग्नापदोऽन्ये द्रुमाः ॥ ५०५१॥

ENMSS@5052@1आमोदैस्ते दिशि दिशि गतैर्दूरमाकृष्यमाणाः साक्षाल्लक्ष्मीं तव मलयज द्रष्टुमभ्यागताः स्मः ।

ENMSS@5052@2किं पश्यामः सुभग भवतः क्रीडति क्रोड एव व्यालस्तुभ्यं भवतु कुशलं मुञ्च नः साधयामः ॥ ५०५२॥

ENMSS@5053@1आम्नायानामाहान्त्या वाग् गीतीरीतीः प्रीतीर्भीतीः ।

ENMSS@5053@2भोगो रोगो मोदो मोहो ध्येये ध्येच्छे देशे क्षेमे ॥ ५०५३॥

ENMSS@5054@1आम्नायाभ्यसनान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं मेदश्छेदपदानि पूर्तविधयः सर्वे हुतं भस्मनि ।

ENMSS@5054@2तीर्थानामवगाहनानि च गजस्नानं विना यत्पद- द्वन्द्वाम्भोरुहसंस्तुतिं विजयते देवः स नारायणः ॥ ५०५४॥

ENMSS@5055@1अम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः ।
ENMSS@5055@2शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा ॥ ५०५५॥
ENMSS@5056@1आम्रं छित्त्वा कुठारेण निम्बं परिचरेत्तु यः ।
ENMSS@5056@2यश्चैनं पयसा सिञ्चेन् नैवास्य मधुरो भवेत् ॥ ५०५६॥
ENMSS@5057@1आम्र यद्यपि गता दिवसास्ते  पुष्पसौरभफलप्रचुरा ये ।
ENMSS@5057@2हन्त संप्रति तथापि जनानां  छाययैव दलयस्यतितापम् ॥ ५०५७॥
ENMSS@5058@1आम्राः किं फलभारनम्रशिरसो रम्याः किमूष्मच्छिदः  सच्छायाः कदलीद्रुमाः सुरभयः किं पुष्पिताश्चम्पकाः ।
ENMSS@5058@2एतास्ता निरवग्रहोग्रकरभोल्लीढार्धरूढाः पुनः  शम्यो भ्राम्यसि मूढ निर्मरुति किं मिथ्यैव मर्तुं मरौ ॥ ५०५८॥
ENMSS@5059@1आम्राङ्कुरोऽयमरुण-  श्यामलरुचिरस्थिनिर्गतः सुतनु ।
ENMSS@5059@2नवकमठकर्परपुटान्  मूर्धेवोर्ध्वं गतः स्फुरति ॥ ५०५९॥
ENMSS@5060@1आम्रीमञ्जुलमञ्जरीवरशरः सत्किंशुकं यद्धनुर् ज्या यस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
ENMSS@5060@2मत्तेभो मलयानिलः परभृतो यद्वन्दिनो लोकजित्  सोऽयं वो वितरीतरीतु
वितनुर्भद्रं वसन्तान्वितः ॥ ५०६०॥
ENMSS@5061@1आम्रे पल्लविते स्थित्वा कोकिला मधुरस्वरम् ।
ENMSS@5061@2चुकूज कामिनां चित्तम् आकर्षन्तीव दूतिका ॥ ५०६१॥
ENMSS@5062@1आम्रैः क्षेमं भल्ला-  तकैर्भयं पीलुभिस्तथारोग्यम् ।
ENMSS@5062@2खदिरशमीभ्यां दुर्भि-  क्षमर्जुनैः शोभना वृष्टिः ॥ ५०६२॥
ENMSS@5063@1आम्लेन ताम्रशुद्धिः स्याच्छुद्धिः कांस्यस्यभस्मना ।
ENMSS@5063@2संशुद्धी रजसा नार्यास्तटिन्या वेगतः शुचिः ॥ ५०६३॥
ENMSS@5064@1आयं पश्यन् व्ययं कुर्यात् आयादल्पतरं व्ययम् ।
ENMSS@5064@2आयाभावे व्ययं कुर्वन् कुबेरोऽपि विनश्यति ॥ ५०६४॥
ENMSS@5065@1आयताग्रसितरश्मिनिबद्धं  लाञ्छनच्छविमषीरसदिग्धम् ।
ENMSS@5065@2चन्द्रकैतवमरुत्पटचक्रं  क्रीडयोत्सृजति किं स्मरबालः ॥ ५०६५॥
ENMSS@5066@1आयताङ्गुलिरभूदतिरिक्तः  सुभ्रुवां कृशिमशालिनि मध्ये ।
ENMSS@5066@2श्रोणिषु प्रियकरः पृथुलासु  स्पर्शमाप सकलेन तलेन ॥ ५०६६॥
ENMSS@5067@1आयतिं सर्वकार्याणां तदात्वं च विचारयेत् ।
ENMSS@5067@2अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः ॥ ५०६७॥

ENMSS@5068@1आयतीमिव विध्वस्ताम् आज्ञां प्रतिहतामिव ।

ENMSS@5068@2दीप्तामिव दिशं काले पूजामपहतामिव ॥ ५०६८॥

ENMSS@5069@1आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः ।

ENMSS@5069@2अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते ॥ ५०६९॥

ENMSS@5070@1आयत्यां च तदात्वे च यत् स्यादास्वादपेशलम् ।

ENMSS@5070@2तदेव तस्य कुर्वीत न लोकद्विष्टमाचरेत् ॥ ५०७०॥

ENMSS@5071@1आयत्यां प्रतिकारज्ञस्तदात्वे दृढनिश्चयः ।

ENMSS@5071@2अतीते कार्यशेषज्ञो नरोऽर्थैर्न प्रहीयते ॥ ५०७१॥

ENMSS@5072@1आयत्या च जयेदाशाम् अर्थं सङ्गविवर्जनात् ।

ENMSS@5072@2अनित्यत्वेन च स्नेहं क्षुधं योगेन पण्डितः ॥ ५०७२॥

ENMSS@5073@1आयद्वारेषु सर्वेषु कुर्यादाप्तान् परीक्षितान् ।

ENMSS@5073@2आददीत धनं तैस्तु भास्वानुस्रैरिवोदकम् ॥ ५०७३॥

ENMSS@5074@1आयव्ययं सदानुष्णं छेदनं संशयस्य च ।

ENMSS@5074@2अनिशं तस्य च ज्ञानं मन्त्रिणां त्रिविधं फलम् ॥ ५०७४॥

ENMSS@5075@1आयव्ययेऽन्नसंस्कारे गृहोपस्काररक्षणे ।

ENMSS@5075@2शौचेऽग्निकार्ये संयोज्याः रक्षा स्त्रीणामियं स्मृता ॥ ५०७५॥

ENMSS@5075A@1आयव्ययौ यस्य च संविभक्तौ  छन्नश्च चारो निभृतश्च मन्त्रः ।

ENMSS@5075A@2न चाप्रियं मन्त्रिषु यो ब्रवीति  सा सागरान्तां पृथिवीं प्रशास्ति ॥

ENMSS@5076@1आयस्ता कलहं पुरेव कुरुते न स्रंसने वाससो

भुग्नभ्रूरतिखण्ड्यमानमधरं धत्ते न केशग्रहे ।

ENMSS@5076@2अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने  तन्व्या शिक्षित एष

संप्रति पुनः कोपप्रकारोऽपरः ॥ ५०७६॥

ENMSS@5077@1आयस्य तावदपि कर्म करोतु कश्चित्  तेनापि मातरधिकं किमिहानुभाव्यम् ।

ENMSS@5077@2आस्ते सुखं य इह भारतवर्षसीमन्य् आस्ते स किंचिदित उत्तरतोऽपसृत्य ॥ ५०७७॥

ENMSS@5078@1आयस्य तुर्यभागेन व्ययकर्म प्रवर्तयन् ।

ENMSS@5078@2अन्यूनतैलदीपोऽपि चिरं भद्राणि पश्यति ॥ ५०७८॥

ENMSS@5079@1आयाच्चतुर्थभागेन व्ययकर्म प्रवर्तयेत् ।

ENMSS@5079@2प्रभूततैलदीपो हि चिरं भद्राणि पश्यति ॥ ५०७९॥

ENMSS@5080@1आयातं मामपरिचितया वेलया मन्दिरं ते चोरो दण्ड्यस्त्वमिति मधुरं

व्याहरन्त्या भवत्या ।

ENMSS@5080@2मन्दे दीपे मधुलवमुचां मालया मल्लिकानां बद्धं चेतो दृढतरमिदं

बाहुबन्धच्छलेन ॥ ५०८०॥

ENMSS@5081@1आयातं सखि दयितं चिरात् प्रवासात् क्षामाङ्गं तव विरहानलेन तप्तम् ।

ENMSS@5081@2सद्योऽमुं निजमृदुलाङ्गसङ्गदानात् संतृप्तिं नय भव संमुखी

किमेवम् ॥ ५०८१॥

ENMSS@5082@1आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो भृङ्गः स्फूर्जति भैरवो

न निकटं प्राणेश्वरो मुञ्चति ।

ENMSS@5082@2एते सिद्धरसाः प्रसूनविशिखो वैद्योऽनवद्योत्सवो मानव्याधिरयं

कृशोदरि कथं त्वच्चेतसि स्थास्यति ॥ ५०८२॥

ENMSS@5083@1आयातस्ते समीपं तव गुणविमलान् पण्डितो वादकर्ता काव्ये भव्ये हि

रेवाभवविगतरसे रुग्युगे रोगहर्ता ।

ENMSS@5083@2नाहं जाने चिकित्सां सकलगुणनिधे दुर्दरिद्रत्वरोगे

श्रीमद्राजार्जुनेन्द्रप्रबलमपि यते कल्पिता सा चिकित्सा ॥ ५०८३॥

ENMSS@5084@1आयाताः सखि वर्षा वर्षादपि यासु वासरो दीर्घः ।

ENMSS@5084@2दिशि दिशि नीरतरङ्गो नीरतरङ्गो ममापि हृदयेशः ॥ ५०८४॥

ENMSS@5085@1आयाता जलदावली सरभसं विद्युत्समालिङ्गिता शैलानां परितः

सशब्दमहिभुक्श्रेणी नरीनृत्यति ।

ENMSS@5085@2एवं सत्यपि हन्त संप्रति पतिर्देशान्तरं प्रस्थितस् तद् दुःखं

विनिवेद्यतां सखि कथं कस्याधुनाग्रे मया ॥ ५०८५॥

ENMSS@5086@1आयाता मधुयामिनी यदि पुनर्नायात एव प्रभुः प्राणा यान्तु विभावसौ यदि

पुनर्जन्मग्रहं प्रार्थये ।

ENMSS@5086@2व्याधः कोकिलबन्धने विधुपरिध्वंसे च राहुग्रहः कन्दर्पे

हरनेत्रदीधितिरहं प्राणेश्वरे मन्मथः ॥ ५०८६॥

ENMSS@5087@1आयाता मधुरजनी मधुरजनीगीतिहृद्येयम् ।

ENMSS@5087@2अङ्कुरितः स्मरविटपी स्मर विट पीनस्तनीमबलाम् ॥ ५०८७॥

ENMSS@5088@1आयाता रजनी भविष्यति महाविश्लेषदावानलो नोद्वेगः सहसा कृशाङ्गि
मनसा कार्यो रथाङ्गाह्वयः ।
ENMSS@5088@2इत्थं बाष्पनिरुद्धगद्गदतया संभाष्य कोकीं चिरं चिन्तापूर्णमना
विनोदविमुखो हंहो विधिं निन्दति ॥ ५०८८॥
ENMSS@5089@1आयाता रतिनायकस्य विपिनं श्रीराधिकाभ्यागतो दैवादेव हरिश्च तत्र
चतुरश्चेटोऽपि तत्रागमत् ।
ENMSS@5089@2शीघ्रं पर्वतकन्दरोदरगतं लास्यं शिखीनां पुरः पंश्यामीति
हरिं निगद्य शनकैर्गेहं समभ्यागमत् ॥ ५०८९॥
ENMSS@5090@1आयातासि विमुञ्च वेपथुभरं दृष्टासि किं केनचिन् नीलं चोलममुं
विमुञ्च हरतु स्वेदं निशीथानिलः ।
ENMSS@5090@2इत्यन्तर्भयसन्नकण्ठमसकृद् यामीति तल्पातिथिर् त्रस्यन्ती परिरभ्यते
सुकृतिना स्वैरं नवस्वैरिणी ॥ ५०९०॥
ENMSS@5091@1आयाति फुल्लकुसुमः कुसुमागमोऽयम् एषा शशाङ्कतिलका शरदागतेति
।
ENMSS@5091@2बाढं प्रहृष्यति जनो न पुनर्ममैतद् आयुःप्रहीणमिति याति मनोविषादम्
॥ ५०९१॥
ENMSS@5092@1आयाति याति खेदं करोति मधु हरति मधुकरीवान्या ।
ENMSS@5092@2अधिदेवता त्वमेव श्रीरिव कमलस्य मम मनसः ॥ ५०९२॥
ENMSS@5093@1आयाति याति पुनरेव जलं प्रयाति पद्माङ्कुराणि विधुनोति धुनोति पक्षौ ।
ENMSS@5093@2उन्मत्तवद् भ्रमति कूजति मन्दमन्दं कान्तावियोगविधुरो निशि चक्रवाकः
॥ ५०९३॥
ENMSS@5094@1आयाति श्रियमञ्जसा नयनयोरम्भोरुहप्रेयसी संनाहः स्तनयोरयं
कलयते संभोगयोग्यां दशाम् ।
ENMSS@5094@2वैदग्ध्येन सहासिकां वितनुते वाचामियं प्रक्रिया मुग्धायाः पुनरैन्दवीं
न सहते मुख्यामभिख्यां मुखम् ॥ ५०९४॥
ENMSS@5095@1आयाति स्खलितैः पादैर्मुखवैवर्ण्यसंयुतः ।
ENMSS@5095@2ललाटस्वेदभाग् भूरिगद्गदं भाषते वचः ॥ ५०९५॥
ENMSS@5096@1कम्पमानमधोऽवेक्षी पापं प्राप्तः सदा नरः ।

ENMSS@5096@2तस्माद् यत्नात् परिज्ञेयश्चिह्नैरेतैर्विचक्षणैः ॥ ५०९६॥

ENMSS@5097@1आयाति हृष्टोऽभिमुखो यदि श्वा क्रीडां प्रकुर्वन् विलुथंस्तथाग्रे ।

ENMSS@5097@2शीघ्रं तदानीं ध्रुवमध्वगानां भवेत् प्रभूतो धनधान्यलाभः

॥ ५०९७॥

ENMSS@5098@1आयातु यातु खेदं करोतु मधु हरतु चाप्यन्या ।

ENMSS@5098@2अधिदेवता त्वमेव श्रीरिव कमलस्य मम मनसः ॥ ५०९८॥

ENMSS@5099@1आयाते च तिरोहितो यदि पुनर्दृष्टोऽन्यकार्ये रतो वाचि स्मेरमुखो विषण्णवदनः स्वक्लेशवादे मुहुः ।

ENMSS@5099@2अन्तर्वेश्मनि वासमिच्छति भृशं व्याधीति यो भाषते भृत्यानामपराधकीर्तनपरस्तन्मन्दिरं न व्रजेत् ॥ ५०९९॥

ENMSS@5100@1आयाते दयिते मनोरथशतैर्नीत्वा कथंचिद् दिनं गत्वा वासगृहं जडे परिजने दीर्घां कथां कुर्वति ।

ENMSS@5100@2दष्टास्मीत्यभिधाय सत्वरपदं व्याधूय चीनांशुकं तन्वङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमम् ॥ ५१००॥

ENMSS@5101@1आयाते दयिते मरुस्थलभुवामुल्लङ्घ्य दुर्लङ्घ्यतां गेहिन्या परितोषबाष्पतरलामासज्य दृष्टिं मुखे ।

ENMSS@5101@2दत्वा पीलुशमीकरीरकवलान् स्वेनाञ्चलेनादराद् आमृष्टं करभस्य केशरसटाभाराबलग्नं रजः ॥ ५१०१॥

ENMSS@5102@1आयाते रभसाद्यदि प्रियतमे प्रत्युद्गता नो चिरं नो वा मण्डलितोन्नतस्तनतटं गाढं समालिङ्गितः ।

ENMSS@5102@2आश्लिष्य स्वभुजावलम्बमथवा प्रेमार्द्रया नो गिरा संभाव्याभिहितो हतासि

सरले स्वैरेव दुश्चेष्टितैः ॥ ५१०२॥

ENMSS@5103@1आयातेऽर्थिनि गोत्रभिद्यभिमते कर्णोऽमुचत् कुण्डलं कामास्त्रं किल भूरिलोचनयुगं तस्मिन् समासञ्जताम् ।

ENMSS@5103@2नन्वेतत् कुरुनायकस्य हृदयं तस्मात् समाधीयतां संभूतस्तपसोऽत्र यो रतिरसो मापार्थतो हीयताम् ॥ ५१०३॥

ENMSS@5104@1आयाते श्रुतिगोचरं प्रियतमप्रस्थानकाले पुरस् तल्पान्तःस्थितया तदाननमलं दृष्ट्वा चिरं मुग्धया ।

ENMSS@5104@2सोच्छ्वासं दृढमन्युनिर्भरगलद्बाष्पाम्बुधौतं तया स्वं वक्त्रं विनिवेश्य भर्तृहृदये निःशब्दकं रुद्यते ॥ ५१०४॥

ENMSS@5105@1आयातैव निशा निशापतिकरैः कीर्णं दिशामन्तरं भामिन्यो भवनेषु भूषणगणैरङ्गान्यलंकुर्वते ।

ENMSS@5105@2मुग्धे मानमपाकरोषि न मनागद्यापि रोषेण ते हा हा बालमृणालतोऽप्यतितरां तन्वी तनुस्ताम्यति ॥ ५१०५॥

ENMSS@5106@1आयातैव निशा मनो मृगदृशामुन्निद्रमातन्वती मानो मे कथमेष संप्रति निरातङ्कं हृदि स्थास्यति ।

ENMSS@5106@2ऊहापोहमिमं सरोजनयना यावद् विधत्तेतरां तावत् कामनृपातपत्रसुषमं बिम्बं बभासे विधोः ॥ ५१०६॥

ENMSS@5107@1आयातो दयितस्तवेति सहसा न श्रद्दधे भाषितं सद्यः संमुखतां गतेऽपि सुमुखी भ्रान्तिं निजां मन्यते ।

ENMSS@5107@2कण्ठाश्लेषिभुजेऽपि शून्यहृदया स्वप्नान्तरं शङ्कते प्रत्यावृत्तिमियं प्रियस्य कियता प्रत्येतु शातोदरी ॥ ५१०७॥

ENMSS@5108@1आयातो भवतः पितेति सहसा मातुर्निशम्योदितं धूलीधूसरितो विहाय
शिशुभिः क्रीडारसान् प्रस्तुतान् ।

ENMSS@5108@2दूरात् स्मेरमुखः प्रसार्य ललितं बाहुद्वयं बालको नाधन्यस्य पुरः समेति परया प्रीत्या रटद्धर्घरम् ॥ ५१०८॥

ENMSS@5109@1आयातो वनमाली गृहपतिरालि समायातः ।

ENMSS@5109@2स्मर सखि पाणिनिसूत्रं विप्रतिषेधे परं कार्यम् ॥ ५१०९॥

ENMSS@5110@1आयात् त्रिभागतः कुर्याद् व्ययं धर्मपरो नरः ।

ENMSS@5110@2एतदेव हि पाण्डित्यं यदायादल्पको व्ययः ॥ ५११०॥

ENMSS@5111@1आयान्तं गुणिनं दृष्ट्वा प्रहृष्येदाद्रियेत च ।

ENMSS@5111@2गुणिनो ह्यादृता भूयश्चेष्टन्ते तस्य संपदे ॥ ५१११॥

ENMSS@5112@1आयान्तं स्वपतिं दृष्ट्वा भक्षयन्ती सदाखिलम् ।

ENMSS@5112@2परित्यक्ता निजैः पुत्रैर्बान्धवैः स्वजनैस्तथा ॥ ५११२॥

ENMSS@5113@1आयान्तमालोक्य हरिं प्रतोल्याम् आल्याः पुरस्तादनुरागमेका ।

ENMSS@5113@2रोमाञ्चकम्पादिभिरुच्यमानं भामा जुगूह प्रणमन्त्यथैनम् ॥ ५११३॥

ENMSS@5114@1आयान्ति त्वरितं गभीरसरितां कूलेषु भूमीरुहां मूलेषु व्यथिता निदाघपथिकाः कृत्यं तदेषां परम् ।

ENMSS@5114@2यत्पुष्पैरधिवासनं निबिडया यच्छायया पालनं यन्मन्दैरुपवीजनं च पवनैः कृत्यं तदुर्वीरुहाम् ॥ ५११४॥

ENMSS@5115@1आयान्ति यत्र निवसन्ति चिराय चेष्टं निर्यान्ति चैवममिताः सरितो यतोऽमी ।

ENMSS@5115@2देवैर्हृतेषु बहुलेषु मणिष्वपीभ्यो यः पूर्ववत् स जयतादमृतैकभूमिः ॥ ५११५॥

ENMSS@5116@1आयान्ति यान्ति सततं नीरं शिशिरं खरं न गणयन्ति ।

ENMSS@5116@2विघ्नो न हन्त दिवसाः कस्य किमेते करिष्यन्ति ॥ ५११६॥

ENMSS@5117@1आयान्त्यग्रे ननु तनुभवा उत्तमर्णा इवेमे शय्यालग्नाः फणभृत इवाभान्ति दारा इदानीम् ।

ENMSS@5117@2कारागेहप्रतिममधुना मन्दिरं दृश्यते मे तत्र स्थातुं प्रसजति मनो न क्षणं न क्षणार्धम् ॥ ५११७॥

ENMSS@5118@1आयान्त्यां निजयुवतौ वनात् सशङ्कं बर्हाणामपरशिखण्डिनीं भरेण ।

ENMSS@5118@2आलोक्य व्यवदधतं पुरो मयूरं कामिन्यः श्रदधुरनार्जवं नरेषु ॥ ५११८॥

ENMSS@5119@1आयान्त्या दिवसश्रियः पदतलस्पर्शानुभावादिव व्योमाशोकतरोर्नवीनकलिकागुच्छः समुज्जृम्भते ।

ENMSS@5119@2आतन्वन्नवतंसविभ्रममसावाशाकुरङ्गीदृशाम् उन्मीलत्तरुणप्रभाकरकरस्तोमः समुद्भासते ॥ ५११९॥

ENMSS@5120@1आयामिनोस्तदक्ष्णोर् अञ्जनरेखाविधिं वितन्वन्त्याः ।

ENMSS@5120@2पाणिः प्रसाधिकायाः प्रापदपाङ्गं चिरेण विश्रम्य ॥ ५१२०॥

ENMSS@5121@1आयासः परहिंसा वैतंसिकसारमेय तव सारः ।

ENMSS@5121@2त्वामपसार्य विभाज्यः कुरङ्ग एषोऽधुनैवान्यैः ॥ ५१२१॥

ENMSS@5122@1आयासशतलभ्यस्य प्राणेभ्योऽपि गरीयसः ।

ENMSS@5122@2गतिरेकैव वित्तस्य दानं शेषा विपत्तयः ॥ ५१२२॥

ENMSS@5123@1आयासशोकभयदुःखमुपैति मर्त्यो मानेन सर्वजननिन्दितवेषरूपः ।

ENMSS@5123@2विद्यादयादमयमादिगुणांश्च हन्ति ज्ञात्वेति गर्ववशमेति न शुद्धबुद्धिः ॥ ५१२३॥

ENMSS@5124@1आयासश्लथबाहुवल्लिरधिकस्मेरै ।- -।- लोलापाङ्गकपोलपालिरलिकस्तोमार्धलुप्तालका ।

ENMSS@5124@2न्यस्यन्ती मदयत्यनावृत इव प्रच्छादनायाञ्चलं मुग्धा

स्वेदनिपीतसूक्ष्मसिचयव्यक्तस्तनी वक्षसि ॥ ५१२४॥

ENMSS@5125@1आयासादलघुतरस्तनैः स्वनद्भिः श्रान्तानामविकचलोचनारविन्दैः ।

ENMSS@5125@2अभ्यम्भः कथमपि योषितां समूहैस् तैरुर्वीनिहितचलत्पदं प्रचेले ॥ ५१२५॥

ENMSS@5126@1आयासानविचिन्तयन्नगणयल्लाभं ततः किंचिदप्य् अम्भो मुञ्चति कीर्तिमात्रशरणो धाराधरः सर्वतः ।

ENMSS@5126@2तद्यत्नादुपयुज्य वर्धयतु वा दातुर्यशः शाश्वतं मौढ्यादेतदुपेक्ष्य नाशयतु वा लोकः प्रमाणं ततः ॥ ५१२६॥

ENMSS@5127@1आयास्य बहुभिर्दुग्धां पीतां वत्सेन सद्गवीम् ।

ENMSS@5127@2सुशिक्षितोऽपि गोपालः प्रयत्नेन दुहीत किम् ॥ ५१२७॥

ENMSS@5128@1आयास्यसि कदा कान्ते मदन्तकमयि प्रभे ।

ENMSS@5128@2इति प्रष्टेन्दुवदनाच्छादयद् वाससा मुखम् ॥ ५१२८॥

ENMSS@5129@1आयास्यस्यवधावपर्यवसिते गत्वेति संभाव्यते संप्राप्ते त्वयि यानि तान्यपि
सुखान्यद्यापरोक्षाणि नः ।

ENMSS@5129@2किंत्वज्ञातवियोगवेदनमिदं सद्यस्त्वयि प्रस्थिते चेतः किं नु करीष्यतीत्यविदितं सम्यङ् न निश्चीयते ॥ ५१२९॥

ENMSS@5130@1आयास्यामि पुनस्तवान्तिकमहं यामे व्यतीते प्रियेत्य् उक्त्वा पङ्कजलोचना सरभसं कान्ता समाजं ययौ ।

ENMSS@5130@2जाते क्वापि च सीञ्जते किमु समायातेति मार्गं मुहुर् दर्शं दर्शमथो मया निशि मनाग् लब्धो न निद्रारसः ॥ ५१३०॥

ENMSS@5131@1आयुः कर्म च वित्तं च विद्या निधनमेव च ।

ENMSS@5131@2पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ ५१३१॥

ENMSS@5132@1आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीर् अर्थाः संकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूराः ।

ENMSS@5132@2कण्ठाश्लेषोपगूढं तदपि च न चिरं यत् प्रियाभिः प्रणीतं ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥ ५१३२॥

ENMSS@5133@1आयुःप्रश्ने दीर्घमायुर्वाच्यं मौहूर्तिकैर्जनैः ।

ENMSS@5133@2जीवन्तो बहु मन्यन्ते मृताः प्रक्ष्यन्ति कं पुनः ॥ ५१३३॥

ENMSS@5134@1आयुः श्रियं यशो धर्मं लोकानाशिष एव च ।

ENMSS@5134@2हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥ ५१३४॥

ENMSS@5135@1आयुः श्रीः कीर्तिरैश्वर्यम् आशिषः पुरुषस्य याः ।
ENMSS@5135@2भवन्त्येव हि तत्काले यथानिच्छोर्विपर्यायाः ॥ ५१३५॥
ENMSS@5136@1आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
ENMSS@5136@2रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ५१३६॥
ENMSS@5137@1आयुःसारं युअवनम्  ऋतुसारः कुसुमसायकवयस्यः ।
ENMSS@5137@2सुन्दरि जीवितसारो  रतिभोगरसामृतस्वादः ॥ ५१३७॥
ENMSS@5138@1आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात् ।
ENMSS@5138@2पृथिवीपतिलोभाच्च प्रजानां पञ्चधा भयम् ॥ ५१३८॥
ENMSS@5139@1आयुधानां धनुः श्रेष्ठम् आसनानां च मेदिनी ।
ENMSS@5139@2फलानां चाम्रवृक्षस्य देवानां च महेश्वरः ॥ ५१३९॥
ENMSS@5140@1आयुर्घृते गुडे रोगा नित्यं मृत्युर्विदाहिषु ।
ENMSS@5140@2आरोग्यं कटुतिक्तेषु बलं माषे पयस्तु च ॥ ५१४०॥
ENMSS@5141@1आयुर्दानमहोत्सवस्य विनतक्षोणीभृतां मूर्तिमान्  विश्वासो नयनोत्सवो मृगदृशां कीर्तेः प्रकाशः परः ।
ENMSS@5141@2आनन्दः कलिताकृतिः सुमनसां वीरश्रियो जीवितं  धर्मस्यैव निकेतनं विजयते वीरः कलिङ्गेश्वरः ॥ ५१४१॥
ENMSS@5142@1आयुर्दीर्घतरं वपुर्वरतरं गोत्रं गरीयस्तरं  वित्तं भूरितरं बलं बहुतरं स्वामित्वमुच्चैस्तरम् ।
ENMSS@5142@2आरोग्यं विगतान्तरं त्रिजगति श्लाघ्यत्वमल्पेतरं  संसाराम्बुनिधिं करोति सुतरं चेतः कृपार्द्रान्तरम् ॥ ५१४२॥
ENMSS@5143@1आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं  प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।
ENMSS@5143@2लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं  यस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ ५१४३॥
ENMSS@5144@1आयुर्नीरतरङ्गभङ्गुरमिति ज्ञात्वा सुखेनासितं  लक्ष्मीः स्वप्नविनश्वरीति सततं भोगेषु बद्धा रुचिः ।
ENMSS@5144@2अभ्रस्तम्बविडम्बि यौवनमिति प्रेम्णावगूढाः स्त्रियो  यैरेवात्र विमुच्यते भवरसात् तैरेव बद्धो जनः ॥ ५१४४॥
ENMSS@5145@1आयुर्बलं विपुलमस्तु सुखित्वमस्तु  कल्याणमस्तु विपुला तव कीर्तिरस्तु ।
ENMSS@5145@2श्रीरस्तु धर्ममतिरस्तु रिपुक्षयोऽस्तु

संतानवृद्धिरभिवाञ्छितसिद्धिरस्तु ॥ ५१४५॥

ENMSS@5146@1आयुर्यशो बलं वित्तम् आकाङ्क्षद्भिः प्रियाणि च ।

ENMSS@5146@2पितैवाराधनीयोऽग्रे दैवतं हि पिता महत् ॥ ५१४६॥

ENMSS@5147@1आयुर्लेखा पवनचलनाश्लिष्टदीपोपमेया  संपच्चैषा मदवशचलत्कामिनीदृष्टिलोला ।

ENMSS@5147@2तीव्रश्चान्तर्दहति हृदयं विप्रयोगः प्रियेभ्यस् तस्मादेतत् सततममलं ब्रह्म शान्तं प्रपन्नाः ॥ ५१४७॥

ENMSS@5148@1आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं  तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।

ENMSS@5148@2शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते  जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥ ५१४८॥

ENMSS@5149@1आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं हृतं  तस्यार्धस्य च किंचिदेव जरया बाल्येन किंचिद् हृतम् ।

ENMSS@5149@2किंचिद् व्याधिवियोगदुःखमरणैर्भूपालसेवारसैर् नष्टं शिष्टमतस्तरङ्गतरलं पुंसां सुखं क्व क्षणे ॥ ५१४९॥

ENMSS@5150@1आयुर्वायुचलं सुरेश्वरधनुर्लोलं बलं यौवनं  विद्युद्वच्चपलं धनं गिरिनदीकल्लोलवच्चञ्चलम् ।

ENMSS@5150@2तारुण्यं करिकर्णतालतरलं देहं च रोगाकुलं  ज्ञात्वा सर्वमिदं कुरुध्वममलं धर्मं सदा निश्चलम् ॥ ५१५०॥

ENMSS@5151@1आयुर्वायुव्यथितनलिनीपत्रमित्रं किमन्यत्  संपच्छम्पाद्युतिसहचरी स्वैरचारी कृतान्तः ।

ENMSS@5151@2कस्मादस्मिन् भ्रमसि तमसि त्वं प्रयाहि प्रयागं  पौनःपुन्यं भुवि भगवती स्वर्धुनी ते धुनीते ॥ ५१५१॥

ENMSS@5152@1आयुर्वासरमासवत्सरगणे गच्छत्यदूरं पथैर् आक्रामन्ति कृतान्तकासरखुरक्षुण्णा रजोराजयः ।

ENMSS@5152@2ईषल्लङ्घितशैशवा इति वयःसंधिं दधाना इति  व्यक्ता वर्जितयौवना इति तथा नन्दन्ति तन्द्रालवः ॥ ५१५२॥

ENMSS@5153@1आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।

ENMSS@5153@2अपमानं तपो दानं नव गोप्यानि यत्नतः ॥ ५१५३॥

ENMSS@5154@1आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।

ENMSS@5154@2दानमानापमानं च नवैतानि सुगोपयेत् ॥ ५१५४॥

ENMSS@5155@1आयुर्वृद्धिक्षयोत्कर्षहेतुं कालविनिर्गतम् ।

ENMSS@5155@2वाञ्छतां धनिनामिष्टं जीवितात् परमं धनम् ॥ ५१५५॥

ENMSS@5156@1आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः ।

ENMSS@5156@2आर्यशीलगुणोपेत एष वैद्यो विधीयते ॥ ५१५६॥

ENMSS@5157@1आयुर्वेदमधीयानाः केवलं सपरिग्रहम् ।

ENMSS@5157@2दृश्यन्ते बहवो वैद्या व्याधिभिः समभिप्लुताः ॥ ५१५७॥

ENMSS@5158@1आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः ।

ENMSS@5158@2स चेन्निरर्थकं नीतः का नु हानिस्ततोऽधिका ॥ ५१५८॥

ENMSS@5159@1आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः ।

ENMSS@5159@2स वृथा नीयते येन तस्मै नृपशवे नमः ॥ ५१५९॥

ENMSS@5160@1आयुषः क्षण एकोऽपि सर्वरत्नैर्न लभ्यते ।

ENMSS@5160@2नीयते यद् वृथा सोऽपि प्रमादः सुमहानयम् ॥ ५१६०॥

ENMSS@5161@1आयुष्मान् प्राङ्मुखो भुञ्जात् धनवान् दक्षिणामुखः ।

ENMSS@5161@2पश्चिमे तु यशस्वी स्यान् न कदाचिदुदङ्मुखः ॥ ५१६१॥

ENMSS@5162@1आयुष्यं सर्वथा रक्ष्यं प्राणिनामिह धीमता ।

ENMSS@5162@2अप्यल्पगुणसंपन्नो जीवन् भद्राणि पश्यति ॥ ५१६२॥

ENMSS@5163@1आयुस्तडिच्चलमपायि शरीरमेतन् मृत्युर्ग्रसिष्यति कदेति न कोऽपि वेद ।

ENMSS@5163@2अद्यैव तद् भजत मुक्तिपथं द्विजेन्द्रा ज्येष्ठागमावधि हि तिष्ठति किं न दर्शः ॥ ५१६३॥

ENMSS@5164@1आयुस्ते कियदस्ति तत्र च कियत् तारुण्यमत्रापि वाप्य् अर्धं निर्गिलितं

निशात्मकतया यत्रास्ति सङ्गो न ते ।

ENMSS@5164@2शेषाः सन्ति कति क्षणाः प्रणयजस्तत्रापि कोपो यदि व्यर्थं निश्चिनु चक्रवाकि जननं कस्ते हितं वक्ष्यति ॥ ५१६४॥

ENMSS@5165@1आयुस्ते नरवीर वर्धतु सदा हेमन्तरात्रिर्यथा लोकानां प्रियवर्धनो भव सदा हेमन्तसूर्यो यथा ।

ENMSS@5165@2लोकानां भयवर्धनो भव सदा हेमन्ततोयं यथा नाशं यान्तु तवारयोऽपि सततं हेमन्तपद्मं यथा ॥ ५१६५॥

ENMSS@5166@1आयूंषि क्षणिकानि यौवनमपि प्रायो जराध्यासितं संयोगा विरहावसानविरसा भोगाः क्षणध्वंसिनः ।

ENMSS@5166@2जानन्तोऽपि यथाव्यवस्थितमिदं लोकाः समस्तं जगच् चित्रं यद्

गुरुगर्वभावितधियः क्रुध्यन्ति माद्यन्ति च ॥ ५१६६॥

ENMSS@5167@1आयूरेखां चकारास्याः करे द्राघीयसीं विधिः ।

ENMSS@5167@2शौण्डीर्यगर्वनिर्वाहप्रत्याशां च मनोभुवः ॥ ५१६७॥

ENMSS@5168@1आये व्यये तथा नित्यं त्यक्तलज्जस्तु वै भवेत् ।

ENMSS@5168@2न कुश्चितेन गूढेन नित्यं प्रावरणादिभिः ॥ ५१६८॥

ENMSS@5169@1आयोधने कृष्णगतिं सहायम् अवाप्य यः क्षत्रियकालरात्रिम् ।

ENMSS@5169@2धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसाराम् ॥ ५१६९॥

ENMSS@5170@1आरक्ततामेति मुखं जिह्वा वा श्यामतां यदा ।

ENMSS@5170@2तदा प्राज्ञो विजानीयान् मृत्युमासन्नमात्मनः ॥ ५१७०॥

ENMSS@5171@1आरक्तदीर्घनयनो नयनाभिरामः कन्दर्पकोटिललितं वपुरादधानः ।

ENMSS@5171@2भूयात् स मेऽद्य हृदयाम्बुरुहाधिवर्ती वृन्दाटवीनगरनागरचक्रवर्ती ॥ ५१७१॥

ENMSS@5172@1आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः ।

ENMSS@5172@2कोपाद् अन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥ ५१७२॥

ENMSS@5173@1आरक्ताङ्कुरदन्तुरा कमलिनी नायामिनी यामिनी स्तोकोन्मुक्ततुषारमम्बरमणेरीषत् प्रगल्भं महः ।

ENMSS@5173@2अप्येते सहकारसौरभमुचो वाचालिताः कोकिलैर् आयान्ति प्रियविप्रयुक्तयुवतीमर्मच्छिदो वासराः ॥ ५१७३॥

ENMSS@5174@1आरक्तानां नवमधु शनैरापिबन् पद्मिनीनां कालोन्निद्रे कुवलयवने घूर्णमानः सलीलम् ।

ENMSS@5174@2स्विन्नो दानैर्विपिनकरिणां सौम्य सेविष्यते त्वाम् आमोदानामहमहमिकामादिशन् गन्धवाहः ॥ ५१७४॥

ENMSS@5175@1आरक्तायतपुष्पबाणनयने स्निग्धाञ्जनश्यामिकां काश्मीरारुणकर्णिकारकुसुमोत्तंसे महानीलताम् ।

ENMSS@5175@2उन्मीलत्तिलकान्तरे मृगमदक्षोदार्द्रबिन्दूपमां धत्ते मुग्धतमालकान्तिमधुपीवृन्दं वसन्तश्रियः ॥ ५१७५॥

ENMSS@5176@1आरक्तैर्नवपल्लवैर्विटपिनो नेत्रोत्सवं तन्वते तान् धुन्वन्नयमभ्युपैति मधुरामोदो मरुद्दक्षिणः ।

ENMSS@5176@2तेनालिङ्गितमात्र एव विधिवत् प्रादुर्भवन्निर्भर- क्रीडाकूतकषायितेन मनसा लोकोऽयमुन्माद्यते ॥ ५१७६॥

ENMSS@5177@1आरण्यास्तु स्वकैः कुर्युः सार्थिकाः सार्थिकैः सह ।

ENMSS@5177@2सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः ॥ ५१७७॥
ENMSS@5178@1आरब्धमब्धिमथनं स्वहस्तयित्वा द्विजिह्वममरैर्यत् ।
ENMSS@5178@2उचितस्तत्परिणामो विषमं विषमेव यज्ञातम् ॥ ५१७८॥
ENMSS@5179@1आरब्धा किमु केतकीकिसलयैर्माला किमायामिनी कर्पूरस्य परंपरा मलयजक्षोदस्य लेखाथवा ।
ENMSS@5179@2धारा वैबुधसैन्धवी नु विसयत्याहो हिमानीमयी वृष्टिः पञ्चशरस्य तावकदृशोर्भङ्गी कथं गीयते ॥ ५१७९॥
ENMSS@5180@1आरब्धा मकरध्वजस्य धनुषैतस्यास्तनुर्वेधसा त्वद्विश्लेषविशेषदुर्बलतया जाता न तावद्धनुः ।
ENMSS@5180@2तत् संप्रत्यपि रे प्रसीद किमपि प्रेमामृतस्यन्दिनीं दृष्टिं नाथ विधेहि सा रतिपतेः शिञ्जापि सम्जायताम् ॥ ५१८०॥
ENMSS@5181@1आरब्धे दयितामुखप्रतिसमे निर्मातुमस्मिन्नपि व्यक्तं जन्मसमानकालमिलितामंशुच्छटां वर्षति ।
ENMSS@5181@2आत्मद्रोहिणि रोहिणीपरिवृढे पर्यङ्कपङ्केरुहः संकोचादतिदुःस्थितस्य न विधेस्तच्छिल्पमुन्मीलितम् ॥ ५१८१॥
ENMSS@5182@1आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये घटे ।
ENMSS@5182@2राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भो विस्मयः ॥ ५१८२॥
ENMSS@8183@1आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च ।
ENMSS@8183@2महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥ ८१८३॥
ENMSS@5184@1आरभेत नरः कर्म स्वपौरुषमहापयन् ।
ENMSS@5184@2निष्पत्तिः कर्मणो दैवे पौरुषे च व्यवस्थिता ॥ ५१८४॥
ENMSS@5185@1आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः ।
ENMSS@5185@2कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥ ५१८५॥
ENMSS@5186@1आरभ्यते महत्कार्यं यैः क्षुद्रैरपि पार्थिवैः ।
ENMSS@5186@2ते चक्रवर्तिनो भूत्वा जायन्ते भद्रभाजनम् ॥ ५१८६॥
ENMSS@5187@1आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
ENMSS@5187@2दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥ ५१८७॥
ENMSS@5188@1आरम्भरतिताऽधैर्यम् असत्कार्यपरिग्रहः ।
ENMSS@5188@2विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥ ५१८८॥

ENMSS@5189@1आरम्भरमणीयानि विमर्दे विरसानि च ।
ENMSS@5189@2प्रायो वैरावसानानि संगतानि खलैः सह ॥ ५१८९॥
ENMSS@5190@1आरात् कारीषवह्नेः प्रविरचिततृणप्रस्तरान्तर्निषण्णैः
संशीर्णग्रन्थिकन्थाविवरवशविशच्छीतवाताभिभूतैः ।
ENMSS@5190@2नीताः कृच्छ्रेण पान्थैः श्वभिरिव निविडं जानुसंकोचकुब्जैर्
अन्तर्दुर्वारदुःखद्विगुणतरकृतायामयामास्त्रि यामाः ॥ ५१९०॥
ENMSS@5191@1आरादसौ तरुवरस्तव कुन्तलानाम् आकल्पमात्मकुसुमैरभियाचमानः
।
ENMSS@5191@2भूयः समाह्वयति या कलकण्ठनादैर् आरोहभारमृदुगामिनि तत्र यामः
॥ ५१९१॥
ENMSS@5192@1आराद्धं किमु दैवतं कुवलयैस्तेपे तपश्चन्द्रमाः किं नामायमिदं
च काञ्चनरुचां किं भाग्यमुज्जृम्भते ।
ENMSS@5192@2दैवं वाद्य किमानुकूलिकमभूद् बालप्रवालश्रियाम् अस्याः स्मेरदृशो
दधत्यवयवौपम्यं यदेतान्यपि ॥ ५१९२॥
ENMSS@5193@1आराद्धो मूर्द्धभिर्यत् तुहिनकरकलालंकृतिर्विंशतिर्यद्
दोष्णामुष्णांशुमित्रं भुवनपरिभवी यत्प्रतापप्ररोहः ।
ENMSS@5193@2यत् तत् कैलासशैलोद्धरणमपि मृषा तत् समस्तं तवाभूत्
बिभ्रल्लुण्टाकलीलां यदपहरसि नः पङ्कजाक्षीं परोक्षे ॥ ५१९३॥
ENMSS@5194@1आराधयति यं देवं तमुत्कृष्टतरं वदेत् ।
ENMSS@5194@2तन्न्यूनतां नैव कुर्याज्ञोषयेत् तस्य सेवनम् ॥ ५१९४॥
ENMSS@5195@1आराधयितुः प्रेम- प्रतीक्षणार्थं स्पृहा परं यासाम् ।
ENMSS@5195@2ता ननु सौभगदेव्यो गणिकाः कृतिनां समाराध्याः ॥ ५१९५॥
ENMSS@5196@1आराधिता हि राजानो देववच्चोपसेविताः ।
ENMSS@5196@2अनुग्रहैर्योजयन्ति भक्तान् घ्नन्ति विपर्यये ॥ ५१९६॥
ENMSS@5197@1आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः ।
ENMSS@5197@2राजानः संप्रसीदन्ति प्रकुप्यन्ति विपर्यये ॥ ५१९७॥
ENMSS@5198@1आराधितो वाप्यपराधितो वा खलः करोत्येव सदापकारम् ।
ENMSS@5198@2मूर्ध्ना धृतो पादतले स्थितो वा दशत्यवश्यं खलु दन्दशूकः ॥
५१९८॥
ENMSS@5199@1आराध्यः पतिरेव तस्य च पदद्वन्द्वानुवृत्तिर्व्रतं केनैताः सखि
शिक्षितासि विपथप्रस्थानदुर्वासनाः ।

ENMSS@5199@2किं रूपेण न यत्र मज्ञति मनो यूनां किमाचार्यकैर्
गूढानङ्गरहस्ययुक्तिषु फलं येषां न दीर्घं यशः ॥ ५१९९॥
ENMSS@5200@1आराध्य दुग्धजलधिः सुधयैव देवान्  देवाय हन्त महते गरलं दिदेश ।
ENMSS@5200@2येषां ध्रुवं प्रकृतिरेव जलाशयानां  नीचेषु सन्मतिरसन्मतिरुत्तमेषु
॥ ५२००॥
ENMSS@5201@1आराध्य भूपतिमवाप्य ततो धनानि  भोक्ष्यामहे किल वयं सततं सुखानि ।
ENMSS@5201@2इत्याशया कलिविमोहितमानसानां  कालः प्रयाति मरणावधिरेव पुंसाम्
॥ ५२०१॥
ENMSS@5202@1आराध्यमानो नृपतिः प्रयत्नाद्  आराध्यते नाम किमत्र चित्रम् ।
ENMSS@5202@2अयं त्वपूर्वः प्रतिमाविशेषो  यः सेव्यमानो रिपुतामुपैति ॥ ५२०२॥
ENMSS@5203@1आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा  वात्याभिः परुषीकृता दश
दिशश्चण्डातपो दुःसहः ।
ENMSS@5203@2एवं धन्वनि चम्पकस्य सकले सम्हारहेतावपि  त्वं सिञ्चन्नमृतेन
तोयद कुतोऽप्याविष्कृतो वेधसा ॥ ५२०३॥
ENMSS@5204@1आरामाभरणस्य पल्लवचयैरापीततिग्मत्विषः  पाथोद प्रशमं
नयागुरुतरोरेतस्य दावज्वरम् ।
ENMSS@5204@2ब्रूमस्त्वामुपकारकातर गतप्रायाः पयःसंपदो  दग्धोऽप्येष तरुर्दिशः
परिमलैरापूर्य निर्वास्यति ॥ ५२०४॥
ENMSS@5205@1आरामुखं क्षुरप्रं च गोपुच्छं चार्धचन्द्रकम् ।
ENMSS@5205@2सूचीमुखं च भल्लं च वत्सदन्तं द्विभल्लकम् ॥ ५२०५॥
ENMSS@5206@1कर्णिकं काकतुण्डं च तयान्यान्यप्यनेकशः ।
ENMSS@5206@2फलानि देशदेशेषु भवन्ति बहुरूपतः ॥ ५२०६॥
ENMSS@5207@1आरामुखेन वै चर्म क्षुरप्रेण च कार्मुकम् ।
ENMSS@5207@2सूचीमुखेन कवचम् अर्धचन्द्रेण मस्तकम् ॥ ५२०७॥
ENMSS@5208@1भल्लेन हृदयं वेध्यं द्विभल्लेन गुणः शरः ।
ENMSS@5208@2लोहं च काकतुण्डेन लक्ष्यं गोपुच्छकेन च ॥ ५२०८॥
ENMSS@5209@1आरामैः सदनैर्हयैर्गजवरैर्गानैः परिक्रीडनैर्
वाद्यैर्यौवनगर्वमञ्जुलतरैर्वृन्दैश्च वामभ्रुवाम् ।

ENMSS@5209@2मुक्तिः स्याद् यदि तद्विहाय सकलं चैतत् प्रवीणा नराः कर्तुं हन्त तपस्तु मुक्तिसुखदं कस्मादरण्यं गताः ॥ ५२०९॥

ENMSS@5210@1आरामोऽयमनर्गलेन बलिना भग्नः समग्रो मयेत्

अन्तःसंभृतहर्षवर्धितमदोदग्रः किमुन्माद्यसि ।

ENMSS@5210@2मातङ्ग प्रतिवर्शमेव भवतो भावी निदाघज्वरस् तत्रापि प्रतिकारमर्हसि सखे सम्यक् समालोचितुम् ॥ ५२१०॥

ENMSS@5211@1आरिप्सुना मन्त्रबलान्वितेन प्रागेव कार्यो निपुणं विचारः ।

ENMSS@5211@2दोष्णां बलान् मन्त्रबलं गरीयः शक्रोऽसुरान् मन्त्रबलाद् विजिग्ये ॥ ५२११॥

ENMSS@5212@1आरिराधयिषुः सम्यग् अनुजीवी महीपतिम् ।

ENMSS@5212@2विद्याविनयशिल्पाद्यैरात्मानमुपपादयेत् ॥ ५२१२॥

ENMSS@5213@1आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।

ENMSS@5213@2योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ५२१३॥

ENMSS@5214@1आरुह्य दूरमगणित- रौद्रक्लेशा प्रकाशयन्ती स्वम् ।

ENMSS@5214@2वातप्रतीच्छनपटी वहित्रमिव हरसि मां सुतनु ॥ ५२१४॥

ENMSS@5215@1आरुह्य नृपतिः पूर्वम् इन्द्रियाश्वान् यशीकृतान् ।

ENMSS@5215@2कामक्रोधादिकाञ् जित्वा रिपून् आभ्यन्तरांश्च तान् ।

ENMSS@5216@1जयेदात्मानमेवादौ विजयायान्यविद्विषाम् ।

ENMSS@5216@2अजितात्मा हि विवशो वशीकुर्यात् कथं परान् ॥ ५२१६॥

ENMSS@5217@1आरुह्य शैलशिखरं त्वद्वदनापहृतकान्तिसर्वस्वः ।

ENMSS@5217@2प्रतिकर्तुमिवोर्ध्वकरः स्थितः पुरस्तान् निशानाथः ॥ ५२१७॥

ENMSS@5218@1आरुह्याक्रीदशैलस्य चन्द्रकान्तस्थलीमिमाम् ।

ENMSS@5218@2नृत्यत्येष लसच्चारुचन्द्रकान्तः शिखावलः ॥ ५२१८॥

ENMSS@5219@1आरूढः पतित इति स्वसंभवोऽपि स्वच्छानां परिहरणीयतामुपैति ।

ENMSS@5219@2कर्णेभ्यश्च्युतमसितोत्पलं वधूनां वीचीभिस्तटमनु यन्निरासुरापः ॥ ५२१९॥

ENMSS@5220@1आरूढक्षितिपालभालविगलत्स्वेदाम्बुसेकोद्धता

भेरीझांकृतिचापटंकृतिचमत्कारोल्लसन्म् आनसा ।

ENMSS@5220@2क्षुभ्यत्क्षोणितलंस्फुरत्खुरपुटं चञ्चच्चलत्केशरं

मन्दभ्रान्तविलोचन प्रतिदिशं नृत्यन्ति वाजिव्रजाः ॥ ५२२०॥

ENMSS@5221@1आरूढवेणुतरुणाधरविभ्रमेण माधुर्यशालिवदनाम्बुजमुद्वहन्ती ।

ENMSS@5221@2आलोक्यतां किमनया वनदेवता वः  कैशोरके वयसि कापि च कान्तियष्टिः

॥ ५२२१॥

ENMSS@5222@1आरूढस्य चितां कृतानुमरणोद्योगप्रियालिङ्गनं

पुण्ड्रेक्षुद्रवपानमुल्बणमहामोहप्रलुप्तस्मृते ः ।

ENMSS@5222@2वीतासोरवतंसमाल्यवलयामोदश्च यादृग् भवेद्  भावानां सुभगः

स्वभावमहिमा निश्चेतसस्तादृशः ॥ ५२२२॥

ENMSS@5223@1आरूढस्वामिकोऽश्वः स्याद् वित्तचिन्तितसिद्धये ।

ENMSS@5223@2सर्वेषां सुरतक्रीडा दृष्टादौ भोगलब्धये ॥ ५२२३॥

ENMSS@5224@1आरूढान्तरयौवनस्य परितो गोष्ठीरनुभ्राम्यतस् तत्तत् तासु मनोगतं

सुनिभृतं संव्याचिकीर्षोर्हरेः ।

ENMSS@5224@2वेगादुच्छलितास्फुटाक्षरदशागर्भास्त्रपागौरवात्  प्रत्यञ्चो वलिता

भवन्तु भवतां कृत्याय वागूर्मयः ॥ ५२२४॥

ENMSS@5225@1आरूढो मलयानिलद्विपवरं युक्तो विलासानुगैः  पीतः

पुष्पविलोचनैर्नवलतापौराङ्गनानां गणैः ।

ENMSS@5225@2अभ्राम्यद् वनपत्तने मधुमहीपालः स्फुरत्कोकिला-

लीलालापमिलद्भ्रमद्भ्रमरिकाझांकारभेरीरवैः ॥ ५२२५॥

ENMSS@5226@1आरूढो वासयष्टिं गृहवलभितले दुष्टमार्जारकेण  क्रूरास्यं ग्रस्यमानः

सकृदपि शनकैर्यद् विचुक्रोश कीरः ।

ENMSS@5226@2गङ्गेति स्वामिनीं स्वामयममरपतेर्लब्धवानासनार्धं  यस्तु

त्रैस्रोतसाम्भः स्पृशति मृशति वा तत्कथां के विदन्तु ॥ ५२२६॥

ENMSS@5227@1आरोग्यं चिरमश्विनी नरपते तोषं शिवः केशवः  कल्याणं तव

सर्वदा शशिरवी प्रोद्दीपनं देवताः ।

ENMSS@5227@2ब्रह्माद्याः सकलाः सुभद्रमवनं गौर्यादयो मातरः  कुर्वाते कुरुते करोति

कुरुतः कुर्वन्ति कुर्वन्तु च ॥ ५२२७॥

ENMSS@5228@1आरोग्यं परमानन्दः सुखमुत्साह एव च ।

ENMSS@5228@2ऐश्वर्यं प्रियसंभोगं विना सर्वं निरर्थकम् ॥ ५२२८॥

ENMSS@5229@1आरोग्यं भास्करादिच्छेच् श्रियमिच्छेद् हुताशनात् ।

ENMSS@5229@2ज्ञानं महेश्वरादिच्छेन् मोक्षमिच्छेज्जनार्दनात् ॥ ५२२९॥

ENMSS@5230@1आरोग्यं भास्करादिच्छेद् धनमिच्छेद् हुताशनात् ।

ENMSS@5230@2महेश्वराज्ज्ञानमिच्छेन् मुक्तिमिच्छेज्जनार्दनात् ॥ ५२३०॥

ENMSS@5231@1आरोग्यं विद्वत्ता  सज्जनमैत्री महाकुले जन्म ।

ENMSS@5231@2स्वाधीनता च पुंसां  महदैश्वर्यं विनाप्यर्थैः ॥ ५२३१॥

ENMSS@5232@1आरोग्यं सौभाग्यं  धनाढ्यता नायकत्वमानन्दः ।

ENMSS@5232@2कृतपुण्यस्य स्यादिह  सदा जयो वाञ्छितावाप्तिः ॥ ५२३२॥

ENMSS@5233@1आरोग्यबुद्धिविनयोद्यमशास्त्ररागाः पञ्चान्तराः पठनसिद्धिगुणा भवन्ति ।

ENMSS@5233@2आचार्यपुस्तकनिवाससहायकर्णा  बाह्यास्तु पञ्च पठनं परिवर्धयन्ति ॥ ५२३३॥

ENMSS@5234@1आरोग्यमानृण्यमविप्रवासः  सद्भिर्मनुष्यैः सह संप्रयोगः ।

ENMSS@5234@2स्वप्रत्यया वृत्तिरभीतवासः  षड् जीवलोकस्य सुखानि राजन् ॥ ५२३४॥

ENMSS@5235@1आरोग्यलक्ष्मीरुपयाति पित्त-  ज्वरातुरं रेणुकषायभाजम् ।

ENMSS@5235@2मा त्वं यथा रत्नकले स्मरार्ता  कृतप्रकोपप्रशमा सखीभिः ॥ ५२३५॥

ENMSS@5236@1आरोढुं वरमौपवाह्यमपहर्तुं सुन्दरी कन्यका  भोक्तुं भोगमुपस्थितं सुखमलंकर्तुं च रत्नैस्तनुम् ।

ENMSS@5236@2सम्नह्यन्त्यमृतान्धसो हि शमिते येनैव हालाहले  स स्वामी मम दैवतं

तदितरो नाम्नापि न म्नायते ॥ ५२३६॥

ENMSS@5237@1आरोपयसि मुधा किं  नाहमभिज्ञा किल त्वदङ्कस्य ।

ENMSS@5237@2दिव्यं वर्षसहस्रं  स्थित्वेति न युक्तमभिधातुम् ॥ ५२३७॥

ENMSS@5238@1आरोपितः पृथुनितम्बतटे तरुण्या  कण्ठे च बाहुलतया निविडं गृहीतः ।

ENMSS@5238@2उत्तुङ्गपीनकुचनिर्भरपीडितोऽयं  कुम्भः करीषदहनस्य फलानि भुङ्क्ते ॥ ५२३८॥

ENMSS@5239@1आरोपिता अपि प्राज्या गुणा लोकेषु पूजितैः ।

ENMSS@5239@2पूजयन्तीह दृष्टान्तः प्रतिमा द्युःसदां ननु ॥ ५२३९॥

ENMSS@5240@1आरोपिता शिलायाम्  अश्मेव त्वं भवेति मन्त्रेण ।

ENMSS@5240@2मग्नापि परिणयापदि  जारमुखं वीक्ष्य हसितैव ॥ ५२४०॥

ENMSS@5241@1आरोप्यतेऽश्मा शैलाग्रं यथा यत्नेन भूयसा ।

ENMSS@5241@2निपात्यते सुखेनाधस्तथात्मा गुणदोषयोः ॥ ५२४१॥

ENMSS@5242@1आरोहणं गोवृषकुञ्जराणां  प्रासादशैलाग्रवनस्पतीनाम् ।

ENMSS@5242@2विष्ठानुलेपो रुधिरं मृतं च  स्वप्नेष्वगम्यागमनं च धन्यम्
॥ ५२४२॥

ENMSS@5243@1आरोहणाय तव सञ्च इवास्ति तत्र  सोपानशोभिवपुरश्मवलिच्छटाभिः
।

ENMSS@5243@2भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धि-  क्षुब्धाचलः
कनककेतकगोत्रगात्रि ॥ ५२४३॥

ENMSS@5244@1आरोहतु गिरिशिखरं  समुद्रमुल्लङ्घ्य यातु पातालम् ।

ENMSS@5244@2विधिलिखिताक्षरमालं  फलति कपालं न भूपालः ॥ ५२४४॥

ENMSS@5245@1आरोहत्यवनीरुहः प्रविशति श्वभ्रं नगैः स्पर्धते  खं व्यालेधि
विचेष्टते क्षितितले कुञ्जोदरे लीय ।

ENMSS@5245@2अन्तर्भ्राम्यति कोटरस्य विरसत्यालम्बते वीरुधः  किं तद् यन्न
करोति
मारुतवशं यातह् कृशानुर्वने ॥ ५२४५॥

ENMSS@5246@1आरोहन्ति सुखासनान्यपटवो नागान् हयांस्तज्जुषस् ताम्बूलाद्युपभुञ्जते
नटविटाः खादन्ति हस्त्यादयः ।

ENMSS@5246@2प्रासादे चटकादयोऽपि निवसन्त्येते न पात्रं स्तुतेः  स स्तुत्यो भुवने
प्रयच्छति कृती लोकाय यह् कामिताम् ॥ ५२४६॥

ENMSS@5247@1आरोहवल्लीभिरिवाम्बुधारा-  राजीभिराभूमिविलम्बिनीभिः ।

ENMSS@5247@2संलक्ष्यते व्योम वटद्रुमाभम्  अम्भोधरश्यामदलप्रकाशम् ॥ ५२४७॥

ENMSS@5248@1आर्जवं चानृशंस्यं च दमश्चेन्द्रियनिग्रहः ।

ENMSS@5248@2एष साधारणो धर्मश्चातुर्वर्ण्येऽब्रवीन् मनुः ॥ ५२४८॥

ENMSS@5249@1आर्जवं प्रतिपद्यस्व पुत्रेषु सततं विभो ।

ENMSS@5249@2इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ॥ ५२४९॥

ENMSS@5250@1आर्जवत्वं चतुर्थं च पञ्चमं धर्ममेव हि ।

ENMSS@5250@2मधुरत्वं ततः प्रोक्तं षष्ठमेव वरानने ॥ ५२५०॥

ENMSS@5251@1आर्जवममलकराणां  विनयो वररत्नमुकुटानाम् ।

ENMSS@5251@2द्यूतं दुर्व्यसनानां  स्त्रीजितता मरुतटीपिशाचानाम् ॥ ५२५१॥

ENMSS@5252@1आर्जवेन धृता दीक्षा या नो दैवं परं प्रति ।

ENMSS@5252@2अत्यन्तमानुषीयाभ्यः पीडाभ्यस्तद्विमोचनम् ॥ ५२५२॥

ENMSS@5253@1आर्जवेन नरं युक्तम् आर्जवात् सव्यपत्रपम् ।

ENMSS@5253@2अशक्तिमन्तं मन्यन्तो धर्षयन्ति कुबुद्धयः ॥ ५२५३॥

ENMSS@5254@1आर्तत्राणपरायणेन करिणा दाहादिमूलेति यद् वाक्यं चक्रधरेण नक्रमुखतो

हाकाररोरीकृतम् ।

ENMSS@5254@2यः स्तम्भे करताडनध्वनिरभूत् कर्णे सुरस्याप्यहो हा कृष्णेति

यदक्षयं स भगवान् पायादपायाज्जगत् ॥ ५२५४॥

ENMSS@5255@1आर्तदुःख्यपरित्राणदुर्गतादि यथाक्रमम् ।

ENMSS@5255@2पात्रमाहुर्दयालूनाम् अलाभे गुणवानिति ॥ ५२५५॥

ENMSS@5256@1आर्तद्रुतस्वरज्ञा विभिन्नदीनप्रभिन्नलघुरौद्राः ।

ENMSS@5256@2निन्द्याः शुभास्तु शब्दाः प्रमुदितपरिपूर्णदृढशान्ताः ॥ ५२५६॥

ENMSS@5257@1आर्तस्य मे प्रणमतो जगदन्तरात्मन् पश्यन् न पश्यसि विभो न शृणोषि

शृण्वन् ।

ENMSS@5257@2दुर्दैवकुम्भजनुषा ननु सांप्रतं मे पीतस्तदीयकरुणावरुणालयोऽपि

॥ ५२५७॥

ENMSS@5258@1आर्ता देवान् नमस्यन्ति तपः कुर्वन्ति रोगिणः ।

ENMSS@5258@2निर्धना दानमिच्छन्ति वृद्धा नारी पतिव्रता ॥ ५२५८॥

ENMSS@5259@1आर्तानामार्तिसंबन्धं प्रीतिविश्रामकारणम् ।

ENMSS@5259@2केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥ ५२५९॥

ENMSS@5260@1आर्तानामिह जन्तूनाम् आर्तिच्छेदं करोति यः ।

ENMSS@5260@2शङ्खचक्रगदाहीनो द्विभुजः परमेश्वरः ॥ ५२६०॥

ENMSS@5261@1आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ।

ENMSS@5261@2मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥ ५२६१॥

ENMSS@5262@1आर्तेषु दीयते दानं शून्यलिङ्गस्य पूजनम् ।

ENMSS@5262@2अनाथप्रेतसंस्कारम् अश्वमेधफलं लभेत् ॥ ५२६२॥

ENMSS@5263@1आर्तेषु विप्रेषु दयान्वितश्च यच्छ्रद्धया स्वल्पमुपैति दानम् ।

ENMSS@5263@2अनन्तपारं समुपैति राजन् यद्दीयते तन्न लभेद् द्विजेभ्यः ॥ ५२६३॥

ENMSS@5264@1आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपापरः ।

ENMSS@5264@2तुल्य एवावयोर्योगः कथं नाथ न पासि माम् ॥ ५२६४॥

ENMSS@5265@1आर्तो वा यदि वा त्रस्तः परेषां शरणागतः ।

ENMSS@5265@2अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना ॥ ५२६५॥

ENMSS@5266@1आर्द्रकीकसमुखः पुरतश्चेद् दृश्यते भवति तच्छुभदः श्वा ।

ENMSS@5266@2चर्म शुष्कमथवास्थि विशुष्कं बिभ्रदेष मरणं विदधाति ॥ ५२६६॥

ENMSS@5267@1आर्द्रमपि स्तनजघनान्- निरस्य सुतनु त्वयैतदुन्मुक्तम् ।
ENMSS@5267@2खस्थमवाप्तुमिव त्वां तपनांशूनंशुकं पिबति ॥ ५२६७॥
ENMSS@5268@1आर्द्रां कण्ठे मुखाब्जस्रजमवनमयत्यम्बिका जानुलम्बां स्थाने कृत्वेन्दुलेखां निबिडयति जटाः पन्नगेन्द्रेण नन्दी ।
ENMSS@5268@2कालः कृत्तिं निबध्नात्युपनयति करे कालरात्रिः कपालं शंभोर्नृत्यावतारे परिषदिति पृथग्व्यापृता वः पुनातु ॥ ५२६८॥
ENMSS@5269@1आर्द्रालक्तकमस्याश् चरणं मुखमारुतेन वीजयितुम् ।
ENMSS@5269@2प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ॥ ५२६९॥
ENMSS@5270@1आर्यकर्मणि रज्यन्ते भूतिकर्माणि कुर्वते ।
ENMSS@5270@2हितं च नाभ्यसूयन्ति पण्डिता भरतर्षभ ॥ ५२७०॥
ENMSS@5271@1आर्यजननिन्दितानां पापैकरसप्रकाशनारीणाम् ।
ENMSS@5271@2एतावानेव गुणो यदभीष्टसमागमो निरावरणः ॥ ५२७१॥
ENMSS@5272@1आर्यजुष्टमिदं वृत्तम् इति विज्ञाय शाश्वतम् ।
ENMSS@5272@2सन्तः परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम् ॥ ५२७२॥
ENMSS@5273@1आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता ।
ENMSS@5273@2स्थौललक्ष्यं च सततम् उदासीनगुणोदयः ॥ ५२७३॥
ENMSS@5274@1आर्यत्वं च चतुर्थं च पञ्चमं धर्ममेव हि ।
ENMSS@5274@2षष्ठं सतीत्वं दृढता सप्तमं साहसोऽष्टमम् ॥ ५२७४॥
ENMSS@5275@1आर्यदेशकुलरूपबलायुर्- बुद्धिबन्धुरमवाप्य नरत्वम् ।
ENMSS@5275@2धर्मकर्म न करोति जडो यः पोतमुज्झति पयोधिगतः सः ॥ ५२७५॥
ENMSS@5276@1आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा ।
ENMSS@5276@2स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते ॥ ५२७६॥
ENMSS@5276@3भर्तुर्भाग्यं तु भार्यैका प्राप्नोति पुरुषर्षभ ॥ ५२७६॥
ENMSS@5277@1आर्यानङ्ग महाव्रतं विदधता विन्ध्यानिलैः पारणां कृत्वा साङ्गमकारि केन मुरलाकूले कठोरं तपः ।
ENMSS@5277@2येनास्या रतिखेदमेदुरमृदुश्वासाधिवासस्पृशः पीयन्तेऽधरसीधवो विहसितज्योत्स्नोपदंशं रहः ॥ ५२७७॥
ENMSS@5278@1आर्या मुखे तु चपला तथापि चर्या न मे यतः सा तु ।
ENMSS@5278@2दक्षा गृहकृत्येषु त- था दुःखे भवति दुःखार्ता ॥ ५२७८॥
ENMSS@5279@1आर्ये कर्मणि युञ्जानः पापे वा पुनरीश्वरः ।

ENMSS@5279@2व्याप्य भूतानि चरते न चायमिति लक्ष्यते ॥ ५२७९॥

ENMSS@5280@1आर्येण सुकरं ह्याहुर्यार्यकर्म धनंजय ।

ENMSS@5280@2अनार्यकर्म त्वार्येण सुदुष्करतरं भुवि ॥ ५२८०॥

ENMSS@5281@1आलक्ष्य दन्तमुकुलान् अनिमित्तहासैर् अव्यक्तवर्णरमणीयवचः प्रवृत्तीन् ।

ENMSS@5281@2अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥ ५२८१॥

ENMSS@5282@1आ लङ्कानाथनारीस्तनतरलपयोवीचिमुद्रात् समुद्राद् आ स्वर्गङ्गातरङ्गावलिविरलशिलादुस्तरादुत्तराद्रेः ।

ENMSS@5282@2आ प्राक्षैलासुरस्त्रीसुरतगतिविदो मग्नभास्वन्मृगाङ्काद् आ च प्राचेतसाब्धेर्भवतु मम पुरः कोऽपि यद्यस्ति वीरः ॥ ५२८२॥

ENMSS@5283@1आलपति पिकवधूरिव पश्यति हरिणीव चलति हंसीव ।

ENMSS@5283@2स्फुरति तडिल्लतिकेव स्वदते तुहिनांशुलेखेव ॥ ५२८३॥

ENMSS@5284@1आलप यथा यथेच्छसि युक्तं तव कितव किमपवारयसि ।

ENMSS@5284@2स्त्रीजातिलाञ्छनमसौ जीवितरङ्का सखी सुभग ॥ ५२८४॥

ENMSS@5285@1आलम्बिहेमरशनाह् स्तनसक्तहाराः कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।

ENMSS@5285@2मासे मधौ मधुरकोकिलभृङ्गनादैर् नार्यो हरन्ति हृदयं प्रसभं नराणाम् ॥ ५२८५॥

ENMSS@5286@1आलम्बे जगदालम्बे हेरम्बचरणाम्बुजे ।

ENMSS@5286@2शुष्यन्ति यद्रजः स्पर्शात् सद्यः प्रत्यूहवार्धयः ॥ ५२८६॥

ENMSS@5287@1आलम्ब्याङ्गणवाटिकापरिसरे स्वेच्छानतां शाखिकां केयूरीभवदल्पशेषवलया बाला समस्तं दिनम् ।

ENMSS@5287@2सा दैवोपहृतस्य मूढमनसो भग्नावधेरद्य मे पन्थानं विवृताश्रुणा वदनकेनालोक्य किं वक्ष्यति ॥ ५२८७॥

ENMSS@5288@1आलम्भ्याङ्गणवापिकापरिसरे चूतद्रुमे मञ्जरीं सर्पत्सान्द्रपरागलम्पटरणद्भृङ्गाङ्गनाशोभिनीम् ।

ENMSS@5288@2मन्ये स्वां तनुमुत्तरीयशकलेनाच्छाद्य बाला स्फुरत्- कण्ठध्वाननिरोधकम्पितकुचश्वासोद्गमा रोदिति ॥ ५२८८॥

ENMSS@5289@1आलवाले स्थितं तोयं शोषं न भजते यदा ।

ENMSS@5289@2अजीर्णं तद् विजानीयान् न देयं तादृशे जलम् ॥ ५२८९॥

ENMSS@5290@1आलस्यं कुरु पापकर्मणि भव क्रूरः क्रुधस्ताडने नैष्ठुर्यं भज

लोभमोहविषये निद्रां समाधौ हरेः ।

ENMSS@5290@2जाड्यं गच्छ परापवादकथने द्रोहं विधेहि स्मरे  दोषा एव गुणत्वमेवमखिला यास्यन्ति चेतस्तव ॥ ५२९०॥

ENMSS@5291@1आलस्यं प्रथमं पश्चाद् व्याधिपीडा प्रजायते ।

ENMSS@5291@2प्रमादः संशयस्थाने चित्तस्येहानवस्थितिः ॥ ५२९१॥

ENMSS@5292@1आलस्यं मदमोहौ च चापलं गोष्ठिरेव च ।

ENMSS@5292@2स्तब्धता चाभिमानित्वं तथात्यागित्वमेव च ।

ENMSS@5292@3एते वै सप्त दोषास्तु सदा विद्यार्थिनां मताः ॥ ५२९२॥

ENMSS@5293@1आलस्यं यदि न भवेज्जगत्यनर्थः  को न स्याद् बहुधनको बहुश्रुतो वा ।

ENMSS@5293@2आलस्यादियमवनिः ससागरान्ता  संपूर्णा नरपशुभिश्च निर्धनैश्च ॥ ५२९३॥

ENMSS@5294@1आलस्यं स्त्रीसेवा  सरोगता जन्मभूमिवात्सल्यम् ।

ENMSS@5294@2संतोषो भीरुत्वं  षड् व्याघाता महत्त्वस्य ॥ ५२९४॥

ENMSS@5295@1आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां  मूकत्वं मितभाषितां वितनुते मौग्ध्यं भवेदार्जवम् ।

ENMSS@5295@2पात्रापात्रविचारभावविरहो यच्छत्युदारात्मतां  मातर्लक्ष्मि तव प्रसादवशतो दोषा अपि स्युर्गुणाः ॥ ५२९५॥

ENMSS@5296@1आलस्यं हरति प्रज्ञां धनमायुर्यशो बलम् ।

ENMSS@5296@2यस्मिन्नास्ते तदालस्यं सर्वदोषाकरस्तु सः ॥ ५२९६॥

ENMSS@5297@1आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।

ENMSS@5297@2नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥ ५२९७॥

ENMSS@5298@1आलस्यमपि पारीन्द्रं प्रतिपद्य विजृम्भते ।

ENMSS@5298@2हतभागं प्रयत्नोऽपि प्रतिहन्यत एव हा ॥ ५२९८॥

ENMSS@5299@1आलस्यात् सुसहायोऽपि न गच्छत्युदयं जनः ।

ENMSS@5299@2हस्ताग्रास्फालितो भूमौ तोयार्द्र इव कन्दुकः ॥ ५२९९॥

ENMSS@5300@1आलस्येन हता विद्या परहस्तगताः स्त्रियः ।

ENMSS@5300@2अल्पबीजं हतं क्षेत्रं हतं सैन्यमनायकम् ॥ ५३००॥

ENMSS@5301@1आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः  पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः ।

ENMSS@5301@2संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो  राजन् राजति

वीरवैरिवनितावैधव्यदस्ते भुजः ॥ ५३०१॥

ENMSS@5302@1आलानत्वरुषेवैता दन्तिभिर्वृक्षपङ्क्तयः ।

ENMSS@5302@2स्फुरत् कटकटारावं पात्यन्ते कृतचित्कृतैः ॥ ५३०२॥

ENMSS@5303@1आलानमुन्मूल्य सुखाभिधानं तारुण्यनागे गमनोद्यतेऽस्मिन् ।

ENMSS@5303@2पलायिते कामिगणेऽङ्गनानां विमर्दभीत्येव कुचाः पतन्ति ॥ ५३०३॥

ENMSS@5304@1आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।

ENMSS@5304@2हृदये गृह्यते नारी यदीदं नास्ति गम्यताम् ॥ ५३०४॥

ENMSS@5305@1आलापं कलकण्ठिका न कुरुते कीरा न धीरध्वनिं व्याहारं कलयन्ति

कोमलगिरः कूजन्ति नो बर्हिणः ।

ENMSS@5305@2नीराडम्बरदुर्दिनाम्बरतले दूरे द्विरेफध्वनिः काकाः केवलमेव

केङ्कृतरवैः कुर्वन्ति कर्णज्वरम् ॥ ५३०५॥

ENMSS@5306@1आलापः स्मितकौमुदीसहचरो दृष्टिः प्रहर्षोज्ज्वला

भ्रूर्नृत्याध्वरदीक्षिता चरणयोर्न्यासः समे भङ्गुरः ।

ENMSS@5306@2वेशेषु क्षणिकस्पृहा मदविधेर्बन्धो न वादाश्रयस् तन्व्या

नैकविकारभूर्मधुमदप्रायो मदः स्फूर्जति ॥ ५३०६॥

ENMSS@5307@1आलापमालिनिकरस्य निशम्य भीता मुग्धा विलोक्य वदनं मुकुरं जहाति ।

ENMSS@5307@2मन्दं न निश्वसिति मन्मथवेदनार्ता कीरेन्दु मारुत भयात् किमु मन्न

भूप ॥ ५३०७॥

ENMSS@5308@1आलापयत्यकार्याणि किंचिदाख्याति वा स्वयम् ।

ENMSS@5308@2या न प्रयाति शयनं साप्यनुत्पन्नसस्पृहा ॥ ५३०८॥

ENMSS@5309@1आलापाद् गात्रसंस्पर्शात् संसर्गात् सहभोजनात् ।

ENMSS@5309@2आसनाच् शयनाद् यानात् पापं संक्रमते नृणाम् ॥ ५३०९॥

ENMSS@5310@1आलापान् भ्रूविलासो विरलयति लसद्बाहुविक्षिप्तियातं नीविग्रन्थिं प्रथिम्ना

प्रतनयति मनाङ्मध्यनिम्नो नितम्बः ।

ENMSS@5310@2उत्पुष्यत्पार्श्वमूर्च्छत्कुचशिखरमुरो नूनमन्तःस्मरेण स्पृष्टा

कोदण्डकोट्या हरिणशिशुदृशो दृश्यतेयौवनश्रीः ॥ ५३१०॥

ENMSS@5311@1आलापैर्मधुरैश्च काश्चिदपरानालोकितैः सस्मितैर् अन्यान्

विभ्रमकल्पनाभिरितरानङ्गैरनङ्गोज्ज्वलैः ।

ENMSS@5311@2आचारैश्चतुरैः परानभिनवैरन्यान् भ्रुवः कम्पनैर् इत्थं काश्चन रञ्जयन्ति सुदृशो मन्ये मनस्त्वन्यथा ॥ ५३११॥

ENMSS@5312@1आलि कपालिनि जटिले पत्यावत्याग्रहैस्तवालमिति ।

ENMSS@5312@2हरगतमिति दुःसहमपि मुहुरपि मुखरान्निगादयति गौरी ॥ ५३१२॥

ENMSS@5313@1आलि कल्पय पुरः करदीपं चन्द्रमण्डलमिति प्रथितेन ।

ENMSS@5313@2नन्वनेन पिहितं मम चक्षुर् मङ्क्षु पाण्दुरतमोगुलकेन ॥ ५३१३॥

ENMSS@5314@1आलिङ्गत्यन्यमन्यं रमयति वचसा लीलया वीक्षतेऽन्यं रोदित्यन्यस्य हेतोः कलयति शपथैरन्यमन्यं वृणोति ।

ENMSS@5314@2शेते चान्येन सार्धं शमनमुपगता चिन्तयत्यन्यमन्यं स्त्रीमाया दुश्चरित्रा जगदहितकरी केन कष्टेन सृष्टा ॥ ५३१४॥

ENMSS@5315@1आलिङ्गदाप्य गोपीं तद्बाहुं सहरिरंसयाधाय ।

ENMSS@5315@2श्रुत्वेति निश्चिनोम्यहम् अङ्घ्रिषु दुर्वारताम् अनङ्गस्य ॥ ५३१५॥

ENMSS@5316@1आलिङ्गनाधरसुधारसपानवक्षो- निष्पीडनादिविधिरस्तु विदूरतस्ते ।

ENMSS@5316@2यत्त्वं विलोकयसि चञ्चलदृङ्गिपातैर् एतावतैव हरिणाक्षि वयं कृतार्थाः ॥ ५३१६॥

ENMSS@5317@1आलिङ्गन्ते मलयजतरूनास्वजन्ते वनान्तान् आपृच्छन्ते चिरपरिचितान् मालयान् निर्झरौघान् ।

ENMSS@5317@2अद्य स्थित्वा द्रविडमहिलाभ्यन्तरे श्वः प्रभाते प्रस्थातारो मलयमरुतः कुर्वते संनिधानम् ॥ ५३१७॥

ENMSS@5318@1आलिङ्गन्तो वसुधां निजखुरदलितामिवानुनेतुममी ।

ENMSS@5318@2वदनविगतचरणा इव संलक्ष्यन्ते जवादश्वाः ॥ ५३१८॥

ENMSS@5319@1आलिङ्गन्नतिसौरभानवयवान् बिम्बाधरं पाटलं चुम्बन्नाकलयन् पयोधरतटीं शृण्वन् रुतं हांसकम् ।

ENMSS@5319@2पश्यन् वानिशमायतां दृशमुपस्कुर्वंल्लवङ्गीरसं बालायां सकलर्तुसंगमसुखं धन्यः परं मन्यते ॥ ५३१९॥

ENMSS@5320@1आलिङ्गन् भृशमङ्गकानि सुदृशामास्यानि चुम्बं नयन् वक्षोजोरुनितम्बकण्ठनखरश्रीचित्रभावं नयन् ।

ENMSS@5320@2बिम्बोष्ठामृतमापिबञ्छिथिलयन् नीवीं करक्रीडना- सङ्गेनातिसहासकेलिपरमः स्वैरं विचिक्रीड ना ॥ ५३२०॥

ENMSS@5321@1आलिङ्गयत्यनुनयत्यवचुम्बयत्या- --- लोकयत्यनुमृजत्यवगूहते च ।

ENMSS@5321@2पार्श्वं विलोकयति मन्मथभावभिन्ना शून्यान्तरा स्मरति केलिकृतं समस्तम् ॥ ५३२१॥

ENMSS@5322@1आलिङ्गसे चारुलतां लवङ्गीम् आचुम्बसे चाम्बुजिनीं क्रमेण ।

ENMSS@5322@2तां चूतवल्लीं मधुप प्रकामं संताडयस्येव पदैः किमेतत् ॥ ५३२२॥

ENMSS@5323@1आलिङ्गितस्तत्र भवान् सांपराये जयश्रिया ।

ENMSS@5323@2आशीःपरंपरां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥ ५३२३॥

ENMSS@5324@1आलिङ्गिताः परैर्यान्ति प्रस्खलन्ति समे पथि ।

ENMSS@5324@2अव्यक्तानि च भाषन्ते धनिनो मद्यपा इव ॥ ५३२४॥

ENMSS@5325@1आलिङ्ग्य पूर्वामनुगृह्य याम्यां सौम्यां समालोक्य सहस्रभानुः ।

ENMSS@5325@2सम्ध्याश्रितोऽप्याप निपातमब्धौ तद् वारुणीसङ्गफलं चकास्ति ॥ ५३२५॥

ENMSS@5326@1आलिङ्ग्य मधुरहुंकृतिम् अलसोन्मिषदीक्षणां रहः कान्ताम् ।

ENMSS@5326@2यद् बोधयन्ति सुप्तां जन्मनि यूनां तदेव फलम् ॥ ५३२६॥

ENMSS@5327@1आलिङ्ग्य मन्दिरे रम्ये सदानन्दविधायिनि ।

ENMSS@5327@2कान्ता कान्तं कुरङ्गाक्षी कुम्भिकुम्भपयोधरा ॥ ५३२७॥

ENMSS@5328@1आलि पालिललितौ तव भातः कर्णिकारसखकर्णि कपोलौ ।

ENMSS@5328@2पद्मजेन रतिपञ्चबाणयोर् दर्पणाविव सुवर्णनिर्मितौ ॥ ५३२८॥

ENMSS@5329@1आलि बालिशतया बलिरस्मै दीयतां बलिभुजे न कदापि ।

ENMSS@5329@2केवलं हि कलकण्ठशिशूनाम् एष एव कुशलेषु निदानम् ॥ ५३२९॥

ENMSS@5330@1आलिर्दिव्यौषधी प्रोक्ता सूक्ष्मकण्टकसंवृता ।

ENMSS@5330@2विमुच्यते विषैः प्राणी पीत्वा तोयेन तज्जटाम् ॥ ५३३०॥

ENMSS@5331@1आलीचालितपद्मिनीदलचलत्सर्वाङ्गमङ्गीकृत् अ-
स्वाङ्गालिङ्गनमर्मरीकृतनवाम्भोजालिशय्या चिरात् ।

ENMSS@5331@2चैतन्यं कथमप्युपेत्य शनकैरुन्मील्य नेत्राञ्चलं बाला केवलमेव
शून्यहृदया शून्यं जगत् पश्यति ॥ ५३३१॥

ENMSS@5332@1आलीभिः शपथैरनेककपटैः कुञ्जोदरं नीतया शून्यं तच्च
निरीक्ष्य विक्षुभितया न प्रस्थितं न स्थितम् ।

ENMSS@5332@2न्यस्ताः किंतु नवोढनीरजदृशा कुञ्जोपकण्ठे रुषा
तादृग्भृङ्गकदम्बडम्बरचमत्कारस्पृशो दृष्टयः ॥ ५३३२॥

ENMSS@5333@1आलीभिः सह भाषितं किमपि तद्वर्त्मापि संवीक्षितं पञ्चेषुः
कुसुमैरपूजि कथमप्याधाय चित्ते मनाक् ।

ENMSS@5333@2तेनापि प्रिय चेत् तथा मयि कृपाकार्पण्यमालम्बसे प्राणेश प्रबलं तदत्र निखिलं तत्प्रातिकूल्यं विधेः ॥ ५३३३॥

ENMSS@5334@1आलीषु केलीरभसेन बाला मुहुर्ममालापमुपालपन्ती ।

ENMSS@5334@2आरादुपाकर्ण्य गिरं मदीयां सौदामिनीयां सुषमामयासीत् ॥ ५३३४॥

ENMSS@5335@1आलेख्यं गगने लिखामि बिसिनीसूत्रैर्वयाम्यम्बरं स्वप्नालोकितमानयामि कनकं ग्रथ्नामि वप्रं हिमैः ।

ENMSS@5335@2इत्याद्युक्तमपि स्फुटं जडमतिर्जानाति सत्यं नृपो यस्तादृक्कृपया न वक्ति स गतप्रौढिः परं वञ्च्यते ॥ ५३३५॥

ENMSS@5336@1आलेख्यं निजमुल्लिलेख विजने सोल्लेखया रेखया संकल्पानकरोद् विकल्पबहुलाकल्पाननल्पानपि ।

ENMSS@5336@2अद्राक्षीदपरप्रजापतिमतं चक्रे च तीव्रं व्रतं त्वन्निर्माणविधौ कियन्न विदधे बद्धावधानो विधिः ॥ ५३३६॥

ENMSS@5337@1आलोक एव विमुखी क्वचिदपि दिवसे न दक्षिणा भवसि ।

ENMSS@5337@2छायेव तदपि तापं त्वमेव मे हरसि मानवति ॥ ५३३७॥

ENMSS@5338@1आलोकत्रस्तनारीकृतसभयमहानादधावज्जनौघ-
व्याप्तद्वारप्रदेशप्रचुरकलकलाकर्णनस्तब्धचक्षुः ।

ENMSS@5338@2काष्ठं दण्डं गृहाणेत्यतिमुखरमुखैस्ताडितो लोष्टघातैर् भीतः सर्पो गृहस्यानधिगतविवरः कोणतः कोणमेति ॥ ५३३८॥

ENMSS@5339@1आलोकदानाच्चक्षुष्मान् प्रभायुक्तो भवेन् नरः ।

ENMSS@5339@2तान् दत्त्वा नोपहिंसेत न हरेन् नोपनाशयेत् ॥ ५३३९॥

ENMSS@5340@1दीपहर्ता भवेदन्धस्तमोगतिरसुप्रभः ।

ENMSS@5340@2दीपप्रदः स्वर्गलोके दीपमाली विराजते ॥ ५३४०॥

ENMSS@5341@1आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।

ENMSS@5341@2बद्धुं न संभावित एव तावत् करेण रुद्धोऽपि च केशपाशः ॥ ५३४१॥

ENMSS@5342@1आलोकयति पन्थानं दास्यतीत्यागतः किल ।

ENMSS@5342@2रचयत्यादराद् वेणीं यदि नान्यैर्वशीकृता ॥ ५३४२॥

ENMSS@5343@1आलोकयति पयोधरम् उपमन्दिरमभिनवाम्बुभरनीलम् ।

ENMSS@5343@2दयितारचितचितानल- धूमोद्गमशङ्कया पथिकः ॥ ५३४३॥

ENMSS@5344@1आलोकयेद् बुद्धिगुणोपपन्नैश् चरैश्च दूतैश्च परप्रचारम् ।

ENMSS@5344@2एतैर्वियुक्तो भवति क्षितीन्द्रो जनैरनेत्रैश्च समानधर्मा ॥ ५३४४॥

ENMSS@5345@1अलोकवन्तः सन्त्येव भूयांसो भास्करादयः ।
ENMSS@5345@2कलावानेव तु ग्रावद्रावकर्मणि कर्मठः ॥ ५३४५॥
ENMSS@5346@1आलोकविशाला मे  सहसा तिमिरप्रवेशविच्छिन्ना ।
ENMSS@5346@2उन्मीलितापि दृष्टिर् निमीलितेवान्धकारेण ॥ ५३४६॥
ENMSS@5347@1आ लोकान्तात् प्रतिहततमोवृत्तिरासां प्रजानां  तुल्योद्योगस्तव दिनकृतश्चाधिकारो मतो नः ।
ENMSS@5347@2तिष्ठत्येष क्षणमधिपतिर्ज्योतिषां व्योममध्ये  षष्ठे भागे त्वमपि दिवसस्यात्मनश्छन्दवर्ती ॥ ५३४७॥
ENMSS@5348@1आलोकावधि यद्वशेन सुगतिं विन्दन्ति भूतान्यसौ  दृष्टिस्नेहवशेन सा वितनुते वंशे भुजङ्गभ्रमम् ।
ENMSS@5348@2दक्षा भोगिषु केषुचिद् विषमितां दृष्टिं निहन्तुं क्षणात्  तानप्याशु विनाशयेत् क्षणरुचिः काचित् क्षणस्फूर्जथुः ॥ ५३४८॥
ENMSS@5349@1आलोकितं गृहशिखण्डिभिरुत्कलापैर् हंसैर्यियासुभिरपाकृतमुन्मनस्कैः ।
ENMSS@5349@2आकालिकं सपदि दुर्दिनमन्तरिक्षम्  उत्कण्ठितस्य हृदयं च समं रुणद्धि ॥ ५३४९॥
ENMSS@5350@1आलोकैरतिपाटलैरचरमां विस्तारयद्भिर्दिशं नक्षत्रद्युतिमाक्षिपद्भिरचिरादाशङ्क्य सूर्योदयम् ।
ENMSS@5350@2पुञ्जीभूय भयादिवान्धतमसं मन्ये द्विरेफच्छलान् मीलन्नीलसरोरुहोदरकुटीकोणान्तरे लीयते ॥ ५३५०॥
ENMSS@5351@1आलोक्य कोमलकपोलतलाभिषिक्त-  व्यक्तानुरागसुभगामभिराममूर्तिम् ।
ENMSS@5351@2पश्यैष बाल्यमतिवृत्य विवर्तमानः  श्रृङ्गारसीमनि तरङ्गितमातनोति ॥ ५३५१॥
ENMSS@5352@1आलोक्य चन्द्रमसमभ्युदितं समन्ताद्  उद्वेल्लदूर्मिविचलत्कलशाम्बुराशेः ।
ENMSS@5352@2विष्वग्विसारिपरमाणुपरंपरैव  ज्योत्स्नात्मना जगदिदं धवलीकरोति ॥ ५३५२॥
ENMSS@5353@1आलोक्य चिकुरनिकरं  सततं सुमनोऽधिवासयोग्यं ते ।
ENMSS@5353@2कामो निजं निषङ्गं  परिवृत्यामृशति साशङ्कः ॥ ५३५३॥
ENMSS@5354@1आलोक्य पाणी सुविमृज्य नेत्रे  तल्पात् समुत्थाय विधाय भूषाम् ।

ENMSS@5354@2आचुम्ब्य कान्तं परिधाय वासो  यान्ती सलज्ञा हृदयं दुनोति ॥ ५३५४॥

ENMSS@5355@1आलोक्य प्रियतमममंशुके विनीवौ  यत्तस्थे नमितमुखेन्दु मानवत्या ।

ENMSS@5355@2तन्नूनं पदमवलोकयांबभूवे  मानस्य द्रुतमपयानमास्थितस्य ॥ ५३५५॥

ENMSS@5356@1आलोक्य सुन्दरि मुखं तव मन्दहासं  नन्दन्त्यमन्दमरविन्दधिया मिलिन्दाः ।

ENMSS@5356@2किं चासिताक्षि मृगलाञ्छनसंभ्रमेण  चञ्चूपुटं चटुलयन्ति चिरं चकोराः ॥ ५३५६॥

ENMSS@5357@1आलोचनं च वचनं च निगूहनं च  यासां स्मरन्नमृतवत् सरसं कृशस्त्वम् ।

ENMSS@5357@2तासां किमङ्ग पिशितास्रपुरीषपात्रं  गात्रं स्मरन् मृगदृशां न निराकुलोऽसि ॥ ५३५७॥

ENMSS@5358@1आलोच्य वाक्यं स्वयमन्तरात्मा  हृष्टः परानन्दमिव प्रविष्टः ।

ENMSS@5358@2प्रायेण भावीनि भवन्ति वस्तून्य् आलोच्यमानानि मनोहराणि ॥ ५३५८॥

ENMSS@5359@1आलोड्य सर्वशास्त्राणि पुराणान्युत्तमोत्तमाः ।

ENMSS@5359@2विचिन्त्य सर्वभूतेषु दयां कुर्वन्ति साधवः ॥ ५३५९॥

ENMSS@5360@1आलोड्य सर्वशास्त्राणि विचार्यैवं पुनः पुनः ।

ENMSS@5360@2इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ५३६०॥

ENMSS@5361@1आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं किंचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसां जालकैः ।

ENMSS@5361@2तन्व्या यत् सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये  तत् त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥ ५३६१॥

ENMSS@5362@1आलोलैरुपगम्यते मधुकरैः केशेषु माल्यग्रहः  कान्तिः कापि कपोलयोः प्रथयते ताम्बूलमन्तर्गतम् ।

ENMSS@5362@2अङ्गानामनुलेपनं परिमलैरालेपनप्रक्रिया  वेषः कोऽपि सरोजसुन्दरदृशः सूते सुखं चक्षुषोः ॥ ५३६२॥

ENMSS@5363@1आलोहितमाकलयन्  कन्दलमुत्कम्पितं मधुकरेण ।

ENMSS@5363@2संस्मरति पथिषु पथिको  दयिताङ्गुलितर्जनाललितम् ॥ ५३६३॥

ENMSS@5364@1आवक्त्रेन्दु तदङ्गमेव सृजतः स्रष्टुः समग्रस्त्विषां  कोषः शोषमगादगाधजगतीशिल्पेऽपि नाल्पायितः ।

ENMSS@5364@2निःशेषद्युतिमण्डलव्ययवशादीषल्लभैस्त् अत्तनू- शेषः केशमयः किमन्धतमसस्तोमैरभून्निर्मितः ॥ ५३६४॥
ENMSS@5365@1आवत्सरमहिभीतिर् न स्याद् अस्य प्रभावेण ।
ENMSS@5365@2शुकनासां च पिबेद् यो जलपिष्टां तस्य भीर्नास्ति ॥ ५३६५॥
ENMSS@5366@1आवयोर्योधमुख्याभ्यां मदर्थः साध्यतामिति ।
ENMSS@5366@2यस्मिन् पणः प्रक्रियते स संधिः पुरुषान्तरः ॥ ५३६६॥
ENMSS@5367@1आवर्जित इव विनयाद् ईषन्मधुरस्मिताननसरोजः ।
ENMSS@5367@2अङ्कार्पितकरयुगलः कलयति विज्ञप्तिमीक्षितो नृपतेः ॥ ५३६७॥
ENMSS@5368@1आवर्जिता किंचिद् इव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
ENMSS@5368@2पर्याप्तपुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव ॥ ५३६८॥
ENMSS@5369@1आवर्जितालकालि श्वासोत्कम्पस्तनार्पितैकभुजम् ।
ENMSS@5369@2शयनं रतिविवशतनोः स्मरामि शिथिलांशुकं तस्याः ॥ ५३६९॥
ENMSS@5370@1आवर्तः ककुदे यस्य ककुदी स उदाहृतः ।
ENMSS@5370@2मुष्केणैकेन युक्तस्तु हयस्त्वेकाण्डसंज्ञितः ॥ ५३७०॥
ENMSS@5371@1आवर्तः संशयानाम् अविनयभवनं पत्तनं साहसानां दोषाणां संनिधानं कपटशतमयं क्षेत्रमप्रत्ययानाम् ।
ENMSS@5371@2स्वर्गद्वारस्य विघ्नं नरकपुरमुखं सर्वमायाकरण्डं स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिलोकस्य पाशः ॥ ५३७१॥
ENMSS@5372@1आवर्त इव तोयस्य ज्ञानावर्तो यदाकुलः ।
ENMSS@5372@2चित्तमास कृतावर्तम् उपसर्गः स उच्यते ॥ ५३७२॥
ENMSS@5373@1आवर्त एव नाभिस्ते नेत्रे नीलसरोरुहे ।
ENMSS@5373@2तरङ्गा वलयस्तेन त्वं लावण्याम्बुवापिका ॥ ५३७३॥
ENMSS@5374@1आवर्तशोभा नतनाभिकान्तेर् भङ्गो भ्रुवां द्वन्द्वचराः स्तनानाम् ।
ENMSS@5374@2जातानि रूपावयवोपमानान्य् अदूरवर्तीनि विलासिनीनाम् ॥ ५३७४॥
ENMSS@5375@1आवर्तिनः शुभफलप्रदशुक्तियुक्ताः संपन्नदेवमणयो भृतरन्ध्रभागाः ।
ENMSS@5375@2अश्वाः प्यधुर्वसुमतीमतिरोचमानास् तूर्णं पयोधय इवोर्मिभिरापतन्तः ॥ ५३७५॥
ENMSS@5376@1आवर्तैरातर्पण- शोभां डिण्डीरपाण्डुरैर्दधती ।
ENMSS@5376@2गायति मुखरितसलिला प्रियसंगममङ्गलं सुरसा ॥ ५३७६॥
ENMSS@5377@1आवर्त्य कण्ठं सिचयेन सम्यग् आबद्ध्य वक्षोरुहकुम्भयुग्मम् ।

ENMSS@5377@2कासौ करालम्बिततैलपात्रा  मन्दं समासीदति सुन्दरीं ताम् ॥ ५३७७॥

ENMSS@5378@1आवर्त्य यो मुहुर्मन्त्रं धारयेच्च प्रयत्नतः ।

ENMSS@5378@2अप्रयत्नधृतो मन्त्रः प्रचलन्नग्निवद् दहेत् ॥ ५३७८॥

ENMSS@5379@1आवाचां व्यक्ततायाः कविपदविषयेष्वाचचष्टे समन्यो  मुक्तास्माभिर्न

कोऽपि स्मरपदमवनौ संस्तुतः सत्यमेतत् ।

ENMSS@5379@2मिथ्यैतद् भोः कथं रे ननु शतमकृथाः कुन्तलेन्द्रस्य तत्तत्

काव्यस्तोत्राणि धिक् त्वां जडमय न मनोरेव मूर्तिप्रभेदः ॥ ५३७९॥

ENMSS@5380@1आवाति स्फुटितप्रियङ्गुसुरभिर्नीहारवारिच्छलात्  स्वच्छन्दं कमलाकरेषु

विकिरन् प्रच्छन्नवह्निच्छटाः ।

ENMSS@5380@2प्रातः कुन्दसमृद्धिदर्शनरसप्रीतिप्रकर्षोल्लसन्

मालाकारवधूकपोलपुलकस्थैर्यक्षमो मारुतः ॥ ५३८०॥

ENMSS@5381@1आवासः किलकिञ्चितस्य दयिताः पार्श्वे विलासालसाः  कर्णे कोकिलकामिनीकल

स्मेरो लतामण्डपः ।

ENMSS@5381@2गोष्ठी सत्कविभिः समं कतिपयैर्मुग्धाः सितांशोः कराः  केषांचित्

सुखयन्ति चात्र हृदयं चैत्रे विचित्राः स्रजः ॥ ५३८१॥

ENMSS@5382@1आवासः क्रियतां गाङ्गे पापवारिणि वारिणि ।

ENMSS@5382@2स्तनमध्ये तरुण्या वा मनोहारिणि हारिणि ॥ ५३८२॥

ENMSS@5383@1आवासेऽस्मिन् विदग्धाः क्वचिदपि न विभो नापि निद्रोपभोग-योग्यत्वं

स्रस्तरास्था विलयमुपगता संमुखे विद्युदेषा ।

ENMSS@5383@2प्रोद्यंश्चायं पयोभृत् तदिति यदि रुचिर्नैशवासेतदास्स्वेत्य् उक्तः

पान्थः सुदत्या हतमदनभयस्तत्र मुग्धोऽतिमुग्धः ॥ ५३८३॥

ENMSS@5384@1आवासोत्सुकपक्षिणः कलरुतं क्रामन्ति वृक्षालयान्

कान्ताभाविवियोगभीरुरधिकं क्रन्दत्ययं कातरः ।

ENMSS@5384@2चक्राह्वो मधुपाः सरोजगहनं धावन्त्युलूको मुदं  धत्ते चारुणतांगतो

रविरसावस्ताचलं चुम्बति ॥ ५३८४॥

ENMSS@5385@1आवासो विपिनायते प्रियसखीमालापि जालायते  तापोऽपि श्वसितेन

दावदहनज्वालाकलापायते ।

ENMSS@5385@2सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं  कन्दर्पोऽपि यमायते

विरचयञ् शार्दूलविक्रीडितम् ॥ ५३८५॥

ENMSS@5386@1आ विन्ध्यादा हिमाद्रेर्विरचितविजयस्तीर्थयात्राप्रसङ्गाद् उद्ग्रीवेषु प्रहर्ता
नृपतिषु विनमत्कन्धरेषु प्रसन्नः ।
ENMSS@5386@2आर्यावर्तं यथार्थं पुनरपि कृतवान् म्लेच्छविच्छेदनाभिर् देवः
शाकंभरीन्द्रो जगति विजयते बीसलः क्षोणिपालः ॥ ५३८६॥
ENMSS@5387@1आविर्भवति नारीणां वयः पर्यस्तशैशवम् ।
ENMSS@5387@2सहैव विविधैः पुंसाम् अङ्गजोन्मादविभ्रमैः ॥ ५३८७॥
ENMSS@5388@1आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति ।
ENMSS@5388@2संतापदग्धस्य शिखण्डियूनो वृष्टेः पुरस्तादचिरप्रभेव ॥ ५३८८॥
ENMSS@5389@1आविर्भावदिने न येन गणितो हेतुस्तनीयानपि क्षीयेतापि न चापराधविधिना
नत्या न यो वर्धते ।
ENMSS@5389@2पीयूषप्रतिवेदिनस्त्रिजगतीदुःखद्रुहः सांप्रतं प्रेम्णस्तस्य गुरोः
कथं नु करवै वाङ्निष्ठतालाघवम् ॥ ५३८९॥
ENMSS@5390@1आविर्भूतं चतुर्धा यः कपिभिः परिवारितः ।
ENMSS@5390@2हतवान् राक्षसानीकं रामं दाशरथिं भजे ॥ ५३९०॥
ENMSS@5391@1आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहारास्तेषु मा संशयो भूत् ।
ENMSS@5391@2भद्रा ह्येषां वाचि लक्ष्मीर्निषिक्ता नैते वाचं विप्लुतार्थां वदन्ति
॥ ५३९१॥
ENMSS@5392@1आविर्भूतविपाण्डुरच्छवि मुखं क्षामा कपोलस्थली सव्यापारपरिश्लथे
च नयनेऽनुत्साहमुग्धं वपुः ।
ENMSS@5392@2श्यामीभूतमुखं पयोधरयुगं मध्यः स्वभावोच्छ्रितो जातान्यैव
मनोहराकृतिरहो गर्भोदये सुभ्रुवः ॥ ५३९२॥
ENMSS@5393@1आविर्भूतानुरागाः क्षणमुदयगिरेरुज्जिहानस्य भानोः पर्णच्छायैः
पुरस्तादुपवनतरवो दूरमाश्वेव गत्वा ।
ENMSS@5393@2एते तस्मिन् निवृत्ताः पुनरपरगिरिप्रान्तपर्यस्तबिम्बे प्रायो भृत्यास्त्यजन्ति
प्रचलितविभवं स्वामिनं सेवमानाः ॥ ५३९३॥
ENMSS@5394@1आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिर् नैशस्यार्चिर्हुतभुज इव
छिन्नभूयिष्ठधूमा ।
ENMSS@5394@2मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा गङ्गा रोधःपतनकलुषा
गृह्णतीव प्रसादम् ॥ ५३९४॥

ENMSS@5395@1आविर्भूतो जगति सुषमारूपतो भौतिकेऽस्मिन्  ज्ञानात्मासौ लसति भगवान्

विष्टपे मानसीये ।

ENMSS@5395@2प्राणानां वा ज्वलति भुवने प्रस्फुटः शक्तिमूर्त्या  प्रेमद्वारा

प्रकटिततनुर्भासते चैत्यलोके ॥ ५३९५॥

ENMSS@5396@1आविलपयोधराग्रं  लवलीदलपाण्डुराननच्छायम् ।

ENMSS@5396@2तानि दिनानि वपुरभूत्  केवलमलसेक्षणं तस्याः ॥ ५३९६॥

ENMSS@5397@1आ विवाहसमयाद् गृहे वने  शैशवे तदनु यौवने पुनः ।

ENMSS@5397@2स्वापहेतुरनुपाश्रितोऽन्यया  रामबाहुरुपधानमेष ते ॥ ५३९७॥

ENMSS@5398@1आविशद्भिरुटजाङ्गणं मृगैर् मूलसेकसरसैश्च वृक्षकैः ।

ENMSS@5398@2आश्रमाः प्रविशदग्निधेनवो  बिभ्रति श्रियमुदीरिताग्नयः ॥ ५३९८॥

ENMSS@5399@1आविष्करोति न स्नेहं रागं बध्नाति नो रते ।

ENMSS@5399@2अभियुक्ता तु मन्देच्छा सान्यकामा तु कामिनी ॥ ५३९९॥

ENMSS@5400@1आविष्कुर्वन्निव नवनवेनादरेणानुरागं  सर्वाङ्गीणं

सुचिरविरहोन्मूर्च्छितायां नलिन्याम् ।

ENMSS@5400@2त्रैलोक्यान्धीकरणतिमिरद्वेषरोषारुणत्वं  व्याकुर्वन् वा किमयमुदयत्यम्बरे

तिग्मरोचिः ॥ ५४००॥

ENMSS@5401@1आविष्कृतान् परगुणान् कलयन्ति तूर्ष्णीं  दुश्चेतसो बत विदूषयितुं

न रागात् ।

ENMSS@5401@2आकर्णयन्ति किल कोकिलकूजितानि  संधातुमेव किल सप्तनलीं किराताः

॥ ५४०१॥

ENMSS@5402@1आविष्ट इव दुःखेन तद्गतेन गरीयसा ।

ENMSS@5402@2समन्वितः करुणया परया दीनमुद्धरेत् ॥ ५४०२॥

ENMSS@5403@1आवृणोति यदि सा मृगीदृशी  स्वाञ्चले कुचकाञ्चनाचलम् ।

ENMSS@5403@2भूय एव बहिरेति गौरवाद्  उन्नतो न सहते तिरस्क्रियाम् ॥ ५४०३॥

ENMSS@5404@1आवृण्वतो लोचनमार्गमाजौ  रजोऽन्धकारस्य विजृम्भितस्य ।

ENMSS@5404@2शस्त्रक्षताश्वद्विपवीरजन्मा  बालारुणोऽभूद् रुधिरप्रवाहः ॥ ५४०४॥

ENMSS@5405@1आवृण्वाना झगिति जघनं मद्दुकूलाञ्चलेन

प्रेङ्खत्क्रीडाकुलितकबरीबन्धनव्यग्रपाणिः ।

ENMSS@5405@2अर्धोच्छ्वासस्फुटनखपदालंकृताभ्यां स्तनाभ्यां  दृष्टा

धार्ष्ट्यस्मृतिनतमुखी मोहनान्ते मया सा ॥ ५४०५॥

ENMSS@5406@1आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।

ENMSS@5406@2कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ५४०६॥

ENMSS@5407@1आवृतान्यपि निरन्तरमुच्चैर् योषितामुरसिजद्वितयेन ।

ENMSS@5407@2रागिणामित इतो विमृशद्भिः पाणिभिर्जगृहिरे हृदयानि ॥ ५४०७॥

ENMSS@5408@1आवृत्य श्रीमदेनान्धान् अन्योन्यकृतसंविदः ।

ENMSS@5408@2स्वैरं हसन्ति पार्श्वस्था बालोन्मत्तपिशाचवत् ॥ ५४०८॥

ENMSS@5409@1आवेदयितुमस्माकं कृतज्ञत्वं प्रभुं प्रति ।

ENMSS@5409@2पन्थाः श्रेयस्करो नान्यः तूष्णीं तोषेण वर्तनात् ॥ ५४०९॥

ENMSS@5410@1आवेद्यतामविदितं किमथाप्यनुक्तं वक्तव्यमान्तररुजोपशमाय नालम्
।

ENMSS@5410@2इत्युच्यते किमपि तच्छ्रवणे निधातुं मातः प्रसीद मलयध्वजपाण्ड्यकन्ये

॥ ५४१०॥

ENMSS@5411@1आवेपते भ्रमति सर्पति मोहमेति कान्तं विलोकयति कूजति
दीनदीनम् ।

ENMSS@5411@2अस्तं हि भानुमति गच्छति चक्रवाकी हा जीवितेऽपि मरणं
प्रियविप्रयोगः

॥ ५४११॥

ENMSS@5412@1आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादराद् व्याजेनागतमावृणोति

हसितं न स्पष्टमुद्वीक्षते ।

ENMSS@5412@2मय्यालापवति प्रतीपवचना सख्या समं भाषते तन्व्यास्तिष्ठतु

निर्भरप्रणयिता मानोऽपि रम्योदयः ॥ ५४१२॥

ENMSS@5413@1आशया कृतदासो यः स दासः सर्वदेहिनाम् ।

ENMSS@5413@2आशा दासीकृता येन तस्य दासायते जगत् ॥ ५४१३॥

ENMSS@5415@1आशां कालवतीं कुर्यात् कालं विघ्नेन योजयेत् ।

ENMSS@5415@2विघ्नं निमित्ततो ब्रूयान् निमित्तं चापि हेतुतः ॥ ५४१५॥

ENMSS@5416@1आशाः काञ्चनपुष्पकुड्मलकुलच्छन्ना न काः क्ष्मातले

सौजन्यामृतवर्षिभिस्तिलकितं सेव्यैर्न किं मण्डलम् ।

ENMSS@5416@2पन्थानः सुचिरोपचाररुचिरैर्व्याप्ता न कैः संस्तुतैस् तेषामत्र

वसन्ति निह्नुतगुणाः कालेन ये मोहिताः ॥ ५४१६॥

ENMSS@5417@1आशाः खर्वय गर्वयातिमुखरानुन्नादिनो बर्हिणः सर्वांस्त्रासय गर्जितैः

कलगिरो हंसान् समुत्सारय ।

ENMSS@5417@2द्रागास्कन्दय मित्रमण्डलमलं सद्वर्त्म संदूषय श्रीमन्नब्द

नयत्ययं न पवनो यावद् दशां कामपि ॥ ५४१७॥
ENMSS@5418@1आशाः पूरयति श्रियं वितरति त्रैलोक्यतापं हरत्य् अव्याजामृतसेचनं विदधति प्रीतिं परां तन्वति ।
ENMSS@5418@2एतेन प्रसभं चिरं जलमुचा कालेन दूरीकृते  पूर्णे राजनि जातमुल्बणतमस्तोमावशेषं जगत् ॥ ५४१८॥
ENMSS@5419@1आशाः प्रकाशयति यस्तिमिराणि भङ्क्त्वा  बोधं दृशां दिशति भूरिगुणेष्वभीष्टः ।
ENMSS@5419@2खेदाय यस्य न परोपकृतिष्वटाट्या  धीमान् नमस्यति न कस्तमिनं प्रशस्यम् ॥ ५४१९॥
ENMSS@5420@1आशाः प्रसादयतु पुष्यतु वा चकोरान्  कामं तनोतु कुमुदेषु मुदं सुधांशुः ।
ENMSS@5420@2एकः स एव परमुत्कटराहुदन्त-  पत्रप्रवेशसमदुःखसुखः कुरङ्गः ॥ ५४२०॥
ENMSS@5421@1आशाः संतमसोपलेपमलिनाः पीयूषगौरैः करैर् आलिम्पन्नयमुद्गतैर्दिवमिमां कर्पूरपूरं सृजन् ।
ENMSS@5421@2चन्द्रश्चन्द्रशिलैककुट्टिममयं क्षोणीतलं कल्पयन्  पश्योद्गच्छति पाकपाण्डुरशरच्छायोपमेयच्छविः ॥ ५४२१॥
ENMSS@5422@1आशाखनिरगाधेयं दुष्पूरा केन पूर्यते ।
ENMSS@5422@2या महद्भिरपि क्षिप्तैः पूरकैरेव खन्यते ॥ ५४२२॥
ENMSS@5423@1आशाखनिरगाधेयम् अधःकृतजगत्त्रया ।
ENMSS@5423@2उद्धृत्योद्धृत्य तत्रस्थान् अहो सद्भिः समीकृता ॥ ५४२३॥
ENMSS@5424@1आशागर्तः प्रतिप्राणि यस्मिन् विश्वमणूपमम् ।
ENMSS@5424@2कस्य किं कियदायाति वृथा या विषयैषिता ॥ ५४२४॥
ENMSS@5425@1आशागृहीता विकला भवन्ति  हतत्रपा न्यस्तगुणाभिमानाः ।
ENMSS@5425@2भ्राम्यन्ति मत्ता इव नष्टसंज्ञा  देहीतिवाचस्तरलस्वभावाः ॥ ५४२५॥
ENMSS@5426@1आशातुरगमारुह्य नित्यं धावति याचकः ।
ENMSS@5426@2न चार्तिः न श्रमो ह्यस्य न गतौ नापि मन्दता ॥ ५४२६॥
ENMSS@5427@1आशा धृतिं हन्ति समृद्धिमन्तकः  क्रोधः श्रियं हन्ति यशः कदर्यता ।
ENMSS@5427@2अपालनं हन्ति पशूंश्च राजन्  एकः क्रुद्धो ब्राह्मणो हन्ति राष्ट्रम् ॥ ५४२७॥

ENMSS@5428@1आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला रागग्राहवती वितर्कविहगा

धैर्यद्रुमध्वंसिनी ।

ENMSS@5428@2मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी तस्याः पारगता विशुद्धमनसो

नन्दन्तु योगीश्वराः ॥ ५४२८॥

ENMSS@5429@1आशा नाम मनुष्याणां काश्चिदाश्चर्यशृङ्खला ।

ENMSS@5429@2यया बद्धाःप्रधावन्ति मुक्तास्तिष्ठन्ति कुत्रचित् ॥ ५४२९॥

ENMSS@5430@1आशा निष्ठा प्रतिष्ठा मम किल महिलास्तासु सौख्यं कदा स्याद् या प्रान्त्या

सा विदध्यादिह किमपि तथा मध्यमा सा परत्र ।

ENMSS@5430@2आद्या सा नोभयत्राप्यहह तदपि किं सक्ततां यामि तस्यां या

प्रौढ्यादप्रगल्भे प्रतिदिवसमुभे ते कदर्थीकरोति ॥ ५४३०॥

ENMSS@5431@1आशापाशनिबद्धो नृत्यति किं वा नरो न धनिकपुरः ।

ENMSS@5431@2हतशैलूषस्य विधेः कुत्र विधेयः सुखमुपैति ॥ ५४३१॥

ENMSS@5432@1आशापाशविमुक्तिनिश्चलसुखा स्वायत्तचित्तस्थितिः

स्नेहद्वेषविषादलोभविरतिः संतोषतृप्तं मनः ।

ENMSS@5432@2चिन्ता नित्यमनित्यतापरिचये सङ्गेऽपि निःसङ्गता

संवित्सेकविवेकपूतमनसामित्येष मोक्षक्रमः ॥ ५४३२॥

ENMSS@5433@1आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।

ENMSS@5433@2ईहन्ते कामभोगार्थम् अन्यायेनार्थसंचयान् ॥ ५४३३॥

ENMSS@5434@1आशापाशशतैर्बद्धा वासनाभरवाहिनः ।

ENMSS@5434@2कायात् कायमुपायान्ति वृक्षाद् वृक्षमिवाण्डजाः ॥ ५४३४॥

ENMSS@5435@1आशापाशैः परीताङ्गा ये भवन्ति नरोऽर्दिताः ।

ENMSS@5435@2ते रात्रौ शेरते नैव तदप्राप्तिविचिन्तया ॥ ५४३५॥

ENMSS@5436@1आशापिशाचिका मां भ्रमयति परितो दशस्वपि दिशासु ।

ENMSS@5436@2स्वीये पिशाचवर्गे सेवायै किं न योजयसि ॥ ५४३६॥

ENMSS@5437@1आशापिशाचिकाविष्टः पुरतो यस्य कस्यचित् ।

ENMSS@5437@2वन्दते निन्दति स्तौति रोदिति प्रहसत्यपि ॥ ५४३७॥

ENMSS@5438@1आशा बलवती कष्टा नैराश्यं परमं सुखम् ।

ENMSS@5438@2आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला ॥ ५४३८॥

ENMSS@5439@1आशा बलवती राजन् विपरीता हि शृङ्खला ।

ENMSS@5439@2यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ॥ ५४३९॥

ENMSS@5440@1आशा भङ्गकरी पुंसाम् अजेयारातिसंनिभा ।
ENMSS@5440@2तस्मादाशां त्यजेत् प्राज्ञो यदीच्छेच् शाश्वतं सुखम् ॥ ५४४०॥
ENMSS@5441@1आशाभरेण निखिलाशासु धावनमथाशातकुम्भगिरि वा क्लेशावहं विविधदेशाटनं द्रविणलेशायनापि ववृते ।
ENMSS@5441@2आशातिदामवितुमाशास्व पाणिधृतपाशामनेकजगताम् ईशामुपासितगिरीशामिहाङ्गदिगधीशार्चिताङ्घ्रिनलिनाम् ॥ ५४४१॥
ENMSS@5442@1आशाभिभूता ये मर्त्या महामोहा महोद्धताः ।
ENMSS@5442@2अवमानादिकं दुःखं न जानन्ति कदाप्यहो ॥ ५४४२॥
ENMSS@5443@1आशामुत्पाद्य चाकृष्य वञ्चयेद् रिपुमन्त्रिणम् ।
ENMSS@5443@2असुरेभ्यो हृतौ दत्वा शाण्डामर्कौ ग्रहं सुरैः ॥ ५४४३॥
ENMSS@5444@1आशायाः खलु ये दासास्ते दासाः सर्वदेहिनाम् ।
ENMSS@5444@2आशा दासीकृता येन तस्य दासायते जगत् ॥ ५४४४॥
ENMSS@5445@1आशाया ये दासास् ते दासाः सर्वलोकस्य ।
ENMSS@5445@2आशा येषां दासी तेषां दासायते लोकः ॥ ५४४५॥
ENMSS@5446@1आशायास्तनया माया क्रोधोऽसूयासुतः स्मृतः ।
ENMSS@5446@2हिंसायास्तनयः पापः कृतघ्नो नार्हति प्रजाम् ॥ ५४४६॥
ENMSS@5447@1आशालतावलयितं बद्धमूलमविद्यया ।
ENMSS@5447@2को हि तापयितुं शक्तः मुखेन भवपादपम् ॥ ५४४७॥
ENMSS@5448@1आशावलम्बोपचिता न कस्य तृष्णालतानर्थफलं प्रसूते ।
ENMSS@5448@2दिने दिने लब्धरुचिर्विवस्वान् मीनं च मेषं च वृषं च भुङ्क्ते ॥ ५४४८॥
ENMSS@5449@1आशाविप्लुतचेतसोऽभिलषिताल्लाभादलाभो वरस् तस्यालाभनिराकृता हि
तनुतामापद्यते प्रार्थना ।
ENMSS@5449@2इष्टावाप्तिसमुद्भवस्तु सुतरां हर्षः प्रमाथी धृतेः सेतोर्भङ्ग इवाम्भसां विवशतां वेगेन विस्तार्यते ॥ ५४४९॥
ENMSS@5450@1आशासरसीं शोषय तपसा तन्मध्यस्थः पोषय मनसा ।
ENMSS@5450@2कायक्लेशं शोधय परुषं शिथिलय परमब्रह्मणि कलुषम् ॥ ५४५०॥
ENMSS@5451@1आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ।
ENMSS@5451@2न स्वामी भृत्यतः स्वाम्यम् इच्छन् यो राति चाशिषः ॥ ५४५१॥
ENMSS@5452@1आशासु राशीभवदङ्गवल्ली- भासैव दासीकृतदुग्धसिन्धुम् ।

ENMSS@5452@2मन्दस्मितैर्निन्दितशारदेन्दुं वन्देऽरविन्दासनसुन्दरि त्वाम् ॥ ५४५२॥

ENMSS@5452A@1आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।

ENMSS@5452A@2पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥

ENMSS@5453@1आशा हि परमं दुःखं निराशा परमं सुखम् ।

ENMSS@5453@2आशापाशं परित्यज्य सुखं स्वपिति पिङ्गला ॥ ५४५३॥

ENMSS@5454@1आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।

ENMSS@5454@2यथा सञ्छिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥ ५४५४॥

ENMSS@5455@1आशिषं च तिलकं च जनन्या मन्यते स्म कवचाधिकमन्यः ।

ENMSS@5455@2येन संयति हि सर्वभटानां विक्रमैकवचतां (?) प्रतिपेदे ॥ ५४५५॥

ENMSS@5456@1आशीर्वादमुखा स्त्री मन्त्रमुखो ब्राह्मणः प्रियवाक् ।

ENMSS@5456@2कुशलं पृच्छन्नतिथिः प्रियसुहृदानन्दपरिपूर्णः ॥ ५४५६॥

ENMSS@5457@1आशीविषमिव क्रुद्धं प्रभुं प्राणधनेश्वरम् ।

ENMSS@5457@2यत्नेनोपचरेन् नित्यं नाहमस्मीति मानवः ॥ ५४५७॥

ENMSS@5458@1आशीविषेण रदनच्छददंशदानम् एतेन ते पुनरनर्थतया न गण्यम् ।

ENMSS@5458@2बाधां विधातुमधरे हि न तावकीने पीयूषसारघटिते घटतेऽस्य शक्तिः ॥ ५४५८॥

ENMSS@5459@1आशु कान्तमभिसारितवत्या योषितः पुलकरुद्धकपोलम् ।

ENMSS@5459@2निर्जिगाय मुखमिन्दुमखण्डं खण्डपत्रतिलकाकृति कान्त्या ॥ ५४५९॥

ENMSS@5460@1आशु लङ्घितवतीष्टकराग्रे नीविमर्धमुकुलीकृतदृष्ट्या ।

ENMSS@5460@2रक्तवैणिकहताधरतन्त्री- मण्डलक्वणितचारु चुकूजे ॥ ५४६०॥

ENMSS@5461@1आशैकतन्तुमवलम्ब्य विलम्बमाना रक्षामि जीवमवधिर्नियतो यदि स्यात् ।

ENMSS@5461@2नो चेद् विधिः सकललोकहितैककारी यत् कालकूटमसृजत् तदिदं किमर्थम्

॥ ५४६१॥

ENMSS@5462@1आ शैलेन्द्राच् शिलान्तःस्खलितसुरधुनीशीकरासारशीत् आद् आ तीरान्नैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य ।

ENMSS@5462@2आगत्यागत्य भीतिप्रणतनृपशतैः शश्वदेव क्रियन्ते चूडारत्नांशुगर्भास्तव चरणयुगस्याङ्गुलीरन्ध्रभागाः ॥ ५४६२॥

ENMSS@5463@1आशैव राक्षसी पुंसाम् आशैव विषमञ्जरी ।

ENMSS@5463@2आशैव जीर्णमदिरा धिगाशा सर्वदोषभूः ॥ ५४६३॥

ENMSS@5464@1आ शैशवान् ममतया कलितस्त्वयासौ  आनृण्यमम्ब तव लब्धुमना मृगाङ्कः ।

ENMSS@5464@2स्वात्मानमेव नियतं बहुधा विभज्य  त्वत्पादयोर्विनिदधे नखरापदेशात् ॥ ५४६४॥

ENMSS@5465@1आश्चर्यं कथयामि कस्य पुरतः कुर्वे किमेमि क्व वा  काचित् काञ्चनवल्लरी

गृहशिरोरूढा समुज्जृम्भते ।

ENMSS@5465@2अस्यां किं च सखे दधन्ति सुषमां नारङ्गबिम्बोपमां  दृष्ट्वा

पक्वफलानि मेमृदु मनो मोहं समुत्पद्यते ॥ ५४६५॥

ENMSS@5466@1आश्चर्यं पाणिपाशस्य गिरीन्द्रतनये तव ।

ENMSS@5466@2जगद्बन्धनहा शंभुर्येन बन्धं समिच्छति ॥ ५४६६॥

ENMSS@5467@1आश्चर्यं वडवानलः स भगवानाश्चर्यमम्भोनिधिर् यत्कर्मातिशयं

विचिन्त्य हृदये कम्पः समुत्पद्यते ।

ENMSS@5467@2एकस्याश्रयघस्मरस्य पिबतस्तृप्तिर्न जाता जलैर् अन्यस्यापि महात्मनो

न वपुषि स्वल्पोऽपि तोयव्ययः ॥ ५४६७॥

ENMSS@5468@1आश्चर्यं समराम्बरे रिपुयशश्चन्द्रप्रतापार्कयोः  सर्वग्रासमयं

सहैव तनुते त्वत्खड्गराहुः कथम् ।

ENMSS@5468@2किं चान्यत् परलोकनिर्भय भवांस्तस्मिन् महत्युत्सवे  गृह्णाति

त्यजतामकम्पहृदयो राज्ञां समस्ता भुवः ॥ ५४६८॥

ENMSS@5469@1आश्चर्यधामभिरतीव गुणैः किमेतज् जालं त्वया विरचितं यदपूर्वमेव ।

ENMSS@5469@2चेतांसि मूर्तिरहितान्यपि चञ्चलानि  बध्नाति यच्छ्रुतिगतं

तदपूर्वमेव ॥ ५४६९॥

ENMSS@5470@1आश्चर्यमुत्पलदृशो वदनामलेन्दु-  सांनिध्यतो मम मुहुर्जदिमानमेत्य ।

ENMSS@5470@2जात्येन चन्द्रमणिनेव महीधरस्य  संधार्यते द्रवमयो मनसा विकारः ॥ ५४७०॥

ENMSS@5471@1आश्चर्यमूर्जितमिदं किमु किं मदीयश्  चित्तभ्रमो यदयमिन्दुरनम्बरेऽपि ।

ENMSS@5471@2तत्रापि कापि ननु चित्रपरंपरेयम्  उज्जृम्भितं कुवलयद्वितयं

यदत्र ॥ ५४७१॥

ENMSS@5472@1आश्चर्यस्तिमिताः क्षणं क्षणमथ प्रीतिप्रमीलत्पुटा
वातान्दोलितपङ्कजातसुमनःपीयूषधारामुचः ।
ENMSS@5472@2एताः कस्य हरन्ति हन्त न मनः किंचित्रपामञ्जुल- प्रेमप्रेरणमत्र
मुग्धमुरचत्तारोत्तरा (?) दृष्टयः ॥ ५४७२॥
ENMSS@5473@1आश्चर्यैकनिधिः स दुग्धजलधिर्मन्ये किमन्यद् यतो लेभे जन्म स
लोकलोचनसुधासारस्तुषारद्युतिः ।
ENMSS@5473@2देवीकेलिकचग्रहेण ललिते गङ्गातरङ्गाङ्किते निःशङ्कं निरटङ्कि
शंकरजटाजूटेऽपि येन स्थितिः ॥ ५४७३॥
ENMSS@5474@1आ श्मशानान् निवर्तन्ते ज्ञातयः सह बान्धवैः ।
ENMSS@5474@2त्वयैकेनैव गन्तव्यं तत् कर्म सुकृतं कुरु ॥ ५४७४॥
ENMSS@5475@1आश्यानैर्गलितं दलैर्बत कथाशेषाः प्रसूनश्रियो नोद्भेदोऽपि फलं
प्रति प्रतिदिशं याता निराशाः खगाः ।
ENMSS@5475@2आपातालविशुष्कमूलकुहरोन्मीलज्जटासंततिस् तूष्णीमस्ति तथाप्यकालजलदं
ध्यायन् मरुक्ष्मारुहः ॥ ५४७५॥
ENMSS@5476@1आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ।
ENMSS@5476@2भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्धते ॥ ५४७६॥
ENMSS@5477@1आश्रमी यदि वा वर्णी पूज्यो वाथ गुरुर्महान् ।
ENMSS@5477@2नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मेण तिष्ठति ॥ ५४७७॥
ENMSS@5478@1आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः ।
ENMSS@5478@2न विब्रूयान् नृपो धर्मं चिकीर्षन् हितमात्मनः ॥ ५४७८॥
ENMSS@5479@1आश्रयः कियतामेष तरुः सन्मार्गमाश्रितः ।
ENMSS@5479@2पाथोद सिच्यतां काले नोपेक्ष्यो दूरभावतः ॥ ५४७९॥
ENMSS@5480@1आश्रयः सर्वभूतानां निवासः सर्वपक्षिणाम् ।
ENMSS@5480@2ददाति सदृशा भागं सजलस्य पयोमुचः ॥ ५४८०॥
ENMSS@5481@1आश्रयमाश्रयलिप्सुस् तुङ्गं सेवेत दुरधिरोहमपि ।
ENMSS@5481@2विनिपतति यदि स तस्मात् तथाप्युपर्येव नीचानाम् ॥ ५४८१॥
ENMSS@5482@1आश्रयवशेन सततं गुरुता लघुता च जायते जन्तोः ।
ENMSS@5482@2विन्ध्ये विन्ध्यसमानाः करिणो बत दर्पणे लघवः ॥ ५४८२॥
ENMSS@5483@1आश्रयाशः कृष्णवर्त्मा दहनश्चैष दुर्जनः ।
ENMSS@5483@2अग्निरेव तथाप्यस्मिन् स्याद् भस्मनि हुतं हुतम् ॥ ५४८३॥
ENMSS@5484@1आश्रयितव्यो नरपतिर् अर्जयितव्यानि भूरि वित्तानि ।

ENMSS@5484@2आरब्धव्यं वितरणम्  आनेतव्यं यशोऽपि दशदिग्भ्यः ॥ ५४८४॥

ENMSS@5485@1आश्रयेणैव शोभन्ते पण्डिता वनिता लताः ।

ENMSS@5485@2बहुमूल्यं हि माणिक्यं जटितं हेम्नि राजते ॥ ५४८५॥

ENMSS@5486@1आश्रितस्याप्रदानेन दत्तस्य हरणेन च ।

ENMSS@5486@2जन्मप्रभृति यद् दत्तं सर्वं नश्यति भारत ॥ ५४८६॥

ENMSS@5487@1आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने ।

ENMSS@5487@2पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ ५४८७॥

ENMSS@5488@1आश्रिताश्चैव लोकेन समृद्धिं यान्ति विद्विषः ।

ENMSS@5488@2समृद्धाश्च विनाशाय तस्मान् नोद्वेजयेत् प्रजाः ॥ ५४८८॥

ENMSS@5489@1आश्रित्य नूनममृतद्युतयः पदं ते  देहक्षयोपनतदिव्यपदाभिमुख्याः ।

ENMSS@5489@2लावण्यपुण्यनिचयं सुहृदि त्वदास्ये  विन्यस्य यान्ति मिहिरं प्रतिमासभिन्नाः ॥ ५४८९॥

ENMSS@5490@1आश्लिष्टभूमिं रसितारमुच्चैर् लोलद्भुजाकारबृहत्तरङ्गम् ।

ENMSS@5490@2फेनायमानं पतिमापगानाम्  असावपस्मारिणमाशशङ्के ॥ ५४९०॥

ENMSS@5491@1आश्लिष्टापि करोति सा मम तनुं कण्ठग्रहोत्कण्ठितां  दृष्टापि
प्रियदर्शना नियमयत्यक्ष्णोर्दिदृक्षां पुनः ।

ENMSS@5491@2अन्तश्चेतसि संस्थितापि हृदयं भूयो विशत्येव मे  रूढप्रेमसमागमापि
नवतां धत्ते प्रिया प्रत्यहम् ॥ ५४९१॥

ENMSS@5492@1आश्लिष्टा रभसाद् विलीयत इवाक्रान्ताप्यनङ्गेन या  यस्याः
कृत्रिमचण्डवस्तुकरणाकूतेषु खिन्नं मनः ।

ENMSS@5492@2कोऽयं काहमिति प्रवृत्तसुरता जानाति या नान्तरं  रन्तुः सा रमणी स

एव रमणः शेषौ तु जायापती ॥ ५४९२॥

ENMSS@5493@1आश्लिष्य वा पादरतां पिनष्टु माम्  अदर्शनान् मर्महतां करोतु वा ।

ENMSS@5493@2यथा तथा वा विदधातु नागरो  मत्प्राणनाथस्तु स एव नापरः ॥ ५४९३॥

ENMSS@5494@1आश्लेषचुम्बनरतोत्सवकौतुकानि  क्रीडादुरोदरपणः प्रतिभूरनङ्गः ।

ENMSS@5494@2भोगः स यद्यपि जये च पराजये च  यूनोर्मनस्तदपि वाञ्छति जेतुमेव

॥ ५४९४॥

ENMSS@5495@1आश्लेषशेषा रतिरङ्गनानाम्  आमोदशेषा कुचकुङ्कुमश्रीः ।
ENMSS@5495@2तूणीरशेषः कुसुमायुधोऽपि  प्रभातशेषा रजनी बभूव ॥ ५४९५॥
ENMSS@5496@1आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-  प्रोद्बोधादनु
संभ्रमादनु रतारम्भादनु प्रीतयोः ।
ENMSS@5496@2अन्यार्थं गतयोर्भ्रमान् मिलितयोः संभाषणैर्जानतोर् दम्पत्योरिह को न
को न तमसि व्रीडाविमिश्रो रसः ॥ ५४९६॥
ENMSS@5497@1आश्लेषाधरबिम्बचुम्बनसुखालापस्मितान्यासत् आं  दूरे तावदिदं मिथो न
सुलभं जातं मुखालोकनम् ।
ENMSS@5497@2इत्थं व्यर्थकृतैकदेहघटनाविन्यासयोरावयोः केयं प्रीतिविदम्बनेत्यवतु
वः स्मेरोऽर्धनारीश्वरः ॥ ५४९७॥
ENMSS@5498@1आश्लेषेण पयोधरप्रणयिनीं प्रत्यादिशन्त्या दृशं  दृष्ट्वा
चाधरबद्धतृष्णमधरं निर्भर्त्सयन्त्या मुखम् ।
ENMSS@5498@2ऊर्वोर्गाढनिपीडनेन जघने पाणिं च रुद्धानया  पत्युः प्रेम न खण्डितं
निपुणया मानोऽपि नैवोज्झितः ॥ ५४९८॥
ENMSS@5499@1आश्लेषे प्रथमं क्रमादपह्नुते हृद्येऽधरस्यार्पणे  केलिद्यूतविधौ
पणं प्रियतमे कान्तां पुनः पृच्छति ।
ENMSS@5499@2अन्तर्गूढविगाढसंभ्रमरसस्फारीभवद्गण्डया  तूष्णीं शारिविसारणाय
निहितः स्वेदाम्बुगर्भः करः ॥ ५४९९॥
ENMSS@5500@1आश्लेषे सर्वदा पत्युः सतृष्णेवान्तरात्मना ।
ENMSS@5500@2अर्धनारीश्वरतनौ गौरीवृत्तं समीहते ॥ ५५००॥
ENMSS@5501@1संभोगायोग्यकालेषु सार्धं कान्तेन कामिनी ।
ENMSS@5501@2वापीसौधे गृहोद्याने यात्रासङ्गेन तिष्ठति ॥ ५५०१॥
ENMSS@5502@1अन्यच्छायावलोकेऽपि परालापे मनागपि ।
ENMSS@5502@2पत्ये क्रुद्ध्यत्यनर्थादौ स्वयं चापि निमज्जति ॥ ५५०२॥
ENMSS@5503@1अपरोपगमारम्भम् उन्नाटयति वल्लभम् ।
ENMSS@5503@2दरिद्रजरतीवार्ता शिशिरे सायमातपम् ॥ ५५०३॥
ENMSS@5504@1पत्युः शय्यापरावृत्तिं वियोगमिव मन्यते ।
ENMSS@5504@2देवागारप्रयाणं च प्रवासमिव पश्यति ॥ ५५०४॥
ENMSS@5505@1अतिस्नेहस्य निस्यन्दाद् अतिप्रेम्णः प्रवृत्तिभिः ।
ENMSS@5505@2छायेवानुचरेत् कान्तं यान्तं तिष्ठन्तमङ्गना ॥ ५५०५॥

ENMSS@5506@1आश्लेषे सुन्दरीणां स्थितवति सहसा सर्वसंतृप्तिहेतौ व्यर्थः पीयूषमातुं जलनिधिमथने यत्न इत्याकलय्य ।
ENMSS@5506@2तस्मादेते विरक्ता जगति सुमनसो यत् समस्तास्तदद्धा स्वर्गस्थानामिवैषां न कथमितरथा लाघवं स्यात् प्रतीतम् ॥ ५५०६॥
ENMSS@5507@1आश्वपेहि मम सीधुभाजनाद् यावदग्रदशनैर्न दृश्यसे ।
ENMSS@5507@2चन्द्र मद्दशनमण्डलाङ्कितः खं न यास्यसि हि रोहिणीभयात् ॥ ५५०७॥
ENMSS@5508@1आश्वसिहि महाबाहो प्राणिनां सर्वमापदः ।
ENMSS@5508@2स्पृशन्त्यनिलवल्लोके क्षणेन प्रतियान्ति च ॥ ५५०८॥
ENMSS@5509@1आश्वासयति काकोऽपि दुःखितां पथिकाङ्गनाम् ।
ENMSS@5509@2त्वं चन्द्रामृतजन्मापि दहसीति किमुच्यताम् ॥ ५५०९॥
ENMSS@5510@1आश्वासयेच्चापि परं सान्त्वधर्मार्थवृत्तिभिः ।
ENMSS@5510@2अथास्य प्रहरेत् काले यदा विचलिते पथि ॥ ५५१०॥
ENMSS@5511@1आश्वासस्नेहभक्तीनाम् एकमायतनं महत् ।
ENMSS@5511@2प्रकृष्टस्येव धर्मस्य प्रसादो मूर्तिसुन्दरः ॥ ५५११॥
ENMSS@5512@1आश्वासितस्य मम नाम सुतोपलब्ध्या सद्यस्त्वया सह कृशोदरि विप्रयोगः ।
ENMSS@5512@2व्यावर्तितातपरुजः प्रथमाभ्रवृष्ट्या वृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ॥ ५५१२॥
ENMSS@5513@1आश्वास्य पर्वतकुलं तपनोष्णतप्तम् उद्दामदावविधुराणि च काननानि ।
ENMSS@5513@2नानानदीनदशतानि च पूरयित्वा रिक्तोऽसि यज्जलद सैव तवोत्तमश्रीः ॥ ५५१३॥
ENMSS@5514@1आश्विने कृष्णपक्षे च षष्ठ्यां भौमोऽथ रोहिणी ।
ENMSS@5514@2व्यतीपातस्तदा षष्ठी कपिलानन्तपुण्यदा ॥ ५५१४॥
ENMSS@5515@1आषाढशुक्लपक्षे भानोर्दिवसे शिरीषवृक्षस्य ।
ENMSS@5515@2मूलं जलेन पिष्ट्वा पिबेन् न भीस्तस्य सर्पोत्था ॥ ५५१५॥
ENMSS@5516@1आषाढी कार्त्तिकी माघी वचा शुण्ठी हरीतकी ।
ENMSS@5516@2गयायां पिण्डदानेन पुण्या श्लेष्महरानृणी ॥ ५५१६॥
ENMSS@5517@1आषाढे शशका दृष्टा स्थानास्थने सुभिक्षदाः ।
ENMSS@5517@2चतुष्पदादिनाशाय तल्लब्ध्यै शशदर्शनम् ॥ ५५१७॥
ENMSS@5518@1आषाढे श्रावणे मासि बीजावपनरोपणे ।

ENMSS@5518@2ग्रीष्मादन्यत्र वल्लीनां केचिदिच्छन्ति रोपणम् ॥ ५५१८॥

ENMSS@5519@1आ संप्रवृद्धेरपि वृद्धिकामः  समेन संधानमिहोपगच्छेत् ।

ENMSS@5519@2अपक्वयोर्वा घटयोरवश्यम्  अन्योऽन्यभेदी समसंनिपातः ॥ ५५१९॥

ENMSS@5520@1आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृङ्  नैवास्माकं नयनपदवीं श्रोत्रवर्त्मागतो वा ।

ENMSS@5520@2योऽयं धत्ते विषयकरिणीगाढरूढाभिभान-  क्षीबस्यान्तःकरणकरिणः संयमालानलीलाम् ॥ ५५२०॥

ENMSS@5521@1आसक्ताः प्रतिकोटरं विषधरा भानोः करा मूर्धनि ज्वालाजालकरालदावदहनः प्रत्यङ्गमालिङ्गति ।

ENMSS@5521@2सर्वानन्दनचारुचन्दनतरोरेतस्य जीवातवे  रे जीमूत विमुञ्च वारि बहुशो युष्मद्यशो जृम्भताम् ॥ ५५२१॥

ENMSS@5522@1आसज्य स्वयमेव चुम्बनविधिं याञ्चा विनालिङ्गनं  तल्पान्ते जघनेन वेपथुमता पर्यर्पितं जानुनोः ।

ENMSS@5522@2क्रोधोत्कम्पममर्षयत्यनुनयत्यस्याः स्मरक्रीडया  प्रौढैकाभिरतिः प्रियस्य हृदयं हेलाबलात् कर्षति ॥ ५५२२॥

ENMSS@5523@1आसते शतमधिक्षिति भूपास् तोयराशिरसि ते खलु कूपाः ।

ENMSS@5523@2किं ग्रहा दिवि न जाग्रति ते ते  भास्करस्य कतमस्तुलयास्ते ॥ ५५२३॥

ENMSS@5524@1आसत्यलोकमखिलं भुवनं जलेषु  निर्मज्जयेत् प्रकुपितो जलधिर्जवेन ।

ENMSS@5524@2किंतु स्वमन्तयितुमुद्यतमौर्वमग्निम्  अन्तर्वसन्तमपि हन्तुमसौ न शक्तः ॥ ५५२४॥

ENMSS@5525@1आ सत्यलोकादा भूमेः स्वैरचारकृतश्रमाः ।

ENMSS@5525@2तेनुरिन्दुकराः स्वेदं द्रुतनीहारभूमिकम् ॥ ५५२५॥

ENMSS@5526@1आसनं चैव यानं च संधाय च विगृह्य च ।

ENMSS@5526@2कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च ॥ ५५२६॥

ENMSS@5527@1आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।

ENMSS@5527@2ध्यानं समाधिरेतानि योगाङ्गानि स्मृतानि षट् ॥ ५५२७॥

ENMSS@5528@1आसनं प्राणसंरोधो ध्यानं चैव समाधिकः ।

ENMSS@5528@2एतच्चतुष्टयं विद्धि सर्वयोगेषु संमतम् ॥ ५५२८॥

ENMSS@5529@1आसनाच् शयनाद् यानात् संगतेश्चापि भोजनात् ।

ENMSS@5529@2कृते संचरते पापं तैलबिन्दुरिवाम्भसि ॥ ५५२९॥

ENMSS@5530@1आसनादेकशय्यायां संभाषात् सहभोजनात् ।
ENMSS@5530@2पुंसां संक्रमते पापं घटाद् घटमिवोदकम् ॥ ५५३०॥
ENMSS@5531@1आसनावसथौ शय्याम् अनुव्रज्यामुपासनम् ।
ENMSS@5531@2उत्तमेषूत्तमं कुर्याद् हीने हीनं समे समम् ॥ ५५३१॥
ENMSS@5532@1आसनाशनशय्याभिरद्भिर्मूलफलेन वा ।
ENMSS@5532@2नास्य कश्चिद् वसेद् गेहे शक्तितोऽनर्चितोऽतिथिः ॥ ५५३२॥
ENMSS@5533@1आसने पादमारोप्य यो भुङ्क्ते स द्विजाधमः ।
ENMSS@5533@2मुखेन धमते चान्नं तुल्यं गोमांसभक्षणम् ॥ ५५३३॥
ENMSS@5534@1आसने लालयेद् बालां तरुणीं शयने तथा ।
ENMSS@5534@2उत्सङ्गे पतिरूढां च लालनं त्रिविधं विदुः ॥ ५५३४॥
ENMSS@5535@1आसने शयने याने पानभोजनवस्तुषु ।
ENMSS@5535@2दृष्ट्वान्तरं प्रमत्तेषु प्रहरन्त्यरयोऽरिषु ॥ ५५३५॥
ENMSS@5536@1आसने शयने याने भावा लक्ष्या विशेषतः ।
ENMSS@5536@2पुरुषाणां प्रदुष्टानां स्वभावो वलवत्तरः ॥ ५५३६॥
ENMSS@5537@1आसन् क्षीणानि यावन्ति चातकाश्रूणि तेऽम्बुद ।
ENMSS@5537@2तावन्तोऽपि त्वयोदार न मुक्ता जलबिन्दवः ॥ ५५३७॥
ENMSS@5538@1आसन्नतरतामेति मृत्युर्जन्तोर्दिने दिने ।
ENMSS@5538@2आघातं नीयमानस्य वध्यस्येव पदे पदे ॥ ५५३८॥
ENMSS@5539@1आसन्ननाशं सलिलं तटाके कूपादिकानामतियत्नलभ्यम् ।
ENMSS@5539@2नदि त्वमग्र्यासि जलाश्रयाणां यस्यां युगस्थायि सुलम्भमम्भः ॥ ५५३९॥
ENMSS@5540@1आसन्नमार्गमतिलङ्घ्य नतेन मूर्ध्ना पश्चात् प्रसङ्गवलितेन मुखेन यान्त्या ।
ENMSS@5540@2आरोपिताः कतिपये मयि पङ्कजाक्ष्या साकूतहासमनतिप्रकटाः कटाक्षाः
॥ ५५४०॥
ENMSS@5541@1आसन्नमित्रागमसूच्यमान- समागमे वासरवल्लभस्य ।
ENMSS@5541@2निर्यान्ति दीपा इव रात्रिभोग्याः पश्य प्रभाते गणिकागृहेभ्यः ॥ ५५४१॥
ENMSS@5542@1आसन्नमेव नृपतिर्भजते मनुष्यं विद्याविहीनमकुलीनमसंस्तुतं वा ।
ENMSS@5542@2प्रायेण भूमिपतयः प्रमदा लताश्च यः पार्श्वतो वसति तं परिवेष्टयन्ति

॥ ५५४२॥

ENMSS@5543@1आसन्नयौवनस्त्वं  दुहितुर्मे यौवनं त्वया प्रायः ।

ENMSS@5543@2क्षपितमलक्ष्यं स्त्रीणां  गलति हि सहसैव तारुण्यम् ॥ ५५४३॥

ENMSS@5544@1आसन्नसेवां नृपतेः क्रीडाशस्त्राहिपावकैः ।

ENMSS@5544@2कौशलेनातिमहता विनीतः सानुरुध्यते (?) ॥ ५५४४॥

ENMSS@5545@1आसन्नाः कण्टकिनो  रिपुभयदाः क्षीरिणोऽर्थनाशाय ।

ENMSS@5545@2फलिनः प्रजाक्षयकरा  दारूण्यपि वर्जयेत् तेषाम् ॥ ५५४५॥

ENMSS@5546@1आसन्नान् पुरतो भोगान् दर्शयित्वा पुनः पुनः ।

ENMSS@5546@2छागो हरितमुष्टेव दूरं नीतोऽस्मि तृष्णया ॥ ५५४६॥

ENMSS@5547@1आसन्नाभ्रजलस्य दावविगमे विद्युद्भयं शाखिनो  नक्रास्याद् गलतश्च मज्ञनमयी शङ्का भवेद् वारिधौ ।

ENMSS@5547@2भोक्तव्यस्य विधिः शुभस्य रभसात् स्वादुत्वनिष्पत्तये  जन्तोः संतनुते निराकृतभियो भीत्यन्तरोत्पादनम् ॥ ५५४७॥

ENMSS@5548@1आसन्नामवलम्ब्य केसरलतामेकेन पुष्पोज्ज्वलां  सव्यं निःसहया नितम्बफलके कृत्वा कराम्भोरुहम् ।

ENMSS@5548@2आमीलन् नयनान्तवान्तसलिलं श्लाघ्यस्य निन्द्यस्य वा  कस्येदं दृढसौहृदं प्रतिदिनं दीनं त्वया स्मर्यते ॥ ५५४८॥

ENMSS@5549@1आसन्नामवलम्ब्य केसरलतामेकेन पुष्पोज्ज्वलां  सव्यं निःसहया नितम्बफलके कृत्वा कराम्भोरुहम् ।

ENMSS@5549@2उद्ग्रीवं वद दुर्दिनेऽद्य चरणावुन्नम्य मार्गस्त्वया बालोद्भ्रान्तमृगेक्षणे सुकृतिनः कस्यायमालोक्यते ॥ ५५४९॥

ENMSS@5550@1आसन्नाय सुदूराय सुप्ताय प्रकटात्मने ।

ENMSS@5550@2सुलभायातिदुर्गाय नमश्चित्राय शंभवे ॥ ५५५०॥

ENMSS@5551@1आसन्ने फलमासन्नं दूरगे दूरगं फलम् ।

ENMSS@5551@2मिश्रं तु मिश्रे शकुने फलमाहुर्मनीषिणः ॥ ५५५१॥

ENMSS@5552@1आसन्नो मधुरागतं वनभुवः साम्राज्यमित्यद्भुताः  श्रूयन्ते गिर एष तत्त्वमिह न ज्ञातुं विधातुः क्षमः ।

ENMSS@5552@2यत् पर्णैस्त्रुटितं तदप्युपरतं पुष्पोद्गमैः शाखिनां  यद् ग्लानं विटपैरिदं पुनरिह प्रत्यक्षमालक्ष्यते ॥ ५५५२॥

ENMSS@5553@1आसन्नो वल्मीको  दक्षिणपार्श्वे विभीतस्य ।

ENMSS@5553@2अध्यर्धे भवति शिरा  पुरुषे ज्ञेया दिशि प्राच्याम् ॥ ५५५३॥

ENMSS@5554@1आसन् यावन्ति याञ्चासु चातकाश्रूणि चाम्बुद ।

ENMSS@5554@2तावन्तोऽपि त्वया मेघ न मुक्ता वारिबिन्दवः ॥ ५५५४॥

ENMSS@5555@1आ सप्ततेर्यस्य विवाहपङ्क्तिर् विच्छिद्यते नूनमपण्डितोऽसौ ।

ENMSS@5555@2जीवन्ति ताः कर्तनकुट्टनाभ्यां गोभ्यः किमुक्षा यवसं ददाति ॥ ५५५५॥

ENMSS@5556@1आसप्तमं कुलं हन्ति शिरोऽभ्यङ्गे चतुर्दशी ।

ENMSS@5556@2मांसाशने पञ्चदशी कामधर्मे तथाष्टमी ॥ ५५५६॥

ENMSS@5557@1आ समन्ताच्चतुर्दिक्षु सन्निकृष्टाश्च ये नृपाः ।

ENMSS@5557@2तत्परास्तत्परा येऽन्ये क्रमाद् हीनबलारयः ॥ ५५५७॥

ENMSS@5558@1आसमस्ताक्षिविक्षेपसमर्पितमनोभुवाम् ।

ENMSS@5558@2मन्मथोद्दीपनं तासां विटवृत्तं विधास्यते ॥ ५५५८॥

ENMSS@5559@1आ सर्गात् प्रतिवासरं रसशतैर्या बोधिता पोषिता कल्पान्तावसरेऽथ सैव पृथिवी स्वैरेव दग्धा करैः ।

ENMSS@5559@2कृत्वेत्थं किमपि स्वकर्म नियतेः पूर्वापरोपप्लुतं कष्टं सोऽपि दिनान्तवीतकिरणस्तिग्मांशुरस्तं गतः ॥ ५५५९॥

ENMSS@5560@1आसवरतिरतिबहुभुक् कद्वम्लाशी च कर्मठः पिशुनः ।

ENMSS@5560@2स्थूलः कृशोऽतिदीर्घः खर्वो वा कृष्णपीतो वा ॥ ५५६०॥

ENMSS@5561@1आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम् ।

ENMSS@5561@2बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुखमृगं तपोवनम् ॥ ५५६१॥

ENMSS@5562@1आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्धिषु शीकरेषु ।

ENMSS@5562@2पयोधरोत्सर्पिषु शीर्यमाणः संलक्ष्यते न च्छिदुरोऽपि हारः ॥ ५५६२॥

ENMSS@5563@1आसां व्रतमतीवाक्ष्णोर्यत् पुरः परिसर्पणम् ।

ENMSS@5563@2सह यातं मनस्तत्र त्यक्त्वा भूयो निवर्तनम् ॥ ५५६३॥

ENMSS@5564@1आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष विशुद्धकान्तः ।

ENMSS@5564@2उत्खाय गाढतमसं घनकालमुग्रं रामो दशास्यमिव संभृतबन्धुजीवः ॥ ५५६४॥

ENMSS@5565@1आसादितव्योऽस्ति करालकेशः सखेदयार्हः समयोऽपकारी ।

ENMSS@5565@2तदुत्तमश्लोककथानुबन्धस् तावद् यथा स्यात् प्रयते तथाहम् ॥ ५५६५॥

ENMSS@5566@1आसादितस्य तमसा नियतेर्नियोगाद् आकाङ्क्षतः पुनरपक्रमणेन कालम् ।

ENMSS@5566@2पत्युस्त्विषामिह महौषधयः कलत्र- स्थानं परैरनभिभूतममूर्वहन्ति ॥ ५५६६॥

ENMSS@5567@1आसाद्य कृष्णपक्षान् अत्रसतः सर्वदाऽभीकान् ।

ENMSS@5567@2परयात्मनि रतचित्तान् विभाव्य तत्कर्म कुर्वतः क्व भयम् ॥ ५५६७॥

ENMSS@5568@1आसाद्यते कथं वा शौर्याश्रयणेन गौरवध्वंसः ।

ENMSS@5568@2तत् तत्र दत्तचित्तश् चित्तजसंतापभाजनं न जनः ॥ ५५६८॥

ENMSS@5569@1आसाद्य दक्षिणां दिशम् अविलम्बं त्यजति चोत्तरां तरणिः ।

ENMSS@5569@2पुरुषं हरन्ति कान्ताः प्रायेण हि दक्षिणा एव ॥ ५५६९॥

ENMSS@5570@1आसाद्य भङ्गमनया द्यूते विहिताभिरुचितकेलिपणे ।

ENMSS@5570@2निःसारयताक्षानिति कपटरुषोत्सारिताः सख्यः ॥ ५५७०॥

ENMSS@5571@1आसाद्य मन्दरागोऽपि भुजङ्गेनातिसंगतिम् ।

ENMSS@5571@2तद्भोगात्तु भ्रमन् कष्टं प्राप्नोति विषमन्ततः ॥ ५५७१॥

ENMSS@5572@1आसाद्य सोमभुवमास्वहि यत्र नित्यं मङ्क्षु प्रलोभयति सैकतमंशुकाभम् ।

ENMSS@5572@2तत् तत्र निर्वहति संप्रति नित्यकृत्यम् एतस्य विस्मृतगृहस्य परानुभूत्या ॥ ५५७२॥

ENMSS@5573@1आसाद्यापि महोदधिं न वितृषो जातो जलैर्वाडवो मेघं प्राप्य न चातकोऽपि चरणौ भानुं न लेभेऽरुणः ।

ENMSS@5573@2चन्द्रः शंकरशेखरेऽपि निवसन् पक्षक्षये क्षीयते प्रायः सज्ञनसंगतोऽपि लभते दैवानुरूपं फलम् ॥ ५५७३॥

ENMSS@5574@1आसाद्याम्रवनीमिमां प्रति नवामास्वाद्य तन्मञ्जरीं मैवं पञ्चममञ्च नन्दनवनभ्रान्त्या तया कोकिल ।

ENMSS@5574@2एषा वायसमण्डली घनशिरःशूलाहतिव्याकुला कुध्वानैर्बधिरीकरिष्यति वृथा श्रोत्राणि सत्पत्रिणाम् ॥ ५५७४॥

ENMSS@5575@1आसामुपरि दद्याच्च पानीयस्य विचक्षणः ।

ENMSS@5575@2एवं यामद्वयं कुर्यात् ततस्त्वासां न दापयेत् ॥ ५५७५॥

ENMSS@5576@1आसायं सलिलभरे सवितारमुपास्य सादरं तपसा ।

ENMSS@5576@2अधुनाब्जेन मनाक् तव मानिनि तुलना मुखस्याप्ता ॥ ५५७६॥

ENMSS@5577@1आसारान्तमृदुप्रवृत्तमरुतो मेघोपलिप्ताम्बरा

विद्युत्पातमुहूर्तदृष्टककुभः सुप्तेन्दुताराग्रहाः ।
ENMSS@5577@2धाराक्लिन्नकदम्बसंभृतसुरामोदोद्वहाः प्रोषितैर्
निःसंपातविसारिदर्दुररवा नीताः कथं रात्रयः ॥ ५५७७॥
ENMSS@5578@1आसारेण न हर्म्यतः प्रियतमैर्यातुं बहिः शक्यते
शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिङ्ग्यते ।
ENMSS@5578@2जालैः शीकरशीतलाश्च मरुतो रत्यन्तखेदच्छिदो धन्यानां बत
दुर्दिनं सुदिनतां याति प्रियासंगमे ॥ ५५७८॥
ENMSS@5579@1आसारोपरमे प्रगाढतिमिराः किर्मीरयन्त्यो निशाः पान्थस्त्रीमनसां
स्मरानलकणासन्तानशङ्कास्पृशः ।
ENMSS@5579@2पिष्टानां प्रसभं घनाघनघटासंघट्टतो विद्युतां चूर्णाभाः
परितः पतन्ति तरलाः खद्योतकश्रेणयः ॥ ५५७९॥
ENMSS@5580@1आसितानि हसितानि कृतानि प्रेक्षितानि गदितानि गतानि ।
ENMSS@5580@2प्रायशोऽनुकुरुते ललिताङ्गी नर्तकीव चतुरं दयितस्य ॥ ५५८०॥
ENMSS@5581@1आसित्वा विजने विमुक्तविषयासङ्गं मनो निश्चलं कृत्वा हृज्जलजान्तरे
प्रियतमारूपं परं दैवतम् ।
ENMSS@5581@2ध्यात्वा हारलतामयाक्षवलयं हस्तेन धृत्वा मया तत्सायुज्यफलाप्तये
प्रतिदिनं तन्नाम संजप्यते ॥ ५५८१॥
ENMSS@5582@1आसिष्ये सुखितो गृहीति विहितो मोहेन दारग्रहस् तत्सङ्गात्
सुतदासबान्धवसुहृत्संबन्धिनामुद्भवः ।
ENMSS@5582@2तन्निर्वाहकदर्थनापरिभवानौचित्यचिन्ताजुषः किं सौख्यं कतमा
गृहस्थितिरतोऽनर्थो मया स्वीकृतः ॥ ५५८२॥
ENMSS@5583@1आसीज्जनः कृतघ्नः क्रियमाणघ्नश्च सांप्रतं जातः ।
ENMSS@5583@2इति मे मनसि वितर्को भविता लोकः कथं भविता ॥ ५५८३॥
ENMSS@5584@1आसीता मरणात् क्षान्ता नियता ब्रह्मचारिणी ।
ENMSS@5584@2यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥ ५५८४॥
ENMSS@5585@1आसीत् कल्पमुदन्वदम्बुनि चिरं भेजे च भालानलं भर्गस्य
प्रतिमासकर्महुतभुक्कुण्डेऽप्यहौषीद् वपुः ।
ENMSS@5585@2तीव्रैरेव तपोभिरिन्दुरकरोदित्थं जनुर्यापनं किं कुर्याद् विधुरो न
वाञ्छति विधिस्तल्लाञ्छनप्रोञ्छनम् ॥ ५५८५॥
ENMSS@5586@1आसीत् ताम्रमयं शरीरमधुना सौवर्णवर्णं गतं
मुक्ताहारलताश्रुबिन्दुनिवहैर्निःस्वस्य मे कल्पिता ।

ENMSS@5586@2स्वल्पं स्वल्पमनल्पकल्पमधुना दीर्घं वयः कल्पितं  स्वामिन् दुःख भवत्प्रसादवशतः किं किं न लब्धं मया ॥ ५५८६॥

ENMSS@5587@1आसीत् पूर्वं विमलजलधौ मण्डनं भूपतीनां  नारीणां च प्रबलमुकुटे काश्चनेन प्रसङ्गात् ।

ENMSS@5587@2तन्त्रीबद्धः कथमिदमहो काचखण्डेन सार्धं  भिल्लीकण्ठे मरकतमणे कामवस्थां गतोऽसि ॥ ५५८७॥

ENMSS@5588@1आसीत् सत्ययुगे बलिस्तदनु च त्रेतायुगे भार्गवो  रामः सत्यपराक्रमोऽथ भगवान् धर्मस्तथा द्वापरे ।

ENMSS@5588@2दाता कोऽपि न चास्ति संप्रति कलौ जीवन्ति केनार्थिनश्  चेत्येवं कृतनिश्चयेन विधिना व्यापारिणो निर्मिताः ॥ ५५८८॥

ENMSS@5589@1आसीदञ्जनमत्रेति पश्यामि तव लोचने ।

ENMSS@5589@2भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥ ५५८९॥

ENMSS@5590@1आसीददभ्रशरदभ्रमिषाद् यशस्ते  नाके भ्रमन् नृप यदभ्रमुकान्तशुभ्रम् ।

ENMSS@5590@2तत् पुष्पवर्षणमिवाप्सरसां द्युलोके  व्याप्नोत्यमादिव भुवं तुहिनच्छलेन ॥ ५५९०॥

ENMSS@5591@1आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्ति ः सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रताप् अः ।

ENMSS@5591@2वीरादस्मात् परः कः पदयुगयुगपत्पातिभूपातिभूयश् चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्द् उः ॥ ५५९१॥

ENMSS@5592@1आसीदुप्तं यदेतद् रणभुवि भवता वैरिमातङ्गकुम्भान्  मुक्ताबीजं तदेतत् त्रिजगति जनयामास कीर्तिद्रुमं ते ।

ENMSS@5592@2शेषो मूलं प्रकाण्डं हिमगिरिरुदधिर्दुग्धपूरालवालं  ज्योत्स्ना शाखाप्रतानः कुसुममुडुचयो यस्य चन्द्रः फलं च ॥ ५५९२॥

ENMSS@5593@1आसीदेव यदार्द्रः  किमपि तदा किमयमाहतोऽप्याह ।

ENMSS@5593@2निष्ठुरभावादधुना  कटूनि सखि रटति पटह इव ॥ ५५९३॥

ENMSS@5594@1आसीद् गङ्गाधरस्तस्य भ्राता गङ्गाधरोपमः ।

ENMSS@5594@2एकान् बबन्ध यो व्यालान् मुमोचैकान् यदृच्छया ॥ ५५९४॥

ENMSS@5595@1आसीद् गङ्गान्वयायक्षितिपतितिलको राजराजक्षितीशः क्ष्मापालप्रौढमौलिप्रकरमणिरुचिप्रस्फुरत्पादपीठः ।

ENMSS@5595@2योऽरातिक्षत्रचक्रक्रथनकरभुजापालिताशेषपृत् ह्वी-

चक्रश्चक्रायुधाभोऽदधदुरसि रमां वाचि वाचामधीशः ॥ ५५९५॥

ENMSS@5596@1आसीद् यस्तव पुत्रकस्त्रिचतुरैः पत्राङ्कुरैरावृतो

मेघोन्मुक्तजलैकजीवनविधिः सन्मार्गलब्धास्पदः ।

ENMSS@5596@2सोऽयं संप्रति वासरैः कतिपयैरध्वन्यपुण्योच्चयैः संपन्नः

फलनम्रपल्लवततिच्छायोपलिप्तावनिः ॥ ५५९६॥

ENMSS@5597@1आसीद् वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी ।

ENMSS@5597@2तस्मिन् द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन ॥ ५५९७॥

ENMSS@5598@1आसीनः शयितः स्थितः प्रचलितः स्वप्नायितो जागृतः पश्यन् मीलितलोचनो

व्यवहरन् मौनं प्रपन्नोऽथवा ।

ENMSS@5598@2तां प्रेमाकुलवीक्षितां स्मितमुखीं सव्रीडमन्दागमां श्लिष्यन्तीं

प्रणयार्द्रमुग्धलपितां पश्यामि नक्तंदिवम् ॥ ५५९८॥

ENMSS@5599@1आसीनः सुखमापणे यदि वणिक् श्रद्धालुभिः प्रार्थितः किंचिच् शंसति

पञ्चकं शतकमित्येतन्न तस्याद्भुतम् ।

ENMSS@5599@2आपातालविघूर्णिताम्भसि चलत्यौत्पातिके मारुते मज्जन्त्यामपि नावि मुञ्चति

न यस्तामेव मूल्यस्थितिम् ॥ ५५९९॥

ENMSS@5600@1असीनः स्वामिनः पार्श्वे तन्मुखेक्षी कृताञ्जलिः ।

ENMSS@5600@2स्वभावं चास्य विज्ञाय दक्षः कार्याणि साधयेत् ॥ ५६००॥

ENMSS@5601@1आसीना तटभुवि सस्मितेन भर्त्रा रम्भोरूरवतरितुं सरस्यनिच्छुः ।

ENMSS@5601@2धुन्वाना करयुगमीक्षितुं विलासाञ् शीतालुः सलिलगतेन सिच्यते स्म

॥ ५६०१॥

ENMSS@5602@1आसीने पूष्णि तूर्ष्णीं व्यसनिनि शशिनि व्योम्नि कृष्णे सतृष्णे दैत्येन्द्रे

जातनिद्रे द्रवति मघवति क्लान्तकान्तौ कृतान्ते ।

ENMSS@5602@2अब्रह्मण्यं ब्रुवाणे कमलपुटकुटीश्रोत्रिये शान्त्युपाये पायाद् वः कालकूटं

झटिति कवलयंल्लीलया नीलकण्ठः ॥ ५६०२॥

ENMSS@5603@1आसीने लालयेद् बालां तरुणीं शयने तथा ।

ENMSS@5603@2उत्थितेऽप्यधिरूढां च लालनं त्रिविधं विदुः ॥ ५६०३॥

ENMSS@5604@1आसीनैः स्वं विमानं कृतपरिवृतिभिः सुन्दरीसंगतैस्तैर् देवैः सिद्धैश्च यक्षैरनिमिषनयनैर्दृश्यमानः सतृष्णम् ।

ENMSS@5604@2मध्येमध्ये पयोदैर्मुरजसदृशतां बोधयद्भिः सुमन्द- मम्भः संपात्य पुष्पैरिव ननु महितस्ताण्डवः श्रेयसे स्तात् ॥ ५६०४॥

ENMSS@5605@1आसीन् नाथ पितामही तव मही माता ततोऽनन्तरं संप्रत्येव हि साम्बुराशिरशना जाया जयोद्भूतये ।

ENMSS@5605@2पूर्णे वर्षशते भविष्यति पुनः सैवानवद्या स्नुषा युक्तं नाम समस्तशास्त्रविदुषां लोकेश्वराणामिदम् ॥ ५६०५॥

ENMSS@5606@1आसीन् मे मनसि हृता न सा मृता सा या दृष्टेर्व्रजति न गोचरं प्रिया

मे ।

ENMSS@5606@2ज्योत्स्ना हि स्फुटधवलापि कौमुदीन्दोर् अन्धानां बहलतमोमलीमसैव ॥ ५६०६॥

ENMSS@5607@1आसीमा कालिका यस्य क्षुद्राङ्गं कुण्डलीकृतम् ।

ENMSS@5607@2क्षुद्रवज्रकनामानं प्राह नागार्जुनो मुनिः ॥ ५६०७॥

ENMSS@5608@1आसीमान्तान् निवर्तन्ते सुहृदः सह बन्धुभिः ।

ENMSS@5608@2सुकृतं दुष्कृतं वापि गच्छन्तमनुगच्छति ॥ ५६०८॥

ENMSS@5609@1आसीस्त्वं निशिराजरक्तहृदयेतीर्ष्यालुना वज्रिणा प्रातः शङ्कितयेव दिव्यपदवीं गत्वात्मनः शुद्धये ।

ENMSS@5609@2और्वोत्तापितवार्धितापकतलादादाय मुक्तो बहिः प्राच्यासौ दिवि तप्तमाषक

इव प्रद्योतनो द्योतते ॥ ५६०९॥

ENMSS@5610@1आसुरं कुलमनादरणीयं चित्तमेतदमलीकरणीयम् ।

ENMSS@5610@2रामधाम शरणीकरणीयं लीलया भवजलं तरणीयम् ॥ ५६१०॥

ENMSS@5611@1आसे चेत् स्वगृहे कुटुम्बभरणं कर्तुं न शक्तोऽस्म्यहं सेवे चेत् सुखसाधनं मुनिवनं मुष्णन्ति मां तस्कराः ।

ENMSS@5611@2श्वभ्रे चेत् स्वतनुं त्यजामि नरकाद् भीरात्महत्यावशान् नो जाने करवाणि

दैव किमहं मर्तुं न वा जीवितुम् ॥ ५६११॥

ENMSS@5612@1आसेव्यते मुखं सर्वैर्विद्यानां योषितामपि ।

ENMSS@5612@2हृदयग्राहिणस्तासां द्वित्राः सन्ति न सन्ति वा ॥ ५६१२॥

ENMSS@5613@1आस्कन्दन् कथमपि योषितो न यावद् भीमत्यः प्रियकरधार्यमाणहस्ताः ।
ENMSS@5613@2औत्सुक्यात् त्वरितममूस्तदम्बु तावत् संक्रान्तप्रतिमतया दधाविवान्तः ॥ ५६१३॥
ENMSS@5614@1आस्कन्दितो भुजलताचलिताग्रशाखाम् आलिङ्गितो युवतिभिः कलिकार्थिनीभिः ।
ENMSS@5614@2धन्योऽसि चम्पकतरो कुसुमानुरूपैर् आसां घनस्तनफलैः फलितोऽसि यच्च ॥ ५६१४॥
ENMSS@5615@1आस्कन्धावधि कण्ठकाण्डविपिने द्राक् चन्द्रहासासिना छेत्तुं प्रक्रमिते मयैव तरसा त्रुट्यच्छिरासंततौ ।
ENMSS@5615@2अस्मेरं गलिताश्रुगद्गदपदं भिन्नभ्रुवा यद्यभूद् वक्रेष्वेकमपि स्वयं स भगवांस्तन्मे प्रमाणं शिवः ॥ ५६१५॥
ENMSS@5616@1आ स्तन्यपानाज्जननी पशूनाम् आ दारलाभाच्च नराधमानाम् ।
ENMSS@5616@2आगेहकर्मावधि मध्यमानाम् आ जीवितात् तीर्थमिवोत्तमानाम् ॥ ५६१६॥
ENMSS@5617@1आस्त भावमधिगच्छतोस्तयोः संमदेषु करजक्षतार्पणा ।
ENMSS@5617@2फाणितेषु मरिचावचूर्णना सा स्फुटं कटुरपि स्पृहावहा ॥ ५६१७॥
ENMSS@5618@1आस्तां किं बहुभिः परोपकृतयः संसारसारं फलं सिद्धं तत् प्रतिकूलवर्तिनि विधौ न स्तोकमप्यत्र नः ।
ENMSS@5618@2एते स्मः किल मानुषा वयमपि व्यर्थं व्यपेतायुषो येषां स्वोदरपूर्तिरेव हि किमप्यष्टौ महासिद्धयः ॥ ५६१८॥
ENMSS@5619@1आस्तां क्लमापहरणं जलधेर्जलेन दूरे दवाग्नि परिदीपितमानसानाम् ।
ENMSS@5619@2एतावदस्तु यदि तोयकणैर्न जिह्वा दन्दह्यते द्विगुणतां च न याति तृष्णा ॥ ५६१९॥
ENMSS@5620@1आस्तां गाढतरानुशीलनविधिः संस्पर्शनं दूरतः संश्लेषे विषयीकृतोऽसि न मनागक्ष्णोः पदं प्रापितः ।
ENMSS@5620@2किं ब्रूमः सहकार तावकगुणानन्यादृशैर्दुर्लभान् सौरभ्येण यदध्वगानपि मुहुः प्रीणासि दूरादपि ॥ ५६२०॥
ENMSS@5621@1आस्तां चक्षुरिदं तिरोऽञ्चति कियच्चेतोऽपि यद्वैभवैर् निष्प्रत्याशमयं मुने जलनिधिर्गण्डूषितः सत्तपः ।
ENMSS@5621@2एतेनैव विरन्तुमर्हसि न ते गण्डूषपानाधिका काचित् ख्यातिरतःपरं

परमसौ पर्जन्यनीवीव्ययः ॥ ५६२१॥

ENMSS@5622@1आस्तां तत् करकानिपातकृतभीमण्डूकनिर्मज्ञन- क्षेमैकक्षमवारि पल्वलशतं सिन्धुं तमेव स्तुमः ।

ENMSS@5622@2कुप्यच्छक्रकरस्वरुप्रहरणक्षुण्णाखिलाङ्गक्षरत्- कीलालेन गिरिव्रजेन शरणं यद्गर्भवासः कृतः ॥ ५६२२॥

ENMSS@5623@1आस्तां तावत् किमन्येन दौरात्म्येनेह योषिताम् ।

ENMSS@5623@2विधृतं स्वोदरेणापि घ्नन्ति पुत्रमपि स्वकम् ॥ ५६२३॥

ENMSS@5624@1आस्तां तावदकीर्तिर्मे त्वया तथ्यं तु कथ्यताम् ।

ENMSS@5624@2चित्तं कथमिवासीत् ते हरिवंशीरवश्रुतौ ॥ ५६२४॥

ENMSS@5625@1आस्तां तावदसीमपौरुषजुषः संमानितात्यद्भुत- प्रारम्भाभ्यधिकक्रियस्य स खलु प्राच्यः प्रचारो हरेः ।

ENMSS@5625@2जीर्णस्यापि च विन्ध्यकन्दरदरीद्वारावताराक्षमैर् अङ्गैरङ्गभृतो दलन्ति दरतो गन्धेन गन्धद्विपाः ॥ ५६२५॥

ENMSS@5626@1आस्तां तावदहो समुद्रमहिमा दूरेऽपि कर्णप्रियस् तीरे यस्य पिपासयैव मरणं प्राप्नोति शीघ्रं जनः ।

ENMSS@5626@2तस्मादम्बुनिधेर्वरं लघुसरः कूपोऽथवा वापिका यत्र स्वात्मकरद्वयेन सलिलं पेपीयते स्वेच्छया ॥ ५६२६॥

ENMSS@5627@1आस्तां तावद् दिगन्तप्रथितसुयशसां संगमः सज्ञनानां तैः साकं वैरयोगोऽप्यतिशयमहितामुन्नतिं संनिधत्ते ।

ENMSS@5627@2लोके कस्यागमिष्यच्छ्रुतिपथमवपुर्वक्रशेषोऽपि राहुस् त्रैलोक्यख्यातधाम्नोर्यदि रविशशिनोर्वैरितां नाकरिष्यत् ॥ ५६२७॥

ENMSS@5628@1आस्तां तावद् वचनरचनाभाजनत्वं विदूरे दूरे चास्तां तव तनुपरीरम्भसंभावनापि ।

ENMSS@5628@2भूयो भूयः प्रणतिभिरिदं किं तु याचे विधेया स्मारं स्मारं स्वजनगणने कापि रेखा ममापि ॥ ५६२८॥

ENMSS@5629@1आस्तां ते गुणिनस्तावद् भूषिताशेषभूतलाः ।

ENMSS@5629@2येषां गुणरुचिर्भूयः सांप्रतं तेऽपि दुर्लभाः ॥ ५६२९॥

ENMSS@5630@1आस्तां दूरतया तदीयवदनाम्भोजामृतास्वादनं नोदेत्येव मनोरथोऽपि हृदये तत्संगमाशां प्रति ।

ENMSS@5630@2उत्कण्ठाशिथिलीकृताङ्गलतिकं वीक्षेत मामेकदा सस्नेहं यदि सा सरोजवदना धन्योऽस्म्यहं तावता ॥ ५६३०॥

ENMSS@5631@1आस्तां दूरेण विश्लेषः प्रियामालिङ्गतो मम ।
ENMSS@5631@2स्वेदः किं न सरिन्नाथो रोमाञ्चः किं न पर्वतः ॥ ५६३१॥
ENMSS@5632@1आस्तां भवान्तरविधौ सुविपर्ययोऽयम्  अत्रैव जन्मनि नृणामधरोच्चभावः ।
ENMSS@5632@2अल्पः पृथुः पृथुरपि क्षणतोऽल्प एव  स्वामी भवत्यनुचरः स च तत्पदार्हः ॥ ५६३२॥
ENMSS@5633@1आस्तां मण्डलमैन्दवं वरतनोर्वक्त्रश्रियश्चेत् कथा  कोणे कुत्रचिदासतां कुवलयान्यक्ष्णोः प्रसङ्गो यदि ।
ENMSS@5633@2दूरे तिष्ठतु वल्लकीकलरवः प्रस्तावना चेद् गिरां  वार्त्ता चेदवलग्नकस्य यशसां व्योम्नः प्रथायै नमः ॥ ५६३३॥
ENMSS@5634@1आस्तां महाबोधबलेन साध्यो  मोक्षो विबाधामलसौख्ययुक्तः ।
ENMSS@5634@2धर्मार्थकामा अपि नो भवन्ति  ज्ञानं विना तेन तदर्चनीयम् ॥ ५६३४॥
ENMSS@5635@1आस्तां माद्य भवे शुभे सखि लता न्यस्ता त्वया माधवी  कान्ते तन् मम
संप्रयच्छ कुसुमं किं वामुना मे फलम् ।
ENMSS@5635@2नाल्पं निर्मलयामि मौक्तिकमिदं न्यस्तं त्वया दह्यताम्  इत्थं विभ्रमसंभ्रमो मदयति प्रेयांसमेणीदृशः ॥ ५६३५॥
ENMSS@5636@1आस्तां मानः कथनं  सखीषु वा मयि निवेद्यदुर्विनये ।
ENMSS@5636@2शिथिलितरतिगुणगर्वा  ममापि सा लज्जिता सुतनुः ॥ ५६३६॥
ENMSS@5637@1आस्तां वरमवकेशी  मा दोहदमस्य रचय पूगतरोः ।
ENMSS@5637@2एतस्मात् फलितादपि  केवलमुद्वेगमधिगच्छ ॥ ५६३७॥
ENMSS@5638@1आस्तां विश्वसनं सखीषु विदिताभिप्रायसारे जने  तत्राप्यर्पयितुं दृशं सलिलतां शक्नोमि न व्रीडया ।
ENMSS@5638@2लोको ह्येष परोपहासचतुरः सूक्ष्मेङ्गितज्ञोऽप्यलं  मातः कं शरणं व्रजामि हृदये जीर्णोऽनुरागानलः ॥ ५६३८॥
ENMSS@5639@1आस्तां सकण्टकमिदं वसुधाधिपत्यं  त्रैलोक्यराज्यमपि देव तृणाय मन्ये ।
ENMSS@5639@2निःशङ्कसुप्तहरिणीकुलसंकुलासु  चेतः परं वलति शैलवनस्थलीषु ॥ ५६३९॥
ENMSS@5640@1आस्तामनङ्गीकरणाद् भवेन  दृश्यः स्मरो नेति पुराणवाणी ।
ENMSS@5640@2तवैव देहं श्रितया श्रियेति  नवस्तु वस्तु प्रतिभाति वादः ॥ ५६४०॥

ENMSS@5641@1आस्तामन्यत्सुजनाः परोपकारैककरणदुर्ललिताः ।
ENMSS@5641@2संतापितपिशुनेषु स्वगुणेष्वपि हन्त खिद्यन्ते ॥ ५६४१॥
ENMSS@5642@1आस्तामपरो लोकः क्रीडापेक्षापरो यदि प्रीतिः ।
ENMSS@5642@2ब्यसनान्तरे पतन्ती न वारिता परिजनेनापि ॥ ५६४२॥
ENMSS@5643@1आस्तामेव सरोवरेण्य भवतो दुग्धोदलब्धामृत- स्वादस्पर्धि सरोजवृन्दखचितं हंसावतंसं पयः ।
ENMSS@5643@2स्फारोल्लोलसुशीतशीकरचयासारप्रसिक्तानिल- स्पर्शैरेव मनोहरैरपगताः संतापशोषक्लमाः ॥ ५६४३॥
ENMSS@5644@1आस्तिक्यं चेद् धनमखिलमप्यर्थिसात्कर्तुमर्हं नास्तिक्यं चेत् तदपि सुतरां भोगहेतोरपास्यम् ।
ENMSS@5644@2अस्पृष्ट्वापि स्वयमतिरहःस्थाप्यते यत् तदन्तस् तस्मिन् हेतुः क इति निभृतं तर्कयामो न विद्मः ॥ ५६४४॥
ENMSS@5645@1आस्तीकवचनं स्मृत्वा यः सर्पो न निवर्तते ।
ENMSS@5645@2शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥ ५६४५॥
ENMSS@5646@1आस्तीर्यन्तामुपान्ते वनवृतिनिपुणैर्जालिकैर्जालबन्धा मुच्यन्तां शृङ्खलाभ्यः श्वगणभिरटवीगह्वरे सारमेयाः ।
ENMSS@5646@2आकीर्यन्तां स्थलानि श्रमशिथिलहयैः सादिभिः पाशहस्तैर् व्याधूयन्तां कृतान्तैरिव महिषचरैर्दण्डिभिः काननानि ॥ ५६४६॥
ENMSS@5647@1आस्तृतेऽभिनवपल्लवपुष्पैर् अप्यनारतरताभिरताभ्यः ।
ENMSS@5647@2दीयते स्म शयितुं शयनीये न क्षणः क्षणदयापि वधूभ्यः ॥ ५६४७॥
ENMSS@5648@1आस्ते कश्चन भिक्षुः संगृह्णन्नव्ययानि दश ।
ENMSS@5648@2न ममेत्यव्यययुगलं याचामस्तं किमस्त्यन्यत् ॥ ५६४८॥
ENMSS@5649@1आस्तेऽत्रैव सरस्यहो बत कियान् संतोषपक्षग्रहो हंसस्यास्य मनाङ् न धावति मतिः श्रीधाम्नि पद्मे क्वचित् ।
ENMSS@5649@2सुप्तोऽद्यापि विबुध्यते न तदितस्तावत् प्रतीक्षामहे वेलामित्युषसि प्रिया
मधुलिहः सोढुं त एव क्षमाः ॥ ५६४९॥
ENMSS@5650@1आस्ते दामोदरीयामियमुदरदरीं यावलम्ब्य त्रिलोकी संमातुं शक्नुवन्ति प्रथिमभरवशादत्र नैतद्यशांसि ।
ENMSS@5650@2तामेतां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्म- च्छद्मापन्नानि तानि द्विपदशनसनाभीनि नाभीपथेन ॥ ५६५०॥

ENMSS@5651@1आस्ते द्वारि वधूर्विधातृरचनावैदुष्यविक्रान्तिभूर् भूरेतस्य बलादहारि भवता भीता नताराातिना ।

ENMSS@5651@2किं नामापरमत्र कार्यमधुना साध्यं समाशास्यते तत्पाणिग्रहमङ्गलाय मनुजाधीशास्तु यत्नो महान् ॥ ५६५१॥

ENMSS@5652@1आस्ते नो सुषमा न चापि कुसुमामोदो हि नो वा मनाक् चातुर्यं मकरन्ददानविषये किं चातुरीयं पुनः ।

ENMSS@5652@2यत्त्वं चित्रगतं कुशेशयदलं पुष्णासि गुञ्जारवैर् माहात्म्यं क इव ब्रवीमि तदहो हे चञ्चरीकाधुना ॥ ५६५२॥

ENMSS@5653@1आस्ते रोहत्कनककमले केलिपात्रे मृडान्याः खेलन् हेलोन्मदमधुकरीमानसे मानसे यः ।

ENMSS@5653@2भेकोद्रेकप्रणयिनि वलद्बालजम्बालजाले स स्यादुत्कः परिमितजले पल्वले
किं मरालः ॥ ५६५३॥

ENMSS@5654@1आस्ते विधुः परमनिर्वृत एव मौलौ शंभोरिति त्रिजगतीजनचित्तवृत्तिः
।

ENMSS@5654@2अन्तर्निगूढनयनानलदाहदुःखं जानाति कः परमृते बत शीतरश्मेः
॥ ५६५४॥

ENMSS@5655@1आस्त्रीशिशु प्रथितयैष पिपासितेभ्यः संरक्ष्यतेऽम्बुधिरपेयतयैव दूरात् ।

ENMSS@5655@2दंष्ट्राकरालमकरालिकरालिताभिः किं भाययत्यपरमूर्मिपरंपराभिः
॥ ५६५५॥

ENMSS@5656@1आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु ।

ENMSS@5656@2व्यक्तिमायाति महतां माहात्म्यमनुकम्पया ॥ ५६५६॥

ENMSS@5657@1आस्थाय दारुणतरं कमपि स्वभावम् अत्यन्तदुष्कृतकृतामपि शिक्षणाय
।

ENMSS@5657@2गृह्णासि सायकपदे कुसुमान्यमूनि मातः सुतेषु महती किल रूक्षतेयम्
॥ ५६५७॥

ENMSS@5658@1आस्थितः स्थगितवारिदपङ्क्त्या संध्यया गगनपश्चिमभागः ।

ENMSS@5658@2सोर्मिविद्रुमवितानविभासा रञ्जितस्य जलधेः श्रियमूहे ॥ ५६५८॥

ENMSS@5659@1आस्फालितं यत् प्रमदाकराग्रैर् मृदङ्गधीरध्वनिमन्वगच्छत् ।

ENMSS@5659@2वन्यैरिदानीं महिषैस्तदम्भः  शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥ ५६५९॥

ENMSS@5660@1आस्फालितैर्जलधिरूर्मिपरंपराणां  दूरीकरोति यदि रत्नमवस्तुबुद्ध्या ।

ENMSS@5660@2रत्नाकरत्वमपि तस्य भवेद् विनष्टं  रत्नं तु हन्त भविता महदङ्गधार्यम् ॥ ५६६०॥

ENMSS@5661@1आस्माकी युवतिदृशामसौ तनोति  च्छायैव श्रियमनपायिनीं किमेभिः ।

ENMSS@5661@2मत्वैवं स्वगुणपिधानसाभ्यसूयैः  पानीयैरिति विदधाविरेऽञ्जनानि ॥ ५६६१॥

ENMSS@5662@1आस्यं निरस्य रसितैः सुचिरं विहस्य  गात्रान्तरेषु घन वर्षसि चातकस्य ।

ENMSS@5662@2तच्चञ्चुकोटिकुटिलायतकंधरस्य  प्राणात्ययोऽस्य भवतः परिहासमात्रम् ॥ ५६६२॥

ENMSS@5663@1आस्यं पिधाय सकलं  विरलाङ्गुलिना करेण सघ्राणम् ।

ENMSS@5663@2अयमुच्चरद्दकारं  मनोहरं ज्योत्करोति शिशुः ॥ ५६६३॥

ENMSS@5664@1आस्यं यद्यपि हास्यवर्जितमिदं लास्येन वीतं वचो  नेत्रे शोणसरोजकान्ति तदपि क्वापि क्षणं स्थीयते ।

ENMSS@5664@2मालायाः करणोद्यमे मकरिकारम्भः कुचाम्भोजयोर् धूपाः कुन्तलधोरणीषु सुदृशः सायंतनो दृश्यते ॥ ५६६४॥

ENMSS@5665@1आस्यं यस्याः सुधांशुं कलयति नयनाभ्यां जितः पुंसमूहः  कान्त्या विद्युत् कुचाभ्यां जलकनकधरे निर्जिते हन्त मोहः ।

ENMSS@5665@2कुष्ठं दुर्गन्धियुक्तं लघुकृमिविकृतं पूयमज्जास्रवाहि-  व्याप्तं तन् मक्षिकाभिर्गतिरिति वपुषः कुत्सिता नास्ति लोके ॥ ५६६५॥

ENMSS@5666@1आस्यं सहास्यं नयनं सलास्यं  सिन्दूरबिन्दूदयशोभि भालम् ।

ENMSS@5666@2नवा च वेणी हरिणीदृशश्चेद्  अन्यैरगण्यैरपि भूषणैः किम् ॥ ५६६६॥

ENMSS@5667@1आस्यप्रोञ्छितपार्वणेन्दुयशसं नेत्रावधूतोत्पल-  श्रीगर्वां दशनच्छदव्यवहिताशोकप्रवालद्युतिम् ।

ENMSS@5667@2एतां दृष्टिसुधाप्रपां त्रिजगतः शिल्पी विधाय स्वयं  मन्ये हर्षवशादजायत निजस्तोत्रप्रचण्डः कविः ॥ ५६६७॥

ENMSS@5668@1आस्यश्रीजितजर्जरेन्दुमलिनं कृत्वा करे कन्दुकं

क्रीडाकौतुकमिश्रभावमनया ताम्रं वहन्त्याननम् ।

ENMSS@5668@2भृङ्गाग्रग्रहकृष्णकेतकदलस्पर्धावतीनां दृशा

दीर्घापाङ्गतरङ्गितैकसुहृदामेषोऽस्मि पात्रीकृतः ॥ ५६६८॥

ENMSS@5669@1आस्यश्रीर्द्विजराजबाधनकरी दृष्टिः श्रुतेर्लङ्घिनी मूर्धन्यावलिगामिनी कुटिलता बद्धाश्च मुक्ता गुणैः ।

ENMSS@5669@2यत्ते सुन्दरि दुर्विनीतिरियती दृष्टाबलाया मया तन् मन्ये मकरध्वजो भवजयी जातस्त्वदग्रेसरः ॥ ५६६९॥

ENMSS@5670@1आस्येन्दोः परिवेषवद्रतिपतेश्चाम्पेयकोदण्डवद् धम्मिल्लाम्बुमुचः क्षणद्युतिवदासज्ञौ क्षिपन्ती भुजौ ।

ENMSS@5670@2विश्लिष्यद्वलि लक्ष्यनाभि विगलन्नीव्युन्नमन्मध्यमं किंचित् किंचिदुदञ्चदञ्चलमहो कुम्भस्तनी जृम्भते ॥ ५६७०॥

ENMSS@5671@1आस्ये पूर्णसुधानिधिश्चरणयोः काल्पद्रुमं वैभवं देहे काञ्चनकान्तता त्वचि पुनर्हैयङ्गवीनं स्वयम् ।

ENMSS@5671@2यस्या लोचनयोर्निरूपधि सदोदीतानुकम्पाततिः सा माता जगतां प्रसादपदवी

साक्षान्मुदे स्तादुमा ॥ ५६७१॥

ENMSS@5672@1आस्रावयेच्चोपचितान् विपर्यस्येच्च कर्मसु ।

ENMSS@5672@2यथा न भक्षयन्त्यर्थं भक्षितं निर्वमन्ति वा ॥ ५६७२॥

ENMSS@5673@1आस्रावयेदुपचितान् साधु दुष्टव्रणानिव ।

ENMSS@5673@2आयुक्तास्ते च वर्तेरन्न् अग्नाविव महीपतौ ॥ ५६७३॥

ENMSS@5674@1आ स्वर्लोकादुरगनगरं नूतनालोकलक्ष्मीम् आतन्वद्भिः किमिव सिततां

चेष्टितैस्ते न नीतम् ।

ENMSS@5674@2अप्येतासां रमणविरहे विद्विषत्कामिनीनां यैरानीता नखपदमयी मण्डना

पाण्डिमानम् ॥ ५६७४॥

ENMSS@5675@1आस्वादितं स्वादुमरन्दबिन्दु- स्वच्छन्दमिन्दीवरसुन्दरीभिः ।

ENMSS@5675@2माकन्दपुष्पं प्रमदाजनस्य प्रमोदमामोदभरैरकार्षीत् ॥ ५६७५॥

ENMSS@5676@1आस्वादितदयिताधर- सुधारसस्येव सूक्तयो मधुराः ।

ENMSS@5676@2अकलितरसालमुकुलो न कोकिलः कलमुदञ्चयति ॥ ५६७६॥

ENMSS@5677@1आस्वादितद्विरदशोणितशोणशोभां संध्यारुणामिव कलां शशलाञ्छनस्य

।

ENMSS@5677@2जृम्भाविदारितमुखस्य मुखात् स्फुरन्तीं  को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम् ॥ ५६७७॥

ENMSS@5678@1आस्वादितोन्मुक्तमिवार्द्धबिम्बं  तमोमुखाद् हन्त सुधाकरस्य ।

ENMSS@5678@2सीमन्तसीमान्तमुदाररूपम्  इदं ललाटं ननु पङ्कजाक्ष्याः ॥ ५६७८॥

ENMSS@5679@1आस्वादितोऽसि मोहाद्  बत विदिता वदनमाधुरी भवतः ।

ENMSS@5679@2मधुलिप्तक्षुर रसनाच्  छेदाय परं विजानासि ॥ ५६७९॥

ENMSS@5680@1आस्वाद्यं प्रमदारदच्छद इव श्रव्यं नवं जल्पितं  बालाया इव दृश्यमुत्तमवधूलावण्यलक्ष्मीरिव ।

ENMSS@5680@2प्रोद्घोष्यं चिरविप्रयुक्तवनितासन्देशवाणीव मे  नैवेद्यं चरितं च रूपमनिशं श्रीकृष्ण नामास्तु ते ॥ ५६८०॥

ENMSS@5681@1आस्वाद्य निर्विशेषं  विरहिवधूनां मृदूनि मांसानि ।

ENMSS@5681@2करकामिषेण मन्ये  निःष्ठीवति नीरदोऽस्थीनि ॥ ५६८१॥

ENMSS@5682@1आस्वाद्य स्वयमेव वच्मि महतीर्मर्मच्छिदो वेदना  मा भूत् कस्यचिदप्ययं परिभवो याञ्चेति संसारिणः ।

ENMSS@5682@2पश्य भ्रातरियं हि गौरवजराधिक्कारकेलिस्थली  मानम्लानिमसी गुणव्यतिकरप्रागल्भ्यगर्भच्युतिः ॥ ५६८२॥

ENMSS@5683@1आस्वाद्यात्र मधूनि षट्पद मदं मा गाः कषायाङ्कुरैर् माकन्दस्य पिकान्

प्रतारितवतो मूर्धानमध्यासितः ।

ENMSS@5683@2प्रत्यासन्नतमे पिकेऽपि भवते येनार्पिता तादृशी  माध्वी तस्य विवेकविच्युतिरियं साद्गुण्यमेतन् न ते ॥ ५६८३॥

ENMSS@5684@1आस्वाद्यैष कषायमङ्कुरमुरुप्रेमानुबद्धाशयो  माकन्दस्य यशांसि कोकिलयुवा निर्माति दिग्भित्तिषु ।

ENMSS@5684@2माध्वीकानि निपीय तस्य मधुपास्तत्रैव गुञ्जन्त्यमी  को ब्रूतामसतां सतां च वचसां वर्त्मातिगं चेष्टितम् ॥ ५६८४॥

ENMSS@5685@1आहतं कुचतटेन तरुण्याः  साधु सोढममुनेति पपात ।

ENMSS@5685@2त्रुट्यतः प्रियतमोरसि हारात्  पुष्पवृष्टिरिव मौक्तिकवृष्टिः ॥ ५६८५॥

ENMSS@5686@1आहते यत्र खड्गे स्याद् ध्वनिः काकस्वरोपमः ।

ENMSS@5686@2अं आकारध्वनिर्वा स्यात् स वर्ज्यो नरपुंगवैः ॥ ५६८६॥

ENMSS@5687@1आहते यत्र मधुरो ध्वनिः समुपजायते ।

ENMSS@5687@2पूज्यः स खड्गो नृपतेः शत्रुसंचयनाशनः ॥ ५६८७॥

ENMSS@5688@1आहत्य चिनुमः स्वर्गम् अपवर्गमनुक्रमात् ।
ENMSS@5688@2अनुकूले हि दाम्पत्ये प्रतिकूलं न किंचन ॥ ५६८८॥
ENMSS@5689@1आहत्याहत्य मूर्ध्ना द्रुतमनुपिबतः प्रस्नुतं मातुरूधः किंचित्
कुब्जैकजानोरनवरतचलच्चारुपुच्छस्य धेनुः ।
ENMSS@5689@2उत्कर्णं तर्णकस्य प्रियतनयतया दत्तहुंकारमुद्रा
विस्रंसत्क्षीरधारालवशबलमुखस्याङ्गमातृप्ति लेढि ॥ ५६८९॥
ENMSS@5690@1आह नाथवदनस्य चुम्बतः सा स्म शीतकरतामनक्षरम् ।
ENMSS@5690@2सीत्कृतानि सुदती वितन्वती सत्त्वदत्तपृथुवेपथुस्तदा ॥ ५६९०॥
ENMSS@5691@1आहरन्नपि न स्वस्थो विनिद्रो न प्रबुध्यति ।
ENMSS@5691@2वक्ति न स्वेच्छया किंचित् सेवकोऽपीह जीवति ॥ ५६९१॥
ENMSS@5692@1आहरेज्ज्ञानमर्थांश्च पुमानमरवत् सदा ।
ENMSS@5692@2गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ५६९२॥
ENMSS@5693@1आहवे जगदुद्दण्डराजमण्डलराहवे ।
ENMSS@5693@2श्रीनृसिंह महीपाल स्वस्त्यस्तु तव बाहवे ॥ ५६९३॥
ENMSS@5694@1आहवेषु च ये शूराः स्वाम्यर्थे त्यक्तजीविताः ।
ENMSS@5694@2भर्तृभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः ॥ ५६९४॥
ENMSS@5695@1आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ।
ENMSS@5695@2युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥ ५६९५॥
ENMSS@5696@1आह स्मैषा नलादन्यं न जुषे मनसेति यत् ।
ENMSS@5696@2यौवनानुमितेनास्यास्तन्मृषाभून् मनोभुवा ॥ ५६९६॥
ENMSS@5697@1आहारं प्रति यत् कथापि शमिता यन् मौनमुद्रा मुखे यच्चक्षुर्विनिमीलनं
तनुलता यत् तानवे वर्तते ।
ENMSS@5697@2एकान्ते यदवस्थितिर्यदपि च ध्यानैकतानं मनस् तन् मन्ये सुभग
त्वदर्थमनया तप्येत तीव्रं तपः ॥ ५६९७॥
ENMSS@5698@1आहारः फलमूलमात्मरुचितं शय्या मही वल्कलं संवीताय परिच्छदः
कुशसमित्पुष्पाणि पुत्रा मृगाः ।
ENMSS@5698@2वस्त्रान्नाश्रयदानभोगविभवा निर्यन्त्रणाः शाखिनो मित्राणीत्यधिकं
गृहेषु गृहिणां किं नाम दुःखादृते ॥ ५६९८॥
ENMSS@5699@1आहारदोषाय च काकदीति स्यादाकुटानि ध्वनितं रणाय ।
ENMSS@5699@2केकेध्वनिष्ठा कुवती किकी च त्रयं त्विदं स्यात् पुरदूषणाय ॥
५६९९॥

ENMSS@5700@1आहारनिद्राभयमैथुनानि  सामान्यमेतत् पशुभिर्नराणाम् ।
ENMSS@5700@2ज्ञानं नराणामधिको विशेषो  ज्ञानेन हीनाः पशुभिः समानाः ॥ ५७००॥
ENMSS@5701@1आहारनिर्हारविहारयोगाः  सुसंवृता धर्मविदा तु कार्याः ।
ENMSS@5701@2वाग्बुद्धिकार्याणि तपस्तथैव  धनायुषी गुप्ततमे तु कार्ये ॥ ५७०१॥
ENMSS@5702@1आहारपानताम्बूलगन्धमाल्यफलादयः ।
ENMSS@5702@2भुज्यन्ते यत् स भोगश्च तन्मतः साधुसत्तमैः ॥ ५७०२॥
ENMSS@5703@1आहारभोजी कुरुतेऽनुमोदं  नरो वधे स्थावरजङ्गमानाम् ।
ENMSS@5703@2तस्यापि तस्माद् दुरितानुषङ्गम्  इत्याह यस्तं प्रति वच्मि किंचित् ॥ ५७०३॥
ENMSS@5704@1आहारवर्गे सुलभे विचित्रे  विमुक्तपापे भुवि विद्यमाने ।
ENMSS@5704@2प्रारम्भदुःखं विविधं प्रपोष्य  चेदस्ति गृद्धिर्न किमत्ति मांसम्
॥ ५७०४॥
ENMSS@5705@1आहाराज्जायते व्याधिर्गर्भात् क्रूरश्च जायते ।
ENMSS@5705@2अलक्ष्मीकश्च शय्यायां स्वपाठादायुषः क्षयः ॥ ५७०५॥
ENMSS@5706@1आहारार्थं कर्म कुर्यादनिन्द्यं  कुर्यात् तं च प्राणसंधारणार्थम् ।
ENMSS@5706@2प्राणा धार्यास्तत्त्वविज्ञानहेतोस्  तत्त्वं ज्ञेयं येन भूयो न जन्म ॥ ५७०६॥
ENMSS@5707@1आहारे च भवेद् रोगी नष्टो गर्भश्च मैथुने ।
ENMSS@5707@2निद्रायां ह्रियते लक्ष्मीश्चिन्तायां मरणं ध्रुवम् ॥ ५७०७॥
ENMSS@5708@1आहारे बडवानलश्च शयने यः कुम्भकर्णायते  संदेशे बधिरः
पलायनविधौ सिंहः श‍ृगालो रणे ।
ENMSS@5708@2अन्धो वस्तुनिरीक्षणेऽथ गमने खञ्जः पटुः क्रन्दने  भाग्येनैव हि
लभ्यते पुनरसौ सर्वोत्तमः सेवकः ॥ ५७०८॥
ENMSS@5709@1आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा  नासाग्रे नयनं
यदेतदपरं यच्चैकतानं मनः ।
ENMSS@5709@2मौनं चेदमिदं च शून्यमखिलं यद्विश्वमाभाति ते  तद् ब्रूयाः
सखि योगिनी किमसि भोः किं वा वियोगिन्यसि ॥ ५७०९॥
ENMSS@5710@1आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ।
ENMSS@5710@2धनं मैत्रीकरं दाने चादाने शत्रुकारणम् ॥ ५७१०॥
ENMSS@5711@1आहारे शुचिता ध्वनौ मधुरता नीडे पराधीनता  बन्धौ निर्ममता वने

रसिकता वाचालता माधवे ।

ENMSS@5711@2यसैते गुणराशयः पिकवरं त्यक्त्वा किमेते जना वन्दन्ते खलु खञ्जनं कृमिभुजं चित्रा गतिः कर्मणाम् ॥ ५७११॥

ENMSS@5712@1आहारो गरलं तृतीयमलिके चक्षुः कपालं करे वासः कुञ्जरचर्म भस्मनि रतिर्भूषा भुजङ्गाधिपः ।

ENMSS@5712@2जन्मालक्ष्यमसाक्षिकं कुलमविज्ञाता च जातिः कथं सेव्योऽस्माभिरसौ पिशाचपरिषद्भर्ता हताः स्मो वयम् ॥ ५७१२॥

ENMSS@5713@1आहारो गरलायते प्रतिदिनं हारोऽपि भारायते चन्द्रश्चण्डकरायते मृदुगतिर्वातोऽपि वज्रायते ।

ENMSS@5713@2आवासो विपिनायते मलयजालेपः स्फुलिङ्गायते हा हन्त प्रियविप्रयोगसमयः संहारकालायते ॥ ५७१३॥

ENMSS@5174@1आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।

ENMSS@5174@2षड्गुणो व्यवसायश्च कामाश्चाष्टगुणः स्मृतः ॥ ५१७४॥

ENMSS@5715@1आहितमुक्ताहार्यः सम्यक् सकलप्रयोगसम्पत्त्या ।

ENMSS@5715@2भावविहीनोऽपि नटः सामाजिकचित्तरञ्जनं कुरुते ॥ ५७१५॥

ENMSS@5716@1आहिते तव निःशाने स्फुटितं रिपुहृद्घटैः ।

ENMSS@5716@2गलिते तत्प्रियानेत्रे राजंश्चित्रमिदं महत् ॥ ५७१६॥

ENMSS@5717@1आहिते नु मधुना मधुरत्वे चेष्टितस्य गमिते नु विकासम् ।

ENMSS@5717@2आबभौ नव इवोद्धतरागः कामिनीष्ववसरः कुसुमेषोः ॥ ५७१७॥

ENMSS@5718@1आहुः सत्यं हि परमं धर्मं धर्मविदो जनाः ।

ENMSS@5718@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ५७१८॥

ENMSS@5719@1आहुः सूक्ष्मतरं किंचिद् अमात्यपरिरक्षणम् ।

ENMSS@5719@2सूक्ष्मात् सूक्ष्मतरं तेभ्यो यदात्मपरिरक्षणम् ॥ ५७१९॥

ENMSS@5720@1आहुत्याप्यायते सूर्यः सूर्याद् वृष्टिरथौषधिः ।

ENMSS@5720@2तदन्नं रसरूपेण शुक्रत्वमधिगच्छति ॥ ५७२०॥

ENMSS@5721@1आहूतः परितो दिगन्तगतिभिः शाखाभराडम्बरैः किं रे जाल्म जवेन

शाल्मलिफलप्रत्याशया धावसि ।

ENMSS@5721@2तस्मिन् एकपदे भिदेलिमफलव्यालोलतूलोत्करैर् अध्वानोऽपि निमीलिताक्षमटत

न प्रेक्षणीयाः पुरः ॥ ५७२१॥

ENMSS@5722@1आहूतस्याभिषेकाय निसृष्टस्य वनाय च ।

ENMSS@5722@2न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥ ५७२२॥
ENMSS@5723@1आहूताद्य मयोत्सवे निशि गृहं शून्यं विमुच्यागता क्षीबः प्रेष्यजनः कथं कुलबधूरेकाकिनी यास्यति ।
ENMSS@5723@2वत्स त्वं तदिमां नयालयमिति श्रुत्वा यशोदागिरो राधामाधवयोर्जयन्ति मधुरस्मेरालसा दृष्टयः ॥ ५७२३॥
ENMSS@5724@1आहूतेषु विहंगमेषु मशको नायान् पुरो वार्यते मध्येवारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम् ।
ENMSS@5724@2खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम् ॥ ५७२४॥
ENMSS@5725@1आहूतोऽपि सहायैर् एमीत्युक्त्वा विमुक्तनिद्रोऽपि ।
ENMSS@5725@2आगन्तुकोऽपि पथिकः शैथिल्यं नैव विजहाति ॥ ५७२५॥
ENMSS@5726@1आहूतो मलयाचलात् प्रचलितो मौहुर्तिको मारुतो नेदिष्ठाः पथि सन्ति
कोकिलगणा गीते प्रतिष्ठाभृतः ।
ENMSS@5726@2आप्ताभिः प्रतिवेशिनीभिरभितः संत्यज्य कुन्दालयं सोष्यन्ती सहकारसंततिरलिश्रेणीभिरावेष्ट्यते ॥ ५७२६॥
ENMSS@5727@1आहूतो वाप्यनाहूतो यो राज्ञां द्वारि तिष्ठति ।
ENMSS@5727@2स वै राज्यश्रियं भुङ्क्ते नावमानी कदाचन ॥ ५७२७॥
ENMSS@5728@1आहूतो हालिकेनाश्रुतमिव वचनं तस्य कृत्वा क्षणैकं तिष्ठासुस्तब्धरोमा कथमपि विटपं निःसमीरं विहाय ।
ENMSS@5728@2दोर्भ्यामावृत्य वक्षःस्थलमलसगतिर्दीनपादप्रचारः शीत्कारोत्कम्पभिन्नस्फुटदधरपुटः पामरः क्षेत्रमेति ॥ ५७२८॥
ENMSS@5729@1आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदिताम् ।
ENMSS@5729@2मेने प्रजापतिर्ग्राह्याम् अपि दुष्कृतकर्मणः ॥ ५७२९॥
ENMSS@5730@1आहृत्य परित्यक्ता जनयन्त्यर्थाः सुखाभासम् ।
ENMSS@5730@2अत्यन्तपरित्यक्ताः परमानन्दाय कल्पन्ते ॥ ५७३०॥
ENMSS@5731@1आहृत्य रक्ष्यमाणापि यत्नेनान्तर्विरागिणी ।
ENMSS@5731@2असन्मैत्री च वेश्या च श्रीश्च कस्य कदा स्थिरा ॥ ५७३१॥
ENMSS@5732@1आह्निकोत्तापदग्धानां त्रयाणां जगतां बत ।
ENMSS@5732@2तपनार्चिषि शान्ते तद् भस्मेदं तिमिरं तु न ॥ ५७३२॥
ENMSS@5733@1आह्लादयत्वेष खरैर्नखाग्रैर् दैतेयवक्षःखनिमुत्खनन् वः ।

ENMSS@5733@2प्रह्लादहृद्यं हृदये द्वितीयम्  अन्वेष्टुमिच्छन्निव सूनुरत्नम् ॥ ५७३३॥

ENMSS@5734@1आह्लादहेतुनिरवद्यशरीरयष्टि-  लावण्यकान्तिकलुषीकरणेन तासाम् ।

ENMSS@5734@2आसीत् कुशेशयदृशामयथार्थतैव  पर्यस्तभास्वररुचामपि भूषणानाम् ॥ ५७३४॥

ENMSS@5735@1आह्वानं किं भवति हि तरोः कस्यचित् प्रश्नविज्ञाः  प्रायः कार्यं किमपि

न कलौ कुर्वते के परेषाम् ।

ENMSS@5735@2पूर्णं चन्द्रं वहति ननु का पृच्छति म्लानचक्षुः

केनोदन्याजनितमसमं कष्टमाप्नोति लोकः ॥ ५७३५॥

ENMSS@5736@1इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ।

ENMSS@5736@2तथापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥ ५७३६॥

ENMSS@5737@1इक्षुत्वक्क्षोदसाराः शकटसरणयो धीरधूलीपताकाः  पाकस्वीकारनम्रे

शिरसि निविशते शूकशालेः शुकाली ।

ENMSS@5737@2केदारेभ्यः प्रणालैः प्रविशति शफरीपङ्क्तिराधारमाराद्  अच्छः

कच्छेषु पङ्कः सुखयति सरितामातपादुक्षपालम् ॥ ५७३७॥

ENMSS@5738@1इक्षुदण्डास्तिलाः शूद्राः कान्ता हेम च मेदिनी ।

ENMSS@5738@2चन्दनं दधि ताम्बूलं मर्दनं गुणवर्धनम् ॥ ५७३८॥

ENMSS@5739@1इक्षुरापः पयो मूलं ताम्बूलं फलमौषधम् ।

ENMSS@5739@2भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः ॥ ५७३९॥

ENMSS@5740@1इक्षुर्धन्व शराः प्रसूनविततिर्भृङ्गावली सिञ्जिनी  यस्याज्ञावशवर्तिनः

प्रमनसो निर्विष्टराष्ट्रादयः ।

ENMSS@5740@2यद्बाणाभिहता विरञ्चिमुरजिन्मृत्युंजयेन्द्रादयो  व्याप्ताशेषमुखा इव

त्रिभुवनं पायादजेयः स्मरः ॥ ५७४०॥

ENMSS@5741@1इक्षुर्नदीप्रवाहो  द्यूतं मानग्रहश्च हे सुतनु ।

ENMSS@5741@2भ्रूलतिका च तवेयं  भङ्गे रसमधिकमावहति ॥ ५७४१॥

ENMSS@5742@1इक्षोरग्रात् क्रमशः  पर्वणि पर्वणि यथा रसविशेषः ।

ENMSS@5742@2तद्वत् सज्जनमैत्री  विपरीतानां तु विपरीता ॥ ५७४२॥

ENMSS@5742A@1इक्षो रसं यथादाय कूर्चकस्त्यज्यते जनैः ।

ENMSS@5742A@2धर्मसारं तथादाय देहं त्यजति पण्डितः ॥

ENMSS@5743@1इक्षोर्विकारा मतयः कवीनां  गवां रसो बालकचेष्टितानि ।

ENMSS@5743@2ताम्बूलमग्र्यं युवतेः कटाक्षा  एतान्यहो शक्र न सन्ति नाके ॥ ५७४३॥

ENMSS@5744@1इङ्गालसप्तार्चिरिव ज्वलित्वा  सर्वं दिनं चण्डरुचिः शशाम ।

ENMSS@5744@2तदीयभस्मेव नभोहसन्ती  विभ्राजमानं तुहिनांशुबिम्बम् ॥ ५७४४॥

ENMSS@5745@1इङ्गितज्ञास्तु मगधाः प्रेक्षितज्ञास्तु कोसलाः ।

ENMSS@5745@2अर्धोक्ताः कुरुपाञ्चालाः सर्वोक्ता दक्षिणापथाः ॥ ५७४५॥

ENMSS@5746@1इङ्गिताकारचेष्टाभिः परचित्तप्रवेदिनः ।

ENMSS@5746@2आप्ताः सुशीघ्रगा दूता वाग्मिनो मितभाषिणः ॥ ५७४६॥

ENMSS@5747@1इङ्गिताकारतत्त्वज्ञ ऊहापोहविशारदः ।

ENMSS@5747@2शूरश्च कृतविद्यश्च न च मानी विमत्सरः ॥ ५७४७॥

ENMSS@5748@1इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।

ENMSS@5748@2अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥ ५७४८॥

ENMSS@5749@1इङ्गितेन निजरागनीरधिं  संविभाव्य चटुभिर्गुणज्ञताम् ।

ENMSS@5749@2भक्ततां च परिचर्ययानिशं  साधिकाधिकवशं व्यधत्त तम् ॥ ५७४९॥

ENMSS@5750@1इच्छतां सह वधूभिरभेदं  यामिनीविरहिणां विहगानाम् ।

ENMSS@5750@2आपुरेव मिथुनानि वियोगं  लङ्घ्यते न खलु कालनियोगः ॥ ५७५०॥

ENMSS@5751@1इच्छति मानी मरणं  न च गच्छति वैरिणः शरणम् ।

ENMSS@5751@2मानक्षरणं मरणं  मानप्राणस्य केवलं कृतिनः ॥ ५७५१॥

ENMSS@5752@1इच्छति शती सहस्रं  ससहस्रः कोटिमीहते कर्तुम् ।

ENMSS@5752@2कोटियुतोऽपि नृपत्वं  नृपोऽपि बत चक्रवर्तित्वम् ॥ ५७५२॥

ENMSS@5753@1इच्छति शती सहस्रं सहस्री लक्ष्मीहते ।

ENMSS@5753@2लक्षाधिपस्ततो राज्यं राज्याच्च स्वर्गमीहते ॥ ५७५३॥

ENMSS@5754@1इच्छन्ति केचिन् नरकेषु वासं  नेच्छन्ति केचिन् नरकेषु वासम् ।

ENMSS@5754@2श्रेयो हि तस्मान् नरकं विशिष्टं  न गर्भवासात् परमं हि दुःखम्
॥ ५७५४॥

ENMSS@5755@1इच्छन्त्यभीक्ष्णं क्षयमात्मनोऽपि  न ज्ञातयस्तुल्यकुलस्य लक्ष्मीम् ।

ENMSS@5755@2नमन्ति शत्रून् न च बन्धुवृद्धिं  संतप्यमानैर्हृदयैः सहन्ते
॥ ५७५५॥

ENMSS@5756@1इच्छां सुन्दरपाण्ड्य उन्नतिमतिं बिभ्रत् स्वया संज्ञया
निष्पाद्याभ्यवहारवारयुगलं निष्कम्पसंपत्तिकम् ।

ENMSS@5756@2संपूर्णं विदधे गभीरमुदरं रङ्गेशितुः शार्ङ्गिणो यस्याभूद् भुवनैश्चतुर्दशभिरप्यापूरणं दुर्लभम् ॥ ५७५६॥
ENMSS@5757@1इच्छेच्चेद् विपुलां मैत्रीं त्रीणि तत्र न कारयेत् ।
ENMSS@5757@2वाग्वादमर्थसंबन्धं तत्पत्नीपरिभाषणम् ॥ ५७५७॥
ENMSS@5758@1इच्छेत् परमनुसर्तुं प्रतिमासंदर्शनेन विशदरुचिः ।
ENMSS@5758@2अनवाप्य येनयोगं भवतो हृदयेपरं निधीयेत ॥ ५७५८॥
ENMSS@5759@1इच्छेद् यस्तु सुखं निवस्तुमवनौ गच्छेत् स राज्ञः सभां कल्याणीं गिरमेव संसदि वदेत् कार्यं विदध्यात् कृती ।
ENMSS@5759@2अक्लेशाद् धनमर्जयेदधिपतेरावर्जयेद् वल्लभान् कुर्वीतोपकृतिं जनस्य जनयेत् कस्यापि नापक्रियाम् ॥ ५७५९॥
ENMSS@5760@1इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
ENMSS@5760@2अयं तु परमो धर्मो यद् योगेनात्मदर्शनम् ॥ ५७६०॥
ENMSS@5761@1इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
ENMSS@5761@2अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ ५७६१॥
ENMSS@5762@1तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
ENMSS@5762@2उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥ ५७६२॥
ENMSS@5763@1इडया संचरन् वायुः सौम्ये कार्ये शुभः स्मृतः ।
ENMSS@5763@2पिङ्गलायां तथा दीप्ते द्वयोः क्वापि न शोभनः ॥ ५७६३॥
ENMSS@5764@1इडा च पिङ्गला चैव सुषुम्णा च सरस्वती ।
ENMSS@5764@2गान्धारी हस्तिजिह्वा च पूषा चैव निगद्यते ॥ ५७६४॥
ENMSS@5765@1अलम्बुषा कुहूश्चैव शङ्खिनी दशमी मता ।
ENMSS@5765@2एताः प्राणवहा ज्ञेयाः प्रधाना दश नाडिकाः ॥ ५७६५॥
ENMSS@5766@1इडा नासापुटे वामे पिङ्गला दक्षिणे भवेत् ।
ENMSS@5766@2सुषुम्णा तालु भित्त्वैव ब्रह्मद्वारं प्रवर्तिता ॥ ५७६६॥
ENMSS@5767@1इडायां यदि भूम्यम्बुतत्त्वे प्रवहतस्तदा ।
ENMSS@5767@2स्थिरसौम्यादिकार्याणाम् आरम्भः सिद्धिकृद् भवेत् ॥ ५७६७॥
ENMSS@5768@1इडा सोमस्य नाडी स्यात् पिङ्गला सूर्यनाडिका ।
ENMSS@5768@2इडा सौम्या भवेत् वामा पिङ्गलोग्रा च दक्षिणा ॥ ५७६८॥
ENMSS@5769@1इतः काकानीकं प्रतिभयमितः कौशिकरुताद् इतो गृध्रव्यूहः कुलमिदमितः कङ्कवयसाम् ।
ENMSS@5769@2श्मशानावस्थेऽस्मिन्नखिलगुणवन्ध्ये हतमराव् अपि द्वित्राः केचिन् न

खलु कलवाचः शकुनयः ॥ ५७६९॥

ENMSS@5770@1इतः केकी नादैस्तुदति शतकोटिप्रतिभटैर् इतः कामः कामं कठिनतरबाणैः प्रहरति ।

ENMSS@5770@2इतो गर्जत्युच्चैर्जलधरगणो भीमनिनदैर् विना नाथं जाने न सखि भविता किं ननु मम ॥ ५७७०॥

ENMSS@5771@1इतः क्रोधो गृध्रः प्रकटयति पक्षं निजमितः  सृगाली तृष्णेयं विवृतवदना धावति पुरः ।

ENMSS@5771@2इतः क्रूरः कामो विचरति पिशाचश्चिरमहो  श्मशानं संसारः क इह पतितः स्थास्यति सुखम् ॥ ५७७१॥

ENMSS@5772@1इतः परानर्भकहार्यशस्त्रान्  वैदर्भि पश्यानुमता मयासि ।

ENMSS@5772@2एवंविधेनाहवचेष्टितेन  त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥ ५७७२॥

ENMSS@5773@1इतः पौरस्त्यायां ककुभि विवृणोति क्रमदलत्-  तमिस्रामर्माणं किरणकणिकामम्बरमणिः ।

ENMSS@5773@2इतो निष्क्रामन्ती नवरतिगुरोः प्रोञ्छति वधूः स्वकस्तूरीपत्राङ्कुरमकरिकामुद्रितमुरः ॥ ५७७३॥

ENMSS@5774@1इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता  मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।

ENMSS@5774@2पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती  मयि क्रूरे यत् तत् सविषमिव शल्यं दहति माम् ॥ ५७७४॥

ENMSS@5775@1इतः प्रालेयांशुः प्रलयमकरोत् कैरवकुल-  क्लमच्छेदोत्सेकैः किरणनिकरैरेष तमसाम् ।

ENMSS@5775@2इतोऽप्याज्ञावज्ञां सखि न सहते दुःसहतर-  प्रतापः पञ्चेषुस्तदिह शरणं साहसरसः ॥ ५७७५॥

ENMSS@5776@1इतः शुक्ला चन्द्रद्युतिभिरिह रक्तारुणकरैस् तमिस्रैरप्यन्तःस्खलितगतिभिर्मेचकरुचिः ।

ENMSS@5776@2प्रभातश्रीरेषा विलसति पुरस्था सुकृतिनां  मिमङ्क्षूणां जह्नुद्युमणिविधिजासंगम इव ॥ ५७७६॥

ENMSS@5777@1इतः शोचिः प्राच्यां दिशि दिशति भानोररुणताम्  इतो भृङ्गः कूजन्नभिकमलिनीं प्रोच्चलति च ।

ENMSS@5777@2इतो निर्यान्त्युच्चैर्विहितसुरतक्लान्तिशिथिल- स्खलत्पादन्यासक्षणरणितमञ्जीरमबलाः ॥ ५७७७॥

ENMSS@5778@1इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
ENMSS@5778@2विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥ ५७७८॥
ENMSS@5779@1इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम् इतश्च शरणार्थिनः शिखरिपत्रिणः शेरते ।
ENMSS@5779@2इतोऽपि वडवानलः सह समस्तसंवर्तकैर् अहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ५७७९॥
ENMSS@5780@1इतरदेव बहिर्मुखमुच्यते हृदि तु यत् स्फुरतीतरदेव तत्।
ENMSS@5780@2चरितमेतदधीरवितारकं धुरि पयःप्रतिबिम्बमिवासताम् ॥ ५७८०॥
ENMSS@5781@1इतरपापफलानि यथेच्छया वितर तानि सहे चतुरानन ।
ENMSS@5781@2अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख ॥ ५७८१॥
ENMSS@5782@1इतरभजनघनरसतः फलनिष्पत्तिर्नवा भवेदिति न ।
ENMSS@5782@2मुक्ताः परं तु लोके स्वातिघनरसं विना न जायेरन् ॥ ५७८२॥
ENMSS@5783@1इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
ENMSS@5783@2रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥ ५७८३॥
ENMSS@5784@1इतराश्चार्थमिच्छन्ति रूपमिच्छन्ति दारिकाः ।
ENMSS@5784@2ज्ञातयः कुलमिच्छन्ति स्वर्गमिच्छन्ति तापसाः ॥ ५७८४॥
ENMSS@5785@1इतरेतरयन्त्रितोरुयुग्मं कठिनोरुस्तनपीडिताभिरामम् ।
ENMSS@5785@2भुजमूलशयानुगण्डमूलं मिथुनं स्यूतमिवाभवन् निशायाम् ॥ ५७८५॥
ENMSS@5786@1इतरोपायदुःसाध्ये चण्डदण्डो महीपतिः ।
ENMSS@5786@2अदुष्टायत्यसौ नीतेरश्नाति विपुलं फलम् ॥ ५७८६॥
ENMSS@5787@1इतश्चश्चूतच्युतमधुचया वान्ति चतुराः समीराः संतोषं दिशि दिशि दिशन्तो मधुलिहाम् ।
ENMSS@5787@2निशान्ते कान्तानां स्मरसमरकेलिश्रममुषो विजृम्भन्ते जृम्भाकलितकमलामोदसुहृदः ॥ ५७८७॥
ENMSS@5788@1इतश्चन्द्रः सान्द्रः स्मरमयवयःसंधिमधुरः स्फुरन्मुग्धाकेलिस्मितमिव मयूखैः सुखयति ।
ENMSS@5788@2चकोराणां चक्रं कुमुदसमुदायोऽपि च शरन्- निशारम्भेऽमुष्मिन् समसमयमन्तर्विकसति ॥ ५७८८॥
ENMSS@5789@1इतश्चेतश्चाद्भिर्विघटिततटः सेतुरुदरे धरित्री दुर्लङ्घ्या बहुलहिमपङ्को गिरिरयम् ।

ENMSS@5789@2इदानीं निर्वृत्ते करितुरगनीराजनविधौ  न जाने यातारस्तव च रिपवः
केन च पथा ॥ ५७८९॥
ENMSS@5790@1इतस्ततश्चङ्क्रमणो रजोभिः  क्रीडन्मनोमत्तमतङ्गजोऽयम् ।
ENMSS@5790@2यः सर्वदा पिप्पलभोगतुष्टस् तच्छान्तये त्वं हरिमाश्रयस्व ॥ ५७९०॥
ENMSS@5791@1इतस्ततो भषन् भूरि न पतेत् पिशुनः शुनः ।
ENMSS@5791@2अवदाततया किं च न भेदो हंसतः सतः ॥ ५७९१॥
ENMSS@5792@1इतस्ततो वातविधूतिचश्चलैर् नीरन्ध्रिताशागगनैर्ध्वजांशुकैः ।
ENMSS@5792@2लक्षैः क्वणत्काञ्चनकिङ्किणीकुलैर् अमज्जि धूलीजलधौ नभोगते ॥ ५७९२॥
ENMSS@5793@1इतस्ततो वान्ति विशिष्य यस्यां  वाताः शकृद्वेश्मविहारविस्राः ।
ENMSS@5793@2सा वर्ण्यते रौरवराजधानी  केन प्रतोली मनसाप्यगम्या ॥ ५७९३॥
ENMSS@5794@1इतस्ततोऽस्मिन् विलसन्ति मेरोः  समानवप्रे मणिसानुरागाः ।
ENMSS@5794@2स्त्रियश्च पत्यौ सुरसुन्दरीभिः  समा नवप्रेमणि सानुरागाः ॥ ५७९४॥
ENMSS@5795@1इतस्तावन् नेत्रे वलय मलयाद्रे निधिरपाम्  अपारस्त्वत्पादप्रणयपरतन्त्रो निवसति ।
ENMSS@5795@2अथात्मानं किं न स्मरसि कुलशैलं किमयशः-  पताका सर्पौघैः प्रतिशिखरिशाखासु वहसि ॥ ५७९५॥
ENMSS@5796@1इतस्त्रसद्विद्रुतभूभृदुज्झिता  प्रियाथ दृष्टा वनमानवीजनैः ।
ENMSS@5796@2शशंस पृष्टाद्भुतमात्मदेशजं  शशित्विषः शीतलशीलतां किल ॥ ५७९६॥
ENMSS@5797@1इति कृतवचनायाः कश्चिदभ्येत्य बिभ्यद्  गलितनयनवारेर्याति पादावनामम् ।
ENMSS@5797@2करुणमपि समर्थं मानिनां मानभेदे  रुदितमुदितमस्त्रं योषितां विग्रहेषु ॥ ५७९७॥
ENMSS@5798@1इति क्षितीशो नवतिं नवाधिकां  महाक्रतूनां महनीयशासनः ।
ENMSS@5798@2समारुरुक्षुर्दिवमायुषः क्षये  ततान सोपानपरंपरामिव ॥ ५७९८॥
ENMSS@5799@1इति गदन्तमनन्तरमङ्गना  भुजयुगोन्नमनोच्चतरस्तनी ।
ENMSS@5799@2प्रणयिनं रभसादुदरश्रिया  वलिभयालिभयादिव सस्वजे ॥ ५७९९॥
ENMSS@5800@1इति गदितवती रुषा जघान  स्फुरितमनोरमपक्ष्मकेशरेण ।
ENMSS@5800@2श्रवणनियमितेन कान्तमन्या  सममसिताम्बुरुहेण चक्षुषा च ॥ ५८००॥

ENMSS@5801@1इति गन्तुमिच्छुमभिधाय पुरः क्षणदृष्टिपातविकसद्वदनाम् ।
ENMSS@5801@2स्वकरावलम्बनविमुक्तगलत्- कलकाञ्चि कांचिदरुणत् तरुणः ॥ ५८०१॥
ENMSS@5802@1इति गुह्यतमं शास्त्रम् इदमुक्तं मयानघ ।
ENMSS@5802@2एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥ ५८०२॥
ENMSS@5803@1इति जगति न रक्षितुं समर्थः क्वचिदपि कश्चिदपि प्रसह्य नारीम् ।
ENMSS@5803@2अवति तु सततं विशुद्ध एकः कुलयुवतीं निजसत्त्वपाशबन्धः ॥ ५८०३॥
ENMSS@5804@1एवं चेर्ष्या नाम दुःखैकहेतुर् मोघः पुंसां द्वेषदायी परेषाम् ।
ENMSS@5804@2योऽयं मा भूद् रक्षणायाङ्गनानाम् अत्यौत्सुक्यं प्रत्युतासां तनोति ॥ ५८०४॥
ENMSS@5805@1इति तत्त्वधियः परिचिन्त्य बुधाः सकलस्य जनस्य विनश्वरताम् ।
ENMSS@5805@2न मनागपि चेतसि संदधते शुचमङ्गयशःसुखनाशकराम् ॥ ५८०५॥
ENMSS@5806@1इति देव भवत्युदारसत्त्वो दृढभक्तश्च विलासिनीजनोऽपि ।
ENMSS@5806@2अवरोधसमो महीपतीनां किमुतान्यः कुलजः पुरन्ध्रिलोकः ॥ ५८०६॥
ENMSS@5807@1इति देव सदैव हास्यभावं परिभावे च जनस्य निन्द्यतां च ।
ENMSS@5807@2विपदास्पदतां च यान्ति मूढा इह सन्तस्तु भवन्ति पूजनीयाः ॥ ५८०७॥
ENMSS@5808@1इति द्विकृत्वः शुचिमृष्टभोजिनां दिनानि तेषां कतिचिन् मुदा ययुः ।
ENMSS@5808@2द्विरष्टसंवत्सरवारसुन्दरी- परीष्टिभिस्तुष्टिमुपेयुषां निशि ॥ ५८०८॥
ENMSS@5809@1इति धर्मतरोर्मूलम् अशुद्धं यस्य मानसम् ।
ENMSS@5809@2शुद्धं यस्य च तद्रूपं फलं तस्य न संशयः ॥ ५८०९॥
ENMSS@5810@1इति निखिलमुदारमर्थसार्थ- प्रणिहितमेकमिहेव खड्गशास्त्रे ।
ENMSS@5810@2गिरिशमतमिदं निषेव्य चक्रे क्षितिपतिमन्त्रिसमूहचक्रवर्ती ॥ ५८१०॥
ENMSS@5811@1इति नेत्रादिविकारैर् वशमुपनीतं प्रलीनधैर्याङ्गम् ।
ENMSS@5811@2मारग्रहाभिभूतं परिमृष्टप्राङ्गिराकृतिस्मरणम् ॥ ५८११॥
ENMSS@5812@1प्रादुर्भूतरिरंसं क्षणे क्षणे जघनदेशगतदृष्टिम् ।
ENMSS@5812@2पक्वाम्रमिव विमोक्ष्यसि पूर्ववदाचूष्य निःशेषम् ॥ ५८१२॥
ENMSS@5813@1इति पथि विनिवेशितात्मनो रिपुरपि गच्छति साधु मित्रताम् ।

ENMSS@5813@2तदवनिपतिमत्सराद‍ृते  विनयगुणेन जगद् वशं नयेत् ॥ ५८१३॥
ENMSS@5814@1इति परिगणितार्थः शास्त्रमार्गानुसारी  नियमयति यतात्मा यः प्रजा दण्डनीत्या ।
ENMSS@5814@2अपुनरपगमाय प्राप्तमार्गप्रचारा  सरित इव समुद्रं संपदस्तं विशन्ति ॥ ५८१४॥
ENMSS@5815@1इति परिणयमित्थं यानमेकत्र याने  दरचकितकटाक्षप्रेक्षणं चानयोस्ततत् ।
ENMSS@5815@2दिवि दिविषदधीशाः कौतुकेनावलोक्य  प्रणिदधुरिव गन्तुं नाकमानन्दसान्द्राः ॥ ५८१५॥
ENMSS@5816@1इति पूर्वकर्मनियतं  भवितव्यं जगति यस्य जन्तोर्यत् ।
ENMSS@5816@2तदयत्नेन स पुरतः  पतितं प्राप्नोत्यसाध्यमपि ॥ ५८१६॥
ENMSS@5817@1इति प्रकुपितोरगप्रमुखभङ्गुरां सर्वदा  निधाय निजचेतसि प्रबलदुःखदां संसृतिम् ।
ENMSS@5817@2विमुञ्चत परिग्रहग्रहमनार्जवं सज्जना  यदीच्छत सुखामृतं रसितुमस्तसर्वाशुभम् ॥ ५८१७॥
ENMSS@5818@1इति प्रवीरे सुभगे च सत्यतो  विवेकिनीनामपि देव योषिताम् ।
ENMSS@5818@2चलं मनो धावति यत्र कुत्रचिद्  विशुद्धसत्त्वा विरलाः पुनः स्त्रियः ॥ ५८१८॥
ENMSS@5819@1इति प्रिये पृच्छति मानविह्वला  कथंचिदन्तर्धृतबाष्पगद्गदम् ।
ENMSS@5819@2न किंचिदित्येव जगाद यद् वधूः  कियन् न तेनैव तयास्य वर्णितम् ॥ ५८१९॥
ENMSS@5820@1इति बहुभिरुपायैः कुट्टनी कामुकानां  कृतसुकृतविहीना वञ्चनां सा कृतघ्ना (?) ।
ENMSS@5820@2वनभुवि मृगबन्धं हन्त पश्यन्ति नित्यं  तदपि हरिणशावाः कूटपाशं विशन्ति ॥ ५८२०॥
ENMSS@5821@1इति मदमदनाभ्यां रागिणः स्पष्टरागान्  अनवरतरतश्रीसङ्गिनस्तानवेक्ष्य ।
ENMSS@5821@2अभजत परिवृत्तिं साथ पर्यस्तहस्ता  रजनिरवनतेन्दुर्लज्जयाधोमुखीव ॥ ५८२१॥
ENMSS@5822@1इति मुषितधियः श्रिया प्रयान्त्या  रभसवशादविचिन्त्य दग्धभूपाः ।
ENMSS@5822@2बलभरबहुमानतः पतङ्ग-  व्रतमुपयान्ति परप्रतापदीपे ॥ ५८२२॥

ENMSS@5823@1इति यस्मादुभौ लोकौ धारयत्यात्मवान् नृपः ।
ENMSS@5823@2प्रजानां च ततः सम्यग् दण्डं दण्डीव धारयेत् ॥ ५८२३॥
ENMSS@5824@1इति रतिसमयोपदेशयुक्त्या  रतगुरुदर्शितया पुरंध्रिलोकः ।
ENMSS@5824@2निजपरपरभागवृत्तिमौज्झीत्  स्मरपरमाद्वयभूमिकानिलीनः ॥ ५८२४॥
ENMSS@5825@1इति राजगुणानेतान् यथोक्तान् योऽनुतिष्ठति ।
ENMSS@5825@2अनुभूयेह भद्राणि प्रेत्य स्वर्गे महीयते ॥ ५८२५॥
ENMSS@5826@1इति राज्यकलत्रमित्रपुत्रान्  गृहधामं च तृणाय मन्यमानः ।
ENMSS@5826@2गुरुसत्त्वरजस्तमः कलङ्कां  प्रकृतिं हातुमगाद् वनं नरेन्द्रः
॥ ५८२६॥
ENMSS@5827@1इति वचनं भूमिपतेः  श्रुत्वा मन्त्री विहस्य सासूयः ।
ENMSS@5827@2तमुवाच कस्य राजन्  वेश्याचरितेऽस्ति विश्वासः ॥ ५८२७॥
ENMSS@5828@1इति वदति सखीजने निमीलद्-  द्विगुणितसान्द्रतराक्षिपक्ष्ममाला
।
ENMSS@5828@2अपतदलिभयेन भर्तुरङ्कं  भवति हि विक्लवता गुणोऽङ्गनानाम् ॥
५८२८॥
ENMSS@5829@1इति वदति सखीजनेऽनुरागाद्  दयिततमामपरश्चिरं प्रतीक्ष्य ।
ENMSS@5829@2तदनुगमवशादनायतानि  न्यधित मिमान इवावनीं पदानि ॥ ५८२९॥
ENMSS@5830@1इति विरचितबन्धा पद्धतिर्या मयेयं  सकलगुणिगणानां प्रीतये सास्तु
नित्यम् ।
ENMSS@5830@2विपुलविमलदीव्यत्सत्कलानां निधानं  तरुणतरणिरुद्धा विद्विषत्कौशिकानाम्
॥ ५८३०॥
ENMSS@5831@1इति विस्मृतान्यकरणीयमात्मनः  सचिवावलम्बितधुरं धराधिपम् ।
ENMSS@5831@2परिवृद्धरागमनुबन्धसेवया  मृगया जहार चतुरेव कामिनी ॥ ५८३१॥
ENMSS@5832@1इति शासति सेनान्यां गच्छतस्ताननेकधा ।
ENMSS@5832@2निषिध्य हसता किंचित् तस्थे तत्रान्धकारिणा ॥ ५८३२॥
ENMSS@5833@1इति संसारदुःखार्कतापतापितचेतसाम् ।
ENMSS@5833@2विमुक्तिपादपच्छायाम् ऋते कुत्र सुखम् नृणाम् ॥ ५८३३॥
ENMSS@5834@1इति सशरीरया क्षणमिव क्षणदाः क्षपयन्  सह विशरीरया दयितया
विरसान् दिवसान् ।
ENMSS@5834@2दिनरजनीविहारविपरीतमहं चरितै  रथचरणाह्वयस्य चरितानि
विडम्बितवान् ॥ ५८३४॥
ENMSS@5835@1इति स्त्रियो देवि महाकुलोद्गताः  विशुद्धधीरैश्चरितैरुपासते ।

ENMSS@5835@2सदैव भर्तारमनन्यमानसाः पतिः सतीनां परमं हि दैवतम् ॥ ५८३५॥

ENMSS@5836@1इति स्फुटं तद्वचसस्तयादरात् सुरस्पृहारोपविडम्बनादपि ।

ENMSS@5836@2कराङ्कसुप्तैककपोलकर्णया श्रुतं च तद्भाषितमश्रुतं च तत् ॥ ५८३६॥

ENMSS@5837@1इति स्मरः शीघ्रमतिश्चकार तं वधूं च रोमाञ्चभरेण कर्कशौ ।

ENMSS@5837@2स्खलिष्यति स्निग्धतनुः प्रियादियं म्रदीयसी पीडनभीरुदोर्युगात् ॥ ५८३७॥

ENMSS@5838@1इति स्म राजा नयवर्त्मना व्रजन् समुद्यमी मण्डलशुद्धिमाचरेत् ।

ENMSS@5838@2विराजते साधु विशुद्धमण्डलः शरच्छशीव प्रतिरञ्जयन् प्रजाः ॥ ५८३८॥

ENMSS@5839@1इति स्म राजा विनयं नयान्वितो निषेवमाणो नरदेवसेवितम् ।

ENMSS@5839@2पदं समाक्रामति भास्वरं श्रियः शिरो महारत्नगिरेरिवोन्नतम् ॥ ५८३९॥

ENMSS@5840@1इतिहासपुराणानि श्रृणुयात् तदनन्तरम् ।

ENMSS@5840@2भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह ॥ ५८४०॥

ENMSS@5840A@1ईतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

ENMSS@5840A@2बिभेत्यल्पश्रुताद् वेदो मामयं प्रचरिष्यति ॥

ENMSS@5841@1इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः ।

ENMSS@5841@2पञ्चभ्य इव भूतेभ्यो लोकसंविधयस्त्रयः ॥ ५८४१॥

ENMSS@5842@1इतीरयित्वा विरतां स तां पुनर् गिरानुजग्राहतरां नराधिपः ।

ENMSS@5842@2विरुत्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ॥ ५८४२॥

ENMSS@5843@1इतीष्टमप्यनिष्टाय जायतेऽविधिना कृतम् ।

ENMSS@5843@2तस्मान् न विधिमुत्सृज्य प्राज्ञः कुर्वीत किंचन ।

ENMSS@5843@3अप्रेक्षापूर्वकारी च निन्द्यतेऽवद्यकृत् क्षणात् ॥ ५८४३॥

ENMSS@5844@1इतो गङ्गाभङ्गा घटिततटभङ्गा पुनरितो दवज्वाला ज्वालाज्वलिततरुमाला वनभुवः ।

ENMSS@5844@2सरंहः सिंहोऽग्रे ध्वनति मम हंहो न हि गतिर् विना दैवं दैवं हरिणशिशुरेवं प्रलपति ॥ ५८४४॥

ENMSS@5845@1इतो दावज्वालः स्थलभुव इतो जालजटिला इतो व्याधो धावत्ययमनुपदं वक्रितधनुः ।

ENMSS@5845@2इतोऽप्यग्रे तिष्ठत्ययमजगरो विस्तृतमुखः क्व यायात् किं कुर्यान्

मृगशिशुरयं दैववशगः ॥ ५८४५॥

ENMSS@5846@1इतो न किंचित् परतो न किंचिद्  यतो यतो यामि ततो न किंचित् ।

ENMSS@5846@2विचार्यमाणं हि जगन् न किंचित्  स्वात्मावबोधादधिकं न किंचित् ॥ ५८४६॥

ENMSS@5847@1इतो भ्रष्टस्ततो भ्रष्टः परमेकान्तिवेषभाक् ।

ENMSS@5847@2न सम्सारसुखं तस्य नैव मुक्तिसुखं भवेत् ॥ ५८४७॥

ENMSS@5848@1इतो मृत्युरितो व्याधिरितो विपदितो जरा ।

ENMSS@5848@2चतुरङ्गा तुल्यबला हन्ति लोकमनित्यता ॥ ५८४८॥

ENMSS@5849@1इतो विद्युत्पुञ्जस्फुरितमसकृद् भावयतु माम्  इतः केकानेका हरतु हृदयं निर्दयमिदम् ।

ENMSS@5849@2इतः कामो वामः प्रहरतु मुहुः पुङ्खितशरो  गतासि त्वं दूरे चपलनयने प्रेयसि यतः ॥ ५८४९॥

ENMSS@5850@1इतो विद्युद्वल्लीविलसितमितः केतकतरु-  स्फुरद्गन्धः प्रोद्यज्ञलदनिनदस्फूर्जितमितः ।

ENMSS@5850@2इतः केकिक्रीडाकलकलरवः पक्ष्मलदृशां  कथं यास्यन्त्येते विरहदिवसाः संभृतरसाः ॥ ५८५०॥

ENMSS@5851@1इतो विपिनपङ्क्तयस्तिलकिता रसालाङ्कुरैर् मरुन्मलयभूरितः कलमितः पिकीनां रुतम् ।

ENMSS@5851@2इतश्च नवचम्पकैः सुरभिताः समन्ताद् दिशस् तदद्य मयि तां विना भजतु घस्मरत्वं स्मरः ॥ ५८५१॥

ENMSS@5852@1इतो हास्यतरं लोके किंचिदन्यन् न विद्यते ।

ENMSS@5852@2यत् तु दुर्जन इत्याह सज्ञनं दुर्जनः स्वयम् ॥ ५८५२॥

ENMSS@5853@1इत्थं कविकुटुम्बस्य वचांसि विचिनोति यः ।

ENMSS@5853@2अनिद्धवचनस्यापि तस्य वश्या सरस्वती ॥ ५८५३॥

ENMSS@5854@1इत्थं केलिततीर्विहृत्य यमुनाकूले समं राधया तद्रोमावलिमौक्तिकावलियुगे वेणीभ्रमं बिभ्रति ।

ENMSS@5854@2तत्राह्लादिकुचप्रयागफलयोर्लिप्सावतोर्हस्तयोर् व्यापाराः पुरुषोत्तमस्य ददतु स्फीतं मुदां संपदम् ॥ ५८५४॥

ENMSS@5855@1इत्थं क्रियासु निवसन्त्यपि यासु तासु  पुंसां श्रियः प्रबलसत्त्वबहिष्कृतासु ।

ENMSS@5855@2एवं च साहसधनेष्वथ बुद्धिमत्सु संतुष्य दाननिरताः क्षितिपा भवन्ति ॥ ५८५५॥

ENMSS@5856@1इत्यैहिकेन च पुरा विहितेन चापि स्वेनैव कर्मविभवेन शुभाशुभेन ।

ENMSS@5856@2शश्वद् भवेत् तदनुरूपविचित्रभोगः सर्वो हि नाम ससुरासुर एष सर्गः ॥ ५८५६॥

ENMSS@5857@1इत्थं चोपार्जितो यत्नाद् गुणोऽपि विधुरे विधौ ।

ENMSS@5857@2संपत्तये न न परं जायते तु विपत्तये ॥ ५८५७॥

ENMSS@5858@1मूले ह्यविकृते सदा सिक्ते प्रज्ञानवारिणा ।

ENMSS@5858@2नयालवालः फलति प्रायः पौरुषपादपः ॥ ५८५८॥

ENMSS@5859@1इत्थं तल्पतलाधिरोहणमियं पर्णार्पणप्रक्रिया शय्याया वचनक्रमस्य दयितस्यैवंविधाराधना ।

ENMSS@5859@2एवं केलिगृहोपदेहलि बलादानीयमाना मुहुश् चाटूक्तिप्रकरैश्चिरं नववधूरालीभिरध्याप्यते ॥ ५८५९॥

ENMSS@5859A@1इत्थं तेन निरीक्षितं न च मयाप्येवं समालोकितस् तेनोक्तं सुभगेन तत्र न मया दत्तं वचो मन्दया ।

ENMSS@5859A@2तत्सत्यं कथयालि किं स सुभगः कुप्येन् न मह्यं गत इत्युक्त्वा सुदृशा कयापि वलितग्रीवं दृशौ स्फारिते ॥

ENMSS@5860@1इत्थं दुरवधार्यैव स्त्रीचित्तस्य गतिः किल ।

ENMSS@5860@2अन्यासक्तिं च कुर्वन्ति म्रियन्ते च पतिं विना ॥ ५८६०॥

ENMSS@5861@1इत्थं धर्मार्जिता लक्ष्मीरासंतत्यनपायिनी ।

ENMSS@5861@2इतरा तु जलापाततुषारकणनश्वरी ॥ ५८६१॥

ENMSS@5862@1अतो यतेत धर्मेण धनमर्जयितुं पुमान् ।

ENMSS@5862@2राजा तु सुतरां येन मूलं राज्यतरोर्धनम् ॥ ५८६२॥

ENMSS@5863@1इत्थं वृढतरवामित- मनसां पुंसामसांप्रतं पुरतः ।

ENMSS@5863@2वेशविलासवतीनाम् अशरीरशरव्यथाकथनम् ॥ ५८६३॥

ENMSS@5864@1इत्थं नारीर्घटयितुमलं कामिभिः काममासन् प्रालेयांशोः सपदि रुचयः

शान्तमानान्तरायाः ।

ENMSS@5864@2आचार्यत्वं रतिषु विलसन्मन्मथश्रीविलासा ह्रीप्रत्यूहप्रशमकुशलाः शीधवश्चक्रुरासाम् ॥ ५८६४॥

ENMSS@5865@1इत्थं पशुपतिपेशल- पाशकलीलाप्रयुक्तवक्रोक्तेः ।

ENMSS@5865@2हर्षवशतरलतारकम्  आननमव्याद् भवान्या वः ॥ ५८६५॥

ENMSS@5866@1इत्थं प्रज्ञैव नामेह प्रधानं लोकवर्तनम् ।

ENMSS@5866@2जीवत्यर्थदरिद्रोऽपि धीदरिद्रो न जीवति ॥ ५८६६॥

ENMSS@5867@1इत्थं फलति शुद्धेन सिक्तं संकल्पवारिणा ।

ENMSS@5867@2पुण्यबीजमपि स्वल्पं पुंसां कृषिकृतामिव ॥ ५८६७॥

ENMSS@5868@1तदेव दूषितं देवि दुष्टसंकल्पपाथसा ।

ENMSS@5868@2फलत्यनिष्टम् ॥। ॥। ॥। ॥। ॥ ५८६८॥

ENMSS@5869@1इत्थं मधूत्थं रसमुद्गिरन्ती  तदोष्ठबन्दूकधनुर्विसृष्टा ।

ENMSS@5869@2कर्णात् प्रसूनाशुगपञ्चबाणी  वाणीमिषेणास्य मनो विवेश ॥ ५८६९॥

ENMSS@5870@1इत्थं युक्तिमुपायानां कुर्वाणस्य चतुष्टयीम् ।

ENMSS@5870@2व्रजतीन्दुप्रभागौरं परैरक्षय्यतां यशः ॥ ५८७०॥

ENMSS@5871@1इत्थं विहृत्य वनिताभिरुदस्यमानं  पीनस्तनोरुजघनस्थलशालिनीभिः ।

ENMSS@5871@2उत्सर्पितोर्मिचयलङ्घिततीरदेशम्  औत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ ५८७१॥

ENMSS@5872@1इत्थं सभापतिर्भूत्वा यः काव्यानि परीक्षते ।

ENMSS@5872@2यशस्तस्य जगद्व्यापि स सुखी तत्र तत्र च ॥ ५८७२॥

ENMSS@5873@1इत्थं समुत्थविरहानलतीव्रताप-  संतापिताङ्ग करिपुङ्गव मुञ्च शोकम् ।

ENMSS@5873@2धात्रा स्वहस्तलिखितानि ललाटपट्टे  को वाक्षराणि परिमार्जयितुं समर्थः

॥ ५८७३॥

ENMSS@5874@1इत्थं सुबुद्धिरल्पेन देव यत्नेन बोध्यते ।

ENMSS@5874@2न कृच्छ्रेणापि महता निर्विचारमतिः पुनः ॥ ५८७४॥

ENMSS@5875@1इत्थं स्वदुर्नयविपाकवशेन दिव्याः  शापच्युता ह्यवतरन्ति मनुष्यलोके ।

ENMSS@5875@2भुक्त्वा फलं तदुचितं च निजां गतिं ते  पूर्वार्जितेन सुकृतेन पुनः प्रयान्ति ॥ ५८७५॥

ENMSS@5876@1इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।

ENMSS@5876@2शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ॥ ५८७६॥

ENMSS@5877@1इत्यगुह्यं निगूहन्ते गुह्यं प्रकटयन्ति च ।

ENMSS@5877@2मौर्ख्याभिमानेनादातुं मूर्खाः प्रत्ययमात्मनि ॥ ५८७७॥

ENMSS@5878@1इत्यङ्गैः संयुतः सर्वैर्देहिनो बालकाकृतिः ।

ENMSS@5878@2मातुराहाररसतो देहे गर्भोऽभिवर्धते ॥ ५८७८॥

ENMSS@5879@1इत्यज्ञानतमश्छन्नाः स्वदोषोन्मार्गगामिनः ।

ENMSS@5879@2अपुरस्कृतसच्छास्त्रदीपा भ्रश्यन्ति निश्चितम् ॥ ५८७९॥

ENMSS@5880@1इत्यनर्थाय शब्दैकपरो तात्पर्यविज्ञडः ।

ENMSS@5880@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ५८८०॥

ENMSS@5881@1इत्यनुद्वेगशीला ये भव्या धैर्यावलम्बनाः ।

ENMSS@5881@2दूरभ्रष्टामपि निजां भूमिं संप्राप्नुवन्ति ते ॥ ५८८१॥

ENMSS@5882@1इत्यन्यदुपचारेण मित्रमन्यत् तु सत्यतः ।

ENMSS@5882@2तुल्येऽपि स्निग्धतायोगे तैलं तैलं घृतं घृतम् ॥ ५८८२॥

ENMSS@5883@1इत्यन्यरक्तचित्ता स्त्रीभुजङ्गी हन्त्यसंशयम् ।

ENMSS@5883@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ५८८३॥

ENMSS@5884@1इत्यबुद्धिधनाधाननिधानैर्विविधोदयैः ।

ENMSS@5884@2कूटपण्यैरसामान्यैस्तारुण्यमतिवाह्यते ॥ ५८८४॥

ENMSS@5885@1इत्यर्थलोभान् मिथ्यैव विज्ञानख्यापनेच्छवः ।

ENMSS@5885@2मूर्खाः पुत्रमपि घ्नन्ति न रज्येत् तेषु बुद्धिमान् ॥ ५८८५॥

ENMSS@5886@1इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैव ।

ENMSS@5886@2श्रोष्यत्यस्मात् परमवहिता सौम्य सीमन्तिनीनां कान्तोदन्तः सुहृदुपनतः संगमात् किंचिदूनः ॥ ५८८६॥

ENMSS@5887@1इत्यादिगुणसंपन्ने लोकयात्राविदि स्थिरे ।

ENMSS@5887@2निर्वृतः पितरीवास्ते यत्र लोकः स पार्थिवः ॥ ५८८७॥

ENMSS@5888@1इत्यादि दूष्यान् संदूष्य प्रजानामभिवृद्धये ।

ENMSS@5888@2विनयञ् श्रियमुत्कर्षं राजा शल्यं समुद्धरेत् ॥ ५८८८॥

ENMSS@5889@1इत्युक्तवत्या यदलोपि लज्जा सानौचिती चेतसि नश्चकास्तु ।

ENMSS@5889@2स्मरस्तु साक्षी तददोषतायाम् उन्माद्य यस्तत्तदवीवदत् ताम् ॥ ५८८९॥

ENMSS@5890@1इत्युद्गते शशिनि पेशलकान्तदूती- संलापसंचलितलोचनमानसाभिः ।

ENMSS@5890@2अग्राहि मण्डनविधिर्विपरीतभूषा- विन्यासहासितसखीजनमङ्गनाभिः ॥ ५८९०॥

ENMSS@5891@1इत्येतत् तपसो देवा महाभाग्यं प्रचक्षते ।

ENMSS@5891@2सर्वस्यास्य प्रपश्यन्तस्तपसः पुण्यमुद्भवम् ॥ ५८९१॥

ENMSS@5892@1इत्येताः कुटिलतराः  क्रूराचारा गतत्रपाश्चपलाः ।

ENMSS@5892@2यो नाम वेत्ति रामाः  स स्त्रीभिर्णैव वञ्च्यते मतिमान् ॥ ५८९२॥

ENMSS@5893@1इत्येवं बहुहृदया  बहुजिह्वा बहुकराश्च बहुमायाः ।

ENMSS@5893@2तत्त्वेन सत्यरहिताः  को जानाति स्फुटं वेश्याः ॥ ५८९३॥

ENMSS@5894@1इत्येवं योषितो राजन् भेदस्य व्यसनस्य च ।

ENMSS@5894@2पराभवस्य च पदं सेवेताशङ्कितोऽथ ताः ॥ ५८९४॥

ENMSS@5895@1इदं कविवरैर्नित्यम् आख्यानमुपजीव्यते ।

ENMSS@5895@2उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः ॥ ५८९५॥

ENMSS@5896@1इदं किं ते न्यस्तं वलयिनि करे वक्त्रकमलं  न युक्तः कोपोऽयं प्रणयिनि निरागस्यपि जने ।

ENMSS@5896@2ब्रुवाणे मय्येवं श्वसनविषमोत्कम्पितकुचं  मृगाक्ष्यास्तत्कालं नयनजलमेवोत्तरमभूत् ॥ ५८९६॥

ENMSS@5897@1इदं किलाव्याजमनोहरं वपुस् तपःक्षमं साधयितुं य इच्छति ।

ENMSS@5897@2ध्रुवं स नीलोत्पलपत्रधारया  समिल्लतां छेत्तुमृषिर्व्यवस्यति ॥ ५८९७॥

ENMSS@5898@1इदं कृतमिदं कार्यम् इदमन्यत् कृताकृतम् ।

ENMSS@5898@2एवमीहासुखासक्तं कृतान्तः कुरुते वशे ॥ ५८९८॥

ENMSS@5899@1इदं कृष्णं कृष्णं प्रियतम ननु श्वेतमथ किं  गमिष्यामो यामो भवतु गमनेनाथ भवतु ।

ENMSS@5899@2पुरा येनैवं मे चिरमनुसृता चित्तपदवी  स एवान्यो जातः सखि परिचिताः

कस्य पुरुषाः ॥ ५८९९॥

ENMSS@5900@1इदं च त्वां सर्वपरं ब्रवीमि  पुण्यं पदं तात महाविशिष्टम् ।

ENMSS@5900@2न जातु कामान् न भयान् न लोभाद्  धर्मं त्यजेज्जीवितस्यापि हेतोः ॥ ५९००॥

ENMSS@5901@1इदं ज्ञेयमिदं ज्ञेयम् इति यस्तृषितश्चरेत् ।

ENMSS@5901@2अपि कल्पसहस्रेषु नैव ज्ञेयमवाप्नुयात् ॥ ५९०१॥

ENMSS@5902@1इदं तत् कालिन्दीतटमिह हि कंसासुरभिदो  यशः शृण्वद् वक्त्रं स्खलितकवलं गोकुलमभूत् ।

ENMSS@5902@2भ्रमाद् वेणुक्काणप्रणयमसृणोत्तारमधुर-  स्वराभिर्गोपीभिर्दिशि दिशि समुद्गीर्णमनिशम् ॥ ५९०२॥

ENMSS@5903@1इदं तत् स्नेहसर्वस्वं सममाढ्यदरिद्रयोः ।
ENMSS@5903@2अचन्दनमनौशीरं हृदयस्यानुलेपनम् ॥ ५९०३॥
ENMSS@5904@1इदं तावच्चित्रं यदवनितले पार्वणशशी कलङ्कादुन्मुक्तः किमपि च तदन्तर्विलसति ।
ENMSS@5904@2प्रवालं माणिक्यं कुवलयदलं मन्मथधनुर् मनोवीणावादध्वनिरिति महच्चित्रमधरम् ॥ ५९०४॥
ENMSS@5905@1इदं ते केनोक्तं कथय कमलातङ्कवदने यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम् ।
ENMSS@5905@2इदं तद् दुःसाधाक्रमणपरमास्त्रं स्मृतिभुवा तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥ ५९०५॥
ENMSS@5906@1इदं त्विहोत्पातयुगं प्थिव्यां महाभयं शाकुनिका वदन्ति ।
ENMSS@5906@2यद् वायसो मैथुनसंनिविष्टो दृश्येत यद् वा धवलः कदाचित् ॥ ५९०६॥
ENMSS@5907@1इदं दूर्वाकाण्डद्युतिमुषि कपोले कतिपयैः श्रमाम्भोभिः कीर्णं सहजबकुलामोदसुभगम् ।
ENMSS@5907@2समाकाङ्क्षे ताम्राधरमनुमनुष्व प्रियतमे मनोज्ञं ते पातुं मुखकमलमाघ्रातुमथवा ॥ ५९०७॥
ENMSS@5908@1इदं नभसि भीषणभ्रमदुलूककोलाहले निशाचरविलासिनीनिवहदत्तनेत्रोत्सवे ।
ENMSS@5908@2परिस्फुरति निर्भरप्रचुरपङ्कमग्नोल्लसद्- वराहकुलमांसलं प्रबलबन्दमन्धं तमः ॥ ५९०८॥
ENMSS@5909@1इदं नासीन् न चोत्पन्नं न चासीन् न भविष्यति ।
ENMSS@5909@2तत् तद् ब्रह्मैव सद्रूपम् इदमित्थमवस्थितम् ॥ ५९०९॥
ENMSS@5910@1इदं नृपप्रार्थिभिरुज्झितोऽर्थिभिर् मणिप्ररोहेण विवृध्य रोहणः ।
ENMSS@5910@2कियद्दिनैरम्बरमावरिष्यते मुधा मुनिर्विन्ध्यमरुन्ध भूधरम् ॥ ५९१०॥
ENMSS@5911@1इदं परमसुन्दरं तनुपुरं कुरङ्गीदृशां निवार्य खलु शैशवं स्वयमनेन नीतं बलात् ।
ENMSS@5911@2तदागमनशङ्कया मकरकेतुना किं कृतं पयोधरधराधरौ त्रिवलिवाहिनीदुस्तरौ ॥ ५९११॥
ENMSS@5912@1इदं प्रकृत्या विषयैर्वशीकृतं परस्परस्त्रीधनलोलुपं जगत् ।
ENMSS@5912@2सनातने वर्त्मनि साधुसेविते प्रतिष्ठते दण्डभयोपपीडितम् ॥ ५९१२॥

ENMSS@5913@1इदं प्रायो लोके न परिचितपूर्वं नयनयोर् न याञ्चा यत् पुंसः सुगुणपरिमाणं लघयति ।

ENMSS@5913@2विशद्धिर्विश्वात्मा स्ववपुषि बलिप्रार्थनकृते त्रपालीनैरङ्गैर्यदयमभवद् वामनतनुः ॥ ५९१३॥

ENMSS@5914@1इदं मघोनः कुलिशं धारासंनिहितानलम् ।

ENMSS@5914@2स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥ ५९१४॥

ENMSS@5915@1इदं मदं चन्द्रमसः समन्ताद् अस्मत्सपत्नस्य हरिष्यतीति ।

ENMSS@5915@2यस्मिन् पुरन्ध्रीवदनस्यलक्ष्मीं निजां व्यधुः प्राभृतमम्बुजानि ॥ ५९१५॥

ENMSS@5916@1इदं युगसहस्रेषु भविष्यदभवद् दिनम् ।

ENMSS@5916@2तदप्यद्यत्वमापन्नं का कथा मरणावधेः ॥ ५९१६॥

ENMSS@5917@1इदं लब्धमिदं नष्टम् इदं लप्स्ये मनोरथम् ।

ENMSS@5917@2इदं चिन्तयतामेव जीर्णमायुः शरीरिणाम् ॥ ५९१७॥

ENMSS@5918@1इदं वक्त्रं साक्षाद् विरहितकलङ्कः शशधरः सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ।

ENMSS@5918@2इमे नेत्रे रात्रिंदिवमधिकशोभे कुवलये तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥ ५९१८॥

ENMSS@5919@1इदं विश्वं कुटुम्बो न इति येषां सुनिश्चयः ।

ENMSS@5919@2ते शान्ताः परमोदाराः केषां वन्द्या न साधवः ॥ ५९१९॥

ENMSS@5920@1इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा प्रियाशोको जीवं कुसुममिव घर्मो ग्लपयति ।

ENMSS@5920@2स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभस् तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम् ॥ ५९२०॥

ENMSS@5921@1इदं व्योमसरोमध्ये भाति चन्द्रसितोत्पलम् ।

ENMSS@5921@2मलिनोऽन्तर्गतो यत्र कलङ्को भ्रमरायते ॥ ५९२१॥

ENMSS@5922@1इदं शरीरं पुरुषस्य मोहजं यथा पृथग् भौतिकमीयते गृहम् ।

ENMSS@5922@2यथौदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ५९२२॥

ENMSS@5923@1यथानलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक् स्थितः ।

ENMSS@5923@2यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ॥ ५९२३॥

ENMSS@5924@1इदं शरीरं श्लथसंधि जर्जरं पतत्यवश्यं परिणामदुर्वहम् ।

ENMSS@5924@2किमौषधं पृच्छसि मूढ दुर्मते  निरामयं कृष्णरसायनं पिब
॥ ५९२४॥

ENMSS@5925@1इदं शीतं पाथः पिबत पथिका मुञ्चत मनाक्  पथः श्रान्तिं कान्तास्मृतिजनितचिन्ताद्विगुणिताम् ।

ENMSS@5925@2इति स्फीतापाङ्गं मृदुमधुरवाग्भङ्गिहसितं  प्रपापालीमाला हरति तरुणानां पथि गतिम् ॥ ५९२५॥

ENMSS@5926@1इदं स्वजनदेहजातनयमातृभार्यामयं  विचित्रमिह केनचिद् रचितमिन्द्रजालं ननु ।

ENMSS@5926@2क्व कस्य कथमत्र को भवति तत्त्वतो देहिनः
स्वकर्मवशवर्तिनस्त्रिभुवने निजो वा परः ॥ ५९२६॥

ENMSS@5927@1इदं स्वस्त्ययनं श्रेष्ठम् इदं बुद्धिविवर्धनम् ।

ENMSS@5927@2इदं यशस्यं सततम् इदं निःश्रेयसं परम् ॥ ५९२७॥

ENMSS@5928@1इदं हि पुंसस्तपसः श्रुतस्य वा  स्विष्टस्य सूक्तस्य च बुद्धदत्तयोः ।

ENMSS@5928@2अविच्युतोऽर्थः कविभिर्निरूपितो  यदुत्तमश्लोकगुणानुवर्णनम् ॥ ५९२८॥

ENMSS@5929@1इदं हि प्राणयशसं क्रयविक्रयपत्तनम् ।

ENMSS@5929@2स्वामिसत्कारशल्यानाम् अत्रैवोद्धरणी क्रिया ॥ ५९२९॥

ENMSS@5930@1इदं हि माहात्म्यविशेषसूचकं  वदन्ति चिह्नं महतां मनीषिणः ।

ENMSS@5930@2मनो यदेषां सुखदुःखसंभवे  प्रयाति नो हर्षविषादवश्यताम् ॥ ५९३०॥

ENMSS@5931@1इदं हि वैदग्ध्यरहस्यमुत्तमं  पठेन् न सूक्तिं कविमानिनः पुरः ।

ENMSS@5931@2न केवलं तां न विभावयत्यसौ  स्वकाव्यबन्धेन विनाशयत्यपि ॥ ५९३१॥

ENMSS@5932@1इदमनन्यपरायणमन्यथा  हृदयसंनिहिते हृदयं मम ।

ENMSS@5932@2यदि समर्थयसे मदिरेक्षणे  मदनबाणहतोऽस्मि हतः पुनः ॥ ५९३२॥

ENMSS@5933@1इदमनुचितमक्रमश्च पुंसां  यदिह जरस्यपि मान्मथो विकारः ।

ENMSS@5933@2यदपि च न कृतं नितम्बिनीनां  स्तनपतनावधि जीवितं रतं वा
॥ ५९३३॥

ENMSS@5934@1इदमनुदितहोतुः कोऽपि होमावसान-  ज्वलदनलमवादीत् कुण्डमाखण्डलस्य ।

ENMSS@5934@2मणिघटमभिषेके प्रातरस्योचुरेके  कलितकिरणतोयं मण्डलं चण्डभासः
॥ ५९३४॥

ENMSS@5935@1इदमन्तरमुपकृतये  प्रकृतिचला यावदर्थिसंपदियम् ।

ENMSS@5935@2विपदि नियतोदयायां पुनरुपकर्तुं कुतोऽवसरः ॥ ५९३५॥
ENMSS@5936@1इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
ENMSS@5936@2यदि शब्दाह्वयं ज्योतिरा संसारान् न दीप्यते ॥ ५९३६॥
ENMSS@5937@1इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम् ।
ENMSS@5937@2दृष्ट्वैव पुरुषं हृद्यं योनिः प्रक्लिद्यते स्त्रियाः ॥ ५९३७॥
ENMSS@5938@1इदमपटु कपाटं जर्जरः पञ्जरोऽयं विरमति न गृहेऽस्मिन् क्रूरमार्जारयात्रा ।
ENMSS@5938@2शुक मुकुलितजिह्वं स्थीयतां किं वचोभिस् तव वचनविनोदे नादरः पामराणाम् ॥ ५९३८॥
ENMSS@5939@1इदमपरमद्भुततमं युवतिसहस्रैर्विलुप्यमानस्य ।
ENMSS@5939@2वृद्धिर्भवति न हानिर् यत् तव सौभाग्यकोषस्य ॥ ५९३९॥
ENMSS@5940@1इदमपास्य विरागि परागिणीर् अलिकदम्बकमम्बुरुहां ततीः ।
ENMSS@5940@2स्तनभरेण जितस्तबकानमन्- नवलते वलतेऽभिमुखं तव ॥ ५९४०॥
ENMSS@5941@1इदमप्रतिमं पश्य सरः सरसिजैर्वृतम् ।
ENMSS@5941@2सखे मा जल्प नारीणां नयनानि दहन्ति माम् ॥ ५९४१॥
ENMSS@5942@1इदममृतममेयं सेयमानन्दसिन्धुर् मधुमधुरमपीदं किंचिदन्तर्धुनोति
।
ENMSS@5942@2यदयमुदयलीलीलालसानां वधूनां रतिविनिमयभाजां केलिभिर्याति कालः
॥ ५९४२॥
ENMSS@5943@1इदमम्लानमानाया लग्नं स्तनतटे तव ।
ENMSS@5943@2छाद्यतामुत्तरीयेण नवं नखपदं सखि ॥ ५९४३॥
ENMSS@5944@1इदमयुक्तमहो महदेव यद् वरतनोः स्मरयत्यनिलोऽन्यदा ।
ENMSS@5944@2स्मृतसयौवनसोष्मपयोधरान् सतुहिनस्तु हिनस्तु वियोगिनः ॥ ५९४४॥
ENMSS@5945@1इदमशिशिरैरन्तस्तापाद् विवर्णमणीकृतं निशि निशि भुजन्यस्तापाङ्गप्रसारिभिरश्रुभिः ।
ENMSS@5945@2अनभिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात् कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥ ५९४५॥
ENMSS@5946@1इदमसुलभवस्तुप्रार्थनादुर्निवारं प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।
ENMSS@5946@2किमुत मलयवातोन्मूलितापाण्डुपत्रैर् उपवनसहकारैर्दर्शितेष्वङ्कुरेषु

॥ ५९४६॥

ENMSS@5947@1इदमस्खलितं धारय  वारय परुषाक्षरा वाचः ।

ENMSS@5947@2एकः सकलजनानां  जगति रिपुः परुषवाक् पुरुषः ॥ ५९४७॥

ENMSS@5948@1इदमहं करुणामृतसागरं  शशिकिशोरशिरोमणिमर्थये ।

ENMSS@5948@2व्रजतु जन्मनि जन्मनि मे वपुर् भवदुपासनसाधनतामिति ॥ ५९४८॥

ENMSS@5949@1इदमाभाति गगने भिन्दानं संततं तमः ।

ENMSS@5949@2अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥ ५९४९॥

ENMSS@5950@1इदमिदमिति भूरुहां प्रसूनैर् मुहुरतिलोभयता पुरःपुरोऽन्या ।

ENMSS@5950@2अनुरहसमनायि नायकेन  त्वरयति रन्तुमहो जनं मनोभूः ॥ ५९५०॥

ENMSS@5951@1इदमिदमिति सम्यक् कर्मणा योजनीयं  नियतमिति विचिन्त्य प्रापयेदीहमानः ।

ENMSS@5951@2सुनयपिहितरन्ध्रः प्राकृतो यस्य वर्गः  क्षितिपतिरुपभुङ्क्ते स त्रिवर्गं चिराय ॥ ५९५१॥

ENMSS@5952@1इदमुच्छ्वसितालकं मुखं  तव विश्रान्तकथं दुनोति माम् ।

ENMSS@5952@2निशि सुप्तमिवैकपङ्कजं  विरताभ्यन्तरषट्पदस्वनम् ॥ ५९५२॥

ENMSS@5953@1इदमुद्दिश्य वयस्याः  स्वसमीहितदैवतं नमत ।

ENMSS@5953@2यमुनैव जानुदघ्नी  भवतु न वा नाविकोऽस्त्वपरः ॥ ५९५३॥

ENMSS@5954@1इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे  स्तनयुगपरिणाहाच्छादिना वल्कलेन ।

ENMSS@5954@2वपुरभिनवमस्याः पुष्यति स्वां न शोभां  कुसुममिव पिनद्धं पाण्दुपत्रोदरेण ॥ ५९५४॥

ENMSS@5955@1इदमुभयभित्तिसंतत-  हारगुणान्तर्गतैककुचमुकुलम् ।

ENMSS@5955@2गुटिकाधनुरिव बाला-  वपुः स्मरः श्रयति कुतुतेन ॥ ५९५५॥

ENMSS@5956@1इदमेतत् करिष्यामि तत एतद् भविष्यति ।

ENMSS@5956@2संकल्पः क्रियते योऽयं न तं मृत्युः प्रतीक्षते ॥ ५९५६॥

ENMSS@5957@1इदमेव कलेरस्य मदविस्फूर्जितं महत् ।

ENMSS@5957@2यन् मे मनोरथावाप्तिः न रामभजनादपि ॥ ५९५७॥

ENMSS@5958@1इदमेव नरेन्द्राणां स्वर्गद्वारमनर्गलम् ।

ENMSS@5958@2यदात्मनः प्रतिज्ञा च प्रजा च परिपाल्यते ॥ ५९५८॥

ENMSS@5959@1इदमेव परं मौर्ख्यम् उपायैस्त्रिभिरुज्झितम् ।

ENMSS@5959@2पराक्रमन्ते युद्धेषु सममेवोभये भटाः ॥ ५९५९॥

ENMSS@5960@1इदमेव महद् धैर्यं धीराणां सुतपस्विनाम् ।
ENMSS@5960@2विघ्नवन्त्यपि संप्राप्य यद् विघ्नैर्न विहन्यते ॥ ५९६०॥
ENMSS@5961@1इदमेव हि जन्मफलं जीवितफलमेतदेव यत् पुंसाम् ।
ENMSS@5961@2लटहनितम्बवतीजन- संभोगसुखेन याति तारुण्यम् ॥ ५९६१॥
ENMSS@5962@1इदमेव हि निर्णीतं पैशुन्याद् दुःखसंगमः ।
ENMSS@5962@2अन्यार्थं खनतो गर्तं कूपे पातः सुनिश्चितः ॥ ५९६२॥
ENMSS@5963@1इदमेव हि पाण्डित्यं चातुर्यमिदमेव हि ।
ENMSS@5963@2इदमेव सुबुद्धित्वम् आयादल्पतरो व्ययः ॥ ५९६३॥
ENMSS@5964@1इदमेव हि पाण्डित्यम् इयमेव कुलीनता ।
ENMSS@5964@2अयमेव परो धर्म आयादल्पतरो व्ययः ॥ ५९६४॥
ENMSS@5965@1इदानीं तीव्राभिर्दहन इव भाभिः परिगतो ममाश्चर्यं सूर्यः किमु सखि रजन्यामुदयते ।
ENMSS@5965@2अयं मुग्धे चन्द्रः किमिति मयि तापं प्रकटयत्य् अनाथानां बाले किमिह
विपरीतं न भवति ॥ ५९६५॥
ENMSS@5966@1इदानीं तु मया ज्ञातं त्यागान् नास्ति परं सुखम् ।
ENMSS@5966@2नास्ति विद्यासमं चक्षुर्नास्ति चक्षुःसमं बलम् ॥ ५९६६॥
ENMSS@5967@1इदानीं प्लक्षाणां जठरदलविश्लेषचतुरः शिखानामाबन्धः स्फुरति शुकचञ्चूपुटनिभः ।
ENMSS@5967@2ततः स्त्रीणां हन्त क्षमममधरकान्तिं कलयितुं समन्तान् निर्याति स्फुटसुभगरागं किसलयम् ॥ ५९६७॥
ENMSS@5968@1इदानीं वंशीनां शबरमिथुनोच्छृङ्खलरहः- क्रियासख्येनालं गिरिवनसरिद्ग्रामसुहृदाम् ।
ENMSS@5968@2स्फुरल्लोमश्यामच्छगलशिशुकर्णप्रतिसम-
च्छदाग्राभिस्त्वग्भिर्वलयितकरीरास्तटभुवः ॥ ५९६८॥
ENMSS@5969@1इदानीं सन्तु काव्यानि बहूनि जगतीतले ।
ENMSS@5969@2यदादर्शमयं काव्यम् आद्यं तत् तु तदेव हा ॥ ५९६९॥
ENMSS@5970@1इदानीमङ्गमक्षालि रचितं चानुलेपनम् ।
ENMSS@5970@2इदानीमेव ते कृष्ण धूलीधूसरितं वपुः ॥ ५९७०॥
ENMSS@5971@1इदानीमर्घन्ति प्रथमकलमच्छेदमुदिता नवाग्रान्नस्थालीपरिमलमुचो हालिकगृहाः ।

ENMSS@5971@2उदश्चद्दोर्वल्लीरणितवलयाभिर्युवतिभिर्
गृहीतप्रोत्क्षिप्तभ्रमितमसृणोद्गीर्णमुशलाः ॥ ५९७१॥
ENMSS@5972@1इनः स एव सेव्यो यः स्वालोकेन सुधामुचा ।
ENMSS@5972@2द्विजेन्द्रमण्डलं क्षीणं समग्रयति संपदा ॥ ५९७२॥
ENMSS@5973@1इन्दिन्दिरैर्निर्भरगर्भमीषद्- उन्मेषवच्चम्पकपुष्पमासीत् ।
ENMSS@5973@2हिरण्मयं शासनलेखहेतोः सज्जं मषीभाण्डमिव स्मरस्य ॥ ५९७३॥
ENMSS@5974@1इन्दिन्दिरो मरन्दे विमुखो यदि किं नु मधुनि माहात्म्यम् ।
ENMSS@5974@2रसिको वाञ्छति नो चेत् रागाधरबिम्बमस्य को भूमा (?) ॥ ५९७४॥
ENMSS@5975@1इन्दीवरं लोचनयोस्तुलायै निर्माय यत्नेन विधिः कदाचित् ।
ENMSS@5975@2अतुल्यतां वीक्ष्य ततो रजांसि निक्षिप्य चिक्षेप स पङ्कमध्ये ॥ ५९७५॥
ENMSS@5976@1इन्दीवरदलश्यामम् इन्दिरानन्दकन्दलम् ।
ENMSS@5976@2वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥ ५९७६॥
ENMSS@5977@1इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ।
ENMSS@5977@2अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥ ५९७७॥
ENMSS@5978@1इन्दीवरस्यान्तरमेतदस्या नेत्रोत्पलस्यापि यतो हिमांशोः ।
ENMSS@5978@2त्विषोऽपि नैकं सहते मुखाख्यम् आक्रम्य तस्थावपरं शशाङ्कम्
॥ ५९७८॥
ENMSS@5979@1इन्दीवराक्षि तव तीव्रकटाक्षबाण- पातव्रणे द्वितयमौषधमेव मन्ये ।
ENMSS@5979@2एकं तवाधरसुधारसपानमन्यद् उत्तुङ्गपीनकुचकुङ्कुमपङ्कलेपः
॥ ५९७९॥
ENMSS@5980@1इन्दीवराक्ष्याः स्फुटविद्रुमोष्ठ्याः संकेतमुद्दिश्य वने चरन्त्याः ।
ENMSS@5980@2चौरैः समस्ताभरणानि हृत्वा नासामणिर्नोऽपहृतः किमेतत् ॥ ५९८०॥
ENMSS@5981@1इन्दीवरेण नयनं मुखमम्बुजेन कुन्देन दन्तमधरं नवपल्लवेन ।
ENMSS@5981@2अङ्गानि चम्पकदलैः स विधाय वेधाः कान्ते कथं घटितवानुपलेन
चेतः ॥ ५९८१॥
ENMSS@5982@1इन्दीवरोदरसहोदरमेदुरश्रीर् वासो द्रवत्कनकवृन्दनिभं दधानः ।
ENMSS@5982@2आमुक्तमौक्तिकमनोहरहारवक्षाः कोऽयं युवा जगदनङ्गमयं करोति
॥ ५९८२॥

ENMSS@5983@1इन्दुं कैरविणीव कोकपटलीवाम्भोजिनीवल्लभं मेघं चातकमण्डलीव मधुपश्रेणीव पुष्पव्रजम् ।
ENMSS@5983@2माकन्दं पिकसुन्दरीव रमणीवात्मेश्वरं प्रोषितं चेतोवृत्तिरियं सदा नृपवर त्वां द्रष्टुमुत्कण्ठते ॥ ५९८३॥
ENMSS@5984@1इन्दुं तण्डुलखण्डमण्डलरुचिं नित्योदितं जातुचिद् दर्शे मेघघरट्टघट्टनगलद्देहं विधत्ते विधिः ।
ENMSS@5984@2नूनं लोकहितेच्छया किरति यत् संतर्पणं सर्वतः शुभ्रादभ्रविशिष्टपिष्टरुचिरंभूमौ तुषारं दिवः ॥ ५९८४॥
ENMSS@5985@1इन्दुं निन्दति चक्रवाकयुगलं भासां निधिं कौशिकः स्वादुक्षीरमरोचकी सुकृतिनं पापी जडः पण्डितम् ।
ENMSS@5985@2त्यक्तं सर्वजनैः खलः कटुवचा ग्राम्यः पुमान् नागरं कः पैतामहगोलकेऽत्र निखिलैः संमानितो वर्तते ॥ ५९८५॥
ENMSS@5986@1इन्दुं निन्दति चन्दनं न सहते मल्लीस्रजं नेक्षते हारं द्वेष्टि सिताब्जमुज्झति बिसस्तोमं निगृह्णाति च ।
ENMSS@5986@2श्रीभूपाल महीधरेषु विपिनेष्वम्भोधितीरेषु च त्वत्कीर्तिस्त्वदरिप्रिया च विलसत्युच्चैः स्फुरत्पाण्डिमा ॥ ५९८६॥
ENMSS@5987@1इन्दुं निन्दति चन्दनं न सहते विद्वेष्टि पङ्केरुहं हारं भारमवैति नैव कुरुते कर्पूरपूरे मनः ।
ENMSS@5987@2स्वर्गङ्गामवगाहते हिमगिरिं गाढं समालिङ्गते यत्कीर्तिर्विरहातुरेव न मनागेकत्र विश्राम्यति ॥ ५९८७॥
ENMSS@5988@1इन्दुं निन्दति तस्करो गृहपतिं जारो सुशीलं खलः साध्वीमप्यसती कुलीनमकुलो जह्याज्जरन्तं युवा ।
ENMSS@5988@2विद्यावन्तमनक्षरो धनपतिं नीचश्च रूपोज्ज्वलं वैरूप्येण हतः प्रबुद्धमबुधोत्कृष्टं निकृष्टो जनः ॥ ५९८८॥
ENMSS@5989@1इन्दुं निन्दति पद्मखण्डकदलीतल्पं न वा मन्यते कर्पूरं किरति प्रयाति न रतिं प्रालेयधारागृहे ।
ENMSS@5989@2किं वान्यत् तव विप्रयोगशिखिना सा दह्यमाना मुहुस् त्वामन्तर्हृदयस्थितं दवभयान् नेत्राम्बुभिः सिञ्चति ॥ ५९८९॥
ENMSS@5990@1इन्दुं निन्दतु नाम वाथ नलिनीं निन्दन्तु चक्राह्वया नैवानेन सुधाकरस्य
सुषमाहानिर्न वा दुर्यशः ।

ENMSS@5990@2एतेनैव कृतार्थतास्य जनता यन्मोदमालम्बते यज्ज्योत्स्नासु चिरं चकोरपरिषच्चञ्चूपुटं न्यस्यति ॥ ५९९०॥

ENMSS@5991@1इन्दुं मुखाद् बहुतृणं तव यद् गृणन्ति नैनं मृगस्त्यजति तन् मृगतृष्णयैव ।

ENMSS@5991@2अत्येति मोहमहिमा न हिमांशुबिम्ब- लक्ष्मीविडम्बिमुखि वित्तिषु पाशवीषु

॥ ५९९१॥

ENMSS@5992@1इन्दुं वेत्ति दिवाकरं मलयजं दावानलं मन्यते जानात्यम्बुजमुल्मुकं कलयति प्रालेयतल्पं चिताम् ।

ENMSS@5992@2हाराङ्गारकदर्थितेन मनसा सृष्टिं समस्तामिमां संप्रत्यग्निमयी न वेत्ति सुभगा त्यक्ता वराकी त्वया ॥ ५९९२॥

ENMSS@5993@1इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम् ।

ENMSS@5993@2ललितसविलासवचनैर् मुखमिति हरिणाक्षि निश्चितं परतः ॥ ५९९३॥

ENMSS@5994@1इन्दुः प्रयास्यति विनङ्क्ष्यति तारकश्रीः स्थास्यन्ति लीढतिमिरा न मणिप्रदीपाः ।

ENMSS@5994@2अन्धं समग्रमपि कीटमणे भविष्यत्य् उन्मेषमेष्यति भवानपि दुरमेतत्

॥ ५९९४॥

ENMSS@5995@1इन्दुप्रभारसविदं विहगं विहाय कीरानने स्फुरसि भारति का रतिस्ते ।

ENMSS@5995@2आद्यं यदि श्रयसि जल्पतु कौमुदीनां गोविन्दराजवचसां च विशेषमेषः ॥ ५९९५॥

ENMSS@5996@1इन्दुबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम् ।

ENMSS@5996@2वदनं तव तन्वङ्गि विमृशद्भिर्विभाव्यते ॥ ५९९६॥

ENMSS@5996A@1इन्दुभास्करयोर्यत्र नभःसंचारखिन्नयोः ।

ENMSS@5996A@2पताकाः पवनाधूताः भजन्ते तालवृन्तताम् ॥

ENMSS@5997@1इन्दुमिन्दुमुखि लोकय लोकं भानुभानुभिरमुं परितप्तम् ।

ENMSS@5997@2वीजितुं रजनिहस्तगृहीतं तालवृन्तमिव नालविहीनम् ॥ ५९९७॥

ENMSS@5998@1इन्दुमिन्द्रदिगसूत सरस्वान् उत्तरङ्गभुजराजिरनृत्यत् ।

ENMSS@5998@2उज्जहर्ष झषकेतुरवापुः षट्पदाः कुमुदबन्धनमोक्षम् ॥ ५९९८॥

ENMSS@5999@1इन्दुमुखी कुमुदाक्षी रम्भोरू कमलचारुकरचरणा ।

ENMSS@5999@2अमृतद्रवलावण्या हृदयगता देवि किं दहसि ॥ ५९९९॥

ENMSS@6000@1इन्दुरिन्दुरिति किं दुराशया बिन्दुरेष पयसो विलोक्यते ।

ENMSS@6000@2नन्विदं विजयते मृगीदृशः श्यामकोमलकपोलमाननम् ॥ ६०००॥
ENMSS@6001@1इन्दुर्मूर्ध्नि शिवस्य शैलदुहितुर्वक्रो नखाङ्कः स्तने देयाद् वोऽभ्युदयं द्वयं तदुपमामालम्बमानं मिथः ।
ENMSS@6001@2सम्वादः प्रणवेन यस्य दलता कायैकतायां तयोर् ऊर्ध्वद्वारविचिन्तितेन च हृदि ध्यातस्वरूपेण च ॥ ६००१॥
ENMSS@6002@1इन्दुर्यत्र न निन्द्यते न मधुरं दूतीवचः श्रूयते नालापा निपतन्ति बाष्पकलुषा नोपैति कार्श्यं तनुः ।
ENMSS@6002@2स्वाधीनामनुकूलिनीं स्वगृहिणीमालिङ्ग्य यत् सुप्यते तत् किं प्रेम गृहाश्रमव्रतमिदं कष्टं समाचर्यते ॥ ६००२॥
ENMSS@6003@1इन्दुर्यद्युदयाद्रिमूर्ध्नि न भवत्यद्यापि तन् मा स्म भून् नासीरेऽपि तमःसमुच्चयममूरुन्मूलयन्ति त्विषः ।
ENMSS@6003@2अप्यक्ष्णोर्मुदमुद्गिरन्ति कुमुदैरामोदयन्ते दिशः संप्रत्यूर्ध्वमसौ तु लाञ्छनमभिव्यङ्क्तुं प्रकाशिष्यते ॥ ६००३॥
ENMSS@6004@1इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा ।
ENMSS@6004@2कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं सुन्दर्याः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥ ६००४॥
ENMSS@6005@1इन्दुव्रतसहस्रं तु चरेद् यः कायशोधनम् ।
ENMSS@6005@2पिबेद् यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ ॥ ६००५॥
ENMSS@6006@1इन्दुस्त्वद्यशसा जितोऽवनिपते भासांनिधिस्तेजसा कन्दर्पो वपुषा सुधाजलनिधिर्वाचो विलासेन च ।
ENMSS@6006@2तथ्यं ते जयशीलमेतदधुना त्वद्दानमदैन्ययोर् मध्ये कं नु विजेष्यतीति विषये दोलायते मे मनः ॥ ६००६॥
ENMSS@6007@1इन्दूदयश्चन्दनमिन्दुवक्रश् चैत्रस्तथा यस्य महाय संपत् ।
ENMSS@6007@2वपुश्च शृङ्गारमयं स मन्ये संतापकस्त्वं हरवह्नियोगात् ॥ ६००७॥
ENMSS@6008@1इन्दोः कलाकलापेन पङ्क्तिक्रमनिवेशिना ।
ENMSS@6008@2सर्वदुःखापनोदाय बालकानां कृता भुजाः ॥ ६००८॥
ENMSS@6009@1इन्दोः कान्तिं जडतरकरान् मत्तनागाद् गतिं वा त्रस्तान् नेत्रे हरसि हरिणात् तत्र किं नाम चित्रम् ।
ENMSS@6009@2एतच्चित्रं पुनरिह जगज्जैत्रकन्दर्पचाप- श्रीसर्वस्वं यदपहरसि प्रेयसि भ्रूविलासैः ॥ ६००९॥

ENMSS@6010@1इन्दोः किं द्रुहिणस्य वा सुरपतेः किं वा कृतान्तस्य वा किं भूतेश दिशास्थि भूषणगणेश्वाकृष्य देयं मया ।
ENMSS@6010@2इत्थं मण्डनमन्दिरोदरचरव्याहारतो भीकरात् भीता यस्य सुराः प्रसाधनविधौ पायात् स वः शंकरः ॥ ६०१०॥
ENMSS@6011@1इन्दोः संक्षयरक्षिणाक्षतसुधा किं वेधसा निर्मिता किं धैर्यापहरा हरस्य विहिता कामेन कान्ता तनुः ।
ENMSS@6011@2किं तारुण्यवसन्तकान्तिललिता शृङ्गारसिक्ता लता किं लावण्यतरङ्गिणी पुनरियं जन्मान्तराप्ता रतिः ॥ ६०११॥
ENMSS@6012@1इन्दोरगतयः पद्मे सूर्यस्य कुमुदेंऽशवः ।
ENMSS@6012@2गुणास्तस्य विपक्षेऽपि गुणिनो लेभिरेऽन्तरम् ॥ ६०१२॥
ENMSS@6013@1इन्दोरस्य त्रियामायुवतिकुचतटीचन्दनस्थासकस्य व्योमश्रीचामरस्य त्रिपुरहरजटावल्लरीकोरकस्य ।
ENMSS@6013@2कंदर्पक्षोणिपालस्फटिकमणिगृहस्यैतदाख ण्डलाशा- नासामुक्ताफलस्य स्थगयति जगतीं कोऽपि भासां विलासः ॥ ६०१३॥
ENMSS@6014@1इन्दोरिवास्य पुरतो यद् विमुखी सापवारणा भ्रमसि ।
ENMSS@6014@2तत् कथय किं नु दुरितं सखि त्वया छाययेव कृतम् ॥ ६०१४॥
ENMSS@6015@1इन्दोरेककलाया रुद्रेणोद्धृत्य मूर्धनि धृतायाः ।
ENMSS@6015@2स्थानमिव तुच्छमेतत् कलङ्करूपेण परिणमति ॥ ६०१५॥
ENMSS@6016@1इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारिर् दिङ्नागानां मदजलमसीभाञ्जि गण्डस्थलानि ।
ENMSS@6016@2अद्याप्युर्वीवलयतिलक श्यामलिम्नावलिप्तान्य् आभासन्ते वद धवलितं किं
यशोभिस्त्वदीयैः ॥ ६०१६॥
ENMSS@6017@1इन्दोश्चन्दनबिन्दुनैव दशनच्छायं तदीयं मुखं चक्रं लोचनभल्लमार्जनविधौ शाणस्य तत् कुण्डलम् ।
ENMSS@6017A@2भिन्नानां कुचकन्दरा स्मितसुधाकुल्येव मुक्तावली पादाब्जे ध्वनदिन्द्रनीलवलयं रोलम्बमालैव सा ॥
ENMSS@6017A@1इन्दौ निन्द्या चकोरैरसमयति निशाजागरः पुण्डरीकैः भृङ्गैः शीधुन्यसङ्गः शरदि समधिका ग्लानिरिन्दीवरैश्च ।
ENMSS@6017@2भ्रूभङ्गे यस्य वैराकरयुवतिदृशामेकमेवोपमानं पश्याम्यश्रान्तबाष्पप्रकरमयझरीगूढ् हचाराश्चमर्यः ॥ ६०१७॥

ENMSS@6018@1इन्द्रं द्व्यक्षधरं त्वमन्थमुदधिं पञ्चाननं पद्मजं  सिन्धुं

स्वादुजलं शिवं सितगलं कामं च सद्विग्रहम् ।

ENMSS@6018@2शैलान् पक्षधरांस्तथैव च हयांल्लक्ष्मीपतिं पिङ्गलं  दृष्टं

सर्वमिदं क्वचिन् न रघुराड्वृत्तं स्वयं हारितम् ॥ ६०१८॥

ENMSS@6019@1इन्द्रं वै षण्ढमाहुर्मलिनमुडुपतिं माधवं गोपसूनुं  व्यासं

मत्सीतनूजं गतरसमुदधिं पावकं सर्वभक्षम् ।

ENMSS@6019@2वेश्यापुत्रं वसिष्ठं जनपदवचनैः पाण्डवाश्चान्यजाता  इत्थं

संचिन्त्य मह्यं कथय नरपते कस्य दोषा न सन्ति ॥ ६०१९॥

ENMSS@6020@1इन्द्रः प्रक्षुब्धचित्तो दिशि दिशि सकलान् दिक्पतीन् सावधानान् कुर्वन्

वज्रास्त्रपाणिः सुरवरवलितां देवसेनां निगृह्य ।

ENMSS@6020@2स्वर्गद्वारे यदीयोद्धतबलिनिहतप्रौढढक्कानिनादं  श्रुत्वातिष्ठत्

प्रकम्पत्कुचकलशतटीकिन्नरीगीयमानः ॥ ६०२०॥

ENMSS@6021@1इन्द्रः प्रधानं दिवि दैवतेषु  विप्रो मनुष्येषु नदीषु गङ्गा ।

ENMSS@6021@2गावः पशुष्वेषु धनेषु धान्यं  सर्वत्र गात्रस्य शिरः प्रधानम्

॥ ६०२१॥

ENMSS@6021A@1इन्द्रगोपकपरम्परा भृशं  काननेषु शुशुभे विसर्पिणी ।

ENMSS@6021A@2प्रावृषः सरभसागमाच्युता  पद्मरागघटितेव कर्णिका ॥

ENMSS@6022@1इन्द्रगोपैर्बभौ भूमिर्निचितैव प्रवासिनाम् ।

ENMSS@6022@2अनङ्गबाणैर्हृद्भेदस्रुतलोहितबिन्दुभिः ॥ ६०२२॥

ENMSS@6023@1इन्द्रजिच्चण्डवीर्योऽसि नाम्नैव बलवानसि ।

ENMSS@6023@2धिक् धिक् प्रच्छन्नरूपेण युध्यसेऽस्मद्भयाकुलः ॥ ६०२३॥

ENMSS@6024@1इन्द्रनीलशुकपक्षकोमला  शङ्खकुन्दकुमुदेन्दुसंनिभा ।

ENMSS@6024@2तप्तकाञ्चनविकासिचम्पक-  स्पर्धिनी वसुमती प्रशस्यते ॥ ६०२४॥

ENMSS@6025@1इन्द्रस्त्वं नृप सुन्दरी तव शची पुत्रो जयन्तोपमो  गेहं भाति च

वैजयन्तसदृशं नागोऽभ्रमोर्वल्लभः ।

ENMSS@6025@2इत्थं बोधकरैरसत्यवचनैः स्वैरं स्तुतः स्वं हरिं  वेत्ति

प्रस्फुटविक्रमं स महिमा ज्ञेयो हरेर्मायिनः ॥ ६०२५॥

ENMSS@6026@1इन्द्रस्य वज्रेण हतो वृत्रासुरमहायशाः ।

ENMSS@6026@2मेदसा सर्वविच्छिन्नं तदर्थमुपलेपनम् ॥ ६०२६॥

ENMSS@6027@1इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च ।

ENMSS@6027@2चन्द्रस्य च पृथिव्याश्च नृपः सप्तगुणो भवेत् ॥ ६०२७॥

ENMSS@6028@1इन्द्रात् प्रभुत्वं ज्वलनात् प्रतापं क्रोधो यमाद् वैश्रवणाच्च वित्तम् ।

ENMSS@6028@2पराक्रमं रामजनार्दनाभ्याम् आदाय राज्ञः क्रियते शरीरम् ॥ ६०२८॥

ENMSS@6029@1इन्द्राद्या लोकपाला हरिविधुतपना नागविद्याधराद्या द्वेष्याः सर्वेऽपि देवाः प्रिय तव वरदः कोऽस्ति वन्द्यो गरीयान् ।

ENMSS@6029@2श्रुत्वा वाचं प्रियाया इति दशमुखतः प्राह वाक्यं दशास्यः शूली शंभुः पिनाकी शिवभवपशुपः शर्व ईशश्च भर्गः ॥ ६०२९॥

ENMSS@6030@1इन्द्राद्यैः किं प्रदत्तं प्रदिशसि धवलं धाम धन्यं यदेभ्यो मह्यं यन् नापि धत्से तृणघटितकुटीं किं मया तेऽपराद्धम् ।

ENMSS@6030@2विश्वेभ्यो विश्वमातर्वितरसि यदि वा शर्म कर्मानुसारि प्रोत्तुङ्गायाः कृपायास्तव तुहिनगिरेः पुत्रि कुत्रोपयोगः ॥ ६०३०॥

ENMSS@6031@1इन्द्रानिलयमार्काणाम् अग्नेश्च वरुणस्य च ।

ENMSS@6031@2चन्द्रवित्तेशयोश्चापि मात्रा निर्हृत्य शाश्वतीः ॥ ६०३१॥

ENMSS@6032@1इन्द्राभ्यर्थनया पूर्वं भरताय चतुर्मुखः ।

ENMSS@6032@2प्रमोदाय महेन्द्रस्य नाट्यं समुपदिष्टवान् ॥ ६०३२॥

ENMSS@6033@1इन्द्राय वीक्षमाणस् तन्मुखमास्वादयन्ननन्ताय ।

ENMSS@6033@2स्पृहयामि चाद्य दयिताम् आलिङ्गन् कार्तवीर्याय ॥ ६०३३॥

ENMSS@6034@1इन्द्रियं विजितं येन तेनैव भुवनं जितम् ।

ENMSS@6034@2यश्चेन्द्रियैः पराभूतः स सर्वत्र पराजितः ॥ ६०३४॥

ENMSS@6035@1इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।

ENMSS@6035@2तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥ ६०३५॥

ENMSS@6036@1इन्द्रियाणां जये योगं समातिष्ठेद् दिवानिशम् ।

ENMSS@6036@2जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥ ६०३६॥

ENMSS@6037@1इन्द्रियाणां जये शूरो धर्मं चरति पण्डितः ।

ENMSS@6037@2सत्यवादी भवेद् वक्ता दाता भवति वा न वा ॥ ६०३७॥

ENMSS@6038@1इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ।

ENMSS@6038@2ततोऽस्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥ ६०३८॥

ENMSS@6039@1इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।

ENMSS@6039@2अहिंसया च भूतानाम् अमृतत्वाय कल्पते ॥ ६०३९॥

ENMSS@6040@1इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।

ENMSS@6040@2संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ॥ ६०४०॥
ENMSS@6041@1इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च ।
ENMSS@6041@2पापान् संयान्ति संसारान् अविद्वांसो नराधमाः ॥ ६०४१॥
ENMSS@6042@1इन्द्रियाणां प्रसृष्टानां हयानामिव वर्त्मसु ।
ENMSS@6042@2धृतिं कुर्वीत सारथ्ये धृत्या तानि जयेद् ध्रुवम् ॥ ६०४२॥
ENMSS@6043@1इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
ENMSS@6043@2संयमे यत्नमातिष्ठेद् विद्वान् यन्तेव वाजिनाम् ॥ ६०४३॥
ENMSS@6044@1इन्द्रियाणां हि चरतां यन् मनोऽनुविधीयते ।
ENMSS@6044@2तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६०४४॥
ENMSS@6045@1इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
ENMSS@6045@2भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ६०४५॥
ENMSS@6046@1इन्द्रियाणामनुत्सर्गो मृत्युना न विशिष्यते ।
ENMSS@6046@2अत्यर्थं पुनरुत्सर्गः सादयेद् दैवतान्यपि ॥ ६०४६॥
ENMSS@6047@1इन्द्रियाणि च संयम्य रागद्वेषविवर्जितः ।
ENMSS@6047@2समदुःखसुखः शान्तः तत्त्वज्ञः साधुरुच्यते ॥ ६०४७॥
ENMSS@6048@1इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
ENMSS@6048@2मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ६०४८॥
ENMSS@6049@1इन्द्रियाणि पशून् कृत्वा वेदीं कृत्वा तपोमयीम् ।
ENMSS@6049@2अहिंसामाहुतिं कृत्वा आत्मयज्ञं यजाम्यहम् ॥ ६०४९॥
ENMSS@6050@1इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया ।
ENMSS@6050@2स्मरद्भिरिव तैर्वैरम् इन्द्रियैरेव निर्जितः ॥ ६०५०॥
ENMSS@6051@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@6051@2इन्द्रियाणि प्रमाथीनि हरन्त्यपि यतेर्मनः ॥ ६०५१॥
ENMSS@6052@1इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
ENMSS@6052@2धारणा प्रेरणं दुःखम् इच्छाहङ्कार एव च ॥ ६०५२॥
ENMSS@6053@1प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ ।
ENMSS@6053@2तस्यैतदात्मजं सर्वम् अनादेरादिमिच्छतः ॥ ६०५३॥
ENMSS@6054@1इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
ENMSS@6054@2एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ६०५४॥
ENMSS@6055@1इन्द्रियाणि महत् प्रेप्सुर्नियच्छेदर्थधर्मयोः ।
ENMSS@6055@2इन्द्रियैर्नियतैर्बुद्धिर्वर्धतेऽग्निरिवेन्धनैः ॥ ६०५५॥

ENMSS@6056@1इन्द्रियाणीन्द्रियार्थेभ्यः प्राणादीन् मन एव च ।
ENMSS@6056@2निगृह्य समवायेन प्रत्याहारमुपक्रमेत् ॥ ६०५६॥
ENMSS@6057@1इन्द्रियाण्यनुपक्लेश्य लभ्यं श्रेयो गृहाश्रमे ।
ENMSS@6057@2अतस्तुर्याश्रमं प्राहुरबाधन्यायबाधितम् ॥ ६०५७॥
ENMSS@6058@1इन्द्रियाण्यन्तरङ्गाणि पातयन्ति यथा जनान् ।
ENMSS@6058@2अभ्यन्तरास्तथा राष्ट्रे भृत्याः स्वार्थपरायणाः ॥ ६०५८॥
ENMSS@6059@1इन्द्रियाण्येव तत् सर्वं यत् स्वर्गनरकावुभौ ।
ENMSS@6059@2निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥ ६०५९॥
ENMSS@6060@1इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः ।
ENMSS@6060@2अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेत् ॥ ६०६०॥
ENMSS@6061@1इन्द्रियैरिन्द्रचन्द्राद्या ह्लेपिता यैः सुरा अपि ।
ENMSS@6061@2अपरिम्लानमानत्वं तैर्मर्त्यस्याथवा कथम् ॥ ६०६१॥
ENMSS@6062@1इन्द्रियैरिन्द्रियार्थेषु वर्तमानैरनिग्रहैः ।
ENMSS@6062@2तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव ॥ ६०६२॥
ENMSS@6063@1इन्द्रो निन्दति वाहमाह दिनकृत्त्वर्वाचमेवार्वतश्  चश्चूर्न्यश्चति किं न पन्नगरिपोरन्तस्त्रपोद्रेकतः ।
ENMSS@6063@2वातः खञ्जति पङ्गुपुञ्जति मनोराजिर्भवद्वाजिषु  द्वेषादाजिषु वैरिणामभिमुखं धावत्सु यावत् सुखम् ॥ ६०६३॥
ENMSS@6064@1इन्द्रो यच्छतमन्युरस्ति दहनो यत् पावकोऽप्यन्तकः  कीनाशो धनदो विमाननिरतः पाशी जलानां पतिः ।
ENMSS@6064@2ईशः कामहरश्चलो यदनिलो यन्नैर्ऋतो राक्षसस् तन् नान्योऽवनिलोकपाल भवतः कश्चित् समः स्याद् गुणैः ॥ ६०६४॥
ENMSS@6065@1इन्द्रो यमोऽसि वरुणोऽसि हुताशनोऽसि  ब्रह्मा हरो हरिरसीत्यसकृद् यदुक्तिः ।
ENMSS@6065@2भूपालमौलिमणिरञ्जितपादपीठ  तस्यानृतस्य फलमिन्धनमुद्वहामि ॥ ६०६५॥
ENMSS@6066@1इभकुम्भतुङ्गकठिनेतरेतर-  स्तनभारदूरविनिवारितोदराः ।
ENMSS@6066@2परिफुल्लगण्डफलकाः परस्परं  परिरेभिरे कुकुरकौरवस्त्रियः ॥ ६०६६॥
ENMSS@6067@1इभ्या यदि नृपद्वारे संमन्यन्ते किमद्भुतम् ।
ENMSS@6067@2इदानीं विबुधद्वारे तेषामेव पुरस्क्रिया ॥ ६०६७॥
ENMSS@6068@1इमं कनकवर्णाभं भूषणैः समलंकृतम् ।

ENMSS@6068@2गृध्रवाक्यात् कथं पुत्रं त्यजध्वं पितृपिण्डदम् ॥ ६०६८॥

ENMSS@6069@1इमं तिलसुमायितं युवतिनासिकासंपुटं  विभाव्य सुमनोजनो मनसि मोदमापद्यते ।

ENMSS@6069@2सखे भुजगमुत्फणं सविषफूत्कृताहंकृतं  विभावय न तत्स्पृहां कुरु जहीहि तद्दृश्यताम् ॥ ६०६९॥

ENMSS@6070@1इमं परित्यज्य परं रणादरिः  स्वमेव भग्नः शरणं बुधाविशत् ।

ENMSS@6070@2न वेत्ति यत् त्रातुमितः कृतस्मयो  न दुर्गया शैलभुवापि शक्यते ॥ ६०७०॥

ENMSS@6071@1इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ।

ENMSS@6071@2गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते ॥ ६०७१॥

ENMSS@6072@1इमां च विन्द्यादनुरक्तचेष्टां  प्रियाणि वक्ति स्वधनं ददाति ।

ENMSS@6072@2विलोक्य संहृष्यति वीतरोषा  प्रमार्ष्टि दोषान् गुणकीर्तनेन ॥ ६०७२॥

ENMSS@6073@1इमां परीप्सुर्दुर्जाते पराभिभवकातराम् ।

ENMSS@6073@2भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥ ६०७३॥

ENMSS@6074@1इमां विधातुं भुजवल्लिमुज्ज्वलां  गृहीतसारं विधिना नतभ्रुवः ।

ENMSS@6074@2कठोरभावप्रियमेव केवलं  मृणालमन्तस्तरलं कुतोऽन्यथा ॥ ६०७४॥

ENMSS@6075@1इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।

ENMSS@6075@2महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥ ६०७५॥

ENMSS@6076@1इमानि प्रायशस्तानि वेश्यास्वेवं प्रदापयेत् ।

ENMSS@6076@2सा मुञ्चत्यचिरात् सर्वम् उपभोगं तदात्मनः ॥ ६०७६॥

ENMSS@6077@1इमा यदि भवन्ति नो गलितयौवना नीरुचस् तदा कमललोचनास्तरुणमानिनीर्मा मुचत् ।

ENMSS@6077@2विलासमदविभ्रमान् भ्रमति लुण्ठयत्री जरा  यतो भुवि वधुस्ततो भवति
निःस्पृहस्तन्मुखे ॥ ६०७७॥

ENMSS@6078@1इमा रूपस्थानस्वजनतनयद्रव्यवनिता-
सुतालक्ष्मीकीर्तिद्युतिरतिमतिप्रीतिधृतयः ।

ENMSS@6078@2मदान्धस्त्रीनेत्रप्रकृतिचपलाः सर्वभविनाम्  अहो कष्टं मर्त्यस्तदपि विषयान् सेवितुमनाः ॥ ६०७८॥

ENMSS@6079@1इमास्ताः कस्तूरीप्रखरखुरटङ्कक्षततटास् तटिन्योऽरण्यानीमनु कमलिनीच्छन्नसलिलाः ।

ENMSS@6079@2जले यासां हंसा बिसकिसलयग्रासरसिकाः सलीलं लीयन्ते युवतिगतिविद्यैकगुरवः ॥ ६०७९॥

ENMSS@6080@1इमास्ता विन्ध्याद्रेः शुकहरितवंशीवनघना भुवः क्रीडालोलद्विरददशनाभुग्नतरवः ।

ENMSS@6080@2लताकुञ्जे यासामुपनदि रतक्लान्तशबरी- कपोलस्वेदाम्भःकणचयनुदो वान्ति मरुतः ॥ ६०८०॥

ENMSS@6081@1इमा हिन्दोलासु भ्रमितमहसः कुङ्कुमरुचा त्रपारूपाकारास्तरलतरहाराश्चलदृशः ।

ENMSS@6081@2उदञ्चत्काञ्चीनां बहलतरघोषैर्मनसिज- त्रिलोकीसम्राजो दधति जयघण्टालिनिनदम् ॥ ६०८१॥

ENMSS@6082@1इमे तारुण्यश्रीनवपरिमलाः प्रौढसुरत- प्रतापप्रारम्भाः स्मरविजयदानप्रतिभुवः ।

ENMSS@6082@2चिरं चेतश्चौरा अभिनवविकारैकगुरवो विलासव्यापाराः किमपि विजयन्ते

मृगदृशाम् ॥ ६०८२॥

ENMSS@6083@1इमे पद्मे नाम्भः पुलिनतटमेतन् न तटिनी खमेतन् न व्याप्तिः स्तबकयुगमेतन् न लतिका ।

ENMSS@6083@2प्रवालोऽयं नाब्धिः शिशिरकिरणोऽयं न रजनी घनोऽयं न प्रावृट् शिव शिव विधेः शिल्परचना ॥ ६०८३॥

ENMSS@6084@1इमे मम धनाङ्गजस्वजनवल्लभादेहजा- सुहृज्जनकमातुलप्रभृतयो भृशं वल्लभाः ।

ENMSS@6084@2मुधेति हतचेतनो भववने चिरं खिद्यते यतो भवति कस्य को जगति

वालुकामुष्टिवत् ॥ ६०८४॥

ENMSS@6085@1इमे हि दैन्येन निमीलितेक्षणा मुहुः स्खलन्तो विवशास्तुरङ्गमाः ।

ENMSS@6085@2गजाश्च सप्तच्छददानगन्धिनो निवेदयन्तीव रणे निवर्तनम् ॥ ६०८५॥

ENMSS@6086@1इमौ रम्भास्तम्भौ द्विरदपतिकुम्भद्वयमिदं तदेतल्लीलाब्जं शरदमृतरश्मिः स्फुटमयम् ।

ENMSS@6086@2किमङ्गे तन्वङ्ग्याः कलयति जगत् कान्तमधिकं यदेतस्यां शश्वत् परवशमिवोन्मत्तमिव च ॥ ६०८६॥

ENMSS@6087@1इयं कलाविलासिनी कलावती समीपगा धृतारविन्दलोचना मनोजशोकमोचना ।

ENMSS@6087@2नवीननीरदच्छटासमानकेशभूषिता  न कस्यचिज्जनस्य
चित्तवृत्तितापखण्डिता ॥ ६०८७॥

ENMSS@6088@1इयं कियच्चारुकुचेति पश्यते  पयःप्रदाया हृदयं समावृतम् ।

ENMSS@6088@2ध्रुवं मनोज्ञा व्यतरद्यदुत्तरं  मिषेण भृङ्गारधृतेः करद्वयी
॥ ६०८८॥

ENMSS@6089@1इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोर् असावस्याः स्पर्शो वपुषि
बहुलश्चन्दनरसः ।

ENMSS@6089@2अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः  किमस्या न प्रेयो
यदि
परमसह्यस्तु विरहः ॥ ६०८९॥

ENMSS@6090@1इयं गौरुद्दामा तव निबिडबन्धापि हि कथं  न वैदर्भादन्यत् स्पृशति
सुलभत्वेऽपि हि कथम् ।

ENMSS@6090@2अवन्ध्या च ख्याता भुवि कथमगम्या कविवृषैः  कथं वा पीयूषं
स्रवति बहु दुग्धापि बहुभिः ॥ ६०९०॥

ENMSS@6091@1इयं गौरेका नः क्वचिदपि न संयोजनविधाव् अमुष्याः पश्यामो
रसभरमुचं कांचिदपराम् ।

ENMSS@6091@2गले बद्धा दध्मो यदि न धृतिरुद्दामविधृतौ  भयं गोचोरेभ्यस्तदिह
क उपायः प्रभवतु ॥ ६०९१॥

ENMSS@6092@1इयं घटी मत्तगजेन्द्रगामिनी-  विचित्रसिंहासनसंस्थिता सदा ।

ENMSS@6092@2अनेकरामाजनलालिता परं  विधेर्वशात् सैव सती प्रजार्थिनी ॥
६०९२॥

ENMSS@6093@1इयं चिद्रूपापि प्रकटजडरूपा भगवती  यदीयाम्भोबिन्दुर्वितरति हि
शंभोरपि पदम् ।

ENMSS@6093@2पुनाना धुन्वाना निखिलमपि नानाविधमघं  जगत् कृत्स्नं
पायादनुदिनमपायात् सुरधुनी ॥ ६०९३॥

ENMSS@6094@1इयं तावल्लीला यदधिरुरुहे वृद्धवृषभो  यदुन्नेहे रुण्डं यदिह
चितिभस्मापि लिलिपे ।

ENMSS@6094@2अयं को व्यापारो यदतिलकि भाले हुतवहो  यदग्रैवि व्यालो
यदकवलि
हालाहलमपि ॥ ६०९४॥

ENMSS@6095@1इयं ते जननी प्राप्ता त्वदालोकनतत्परा ।

ENMSS@6095@2स्नेहप्रस्नवनिर्भिन्नम् उद्वहन्ती स्तनद्वयम् ॥ ६०९५॥

ENMSS@6096@1इयं त्रियामा शतयामधारिणी  सुधाकरादग्निरुदेति सर्वतः ।
ENMSS@6096@2तनोति तापं मृदुचन्दनानिलो  विधौ विरुद्धे हि विपत् पदे पदे ॥ ६०९६॥
ENMSS@6097@1इयं त्वभिन्नमर्यादैः स्वनुशिष्टैः कृतात्मभिः ।
ENMSS@6097@2सर्वंसहैरुपायज्ञैरमूढैरेव धार्यते ॥ ६०९७॥
ENMSS@6098@1इयं धत्ते धीरे मलयजसमीरे न च मुदं  न पद्मानां वृन्दे ललितमकरन्देऽपि रमते ।
ENMSS@6098@2न वा सा सानन्दा भवति नवकुन्दावलिकुले  तदेतस्या बाधाहरमपि समाधानमिह किम् ॥ ६०९८॥
ENMSS@6099@1इयं पल्ली भिल्लैरनुचितसमारम्भरसिकैः  समन्तादाकीर्णा विषविषमबाणप्रणयिभिः ।
ENMSS@6099@2तरोरस्य स्कन्धे गमय समयं कीर निभृतं  न वाणी कल्याणी तदिह
मुखमुद्रैव शरणम् ॥ ६०९९॥
ENMSS@6100@1इयं प्रीतिर्वल्लीहृदयभुवि दैवात् समुदिता  तथा यत्नाद् रक्ष्या प्रकृतिमृदुलापायबहुला ।
ENMSS@6100@2यथा नैनां स्फीतां पिशुनजनदुर्वाक्यदहनो  दहत्यन्तः शोषं व्रजति न पुनः सौहृदनिधेः ॥ ६१००॥
ENMSS@6101@1इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।
ENMSS@6101@2कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥ ६१०१॥
ENMSS@6102@1इयं बाला मां प्रत्यनवरतमिन्दीवरदल-  प्रभाचौरं चक्षुः क्षिपति किमभिप्रेतमनया ।
ENMSS@6102@2गतो मोहोऽस्माकं स्मरसमरबाणव्यतिकर-  ज्वरज्वाला शान्ता तदपि न
वराकी विरमति ॥ ६१०२॥
ENMSS@6103@1इयं बाला वल्ली मृदुकिसलयं तापविलयं  घनच्छायं शालं नवमतिविशालं परिगता ।
ENMSS@6103@2परंत्वस्याभ्यन्तर्गरलवभस्मीकृतवनं  भुजंगं प्रोत्तुङ्गं कथमिव वराकी कलयतु ॥ ६१०३॥
ENMSS@6104@1इयं भुजगिनीश्रिता लसदनेकपुष्पान्विता  द्विरेफततिसेविता प्रमदखञ्जनालंकृता ।
ENMSS@6104@2फलद्वयभरानता विलसिता नवैः पल्लवैर् विलोचनपथं गता भवति

कापि हैमी लता ॥ ६१०४॥

ENMSS@6105@1इयं मयि प्रोषित एव संगता  हिमत्विषाभूत् कृतमण्डना सती ।

ENMSS@6105@2इतीर्ष्ययेव द्रुतमच्छिनद् रुषा  विचित्रताराभरणानि भास्करः ॥ ६१०५॥

ENMSS@6106@1इयं महेन्द्रप्रभृतीनधिश्रियश्  चतुर्दिगीशानवमत्य मानिनी ।

ENMSS@6106@2अरूपहार्यं मदनस्य निग्रहात्  पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ६१०६॥

ENMSS@6107@1इयं मुखाम्भोरुहसंनिधाने  विलम्बिधम्मिल्लततिच्छलेन ।

ENMSS@6107@2समागतां सादरमेव बाला  द्विरेफमालामुत वा दधाति ॥ ६१०७॥

ENMSS@6108@1इयं यशांसि द्विषतः सुधारुचः  किमङ्कमेतद् द्विषतः किमाननम् ।

ENMSS@6108@2यशोभिरस्याखिललोकधाविभिर् विभीषिता धावति तामसी मसी ॥ ६१०८॥

ENMSS@6109@1इयं रङ्गप्रवेशेन कलानां चोपशिक्षया ।

ENMSS@6109@2वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥ ६१०९॥

ENMSS@6110@1इयं विलासद्रुमदोहदश्रीर् इयं सुधा यौवनदुग्धसिन्धोः ।

ENMSS@6110@2लावण्यमाणिक्यरुचिच्छटेयम्  इयं मनःकार्मणचूर्णमुष्टिः ॥ ६११०॥

ENMSS@6111@1इयं व्याधायते बाला भ्रूरस्याः कार्मुकायते ।

ENMSS@6111@2कटाक्षाश्च शरायन्ते मनो मे हरिणायते ॥ ६१११॥

ENMSS@6112@1इयं सम्ध्या दूरादहमुपगतो हन्त मलयात्  तदेकां त्वद्गेहे करुणवति नेष्यामि रजनीम् ।

ENMSS@6112@2समीरेणैवोक्ता नवकुसुमिता चूतलतिका  धुनाना मुर्द्धानं नहि नहि नहीत्येव कुरुते ॥ ६११२॥

ENMSS@6113@1इयं सा कालिन्दी कुवलयदलस्निग्धमधुरा
मदान्धव्याकूजत्तरुणजलरंकुप्रणयिनी ।

ENMSS@6113@2पुरा यस्यास्तीरे सरभससतृष्णं मुरभिदो  गताः प्रायो
गोपीनिधुवनविनोदेन दिवसाः ॥ ६११३॥

ENMSS@6114@1इयं सा लोलाक्षी त्रिभुवनललामैकवसतिः  स चायं दुष्टात्मा
स्वसुरपकृतं येन मम तत् ।

ENMSS@6114@2इतस्तीव्रः कामो गुरुरयमितः क्रोधदहनः  कृतो वेषश्चायं कथमिदमिति भ्राम्यति मनः ॥ ६११४॥

ENMSS@6115@1इयं सुनयना दासीकृततामरसश्रिया ।

ENMSS@6115@2आननेनाकलङ्केन जयन्तीन्दुं कलङ्कितम् ॥ ६११५॥

ENMSS@6116@1इयं सुरतरङ्गिणी न पुनरत्र नौसंगमो भवेत् तरणिमज्ञनं पथिक नैव पान्थागमः ।

ENMSS@6116@2निधाय हृदये सदा विपुलचारुकुम्भद्वयं सखे घनघनागमे घनरसस्य पारं व्रज ॥ ६११६॥

ENMSS@6117@1इयं सुस्तनी मस्तकन्यस्तकुम्भा कुसुम्भारुणं चारु वासो वसाना ।

ENMSS@6117@2समस्तस्य लोकस्य चेतःप्रवृत्तिं गृहीत्वा घटे न्यस्य यातीव भाति ॥ ६११७॥

ENMSS@6118@1इयं सृष्टा चञ्चत्कनकलतिका पङ्कजभुवा निषिक्ता लावण्यामृतरसभरेणानुदिवसम् ।

ENMSS@6118@2अकस्माद् रोमालीमधुपपटलीह स्फुरति यत् ततः शङ्के पुष्पोद्गमसमयमायातमधुना ॥ ६११८॥

ENMSS@6119@1इयं स्वर्गाधिनाथस्य लक्ष्मीः किं यक्षकन्यका ।

ENMSS@6119@2अथवा विपिनस्यैव देवता किमु पार्वति ॥ ६११९॥

ENMSS@6120@1इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम् ।

ENMSS@6120@2अदृश्यरूपा चपला जरेव या मनुष्यसत्त्वं परिभूय वर्धते ॥ ६१२०॥

ENMSS@6121@1इयं हि योनिः प्रथमा यां प्राप्य जगतीपते ।

ENMSS@6121@2आत्मा वै शक्यते त्रातुं कर्मभिः शुभलक्षणैः ॥ ६१२१॥

ENMSS@6122@1इयं हि लोकव्यतिरेकवर्तिनी स्वभावतः पार्थिवता समुद्धता ।

ENMSS@6122@2बलात् तदेनां विनयेन योजयेन् नयस्य सिद्धौ विनयः पुरःसरः ॥ ६१२२॥

ENMSS@6123@1इयता वयसा न साधितं यत् परतः किं नु करिष्यतीति वेधाः ।

ENMSS@6123@2तिलतण्डुलितास्य रोमरेखा- च्छलतः कज्जलचूर्णमालिलिम्प ॥ ६१२३॥

ENMSS@6123@1इयतीं सुभगावस्थां गतोऽसि यस्याः कृते स्मरातङ्कात् ।

ENMSS@6123@2मूर्च्छां हरामि सा तव गतपुण्या नयनसलिलेन ॥ ६१२३॥

ENMSS@6124@1इयती जगती कियती भविता नमितानन्तामिति याति हयः ।

ENMSS@6124@2वियदङ्गणरिङ्गणरङ्गविधौ परिनर्तितुमुत्क्रमतीव नभः ॥ ६१२४॥

ENMSS@6125@1इयत् पृथ्वीमात्रं तदनु च नभोमण्डलमिय- दियान् पातालान्तो जलमपि पृथिव्यामियदिति ।

ENMSS@6125@2इति ज्ञात्वा कूपे विदितविषयो नायमपरः परं मुग्धो भेकः प्रबलतररावं

प्रकुरुते ॥ ६१२५॥

ENMSS@6126@1इयत्यप्येतस्मिन् निरवधिमहत्यध्वनि गुणास् त एवामी द्वित्रा जरठजरठा यान्ति गणनाम् ।

ENMSS@6126@2अहो ग्राम्यो लोकः स न परममीभिः कृतधृतिः स्मयस्तब्धो यावत् कलयति समग्रं तृणमिदम् ॥ ६१२६॥

ENMSS@6127@1इयत्यां संपत्तावपि च सलिलानां त्वमधुना न तृष्णामार्तानां हरसि यदि कासार सहसा ।

ENMSS@6127@2निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरान् कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥ ६१२७॥

ENMSS@6128@1इयत्यामपि सामग्र्यां सुकृतं न कृतं त्वया ।

ENMSS@6128@2इतीव कुपितो दन्तान् अन्तकः पातयत्यलम् ॥ ६१२८॥

ENMSS@6129@1इयत्येतस्मिन् वा निरवधिचमत्कृत्यतिशयो वराहो वा राहुः प्रभवति चमत्कारविषयः ।

ENMSS@6129@2महीमेको मग्नां यदयमवहद् दन्तशलत्लैः शिरःशेषः शत्रुं निगिलति परं संत्यजति च ॥ ६१२९॥

ENMSS@6130@1इयमत्र कयापि दिशा नीतिदृशां दर्शिता पदवी ।

ENMSS@6130@2चाणक्याद्यभिधानाज् ज्ञेयनिधानादथान्यदुन्नेयम् ॥ ६१३०॥

ENMSS@3131@1इयमत्र सतामलौकिकी महती कापि कठोरचित्तता ।

ENMSS@3131@2उपकृत्य भवन्ति दूरतः परतः प्रत्युपकारभीरवः ॥ ३१३१॥

ENMSS@6132@1इयमप्रतिबोधशायिनीं रशना त्वां प्रथमा रहःसखी ।

ENMSS@6132@2गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते ॥ ६१३२॥

ENMSS@6133@1इयमवयवैः पाण्डुक्षामैरलंकृतमण्डना कलितकुसुमा बालेवान्तर्लता परिशोषिणी ।

ENMSS@6133@2वहति च वरारोहा रम्यां विवाहमहोत्सव- श्रियमुदयिनीमुद्गाढां च व्यनक्ति मनोरुजम् ॥ ६१३३॥

ENMSS@6134@1इयमसौ तरलायतलोचना गुरुसमुन्नतपीनपयोधरा ।

ENMSS@6134@2पृथुनितम्बभरालसगामिनी प्रियतमा मम जीवितहारिणी ॥ ६१३४॥

ENMSS@6135@1इयमानन्दलतिका न ग्रीवा हरिणीदृशः ।

ENMSS@6135@2यतोऽस्यां विलुठन्त्येते मुक्ताः शुद्धगुणान्तराः ॥ ६१३५॥

ENMSS@6136@1इयमियं मयदानवनन्दिनी त्रिदशनाथजितः प्रसवस्थली ।

ENMSS@6136@2किमपरं दशकंधरगेहिनी त्वयि करोति करद्वययोजनम् ॥ ६१३६॥

ENMSS@6137@1इयमिष्टगुणाय रोचतां  रुचिरार्था भवतेऽपि भारती ।
ENMSS@6137@2ननु वक्तृविशेषनिःस्पृहा  गुणगृह्या वचने विपश्चितः ॥ ६१३७॥
ENMSS@6138@1इयमुदरदरी दुरन्तपूरा  यदि न भवेदभिमानभङ्गभूमिः ।
ENMSS@6138@2क्षणमपि न सहे भवादृशानां  कुटिलकटाक्षनिरीक्षणं नृपाणाम्
॥ ६१३८॥
ENMSS@6139@1इयमुद्गतिं हरन्ती  नेत्रनिकोचं च विदधती पुरतः ।
ENMSS@6139@2न विजानीमः किं तव  वदति सपत्नीव दिननिद्रा ॥ ६१३९॥
ENMSS@6140@1इयेष सा कर्तुमवन्ध्यरूपतां  समाधिमास्थाय तपोभिरात्मनः ।
ENMSS@6140@2अवाप्यते वा कथमन्यथा द्वयं  तथाविधं प्रेम पतिश्च तादृशः
॥ ६१४०॥
ENMSS@6141@1इलातलभराक्रान्तग्रीवं मा शेष वक्रय ।
ENMSS@6141@2त्वयि दुःखिनि चैकस्मिञ् जीवलोकः सदा सुखी ॥ ६१४१॥
ENMSS@6142@1इलिका भ्रमरीध्यानं ध्यायन्ती भ्रमरी भवेत् ।
ENMSS@6142@2वीतरागपदं ध्यायन् वीतरागो भवेद् ध्रुवम् ॥ ६१४२॥
ENMSS@6143@1इषुत्रयेणैव जगत्रयस्य  विनिर्जयात् पुष्पमयाशुगेन ।
ENMSS@6143@2शेषा द्विबाणी सफलीकृतेयं  प्रियादृगम्भोजपदेऽभिषिच्य ॥ ६१४३॥
ENMSS@6144@1इष्टं ददाति गृह्णाति कार्यमाख्याति पृच्छति ।
ENMSS@6144@2भुङ्क्ते भोजयते चैव षड्विधं मित्रलक्षणम् ॥ ६१४४॥
ENMSS@6145@1इष्टकचिते समन्तात्  पुरुषनिखातेऽवटे तरुर्जातः ।
ENMSS@6145@2वामन एव हि धत्ते  फलकुसुमं सर्वकालमिति ॥ ६१४५॥
ENMSS@6146@1इष्टां भार्यां प्रियं मित्रं पुत्रं चापि कनीयसम् ।
ENMSS@6146@2रिक्तपाणिर्न पश्येत तथा नैमित्तिकं प्रभुम् ॥ ६१४६॥
ENMSS@6147@1इष्टानि चाप्यपत्यानि द्रव्याणि सुहृदः प्रियाः ।
ENMSS@6147@2आपद्धर्मविमोक्षाय भार्या चापि सतां मतम् ॥ ६१४७॥
ENMSS@6148@1इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
ENMSS@6148@2तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ ६१४८॥
ENMSS@6149@1इष्टापूर्तानि कलयेत् जगत्ख्यातो वसेद् दिवि ।
ENMSS@6149@2अकूपारोक्तवृत्तोऽगाद् इन्द्रद्युम्नो दिवं पुनः ॥ ६१४९॥
ENMSS@6150@1इष्टा बालकचेष्टा  यौवनदर्पोऽथ वृद्धवैराग्यम् ।
ENMSS@6150@2सापि गता सोऽपि गतस् तदपि गतं स्वप्नमायेयम् ॥ ६१५०॥
ENMSS@6151@1इष्टा मखा द्विजवराश्च मयि प्रसन्नाः  प्रज्ञापिता भयरसं समदा

नरेन्द्राः ।

ENMSS@6151@2एवंविधस्य च न मेऽस्ति मनःप्रहर्षः  कन्यापितुर्हि सततं बहु चिन्तनीयम् ॥ ६१५१॥

ENMSS@6152@1इष्टेषु विसृजत्यर्थान् कुबेर इव कामदः ।

ENMSS@6152@2नमस्येयुश्च तं भक्त्या शिष्या इव गुरुं सदा ॥ ६१५२॥

ENMSS@6153@1इष्टो वा बहुसुकृतोपलालितो वा  श्लिष्टो वा व्यसनशताभिरक्षितो वा ।

ENMSS@6153@2दौःशील्याज्जनयति नैव जात्वसाधुर् विस्रम्भं भुजग इवाङ्कमध्यसुप्तः ॥ ६१५३॥

ENMSS@6154@1इष्ट्वा संग्रामयज्ञेन नानाप्रहरणाम्भसा ।

ENMSS@6154@2अस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना ॥ ६१५४॥

ENMSS@6155@1इह कपटकुतुकतरलित-  दृशि विश्वासं कुरङ्ग किं कुरुषे ।

ENMSS@6155@2तव रभसतरलितेयं  व्याधवधूर्वालधौ वलते ॥ ६१५५॥

ENMSS@6156@1इह किं कुरङ्गशावक  केदारे कलममञ्जरीं त्यजसि ।

ENMSS@6156@2तृणबाणस्तृणधन्वा  तृणघटितः कपटपुरुषोऽयम् ॥ ६१५६॥

ENMSS@6157@1इह किं प्रतिस्फुरति मे तवाग्रतो  नयशास्त्रनीरनिधिपारदृश्वनः ।

ENMSS@6157@2अवलीढविश्वतमसः पुरो रवेर् नहि जातु दीपकशिखा प्रकाशते ॥ ६१५७॥

ENMSS@6158@1इह खलु विषमः पुरा कृतानां  विलसति जन्तुषु कर्मणां विपाकः ।

ENMSS@6158@2हरशिरसि शिरांसि यानि रेजुः  शिव शिव तानि लुठन्ति गृध्रपादैः ॥ ६१५८॥

ENMSS@6159@1इह गमिष्यति वैद्यमतिः श्रमं  प्रथममेव पुरस्तु महासुखम् ।

ENMSS@6159@2प्रियतमस्य मृगाक्षि समागमे  नवकरग्रहणा गृहिणी यथा ॥ ६१५९॥

ENMSS@6160@1इह गुरुजलभारपूर्णगर्भाः  प्रदरदरीभ्रमभूरिभीमवेगाः ।

ENMSS@6160@2तटकटकनियुध्यमानवेणी-  द्विगुणमहारवभैरवास्तटिन्यः ॥ ६१६०॥

ENMSS@6161@1इह चत्वारि दानानि प्रोक्तानि परमर्षिभिः ।

ENMSS@6161@2विचार्य नानाशास्त्राणि शर्मणेऽत्र परत्र च ॥ ६१६१॥

ENMSS@6162@1भीतेभ्यश्चाभयं देयं व्याधितेभ्यस्तथौषधम् ।

ENMSS@6162@2देया विद्यार्थिनां विद्या देयमन्नं क्षुधातुरे ॥ ६१६२॥

ENMSS@6163@1इह चैव स्त्रियो धन्याः शीलस्य परिरक्षणात् ।

ENMSS@6163@2शीलभङ्गे च नारीणां यमलोकः सुदारुणः ॥ ६१६३॥

ENMSS@6164@1शीलं रक्ष्यं सदा स्त्रीभिर्दुष्टसंगविवर्जनात् ।

ENMSS@6164@2शीलेन हि परः स्वर्गः स्त्रीणां वैश्य न संशयः ॥ ६१६४॥

ENMSS@6165@1इह जगति जनस्य कस्य चित्ते  न वसति सौख्यविधानमुख्यवार्ता ।

ENMSS@6165@2खलु भवति तदेव तस्य सर्वं  भुवनपतिस्तु यदीश्वरः करोति ॥ ६१६५॥

ENMSS@6166@1इह जगति रतीशप्रक्रियाकौशलिन्यः  कति कति न निशीथे सुभ्रुवः संचरन्ति ।

ENMSS@6166@2मम तु विधिहताया जायमानस्मितायाः  सहचरि परिपन्थी हन्त दन्तांशुरेव

॥ ६१६६॥

ENMSS@6167@1इह तव देव निपतता  करकमलकुशोदकेन जायन्ते ।

ENMSS@6167@2तत्तद्दूरदरिद्र-  द्वारि द्विपदानवारिभिः सरितः ॥ ६१६७॥

ENMSS@6168@1इह तुरगशतैः प्रयान्तु मूर्खा  धनरहिता विबुधाः प्रयान्तु पद्भ्याम् ।

ENMSS@6168@2गिरिशिखरगतापि काकपङ्क्तिः  पुलिनगतैर्न समत्वमेति हंसैः ॥ ६१६८॥

ENMSS@6169@1इह दुःखं नृपादिभ्यः परत्र नरकादितः ।

ENMSS@6169@2प्राप्नोति स्तेयतस्तेन स्तेयं त्याज्यं सदा बुधैः ॥ ६१६९॥

ENMSS@6170@1इह दुःखं लयः प्रोक्तो दुःखं हर्तुं लयः क्षमः ।

ENMSS@6170@2दुःखे शुभे लयो दुःखं दुःखं किं तस्य कथ्यते ॥ ६१७०॥

ENMSS@6172@1इह धर्मार्थकामानाम् अवाप्तिफलमिष्यते ।

ENMSS@6172@2तत्रार्थः सह कामेन निरीक्ष्यो धर्मचक्षुषा ॥ ६१७२॥

ENMSS@6172-3 परित्यज्य हि यो धर्मम् अर्थमर्थाय पश्यति ।

ENMSS@6172-4 कामं वा कामलाभाय न स बुद्धेषु बुद्धिमान् ॥

ENMSS@6173@1इह नगरे प्रतिरथ्यं  भुजंगसंबाधरुचिरसंचारे ।

ENMSS@6173@2सुन्दरि मम मतमेतन्  नकुलप्रतिपालनं श्रेयः ॥ ६१७३॥

ENMSS@6174@1इह निचुलनिकुञ्जे मध्यमध्येऽस्य रन्तुर् विजनमजनि शय्या कस्य बालप्रवालैः ।

ENMSS@6174@2इति कथयति वृन्दे योषितां पान्तु युष्मान्  स्मितशबलितराधामाधवालोकितानि

॥ ६१७४॥

ENMSS@6175@1इह निचुलनिकुञ्जे वंशसंभारभाजि  स्वपिमि यदि मुहूर्तं पश्यसि क्षेत्रमेतत् ।

ENMSS@6175@2इति पथिकमकस्मान् मार्ग एवोपविष्टं वदति तरुणकान्तं गोपिका साङ्गभङ्गम् ॥ ६१७५॥

ENMSS@6176@1इह निभृतनिपातमूकपादं वलयितकार्मुकवल्लयः किराताः ।

ENMSS@6176@2भवदलसविलोकनानभिज्ञा मृगगृहिणि प्रहरन्ति गच्छ दूरम् ॥ ६१७६॥

ENMSS@6177@1इह निवसति मेरुः शेखरो भूधराणाम् इह हि निहितभाराः सागराः सप्त

चैव ।

ENMSS@6177@2इदमतुलमनन्तं भूतलं भूरिभूतोद्- भवधरणसमर्थं

स्थानमस्मद्विधानाम् ॥ ६१७७॥

ENMSS@6178@1इह निशि निबिडनिरन्तर- कुचकुम्भद्वितयदत्तहृदयभरा ।

ENMSS@6178@2रमणगुणकृष्यमाणा संतरति तमस्तरङ्गिणीं कापि ॥ ६१७८॥

ENMSS@6179@1इह परिचिता जात्यन्धानामियं न तवोन्नतिर् गुणपरिचये चक्षुष्मन्तो

त्वयातिविडम्बिताः ।

ENMSS@6179@2कृपणवणिजामल्पीकर्तुं गुणांस्तव केवलं मरकत मृषा दोषोद्गारः

करिष्यति दुर्यशः ॥ ६१७९॥

ENMSS@6180@1इह परिमलो यत्र व्यक्तो न तत्र मधुश्रियो मधु समधिकं यस्मिंस्तस्मिन्

न गन्धसमृद्धयः ।

ENMSS@6180@2इति मरुवकं निन्दन् कुन्दादपेतकुतूहलः कमलमधिकं स्मारं स्मारं

विषीदति षट्पदः ॥ ६१८०॥

ENMSS@6181@1इह पुरोऽनिलकम्पितविग्रहा मिलति का न वनस्पतिना लता ।

ENMSS@6181@2स्मरसि किं सखि कान्तरतोत्सवं न हि घनागमरीतिरुदाहृता ॥ ६१८१॥

ENMSS@6182@1इह बहलितमिन्दोर्दीधितीनां प्रभाभिर् मदविकलचकोरीचञ्चुमुद्राङ्किताभिः

।

ENMSS@6182@2रतिभरपरिखेदस्रस्तरार्थं वधूनां

करकिसलयलीलाभञ्जनव्यञ्जिकाभिः ॥ ६१८२॥

ENMSS@6183@1इह भुवि कलयति लघुरपि महतां सङ्गेन कमपि महिमानम् ।

ENMSS@6183@2लङ्घयति चन्द्रलीनो नभस्तलं हेलया हरिणः ॥ ६१८३॥

ENMSS@6184@1इह भोगं यशः प्रीतिं सभासु बहुमान्यताम् ।

ENMSS@6184@2दद्यात् परत्र सुगतिं विद्याधनमनुत्तमम् ॥ ६१८४॥

ENMSS@6185@1इह मधुपवधूनां पीतमल्लीमधूनां विलसति कमनीयः काकलीसंप्रदायः ।
ENMSS@6185@2इह नटति सलीलं मञ्जरी वञ्जुलस्य प्रतिपदमुपदिष्टा दक्षिणेनानिलेन ॥ ६१८५॥
ENMSS@6186@1इह महिषविषाणव्यस्तपाषाणपीठ- स्खलनसुलभरोहिद्गर्भिणीभ्रूणहत्याः ।
ENMSS@6186@2कुहरविहरमाणप्रौढभल्लूकहिक्का- चयचकितकिरातस्रस्तशस्त्रा वनान्ताः ॥ ६१८६॥
ENMSS@6187@1इह मुहुर्मुदितैः कलभै रवः प्रतिदिशं क्रियते कलभैरवः ।
ENMSS@6187@2स्फुरति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः ॥ ६१८७॥
ENMSS@6188@1इह यत् क्रियते कर्म तत् परत्रोपभुजुयते ।
ENMSS@6188@2सिक्तमूलस्य वृक्षस्य फलं शाखासु दृश्यते ॥ ६१८८॥
ENMSS@6189@1इह यत् क्रियते कर्म फलं तत्रैव भुज्यते ।
ENMSS@6189@2कर्मभूमिरियं राजन् फलभूमिश्च सा स्मृता ॥ ६१८९॥
ENMSS@6190@1इह यादववंशकृष्णवर्त्मा- नुगतिः साङ्गतया मयान्वभावि ।
ENMSS@6190@2अधुना तदवाप्तिचेतसे मे मधुराकामधुरापि रोचते किम् ॥ ६१९०॥
ENMSS@6191@1इह रूपमात्रसारे चित्रकृते कमलकह्लारे ।
ENMSS@6191@2न रसो नापि च गन्धो मधुकर बन्धो मुधा भ्रमसि ॥ ६१९१॥
ENMSS@6192@1इह रे बहला लासे बाला राहुमलीमसा ।
ENMSS@6192@2सालका रसलीला सा तुङ्गालालि कलारत ॥ ६१९२॥
ENMSS@6193@1इहलोके च पितृभिर्या स्त्री यस्य महामते ।
ENMSS@6193@2अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा ॥ ६१९३॥
ENMSS@6194@1इह लोके हि धनिनः परोऽपि स्वजनायते ।
ENMSS@6194@2स्वजनस्तु दरिद्राणां जीवतामेव नश्यति ॥ ६१९४॥
ENMSS@6195@1इह लोके हि धनिनां परोऽपि स्वजनायते ।
ENMSS@6195@2स्वजनोऽपि दरिद्राणां तत्क्षणाद् दुर्जनायते ॥ ६१९५॥
ENMSS@6196@1इह लोको हतो न् णां दारिद्र्येण यथा नृप ।
ENMSS@6196@2मनुष्याणां तथा जन्म माघस्नानं विना हतम् ॥ ६१९६॥
ENMSS@6197@1इह वटवृक्षे यक्षः प्रतिवसति दिवापि यत्र भयशङ्का ।
ENMSS@6197@2तस्मिन्नभिनववध्वा नीता वीतोदयाः क्षणदाः ॥ ६१९७॥
ENMSS@6198@1इह वत्सान् समचारयद् इह नः स्वामी जगौ वंशीम् ।

ENMSS@6198@2इति सास्रं गदतो मे  यमुनातीरे दिनं यायात् ॥ ६१९८॥

ENMSS@6199@1इह वहति बहुमहोदधि-  विभूषणा मानगर्वमियमुर्वी ।

ENMSS@6199@2देवस्य कमठमूर्तेर् न पृष्ठमपि निखिलमाप्नोति ॥ ६१९९॥

ENMSS@6200@1इह वा तारयेद् दुर्गाद् उत वा प्रेत्य तारयेत् ।

ENMSS@6200@2सर्वथा तारयेत् पुत्रः पुत्र इत्युच्यते बुधैः ॥ ६२००॥

ENMSS@6201@1इह विकसदशोकास्तोकपुष्पोपकारैर् अयमतिशयरक्तः सक्तसुस्निग्धभावः
।

ENMSS@6201@2त्रिभुवनजयसज्ञः प्राज्यसा म्राज्यभाजः  प्रथयति पृथुमैत्रीं

पुष्पचापस्य चैत्रः ॥ ६२०१॥

ENMSS@6202@1इह विचरन्ति किरातास् त्वादृक्स्वच्छन्दतानिहन्तारः ।

ENMSS@6202@2तदमीषां गानादौ  मा धाः श्रवणे कुरङ्गशाव त्वम् ॥ ६२०२॥

ENMSS@6203@1इह विजयिनि वंशे कीर्तिधाराकलाप-  स्नपितसकललोकः

श्रीयशोविग्रहोऽभूत् ।

ENMSS@6203@2जलघट इव युद्धोत्तालभूपालदर्प-  ज्वलनशमनलीलाकोविदः कोऽपि

वीरः ॥ ६२०३॥

ENMSS@6204@1इह विधिविषमः पुराकृतानां  भवति हि जन्तुषु कर्मणां विपाकः ।

ENMSS@6204@2क्व जनकतनया क्व रामरामा  क्व च दशकन्धरमन्दिरे निवासः ॥
६२०४॥

ENMSS@6205@1इह विरचयन् साध्वीं शिष्यः क्रियां न निवार्यते  त्यजति तु यदा
मार्गं

मोहात् तदा गुरुरङ्कुशः ।

ENMSS@6205@2विनयरुचयस्तस्मात् सन्तः सदैव निरङ्कुशाः  परतरमतः स्वातन्त्र्येभ्यो

वयं हि पराङ्मुखाः ॥ ६२०५॥

ENMSS@6206@1इह विश्वम्भरापीडे चन्दनं कस्य न प्रियम् ।

ENMSS@6206@2अनुस्वारं विलिप्यापि ओकारस्य प्रयोजनात् ॥ ६२०६॥

ENMSS@6207@1इह वैकस्य नामुत्र अमुत्रैकस्य नो इह ।

ENMSS@6207@2इह चामुत्र वैकस्य नामुत्रैकस्य नो इह ॥ ६२०७॥

ENMSS@6208@1इह व्याधव्यूहः पटुघटितयन्त्रप्रहरणो  मृगेन्द्राणां वल्गत्

प्रखरनखराणां कुलमिह ।

ENMSS@6208@2इहालङ्घ्यः शैलो बहलतरपङ्का सरिदिह  प्रदीप्तोऽग्निर्मध्येवनमहह

कष्टं करिपतेः ॥ ६२०८॥

ENMSS@6209@1इह शय्यागतेनापि बन्धुमध्यस्थितेन वा ।

ENMSS@6209@2मयैवैकेन सोढव्या मर्मच्छेदादिवेदना ॥ ६२०९॥

ENMSS@6210@1इह शिखरकरालक्षोणिभिद्गण्डशैल- स्खलनदलनगर्जत्फेनिलो बुद्बुदौघः ।

ENMSS@6210@2पवनधृतशिरीषश्रेणिरेणुप्रणाली- सुरभिसलिलदृप्ता द्वीपवत्यो वहन्ति ॥ ६२१०॥

ENMSS@6211@1इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।

ENMSS@6211@2वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ॥ ६२११॥

ENMSS@6212@1इह संतमसे घनागमे सुखितं भानवमैन्दवं वपुः ।

ENMSS@6212@2तडिदुज्ज्वलदीपलेखया हरितोऽमूः परितो विचिन्वति ॥ ६२१२॥

ENMSS@6213@1इह समदशकुन्ताक्रान्तवानीरवीरुत्- प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।

ENMSS@6213@2फलभरपरिणामश्यामजम्बूनिकुञ्ज- स्खलनमुखरभूरिस्त्रोतसो निर्झरिण्यः ॥ ६२१३॥

ENMSS@6214@1इह सरसि सलीलं चारुपत्रे विधुन्वन्
दरतरलिततिर्यक्कञ्चुकण्डूयिताङ्गः ।

ENMSS@6214@2अनुसरति सरागः प्रेयसीमग्रयाताम् अनुपदसमुदञ्चत्कण्ठनालो मरालः
॥ ६२१४॥

ENMSS@6215@1इह सरसि सहर्षं मञ्जुगुञ्जाभिरामं मधुकर कुरु केलिं सार्धमम्भोजिनीभिः ।

ENMSS@6215@2अनुपममकरन्दामोददत्तप्रमोदा त्यजति बत न निद्रां मालती यावदेषा
॥ ६२१५॥

ENMSS@6216@1इह सर्वस्वफलिनः कुलपुत्रमहाद्रुमाः ।

ENMSS@6216@2निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः ॥ ६२१६॥

ENMSS@6217@1इह सामान्यानुगमं समुपदिशन्तः स्थलेष्वनेकेषु ।

ENMSS@6217@2लिङ्गपरामर्शपरा नवीननैयायिका यान्ति ॥ ६२१७॥

ENMSS@6218@1इह स्फुटं तिष्ठति नाथ कण्टकः शनैः शनैः कर्ष नखाग्रलीलया ।

ENMSS@6218@2इति च्छलात् काचिदलग्नकण्टकं पदं तदुत्सङ्गतले न्यवेशयत्
॥ ६२१८॥

ENMSS@6219@1इह हि नववसन्ते मञ्जरीपुञ्जरेणु- च्छुरणधवलदेहा बद्धहेलं सरन्ति ।

ENMSS@6219@2तरलमलिसमूहा हारिहुंकारकण्ठा बहुलपरिमलालीसुन्दरं सिन्दुवारम् ॥ ६२१९॥

ENMSS@6220@1इह हि मधुरगीतं रूपमेतद् रसोऽयं स्फुरति परिमलोऽसौ स्पर्श एष स्तनानाम् ।

ENMSS@6220@2इति हृतपरमार्थैरिद्रियैर्भ्राम्यमाणः स्वहितकरणधूर्तैः पञ्चभिर्वञ्चितोऽस्मि ॥ ६२२०॥

ENMSS@6221@1इहानेके सत्यं वृषमहिषमेषाः सुतुरगा गृहाणि क्षुद्राणां कतिपयतृणैरेव सुखिनः ।

ENMSS@6221@2गजानामास्थानं मदसलिलजम्बालितभुवां तदेको विन्ध्याद्रेर्विपिनमथवा भूपसदनम् ॥ ६२२१॥

ENMSS@6222@1इहानेके सन्तः सततमुपकारिण्युपकृतिं कृतज्ञाः कुर्वन्तो जगति निवसन्तोऽपि सुधियः ।

ENMSS@6222@2कियन्तस्ते सन्तः सुकृतपरिपाकप्रणयिनो विना स्वार्थं येषां भवति परकृत्यव्यसनिता ॥ ६२२२॥

ENMSS@6223@1इहाविशद्येन पथातिवक्रः शास्त्रौघनिष्यन्दसुधाप्रवाहः ।

ENMSS@6223@2सोऽस्याः श्रवःपत्रयुगे प्रणाली- रेखेव धावत्यभिकर्णकूपम् ॥ ६२२३॥

ENMSS@6224@1इहैकश्चूडालोऽभ्यजनि कलशाद् यस्य सकलैः पिपासोरम्भोभिश्चुलुकमपि नो भर्तुमशकः ।

ENMSS@6224@2स्वमाहात्म्यश्लाघागुरुगहनगर्जाभिरमितः कुषित्वा क्लिश्नासि श्रुतिकुहरमब्धे किमिति नः ॥ ६२२४॥

ENMSS@6225@1इहैव नरकव्याधेश्चिकित्सां न करोति यः ।

ENMSS@6225@2गत्वा निरौषधस्थानं स रोगी किं करिष्यति ॥ ६२२५॥

ENMSS@6226@1इहैव भुवने जातं सत्त्वसंस्थापनं क्षमम् ।

ENMSS@6226@2गृह्यते किमपि स्वस्थैरन्यत् किमपि जिह्मगैः ॥ ६२२६॥

ENMSS@6227@1इहोद्याने सम्प्रत्यहह परिशिष्टाः क्रमवशाद् अमी वल्मीकास्ते भुजगकुललीलावसतयः ।

ENMSS@6227@2गतास्ते विस्तीर्णस्तबकभरसौरभ्यलहरी- परीतव्योमानः प्रकृतिगुरवः केऽपि तरवः ॥ ६२२७॥

ENMSS@6228@1इहोपपत्तिर्मम केन कर्मणा क्व वा प्रयातव्यमितो भवेदिति ।

ENMSS@6228@2विचारणा यस्य न विद्यते स्मृतौ कथं स धर्मप्रवणो भविष्यति

॥ ६२२८॥

ENMSS@6229@1ईक्षणध्यानसंस्पर्शैर्मत्स्यकूर्मविहङ्गमाः ।

ENMSS@6229@2पोषयन्ति स्वकान् पुत्रान् तद्वत् पण्डितवृत्तयः ॥ ६२२९॥

ENMSS@6230@1ईक्षितोपदिशतीव नर्तितुं तत्क्षणोदितमुदं मनोभुवम् ।

ENMSS@6230@2कान्तदन्तपरिपीडिताधरा पाणिधूननमियं वितन्वती ॥ ६२३०॥

ENMSS@6231@1ईदृशं कारयेन् न्यासं येन श्रेयो भविष्यति ।

ENMSS@6231@2अन्येऽपि दुष्टमन्त्रेण न हिंसन्ति कदाचन ॥ ६२३१॥

ENMSS@6232@1ईदृशं निगदति प्रिये दृशं संमदात् कियदियं न्यमीलयत् ।

ENMSS@6232@2प्रातरालपति कोकिले कलं जागरादिव निशः कुमुद्वती ॥ ६२३२॥

ENMSS@6233@1ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत् ।

ENMSS@6233@2को नाम स भवेत् तस्य यमेष न परित्यजेत् ॥ ६२३३॥

ENMSS@6234@1ईदृशस्य भवतः कथमेतल् लाघवं मुहुरतीव रतेषु ।

ENMSS@6234@2क्षिप्तमायतमदर्शयदुर्व्यां काञ्चिदाम जघनस्य महत्त्वम् ॥ ६२३४॥

ENMSS@6235@1ईदृशे व्यवहाराग्नौ मन्त्रिभिः परिपातिताः ।

ENMSS@6235@2स्थाने खलु महीपाला गच्छन्ति कृपणां दशाम् ॥ ६२३५॥

ENMSS@6236@1ईदृशैः श्वेतकाकीयै राज्ञः शासनदूषकैः ।

ENMSS@6236@2अपापानां सहस्राणि हन्यन्ते च हतानि च ॥ ६२३६॥

ENMSS@6237@1ईप्सितं मनसः सर्वं कस्य संपद्यते सुखम् ।

ENMSS@6237@2दैवायत्तं यतः सर्वं तस्मात् संतोषमाश्रयेत् ॥ ६२३७॥

ENMSS@6238@1ईर्ष्यया रक्षतो नारीर्धिक् कुलस्थितिदाम्भिकान् ।

ENMSS@6238@2स्मरान्धत्वाविशेषेऽपि तथा नरमरक्षतः ॥ ६२३८॥

ENMSS@6239@1ईर्ष्ययैव समुद्विग्नाः पुरुषाद् दुष्टचेतसः ।

ENMSS@6239@2अतिसक्ताः पलायन्ते श्रीधृतिस्मृतिकीर्तयः ॥ ६२३९॥

ENMSS@6240@1ईर्ष्या कलहमूलं स्यात् क्षमा मूलं हि संपदाम् ।

ENMSS@6240@2ईर्ष्यादोषाद् विप्रशापम् अवाप जनमेजयः ॥ ६२४०॥

ENMSS@6241@1ईर्ष्या कुलस्त्रीषु न नायकस्य निःशङ्ककेलिर्न पराङ्गनासु ।

ENMSS@6241@2वेश्यासु चैतद् द्वितयं प्ररूढं सर्वस्वमेतास्तदहो स्मरस्य ॥ ६२४१॥

ENMSS@6242@1ईर्ष्याद् हि कुप्यते वेश्या प्रसङ्गाच्च विरज्यते ।

ENMSS@6242@2स्तब्धातिगमनाच्चापि दानादपि विलुप्यते ॥ ६२४२॥

ENMSS@6243@1ईर्ष्याप्रस्फुरिताधरोष्ठरुचिरं वक्त्रं न मे दर्शितं साधिक्षेपपदा मनागपि गिरो न श्राविता मुग्धया ।

ENMSS@6243@2मद्दोषैः सरसैः प्रतापितमनोवृत्त्यापि कोपोऽनया काञ्च्या गाढतरावबद्धवसनग्रन्थ्या समावेदितः ॥ ६२४३॥

ENMSS@6244@1ईर्ष्याभयक्रोधसमन्वितेन लुब्धेन रुग्दैन्यनिपीडितेन ।

ENMSS@6244@2विद्वेषयुक्तेन च सेव्यमानम् अन्नं न सम्यक् परिपाकमेति ॥ ६२४४॥

ENMSS@6245@1॥। ॥। ॥। ॥। ॥। ॥। ॥

ENMSS@6245@2ईर्ष्यामलं खलेष्वास्ते विषमाशीविषेष्विव ॥ ६२४५॥

ENMSS@6246@1ईर्ष्यारोषज्वलितो निजपतिसङ्गं विचिन्तयंस्तस्याः ।

ENMSS@6246@2च्युतवसनजघनभावन- सान्द्रानन्देन निर्वामि ॥ ६२४६॥

ENMSS@6247@1ईर्ष्या लोभो मदः प्रीतिः क्रोधो भीतिश्च साहसम् ।

ENMSS@6247@2प्रवृत्तिच्छिद्रहेतूनि कार्ये सप्त बुधा जगुः ॥ ६२४७॥

ENMSS@6248@1ईर्ष्यी घृणी त्वसंतुष्टः क्रोधनो नित्यशङ्कितः ।

ENMSS@6248@2परभाग्योपजीवी च षडेते नित्यदुःखिताः ॥ ६२४८॥

ENMSS@6249@1ईशः करस्थीकृतकाञ्चनाद्रिः कुबेरमित्रं रजताचलस्थः ।

ENMSS@6249@2तथापि भिक्षाटनमस्य जातं विधौ शिरःस्थे कुटिले कुतः श्रीः ॥ ६२४९॥

ENMSS@6250@1ईशानोत्थैः शकुनैश् चोरा ग्रामं प्रविश्य न लभन्ते ।

ENMSS@6250@2न च रोगार्तो जीवति स्वस्थोऽप्यस्वास्थ्यमाप्नोति ॥ ६२५०॥

ENMSS@6251@1ईशानोत्थैः शकुनैर् विशेषतः शूरमण्डलाक्रान्तैः ।

ENMSS@6251@2रिपुवेष्टित इव दूरं त्यक्त्वा स्थानं पलायेत ॥ ६२५१॥

ENMSS@6252@1ईशे पदप्रणयभाजि मुहूर्तमात्रं प्राणप्रियेऽपि कुरु मानिनि मा प्रसादम् ।

ENMSS@6252@2जानातु मत्पतिरसौ पदयोर्नतानाम् अस्मादृशामपि मनोरथभङ्गदुःखम् ॥ ६२५२॥

ENMSS@6253@1ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः ।

ENMSS@6253@2ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ॥ ६२५३॥

ENMSS@6254@1ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ।

ENMSS@6254@2वृद्धानामपि यद् बुद्धिर्बालवाक्यैर्विभिद्यते ॥ ६२५४॥

ENMSS@6255@1ईश्वरः स जगत्पूज्यः स वाग्मी चतुराननः ।

ENMSS@6255@2यस्यास्ति द्रविणं लोके स एव पुरुषोत्तमः ॥ ६२५५॥

ENMSS@6256@1स एवाहृदयो राहुरलसः स शनैश्चरः ।

ENMSS@6256@2वक्रः कुजन्मा सततं वित्तं यस्य न विद्यते ॥ ६२५६॥

ENMSS@6257@1ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
ENMSS@6257@2भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ ६२५७॥
ENMSS@6258@1ईश्वरगृहमिदमत्र हि  विषं च वृषभश्च भस्म चाद्रियते ।
ENMSS@6258@2यस्तु न विषं न वृषभो  न भस्म तस्यात्र का गणना ॥ ६२५८॥
ENMSS@6259@1ईश्वरपरिग्रहोचित-  मोहोऽस्यां मधुप किं मुधा पतसि ।
ENMSS@6259@2कनकाभिधानसारा  वीतरसा कितवकलिकेयम् ॥ ६२५९॥
ENMSS@6260@1ईश्वरमाराधयतो  विगलितमानस्य लब्धमैश्वर्यम् ।
ENMSS@6260@2स्फुटमेव भवति लघिमा  गरिमापि कथं न जानीमः ॥ ६२६०॥
ENMSS@6261@1ईश्वरसेवा सुलभ-  न्यक्कारा दुर्लभोत्कर्षा ।
ENMSS@6261@2चिरपरिचर्या विफला  निर्माल्या निष्क्रमोऽपि निरयाय ॥ ६२६१॥
ENMSS@6262@1ईश्वरस्य जगत् कृत्स्नं सृष्टिमाकुलयन्निमाम् ।
ENMSS@6262@2अस्ति योऽस्त्रीकृतस्त्रीकस्तस्य वैरं स्मरन्निव ॥ ६२६२॥
ENMSS@6263@1ईश्वराः पिशुनाञ् शश्वद् बिभ्रतीति किमद्भुतम् ।
ENMSS@6263@2प्रायो निधय एवाहीन् द्विजिह्वान् दधतेतराम् ॥ ६२६३॥
ENMSS@6264@1ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ।
ENMSS@6264@2तेषां यत् स्ववचोयुक्तं बुद्धिमांस्तत् समाचरेत् ॥ ६२६४॥
ENMSS@6265@1ईश्वराणामिदं तन्त्रं प्रायेणौत्सुक्यमावहेत् ।
ENMSS@6265@2यतस्तिरश्चां चरितैर्नीतिमार्गः प्रदर्श्यते ॥ ६२६५॥
ENMSS@6266@1ईश्वरात् समभूद् रुद्रो ज्योतिर्मय उमापतिः ।
ENMSS@6266@2रुद्राद् विष्णुरभूदाद्यस्त्रैलोक्यपरिपालकः ॥ ६२६६॥
ENMSS@6267@1ईश्वरानुगृहीतो हि कश्चिद् बालोऽपि शाम्यति ।
ENMSS@6267@2वृद्धोऽपि न शमं याति कश्चित् कापुरुषः पुनः ॥ ६२६७॥
ENMSS@6268@1ईश्वरा भूरिदानेन यल्लभन्ते फलं किल ।
ENMSS@6268@2दरिद्रस्तच्च काकिण्या प्राप्नुयादिति न श्रुतिः ॥ ६२६८॥
ENMSS@6269@1ईश्वरेण समं प्रीतिर्न मे लक्ष्मण रोचते ।
ENMSS@6269@2गतस्य गौरवं नास्ति आगतस्य धनक्षयः ॥ ६२६९॥
ENMSS@6270@1ईश्वरोक्ताद् धनुर्वेदाद् व्यासस्यापि सुभाषितात् ।
ENMSS@6270@2पदान्याकृष्य रचितो ग्रन्थः संक्षेपतो मया ॥ ६२७०॥
ENMSS@6271@1ईषत्कम्पपयोधरं गुरुकटीप्रौढप्रहाराद्भुतं
स्विद्यद्भालमनेकहास्यसरसं संकथ्यपादव्यथम् ।
ENMSS@6271@2वारंवारमुरःप्रपातसुभगं संदश्यमानाधरं

किंचिद्दत्तनितम्बदेशनखरं धन्यो रतं सेवते ॥ ६२७१॥

ENMSS@6272@1ईषत्तुषारैः कृतशीतहर्म्यैः  सुवासितं चारुशिरः सचम्पकैः ।

ENMSS@6272@2कुर्वन्ति नार्योऽपि वसन्तकाले  स्तनं सहारं कुसुमैर्मनोहरैः ॥ ६२७२॥

ENMSS@6273@1ईषत्प्रकटितो मन्दस्तीक्ष्णस्तु पुलकादिभिः ।

ENMSS@6273@2स तु तीक्ष्णतरः श्वासशोषितावयवोऽत्र यः ॥ ६२७३॥

ENMSS@6274@1ईषदवशिष्टजडिमा  शिशिरे गतमात्र एव चिरमङ्गैः ।

ENMSS@6274@2नवयौवनेव तन्वी  निषेव्यते निर्भरं वापी ॥ ६२७४॥

ENMSS@6275@1ईषदायच्छमानोऽपि सिंहो मत्तानपि द्विपान् ।

ENMSS@6275@2निहन्ति बलवांस्तस्मात् संधेयः शिवमिच्छता ॥ ६२७५॥

ENMSS@6276@1ईषद्वक्रितपक्ष्मपङ्क्तिभिरनाकूतस्मितैर्वीक्षित् ऐः  एतैरेव तवाद्य सुन्दरि करक्रोडे जगद् वर्तते ।

ENMSS@6276@2अन्तः पांसुलहेमकेतकिदलद्रोणीदुरापश्रियो  दोर्मूलस्य निवेदनादिह पुनः

क्रूरे किमाकाङ्क्षसि ॥ ६२७६॥

ENMSS@6277@1ईषन्नासानिकोचः खरमुखरसुखप्रेक्षणं हासलेशः

स्वाबोधादप्रसादध्वननमसदवद्योक्तिहेलावहेला ।

ENMSS@6277@2मौनव्यासङ्गवार्तान्तरपररुचिरश्लोकपाठाद यस्ते

सोढव्याः के कियन्तः शिव शिव कविते कुच्छला मत्सराणाम् ॥ ६२७७॥

ENMSS@6278@1ईषन्मीलितदृष्टि मुग्धविलसत्सीत्कारधारावशाद्

अव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम् ।

ENMSS@6278@2शान्तस्तब्धपयोधरं भृशपरिष्वङ्गात्

कुरङ्गीदृशो  हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननम् ॥ ६२७८॥

ENMSS@6279@1ईषन्मीलितलोचना श्लथसमस्ताङ्गा श्रमोद्वेजिता

निश्वासप्रथमा विरत्नरसना संत्यक्तकण्ठस्वना ।

ENMSS@6279@2प्रोद्यत्कामजला कलासु कुशला निर्लज्जया कामिनी  कान्ता

कालवशात् प्रियस्य वशगा जाता रतान्ते क्षणम् ॥ ६२७९॥

ENMSS@6280@1ईषन्मीलितलोललोचनयुगं व्यावर्तितभ्रूयुगं

संदष्टाधरवेदनाप्रणयिनं मा मेति मन्दाक्षरम् ।

ENMSS@6280@2तन्वङ्ग्याः सुरतावसानसमये दृष्टं मया यन्मुखं

स्वेदार्द्रीकृतपाण्डुगण्डयुगलं तत् केन विस्मर्यते ॥ ६२८०॥

ENMSS@6281@1ईषल्लब्धप्रवेशोऽपि स्नेहविच्छेदकारकः ।

ENMSS@6281@2कृतक्षोभो नरीनर्ति खलो मन्थानदण्डवत् ॥ ६२८१॥
ENMSS@6282@1ईषल्लोमशभावभाञ्जि कपिशश्यामानुबन्धच्छवी-
लिप्तत्वञ्चि चकोरकीरहरितोन्मेषीणि माषीलताः ।
ENMSS@6282@2एतास्तर्कय बालवानरवधूहस्ताङ्गुलीलब्भ्रिम-
स्पर्धावन्ति फलानि बिभ्रति परीणामाभिरामश्रियः ॥ ६२८२॥
ENMSS@6283@1ईहमानः समारम्भान् यदि नासादयेद् धनम् ।
ENMSS@6283@2उग्रं तपः समारोहेन् न ह्यनुप्तं प्ररोहति ॥ ६२८३॥
ENMSS@6284@1दानेन भोगी भवति मेधावी वृद्धसेवया ।
ENMSS@6284@2अहिंसया च दीर्घायुरिति प्राहुर्मनीषिणः ॥ ६२८४॥
ENMSS@6285@1ईहा धनस्य न सुखा लब्ध्वा चिन्ता च भूयसी ।
ENMSS@6285@2लभ्दनाशो यथा मृत्युर्लभ्दं भवति वा न वा ॥ ६२८५॥
ENMSS@6286@1उक्तं च वक्ष्यमानं च भर्त्सनं तिर्यगीक्षणम् ।
ENMSS@6286@2क्वचिद् यथार्थकथनं व्याख्या तन्त्रस्य षड्विधाः ॥ ६२८६॥
ENMSS@6287@1उक्तं दुर्वचनं मया न सुभगे हास्येऽपि दुःखप्रदं
त्यक्त्वा त्वामपि भाषितैरपि मया नान्या गना लालिता ।
ENMSS@6287@2त्वामेकामनवद्यभूषणभरैः संभावयामि त्वया  हे
निष्कारणकोपने वद कृतः कोपः किमर्थं मयि ॥ ६२८७॥
ENMSS@6288@1उक्तं परस्यामिषताम् अनुक्तं यात्यदृश्यताम् ।
ENMSS@6288@2हृदये शल्यतां धत्ते निधने धनिनां धनम् ॥ ६२८८॥
ENMSS@6289@1उक्तं यत् कृपणं वचो विरचितो भूयान् वसूनां
व्ययः  सोढाः किं च वियोगवज्रततयो दूती मुहुः प्रेषिता ।
ENMSS@6289@2बद्धोऽयं प्रणयाञ्जलिर्विनिहिते बाष्पाम्बुधौते दृशौ
निष्पीयाधरपल्लवं मृगदृशः सर्वे सखे विस्मृतम् ॥ ६२८९॥
ENMSS@6290@1उक्तस्(उत्तस्) ते रुधिरेणाहं स्पृष्टं ते मस्तकं मया ।
ENMSS@6290@2इत्येताञ् शपथान् कृत्वा सा वै गम्या पुनः पुनः ॥ ६२९०॥
ENMSS@6291@1उक्ता गच्छति लज्जिता विरमति प्रेम्णा मनागिक्षते
केशांल्लुञ्चति जृम्भणं रचयति प्रस्तौति गाथां मुहुः ।
ENMSS@6291@2आलि गत्यपरां विरौति परुषं चुम्बत्यसौ बालकं
गात्रं भञ्जति जृम्भते विहसति प्रत्युत्तरं याचते ॥ ६२९१॥
ENMSS@6292@1दोर्मूलं खलु दर्शयेत् स्तनयुगे वस्त्रं समालम्बते
अ गुष्ठेन लिखेन्महीं स्मितमुखी व्रीडां विधत्ते मृषा ।

ENMSS@6292@2दन्तेनाधरपल्लवं विदशति व्यक्तं तथा भाषते
भावैरेभिरिह स्फुटं मृगदृशां ज्ञेयोऽभिलाषः सदा ॥ ६२९२॥
ENMSS@6293@1उक्ता ब्रवीषि सुरतं न मया निशायास् त्वं दौष्टवेन
गजगामिनि लज्ञया वा ।
ENMSS@6293@2ताम्बूलकज्ञलकुचामयचिह्नचित्रं तत् संनिवेदयति
मां रमणोत्तरीयम् ॥ ६२९३॥
ENMSS@6294@1उक्तिर्नान्या स्फुरति नियतं ध्यानमन्यन्न चास्ते
पश्यत्यन्यं न खलु नयनं न श्रवोऽपि शृणोति ।
ENMSS@6294@2श्यामं श्यामं पथिषु चकितं रीतिरेतादृशी नो
वृन्दारण्ये चिरपरिचिताः के न जीवन्ति नार्यः ॥ ६२९४॥
ENMSS@6295@1उक्तेन बहुना किं वा किं कृतैः शपथैर्घनैः ।
ENMSS@6295@2वदामि सत्यमेवैतत् त्वमेव मम मानसे ॥ ६२९५॥
ENMSS@6296@1उत्क्वानृतं भवेद् यत्र प्राणिनां प्राग्रक्षणम् ।
ENMSS@6296@2अनृतं तत्र सत्यं स्यात् सत्यमप्यनृतं भवेत् ॥ ६२९६॥
ENMSS@6297@1कामिनीषु विवाहेषु गवां मुक्तौ तथैव च ।
ENMSS@6297@2ब्राह्मणानां विपत्तौ च शपथैर्नास्ति पातकम् ॥ ६२९७॥
ENMSS@6298@1उग्रग्राहमुदन्वतो जलमतिक्रामत्यनालम्बने व्योम्नि
भ्राम्यति दुर्गमं क्षितिभृताम् प्राग्भारमारोहति ।
ENMSS@6298@2कीर्णं याति विषाकुलैरहिकुलैः पातालमेकाकिनी कीर्तिस्ते
नयनाभिराम कृतकं मन्ये भयं योषिताम् ॥ ६२९८॥
ENMSS@6299@1उग्रत्वं च मृदुत्वं च समयं वीक्ष्य संश्रयेत् ।
ENMSS@6299@2अन्धकारमसंहृत्य नोग्रो भवति भास्करः ॥ ६२९९॥
ENMSS@6300@1उग्ररूपं कुचद्वन्द्वं हारग गाधरं तव ।
ENMSS@6300@2चन्द्रचूडं करिष्यामि कुरु तावद् दिगम्बरम् ॥ ६३००॥
ENMSS@6301@1उग्राभिष गमनुष गि परस्य दुःखं हन्ताश्लथं
व्यथयति प्रसभार्द्रभावम् ।
ENMSS@6301@2बद्धः सरोजकुहरे विरहार्तनादैश् चक्राभिधस्य
मधुपोऽधिकमेति दैन्यम् ॥ ६३०१॥
ENMSS@6302@1उग्रावग्राहमग्ना कुशधुवनधुताधोरणास्फालिता गैः
प्रत्यग्रोद्दण्डशुण्डोड्डमरणसमरत्रस्तदि ना गचक्रैः ।
ENMSS@6302@2आलोक्यालोक्य शैलानुरुचरणरणच्छृ खलाघट्टयद्भिर्

यस्याशाभित्तिजेतुर्मदकलकरिभिः क्वापि न प्रापि र गः ॥ ६३०२॥

ENMSS@6303@1उग्रैः शापैरुपहतिभिया रक्षसा दूरमुक्ताः  दग्धुं योग्या हुतवहमपि त्वत्प्रियावर्णशुद्धाः ।

ENMSS@6303@2उत्पश्यन्त्यो जनकतनयातेजसैव स्वरक्षां  रोधं यस्यामनुविदधते लोकपालावरोधाः ॥ ६३०३॥

ENMSS@6304@1उचितं गोपनमनयोः  कुचयोः कनकाद्रिकान्तितस्करयोः ।

ENMSS@6304@2अवधीरितविधुमण्डल-  मुखमण्डलगोपनं किमिति ॥ ६३०४॥

ENMSS@6305@1उचितं नाम नार ग्यां केतक्यामपि कण्टकाः ।

ENMSS@6305@2रसगन्धोज्झिते किं ते कण्टकाः कण्टकारिके ॥ ६३०५॥

ENMSS@6306@1उचितं बन्धनमनयोः  कुचयुगयोः केवलं तन्वि ।

ENMSS@6306@2युवजनमानसहाटक-  चौरविधौ पश्यतोहरयोः ॥ ६३०६॥

ENMSS@6307@1उचितः प्रणयो वरं विहन्तं  बहवः खण्डनहेतवो हि दृष्टाः ।

ENMSS@6307@2उपचारविधिर्मनस्विनीनां  न तु पूर्वाभ्यधिकोऽपि भावशून्यः ॥ ६३०७॥

ENMSS@6308@1उचितकर्म तनोति न संपदाम्  इतरदप्यसदेव विवेकिनाम् ।

ENMSS@6308@2इति निरस्तसमस्तसुखान्वयः  कथमतो न विषीदतु पण्डितः ॥ ६३०८॥

ENMSS@6309@1उचितगुणोत्क्षिप्ता अपि  पुरतोऽपि निवेशिते सुवर्णलवे ।

ENMSS@6309@2झगिति पतन्ति मुखेन  प्रकटप्रमदा यथा च तुलाः ॥ ६३०९॥

ENMSS@6309A@1उचितव्ययशीलस्य कृशत्वमपि शोभते ।

ENMSS@6309A@2द्वितीयश्चन्द्रमा वन्द्यो न वन्द्यः पूर्णचन्द्रमाः ॥

ENMSS@6310@1उचितामुपास्य रुचिताम्  अभिधेहि गिरं निरन्तरावहितः ।

ENMSS@6310@2अप्यायतिमति पुरुषे  प्रभुणा कलुषेण भूयते कथिते ॥ ६३१०॥

ENMSS@6311@1उचितेन विचारेण चारुतां यान्ति सूक्तयः ।

ENMSS@6311@2वेद्यतत्त्वावबोधेन विद्या इव मनीषिणाम् ॥ ६३११॥

ENMSS@6312@1उच्चं प्रदेशं भषणोऽधिरुह्य  भषत्यभीक्ष्णं रविमीक्षमाणः ।

ENMSS@6312@2यदा तदानीमचिरेण वृष्टिर् अम्भोदमुक्ता भवति प्रभूता ॥ ६३१२॥

ENMSS@6313@1उच्चः सत्फलदो यथायमहमप्येतादृगेतावता  स्पर्धां मन्द मदोद्धतः

स्वजनकेनार्केण मा मा कृथाः ।
ENMSS@6313@2दूरादेव भवादृशोऽस्य महसा ध्वस्ताः समस्ताः स्वयं
नैवेच्छत्ययमत्ययं गुणिसखः कस्यापि तेजोनिधिः ॥ ६३१३॥
ENMSS@6314@1उच्चकुचकुम्भनिहितो  हृदयं चालयति जघनलग्नाग्रः ।
ENMSS@6314@2अतिनिम्नमध्यसंक्रम-  दारुनिभस्तरुणि तव हारः ॥ ६३१४॥
ENMSS@6315@1उच्चात् प्रदेशादवतीर्य निम्नं  यो याति वामोऽथ सुखप्रदोऽसौ ।
ENMSS@6315@2निम्नप्रदेशात् पुनरुच्चदेशं  यक्षो व्रजन् दक्षिणगोऽपि शस्तः
॥ ६३१५॥
ENMSS@6316@1उच्चारणज्ञोऽथ गिरां दधानम्  उच्चा रणत्पक्षिगणास्तटीस्तम् ।
ENMSS@6316@2उत्कं धरं द्रष्टुमवेक्ष्य शौरिम्  उत्कं धरं दारुक इत्युवाच
॥ ६३१६॥
ENMSS@6316A@1उच्चारूढैर्नरैरात्मा रक्षणीयोऽतियत्नतः ।
ENMSS@6316A@2दूरारोहपरिभ्रंशविनिपातः सुदुःसहः ॥
ENMSS@6317@1उच्चावचं जगद्दौःस्थ्यम् एक एव निषेधति ।
ENMSS@6317@2प्रविष्टमात्रो नृपतिः प्रपञ्चमिव नः श्रुतिः ॥ ६३१७॥
ENMSS@6318@1उच्चावचं न कुरुत स्वनितं पत गास् तूर्णं मुखानि पशवो
मुकुलीकुरुध्वम् ।
ENMSS@6318@2कर्णं प्रदाय रसिकाः कलयन्तु हर्षं  तारं तनोति रणितं तरुणः
पिकोऽयम् ॥ ६३१८॥
ENMSS@6319@1उच्चावचकरान्याय्याः पूर्वराज्ञां युधिष्ठिर ।
ENMSS@6319@2यथा यथा न हीयेरंस्तथा कुर्यान् महीमतिः ॥ ६३१९॥
ENMSS@6320@1उच्चावचानि जननानि भवन्ति यावत्  कर्माणि तावदखिलानि लयं न यान्ति ।
ENMSS@6320@2तत् कर्ममूलहननाय यतध्वमार्या  यावच्छिरो न विरमेज्ज्वलबन्धरोगः
॥ ६३२०॥
ENMSS@6321@1उच्चासनगतो नीचः नीच एव न चोत्तमः ।
ENMSS@6321@2प्रसादशिखरस्थोऽपि काकः किं गरुडायते ॥ ६३२१॥
ENMSS@6322@1उच्चित्यं प्रथममधः स्थितं मृगाक्षी  पुष्पौघं श्रितविटपं
ग्रहीतुकामा ।
ENMSS@6322@2आरोढुं चरणमदादशोकयष्टेर् आमूलं पुनरपि तेन पुष्पितोऽसौ ॥ ६३२२॥
ENMSS@6323@1उच्चीकृतग्रीवमहो मुधैव  किं याचसे चातकपोत मेघम् ।

ENMSS@6323@2अत्यूर्ज्जितं गर्ज्जितमात्रमस्मिन्  अम्भोधरे बिन्दुलवस्तु दूरे ॥ ६३२३॥

ENMSS@6324@1उच्चीयन्ते स्म वेश्मन्यशनविरहिते यत्नतः श्रोत्रियाणां  यत्र

श्यामाकबीजान्यपि चटकवधूचञ्चुकोटिच्युतानि ।

ENMSS@6324@2यस्मिन् दातर्यकस्माच्चटुलवटुकराकृष्टमुक्तावचूल-  भ्रष्टास्तत्रैव

दृष्टा युवतिभिरलसं घूर्णिता मुक्तिकौघाः ॥ ६३२४॥

ENMSS@6325@1उच्चैः कल्याणवाही करजितवसुधः सर्वदा पूर्णकामो  विख्यातः कर्णवृत्त्या

न च वचसि कटुश्चित्रपाकानुभावी ।

ENMSS@6325@2कोषापेक्षी परस्मादुचितबहुकथस्तत्परः पुण्यलोके  चित्रं राजाधिराज

त्वमिव तव रिपुस्तत्र कम्पं प्रतीमः ॥ ६३२५॥

ENMSS@6326@1उच्चैः कुम्भः कपिशदशनो बन्धुरस्कन्धसंधिः

स्निग्धाताम्रद्युतिनखमणिर्लम्बवृत्तोरुहस्तः ।

ENMSS@6326@2शूरः सप्तच्छदपरिमलस्पर्धिदानोदकोऽयं  भद्रः

सान्द्रद्रुमगिरिसरित्तीरचारी करीन्द्रः ॥ ६३२६॥

ENMSS@6327@1उच्चैः पदमधितिष्ठंल्  लोकस्तत्त्वेषु मुह्यति प्रायः ।

ENMSS@6327@2विषयमपि पश्यति समं  पर्वतशिखराग्रमारूढः ॥ ६३२७॥

ENMSS@6328@1उच्चैः प्रकथनं हासः ष्ठीवनं कुत्सनं तथा ।

ENMSS@6328@2जृम्भणं गात्रभ गं च पर्वस्फोटं च वर्जयेत् ॥ ६३२८॥

ENMSS@6329@1उच्चैः ष्ठीवनमुत्कटप्रहसितं शय्यासनोत्सर्पणं

गात्रास्फोटनजृम्भणानि सुलभद्रव्यार्थसंप्रार्थनम् ।

ENMSS@6329@2बालालि गनचुम्बनान्यभिमुखे सख्याः समालोकनं  दृक्पातश्च परा

मुखो गुणकथा कर्णस्य कण्डूयनम् ॥ ६३२९॥

ENMSS@6330@1उच्चैः स्थानकृतोदयैर्बहुविधैर्ज्योतिर्भिरुद्यत्प्रभैः  शुक्राद्यैः

किममीभिरत्र वितथां प्रौढिं दधानैरपि ।

ENMSS@6330@2यावल्लोकतमोपहेन भवता लक्ष्मीर्न विस्तार्यते  तावच्चन्द्र कथं

प्रयाति परमां वृद्धिं स रत्नाकरः ॥ ६३३०॥

ENMSS@6331@1उच्चैःस्थितीनां विदुषां पदमारोढुमिच्छवः ।

ENMSS@6331@2सत्सुभाषितसोपानसेविनः सन्तु साधवः ॥ ६३३१॥

ENMSS@6332@1उच्चैरध्ययनं चिरंतनकथाः स्त्रीभिः सहालापनं  तासामर्भकलालने

रतिरथो तत्पाकमिथ्यास्तुतिः ।

ENMSS@6332@2पुत्रभ्रातृजनाशिषः सुभगतायोग्यत्वसंकीर्तनं

स्वानुष्ठानकथाभिवादनविधिर्भिक्षोगुणा द्वादश ॥ ६३३२॥

ENMSS@6333@1उच्चैरध्ययनं पुरातनकथाः स्त्रीभिः सहालापनं तासामर्भकलालनं पतिनुतिस्तत्पाकमिथ्यास्तुतिः ।

ENMSS@6333@2आदेशस्य करावलम्बनविधिः पाण्डित्यलेखक्रिया होरागारुडमन्त्रतन्त्रकविधिर्भिक्षोगुणा द्वादश ॥ ६३३३॥

ENMSS@6334@1उच्चैरुच्चरतु चिरं चीरी वर्त्मनि तरुं समारुह्य ।

ENMSS@6334@2दिग्व्यापिनि शब्दगुणे श खः संभावना भूमिः ॥ ६३३४॥

ENMSS@6334A@1उच्चैरुच्चरितव्यं यत् किंचिदजानतापि पुरुषेण ।

ENMSS@6334A@2मूर्खा बहु मन्यन्ते विदुषामपि संशयो भवति ॥

ENMSS@6335@1उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च ।

ENMSS@6335@2देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ॥ ६३३५॥

ENMSS@6336@1उच्चैरुच्चैस्तरामिच्छन् पदान्यायच्छते महान् ।

ENMSS@6336@2नीचो नीचैस्तरां याति निपातभयश कया ॥ ६३३६॥

ENMSS@6337@1उच्चैरुड्डीयमाना नतिमन्ते वहति या तु गच्छन्ती ।

ENMSS@6337@2यच्चिरलभ्यमथाल्पं तत्सा बहु यच्छति त्वरितम् ॥ ६३३७॥

ENMSS@6338@1उच्चैरुत्तालखेलद्भुजवनपवनोद्धूतशैलौघपात-
स्फारोदश्वत्पयोधिप्रकटितमकुटस्वर्धुनीसंगमानि ।

ENMSS@6338@2जीयासुस्ताण्डवानि स्फुटविकटजटाकोटिसंघट्टभूरि-
भ्रश्यन्नक्षत्रचक्रव्यवहितसुमनोवृष्टिपातानि शंभोः ॥ ६३३८॥

ENMSS@6339@1उच्चैरुत्तालगण्डस्थलबहुलगलद्दानपानप्रमत्त-
स्फीतालिव्रातगीतिश्रुतिविधृतिकलोन्मीलितार्धाक्षि पक्ष्मा ।

ENMSS@6339@2भक्तप्रत्यूहपृथ्वीरुहनिवहसमुन्मूलनोच्चैरुदश्वच्- छुण्डादण्डाग्र उग्रार्भक इभवदनो वः स पायादपायात् ॥ ६३३९॥

ENMSS@6340@1उच्चैरुद्घोष्य जेतव्यं मध्यस्थश्चेदपण्डितः ।

ENMSS@6340@2पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यताम् ॥ ६३४०॥

ENMSS@6341@1उच्चैरुन्मथितस्य तेन बलिना दैवेन धिक्कर्मणा लक्ष्मीमस्य निरस्यतो जलनिधेर्जातं किमेतावता ।

ENMSS@6341@2गाम्भीर्यं किमयं जहाति किमयं पुष्णाति नाम्भोधरान् मर्यादां किमयं
भिनत्ति किमयं न त्रायते वाडवम् ॥ ६३४१॥

ENMSS@6342@1उच्चैरेष तरुः फलं च पृथुलं दृष्ट्वैव हृष्टः शुकः

पक्वं शालिवनं विहाय जडधीस्तां नालिकेरीं गतः ।
ENMSS@6342@2तामारुह्य बुभुक्षितेन मनसा बुद्धिः कृता भेदने  आशा तस्य न केवलं
विगलिता चञ्चूर्गता चूर्णताम् ॥ ६३४२॥
ENMSS@6343@1उच्चैर्दैवादिह पशुपतौ भूषणीभूय तिष्ठन्  कालव्याल प्रथयसि
फणां भीषणां तावदेव ।
ENMSS@6343@2देवे दूरादविनयभयाद् यावदेवं गरुत्मान्  कोपाटोपं कथमपि तिरोभावयन्
मौनमास्ते ॥ ६३४३॥
ENMSS@6344@1उच्चैर्निषादगान्धारौ नीचैर्ऋषभधैवतौ ।
ENMSS@6344@2शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः ॥ ६३४४॥
ENMSS@6345@1उच्चैर्ब्रह्माण्डखण्डद्वितयसहचरं कुम्भयुग्मं दधानः  प्रे
खन्नागारिपक्षप्रतिभटविकटश्रोत्रतालाभिरा मः ।
ENMSS@6345@2देवः शंबोरपत्यं भुजगपतितनुस्पर्द्धिवर्द्धिष्णुहस्तस्
त्रैलोक्याश्चर्यमूर्तिः स जयति जगतामीश्वरः कुञ्जरास्यः ॥ ६३४५॥
ENMSS@6346@1उच्चैर्महारजतराजिविराजितासौ  दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा ।
ENMSS@6346@2अभ्येति भस्मपरिपाण्डुरितस्मरारेर् उद्वह्निलोचनललामललाटलीलाम् ॥ ६३४६॥
ENMSS@6347@1उच्चैर्यद्यस्ति मनः  किं विपदा संपदा गत्री ।
ENMSS@6347@2पुरुषस्य मनसि भग्ने  मग्नेवापत्सु लक्ष्यते लक्ष्मीः ॥ ६३४७॥
ENMSS@6348@1उच्चैर्यो मधुपानलुब्धमनसां भृ गा गनानां गणैर् उद्गीतो रचितालयः
खगकुलैर्देशान्तरादागतैः ।
ENMSS@6348@2आसीद् यश्च निषेवितोऽध्वगशतैर्ग्रीष्मोष्मतान्तिच्छिदे  सोऽयं
संप्रति दुर्मदेन दलितश्छायातरुर्दन्तिना ॥ ६३४८॥
ENMSS@6349@1उच्चैस्तनन्तमभिगम्य घनं तवाहम्  अभ्यागतोऽस्म्यतिथिरेष
पयोधरार्थी ।
ENMSS@6349@2वक्तुं त्रपा तदपि वच्मि विदूरबन्धोः  काठिन्यमस्ति च पयोधरयोर्ममापि
॥ ६३४९॥
ENMSS@6350@1उच्चैस्तरां मत्सरिणोऽपि लोकाः  कुर्वन्ति संसत्सु पुरः प्रशंसाम् ।
ENMSS@6350@2न पण्डितर्विश्वसितव्यमत्र  तत्सौहृदं यत् क्रियते परोक्षम् ॥ ६३५०॥
ENMSS@6351@1उच्चैस्तरादम्बरशैलमौलेश्  च्युतो रविर्गैरिकगण्डशैलः ।
ENMSS@6351@2तस्यैव पातेन विचूर्णितस्य  संध्यारजोराजिरिहोज्जिहीते ॥ ६३५१॥
ENMSS@6352@1उच्चौ कुचौ कृशतरा च कटिर्गभीरो  नाभिः समुन्नततरं च

नितम्बबिम्बम् ।

ENMSS@6352@2निम्नोन्नतेति सुदृशः सुभगे शरीरे मग्नं मनो मम न मां पुनरभ्युपैति ॥ ६३५२॥

ENMSS@6353@1उच्छन्नेव कलौ वृषस्य चरणश्रेणी नवीनां पुनस् तां निर्माय कृतस्त्वया पुनरपि न्यस्तः पदस्यन्दनः ।

ENMSS@6353@2भिन्दानैस्तरणिं त्वदस्त्रनियतैरेतत्किलोदीरितं श्रुत्वानूरुरसौ विहाय मिहिरं त्वां देव सेविष्यते ॥ ६३५३॥

ENMSS@6354@1उच्छलन् मत्स्यपुच्छाग्रदण्डपातहतार्णसि ।

ENMSS@6354@2जगदुद्यानमम्भोधावुन्ममज्ज ममज्ज च ॥ ६३५४॥

ENMSS@6355@1उच्छास्त्रपदविन्यासः सहसैवाभिसंपतः ।

ENMSS@6355@2शत्रुख गमुखग्रासम् अगत्वा न निवर्तते ॥ ६३५५॥

ENMSS@6356@1उच्छिद्यते धर्मवृत्तम् अधर्मो वर्तते महान् ।

ENMSS@6356@2भयमाहुर्दिवारात्रं यदा पापो न वार्यते ॥ ६३५६॥

ENMSS@6357@1उच्छिद्राणि दिगम्बरस्य वसनान्यर्धा गिनस्स्वामिनो रत्नालंकृतिभिर्विशोषितवपुःशोभाशतं सुभ्रुवः ।

ENMSS@6357@2पौराढ्याश्च पुरीः श्मशानवसतेर्भिक्षाभुजोऽप्यक्षमा लक्ष्मीं न व्यतनोद् दरिद्रभरणेष्वज्ञो हि सेनान्वयः ॥ ६३५७॥

ENMSS@6358@1उच्छिन्नाश्रयकातरेव कुलटा गोत्रान्तरं श्रीर्गता तामेवानुगता गतानुगतिकास्त्यक्तानुरागाः प्रजाः ।

ENMSS@6358@2आप्तैरप्यनवाप्तपौरुषफलैः कार्यस्य धूरुज्झिता किं कुर्वन्त्वथवोत्तमा गरहितैर गैरिव स्थीयते ॥ ६३५८॥

ENMSS@6359@1उच्छिष्टं करखर्परं पथि गतं मूर्खैर्जडैर्धिक्कृतं विप्रैस्तत्त्वविचिन्तकैर्मनसि तं स्वात्मप्रबोधे कृतम् ।

ENMSS@6359@2नृत्यन्तं च दिगम्बरं च जटिलं बालैश्च मुक्तं जडं डिम्भश्चोपहसन्ति चत्वरपथे दत्त्वा मुहुस्तालिकाः ॥ ६३५९॥

ENMSS@6360@1उच्छिष्टं शिवनिर्माल्यं वमनं शवकर्पटम् ।

ENMSS@6360@2काकविष्ठासमुत्पन्नाः पञ्चैतेऽतिपवित्रकाः ॥ ६३६०॥

ENMSS@6361@1उच्छिष्टो न स्पृशेत् ख गं निशिकुर्यान्न शीर्षके ।

ENMSS@6361@2दिवा च पूजयेदेनं गन्धमाल्यादिसंपदा ॥ ६३६१॥

ENMSS@6362@1उच्छीर्षे पदकं कृत्वा यदि शेते शुनस्तदा ।

ENMSS@6362@2आगच्छद्वल्लभं वक्ति तद्वेश्मन्यचिरादपि ॥ ६३६२॥

ENMSS@6363@1उच्छूनारुणमश्रुणिर्गमवशाच्चक्षुर्मना मन्थरं

सोष्मश्वासकदर्थिताधररुचिर्व्यस्तालका भ्रूभुवः ।

ENMSS@6363@2आपाण्डुः करपल्लवे च निभृतम् शेते कपोलस्थली मुग्धे कस्य तपःफलं

परिणतं यस्मै तवेयं दशा ॥ ६३६३॥

ENMSS@6364@1उच्छृ कलेन निरपेक्षतयोन्मदेन येनाकुलीकृतमिदं करिणा बभूव ।

ENMSS@6364@2दत्त्वा पदं शिरसि हस्तिपकार्भकेण मन्दः कथं गमित एष वशं

प्रसह्य ॥ ६३६४॥

ENMSS@6365@1उच्छेदनं चापचयः पीडनं कर्शनं तथा ।

ENMSS@6365@2इति विद्याविदः प्राहुः शत्रौ वृत्तं चतुर्विधम् ॥ ६३६५॥

ENMSS@6366@1उच्छेद्यमपि विद्वांसो वर्धयन्त्यरिमेकदा ।

ENMSS@6366@2गुडेन वर्धितः श्लेष्मा यतो निःशेषतां व्रजेत् ॥ ६३६६॥

ENMSS@6367@1उच्चश्रुर्व्यात्तवक्त्रः प्रविततरसनापल्लवालीढसृक्का पि

गोग्रभ्रान्तनेत्रः पुलकिततरलोत्तानला गूलनालः ।

ENMSS@6367@2कुत्राप्यक्लान्तिगामी क्वचिदतिपिहितः क्वापि तु गाग्रमात्रश्

चित्रव्याघ्रोऽयमाप्तुं प्रमदवनमृगीतर्णकांस्तूर्णमेति ॥ ६३६७॥

ENMSS@6368@1उच्छ्रायो जनभीति हेतुरधिकं वैकृत्यमुद्ग्रीवता सर्वत्र

प्रतिपर्वविक्रमभवः क्रूरो मरुर्जन्मभूः ।

ENMSS@6368@2यस्योच्चैः कटुकण्टकप्रणयिता धिक् कष्टमुष्ट्रे पशौ तस्मिन्

राजपरिग्रहः स च महाशब्दद्वयीभाजनम् ॥ ६३६८॥

ENMSS@6369@1उच्छ्वसन् मण्दलप्रान्तरेखमाबद्धकुङ्मलम् ।

ENMSS@6369@2अपर्याप्तमुरो वृद्धेः शंसत्यस्याः स्तनद्वयम् ॥ ६३६९॥

ENMSS@6370@1उच्छ्वासः खण्डखण्डस्तरलितहृदये मूकतां भूषणानाम्

उक्तिप्रत्युक्तिबन्धोऽप्यभिनयविहितः पांसुला भूः सुशय्या ।

ENMSS@6370@2तूष्णीमेव प्रसादानुनयनकलहाश्चुम्बनं शब्दशून्यं यत्रैतत् स्वस्ति

तस्मै निभृतनिधुवनायेति नान्दी नमोऽस्तु ॥ ६३७०॥

ENMSS@6371@1उच्छ्वासयन्त्यः श्लथबन्धनानि गात्राणि कन्दर्पसमाकुलानि ।

ENMSS@6371@2समीपवर्तिष्वधुना प्रियेषु समुत्सुका एव भवन्ति नार्यः ॥ ६३७१॥

ENMSS@6372@1उच्छ्वासहिक्काशयना गभ ग- विष्ठावमिश्वासविजृम्भणानि ।

ENMSS@6372@2वक्रं शुनोऽर्धोन्मिषितां च दृष्टिं द्युते प्रशंसन्ति च

वामचेष्टम् ॥ ६३७२॥

ENMSS@6373@1उच्छ्वासावधयः प्राणाः स चोच्छ्वासः समीरणः ।
ENMSS@6373@2समीरणाच्चलं नास्ति यत् प्राणिति तदद्भुतम् ॥ ६३७३॥
ENMSS@6374@1उच्छ्वासोऽपि न निर्याति बाणे हृदयवर्तिनि ।
ENMSS@6374@2किं पुनर्विकटाटोप पदबन्धा सरस्वती ॥ ६३७४॥
ENMSS@6375@1उच्यतां स वचनीयमशेषं  नेश्वरे परुषता सखि साध्वी ।
ENMSS@6375@2आनयैनमनुनीय, कथं वा  विप्रियाणि जनयन्ननुनेयः ॥ ६३७५॥
ENMSS@6376@1उच्यमानोऽवलम्बेत परमर्मणि मूकताम् ।
ENMSS@6376@2स्वकर्मणि तु बाधिर्यस्थैर्यमाधुर्यसोष्मवान् ॥ ६३७६॥
ENMSS@6377@1उज्ञागरितभ्रामित-  दन्तुरदलरुद्धमधुकरप्रकरे ।
ENMSS@6377@2काञ्चनकेतकि मा तव  विकसतु सौरभ्यसंभारः ॥ ६३७७॥
ENMSS@6378@1उज्ञाडिते यदा ग्रामे गच्छतां दक्षिणस्वराः ।
ENMSS@6378@2श्रृगालास्तं पुनः स्थानं कथयन्ति करस्थितम् ॥ ६३७८॥
ENMSS@6379@1उज्ज्रृम्भते कुमुदिनीसुकृतं मृगा को  विष्वग्विकीर्णपरिपाटलरश्मिदण्डः ।
ENMSS@6379@2उत्सूतविद्रुमकुलो जलधेस्तर गाद्  उत्क्षिप्यमाण इव कश्चन राजकम्बुः ॥ ६३७९॥
ENMSS@6380@1उज्ज्रृम्भाननमुल्लसत्कुचतटं लोलद्भ्रमद्भ्रूलतं  स्वेदाम्भःस्नपिता गयष्टि विगलद्व्रीडं सरोमाञ्चया ।
ENMSS@6380@2धन्यः कोऽपि युवा स यस्य वदने व्यापारिताः सांप्रतं  मुग्धे दुग्धमहाब्धिफेनपटलप्रख्याः कटाक्षच्छटाः ॥ ६३८०॥
ENMSS@6381@1उज्ज्वलं सरलं चैव वक्रमारक्तमेव च ।
ENMSS@6381@2नेत्रं चतुर्विधं प्रोक्तं तस्य भावाः पृथक् पृथक् ॥ ६३८१॥
ENMSS@6382@1उज्ज्वलम् मित्रसंयोगे सरलं पुत्रदर्शने ।
ENMSS@6382@2वक्रं च कामिनीभोगे आरक्तं शत्रुदर्शने ॥ ६३८२॥
ENMSS@6383@1उज्ज्वलगुणमभ्युदितं  क्षुद्रो द्रष्टुं न कथमपि क्षमते ।
ENMSS@6383@2दग्ध्वा तनुमपि शलभो  दीप्रं दीपार्चिषं हरति ॥ ६३८३॥
ENMSS@6384@1उज्ज्वलचम्पकमुकुला-  श कितया यः प्रदीपकं स्पृशति ।
ENMSS@6384@2कज्ज्ञलकल कदाहं  मुक्तान्यत् तस्य किं घटताम् ॥ ६३८४॥
ENMSS@6385@1उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।
ENMSS@6385@2मलीमसमुखी वर्तिः प्रदीपशिखया यथा ॥ ६३८५॥
ENMSS@6386@1उज्झती शुचिमिवाशु तमिस्राम्  अन्तिकं व्रजति तारकराजे ।

ENMSS@6386@2दिक्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री ॥ ६३८६॥

ENMSS@6387@1उज्झन्त्यः स्वर्णकाञ्चीर्झणिति रशनया चम्पकन्यासमय्या तन्वत्यस्तारहारान् विचकिलकलिकापंक्तिमुद्रावलीभिः ।

ENMSS@6387@2किं चाशोकप्रवालैररुणमणिमयान् संत्यजन्त्योऽवतंसान् उत्कीर्णाः कामबाणैरिव हृदि सुहृदो वल्लभानां बभूवुः ॥ ६३८७॥

ENMSS@6388@1उज्झितवृषयोगा अपि रतिसमये नरविशेषनिरपेक्षाः ।

ENMSS@6388@2कृष्णौकाभिरता अपि हिरण्यकशिपुप्रियाः सततम् ॥ ६३८८॥

ENMSS@6389@1उज्झितसौभाग्यमद- स्फुटयाञ्चान गभीतयोर्यूनोः ।

ENMSS@6389@2अकलितमनसोरेका दृष्टिर्दूती निसृष्टार्थी ॥ ६३८९॥

ENMSS@6390@1उज्झिताहमिति वत्स न दूये राघवेण कुलदूषणभीत्या ।

ENMSS@6390@2का त्वमित्यभिहिते बत वन्यान् श्रावये किमिति मुह्यति चेतः ॥ ६३९०॥

ENMSS@6391@1उज्झित्वा दिशमम्बरं वरतरं वासो वसानश्चिरं हित्वा वासरसं पुनः पितृवने कैलासहर्म्याश्रयः ।

ENMSS@6391@2त्यक्त्वा भस्म कृता गरागनिचयः श्रीखण्डसारद्रवैर् देवः पातु हिमाद्रिजापरिणयं कृत्वा गृहस्थः शिवः ॥ ६३९१॥

ENMSS@6392@1उडुगणपरिवारो नायकोऽप्यौषधीनाम् अयममृतशरीरः कान्तियुक्तोऽपि चन्द्रः ।

ENMSS@6392@2भवति विगतरश्मिर्मण्डलं प्राप्य भानोः परसदननिविष्टः को लघुत्वं न याति ॥ ६३९२॥

ENMSS@6393@1उडुपरिवृढः पत्या मुक्तामयं यदपीडयद् यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती ।

ENMSS@6393@2तदुभय मतः श के स कोचितं निजश कया प्रसरति नवार्के कर्कन्धूफलारुणरोचिषि ॥ ६३९३॥

ENMSS@6394@1उडुपरिषदः किं नार्हत्वं निशः किमु नौचिती पतिरिह न यद् दृष्टस्ताभ्यां गणेयरुचीगणः ।

ENMSS@6394@2स्फुटमुडुपतेराश्मं वक्षः स्फुरन्मलिनाश्मन- च्छवि यदनयोर्विच्छेदेऽपि द्रुतं बत न द्रुतम् ॥ ६३९४॥

ENMSS@6395@1उडुराजमुखी मृगराजकटिर् गजराजविराजितमन्दगतिः ।

ENMSS@6395@2यदि सा वनिता हृदये निहिता क्व जपः क्व तपः क्व समाधिरतिः ॥ ६३९५॥

ENMSS@6396@1उड्डायितः पूर्वदिशा क्रमेण प्रकाशर गः पृथुलः पतण्गः ।

ENMSS@6396@2पारे वियद्विच्युतरश्मिरर्वाक् पतन्निदानीं क्षपितोऽस्तशैले ॥ ६३९६॥
ENMSS@6397@1उड्डीनं विहगैर्मृतं जलचरैः क्ष्मान्तर्गतं कच्छपैः पाठीनैः पृथुप कपीठलुठनाद्यस्मिन् मुहुर्मूर्च्छितम् ।
ENMSS@6397@2तस्मिन्नेव सरस्यकालजलदेनागत्य तच्चेष्टितं येनाकुम्भनिमग्नवन्यकरिणां यूथैः पयः पीयते ॥ ६३९७॥
ENMSS@6398@1उड्डीना गुणपत्रिणः सुखफलान्याराद् विकीर्णान्यधः पर्यस्ताः परितो यशस्तबकिताः संपल्लतापल्लवाः ।
ENMSS@6398@2प्रागेवापसृतः प्रमोदहरिणश्छाया कथान्तं गता दैवारण्यमत गजेन बलिना भग्नेऽभिमानद्रुमे ॥ ६३९८॥
ENMSS@6399@1उड्डीनानामेषां प्रासादात् तरुणि पक्षिणां प क्तिः ।
ENMSS@6399@2विस्फुरति वैजयन्ती पवनच्छिन्नापविद्धेव ॥ ६३९९॥
ENMSS@6400@1उड्डीयागतमिन्दुमण्डलमिदं किं खञ्जरीटद्वयं हित्वा कोरकतां विकस्वरतरे याते किमिन्दीवरे ।
ENMSS@6400@2इन्दोर्बिम्बमवाप्य जातरभसौ किं वा चकोराविमाव् आं ज्ञातं शफरीविलासपटुनी नेत्रे कुर गीदृशः ॥ ६४००॥
ENMSS@6401@1उड्डीयाणं तु सहजं कथितं गुरुणा सदा ।
ENMSS@6401@2अभ्यसेदस्ततन्द्रस्तु वृद्धोऽपि तरुणो भवेत् ॥ ६४०१॥
ENMSS@6402@1उड्डीयोर्ध्वं गमने निपत्यवचना वधोन्मुखी शकुनिः ।
ENMSS@6402@2वामे यातुर्निधनं दिशति विपक्षे विपक्षस्य ॥ ६४०२॥
ENMSS@6402A@1उत वा तृणवान् मार्गः समो गम्यः प्रशस्यते ।
ENMSS@6402A@2सुशोध्यस्त्रिविधो मार्गः षड्विधं च स्वकं बलम् ॥
ENMSS@6403@1उत्कटकण्टककोटी- घर्षणघृष्टानि हृदि न चिन्तयति ।
ENMSS@6403@2असदृशरसविवशमतिर् विशत्यलिः केतकीकुसुमम् ॥ ६४०३॥
ENMSS@6404@1उत्कण्ठयति मेघानां माला वृन्दं कलापिनाम् ।
ENMSS@6404@2यूनां चोत्कण्ठयत्येष मानसं मकरध्वजः ॥ ६४०४॥
ENMSS@6405@1उत्कण्ठाकुलचक्रवाकयुवतीनिःश्वासदण्डाहतः पीयूषद्युतिरच्छदर्पणतुलामारोहति प्रस्थितः ।
ENMSS@6405@2कोकानां कृपयेव कुक्कुटरवैराहूयमाने रवौ दिग् जाता नवधौतविद्रुममणिच्छाया च सौत्रामणी ॥ ६४०५॥
ENMSS@6406@1उत्कण्ठाकुलमस्तु कण्टककुले संजायतां ते मनः सानन्दं पिचुमन्दकन्दलदलास्वादेषु का वा क्षतिः ।

ENMSS@6406@2एतत् किं तु तव क्रमेलक कथंकारं सहे दुःसहं  तस्मिन्
पुण्ड्रककन्दलीकिसलये येनासि निन्दापरः ॥ ६४०६॥

ENMSS@6407@1उत्कण्ठित मनो बाला सुदूरस्था नवं वयः ।

ENMSS@6407@2विधिर्वामो रिपुः कामो हा हा दुःखपरम्परा ॥ ६४०७॥

ENMSS@6408@1उत्कण्ठितस्य हृदयानुगुणा वयस्या  संकेतके चिरयति प्रवरो विनोदः
।

ENMSS@6408@2संस्थापना प्रियतमा विरहातुराणां  रक्तस्य रागपरिवृद्धिकरः प्रमोदः
॥ ६४०८॥

ENMSS@6409@1उत्कण्ठितस्य हृदयानुगता सखीव  संकीर्णदोषरहिता विषयेषु गोष्ठी
।

ENMSS@6409@2क्रीडारसेषु मदनव्यसनेषु कान्ता  स्त्रीणां तु कान्तरतिविघ्नकरी
सपत्नी

॥ ६४०९॥

ENMSS@6410@1उत्कम्पघर्मपिच्छिल-  दोःसाधिकहस्तविच्युतश्चौरः ।

ENMSS@6410@2शिवमाशास्ते सुतनु  स्तनयोस्तव पञ्चलाञ्चलयोः ॥ ६४१०॥

ENMSS@6411@1उत्कम्पिनी भयपरिस्खलितांशुकान्ता  ते लोचने प्रतिदिशं विधुरे
क्षिपन्ती ।

ENMSS@6411@2क्रूरेण दारुणतया सहसैव दग्धा  धूमान्धितेन दहनेन न वीक्षितासि
॥ ६४११॥

ENMSS@6412@1उत्कम्पोऽपि सकम्प एव हृदये चिन्तापि चिन्तान्विता  निःश्वासा
अपि

निःश्वसन्त्यनिभृतं बाष्पोऽपि बाष्पायते ।

ENMSS@6412@2कान्तां संस्मरतो विदेशवसतेर्नक्तं दिवं कामिनः  प्रारोहा इव
निष्पतन्ति मनसो दुःखानि दुःखान्वितात् ॥ ६४१२॥

ENMSS@6413@1उत्कम्पो हृदये स्खलन्ति वचनान्यावेगलोलं मनो  गात्रं सीदति
चक्षुरश्रुकलुषं चिन्ता मुखं शुष्यति ।

ENMSS@6413@2यस्यैषा सखि पूर्वर गरचना मानः स मुक्तो मया  वन्स्यास्ता अपि
योषितः

क्षितितले यासामयं संमतः ॥ ६४१३॥

ENMSS@6414@1उत्कर्णं करिणां गणेन विकसन्मोदं चिराद् बर्हिभिः  क्रीडाकेशरिभिश्च
पञ्जरगतैः कोपस्फुरल्लोचनम् ।

ENMSS@6414@2कुञ्जोत्स गभुवि प्रकम्पतरलं सीमन्तिनीभिः क्षणात्  पीतः श्रोत्रपुटेन

देव परितः प्रातर्मृद गध्वनिः ॥ ६४१४॥

ENMSS@6415@1उत्कर्णोऽयमकाण्डचण्डिमपटुः स्फारस्फुरत्केसरः

क्रूराकारकरालवक्रविकटस्तब्धोर्ध्वला गूलभृत् ।

ENMSS@6415@2चित्रेणापि न शक्यतेऽभिलिखितुं सर्वा गसंकोचनाच्

चीत्कुर्वद्गिरिकुञ्जकुञ्जरशिरः कुम्भस्थलस्थो हरिः ॥ ६४१५॥

ENMSS@6416@1उत्कर्तितुं समर्थोऽपि गन्तुं चैव सपक्षकः ।

ENMSS@6416@2द्विरेफो गन्धलोभेन कमले याति बन्धनम् ॥ ६४१६॥

ENMSS@6417@1उत्कर्षवान् निजगुणो  यथा यथा याति कर्णमन्यस्य ।

ENMSS@6417@2धनुरिव सुवंशजन्मा  तथा तथा सज्जनो नमति ॥ ६४१७॥

ENMSS@6418@1उत्कर्षो नैव नित्यः स्यान्नापकर्षस्तथैव च ।

ENMSS@6418@2प्राक् कर्मवशतो नित्यं सधनो निर्धनो भवेत् ॥ ६४१८॥

ENMSS@6419@1उत्कलिकाबाहुल्यं  तत् तत् स्वाभाविकं द्रवत्वं च ।

ENMSS@6419@2स च निरुपाधिस्नेहस् तेनेशस्य प्रिया ग गा ॥ ६४१९॥

ENMSS@6420@1उत्कल्लोलस्य लक्ष्मीं लवणजलनिधिर्लम्भितः क्षीरसिन्धोः  को विन्ध्यः

कश्च गौरीगुरुरिति मरुतामभ्युदस्तो विवेकः ।

ENMSS@6420@2नीताः कर्कत्वमर्कप्रवहणहरयो हारितोत्स गलक्ष्मा  राजन्नुद्दामगौरैरजनि

च रजनीवल्लभस्त्वद्यशोभिः ॥ ६४२०॥

ENMSS@6421@1उत्कामुन्मनयन्त्येते बालां तदलकत्विषः ।

ENMSS@6421@2अम्भोधरास्तडित्वन्तो गम्भीराः स्तनयित्नवः ॥ ६४२१॥

ENMSS@6422@1उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा बर्हिणो

धूपैर्जालविनिःसृतैर्वलभयः संदिग्धपारावताः ।

ENMSS@6422@2आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः  संध्याम गलदीपिका

विभजते शुद्धान्तवृद्धो जनः ॥ ६४२२॥

ENMSS@6423@1उत्कूजति भ्रमति रोदिति रारटीति  पद्मानि चोत्क्षिपति चञ्चुपुटेन दूरम् ।

ENMSS@6423@2तोये निमज्जति शशा कमुदीक्षते च  कष्टं प्रियाविरहितो निशि चक्रवाकः

॥ ६४२३॥

ENMSS@6424@1उत्कूजति श्वसिति मुह्यति याति तीरं  तीरात् तरुं तरुतलात् पुनरेति वापीम् ।

ENMSS@6424@2वाप्यां न तिष्ठति न चाति मृणालखण्डं  चक्रः क्षपासु विरहे

खलु चक्रवाक्याः ॥ ६४२४॥

ENMSS@6425@1उत्कूजन्तु वटे वटे बत बकाः काका वराका अपि क्रांकुर्वन्तु सदा निनादपटवस्ते पिप्पले पिप्पले ।
ENMSS@6425@2सोऽन्यः कोऽपि रसालपल्लवलवग्रासोल्लसत्पाटव-क्रीडत्कोकिलकण्ठकूजनकलालीलाविलासक्रमः ॥ ६४२५॥
ENMSS@6426@1उत्कृत्य ज्वलितात् शवात् कथमपि प्रेताशनः पैशितीं पेशीमग्निमयीं निगीर्य सहसा दन्दह्यमानोदरः ।
ENMSS@6426@2धावत्युत्प्लवते मुहुर्निपतति प्रोत्तिष्ठति प्रेक्षते विष्वक्क्रोशति संपिनष्टि जठरं मुष्ट्या हते मस्तकम् ॥ ६४२६॥
ENMSS@6427@1उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्य अंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूत् ईनि जग्ध्वा ।
ENMSS@6427@2आत्तस्नाय्वन्त्रनेत्रः प्रकटितदशनः प्रेतर कः कर काद् अ कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥ ६४२७॥
ENMSS@6428@1उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसंतानरोषाद् उद्दामस्यैकविंशत्यवधि विधसतः सर्वतो राजवंश्यान् ।
ENMSS@6428@2पित्र्यं तद्रक्तपूर्णह्रदसवनमहानन्दमन्दायमान- क्रोधाग्नेः कुर्वतो मे न खलु न विदितः सर्वभूतैः स्वभावः ॥ ६४२८॥
ENMSS@6429@1उत्कृष्टबलवीर्यस्य विजिगीषोर्जयैषिणः ।
ENMSS@6429@2गुणानुरक्तप्रकृतेर्यात्रा यानमिति स्मृतम् ॥ ६४२९॥
ENMSS@6430@1उत्कृष्टमध्यमनिकृष्टजनेषु मैत्री यद्वच्छिलासु सिकतासु जलेषु रेखा ।
ENMSS@6430@2वैरं क्रमादधममध्यमसज्जनेषु यद्वच्छिलासु सिकतासु जलेषु रेखा ॥ ६४३०॥
ENMSS@6431@1उत्कोचं प्रीतिदानं च द्यूतद्रव्यं सुभाषितम् ।
ENMSS@6431@2कामिनीं प्रथमावस्थां सद्यो गृह्णाति बुद्धिमान् ॥ ६४३१॥
ENMSS@6432@1उत्कोचकाश्चौपधिका वञ्चकाः कितवास्तथा ।
ENMSS@6432@2म गलादेशवृत्ताश्च भद्रप्रेक्षणिकैः सह ॥ ६४३२॥
ENMSS@6433@1असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः ।
ENMSS@6433@2शिल्पोपचारयुक्ताश्च निपुणाः पुण्ययोषितः ॥ ६४३३॥
ENMSS@6434@1एवमाद्यान् विजानीयात् प्रकाशांल्लोककण्टकान् ।
ENMSS@6434@2विगूढचारिणश्चान्यान् अनार्यानार्यलि गिनः ॥ ६४३४॥
ENMSS@6435@1उत्कोचपारितोषक- भाटसुभाषिततरार्थचौर्यांशाः ।

ENMSS@6435@2तत्क्षणमेव ग्राह्याः षडन्यकाले न लभ्यन्ते ॥ ६४३५॥

ENMSS@6436@1उत्क्रान्तं गिरिकूटल घनसहं ते वज्रसारा नखास् तत्तेजश्च तदूर्जितं स च नगोन्माथी निनादो महान् ।

ENMSS@6436@2आलस्यादविमुञ्चता गिरिगुहां सिंहेन निद्रालुना सर्वं विश्वजयैकसाधनमिदं लब्धं न किंचित् कृतम् ॥ ६४३६॥

ENMSS@6437@1उत्क्रान्तानामामिषायोपरिष्टाद् अध्याकाशं बभ्रमुः पत्रवाहाः ।

ENMSS@6437@2मूर्ताः प्राणा नूनमद्याप्यवेक्षा- मासुः कायं त्याजिता दारुणास्त्रैः ॥ ६४३७॥

ENMSS@6438@1उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसंमतः ।

ENMSS@6438@2चिन्तयेन् मनसा ग गां स गतिं परमां लभेत् ॥ ६४३८॥

ENMSS@6439@1उत्क्षिप्तं करक कणद्वयमिदं बद्धा दृढं मेखला यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।

ENMSS@6439@2आरब्धे रभसान् मया प्रियसखि क्रीडाभिसारोत्सवे चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः ॥ ६४३९॥

ENMSS@6440@1उत्क्षिप्तं सखि वर्तिपूरितमुखं मूकीकृतं नूपुरं काञ्चीदाम निवृत्तघर्घररवं क्षिप्तं दुकूलान्तरे ।

ENMSS@6440@2सुप्ताः पञ्जरसारिकाः परिजनोऽप्याघूर्णितो निद्रया शून्यो राजपथस्तमांसि निविडान्येह्येहि निर्गम्यताम् ॥ ६४४०॥

ENMSS@6441@1उत्क्षिप्तं सह कौशिकस्य पुलकैः साकं मुखैर्नामितं भूपानां जनकस्य संशयधिया सार्धं समास्फालितम् ।

ENMSS@6441@2वैदेहीमनसा समं च सहसा कृष्टं ततो भार्गव- प्रौढाहंकृतिकन्दलेन च समं भग्नं तदैशं धनुः ॥ ६४४१॥

ENMSS@6442@1उत्क्षिप्तबाहुदर्शित- भुजमूलं चूतमुकुल मम सख्या ।

ENMSS@6442@2आकृष्यमाण राजति भवतः परमुच्चपदलाभः ॥ ६४४२॥

ENMSS@6443@1उत्क्षिप्तमुच्छ्रितसितांशुकरावलम्बैर् उत्तम्भितोडुभिरतीवतरां शिरोभिः ।

ENMSS@6443@2श्रद्धेयनिर्झरजलव्यपदेशमस्य विष्वक्तटेषु पतति स्फुटमन्तरीक्षम् ॥ ६४४३॥

ENMSS@6444@1उत्क्षिप्ता अपि दन्तीद्रैः कोपनैः पत्तयः परम् ।

ENMSS@6444@2तदसूनहरन् खड्गघातैः स्वस्य पुरः प्रभोः ॥ ६४४४॥

ENMSS@6445@1उत्क्षिप्य करिभिर्दूरान् मुक्तानां योधिनां दिवि ।

ENMSS@6445@2प्रापि जीवात्मभिर्दिव्या गतिर्वा विग्रहैर्मही ॥ ६४४५॥
ENMSS@6446@1उत्क्षिप्य टिट्टिभः पादावास्ते भ गभयाद् दिवः ।
ENMSS@6446@2स्वचित्तकल्पितो गर्वः कस्य नात्रापि विद्यते ॥ ६४४६॥
ENMSS@6447@1उत्क्षिप्यालकमालिकां विलुलितामापाण्डुगण्डस्थलाद्
विश्लिष्यद्वलयप्रपातभयतः प्रोल्लास्य किंचित् करौ ।
ENMSS@6447@2द्वारस्तम्भनिषण्णगात्रलतिका केनापि पुण्यात्मना
मार्गालोकनदत्तदृष्टिरबला तत्कालमालि ग्यते ॥ ६४४७॥
ENMSS@6448@1उत्क्षिप्योच्चैः प्रस्फुरन्तं रदाभ्याम्  ईषादन्तः कुञ्जरं शात्रवीयम् ।
ENMSS@6448@2शृ गप्रोतप्रावृषेण्याम्बुदस्य  स्पष्टं प्रापत् साम्यमुर्वीधरस्य ॥ ६४४८॥
ENMSS@6449@1उत्खातं निधिश कया क्षितितलं ध्माता गिरेर्धातवो  निस्तीर्णः
सरितांपतिर्नृपतयो यत्नेन संसेविताः ।
ENMSS@6449@2मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः  प्राप्तः काणवराटकोऽपि
न मया तृष्णेऽधुना मा भव ॥ ६४४९॥
ENMSS@6450@1उत्खातच्छिन्नसंध्यारुणकमलवनो व्योमकासारमध्यं  मन्ये मत्तो
निशीथाह्वयवनमहिषो म क्ष्वविक्षन्मिम क्षुः ।
ENMSS@6450@2तत्कालोद्भिद्यमानः सह तनुपृथुभिस्तारकाबुद्बुदौघैस् तस्मादेवोज्झिहीते
कलुषितभुवनं भीषणो ध्वान्तप कः ॥ ६४५०॥
ENMSS@6451@1उत्खातदैवतमिवायतनं  पुरारेर्  अस्ताचलान्तरितसूर्यमिवान्तरिक्षम्
।
ENMSS@6451@2हम्मीरभूभुजि गते सुरवेश्म विश्वं  पश्यामि हारमिव नायकरत्नशून्यम्
॥ ६४५१॥
ENMSS@6452@1उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वंल्लघून् वर्धयन्  अत्युच्चान्
नमयन् पृथून् विदलयन् विश्लेषयन् संहतान् ।
ENMSS@6452@2तीक्ष्णान् कण्टकिनो बहिर्नियमयन् स्वारोपितान् पालयन्  मालाकार
इव
प्रयोगकुशलो राज्ये चिरं तिष्ठति ॥ ६४५२॥
ENMSS@6453@1उत्खाय चित्तोपवनात् सुमेधो-  माला कृता पुस्तकनिष्कुटेषु ।
ENMSS@6453@2काव्यद्रुमाणामधिरोपितानां  फलं परां निर्वृतिमुन्नयामः ॥ ६४५३॥
ENMSS@6454@1उत्खेलत्त्रिवलीतर गतरला रोमावलीशैवल-  स्रग्वल्लिर्युवती ध्रुवं
जनमनोनिर्वाणवाराणसी ।
ENMSS@6454@2एतस्या यदुरस्तटीपरिसरे यद्बाल्यचापल्ययोः  स्थाने
यौवनशिल्पिकल्पितचिताचैत्यद्वयं दृश्यते ॥ ६४५४॥

ENMSS@6455@1उत्तंसः केकिपिच्छैर्मरकतवलयश्यामले दोःप्रकाण्डे  हारः सान्द्रेन्द्रनीलैर्मृगमदरचितो वक्त्रपत्रप्रपञ्चः ।

ENMSS@6455@2नीलाब्जैः शेखरश्रीरसितवसनता चेत्यभीकाभिसारे  संप्रत्येणेक्षणानां तिमिरभरसखी वर्तते वेषलीला ॥ ६४५५॥

ENMSS@6456@1उत्तंसकौतुकरसेन विलासिनीनां  लूनानि यस्य न नखैरपि पल्लवानि ।

ENMSS@6456@2उद्यानमण्डनतरो सहकार स त्वम्  अ गारकारकरगोचरतां गतोऽसि ॥ ६४५६॥

ENMSS@6457@1उत्तंसितं भाति मुखप्रभाभिर् न किंचिदब्जं यदहो तदस्याः ।

ENMSS@6457@2युक्तं दृशावेव विधिर्विधिज्ञः  कर्णद्वयालंकरणं चकार ॥ ६४५७॥

ENMSS@6458@1उत्तंसीकृतचन्द्रमाः सभुजगान् वीचीन् परावर्तयन्  ज्योत्स्नाभस्मविलेपने निरवधिस्फीते महिम्नि स्थितः ।

ENMSS@6458@2प्रे कच्छ करोटिकोटिहननैः स्वःसिन्धुमुद्घोषयन्  अत्यन्तं पथि गर्जिताट्टहसितो रुद्रं हसत्यर्णवः ॥ ६४५८॥

ENMSS@6459@1उत्तंसेषु ननर्त न क्षितिभुजां न प्रेक्षकैर्लक्षितः  साका क्षं लुठितो न च स्तनतटे लीलावतीनां क्वचित् ।

ENMSS@6459@2कष्टं भोश्चिरमन्तरेव जलधेर्दैवाद् विशीर्णोऽभवत्  खेलद्व्यालकुला गघर्षणपरिक्षीणप्रमाणो मणिः ॥ ६४५९॥

ENMSS@6460@1उत्तप्तोऽयमुरंगमः शिखितलच्छायां समालम्बते  वैरं साहजिकं विहाय च शिखी मूलं तरोर्गच्छति ।

ENMSS@6460@2याचन्ते च जलं निकुञ्जभवने तृष्णातुराः सारिकास् तप्ते वारिणि प कजानि मधुपास्त्यक्त्वा श्रयन्ते लताः ॥ ६४६०॥

ENMSS@6461@1उत्तमं पुष्करक्षेत्रं ताराक्षेत्रं न मध्यमम् ।

ENMSS@6461@2अधमं च कुरुक्षेत्रं प्रभासं त्वधमाधमम् ॥ ६४६१॥

ENMSS@6462@1उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् । नीचमल्पप्रदानेन समशक्तिं पराक्रमैः ॥

ENMSS@6463@1उत्तमं सुचिरं नैव विपदोऽभिभवन्त्यलम् ।

ENMSS@6463@2राहुग्रसनसंभूतिः क्षणं विच्छाययेद् विधुम् ॥ ६४६३॥

ENMSS@6464@1उत्तमं स्वार्जितं वित्तं मध्यमं पितुरर्जितम् ।

ENMSS@6464@2अधमं भ्रातृवित्तं च स्त्रीवित्तमधमाधमम् ॥ ६४६४॥

ENMSS@6465@1उत्तमः क्लेशविक्षोभं क्षमः सोढुं न हीतरः ।

ENMSS@6465@2मणिरेव महाशाणघर्षणं न तु मृत्कणः ॥ ६४६५॥

ENMSS@6466@1उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चभिस्तथा ।
ENMSS@6466@2कनिष्ठस्तु चतुर्भिः स्याद् एवं स्युर्ध्रुवकास्त्रिधा ॥ ६४६६॥
ENMSS@6467@1उत्तमकुलेऽपि जातः सेवां विदधाति नीचलोकस्य ।
ENMSS@6467@2वदति च वाचं नीचाम् उदरेश्वरपीडितो मर्त्यः ॥ ६४६७॥
ENMSS@6468@1उत्तमतरुणप्रकृतिः पुलकादिकसूचितान्यतनुसक्तिः ।
ENMSS@6468@2स्फुटसंनिहितविभावो निवार्यते केन श्रृ गारः ॥ ६४६८॥
ENMSS@6469@1उत्तमपदार्थरसिकाः सुलभा लोके भवन्ति सर्वेऽपि ।
ENMSS@6469@2दूषितपदार्थरसिकस् त्वमिव मतस्त्वं पुनः करट ॥ ६४६९॥
ENMSS@6470@1उत्तमभुजंगसंगम- निस्पन्दनितम्बचापलस्तस्याः ।
ENMSS@6470@2मन्दरगिरिरिव विबुधैर् इतस्ततः कृष्यते कायः ॥ ६४७०॥
ENMSS@6471@1उत्तमर्णधनदानश कया पावकोत्थशिखया हृदिस्थया ।
ENMSS@6471@2देव दग्धवसना सरस्वती नास्यतो बहिरुपैति लज्जया ॥ ६४७१॥
ENMSS@6472@1उत्तमर्णमुखं पश्यन्न् अधमर्णो ह्रिया नमन् ।
ENMSS@6472@2मृत्युजीवितयोर्युद्धसंभ्रमं परिलोकते ॥ ६४७२॥
ENMSS@6473@1उत्तमवनितैकगतिः करीव सरसीपयः सखीधैर्यम् ।
ENMSS@6473@2आस्कन्दितोरुणा त्वं हस्तेनैव स्पृशन् हरसि ॥ ६४७३॥
ENMSS@6474@1उत्तमश्चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यमः ।
ENMSS@6474@2अधमोऽश्रद्धया कुर्याद् अकर्तोच्चरितम् पितुः ॥ ६४७४॥
ENMSS@6475@1उत्तमस्तोषमायाति तद गं पोष्यते यदि ।
ENMSS@6475@2वृक्षः प्रसीदति प्रायः पादाभ्य गेन न स्वयम् ॥ ६४७५॥
ENMSS@6476@1उत्तमस्य क्षणं कोपो मध्यस्य प्रहरद्वयम् ।
ENMSS@6476@2अधमस्य त्वहोरात्रं पापिष्ठो नैव मुच्यते ॥ ६४७६॥
ENMSS@6477@1उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
ENMSS@6477@2पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ ६४७७॥
ENMSS@6478@1उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
ENMSS@6478@2बालो वा यदि वा वृद्धः सर्वस्याभ्यागतो गुरुः ॥ ६४७८॥
ENMSS@6479@1उत्तमाः स्वगुणैः ख्याता मध्यमाश्च पितुर्गुणैः ।
ENMSS@6479@2अधमा मातुलस्यापि श्वशुरस्याधमाधमाः ॥ ६४७९॥
ENMSS@6480@1उत्तमाः स्वार्जितैर्द्रव्यैः पितुर्वित्तेन मध्यमाः ।
ENMSS@6480@2अधमा मातृवित्तेन स्त्रीवित्तेनाधमाधमाः ॥ ६४८०॥
ENMSS@6481@1उत्तमा आत्मनः ख्याताः पितुः ख्याताश्च मध्यमाः ।

ENMSS@6481@2अधमा मातुलात् ख्याताः श्वशुराच्चाधमाधमः ॥ ६४८१॥
ENMSS@6482@1उत्तमा गोद्भवाङ्ग्यैष्ठ्याद् ब्रह्मणश्चैव धारणात् ।
ENMSS@6482@2सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥ ६४८२॥
ENMSS@6483@1उत्तमाधममध्यानां श्रोतव्यं वचनं बुधैः ।
ENMSS@6483@2तत्र चात्महितं ग्राह्यं वस्तवाक्यं यथा नृपः ॥ ६४८३॥
ENMSS@6484@1उत्तमाधममध्यानि बुद्धा कार्याणि पार्थिवः ।
ENMSS@6484@2उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥ ६४८४॥
ENMSS@6485@1उत्तमाधमसंसक्तौ जानन् सदृशवृत्तिताम् ।
ENMSS@6485@2नारीणां शुचिबाह्यानाम् अ गनाख्यां व्यधाद् विधिः ॥ ६४८५॥
ENMSS@6486@1उत्तमानां स्वभावोऽयं परदुःखासहिष्णुता ।
ENMSS@6486@2स्वयं दुःखं च संप्राप्तं मन्यतेऽन्यस्य वार्यते ॥ ६४८६॥
ENMSS@6487@1उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते ।
ENMSS@6487@2राजप्रियाः कैरविण्यो रमन्ते मधुपैः सह ॥ ६४८७॥
ENMSS@6488@1उत्तमानुत्तमानेव गच्छन् हीनांश्च वर्जयन् ।
ENMSS@6488@2ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम् ॥ ६४८८॥
ENMSS@6489@1उत्तमानेव सेवेत प्राप्ते काले तु मध्यमान् ।
ENMSS@6489@2अधमांस्तु न सेवेत य इच्छेच् श्रेय आत्मनः ॥ ६४८९॥
ENMSS@6490@1उत्तमाभिजनोपेतान् न नीचैः सह वर्धयेत् ।
ENMSS@6490@2कृशोऽपि हि विवेकज्ञो याति संश्रयणीयताम् ॥ ६४९०॥
ENMSS@6491@1उत्तमाश्चात्मना ख्याताः पित्रा ख्याताश्च मध्यमाः ।
ENMSS@6491@2अधमा मातुलैः ख्याताः श्वशुरैश्चाधमाधमाः ॥ ६४९१॥
ENMSS@6492@1उत्तमास्ताजिकाः प्रोक्ताः पारसीकाः समुद्रजाः ।
ENMSS@6492@2कोक्काणाखतलाणाश्च तथा सौराष्ट्रजा हयाः ॥ ६४९२॥
ENMSS@6493@1उत्तमे तु क्षणं कोपो मध्यमे घटिकाद्वयम् ।
ENMSS@6493@2अधमे स्यादहोरात्रं चाण्डाले मरणान्तिकः ॥ ६४९३॥
ENMSS@6494@1उत्तमेनोत्तमं सर्वं मनुष्याणां प्रयत्नतः ।
ENMSS@6494@2अदृष्टमीक्ष्य सर्वेषां वक्तव्यं सुविचक्षणैः ॥ ६४९४॥
ENMSS@6495@1उत्तमे विघ्नवत्तास्ति अधमो दुःखभाजनम् ।
ENMSS@6495@2तस्मात् सर्वत्र योग्यत्वाच् श्रेष्ठो वै मध्यमः स्मृतः ॥ ६४९५॥
ENMSS@6496@1उत्तमैः सह स गेन को न याति समुन्नतिम् ।
ENMSS@6496@2मूर्ध्ना तृणानि धार्यन्ते ग्रथितैः कुसुमैः सह ॥ ६४९६॥

ENMSS@6497@1उत्तमैः सह सांगत्यं पण्डितैः सह संकथाम् ।
ENMSS@6497@2अलुब्धैः सह मित्रत्वं कुर्वाणो नावसीदति ॥ ६४९७॥
ENMSS@6498@1उत्तमैः सह सांगत्यं यत् प्राज्ञैः सत्यवादिभिः ।
ENMSS@6498@2बन्धनस्थोऽपि तिष्ठेत न तु राज्ये नराधमैः ॥ ६४९८॥
ENMSS@6499@1उत्तमैः स्वीकृतो नीचो नीच एव न चोत्तमः ।
ENMSS@6499@2भैरवाधिष्ठितः श्वा तु कदाचिन् नैव केसरी ॥ ६४९९॥
ENMSS@6500@1उत्तमैरननुज्ञातं कार्यं नेच्छेच्च तैः सह ।
ENMSS@6500@2देवैः साकं सुधापानाद् राहोश्छिन्नं शिरो यतः ॥ ६५००॥
ENMSS@6501@1उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत् सह ।
ENMSS@6501@2निनीषुः कुलमुत्कर्षम् अधमानधमांस्त्यजेत् ॥ ६५०१॥
ENMSS@6502@1उत्तमो नातिवक्ता स्याद् अधमो बहुभाषकः ।
ENMSS@6502@2न हि स्वर्णे ध्वनिस्तादृग् यादृक् कांस्ये प्रजायते ॥ ६५०२॥
ENMSS@6503@1उत्तमोऽपि कुलजोऽपि मनुष्यः  सर्वलोकमहितोऽपि बुधोऽपि ।
ENMSS@6503@2दासतां भजति यां भजमानस् तां भजन्ति गणिकां किमु सन्तः ॥ ६५०३॥
ENMSS@6504@1उत्तमोऽप्यधमस्य स्याद् याच्ञानम्रकरः क्वचित् ।
ENMSS@6504@2कौस्तुभादीनि रत्नानि ययाचे हरिरम्बुधिम् ॥ ६५०४॥
ENMSS@6505@1उत्तमोऽप्रार्थितो दत्ते मध्यमः प्रार्थितः पुनः ।
ENMSS@6505@2याचकैर्याच्यमानोऽपि दत्ते न त्वधमाधमः ॥ ६५०५॥
ENMSS@6506@1उत्तमो मध्यमो नीचोऽधमो भ्रातृगुणैर्नरः ।
ENMSS@6506@2कन्यास्त्रीभगिनीभाग्यो नरोऽधमतमो मतः ॥ ६५०६॥
ENMSS@6507@1उत्तमो रसवादश्च धातुवादश्च मध्यमः ।
ENMSS@6507@2अधमो मन्त्रवादश्च मिथ्यावादोऽधमाधमः ॥ ६५०७॥
ENMSS@6508@1उत्तर गय कुर गलोचने  लोचने कमलगर्वमोचने ।
ENMSS@6508@2अस्तु सुन्दरि कलिन्दनन्दिनी-  वीचिडम्बरगभीरमम्बरम् ॥ ६५०८॥
ENMSS@6509@1उत्तरतश्च मधूकाद्  अहिनिलयः पश्चिमोत्तरे तोयम् ।
ENMSS@6509@2परिहृत्य पञ्चहस्तान्  अर्धाष्टमपौरुषं वाच्यम् ॥ ६५०९॥
ENMSS@6510@1उत्तरन्ति विनिकीर्य पल्वलं  गाढप कमतिवाहितातपाः ।
ENMSS@6510@2दंष्ट्रिणो वनवराहयूथपा  दष्टभ गुरबिसा कुरा इव ॥ ६५१०॥
ENMSS@6511@1उत्तरादुत्तरं वाक्यम् उत्तरादेव जायते ।
ENMSS@6511@2सुवृष्टिगुणसंपन्नाद् बीजाद् बीजमिवापरम् ॥ ६५११॥

ENMSS@6512@1उत्तरापथकान्तानां किं ब्रूमो रामणीयकम् ।

ENMSS@6512@2यासां तुषारसंभेदे न म्लायति मुखाम्बुजम् ॥ ६५१२॥

ENMSS@6513@1उत्तरीयविनयात् त्रपमाणा  रुन्धती किल तदीक्षणमार्गम् ।

ENMSS@6513@2आवरिष्ट विकटेन विवोढुर् वक्षसैव कुचमण्डलमन्या ॥ ६५१३॥

ENMSS@6514@1उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम् ।

ENMSS@6514@2तव सख्यै मया दत्तो न सेव्यः सेविता रहः ॥ ६५१४॥

ENMSS@6515@1उत्तरेण सदा कार्यं प्राणस्य न विरोधकम् ।

ENMSS@6515@2संग्रामेण विना कार्यं न लक्ष्यं दक्षिणामुखम् ॥ ६५१५॥

ENMSS@6516@1उत्तानफललुब्धानां वरं राजोपजीविनः ।

ENMSS@6516@2न तु तत्स्वामिनस्तीव्रपरिक्लेशैः फलन्ति ये ॥ ६५१६॥

ENMSS@6517@1उत्तानाः कति वेल्लिताः कति रयादाभुग्नमध्याः कति  क्षिप्तोत्क्षिप्तविकुञ्चिताः कति भुजास्तौर्यत्रिकानुक्रमात् ।

ENMSS@6517@2कल्पान्तेषु महानटस्य झटिति प्रक्रान्तचक्रभ्रमि-  भ्रान्तौ केवलमग्निहासगरलैर्लेखात्रयं पातु वः ॥ ६५१७॥

ENMSS@6518@1उत्तानामुपधाय बाहुलतिकामेकामपा गश्रिताम्   अन्यामप्यलसां निधाय

विपुलाभोगे नितम्बस्थले ।

ENMSS@6518@2नीवीं किंचिदवश्लथां विदधती निश्वासलोलालका

तल्पोत्पीडनतिर्यगुन्नतकुचं निद्राति शातोदरी ॥ ६५१८॥

ENMSS@6519@1उत्तानोच्छूनमण्डूकपाटितोदरसंनिभे ।

ENMSS@6519@2क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥ ६५१९॥

ENMSS@6520@1उत्तानोल्लपितप्रतारितनवश्रोत्रैः कथं भाव्यतां

वाक्प्रत्यंशनिवेशिताखिलजगत्तत्त्वा कवीनां कला ।

ENMSS@6520@2रथ्यागर्तविगाहनाद्भुतकृतैर्गाह्यः क्व रत्नाकरो

यस्यान्तःशफराधमाननतटीमज्जद्गिरीन्द्राः श्रियः ॥ ६५२०॥

ENMSS@6521@1उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ।

ENMSS@6521@2ऊरुमध्ये तथोत्तानौ पाणी पद्मासनं त्विदम् ॥ ६५२१॥

ENMSS@6522@1उत्तारकमतिस्निग्धं भ्रूक्षेपवशवर्ति च ।

ENMSS@6522@2सदा मुखस्थं मित्रं चेन् नेत्रेण चपलेन किम् ॥ ६५२२॥

ENMSS@6523@1उत्तारयति विपत्ताव् इति धनवत्तामपेक्षते क्षितिपः ।

ENMSS@6523@2चेन्नेह तदुपयोगस् तं नियतं वित्तसंचयो रोगः ॥ ६५२३॥

ENMSS@6524@1उत्तालताटकोत्पातदर्शनेऽप्यप्रकम्पितः ।

ENMSS@6524@2नियुक्तस्तत्प्रमाथाय स्त्रैणेन विचिकित्सति ॥ ६५२४॥

ENMSS@6525@1उत्तालतालीवनसंप्रवृत्त- समीरसीमन्तितकेतकीकाः ।

ENMSS@6525@2आसेदिरे लावणसैन्धवीनां चमूचरैः कच्छभुवां प्रदेशाः ॥ ६५२५॥

ENMSS@6526@1उत्तालापीतहालारसविवशमनोवृत्तिताला कसीर-
प्रोत्खाताकृष्टकालागुरुरुचिररुचिः स्त्रोतसोन्मादशीला ।

ENMSS@6526@2अच्छण्डीद्वीपवन्दीभवदखिलचलत्कान्दिशीकोग्रनक्रा कालिन्दी वोऽस्तु संदीपितसुकृतचयोद्रेकमन्दीकृतैनाः ॥ ६५२६॥

ENMSS@6527@1उत्तालालकभञ्जनानि कबरीपाशेषु शिक्षारसो दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः ।

ENMSS@6527@2तिर्यग्लोचनचेष्टितानि वचसां छेकोक्तिसंक्रान्तयः स्त्रीणां म्लायति शैशवे प्रतिकलं कोऽप्येष केलिक्रमः ॥ ६५२७॥

ENMSS@6528@1उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं गुरुं श्रान्तस्तावदहं चिरान् मरणजं सेवे त्वदीयं सुखम् ।

ENMSS@6528@2इत्युक्तो धनवर्जितेन विदुषा गत्वा श्मशानं शवो दारिद्र्यान् मरणं वरं सुखमिति ज्ञात्वा स तूष्णीं स्थितः ॥ ६५२८॥

ENMSS@6529@1उत्तिष्ठति नमति वणिक् पृच्छति कुशलं ददाति च स्थानम् ।

ENMSS@6529@2निक्षेपपाणिमाप्तं दृष्ट्वा धर्म्यां कथां कुरुते ॥ ६५२९॥

ENMSS@6530@1उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः ।

ENMSS@6530@2यातः परमपि जीवेज् जीवितनाथो भवेत् तस्याः ॥ ६५३०॥

ENMSS@6531@1उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः ।

ENMSS@6531@2भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः शय्यामालिग्य नीतं
वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥ ६५३१॥

ENMSS@6532@1उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।

ENMSS@6532@2समौ हि शिष्टैराम्नातौ वत्स्र्यन्तावामयः स च ॥ ६५३२॥

ENMSS@6533@1उत्तिष्ठ यदि जीवन्तीं मामिच्छसि तमानय ।

ENMSS@6533@2अहं नेतुमशक्यापि सुदूरमिदमन्तरम् ॥ ६५३३॥

ENMSS@6534@1उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।

ENMSS@6534@2ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥ ६५३४॥

ENMSS@6535@1उत्तिष्ठारात् तरौ मे तरुणिमम तरोः शक्तिरारोहण का साक्षादाख्यामि मुग्धे तरणिमिह रवेराख्यया का रतिर्मे ।

ENMSS@6535@2वार्तेयं नौप्रस गे कथमपि भविता नावयोः संगमार्था वार्तापीति स्मितास्यं जितगिरमजितं राधयाराधयामि ॥ ६५३५॥

ENMSS@6536@1उत्तिष्ठोत्तिष्ठ किं शेषे प्राप्ते परिभवे नवे ।

ENMSS@6536@2अद्य वै निर्भया ल कां प्रविष्टाः सूर्यरश्मयः ॥ ६५३६॥

ENMSS@6537@1उत्तीर्णभारलघुनाप्यलघूलपौघ- सौहित्यनिःसहतरेण तरोरधस्तात् ।

ENMSS@6537@2रोमन्थमन्थरचलद्गुरुसास्नमासां चक्रे निमीलदलसेक्षणमौक्षकेण ॥ ६५३७॥

ENMSS@6538@1उत्तीर्य दक्षिणे पूर्वं पश्चाद् वामेऽतिनिन्दिताः ।

ENMSS@6538@2कैश्चित् कृष्णो मृगश्चैकः कैश्चित् सर्वेऽपि नादृताः ॥ ६५३८॥

ENMSS@6539@1उत्तीर्य पृष्ठतो याति वेष्टनं वाकरोति चेत् ।

ENMSS@6539@2स्वस्थस्य वेष्टनप्राप्तिः सभयस्य भयं हरेत् ॥ ६५३९॥

ENMSS@6540@1उत्तु गपीवरकुचद्वयपीडिता गम् आलि गितः पुलकितेन भुजेन रत्या ।

ENMSS@6540@2श्रीमञ् जगन्ति मदयन् नयनाभिरामः कामोऽयमेति मदघूर्णितनेत्रपद्मः ॥ ६५४०॥

ENMSS@6541@1उत्तु गमत्तमात गमस्तकन्यस्तलोचनः ।

ENMSS@6541@2आसन्नऽएपि च सार गे न वाञ्छां कुरुते हरिः ॥ ६५४१॥

ENMSS@6542@1उत्तु गवातायनगोपुराणि गृहाणि वित्तानि दुरर्जितानि ।

ENMSS@6542@2क्षणादधःपातकराणि हन्त चितातिथेरस्य निरर्थकानि ॥ ६५४२॥

ENMSS@6543@1उत्तु गशैलशिखरस्थितपादपस्य काकः कृशोऽपि फलमालभते सपक्षः ।

ENMSS@6543@2सिंहः प्रचण्डगजकुम्भविदारकोऽपि उच्छिष्टमेव लभते खलु पक्षहीनः ॥ ६५४३॥

ENMSS@6544@1उत्तु गशैलशिखराश्रयणेन केचिद् उद्दामवीचिवलिताः सरितो भवन्ति ।

ENMSS@6544@2अन्ये पुणर्जलकनास्तृणलोष्टपाताद् अम्भोमुचां पयसि न क्षयमाप्नुवन्ति ॥ ६५४४॥

ENMSS@6545@1उत्तु गशैलशिखरे ननु पादपस्य काकोऽपि पक्कफलमालभते सपक्षः ।

ENMSS@6545@2सिंहो बली गजविदारणदारुणोऽपि सीदत्यहो तरुतले निजपक्षहीनः ॥ ६५४५॥

ENMSS@6546@1उत्तु गस्तनपर्वतादवतरद्ग गेव हारावली रोमाली नवनीलनीरजरुचिः सेयं कलिन्दात्मजा ।

ENMSS@6546@2जातं तीर्थमिदं सुपुण्यजनकं यत्रानयोः संगमश् चन्द्रो मज्ञति लाञ्छनापहृतये नूनं नखांकच्छलात् ॥ ६५४६॥

ENMSS@6547@1उत्तु गस्तनपर्वतैस्तनुरुहै रोमावलीभूरुहैः काञ्चीक कणनूपुरध्वनिपरैर्हारावलीवागुरैः ।

ENMSS@6547@2भ्रूचापेन कटाक्षविस्तरशरैः कन्दर्पदावानलैर् बाला खेलति पारधं निजगुणैः कामीमृगो बध्यते ॥ ६५४७॥

ENMSS@6548@1उत्तु गस्तनभरतान्ततान्तमध्यं विश्लिष्यद्धनकचवान्तवान्तसूनम् ।

ENMSS@6548@2वक्राञ्जभ्रमदलिभीतभीतनेत्रं मुग्धाक्षी मम धुरि मन्दमन्दमेति ॥ ६५४८॥

ENMSS@6549@1उत्तु गस्तनभार एश तरले नेत्रे चले भ्रूलते रागान्धेषु तदोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।

ENMSS@6549@2सौभाग्याक्षरप क्तिरेव लिखिता पुष्पायुधेन स्वयं मध्यस्थापि करोति
तापमधिकं रोमावली केन सा ॥ ६५४९॥

ENMSS@6550@1उत्तु गस्तनमण्डलादवतरद्ग गेव हारावली रोमाली नवनालनीरदरुचिः सेयं कलिन्दात्मजा ।

ENMSS@6550@2जातं तीर्थमिदं सुपुण्यजनकं यत्रावयोः संगमश् चन्द्रो मज्ञति लाञ्छनापहृदये नूनं नखांकच्छलात् ॥ ६५५०॥

ENMSS@6551@1उत्तु गस्तनमण्डलोपरिलसत्प्रालम्बमुक्तामणेर् अन्तर्बिम्बितमिन्द्रनीलनिकरच्छायानुकारिद्युति ।

ENMSS@6551@2लज्जाव्याजमुपेत्य नम्रवदना स्पष्टं मुरारेर्वपुः पश्यन्ती मुदिता मुदेऽस्तु भवतां लक्ष्मीर्विवाहोत्सवे ॥ ६५५१॥

ENMSS@6552@1उत्तु गस्तनशैलदुस्तरमुरो निम्नातिनाभिस्थली भीमं देहवनं स्फुरद्भुजलतं रोमालिजालाकुलम् ।

ENMSS@6552@2व्याधः पञ्चशरः किरत्यतितरांस्तीक्ष्णान् कटाक्षाशुगांस् तन्मे ब्रूहि मनःकुर ग शरणं कं सांप्रतं यास्यसि ॥ ६५५२॥

ENMSS@6553@1उत्तु गादनिलचलांशुकास्तटान्ताच् चेतोभिः सह भयदर्शिनां प्रियाणाम् ।

ENMSS@6553@2श्रोणीभिर्गुरुभिरतूर्णमुत्पतन्त्यस् तोयेषु द्रुततरम गना निपेतुः ॥ ६५५३॥

ENMSS@6554@1उत्तु गे कृतसंश्रयस्य शिखरिण्युच्चावचग्रावणि न्यग्रोधस्य किम ग तस्य वचसा श्लाघासु पर्याप्यते ।

ENMSS@6554@2बन्दुर्वा स पुराकृतः किमथवा सत्कर्मणां संचयो मार्गे रूक्षविपत्रशाखिनि जनो यं प्राप्य विश्राम्यति ॥ ६५५४॥

ENMSS@6555@1उत्तु गे विभवद्रुमस्य शिखरे भुक्त्वा फलं स्वेच्छया तस्मात् प्रस्खलितः पदाद्विधिवशाद् भ्रष्टो निरालम्बनः ।

ENMSS@6555@2पातालोदरभीषणे बहुविधक्लेशोरगाध्यासिते दौर्गत्यावटगर्भके निपतितश्चित्रं यदि प्राणिति ॥ ६५५५॥

ENMSS@6556@1उत्तु गैस्तरुभिः किमेभिरफलैराकाशसंस्पर्शिभिर् धन्योऽसौ नितरामुलूपविटपो नद्यास्तटे तिष्ठति ।

ENMSS@6556@2एवं यः कृतबुद्धिरुत्थितजलव्यालोलवीचीवशान् मज्जन्तं जनमुद्धरामि यदि वा तेनैव मज्जाम्यहम् ॥ ६५५६॥

ENMSS@6558@1उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु ।

ENMSS@6558@2भविष्यतीत्येव मनः कृत्वा सततमव्यथैः ॥ ६५५८॥

ENMSS@6559@1उत्थानं तु मनुष्याणां दक्षाणां दैववर्जितम् ।

ENMSS@6559@2अफलं दृश्यते लोके सम्यगप्युपपादितम् ॥ ६५५९॥

ENMSS@6560@1उत्थानं संयमो दाक्ष्यम् अप्रमादो धृतिः स्मृतिः ।

ENMSS@6560@2समीक्ष्य च समारम्भो विद्धि मूलं भवस्य तत् ॥ ६५६०॥

ENMSS@6561@1उत्थानं हि नरेन्द्राणां बृहस्पतिरभाषत ।

ENMSS@6561@2राजधर्मस्य यन् मूलं ॥। ॥। ॥। ॥ ६५६१॥

ENMSS@6562@1उत्थानधीरः पुरुषो वाग्धीरानधितिष्ठति ।

ENMSS@6562@2उत्थानधीरं वाग्धीरा रमयन्त उपासते ॥ ६५६२॥

ENMSS@6563@1उत्थानमभिजानन्ति सर्वभूतानि भारत ।

ENMSS@6563@2प्रत्यक्षं फलमश्नन्ति कर्मणां लोकसाक्षिकम् ॥ ६५६३॥

ENMSS@6564@1उत्थानयुक्तः सततं परेषामन्तरैषणे ।

ENMSS@6564@2आनृण्यमाप्नोति नरः परस्यात्मन एव च ॥ ६५६४॥

ENMSS@6565@1उत्थानहीनो राजा हि बुद्धिमानपि नित्यशः ।

ENMSS@6565@2धर्षणीयो रिपूणां स्याद् भुजंग इव निर्विषः ॥ ६५६५॥

ENMSS@6566@1उत्थानेनामृतं लब्धम् उत्थानेनासुरा हताः ।

ENMSS@6566@2उत्थानेन महेन्द्रेण श्रैष्ठ्यं प्राप्तं दिवीह च ॥ ६५६६॥
ENMSS@6567@1उत्थानेनैधयेत् सत्त्वम् इन्धनेनेव पावकम् ।
ENMSS@6567@2श्रियो हि सततोत्थायी दुर्बलोऽपि समश्नुते ॥ ६५६७॥
ENMSS@6568@1उत्थाने सभ्यानाम्  उत्तिष्ठति याति तेषु यातेषु ।
ENMSS@6568@2मतमन्तरापि राज्ञो  विज्ञायाशीःप्रदो बहिरुपैति ॥ ६५६८॥
ENMSS@6568@1उत्थापितः संयति रेणुरश्वैः  सान्द्रीकृतः स्यन्दनवंशचक्रैः ।
ENMSS@6568@2विस्तारितः कुञ्जरकर्णतालैर् नेत्रक्रमेणोपरुरोध सूर्यम् ॥ ६५६८॥
ENMSS@6569@1उत्थाप्य भुजगीं शक्तिं मूलवातैरधःस्थिताम् ।
ENMSS@6569@2सुषुम्नान्तर्गतां पञ्चचक्राणां भेदिनीं शिवाम् ॥ ६५६९॥
ENMSS@6570@1उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
ENMSS@6570@2हुत्वाग्निं ब्राह्मणांश्चार्य प्रविशेच्च शुभां सभाम् ॥ ६५७०॥
ENMSS@6571@1उत्थायोत्थाय पापेष्वभिरमति मतिर्मन्दबुद्धेर्यदा ते  नैवेद्वेगो न शान्तिर्न च भवति घृणा कुर्वतः कर्म निन्द्यम् ।
ENMSS@6571@2तत् किं नैव प्रभाते ज्वलदनलसमा रौरवी नाम रौद्री तीक्ष्णायःकीलचक्रक्रकचपटुरवा राजधानी यमस्य ॥ ६५७१॥
ENMSS@6572@1उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम् ।
ENMSS@6572@2आयुषः खण्डमादाय रविरस्तं गमिष्यति ॥ ६५७२॥
ENMSS@6573@1उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम् ।
ENMSS@6573@2दत्तं वा दापितं वापि वाक् सत्या वापि भाषिता ॥ ६५७३॥
ENMSS@6574@1उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम् ।
ENMSS@6574@2मरणव्याधिशोकानां किमद्य निपतिष्यति ॥ ६५७४॥
ENMSS@6575@1उत्थायोत्थाय लीयन्ते दरिद्राणां मनोरथाः ।
ENMSS@6575@2बालवैधव्यदग्धानां कुलस्त्रीणां कुचा इव ॥ ६५७५॥
ENMSS@6576@1उत्थायोन्नतवासयष्टिशिखरे विस्तारिताकुञ्चितं बिभ्रत्पादमुदस्तकेसरसटः किंचिद् विनिद्रेक्षणः ।
ENMSS@6576@2दूरादञ्चितकन्धरः शमवशाद् व्याधूय पक्षद्वयं  मानम्लानिकरः कुर गकदृशां कोकूयते कुक्कुटः ॥ ६५७६॥
ENMSS@6577@1उत्थिता एव पूज्यन्ते जनाः कार्यार्थिभिर्नरैः ।
ENMSS@6577@2शत्रुवत् पतितं को नु वन्दते मानवं पुनः ॥ ६५७७॥
ENMSS@6577A@1उत्थिताग्रचरणा पृथुस्तनी  पुष्पजालमपचिन्वती तरौ ।
ENMSS@6577A@2मध्यभञ्जनभयापदेशतो  निस्त्रपा दयितकण्ठमग्रहीत् ॥

ENMSS@6578@1उत्थितो निशि कलानिधिर्भवेद्  एतदीयमुखतुल्यताप्तये ।
ENMSS@6578@2प्रापितो मलिनभावमेतया  लज्जया नभसि यात्यदृश्यताम् ॥ ६५७८॥
ENMSS@6579@1उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं  बाष्पं कुरु स्थिरतया विरतानुबन्धम् ।
ENMSS@6579@2अस्मिन्नलक्षितनतोन्नतभूमिभागे  मार्गे पदानि खलु ते विषमीभवन्ति ॥ ६५७९॥
ENMSS@6580@1उत्पततोऽप्यन्तरिक्षं गच्छतोऽपि महीतलम् ।
ENMSS@6580@2धावतः पृथिवीं सर्वां नादत्तमुपतिष्ठति ॥ ६५८०॥
ENMSS@6581@1उत्पतन्ति यदाकाशे निपतन्ति महीतले ।
ENMSS@6581@2पक्षिणस्तदपि प्राप्त्या नादत्तमुपतिष्ठते ॥ ६५८१॥
ENMSS@6582@1उत्पतन्ती भ्रमन्ती सा नमन्ती नलिनेक्षना ।
ENMSS@6582@2शम्पाशतं वितन्वाना भ्रमरीव भ्रमं व्यधात् ॥ ६५८२॥
ENMSS@6583@1उत्पतन्त्वन्तरिक्षं वा पातालं प्रविशन्तु वा ।
ENMSS@6583@2चरन्तु वा दिशः सर्वा ह्यदत्तं नोपलभ्यते ॥ ६५८३॥
ENMSS@6585@1उत्पतेत् सरुजाद् देशाद् व्याधिदुर्भिक्षपीडितात् ।
ENMSS@6585@2अन्यत्र वस्तुं गच्छेद् वा वसेद् वा नित्यमानितः ॥ ६५८५॥
ENMSS@6586@1उत्पत्तिः पयसां निधेर्वपुरपि ख्यातं सुधामन्दिरं  स्पर्धन्ते विशदा लताभसरला हारावलीमंशवः ।
ENMSS@6586@2कान्ता कैरविणी तव प्रियसखः श्रृ गारसारः स्मरो  हं हो चन्द्र किमत्र तापजननं तापाय यन् मे भवान् ॥ ६५८६॥
ENMSS@6587@1उत्पत्तिपरिपूरितायाः किमस्याः पावनान्तरैः ।
ENMSS@6587@2तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ ६५८७॥
ENMSS@6588@1उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ।
ENMSS@6588@2स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥ ६५८८॥
ENMSS@6588A@1उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरुः  शौर्यं यत्तु न तद् गिरां पथि ननु व्यक्तं हि तत्कर्मभिः ।
ENMSS@6588A@2त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः क्षत्रब्रह्मतपोनिधेर्भगवतः किं वा न लोकोत्तरम् ॥
ENMSS@6589@1उत्पत्तिर्देवयजनाद् ब्रह्मवादी नृपः पिता ।
ENMSS@6589@2सुप्रसन्नोज्ज्वला मूर्तिरस्यां स्नेहं करोति मे ॥ ६५८९॥
ENMSS@6590@1उत्पत्तिर्मरुतां प्रभोर्युगदिने प्रख्याप्य विश्वोत्सवे  पूण्याहश्रुतिषु

प्रसिद्धिरधिका पूर्णं वयः पौरुषम् ।
ENMSS@6590@2काकुत्स्थेन समं सपत्नकलहो दैवज्ञता तादृशी  काकस्तेन गुणेन काञ्चनमये व्यापारितः पञ्जरे ॥ ६५९०॥
ENMSS@6591@1उत्पत्तिर्मलये समुद्रनिलये पन्था वृतो राक्षसैस् तत्रत्यानपि हन्त चन्दनतरूंश्छिन्दन्ति सांयात्रिकाः ।
ENMSS@6591@2वर्तन्ते सविधस्थिताश्च सुखिनः शाखोटमुख्यद्रुमास् तन्मन्ये कृतिनस्तु ते तरुकुले ये नोपयोगक्षमाः ॥ ६५९१॥
ENMSS@6592@1उत्पत्त्युत्पन्नशिष्टा विविधगुणगणा यत्र यान्ति प्रटिष्ठां  बाधेन प्राक्तनानां न च नियमविधिर्नापि संख्यार्थदाने ।
ENMSS@6592@2ऊहः सर्वत्र यस्य स्फुरति च सकलः सत्य एवार्थवादो मीमांसाभावमश्चत्यभिनवमधुना मूर्तिरेषा त्वदीया ॥ ६५९२॥
ENMSS@6593@1उत्पत्रेव दृशोऽर्चिषा कुसुमितेवेन्दोः करैर्भोगिभिः  सारोहेव जटाटवी फलतु वः श्रेयो भवानीपतेः ।
ENMSS@6593@2यत्पर्यन्तविवर्तिनः सुरसरित्पूरस्य भूरिस्फुरत्-  फेनोण्डूकविलासमश्चति विधेर्जीर्णा कपालावली ॥ ६५९३॥
ENMSS@6594@1उत्पथा दुर्नदाः केचिद् बहुभ गभ्रमाविलाः ।
ENMSS@6594@2तटस्थानपि निघ्नन्ति तरसा भिन्नसेतवः ॥ ६५९४॥
ENMSS@6595@1उत्पथेन क्वचिद् याति क्वचिन् मार्गेण गच्छति ।
ENMSS@6595@2मुहुरुष्णो मुहुः शीतश्चपलश्चपलायते ॥ ६५९५॥
ENMSS@6596@1उत्पद्यन्ते विपद्यन्ते मद्विधाः क्षुद्रजन्तवः ।
ENMSS@6596@2परार्थबद्धकक्ष्याणां तादृशामुद्भवः कुतः ॥ ६५९६॥
ENMSS@6597@1उत्पन्नं सुधियां कुले यदखिलैस्त्यक्तं बुधैर्न क्षणं  यन् नो विस्मृतमेकदापि सुजनैर्यद्यन्न युक्तं खलैः ।
ENMSS@6597@2दौर्गत्यस्य तथाविधस्य महतस्तस्यापि केनापि नो  यद् दानाम्बुसरित्प्रवाहपतितस्याकारि हस्तार्पणम् ॥ ६५९७॥
ENMSS@6598@1उत्पन्नपरितापस्य बुद्धिर्भवति यादृशी ।
ENMSS@6598@2तादृशी यदि पूर्वं स्यात् कस्य न स्यान्महोदयः ॥ ६५९८॥
ENMSS@6599@1उत्पन्नपुत्रमात्रस्य पुंसः स्वर्गो भवेद् ध्रुवम् ।
ENMSS@6599@2टिट्टिभोत्पादनादेव मन्दपालो दिवं ययौ ॥ ६५९९॥
ENMSS@6600@1उत्पन्नमिह लोके वै जन्मप्रभृति मानवम् ।
ENMSS@6600@2विविधान्युपवर्तन्ते दुःखानि च सुखानि च ॥ ६६००॥

ENMSS@6601@1तयोरेकतरे मार्गे यद्येनमभिसंनयेत् ।

ENMSS@6601@2न सुखं प्राप्य संहृष्येत् न दुःखं प्राप्य संज्वरेत् ॥ ६६०१॥

ENMSS@6602@1उत्पन्नस्य रुरोः शृ गं वर्धमानस्य वर्धते ।

ENMSS@6602@2प्रार्थना पुरुषस्येव तस्य मात्रा न विद्यते ॥ ६६०२॥

ENMSS@6603@1उत्पन्नाः सरितां ह्रदेषु सुचिरं तत्रैव पुष्टास्ततः  प्राप्ताः प्रावृषि सागरं जलचरास्तासां मुखादेव ये ।

ENMSS@6603@2द्वित्रैरेव दिनैस्तिमिंगिलकुलस्यासाद्य कूटस्थतां  मृष्यन्त्यद्य न ते रहस्यपि कृतां नादेयतासंकथाम् ॥ ६६०३॥

ENMSS@6604@1उत्पन्ना बहवस्तलेषु सरसामम्भोरुहाणां चया  ये यामिन्यधिपानुकारिरमणीवक्त्रोपमानं गताः ।

ENMSS@6604@2नाभौ भौमरिपोरजायत महापद्मः स कोऽप्येकको यस्त्रैलोक्यसमुद्भवप्रभवितुर्जन्मावनित्वं गतः ॥ ६६०४॥

ENMSS@6605@1उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान् ।

ENMSS@6605@2वणिजो भार्यया जारः प्रत्यक्षे निह्नुतो यथा ॥ ६६०५॥

ENMSS@6606@1उत्पन्नेषु च कार्येषु मतिर्यस्य न हीयते ।

ENMSS@6606@2स निस्तरति दुर्गाणि गोपी जारद्वयं यथा ॥ ६६०६॥

ENMSS@6607@1उत्पन्नो घट चक्रवर्त्यसि पुनर्वह्निं प्रविश्य त्वया  प्रातः स्नानपरिश्रमेण पयसां पानेन तप्तं तपः ।

ENMSS@6607@2आक्रम्योन्नतजानु यन् मृगदृशां तिष्ठन्नितम्बस्थले कण्ठालम्बितबाहुवल्लिकुचयोः सीमानमास्कन्दसि ॥ ६६०७॥

ENMSS@6608@1उत्पलस्य च पद्मस्य मत्स्यस्य कुमुदस्य च ।

ENMSS@6608@2एकजातिप्रसूतानां रूपं गन्धः पृथक् पृथक् ॥ ६६०८॥

ENMSS@6609@1उत्पलस्य हि रक्तिमा साधोः परोपकारिता ।

ENMSS@6609@2असाधोः करुणाभावः स्वभावास्त्रिविधा यथा ॥ ६६०९॥

ENMSS@6610@1उत्पल्लव इव किरणैः  कुसुमित इव तारकाभिरयमिन्दुः ।

ENMSS@6610@2उदयत्युदयतटान्ते  सुरतरुरिव शीतलच्छायः ॥ ६६१०॥

ENMSS@6611@1उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः  कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।

ENMSS@6611@2शुक्लापान्गैः सजलनयनैः स्वागतीकृत्य केकाः  प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥ ६६११॥

ENMSS@6612@1उत्पातकं तदिह देव विचारणीयं  नारायणो यदि पतेदथवा सुभद्रा ।

ENMSS@6612@2कादम्बरीमदविघूर्णितलोचनस्य  युक्तं हि ला गलधृतः पतनं पृथिव्याम् ॥ ६६१२॥

ENMSS@6613@1उत्पातकेतुरिव मन्मथनायकस्य  वज्रप्रहार इव केलिलतावनस्य ।

ENMSS@6613@2संहारकाल इव पान्थवधूजनस्य  ग्रीष्मस्य भाति दिवसः सखि दूरिताशः

॥ ६६१३॥

ENMSS@6614@1उत्पातजं छिद्रमसौ विवस्वान्  व्यादाय वक्राकृति लोकभीष्यम् ।

ENMSS@6614@2अत्तुं जनान् धूसररश्मिराशिः  सिंहो यथा कीर्णसटोऽभ्युदेति ॥ ६६१४॥

ENMSS@6615@1उत्पाताय च काव्ये  दुरुपश्रुतिरभिनये च नाट्यानाम् ।

ENMSS@6615@2स्वस्थानामपि यद्वद्  ध्वस्ता धारा धरित्रीति ॥ ६६१५॥

ENMSS@6616@1उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।

ENMSS@6616@2ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥ ६६१६॥

ENMSS@6617@1उत्पादनमपत्यस्य जातस्य परिपालनम् ।

ENMSS@6617@2प्रत्यर्थं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥ ६६१७॥

ENMSS@6618@1उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।

ENMSS@6618@2ननु दाक्षिण्यसंपन्नः सर्वस्य भवति प्रियः ॥ ६६१८॥

ENMSS@6619@1उत्पादयत्यलमिदं मनसो विषादं  सीदत्सरोरुहनिभं वदनं त्वदीयम् ।

ENMSS@6619@2ज्ञात्वा निदानमहमत्र समानदुःखा  प्राणैरपि प्रियतमे भवितुं समीहे

॥ ६६१९॥

ENMSS@6620@1उत्पादयन्तो सुरतस्य विघ्नं  परस्परालापसुखं हरन्ती ।

ENMSS@6620@2संरागिणः कामिजनस्य गाढम्  अक्ष्णोर्ललम्बे सहसैव निद्रा ॥ ६६२०॥

ENMSS@6621@1उत्पादिता स्वयमियं यदि तत् तनूजा  तातेन वा यदि तदा भगिनी खलु श्रीः ।

ENMSS@6621@2यद्यन्यसंगमवती च तदा परस्त्री  तत्त्यागबद्धमनसः सुधियो भवन्ति

॥ ६६२१॥

ENMSS@6622@1उत्पाद्य कृत्रिमान् दोषान् धनी सर्वत्र बाध्यते ।

ENMSS@6622@2कृतदोषसहस्रोऽपि निर्धनः परमेश्वरः ॥ ६६२२॥

ENMSS@6623@1उत्पाद्य पुत्राननृणांश्च कृत्वा  वृत्तिं च तेभ्योऽनुविधाय कांचित् ।

ENMSS@6623@2स्थाने कुमारीः प्रतिपाद्य सर्वा  अरण्यसंस्थो मुनिवद् बुभूषेत् ॥ ६६२३॥

ENMSS@6624@1उत्पाद्य यत् स्वयमपि प्रबलानुराग-  भाजस्तथानुसरतोऽपि दिवाकरस्य ।

ENMSS@6624@2छाया प्रसर्पति सुदूरमनेन मन्ये  क्लृप्तं तया सदृशमेव कुलीनतायाः ॥ ६६२४॥

ENMSS@6625@1उत्पुच्छः प्रमदोच्छ्वसद् वपुरधोविस्रंसिपक्षद्वयः

स्वैरोत्फालगतिक्रमेण परितो भ्रान्त्वा सलीलं मुहुः ।

ENMSS@6625@2उत्कण्ठालसकूजितः कलरुतां भूयो रिरंसारस-  न्यग्भूतां चटकः

प्रियामभिसरत्युद्वेपमानः क्षणम् ॥ ६६२५॥

ENMSS@6626@1उत्पुच्छानतधूतपक्षततयो झात्कारिणो विभ्रमैर् उद्वाच्यास्ततचञ्चवो

लयवशादुत्क्षिप्तपादा मुहुः ।

ENMSS@6626@2पश्यन्तो निजकण्ठकाण्डमलिनां कादम्बिनीमुन्नत-

ग्रीवाभ्यर्णमिलत्कलापविटपा नृत्यन्ति केकाभृतः ॥ ६६२६॥

ENMSS@6627@1उत्प्रवालान्यरण्यानि वाप्यः संफुल्लप कजाः ।

ENMSS@6627@2चन्द्रः पूर्णश्च कामेन पान्थदृष्टेर्विषं कृतम् ॥ ६६२७॥

ENMSS@6628@1उत्प्लुत्य दूरं परिधूय पक्षा-  वधो निरीक्ष्य क्षणबद्धलक्ष्यः ।

ENMSS@6628@2मध्येजलं बुड्डति दत्तझम्पः  समत्स्यमुत्सर्पति मत्स्यर कः ॥ ६६२८॥

ENMSS@6629@1उत्प्लुत्य यः शिखरिणं मदकुम्भिकुम्भम्  उद्भिद्य सानुशतमायतमुल्लल घे ।

ENMSS@6629@2पञ्चाननो नियतया जरयाभिभूतः  सोऽयं करौ लिहति

बृंहितलोहिताक्षः ॥ ६६२९॥

ENMSS@6630@1उत्प्लुत्या गृहकोणतः प्रचलिताः स्तोकाग्रज घं ततो

वक्रस्वैरपदक्रमैरुपगताः किंचिच्चलन्तो गले ।

ENMSS@6630@2भेकाः पूतिनिपातिनो मिचिमिचीत्युन्मीलितार्धेक्षणा

नक्राकारविदारिताननपुटैर्निर्मक्षिकं कुर्वते ॥ ६६३०॥

ENMSS@6631@1उत्प्लुत्यारादर्धचन्द्रेण लूने  वक्रेऽन्यस्य क्रोधदष्टोष्ठदन्ते ।

ENMSS@6631@2सैन्यैः कण्ठच्छेदलीने कबन्धाद्  भूयो बिभ्ये वल्गतः सासिपाणेः ॥ ६६३१॥

ENMSS@6632@1उत्फालं हेलयैव द्रुतमभिपततः पूर्वपृथ्वीधराग्राद्

उच्चैरर्चिश्चपेटाहतिभिरिव हरेर्ध्वान्तदन्ती विदीर्णः ।

ENMSS@6632@2रक्ताः कुम्भैर्विमुक्ता इव सकलदृशां विस्मयं संदधानाः

संध्याशोणत्विषस्ताः सपदि निपतितास्तारकास्ताः समस्ताः ॥ ६६३२॥

ENMSS@6633@1उत्फुल्लकमलकेसर- परागगौरद्युते मम हि गौरि ।

ENMSS@6633@2अभिवाञ्छितं प्रसिद्ध्यतु भगवति युष्मत्प्रसादेन ॥ ६६३३॥

ENMSS@6634@1उत्फुल्लगल्लपरिफुल्लमुखारविन्द- सौगन्ध्यलुब्धमधुपाकुलया रतांते ।

ENMSS@6634@2संभुग्नपीनकुचचूचुकयातिगाढ- मालि गितो गिरिजया गिरिशः पुनातु

॥ ६६३४॥

ENMSS@6635@1उत्फुल्लगल्लैरालापाः क्रियन्ते दुर्मुखैः सुखम् ।

ENMSS@6635@2जानाति हि पुनः सम्यक् कविरेव कवेः श्रमम् ॥ ६६३५॥

ENMSS@6636@1उत्फुल्लतापिच्छमनोरमश्रीर् मातुः स्तनन्यस्तमुखारविन्दः ।

ENMSS@6636@2संचालयन् पादसरोरुहाग्रं कृष्णः कदा यास्यति दृक्पथं मे ॥ ६६३६॥

ENMSS@6637@1उत्फुल्लप कजनिषक्तलसद्द्विरेफः किंचिद्विनिद्रकुमुदोत्करसंभृतश्रीः

।

ENMSS@6637@2आमूलनद्धविविधाद्भुतमाल्यमालश् चित्रं न कस्य तनुते ललितस्तमालः

॥ ६६३७॥

ENMSS@6637A@1उत्फुल्लप कजवनं ददर्श विमलं सरः ।

ENMSS@6637A@2स्फाटिकं वनदेवीनाम् इव विभ्रमदर्पणम् ॥

ENMSS@6638@1उत्फुल्लपद्मवदनां दलत्कुवलयेक्षणाम् ।

ENMSS@6638@2बन्धूककमनीयौष्ठां मन्दारस्तबकस्तनीम् ॥ ६६३८॥

ENMSS@6639@1शिरीषसुकुमारा गीं पञ्चपुष्पमयीमिव ।

ENMSS@6639@2एकमेव जगज्जैत्रीं स्मरेण विहितामिषुम् ॥ ६६३९॥

ENMSS@6640@1उत्फुल्लमानसरसीरुहचारुमध्य- निर्यन्मधुव्रतभरद्युतिहारिणीभिः ।

ENMSS@6640@2राधाविलोचनकटाक्षपरम्पराभिर् दृष्टो हरिस्तव सुखानि तनोतु कामम्

॥ ६६४०॥

ENMSS@6641@1उत्फुल्लरम्य सहकार रसालबन्धो कूजत्पिकावलिनिवास तथा विधेहि ।

ENMSS@6641@2गुञ्जद्भ्रमद्भ्रमरकस्त्वयि बद्धतृष्णो नान्यान् प्रयाति

पिचुमन्दकरीरवृक्षान् ॥ ६६४१॥

ENMSS@6642@1उत्फुल्लस्थलनलिनीवनादमुष्माद् उद्धूतः सरसिजसंभवह् परागः ।

ENMSS@6642@2वात्याभिर्वियति विवर्तितः समन्ताद् आधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ६६४२॥

ENMSS@6643@1उत्फुल्ला नवमालिका मदयति घ्राणेन्द्रियाह्लादिनी जातं धूसरमेव किंशुकतरोराश्यामलं जालकम् ।

ENMSS@6643@2आचिन्वन्ति कदम्बकानि मधुनः पाण्डूनि मत्तालयः स्त्रीणां पीनघनस्तनेषु कणवान् स्वेदः करोत्यास्पदम् ॥ ६६४३॥

ENMSS@6644@1उत्फुल्लामलकोमलोत्पलदलश्यामाय रामामनः- कामाय प्रथमाननिर्मलगुणग्रामाय रामात्मने ।

ENMSS@6644@2योगारूढमुनीन्द्रमानससरोहंसाय संसारवि- ध्वंसाय स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ॥ ६६४४॥

ENMSS@6645@1उत्फुल्लार्जुनसर्जवासितवहत्पौरस्त्यझंझामरुत् प्रे खोलस्खलितेन्द्रनीलशकलस्निग्धाम्बुदश्रेणयः ।

ENMSS@6645@2धारासिक्तवसुंधरासुरभयः प्राप्तास्त एवाधुना घर्माम्भोविगमागमव्यतिकरश्रीवाहिनो वासराः ॥ ६६४५॥

ENMSS@6646@1उत्फुल्लैर्बकुलैर्लव गमुकुलैः शेफालिकाकुड्मलैर् नीलाम्भोजकुलैस्तथा विचिकिलैः क्रान्तं च कान्तं च यत् ।

ENMSS@6646@2तस्मिन् सौरभधाम्नि दाम्नि किमिदं सौगन्धवन्ध्यं मुधा मध्ये मुग्ध कुसुम्भमुम्भसि भवेन् नैवैष युक्तः क्रमः ॥ ६६४६॥

ENMSS@6647@1उत्स गे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्रा कं विरचितपदं

गेयमुद्गातुकामा ।

ENMSS@6647@2तन्त्रीरार्द्रा नयनसलिलैः सारयित्वा कथंचिद् भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥ ६६४७॥

ENMSS@6648@1उत्स गैः सैकतानां शकुनिशतपदन्यासरेखा कितानां जम्बूषण्डानि नद्यो दधति परिणमल्लम्बिलम्बालकानि ।

ENMSS@6648@2यत्तोयान्दोलदोलः पुलकयति तनुं तीरकस्तूरिकैण- प्रक्रान्तग्रन्थिपर्णग्रसनपरिमलोत्कन्धरो गन्धवाहः ॥ ६६४८॥

ENMSS@6649@1उत्सन्नच्छदिरुच्छ्वसद्वृति गलद्भित्ति स्खलन्मण्डलि भ्राम्यत्कुण्डलि हिण्डदाखु खुरलिप्रक्रीडिभेकावलि ।

ENMSS@6649@2पञ्चच्चर्मचटौघपक्षतिपुटप्रारब्धभांभांकृति श्रीमत्सेनकुलावतंस भवतः शत्रोरिवास्मद्गृहम् ॥ ६६४९॥

ENMSS@6650@1उत्सन्नमापणममुं द्रक्ष्यामो निर्मलैः कदा नयनैः ।

ENMSS@6650@2चिन्तामणिकाचकणौ विपरीतगुणागुणौ यत्र ॥ ६६५०॥

ENMSS@6651@1उत्सन्नो मधुरस्ति कोकिलरवैरुत्सन्नमस्त्येतदप्य् उत्सन्नं मलयानिलैरिदमपि प्रागेव जानीमहे ।

ENMSS@6651@2पान्थास्तुष्यथ तावतैव किमिति भ्रान्ता यदि प्राणिति स्तोकेनापि मनोभवो
विगलतु प्राणेषु शुष्को ग्रहः ॥ ६६५१॥

ENMSS@6652@1उत्सर गकलितोरुकटारी- भाजिरा उत भयंकरभालाः ।

ENMSS@6652@2सन्तु पायकगणा जय तैस्त्वं गामगोहरमिलाप इलावी ॥ ६६५२॥

ENMSS@6653@1उत्सर्पद्धूमलेखात्विषि तमसि मनाग्विस्फुलि गायमानैर् उद्भेदैस्तारकाणां वियति परिगते पश्चिमाशामुपेता ।

ENMSS@6653@2खेदेनेवानतासु स्खलदलिरसनास्वब्जिनीप्रेयसीषु प्रायः संध्यातपाग्निं विशति दिनपतौ दह्यते वासरश्रीः ॥ ६६५३॥

ENMSS@6654@1उत्सवादपि नीचानां कलहोऽपि सुखायते ।

ENMSS@6654@2कपर्दकार्धलाभेन कुशलो बहु मन्यते ॥ ६६५४॥

ENMSS@6655@1उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात् सुखम् ।

ENMSS@6655@2श्रद्दधानाश्च दान्ताश्च धनाढ्याः शुभकारिणः ॥ ६६५५॥

ENMSS@6656@1उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे ।

ENMSS@6656@2राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ६६५६॥

ENMSS@6657@1उत्सारणप्रियतया परिरुद्धसर्व- द्वारे गृहे निरनुरोधतया वसन्तः ।

ENMSS@6657@2संपल्लघूकृतधियोऽप्रतिघप्रवृत्तेर् धिग्जानते न रभसान्नियतेर्निपातम्
॥ ६६५७॥

ENMSS@6658@1उत्सारितो हसितदीधितिभिः कपोलाद् एकावलीभिरवधूत इव स्तनेभ्यः ।

ENMSS@6658@2अ गेष्वलब्धपरिभोगसुखोऽन्धकारो गृह्णाति केशरचनासु रुषेव
नारीः ॥ ६६५८॥

ENMSS@6659@1उत्सार्य कुन्तलमपास्य दुकूलकूलम् उन्नाम्य बाहुलतिकामलसास्तरुण्यः
।

ENMSS@6659@2स्वेदाम्बुसिक्ततनवः स्पृहयन्ति यस्मै तस्मै नमः सुकृतिने मलयानिलाय
॥ ६६५९॥

ENMSS@6660@1उत्साहः स्याद्रसे हास्ये ताले कन्दुकसंज्ञके ।

ENMSS@6660@2वंशाभिवृद्धिकृत्पादस्त्रयोदशमिताक्षरः ।

ENMSS@6660@3लघुद्वयं विरामान्तं ताले कन्दुकसंज्ञके ॥ ६६६०॥

ENMSS@6661@1उत्साहकारकसखीवचनैर्विधाय भूषाविधिं कनकगौरतरा गकेषु ।
ENMSS@6661@2प्राणेश्वरस्य सदनाय कृतप्रयाणा मुग्धा तथापि हृदि कम्पभरं बिभर्ति ॥ ६६६१॥
ENMSS@6662@1उत्साहप्रभुशक्तिभ्यां मन्त्रशक्त्या च भारत ।
ENMSS@6662@2उपपन्नो नृपो यायाद् विपरीतमतोऽन्यथा ॥ ६६६२॥
ENMSS@6663@1उत्साहवन्तः पुरुषा दुर्बला बलिनं रिपुम् ।
ENMSS@6663@2हनिष्यन्ति हि संयाता तथैते पञ्च कुञ्जरम् ॥ ६६६३॥
ENMSS@6664@1उत्साहवन्तो हि नरा न लोके
ENMSS@6664@2सीदन्ति कर्मस्वतिदुष्करेषु ॥ ६६६४॥
ENMSS@6664@2॥। ॥।
ENMSS@6665@1उत्साहशक्तियुतविक्रमधैर्यराशिर्यो वेत्ति गोष्पदमिवाल्पतरं समुद्रम् ।
ENMSS@6665@2वल्मीकश्रृ गसदृशं च सदा नगेन्द्रं लक्ष्मीः स्वयं तमुपयाति न दीनसत्त्वम् ॥ ६६६५॥
ENMSS@6666@1उत्साहशक्तिहीनत्वाद् वृद्धो दीर्घामयस्तथा ।
ENMSS@6666@2स्वैरेव परिभूयेते द्वावप्येतावसंशयम् ॥ ६६६६॥
ENMSS@6667@1उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
ENMSS@6667@2शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं वाञ्छति वासहेतोः ॥ ६६६७॥
ENMSS@6668@1उत्साहस्य प्रभोर्मन्त्रस्यैवं शक्तित्रयं जगुः ।
ENMSS@6668@2आत्मनः सुहृदश्चैव तन्मित्रस्योदयास्त्रयः ॥ ६६६८॥
ENMSS@6669@1उत्साहातिशयं वत्स तव बाल्यं च पश्यतः ।
ENMSS@6669@2मम हर्षविषादाभ्याम् आक्रान्तं युगपन्मनः ॥ ६६६९॥
ENMSS@6670@1उत्साहिता सकलशीधुमदेन वक्तुम् अर्धोदिते नववधूरवलम्बितह्रीः ।
ENMSS@6670@2आलीजनेष्वनुपसंहृतवाक्यशेषा भर्तुश्चकार सविशेषकुतूहलत्वम् ॥ ६६७०॥
ENMSS@6671@1उत्साहोञ्झितमनसां राज्ञां परिमोषिणां जिगीषूणाम् ।
ENMSS@6671@2निरुपायोद्विग्नानां साधुश्वरके सदा शकुनः ॥ ६६७१॥
ENMSS@6672@1उत्साहोद्धतविभ्रमभ्रमरकव्यावृत्तहारान्तर-
त्रुट्यत्सूत्रविमुक्तमौक्तिकभरः सक्तः स्तनोत्स गयोः ।
ENMSS@6672@2वक्रेन्दुच्युतसंततामृतकणाकारश्चकार क्षणं तस्या

नृत्तरसश्रमोदितघनस्वेदाम्बुबिम्बश्रियम् ॥ ६६७२॥

ENMSS@6673@1उत्साहो बलवानार्य नास्त्युत्साहात् परं बलम् ।

ENMSS@6673@2उत्साहारम्भमात्रेण जायन्ते सर्वसंपदः ॥ ६६७३॥

ENMSS@6674@1उत्साहो बलवानार्य नास्त्युत्साहात् परं बलम् ।

ENMSS@6674@2सोत्साहस्य हि लोकेषु न किंचिदपि दुर्लभम् ॥ ६६७४॥

ENMSS@6675@1उत्साहो रिपुवन् मित्रम् आलस्यं मित्रवद् रिपुः ।

ENMSS@6675@2अमृतं विषवद् विद्याऽमृतवद् विषम गना ॥ ६६७५॥

ENMSS@6676@1उत्सिक्तः कुसुमासवैः कुमुदिनीं राजप्रियां पुष्पिणीम्  आलि गन् निशि निर्भयं

परिचयं कुर्वन् पुनः पल्लवैः ।

ENMSS@6676@2यावत् प कज्सौरभस्वमखिलं गृह्णंल्लघु प्रस्थितस् तावत् कल्य

उपस्थिते मरुदयं विष्वग् भयाद् धावति ॥ ६६७६॥

ENMSS@6677@1उत्सिक्तस्य तपःपराक्रमनिधेरस्यागमादेकतः  सत्स गप्रियता च

वीररभसोन्मादश्च मां कर्षतः ।

ENMSS@6677@2वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलयन्न्  आनन्दी

हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥ ६६७७॥

ENMSS@6678@1उत्सीदेरन् प्रजाः सर्वा न कुर्युः कर्म चेद् यदि ।

ENMSS@6678@2तथा ह्येता न वर्धेरन् कर्म चेद् अफलं भवेद् ॥ ६६७८॥

ENMSS@6679@1उत्सृज्य कुसुमशयनं  नलिनीदलकल्पितस्तनावरणम् ।

ENMSS@6679@2कथमातपे गमिष्यसि  परिबाधापेलवैर गैः ॥ ६६७९॥

ENMSS@6680@1उत्सृज्य गीतमसमाप्य विलासलास्यम्  अ कादपास्य सहसा मणिवल्लकीं च ।

ENMSS@6680@2अत्युन्मनास्तदवलोकनकौतुकेन  वातायनान्यधिरुरोह पुरन्ध्रिलोकः ॥ ६६८०॥

ENMSS@6680A@1उत्सृज्य जलसर्वस्वं विमलाः सितमूर्तयः ।

ENMSS@6680A@2तत्यजुश्चाम्बरं मेघा विग्रहं योगिनो यथा ॥

ENMSS@6681@1उत्सृज्य विनिवर्तन्ते ज्ञातयः सुहृदः सुताः ।

ENMSS@6681@2अपुष्पानफलान् वृक्षान् यथा तात पतत्रिणः ॥ ६६८१॥

ENMSS@6682@1उत्सृज्य साधुवृत्तं  कुटिलधिया वञ्चितः परो येन ।

ENMSS@6682@2आत्मैव मूढमतिना  कृतसुकृतो वञ्चितस्तेन ॥ ६६८२॥

ENMSS@6683@1उत्सृज्याम्बुधिजामुखाम्बुजसुखालोकव्रतं यश्चिराद्  देवः सेवितवान्

सरोजनयनो निद्रां समुद्राम्भसि ।

ENMSS@6683@2सोऽप्युत्तु गभुज गभोगशयनाज्ञागर्ति यस्योत्सवे सोऽयं

शारदशीतरोचिषि चमत्कारः कथं कथ्यताम् ॥ ६६८३॥

ENMSS@6684@1उत्सृष्टमम्बुजदृशामिव मानरत्नम् आदाय षद्वदतिलान् मधुवारिपूरान् ।

ENMSS@6684@2पुंस्कोकिलस्य कलकूजितकैतवेन संकल्पवाक्यमयमातनुते रसालः ॥ ६६८४॥

ENMSS@6685@1उदकं चाग्निसंसृष्टकुम्भस गाद्यथैव हि ।

ENMSS@6685@2उद्वेगोद्वर्तनादौष्ण्यं भजते तद्वदेव हि ॥ ६६८५॥

ENMSS@6686@1अ गस गात् तथा जीवो भजते प्राकृतान् गुणान् ।

ENMSS@6686@2अह काराभिभूतः सन् भिन्नस्तेभ्योऽपि सोऽव्ययः ॥ ६६८६॥

ENMSS@6687@1उदकानलचौरेभ्यो मूषकेभ्यो विशेषतः ।

ENMSS@6687@2कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥ ६६८७॥

ENMSS@6688@1उदके सर्वबीजानि सर्वदेवा निजेश्वरे ।

ENMSS@6688@2कलत्रे सर्वसौख्यानि सर्वे धर्मा दयामयाः ॥ ६६८८॥

ENMSS@6689@1उदके सर्वबीजानि सर्वे देवा हुताशने ।

ENMSS@6689@2कलत्रे सर्वसौख्यानि सर्वदानानि ब्राह्मणे ॥ ६६८९॥

ENMSS@6690@1उदक्यापतितम्लेच्छचाण्डालाद्यभिभाषणे ।

ENMSS@6690@2मार्जारमूषकस्पर्शे विण्मूत्रोत्सर्गदर्शने ॥ ६६९०॥

ENMSS@6691@1उदग्रगोतावतगोत्रगौरवो महारजः पूतभटोत्कटच्छटः ।

ENMSS@6691@2स्वरूपसम्पत्तिपरास्तमन्मथः स लक्ष्मणो लक्षितलक्षणोज्ज्वलः ॥ ६६९१॥

ENMSS@6692@1उद मुखो वक्ति भषन्निशीथे द्विजोपपीडां मरणं गवां च ।

ENMSS@6692@2कुमारिकादूषणगर्भपात- वह्नीन् निशान्ते शिवदि मुखः स्यात् ॥ ६६९२॥

ENMSS@6693@1उदश्चत्कावेरीलहरिषु परिष्व गर गे लुठन्तः

कुहूकण्ठीकण्ठीरवरवलवत्रासितप्रोषितेभाः ।

ENMSS@6693@2अमी चैत्रे मैत्रावरुणि तरुणीकेलिक केल्लिमल्ली-

चलद्वल्लीहल्लीसकसुरभयश्चण्डि चञ्चन्ति वाताः ॥ ६६९३॥

ENMSS@6694@1उदश्चत्क्वणर्झुंकृतिक्वाणचश्चन्- मणीमेखलादामदृप्यन्नितम्बा ।

ENMSS@6694@2कृपापा गमा गल्यपट्टाभिषेकैर् जगन्म गलं ज्वालपा नः सहायः ॥ ६६९४॥

ENMSS@6695@1उदश्चद्धर्मांशुद्युतिपरिचयोन्निद्रबिसिनी- घनामोदाहूतभ्रमरभरझ

कारमधुराम् ।

ENMSS@6695@2अपश्यत्कासारश्रियममृतवर्तिप्रणयिनीं सुखं जीवत्यन्धूदरविवरवर्ति प्लवकुलम् ॥ ६६९५॥

ENMSS@6696@1उदञ्चद्वक्षोजद्वयतटभरक्षोभितकटि स्फुरद्दृग्भ्यां मन्दीकृतविलसदिन्दीवरयुगम् ।

ENMSS@6696@2समुद्यद्भ्रूभ गं प्रविहितधनुर्भ गमनिशं वयस्तत् पद्माक्ष्याः कथमिव मनो न व्यथयतु ॥ ६६९६॥

ENMSS@6697@1उदञ्चन्तां वाचो मधुरिमधुरीणाः खलु न मे न चाप्युज्जृम्भन्तां नवभणितयो भ गिसुभगाः ।

ENMSS@6697@2क्षणं स्तोत्रव्याजादपि यदि भवन्तं हृदि नये तदात्मा पावित्र्यं नियतमियतैवाश्नुति मम ॥ ६६९७॥

ENMSS@6698@1उदञ्चन्मञ्जीरध्वनिमिलितकाञ्चीकलरवं मिलिन्दालीगुञ्जारवसुभगशिञ्जानवलयम् ।

ENMSS@6698@2गलन्मुक्तादामस्तनविनिहितस्वेदकणिकं रतं धन्यं मन्ये चलदलकमिन्दीवरदृशः ॥ ६६९८॥

ENMSS@6699@1उदञ्चय दृगञ्चलं चलतु चञ्चरीकोच्चयः प्रपञ्चय वचःसुधा श्रवणपालिमालि गतु ।

ENMSS@6699@2भ्रुवं नटय नागरि त्यजतु मन्मथः कार्मुकं मुखं च कुरु संमुखं व्रजतु लाघवं चन्द्रमाः ॥ ६६९९॥

ENMSS@6700@1उदञ्चय दृगञ्चलं रचय म गलं सर्वतश् चिराय समुपागतः पुरत एष ते वल्लभः ।

ENMSS@6700@2इति प्रियगिरा श्रुतीपुलकदन्तुरे कुर्वती प्रकशयति नो दृशौ प्रियसखी मृषाश कया ॥ ६७००॥

ENMSS@6701@1उदधिरवधिरुर्व्यास्तं हनूमांस्ततार निरवधि गगनं चेत्त्वाण्डकोशे विलीनम् ।

ENMSS@6701@2इति परिमितिमन्तो भान्ति सर्वेऽपि भावाः स तु निरवधिरेकः सज्ञनानां
विवेकः ॥ ६७०१॥

ENMSS@6702@1उदधेरिव रत्नानि तेजांसीव विवस्वतः ।

ENMSS@6702@2स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ ६७०२॥

ENMSS@6703@1उदन्वच्छिन्ना भूः स च निधिरपां योजनशतं सदा पान्थः पूषा

गगनपरिमाणं कलयति ।

ENMSS@6703@2इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ६७०३॥

ENMSS@6704@1उदन्वानिव योऽक्षोभ्यो ज्ञायते संश्रितैः प्रभुः ।

ENMSS@6704@2का ह्रीस्ततोऽन्या सोऽन्यैर्यत् तेषामग्रेऽभिभूयते ॥ ६७०४॥

ENMSS@6705@1उदमज्जि कैटभजितः शयनाद् अपनिद्रपाण्डुरसरोजरुचा ।

ENMSS@6705@2प्रथमप्रबुद्धनदराजसुता- वदनेन्दुनेव तुहिनद्युतिना ॥ ६७०५॥

ENMSS@6706@1उदयं प्राप्य तीक्ष्णत्वाद् दुष्प्रेक्ष्यत्वमुपेयुषः ।

ENMSS@6706@2पादान्तिके वसुमतो न हि मानी निषीदति ॥ ६७०६॥

ENMSS@6707@1उदयं संहता एव संहता एव च क्षयम् ।

ENMSS@6707@2प्रयान्तः स्पृहणीयत्वं तन्त्रिणः कस्य नागमन् ॥ ६७०७॥

ENMSS@6708@1उदयगिरिगतायां प्राक्प्रभापाण्डुतायाम् अनुसरति निशीथे शृ गमस्ताचलस्य ।

ENMSS@6708@2जयति किमपि तेजः सांप्रतं व्योममध्ये सलिलमिव विभिन्नं जाह्नवं यामुनं च ॥ ६७०८॥

ENMSS@6709@1उदयगिरितटस्थः पद्मिनीर्बोधयित्वा मृदुतरकिरणाग्रैस्ताः स्वयं चोपभुज्य ।

ENMSS@6709@2मलिनमधुपस गात् तासु संजातकोपः कृतरुधिरविरोचिर्भानुरस्तं प्रयातः ॥ ६७०९॥

ENMSS@6710@1उदयगिरिशिरःस्थो निद्रया मूढमेतज् जगदगदमशेषं निर्मिमीतेऽनिशं यः ।

ENMSS@6710@2अमिततमितमिस्रोद्दामदारिद्र्यहारि- प्रसृमरकिरणौघः स्यान्मुदे वः स

देवः ॥ ६७१०॥

ENMSS@6711@1उदयगूढशशा कमरीचिभिस् तमसि दूरमितः प्रतिसारिते ।

ENMSS@6711@2अलकसंयमनादिव लोचने हरति मे हरिवाहनदि मुखम् ॥ ६७११॥

ENMSS@6712@1उदयतटान्तरितमियं प्राची सूचयति दि निशानाथम् ।

ENMSS@6712@2परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥ ६७१२॥

ENMSS@6713@1उदयति कलमन्द्रैः कण्ठतालैरलीनां कुमुदमुकुलकेषु व्यञ्जयन्न गहारान् ।

ENMSS@6713@2मदमुखरचकोरीतोयकर्मान्तिकोऽयं तुहिनरुचिरधामा दक्षिणं

लोकचक्षुः ॥ ६७१३॥

ENMSS@6714@1उदयति तडिच्चित्रं मित्रं रतेः कमलद्वयी कुसुमितनवस्तम्भे रम्भे विधाय तनोरधः ।

ENMSS@6714@2तडिति वलति व्योम व्योमाश्रयं च गिरिद्वयं गिरिपरिसरे कम्बुः कम्बौ

कलानिधिमण्डलम् ॥ ६७१४॥

ENMSS@6715@1उदयति तपनेऽपि चेत् तमिस्रं वद कुत एव दिनक्षपाविवेकः ।

ENMSS@6715@2भगवति यदि कर्म दुर्निवार्यं तव चरणस्मरणेन साध्यते किम् ॥ ६७१५॥

ENMSS@6716@1उदयति तरुणिमतरणी शैशवशशिनि प्रशान्तिमायाते ।

ENMSS@6716@2कुचचक्रवाकयुगलं तरुणितटिन्यां मिथो मिलति ॥ ६७१६॥

ENMSS@6717@1उदयति नवनीतपिण्डपाण्डुः कुमुदवनान्यवघट्टयन् कराग्रैः ।

ENMSS@6717@2उदयगिरितटस्फुटाट्टहासो रजनिवधूमुखदर्पणः शशा कः ॥ ६७१७॥

ENMSS@6718@1उदयति यदि भानुः पश्चिमे दिग्विभागे प्रचलति यदि मेरुः शीतताम्

याति वह्निः ।

ENMSS@6718@2विकसति यदि पद्मं पर्वताग्रे शिलायां न भवति पुनरुक्तं भाषितं

सज्ज्ञनानाम् ॥ ६७१८॥

ENMSS@6719@1उदयति विततोर्ध्वरश्मिरज्ज्ञा- वहिमरुचौ हिमधाम्नि याति चास्तम्

।

ENMSS@6719@2वहति गिरिरयं विलम्बिघण्टा- द्वयपरिवारितवारणेन्द्रलीलाम् ॥ ६७१९॥

ENMSS@6720@1उदयति हि शशा कः कामिनीगण्डपाण्डुर् ग्रहगणपरिवारो राजमार्गप्रदीपः

।

ENMSS@6720@2तिमिरनिकरमध्ये रश्मयो यस्य गौराः स्रुतजल इव प के क्षीरधाराः

पतन्ति ॥ ६७२०॥

ENMSS@6721@1उदयति हृदि यस्य नैव लज्ज्ञा न च करुणा न च कोऽपि भीतिलेशः

।

ENMSS@6721@2बकुलमुकुलकोशकोमलां मां पुनरपि तस्य करे न पातयेथाः ॥ ६७२१॥

ENMSS@6722@1उदयदुदयदीक्षणाय पत्युश् चपलदृशस्त्रपया निरुध्यमानम् ।

ENMSS@6722@2मन इव कृपणस्य दानकाले कति न ततान गतागतानि चक्षुः ॥ ६७२२॥

ENMSS@6723@1उदयन्तु नाम मेघा भवतु निशा वर्षमविरतं पततु ।

ENMSS@6723@2गणयामि नैव सर्वं  दयिताभिमुखेन हृदयेन ॥ ६७२३॥
ENMSS@6724@1उदयन्नेष सविता पद्मेष्वर्पयति श्रियम् ।
ENMSS@6724@2विभावयितुमृद्धीनां फलं सुहृदनुग्रहम् ॥ ६७२४॥
ENMSS@6725@1उदयप्रभसूरीन्द्रः प्रथितः प्रतिभोदयः ।
ENMSS@6725@2नानादिव्यप्रबन्धानां निर्मातायं विराजते ॥ ६७२५॥
ENMSS@6726@1उदयप्रभसूरीन्द्रे प्रकाशयति भूतलम् ।
ENMSS@6726@2अपरे विबुधाः सर्वे निष्प्रभा इव सर्वतः ॥ ६७२६॥
ENMSS@6727@1उदयमयते दि मालिन्यं निराकुरुतेतरां  नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
ENMSS@6727@2रचयतितरां स्वैराचारप्रवर्तनकर्तनं  बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥ ६७२७॥
ENMSS@6728@1उदयमुदितदीप्तिर्याति यः संगतौ मे  पतति न वरमिन्दुः सोऽपरामेष गत्वा ।
ENMSS@6728@2स्मितरुचिरिव सद्यः साभ्यसूयं प्रभेति  स्फुरति विशदमेषा पूर्वकाष्ठा गनायाः ॥ ६७२८॥
ENMSS@6729@1उदयशिखरिशृ गप्रा गणेष्वेष रि गन्  सकमलमुखहासं वीक्षितः पद्मिनीभिः ।
ENMSS@6729@2विततमृदुकराग्रः शब्दयन्त्या वयोभिः  परिपतति दिवोऽ के हेलया बालसूर्यः ॥ ६७२९॥
ENMSS@6730@1उदयसिंह धराधिपतौ त्वयि  स्फुरति किं रविणा विधुनापि वा ।
ENMSS@6730@2स्वमहसा हि विकाशयसे जगत्  स्वयशसा च सुशीतलयस्यपि ॥ ६७३०॥
ENMSS@6731@1उदयस्थः सहस्रांशुर्दृष्टेरायाति गम्यताम् ।
ENMSS@6731@2अतिरिक्तं कदा कं वा ल घयन्ति न योषितः ॥ ६७३१॥
ENMSS@6732@1उदयाद्रेरुड्डीनो  दिनं भ्रमित्वा पत गोऽयम् ।
ENMSS@6732@2अद्य प्रदोषसमये  वडवाज्वलने जुहोति देहं स्वम् ॥ ६७३२॥
ENMSS@6733@1उदयास्तौ मूलाख्यौ  उत्तरयाम्यौ ध्रुवनिवासनामानौ ।
ENMSS@6733@2नैर्ऋतवायव्यौ च  प्रयाणचरकाह्वयौ तेषाम् ॥ ६७३३॥
ENMSS@6734@1उदये सवितारक्तो रक्तश्चास्तमये तथा ।
ENMSS@6734@2संपत्तौ च विपत्तौ च महतामेकरूपता ॥ ६७३४॥
ENMSS@6735@1उदरं नतमध्यपृष्ठता-  स्फुटद गुष्ठपदेन मुष्टिना ।

ENMSS@6735@2चतुर गुलमध्यनिर्गत-  त्रिवलिभ्राजि कृतं दमस्वसुः ॥ ६७३५॥
ENMSS@6736@1उदरं परिमाति मुष्टिना  कुतुकी कोऽपि दमस्वसुः किमु ।
ENMSS@6736@2धृततच्चतुर गुलीव यद्  वलिभिर्भाति सहेमकाञ्चिभिः ॥ ६७३६॥
ENMSS@6737@1उदर एव धृतः किमुदन्वता  न विषमो वडवानलवद् विधुः ।
ENMSS@6737@2विषवदुज्झितमप्यमुना न स  स्मरहरः किममुं बुभुजे विभुः ॥ ६७३७॥
ENMSS@6738@1उदरदरीयं गहना  यद्गतमखिलं विलीयते क्वचन ।
ENMSS@6738@2एका तत्र च भुजगी  विलापयति कं न सा दुष्टा ॥ ६७३८॥
ENMSS@6739@1उदरद्वयभरणभयाद् अर्धा गाहितदारः ।
ENMSS@6739@2यदि नैवं तस्य सुतः कथमद्यापि कुमारः ॥ ६७३९॥
ENMSS@6740@1उदरम्भरिता लोके  तवैव नान्यस्य दुःशका दृष्टा ।
ENMSS@6740@2उत्सृष्टपुरीषमपि  स्वादूकुर्वन् वराह यद् भु क्षे ॥ ६७४०॥
ENMSS@6741@1उदरस्येदमणुत्वं  सहजगुरुत्वं यदि नेदं हृदयस्य ।
ENMSS@6741@2स्वार्थे कथमलसत्वं  कथमनुसत्वं हितकरणे मतिरस्य ॥ ६७४१॥
ENMSS@6742@1उदरार्थं न यत्किंचिन् निषेवेत कदाचन ।
ENMSS@6742@2न हंसो वर्णसाम्येऽपि बकवन् मत्स्यभुग् यतः ॥ ६७४२॥
ENMSS@6743@1उदर्कभूतिमिच्छद्भिः सद्भिः खलु न दृश्यते ।
ENMSS@6743@2चतुर्थीचन्द्रलेखेव परस्त्रीभालपट्टिका ॥ ६७४३॥
ENMSS@6744@1उदस्य धैर्यं दयितेन सादरं  प्रसादितायाः करवारिवारितम् ।
ENMSS@6744@2मुखं निमीलन्नयनं नतभ्रुवः  श्रियं सपत्नीवदनादिवाददे ॥ ६७४४॥
ENMSS@6745@1उदस्योच्चैः पुच्छं शिरसि निहितं जीर्णजटिले
यदृच्छाव्यापन्नद्विपपिशितलेशाः कवलिताः ।
ENMSS@6745@2गुहागर्भे शून्ये सुचिरमुषितं जम्बुक सखे  तदेतत् किम् कुर्मो यदसि
न गतः सिंहसमताम् ॥ ६७४५॥
ENMSS@6746@1उदायुधो यावदहं तावदन्यैः किमायुधैः ।
ENMSS@6746@2यद्वा न सिद्धमस्त्रेण मम तत् केन सेत्स्यति ॥ ६७४६॥
ENMSS@6747@1उदारचरितात् त्यागी याचितः कृपणोऽधिकः ।
ENMSS@6747@2एको धनं ततः प्राणान् अन्यः प्राणांस्ततो धनम् ॥ ६७४७॥
ENMSS@6748@1उदारस्य तृणं वित्तं शूरस्य मरणं त्र्गम् ।
ENMSS@6748@2विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत् ॥ ६७४८॥
ENMSS@6749@1उदारांस्त्वदृते नान्यान् प्रपश्याम्ययि पार्वति ।

ENMSS@6749@2श्रीरामभक्तिमाणिक्यम् अदेयमपि देहि मे ॥ ६७४९॥

ENMSS@6750@1उदारैर्मन्दारै रचितशिखरं चन्द्रशिखरं  समभ्यर्च्य प्रेम्णा

विपुलपुलकालंकृततनुः ।

ENMSS@6750@2कदा गन्धाबन्धप्रमदमुदितोद्दाममधुप-

स्फुरद्गुञ्जागर्भैर्विभुमभिभजेयं नुतिपदैः ॥ ६७५०॥

ENMSS@6751@1उदासीनालीनामपि वचसि लीनातनुलसत्  त्रपाधीना दीनालपनपदवीनायकधृता

।

ENMSS@6751@2कवीनामासीना हृदि कुमुदिनीनाथवदना  नवीना मीनाक्षी व्यथयति मुनीनामपि

मनः ॥ ६७५१॥

ENMSS@6752@1उदासीनो देवो मदनमथनः सज्जनकुले  कलिक्रीडासक्तः कृतपरिजनः

प्राकृतजनः ।

ENMSS@6752@2इयं म्लेच्छाक्रान्ता त्रिदशतटिनी चोभयतटे  कथं भ्रातः स्थाता

कथय सुकृतिन् कुत्र विभयः ॥ ६७५२॥

ENMSS@6753@1उदाहरणमाशीःषु प्रथमे ते मनस्विनाम् ।

ENMSS@6753@2शुष्केऽशनिरिवामर्षो यैररातिषु पात्यते ॥ ६७५३॥

ENMSS@6754@1उदितं प्रियां प्रति सहार्दमिति  श्रदधीयत प्रियतमेन वचः ।

ENMSS@6754@2विदिते गिते हि पुर एव जने  सपदीरिताः खलु लगन्ति गिरः ॥ ६७५४॥

ENMSS@6755@1उदितं मण्डलमिन्दो  रुदितं सद्यो वियोगिवर्गेण ।

ENMSS@6755@2मुदितं च सकलललना-  चूडामणिशासनेन मदनेन ॥ ६७५५॥

ENMSS@6756@1उदितः समयः श्रयतेऽस्तमयं  कृतकं सकलं लभते विलयम् ।

ENMSS@6756@2सकलानि फलानि पतन्ति तरोः  सकला जलधिं समुपैति नदी ॥ ६७५६॥

ENMSS@6757@1उदितमुदितो हन्ति ध्वान्तं सहस्रकरः करैर् निहतनिहितं भूयो भूयस्तमः

परिजृम्भते ।

ENMSS@6757@2विरमति तमो नेदं नायं निषीदति भानुमान्  न खलु विकसद्वैरा धीराः

कथंचिदुदासते ॥ ६७५७॥

ENMSS@6758@1उदितवति द्विजराजे  कस्य न हृदये मुदः पदं दधति ।

ENMSS@6758@2संकुचसि कमल यदयं  हर हर वामो विधिर्भवतः ॥ ६७५८॥

ENMSS@6759@1उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ  गतवति विलयं च प्राकृतेऽतिप्रपञ्चे ।

ENMSS@6759@2सपदि पदमुदीतं केवलः प्रत्ययो यस् तदियदिति च वक्तुं कः क्षमः पण्डितोऽपि ॥ ६७५९॥

ENMSS@6760@1उदिते दृष्टिसुखे त्वयि  शशिनीव भवन्ति चन्द्रकान्तानि ।

ENMSS@6760@2वदनान्यरिनारीणाम्  अविरलजलबिन्दुवर्षीणि ॥ ६७६०॥

ENMSS@6761@1उदितेऽपि तवावनीन्द्र तेजस् तपने स्फारगभस्तिभारभाजि ।

ENMSS@6761@2तव वैरिनृपायशस्तमांसि  स्फुरदुज्जृम्भितमाचरन्ति चित्रम् ॥ ६७६१॥

ENMSS@6762@1उदिते भास्करे लक्ष्यं पश्चिमायां निवेशयेत् ।

ENMSS@6762@2अपराह्णे च कर्तव्यं लक्ष्यं पूर्वदिगाश्रितम् ॥ ६७६२॥

ENMSS@6763@1उदितैरन्यपुष्टानाम् आरुतैर्मे हतं मनः ।

ENMSS@6763@2उदितैरपि ते दूति मारुतैरपि दक्षिणैः ॥ ६७६३॥

ENMSS@6764@1उदितोऽपि तुहिनगहने  गगनप्रान्ते न दीप्यते तपनः ।

ENMSS@6764@2कठिनघृतपूरपूर्णे  शरावशिरसि प्रदीप इव ॥ ६७६४॥

ENMSS@6765@1उदितोरुसादमतिवेपथुमत्  सुदृशोऽभिभर्तृ विधुरं त्रपया ।

ENMSS@6765@2वपुरादरातिशयशंसि पुनः  प्रतिपत्तिमूढमपि बाढमभूत् ॥ ६७६५॥

ENMSS@6766@1उदीच्यां सस्यनिष्पत्तिर्याम्यां निष्पत्तिनाशनम् ।

ENMSS@6766@2गृहान्निर्गच्छतां वमे शुभं क्षेत्रे च दक्षिणम् ॥ ६७६६॥

ENMSS@6767@1उदीरितोऽर्थः पशुनापि गृह्यते  हयाश्च नागाश्च वहन्ति चोदिताः ।

ENMSS@6767@2अनुक्तमप्यूहति पण्डितो जनः  परे गितज्ञान फला हि बुद्धयः ॥ ६७६७॥

ENMSS@6768@1उदीर्णमनसो योध वाहनानि च भारत ।

ENMSS@6768@2यस्यां भवन्ति सेनायां ध्रुवं तस्यां जयो भवेत् ॥ ६७६८॥

ENMSS@6769@1उदीर्यमाणेऽपि च सान्त्ववादे  मानापनोदो नहि राधिकायाः ।

ENMSS@6769@2मानोऽस्तु ते यद्यपराधिकः स्यां  स्वप्नेऽपि नैवास्म्यपराधिकोऽहम् ॥ ६७६९॥

ENMSS@6770@1उदुम्बरद्रुमानष्टौ रोपयेत् स्वयमेव यः ।

ENMSS@6770@2प्रेरयेद् रोपणायापि चन्द्रलोके स मोदते ॥ ६७७०॥

ENMSS@6771@1उदुम्बरफलानीव ब्रह्माण्डान्यत्ति यः सदा ।

ENMSS@6771@2सर्वगर्वापहः कालस्तस्य के मशका वयम् ॥ ६७७१॥

ENMSS@6772@1उदेति घनमण्डली नटति नीलकण्ठावली  तडिद् वलति सर्वतो वहति

केतकीमारुतः ।

ENMSS@6772@2तथापि यदि नागतः स सखि तत्र मन्येऽधुना दधाति मकरध्वजस्त्रुटितशिञ्जिनीकं धनुः ॥ ६७७२॥

ENMSS@6773@1उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः ।

ENMSS@6773@2निमित्तनैमित्तिकयोरयं क्रमस् तव प्रसादस्य पुरस्तु संपदः ॥ ६७७३॥

ENMSS@6774@1उदेति यस्यां न निशाकरो रिपुस् तिथिर्नु का पुण्यवतीभिराप्यते ।

ENMSS@6774@2इतीव दुष्ट्या परिदेविते मुहुः कुहूकुहूरित्यलमाह कोकिलः ॥ ६७७४॥

ENMSS@6775@1उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।

ENMSS@6775@2संपत्तौ च विपत्तौ च महतामेकरूपता ॥ ६७७५॥

ENMSS@6776@1उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।

ENMSS@6776@2जिगीषुरेको दिनकृद् आदित्येष्विव कल्पते ॥ ६७७६॥

ENMSS@6777@1उदेष्यत्पीयूषद्युतिरुचिकणार्द्राः शशिमणि- स्थलीनां पन्थानो घनचरणलाक्षालिपिभृतः ।

ENMSS@6777@2चकोरैरुड्डीनैर्झटिति कृतश काः प्रतिपदं पराञ्चः संचारानविनयवतीनां विवृणुते ॥ ६७७७॥

ENMSS@6778@1उद्गच्छत्यलिझ कृतिः स्मरधनुर्ज्यामञ्जुगुञ्जारवैर् निर्याता विषलिप्तभल्लिविषमाः कंकेल्लिफुल्लच्छटाः ।

ENMSS@6778@2रे संप्रत्यपवित्रमत्र पथिकाः सारम्भमुज्जृम्भते चूतो दूत इवान्तकस्य कलिकाजालस्फुरत्पल्लवः ॥ ६७७८॥

ENMSS@6779@1उद्गता मथनक्षोभात् फेनराजिः पयोदधेः ।

ENMSS@6779@2तारकावलिरित्यज्ञैरियं सखि निवेद्यते ॥ ६७७९॥

ENMSS@6780@1उद्गतेन्दुमविभिन्नतमिस्रां पश्यति स्म रजनीमवितृप्तः ।

ENMSS@6780@2व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः ॥ ६७८०॥

ENMSS@6781@1उद्गमनोपनिवेशन- शयनपरावृत्तिवलनचलनेषु ।

ENMSS@6781@2अनिशं स मोहयति मां हृल्लग्नः श्वास इव दयितः ॥ ६७८१॥

ENMSS@6782@1उद्गर्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः ।

ENMSS@6782@2उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा प्रायः प्रे खदसंख्व्यश खवलया वेलेयमागच्छति ॥ ६७८२॥

ENMSS@6783@1उद्गर्जन् कुटिलस्तटाश्रयतरुप्रोन्मूलनोड्डामरो मा गर्वीः सरितः प्रवाह

जलधिं प्रक्षोभयामीति भोः ।
ENMSS@6783@2स्वां सत्तां यदि वाञ्छसि भ्रम मरुष्वेवास्स्व तत्रैव वा  दूरे वाडववह्निरत्र तु महासत्त्वैर्विशन् पीयते ॥ ६७८३॥
ENMSS@6784@1उद्गर्भहूणतरुणीरमणोपमर्द-  भुग्नोन्नतिस्तननिवेशनिभं हिमांशोः ।
ENMSS@6784@2बिम्बं कठोरबिसकाण्डकडारगौरैर् विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति ॥ ६७८४॥
ENMSS@6785@1उद्गृह्य वीटीग्रथनं नतभ्रूर् आच्छाद्य वक्षःस्थलमञ्चलेन ।
ENMSS@6785@2उत्तारयन्ती निविडं निचोलं मनोभवस्यापि मनो मिनोति ॥ ६७८५॥
ENMSS@6786@1उद्ग्राहश्चान्यधातुः स्याद् ध्रुवकश्चान्यधातुकः ।
ENMSS@6786@2मेलापकोऽन्यधातुः स्याद् आभोगश्चान्यधातुकः ।
ENMSS@6786@3चतुर्धातुकमेतद्धि रूपकं कीर्त्यते बुधैः ॥ ६७८६॥
ENMSS@6787@1उद्ग्राहस्याद्यखण्डे च न्यासः स ध्रुवको मतः ।
ENMSS@6787@2एवं हि षड्वदः प्रोक्त उत्तमो ध्रुवको बुधैः ॥ ६७८७॥
ENMSS@6788@1उद्ग्राहो ध्रुपदश्च स्याद् आभोगस्तदनन्तरम् ।
ENMSS@6788@2नियमस्त्रिविधो ज्ञेयो मण्ठकस्य विचक्षणैः ॥ ६७८८॥
ENMSS@6789@1उद्ग्रीवं खलु वीक्षितं वपुरिदं लज्जालसं यत्तदा  गच्छन्त्याः सखिसंनिधौ किमपि यन्निर्वर्णकं भाषितम् ।
ENMSS@6789@2हे प्राणा विरहेण यात किमिदं नैर्घृण्यमालम्बितं  तत् स्मृत्वा यदि युक्तमासितुमहो यूयं प्रमाणं मम ॥ ६७८९॥
ENMSS@6790@1उद्ग्रीवस्तिमितेक्षनस्तत इतः पश्यन् निलीय स्थितं पादोद्धृष्टिपरस्परप्रतिभयभ्रान्तं चलत्पक्षतिः ।
ENMSS@6790@2द्राक्क्रोटीपुरकोटिकुण्ठितरयं प्राक्तिर्यगूर्ध्वीकृतं गर्भान्तःप्रणयीचकार शफरं कासारचारी बकः ॥ ६७९०॥
ENMSS@6791@1उद्ग्रीवा विवृतारुणास्यकुहरास्तृष्णाचलत्तालवः पक्षासंभववेपमानतनवः प्रोड्डीय किंचिद् भुवः ।
ENMSS@6791@2अन्योन्याक्रमिणः शरारिशिशवः प्रातर्नदीरोधसि  प्रालेयाम्बु पिबन्ति वीरणदलद्रोणीप्रणालस्रुतम् ॥ ६७९१॥
ENMSS@6792@1उद्घातयेद् दक्षिणमक्षि यक्षो  हस्तेन मृद्नात्यथ दक्षिणेन ।
ENMSS@6792@2यस्याभिषेके स भवेत् स्वशक्त्या  क्षितीशलक्षेक्षितपादपद्मः ॥ ६७९२॥
ENMSS@6793@1उद्घाटितनवद्वारे पञ्जरे विहगोऽनिलः ।

ENMSS@6793@2यत् तिष्ठति तदाश्चार्यं प्रयाणे विस्मयः कुतः ॥ ६७९३॥

ENMSS@6794@1उद्धाट्य चेद् दक्षिणमक्षि लीढे नाभिं स्वकीयामथवाधिरूढः ।

ENMSS@6794@2शेते गृहस्योपरि जागरूकस् तदाम्बुदोऽम्बु क्षिपति प्रभूतम् ॥ ६७९४॥

ENMSS@6795@1उद्धाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।

ENMSS@6795@2यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ ६७९५॥

ENMSS@6796@1उद्दण्डकोकनदकोमलकोशकान्तिः कान्ताकचग्रहणकण्टकितप्रकोष्ठः ।

ENMSS@6796@2मित्रद्विजातिरिपुवर्गविलासिनीनां संमानदानभयभोगकरः करस्ते ॥ ६७९६॥

ENMSS@6797@1उद्दण्डे भुजदण्डे तव कोदण्डे परिस्फुरति ।

ENMSS@6797@2अरिमण्डलरविमण्डल- रम्भाकुचमण्डलानि वेपन्ते ॥ ६७९७॥

ENMSS@6798@1उद्दामज्वलदंशुमालिकिरणव्यर्थातिरेकादिव च्छायाः संप्रति यान्ति पिण्डपदवीं मूलेषु भूमीरुहाम् ।

ENMSS@6798@2किं चैतद् दनुजाधिराजयुवतीवर्गावगाहोत्सरत्- क्षोभोड्डीनविहंगमण्डलकृतालीकातप् अत्रं सरः ॥ ६७९८॥

ENMSS@6799@1उद्दामदक्षिणमरुद्भरचालिताभिः शाखाभिराकुलतरं रुतवारणाय ।

ENMSS@6799@2मा मेति कोकिलकुलं वदतीव वृक्षः स्त्रैणं वियोगविधुरं कृपया विलोक्य ॥ ६७९९॥

ENMSS@6800@1उद्दामदन्तरुचिपल्लवितार्धचन्द्र- ज्योत्स्नानिपीततिमिरप्रसरोपरोधः ।

ENMSS@6800@2श्रेयांसि वो दिशतु ताण्डवितस्य शम्भोर् अम्भोधरावलिघनध्वनिरट्टहासः ॥ ६८००॥

ENMSS@6801@1उद्दामदानद्विपवृन्दबृंहितैर् नितान्तमुत्तु गतुरंगहेषितैः ।

ENMSS@6801@2चलद्घनस्यन्दननेमिनिःस्वनैर् अभून् निरुच्छ्वासमिवाकुलं जगत् ॥ ६८०१॥

ENMSS@6802@1उद्दामदिग्द्विरदचश्चलकर्णपूर- गण्डस्थलोच्चलदलिस्तबकाकृतीनि ।

ENMSS@6802@2मीलन्नभांसि मृगनाभिसमानभांसि दिक्कन्दरेषु विलसन्तितमां तमांसि ॥ ६८०२॥

ENMSS@6803@1उद्दामद्युमणिद्युतिव्यतिकरप्रक्रीडदर्कोपल- ज्वालाजालजटालजा गलतटीनिष्कूजकोयष्टयः ।

ENMSS@6803@2भौमोष्मप्लवमानसूरकिरणक्रूरप्रकाशा दृशोर् आयुःकर्म समापयन्ति धिगमूर्मध्येऽह्नि शून्या दिशः ॥ ६८०३॥

ENMSS@6804@1उद्दामद्रुमभ गभीमदशनो येनाभ्यघानि द्विपः सोऽयं वञ्चकचेष्टितैस्त्यजति किं पञ्चाननः काननम् ।

ENMSS@6804@2तत् प्रीतिर्न्न कृतिः समं न समरं क्षान्तिर्मनोग्लानये श्रेयानित्ययमस्य माननिधिनो यत् काननोपक्रमः ॥ ६८०४॥

ENMSS@6805@1उद्दामद्विरदावलूनबिसिनीसौरभ्यसंभावित- व्योमानः कलहंसकम्पितगरुत्पालीमरुन्मांसलाः ।

ENMSS@6805@2दूरोत्तानतर गल घनकलाज घालगर्वस्पृशः कर्पूरद्रवशीकरैरिव दिशो लिम्पन्ति पम्पानिलाः ॥ ६८०५॥

ENMSS@6806@1उद्दामभ्रमिवेगविस्तृतजटावल्लीप्रणालीपतत्- स्वर्ग गाजलदण्डिकावलयितं निर्माय तत् पञ्जरम् ।

ENMSS@6806@2संभ्राम्यद्भुजदण्डपक्षपटलद्वन्द्वेन हंसायितस् त्रैलोक्यव्ययनाटिकानयनटः स्वामी जगत् त्रायताम् ॥ ६८०६॥

ENMSS@6807@1उद्दामाम्बुदगर्हितान्धतमसप्रध्वस्तदि मण्डले काले यामिकजाग्रदुग्रसुभटव्याकीर्णकोलाहले ।

ENMSS@6807@2कर्णस्यासुहृदर्णवाम्बुवडवावह्नेर्यदन्तःपुराद् आयातासि तदम्बुजाक्षि कृतकं मन्ये भयं योषिताम् ॥ ६८०७॥

ENMSS@6808@1उद्दामाम्बुदवर्ध मानशिखिनीकेकातिरेकाकुले संप्राप्यं सलिलं स्थलेष्वपि सदा निस्तर्षवर्षागमे ।

ENMSS@6808@2भीष्मग्रीष्मभटे परस्परभयादालोच्यमानं मुहुर् दीनं मीनकुलं न पालयसि चेत् कासार का सारता ॥ ६८०८॥

ENMSS@6809@1उद्दामार्कमरीचिमूर्छितदृशां येनाध्वगानामयं वेलालम्बनजागरूकमनसामारम्भि कर्णज्वरः ।

ENMSS@6809@2क्लेशोच्छृ खलचेतसः प्रविशतो गण्डूषगर्भं मुनेर् लीनः कुत्र महार्णवस्य स पुनः कल्लोलकोलाहलः ॥ ६८०९॥

ENMSS@6810@1उद्दामार्कांशुदीप्यद्दिनमणिमणिभिर्भस्मितान्त् ए समन्ताद् वायुव्याधूयमानज्वलनकणगणाकीर्णधूल् इप्रकीर्णे ।

ENMSS@6810@2कान्तारेऽस्मिन् नृपार्ते पथि पथिक भवे क्वापि पाथोदसेना- सूच्यग्रे कूपषट्कं तदुपरि नगरी तत्र ग गाप्रवाहः ॥ ६८१०॥

ENMSS@6811@1उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणाद् आयासं

श्वसनोद्गमैरविरतैरातन्वतीमात्मनः ।

ENMSS@6811@2अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥ ६८११॥

ENMSS@6812@1उद्दिश्य निःसरन्तीं सखीमियं कपटकोपकुटिलभ्रूः ।

ENMSS@6812@2एवमवतंसमाक्षिपद् आहतदीपो यथा पतति ॥ ६८१२॥

ENMSS@6813@1उद्दिष्टं वस्तु रागादौ किंचिदाधिक्यचिन्तितम् ।

ENMSS@6813@2तद्धातुमातुनिष्पन्नं प्रत्यन्तरमितीरितम् ॥ ६८१३॥

ENMSS@6814@1उद्दीपितोऽपि कनकद्युतिमञ्जुलोऽपि स्नेहान्वितोऽपि सुदृशोऽपि सुवर्तितोऽपि ।

ENMSS@6814@2कान्ताकरान्तरकुचच्छविमण्डितोऽपि स्वाभाविकीं मलिनतां न जहाति दीपः ॥ ६८१४॥

ENMSS@6815@1उद्दीप्ताग्निरसौ मुनिर्विजयते यस्योदरे जीर्यतः पाथोधेरवशिष्टमम्बु कथमप्युद्गीर्णमन्यार्णवम् ।

ENMSS@6815@2किं चास्माज्ञठरानलादिव नवस्तत्कालवान्तिक्रमान् निर्यातः स पुनर्यमाय
पयसामन्तर्गतो वाडवः ॥ ६८१५॥

ENMSS@6816@1उद्देशोऽयं कनकसिकताकोमलैकान्तकान्ता- लीलावासीकृततरुतलः कामिभिर्नर्मदायाः ।

ENMSS@6816@2किंचैतस्मिन् सुरतसचिवास्तन्वि ते वान्ति वाता येषामग्रे सरति कलिताकण्ठकोपो मनोभूः ॥ ६८१६॥

ENMSS@6817@1उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी कुञ्जोत्कर्षा कुरितरमणीविभ्रमो नर्मदायाः ।

ENMSS@6817@2किं चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥ ६८१७॥

ENMSS@6818@1उद्धता अलमुद्धर्तुम् औद्धत्यं दुरितात्मनाम् ।

ENMSS@6818@2क्षाराणामेव सामर्थ्यं मलनाशाय वाससाम् ॥ ६८१८॥

ENMSS@6819@1उद्धतैरिव परस्परस गाद् ईरितान्युभयतः कुचकुम्भैः ।

ENMSS@6819@2योषितामतिमदेन जुघूर्णुर् विभ्रमातिशयपुंषि वपूंषि ॥ ६८१९॥

ENMSS@6820@1उद्धतैर्निभृतमेकमनेकैश् छेदवन् मृगदृशामविरामैः ।

ENMSS@6820@2श्रूयते स्म मणितं कलकाञ्ची- नूपुरध्वनिभिरक्षतमेव ॥ ६८२०॥

ENMSS@6821@1उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।

ENMSS@6821@2आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ६८२१॥
ENMSS@6822@1उद्धर्तुं किल शैलकेलिरभसस्रस्तानि पाथोनिधेर् अन्तर्भूषणमौक्तिकानि दिविजस्त्रीभिः समुत्कण्ठया ।
ENMSS@6822@2गाढं तत्र निमज्जितेन रविणा बद्धा दृढं रश्मिभिः प्रोत्क्षिप्तानि निपत्य तानि गगने तारापदेशं दधुः ॥ ६८२२॥
ENMSS@6823@1उद्धर्तुं धरणीं निशाकररवी क्षेप्तुं मरुन्मार्गतो वातं स्तम्भयितुं पयोनिधिजलं पातुं गिरिं चूर्णितुम् ।
ENMSS@6823@2शक्ता यत्र विशन्ति मृत्युवदने कान्यस्य तत्र स्थितिर् यस्मिन् याति गिरिर्बिले सह वनैः कात्र व्यवस्था ह्यणोः ॥ ६८२३॥
ENMSS@6824@1उद्धव माधवसविधे विनिवेद्यं सर्वथा भवता ।
ENMSS@6824@2अपि बहुमूल्यं भवनं यमुनाकुञ्जोपमं न स्यात् ॥ ६८२४॥
ENMSS@6825@1उद्धूतकामानलतापतप्ता विहाय दोषाधिकजां तु चिन्ताम् ।
ENMSS@6825@2वनादिरागावयवप्रभेदं नरेति मत्वा वनिता रमन्ते ॥ ६८२५॥
ENMSS@6825A@1उद्धूतपांसुपटलानुमितप्रबन्ध- धावत्खुराग्रचयचुम्बितभूमिभागाः ।
ENMSS@6825A@2निर्मथ्यमानजलधिध्वनिघोरघोषम् एते रथं गगनसीम्नि वहन्ति वाहाः ॥
ENMSS@6826@1उद्धूता धूमधारा विरहिजनमनोमाथिनो मन्मथाग्नेः कस्तूरीपत्रमाला तिमिरततिरहो दिक्पुरन्ध्रीमुखानाम् ।
ENMSS@6826@2निर्वाणा गारलेखा दिवसहुतभुजः संचरच्चञ्चरीक- श्रेणीयं भाति भास्वत्करलुलितनभःकन्दरेन्दीवरस्य ॥ ६८२६॥
ENMSS@6827@1उद्धूय धूलीर्धवला रसातलाद् वात्या लगन्ती गगने व्यवर्तत ।
ENMSS@6827@2फूत्कारयन्त्येव भुवोद्धृता भुजा निदाघतापाकुलया तपात्यये ॥ ६८२७॥
ENMSS@6828@1उद्धूयेत तनूलतेति नलिनीपत्रेण नो वीज्यते स्फोटः स्यादिति ना गकं
मलयजक्षोदाम्भसा सिच्यते ।
ENMSS@6828@2स्यादस्यातिभरात् पराभव इति प्रायो न वा पल्लवा- रोपो वक्षसि तत्
कथं कृशतनोराधिः समाधीयताम् ॥ ६८२८॥
ENMSS@6829@1उद्धूयेत नतभ्रूः पक्ष्मनिपातोद्भवैः पवनैः ।
ENMSS@6829@2इति निर्निमेषमस्या विरहवयस्या विलोकते वदनम् ॥ ६८२९॥
ENMSS@6830@1उद्धृतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।

ENMSS@6830@2ते वै यथोक्तवक्तारो न वध्याः पृथिवीभुजा ॥ ६८३०॥
ENMSS@6831@1उद्धृतेष्वपि शस्त्रेषु बन्धुवर्गवधेष्वपि ।
ENMSS@6831@2परुषाण्यपि जल्पन्तो वध्या दूता न भूभुजा ॥ ६८३१॥
ENMSS@6832@1उद्भ्रियमानेन्दुकरैर् उन्मज्जत्यन्धकारवारिनिधेः ।
ENMSS@6832@2क्वापि क्वापि विलग्न- च्छायाजम्बालधोरणी धरणी ॥ ६८३२॥
ENMSS@6833@1उद्बद्धेभ्यः सुदूरं घनरजनितमःपूरितेषु द्रुमेषु प्रोद्ग्रीवं पश्य पादद्वितयधृतभुवः श्रेणयः फेरवाणाम् ।
ENMSS@6833@2उल्कालोकैः स्फुरद्भिर्निजवदनगुहोत्सर्पिभिर्वीक्षितेभ्यश् च्योतत्सान्द्रं वसाम्भः क्वथितशववपुर्मण्डलेभ्यः पिबन्ति ॥ ६८३३॥
ENMSS@6834@1उद्बन्धनं दृढं गाढं सिंहोऽपि सहते यदि ।
ENMSS@6834@2कथं करटिनस्तर्हि नृपचिह्नानि बिभ्रति ॥ ६८३४॥
ENMSS@6835@1उद्भर्तृगामिनी पुरुष- भाषिणी कामचिह्नकृतवेशा ।
ENMSS@6835@2या नातिमांसयुक्ता सुराप्रिया सर्वतश्चपला ॥ ६८३५॥
ENMSS@6836@1उद्भाव्यमानो नलिनीपलाशैः समीरणस्तद्धृदयास्पदस्य ।
ENMSS@6836@2करोति दाहस्य निवारणं नु संधुक्षणं वा स्मरपावकस्य ॥ ६८३६॥
ENMSS@6837@1उद्भासिताखिलखलस्य विशृ खलस्य प्राग्जातविस्मृतनिजाधमकर्मवृत्तेः ।
ENMSS@6837@2दैवादवाप्तविभवस्य गुणद्विषोऽस्य नीचस्य गोचरगतैः सुखमास्यते कैः ॥ ६८३७॥
ENMSS@6838@1उद्भासितेऽन्धतमसव्रज एति नाशं सूने प्रयान्त्युभयतोऽतिमरन्दमुग्धाः ।
ENMSS@6838@2सिंहा निहत्य रुधिरं बहु भक्षितं यद् दीपा कुरे मधुकराः करिणं वमन्ति ॥ ६८३८॥
ENMSS@6839@1उद्भिदुरं स्तनवदनं लोचनमलिगर्वमोचनं सुदृशः ।
ENMSS@6839@2दृष्ट्वा विगतविचारं धातारं निन्दति स्थविरः ॥ ६८३९॥
ENMSS@6840@1उद्भिन्नं किमिदं मनोभवनृपक्रीडारविन्दद्वयं सूते तत् कथमेकतः किल लसद्रोमावलीनालतः ।
ENMSS@6840@2चक्रद्वन्द्वमिदं क्षमं तदपि न स्थातुं मुखेन्दोः पुरो लावण्याम्बुनिमग्नयौवनगजस्यावैमि कुम्भद्वयम् ॥ ६८४०॥
ENMSS@6841@1उद्भिन्नयौवनमनोहररूपशोभा- संभाविताभिनवभोगमनोभवानाम् ।
ENMSS@6841@2एणीदृशां त्वदुपदेशविवर्जितानां मातर्भवन्ति नहि नाम समीहितार्थाः

॥ ६८४१॥

ENMSS@6842@1उद्भिन्नसात्त्विकविकारपरिप्लवानि सद्यस्तिरस्कृतमनोभववेदनानि ।
ENMSS@6842@2तन्वि त्वद गपरिरम्भसुखामृतानि प्रादुर्भवन्तु पुनरागतजीवितानि
॥ ६८४२॥

ENMSS@6843@1उद्भिन्नस्तनकुड्मलद्वयमुरः किंचित् कपोलस्थलीं लिम्पत्येव मधूककान्तिरधरः संमुग्धलक्ष्मीमयः ।
ENMSS@6843@2प्रत्यासीदति यौवने मृगदृशः किं चान्यदाविर्भवल् लावण्यामृतप कलेपलडहच्छायं वपुर्वर्तते ॥ ६८४३॥

ENMSS@6844@1उद्भिन्नस्तबकावतंससुभगाः प्रे खन्मरुन्नर्तिताः पुष्पोद्गीर्णपरागपांशुललसत्पत्रप्रकाण्ड त्विषः ।
ENMSS@6844@2गम्भीरक्रमपञ्चमोन्मदपिकध्वानोच्छलद्गीतयः प्रत्युज्ञीवितमन्मथोत्सव इव क्रीडन्त्यमू भूरुहः ॥ ६८४४॥

ENMSS@6845@1उद्भिन्ना कलकण्ठकण्ठकुहरात् कर्णामृतस्यन्दिनी हृद्या यद्यपि मार्दवैकवसतिः सा काकलीहुंकृतिः ।
ENMSS@6845@2अन्यस्तन्वि तथापि ते त्रिणयनप्लुष्टस्य जीवार्पणः पञ्चेषोरुचितप्रपञ्चितरसः पाकाञ्चितः पञ्चमः ॥ ६८४५॥

ENMSS@6847@1उद्भेदं प्रतिपद्य पक्कबदरीभावं समेत्य क्रमात् पुंनागाकृतिमाप्य पूगपदवीमारुह्य बिल्वश्रियम् ।
ENMSS@6847@2लब्ध्वा तालफलोपमां च ललितामासाद्य भूयोऽधुना चञ्चत्काञ्चनकुम्भजृम्भणमिभावस्याः स्तनौ बिभ्रतः ॥ ६८४७॥

ENMSS@6848@1उद्भ्रान्तभेककुलकीर्णजले तडागे कोऽप्यस्ति नाम यदि नान्यगतिर्बकोटः ।
ENMSS@6848@2उत्फुल्लपद्मसुरभीणि सरांसि हित्वा न स्थातुमर्हति भवानिह राजहंस
॥ ६८४८॥

ENMSS@6849@1उद्यच्छता धुरमकापुरुषानुरूपां गन्तव्यमाजिनिधनेन पितुः पथा वा ।
ENMSS@6849@2आच्छिद्य वा स्वजननीजनलोचनेभ्यो नेयो मया रिपुवधूनयनानि बाष्पः
॥ ६८४९॥

ENMSS@6850@1उद्यज्ज्वालावलीभिर्वरमिह भुवनप्लोषके हव्यवाहे र गद्वीचौ प्रविष्टं जलनिधिपयसि ग्राहनक्राकुले वा ।
ENMSS@6850@2संग्रामे वारिरौद्रे विविधशरहतानेकयोधप्रधाने नो नारीसौख्यमध्ये

भवशतजनितानन्तदुःखप्रवीणे ॥ ६८५०॥

ENMSS@6851@1उद्यञ्छशी तरुणभास्करकान्तिचौरः स्पर्शेन शीतकरलालितया प्रदोषे ।

ENMSS@6851@2ज्ञातोऽर्धसुप्तनलिनीप्रियया सलज्जः पाण्डुत्वमाप रभसादिव मन्मथार्तः ॥ ६८५१॥

ENMSS@6852@1उद्यतं शस्त्रमालोक्य विषादं याति विह्वलः ।

ENMSS@6852@2जीवनं प्रति संत्रास्तो नास्ति मृत्युसमं भयम् ॥ ६८५२॥

ENMSS@6853@1उद्यतमेकहस्तचरणं द्वितीयकररेचितं सुविनतं वंशमृद गवाद्यमधुरं विचित्रकरणान्वितं बहु विधम् ।

ENMSS@6853@2मद्रकमेतदद्य सुभगैर्विदग्धगतिचेष्टितैः सुललितैर् नृत्यसि विभ्रमाकुलपदं विविक्तरसभावितं शशिमुखि ॥ ६८५३॥

ENMSS@6854@1उद्यतस्य परं हन्तुं स्तब्धस्य विवरैषिणः ।

ENMSS@6854@2पतनं जायतेऽवश्यम् कृच्छ्रेण पुनरुन्नतिः ॥ ६८५४॥

ENMSS@6855@1उद्यतस्य हि कामस्य प्रतिवादो न शस्यते ।

ENMSS@6855@2अपि निर्मुक्तस गस्य कामरक्तस्य किं पुनः ॥ ६८५५॥

ENMSS@6856@1उद्यतासिर्नृपो यत्र तत्रैव धनरक्षणम् ।

ENMSS@6856@2कण्टकाकुलशाख्यायां लग्नं गृह्णाति नो फलम् ॥ ६८५६॥

ENMSS@6857@1उद्यतेत यथाशक्ति न प्रसज्येत जातुचित् ।

ENMSS@6857@2साध्यानां सिद्ध्यसिद्धी यन् नियत्या नियते कृते ॥ ६८५७॥

ENMSS@6858@1उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।

ENMSS@6858@2सदैवावध्यभावेन यथार्थस्य हि वाचकः ॥ ६८५८॥

ENMSS@6859@1उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत् ।

ENMSS@6859@2रागापरागौ जानीयाद् दृष्टिवक्त्रविचेष्टितैः ॥ ६८५९॥

ENMSS@6860@1उद्यत्करकरवालः शकतिमिरध्वंसने महानिपुणः ।

ENMSS@6860@2कल्किहरिर्वः पायाद् अपायतः कलिनिशान्तोत्थः ॥ ६८६०॥

ENMSS@6861@1उद्यत्ताराधिनाथद्युतिहृतिपटवः सान्द्रसिन्दूरशोणाः श्रीमद्वेतण्डतुण्डप्रतिभटबटवः पद्मरागातिरागाः ।

ENMSS@6861@2दूरादानम्रकम्रच्छविरविकिरणश्रेणिकिर्मीरितान्ता गुञ्जापुञ्जानुरागद्विगुणितमहसः पान्तु कृष्णा घ्रिभासः ॥ ६८६१॥

ENMSS@6862@1उद्यत्तारुण्यवारुण्यतिशयितमदोच्छ्वासचारुण्यती व प्रोदञ्चत्पञ्चबाणप्रचुररुचिरदृक्कञ्चरीकप्रपञ्चे ।

ENMSS@6862@2मन्दश्रीश्चन्द्रमास्ते सति सुतनु मुखे प्रोच्छ्वसत्तन्द्रमास्ते हीनं

शोभाभिरम्भोरुहमपि रजनौ नैति रम्भोरु हासम् ॥ ६८६२॥

ENMSS@6863@1उद्यत्सौरभगर्भनिर्भरमिलद्बाला कुरश्रीमृतो माकन्दानवलोक्य यः

प्रतिदिशं सानन्दमुत्कूजितः ।

ENMSS@6863@2तानेवाद्य फलाशया परिरटल्लुण्ठाककाकावली- वाचालानुपलभ्य कोकिलयुवा

जातः स वाचंयमः ॥ ६८६३॥

ENMSS@6864@1उद्यद्गन्धप्रबन्धां परमसुखरसां कोकिलालापजल्पां

पुष्पस्रक्सौकुमार्यां कुसुमशरवधूं रूपतो निर्जयन्तीम् ।

ENMSS@6864@2सौख्यं सर्वेन्द्रियाणामभिमतमभितः कुर्वतीं मानसेष्टां

सत्सौभाग्याल्लभन्ते कृतसुकृतवशाः कामिनीं मर्त्यमुख्याः ॥ ६८६४॥

ENMSS@6865@1उद्यद्दुःसहवित्ततानवतया बद्धावधाने मनस्य् उन्मार्गभ्रमणेऽवशस्य

रभसाच्छ्वभ्रे परिभ्राम्यतः ।

ENMSS@6865@2अन्योऽपाहितकोशपृष्ठलुठनात् संदर्शिता गक्षतेर् जन्तोर्हन्त तनोति

दुर्गतिशमं रम्यानुलोम्यो विधिः ॥ ६८६५॥

ENMSS@6866@1उद्यद्बर्हिषि दर्दुरारवपुषि प्रक्षीणपान्थायुषि श्च्योतद्विप्रुषि

चन्द्ररु मुषि सखे हंसद्विषि प्रावृषि ।

ENMSS@6866@2मा मुञ्चोच्चकुचाग्रसन्ततपतद्बाष्पाकुलां बालिकां काले

कालकरालनीलजलदव्यालुप्तभास्वत्त्विषि ॥ ६८६६॥

ENMSS@6867@1उद्यद्बाला कुरश्रीर्दिशि दिशि दशनैरेभिराशागजानां रोहन्मूला

सुगौरैरुरगपतिफणैरत्र पातालकुक्षौ ।

ENMSS@6867@2अस्मिन्नाकाशदेशे विकसितकुसुमा राशिभिस्तारकाणां नाथ त्वत्कीर्तिवल्ली

फलति फलमिदं बिम्बमिन्दोः सुधार्द्रम् ॥ ६८६७॥

ENMSS@6868@1उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो भृ गालीविरुतैः

कलैरविशदव्याहारलीलाभृतः ।

ENMSS@6868@2घूर्णन्तो मलयानिलाहतिचलैः शाखासमूहैर्मुहुर् भ्रान्तिं प्राप्य मधुप्रस

गमधुना मत्ता इवामी द्रुमाः ॥ ६८६८॥

ENMSS@6869@1उद्यद्विलोचनहुताशतडिद्विकाश- व्यासंगिनी सुरधुनीपयसा सगर्भा

।

ENMSS@6869@2भ्राजत्कलानिधिबलाकविशोभमाना पायाज्जटाघनघटा वृषभध्वजस्य

॥ ६८६९॥

ENMSS@6870@1उद्यद्विवेकतपनप्रफुल्ले हृदयाम्बुज ।

ENMSS@6870@2विशते भगवद्भक्तिररविन्द इवेन्दिरा ॥ ६८७०॥

ENMSS@6871@1उद्यन्तु नाम सुबहूनि महामहांसि  चन्द्रोऽप्यलं भुवनमण्डलमण्डनाय ।

ENMSS@6871@2सूर्यादृते न तदुदेति न चास्तमेति  येनोदितेन दिनमस्तमितेन रात्रिः ॥ ६८७१॥

ENMSS@6872@1उद्यन्तु शतमादित्या उद्यन्तु शतमिन्दवः ।

ENMSS@6872@2न विना विदुषां वाक्यैर्नश्यत्याभ्यन्तरं तमः ॥ ६८७२॥

ENMSS@6873@1उद्यन्नादं धन्विभिर्निष्ठुराणि  स्थूलान्युच्चैर्मण्डलत्वं दधन्ति ।

ENMSS@6873@2आस्फाल्यन्ते कार्मुकाणि स्म कामं  हस्त्यारोहैः कुञ्जराणां शिरांसि ॥ ६८७३॥

ENMSS@6874@1उद्यन्नित्यं त्वरितस् तमोऽपगमयति करैः समाकृष्य ।

ENMSS@6874@2महितस्तदसि स्थाने  मित्र पुमांस्त्वं परे क्लीबाः ॥ ६८७४॥

ENMSS@6875@1उद्यन्नेव जगद्विसृत्वरघनध्वान्तौघमध्वंसयः

पादन्यासमशेषभूधरशिरः पीठीतटेषु न्यधाः ।

ENMSS@6875@2धिक्कृत्येन्दुमपि श्रियं व्यतनुथाः पद्मात्तपद्मोत्करे  जीवेद् वासरमेव वा त्वमिव यस्तज्जीवनं जीवनम् ॥ ६८७५॥

ENMSS@6876@1उद्यन्महानिलवशोत्थविचित्रवीचि-  विक्षिप्तनक्रमकरादिनितान्तभीतिम् ।

ENMSS@6876@2अम्भोधिमध्यमुपयाति विवृद्धवेलं  लोभाकुलो मरणदोषममन्यमानः ॥ ६८७६॥

ENMSS@6877@1उद्यन्महीपालमरीचिमाली-  शिलीमुखश्रेणिकरावलीभिः ।

ENMSS@6877@2उदारभूदारघनान्धकार-  संभारमुच्छिन्नतरं चकार ॥ ६८७७॥

ENMSS@6878@1उद्यमं कुरुते जन्तुर्दैवं सर्वत्र कारणम् ।

ENMSS@6878@2समुद्रमन्थनाल्लेभे हरिर्लक्ष्मीं हरो विषम् ॥ ६८७८॥

ENMSS@6879@1उद्यमं कुर्वतां पुंसां फलं भाग्यानुसारतः ।

ENMSS@6879@2समुद्रमन्थनाल्लेभे हरिर्लक्ष्मीं हरो विषम् ॥ ६८७९॥

ENMSS@6880@1उद्यमं कुर्वतां पुंसां फलं मार्जारकर्मवत् ।

ENMSS@6880@2जन्मप्रभृति गौर्नास्ति पयः पिबति नित्यशः ॥ ६८८०॥

ENMSS@6881@1उद्यमः कलहः कण्डूर्द्यूतमद्यपरस्त्रियः ।

ENMSS@6881@2निद्रा मैथुनमालस्यं सेवनात् तु विवर्धते ॥ ६८८१॥

ENMSS@6882@1उद्यमः साहसं धैर्यं बलं बुधिः पराक्रमः ।

ENMSS@6882@2षडेते यस्य तिष्ठन्ति तस्य देवोऽपि श कितः ॥ ६८८२॥

ENMSS@6883@1उद्यमस्य प्रसादेन दृश्यन्ते विविधाः कलाः ।

ENMSS@6883@2कातरा एव जल्पन्ति यद् भाव्यं तद् भविष्यति ॥ ६८८३॥

ENMSS@6884@1उद्यमाख्यानमपरं प्रकीर्णाख्यानकं तथा ।

ENMSS@6884@2समस्याख्यानमपरं प्रहेल्यादिप्रशंसनम् ॥ ६८८४॥

ENMSS@6885@1उद्यमी लभते सिद्धिम् अयोग्योऽपि सुनिश्चितम् ।

ENMSS@6885@2अनूरुर्गगनस्यान्तं प्रयात्येव दिने दिने ॥ ६८८५॥

ENMSS@6885A@1उद्यमी सिद्धिमाप्नोति सहाय्यविकलोऽपि चेत् ।

ENMSS@6885A@2एकचक्ररथोऽनूरुसूतोऽर्को व्योम गाहते ॥

ENMSS@6886@1उद्यमेन विना राजन् न सिध्यन्ति मनोरथाः ।

ENMSS@6886@2कातरा इति जल्पन्ति यद् भाव्यं तद् भविष्यति ॥ ६८८६॥

ENMSS@6887@1उद्यमेन विना राजन् न सिध्यन्ति मनोरथाः ।

ENMSS@6887@2नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ६८८७॥

ENMSS@6888@1उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।

ENMSS@6888@2नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ६८८८॥

ENMSS@6889@1उद्यमे नास्ति दारिद्र्यं जप्यतो नास्ति पातकम् ।

ENMSS@6889@2मौनेन कलहो नास्ति नास्ति जागरतो भयम् ॥ ६८८९॥

ENMSS@6890@1उद्यमेनैव कार्याणि सिध्यन्ति न मनोरथैः ।

ENMSS@6890@2नहि सुप्तस्य सिंहस्य विशन्ति वदने मृगाः ॥ ६८९०॥

ENMSS@6891@1उद्ययौ दीर्घिकागर्भान् मुकुलं मेचकोत्पलम् ।

ENMSS@6891@2नारीलोचनचातुर्यश कासंकुचितं यथा ॥ ६८९१॥

ENMSS@6892@1उद्यल्लावण्यलक्ष्मीवलयितवपुषां स्वर्गवारा गनानाम् आश्लेषे यः प्रमोदः

स्फुरति च गरिमा योऽमृते माधुरीणाम् ।

ENMSS@6892@2सौरभ्यं कु कुमे यत् पयसि विमलता याप्यहो तत्समस्तं

मित्रैकत्रेक्षितुं चेदभिलषसि तदा पश्य कृष्णस्य काव्यम् ॥ ६८९२॥

ENMSS@6893@1उद्यात्येव सुहृत्कुलं प्रतिबलं यात्येव नीचैस्तराम् आयान्त्येव यशःश्रियः

प्रतिदिशं यान्त्येव सत्कीर्तयः ।

ENMSS@6893@2येनैकेन मुखाग्रपाटिततनूभूतार्द्रकोटिश्रिया सर्वाश्चर्यमयः स एव

जयति त्वत्खड्गधारापथः ॥ ६८९३॥

ENMSS@6894@1उद्यानं कौमुदी गीतं कान्ता केलिः सुहृत् कथा ।

ENMSS@6894@2कृतिनां सुकृतक्रीतः स्वर्गभोगो भुवि स्थितः ॥ ६८९४॥

ENMSS@6895@1उद्यानं वनभूमयः कुसुमितैरुद्गन्धयः पादपैः शैला निर्झरहासिनो जलधरश्यामा गिरिः कृत्रिमः ।

ENMSS@6895@2नद्यः सारसमूर्च्छितोर्मिवलया घर्माभिषेकास्पदं शीताः शीकरसंगमात्सुरभयो मित्रं सरोजानिलाः ॥ ६८९५॥

ENMSS@6896@1उद्यानपाल कलशाम्बुनिषेचनानाम् एतस्य चम्पकतरोरयमेव कालः ।

ENMSS@6896@2तस्मिन् निदाघनिहते घनवारिणा वा संवर्धिते तव वृथोभयथोपयोगः ॥ ६८९६॥

ENMSS@6897@1उद्यानमारुतोद्धूताश्चूतचम्पकरेणवः ।

ENMSS@6897@2उदश्रयन्ति पान्थानाम् अस्पृशन्तोऽपि लोचने ॥ ६८९७॥

ENMSS@6898@1उद्यानसहकाराणाम् अनुद्भिन्ना न मञ्जरी ।

ENMSS@6898@2देयः पथिकनारीणां सतिलः सलिलाञ्जलिः ॥ ६८९८॥

ENMSS@6899@1उद्यानानि न सर्वदा परिभवत्रासादिवाध्यासते भूमौ नोपविशन्ति ये खलु
रजःसंपर्कतर्कादिव ।

ENMSS@6899@2तेषामप्यतिपूजनीयवपुषां नूनं पिकानामियं धिक् कष्टं परपुष्टतेति किमपि प्राचां फलं कर्मणाम् ॥ ६८९९॥

ENMSS@6900@1उद्यानेषु विचित्रभ्होजनविधिस्तीव्रातितीव्रं तपः कौपीनावरणं सुवस्त्रमभितं भिक्षाटनं मण्डनम् ।

ENMSS@6900@2आसन्नं मरणं च म गलसमं सत्यं समुत्पद्यते तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते ॥ ६९००॥

ENMSS@6901@1उद्याने सहकारकोरकरसप्रत्याशया कोकिलः स्थातुं वाञ्छति चित्तजन्मनृपतेर्मित्रं च मन्त्री यतः ।

ENMSS@6901@2किंतु ध्वा क्षविजृम्भितेषु च पिकप्रारब्धगानेषु च क्रेंकारेषु च पञ्चमध्वनिषु च श्रोता न वेत्त्यन्तरम् ॥ ६९०१॥

ENMSS@6903@1उद्योगः क्षयमेति हन्त सहसा जाड्यं समुज्जृम्भते मित्रस्यापि च दर्शनं भवति नो किं वान्यदाचक्ष्महे ।

ENMSS@6903@2यल्लोकस्पृहणीयतां गतमभूत् तज्जीवनं व्यर्थतां प्राप्तं येन दुनोति तन् मम मनो दुर्दैववद् दुर्दिनम् ॥ ६९०३॥

ENMSS@6904@1उद्योगः शत्रुवन् मित्रम् आलस्यं मित्रवद् विषम् ।

ENMSS@6904@2विषवच्चामृतं विद्या सुधावद् विषम गना ॥ ६९०४॥

ENMSS@6905@1उद्योगः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।

ENMSS@6905@2उत्साहः षड्विधो यस्य तस्य देवोऽपि श कते ॥ ६९०५॥
ENMSS@6906@1उद्योगमेधाधृतिसत्त्वसत्य-  त्यागानुरागस्थितिगौरवाणि ।
ENMSS@6906@2जितेन्द्रियत्वं प्रसहिष्णुता ह्रीः  प्रागल्भ्यमित्यात्मगुणप्रवेकः ॥ ६९०६॥
ENMSS@6907@1उद्योगादनिवृत्तस्य सुसहायस्य धीमतः ।
ENMSS@6907@2छायेवानुगता तस्य नित्यं श्रीः सहचारिणी ॥ ६९०७॥
ENMSS@6907A@1उद्योगानुसारी लक्ष्मीः कीर्तिस्त्यागानुसारिणी ।
ENMSS@6907A@2अभ्यासानुसारी विद्या बुद्धिः कर्मानुसारिणी ॥
ENMSS@6908@1उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर् दैवेन देयमिति कापुरुषा वदन्ति ।
ENMSS@6908@2दैवं निहत्य कुरु पौरुषमात्मशक्त्या  यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ६९०८॥
ENMSS@6909@1उद्योगिनः करालम्बं करोति कमलालया ।
ENMSS@6909@2अनुद्योगिकरालम्बं करोति कमलाग्रजा ॥ ६९०९॥
ENMSS@6910@1उद्योगेन कृते कार्ये सिद्धिर्यस्य न विद्यते ।
ENMSS@6910@2दैवं तस्य प्रमाणं हि कर्तव्यं पौरुषं सदा ॥ ६९१०॥
ENMSS@6911@1उद्योगेन विना नैव कार्यं किमपि सिध्यति ।
ENMSS@6911@2नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ६९११॥
ENMSS@6913@1उद्वर्तयन्त्या हृदये निपत्य  नृपस्य दृष्टिर्न्यवृतद् द्रुतैव ।
ENMSS@6913@2वियोगिवैरात् कुचयोर्नखा कैर् अर्धेन्दुलीलैर्गलहस्तितेव ॥ ६९१३॥
ENMSS@6914@1उद्वर्तितमपि बहुधा-  नुलिप्तमपि चन्दनागुरुरसाद्यैः ।
ENMSS@6914@2भजति तथापि शरीरं  दौर्गन्ध्यं तत्र को हेतुः ॥ ६९१४॥
ENMSS@6915@1उद्वासयितुं वेश्मनि  सरघाः कुर्वन्ति यन्मधुच्छत्रम् ।
ENMSS@6915@2दुर्गा करोति नीडं  कुर्युर्वल्मीकमुपदीकाः ॥ ६९१५॥
ENMSS@6916@1उद्वाहारोपितार्द्रक्षतनिजपदयोः संगतामिन्दुमौला-  वानम्रे यां सुधांशोर्व्यधित किल कलां तूर्णमेवान्नपूर्णाम् ।
ENMSS@6916@2सक्तानामक्षतानाममृतदृगनलोपाधितः पक्वभावान्  नानार्थैरन्नपूर्णा प्रणतजनततेः पूर्णतामातनोतु ॥ ६९१६॥
ENMSS@6917@1उद्विजन्ते यथा सर्पान् नरादनृतवादिनः ।
ENMSS@6917@2धर्मः सत्यं परो लोके मूलं स्वर्गस्य चोच्यते ॥ ६९१७॥
ENMSS@6918@1उद्वीक्ष्य प्रियकरकुङ्कलापविद्धैर् वक्षोजद्वयमभिषिक्तमन्यनार्याः ।
ENMSS@6918@2अम्भोभिर्मुहुरसिचद्वधूरमर्षाद्  आत्मीयं पृथुतरनेत्रयुग्ममुक्तैः

॥ ६९१८॥

ENMSS@6919@1उद्वृत्तदैत्यपृतनापतिकण्ठपीठ-

च्छेदोच्छलद्वहलशोणितशोणधारम् ।

ENMSS@6919@2चक्रं क्रियादभिमतानि हरेरुदार- दिग्दाहदारुणनभः श्रियमुद्वहद्

वः ॥ ६९१९॥

ENMSS@6920@1उद्वृत्तस्तनभार एष तरले नेत्रे चले भ्रूलते

रागाधिक्यतमोष्ठपल्लवदलं कुर्वन्तु नाम व्यथाम् ।

ENMSS@6920@2सौभाग्याक्षरप क्तिकेव लिखिता पुष्पायुधेन स्वयं मध्यस्था हि करोति

तापमधिकं रोमावली केन सा ॥ ६९२०॥

ENMSS@6921@1उद्वृत्तस्तनभारभ गुरमुरो नोत्कश्चुकं कारिता संयोगस्तु यथा

तथेति सकला नीवी न विस्रंसिता ।

ENMSS@6921@2भूयः संगम आवयोः क्व नु भवेदेवं च नोल्लापिता संभ्रान्तत्वरितेन

भीतसुरतेनैवं वयं वञ्चिताः ॥ ६९२१॥

ENMSS@6922@1उद्वेगं जनयन्ति संचितवृषव्याप्ताजिरोपान्तकाः प्रातः

शीर्णकुटीरपुञ्जतलताशिम्बीतुषारावि लाः ।

ENMSS@6922@2ग्रामा गोमयधूमसंततिपरिक्लिष्टारुणश्मश्रुभिर् वृद्धैः

कुड्यनिवातलीननिभृतैरभ्यर्थ्यमानातपाः ॥ ६९२२॥

ENMSS@6922A@1उद्वेगस्य निवारणाय दुरितच्छेदाय पुण्याप्तये पानाय श्रवणामृतस्य

धृतये कस्मैचिदार्तिच्छिदे ।

ENMSS@6922A@2उच्छ्वासं पुरुषोत्तमाच्युत हरे गोविन्द नारायण श्रीवत्सा क मुकुन्द

कृष्ण कमलाकान्तेति वाच्यं मुहुः ॥

ENMSS@6923@1उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् ।

ENMSS@6923@2त्रयाणामपि लोकानाम् ईश्वरोऽपि न तिष्ठति ॥ ६९२३॥

ENMSS@6924@1उद्वेजयति तीक्ष्णेन मृदुना परिभूयते ।

ENMSS@6924@2तस्माद् यथार्हतो दण्डं नयेत् पक्षमनाश्रितः ॥ ६९२४॥

ENMSS@6925@1उद्वेजयति तीक्ष्णेन मृदुना परिभूयते ।

ENMSS@6925@2दण्डेन नृपतिस्तस्माद् युक्तदण्डः प्रशस्यते ॥ ६९२५॥

ENMSS@6926@1उद्वेजयति दरिद्रं परमुद्राया झणत्कारः ।

ENMSS@6926@2गृहपतिरतिमिलितायाः क कणरावो यथा जारम् ॥ ६९२६॥

ENMSS@6927@1उद्वेजयति भूतानि दण्डपारुष्यवान् नृपः ।

ENMSS@6927@2भूतान्युद्वेज्यमानानि द्विषतां यान्ति संश्रयम् ॥ ६९२७॥

ENMSS@6928@1उद्वेजयति भूतानि यस्य राज्ञः कुशासनम् ।

ENMSS@6928@2सिंहासनवियुक्तस्य तस्य क्षिप्रं कुशासनम् ॥ ६९२८॥

ENMSS@6929@1उद्वेजयत्य गुलिपार्ष्णिभागान् मार्गे शिलीभूतहिमेऽपि यत्र ।

ENMSS@6929@2न दुर्वहश्रोणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥ ६९२९॥

ENMSS@6930@1उद्वेष्ट्य स्वयमेव लेखमुदितप्रस्वेदकम्पा गुलिस् तस्मिन्

सेकविलुप्तशेषशिथिलं दृष्ट्वा लिपिप्रक्रमम् ।

ENMSS@6930@2एतत् किन्नु हतास्मि संप्रति दशा तस्यैवमासीदयं बाष्पो हन्त करस्य

कम्पितमिदं हन्तेति सा रोदिति ॥ ६९३०॥

ENMSS@6931@1उद्वोढुं कनकविभूषणान्यशक्तः सध्रीचा वलयितपद्मनालसूत्रः ।

ENMSS@6931@2आरूढप्रतिवनिताकटाक्षभारः साधीयो गुरुरभवद् भुजस्तरुण्याः ॥ ६९३१॥

ENMSS@6932@1उन्नतं पदमवाप्य यो लघुर् हेलयैव स पतेदिति ब्रुवन् ।

ENMSS@6932@2शैलशेखरगतो दृषत्कणश् चारुमारुतधुतः पतत्यधः ॥ ६९३२॥

ENMSS@6933@1उन्नतं मानसं यस्य भाग्यं तस्य समुन्नतम् ।

ENMSS@6933@2नोन्नतं मानसं यस्य भाग्यं तस्यासमुन्नतम् ॥ ६९३३॥

ENMSS@6934@1उन्नतं सदनमुच्चकैर्हयो माक्षिकं दधि सशर्करं पयः ।

ENMSS@6934@2यामिनी शशिकला सुकोमला लभ्यते कथमनर्चिते शिवे ॥ ६९३४॥

ENMSS@6935@1उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः ।

ENMSS@6935@2पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम् ॥ ६९३५॥

ENMSS@6936@1उन्नतघनमध्यगतं निर्गुणमपि सुरधनुः शोभाम् ।

ENMSS@6936@2तेन महद्भिः साकं संवासः प्रार्थ्यते विज्ञैः ॥ ६९३६॥

ENMSS@6937@1उन्नतदक्षिणपक्षा भक्ष्यमुखी विहितपार्थिवनिनादा ।

ENMSS@6937@2तारा तरुमधिगच्छति तद्यच्छति वाञ्छितादधिकम् ॥ ६९३७॥

ENMSS@6938@1उन्नतानां सुवंशानां द्वैधं तावन्न जायते ।

ENMSS@6938@2यावत् कुठारधारेव योषिद् विशति नान्तरम् ॥ ६९३८॥

ENMSS@6939@1उन्नतावनतभाववत्तया चन्द्रिका सतिमिरा गिरेरियम् ।

ENMSS@6939@2भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तदन्तिनः ॥ ६९३९॥

ENMSS@6940@1उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः ।

ENMSS@6940@2नूनमात्मसदृशी प्रकल्पिता वेधसैव गुणदोषयोर्गतिः ॥ ६९४०॥

ENMSS@6941@1उन्नतोऽपि विशदोऽपि कोमलोऽप्य् अद्य जाड्यहरणक्षमोऽपि च ।

ENMSS@6941@2अन्तरुज्ज्वलगुणोऽपि निर्धनस् तूलराशिरिव याति लाघवम् ॥ ६९४१॥

ENMSS@6942@1उन्नत्यै नमति प्रभुं प्रभुगृहान् द्रष्टुं बहिस्तिष्ठति
स्वद्रव्यव्ययमातनोति जडधीरागामिवित्ताशया ।

ENMSS@6942@2प्राणान् प्राणितुमेव मुञ्चति रणे क्लिश्नाति भोगेच्छया सर्वं तद्
विपरीतमेव कुरुते तृष्णान्धदृक् सेवकः ॥ ६९४२॥

ENMSS@6943@1उन्नमय्य सकचग्रहमास्यं चुम्बति प्रियतमे हठवृत्त्या ।

ENMSS@6943@2हुं हु मुञ्च मम मेति च मन्दं जल्पितं जयति मानधनायाः ॥ ६९४३॥

ENMSS@6944@1उन्नमितैकभ्रूलतम् आननमस्याः पदानि रचयन्त्याः ।

ENMSS@6944@2कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥ ६९४४॥

ENMSS@6945@1उन्नम्य दूरं मुहुरानमन्त्यः कान्ताः श्लथीभूतनितम्बजाड्याः ।

ENMSS@6945@2दोलाविलासेन जितश्रमत्वात् प्रकर्षमापुः पुरुषायितेषु ॥ ६९४५॥

ENMSS@6946@1उन्नम्योन्नम्य तत्रैव दरिद्राणां मनोरथाः ।

ENMSS@6946@2पतन्ति हृदये व्यर्था विधवास्त्रीस्तना इव ॥ ६९४६॥

ENMSS@6947@1उन्नम्रस्वपयोधरान्तरपयोधाराभिरानन्दि सः चञ्चद्बालकलापकान्
कलगिरो मुग्धान् नवा घ्रिक्रमान् ।

ENMSS@6947@2त्वय्याधाय शिखण्डिनः शिव शिव प्रावृट् समाप्तिं गता तेषु त्वं
तु शरच्छरारुचलिता जातासि धौतासिवत् ॥ ६९४७॥

ENMSS@6948@1उन्नयति नाभिनिम्नान् मुक्तावलिपाशि रोमराजिनलम् ।

ENMSS@6948@2स्मरशबरः स्तनभूधर- निपतत्तरुनाक्षिपक्षिबन्धाय ॥ ६९४८॥

ENMSS@6949@1उन्निद्रकन्दलदलान्तरलीयमान- गुञ्जन्मदान्धमधुपे नवमेघकाले ।

ENMSS@6949@2स्वप्नेऽपि यः प्रवसति प्रविहाय कान्तां तस्मै विषाणरहिताय नमो
वृषाय ॥ ६९४९॥

ENMSS@6950@1उन्निद्रकोकनदरेणुपिश गिता गा गायन्ति मञ्जु मधुपा गृहदीर्घिकासु
।

ENMSS@6950@2एतच्चकास्ति च रवेर्नवबन्धुजीव- पुष्पच्छदाभमुदयाचलचुम्बि
बिम्बम् ॥ ६९५०॥

ENMSS@6951@1उन्निद्रता मत्स्यसगन्धिता च प्रवालहानिः सपिपीलिकात्वम् ।

ENMSS@6951@2त्वग्भ्रंशनाद् वारिकृतादजीर्णात् तरोर्भवेत् तत्र चिकित्सनीयम् ॥ ६९५१॥

ENMSS@6952@1उन्निद्रप्रियकमनोरमं रमण्याः संरेजे सरसि वपुः प्रकाशमेव ।

ENMSS@6952@2युक्तानां विमलतया तिरस्क्रियायै नाक्रामन्नपि हि भवत्यलं जलौघः

॥ ६९५२॥

ENMSS@6953@1उन्निद्रेण मयाद्य चिन्तितमभूद्यत्रावतारा हरेर् आख्याता दश कीर्तितोऽसि न कथं तत्र त्वमेकादशः ।

ENMSS@6953@2त्विच्चारित्रमगोचरं कविगिरां जानन्नपि क्ष्मापते न प्रस्तौमि भयेन भारतकवेः कस्तादृशं वक्ष्यति ॥ ६९५३॥

ENMSS@6954@1उन्नीतो भवभूतिना प्रतिदिनं बाणे गते यः पुरा यश्चीर्णः कमलायुधेन सुचिरं येनागमत् केशटः ।

ENMSS@6954@2यः श्रीवाक्पतिराजपादरजसां संपर्कपूतश्चिरं दिष्ट्या श्लाघ्यगुणस्य कस्यचिदसौ मार्गः समुन्मीलति ॥ ६९५४॥

ENMSS@6955@1उन्मग्नचश्चलवनानि वनापगानाम् आश्यानसैकततर गपरंपराणि ।

ENMSS@6955@2निम्नावशिष्टसलिलानि मनो हरन्ति रोधांसि हंसपदमुद्रितकर्दमानि ॥ ६९५५॥

ENMSS@6956@1उन्मज्ञन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः ।

ENMSS@6956@2गाण्डीवी कनकशिलानिभं भुजाभ्याम् आजघ्ने विषमविलोचनस्य वक्षः

॥ ६९५६॥

ENMSS@6957@1उन्मत्त कण्टकिफलप्रतियोगिबुद्ध्या वैरं वृथैव कुरुषे पनसेन सार्धम् ।

ENMSS@6957@2सन्तो हसन्ति न भजन्ति भजन्ति चेत् त्वां भ्रान्ता भवन्ति सहसा न

पुनर्भजन्ति ॥ ६९५७॥

ENMSS@6958@1उन्मत्त धूर्त तरुणेन्दुनिवासयोग्ये स्थाने पिशाचपतिना विनिवेशितोऽसि ।

ENMSS@6958@2किं कैरवाणि विकसन्ति तमः प्रयाति चन्द्रोपलो द्रवति वार्धिरुपैति वृद्धिम् ॥ ६९५८॥

ENMSS@6959@1उन्मत्तप्रेमसंरम्भाद् आरभन्ते यद गनाः ।

ENMSS@6959@2तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ ६९५९॥

ENMSS@6960@1उन्मत्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेते ।

ENMSS@6960@2पूर्वं परस्पर्धितया प्रसूनं नूनं द्वितीयो विरहाधिदूनम् ॥ ६९६०॥

ENMSS@6961@1उन्मत्तानां च या गाथाः शिशूनां यच्च भाषितम् ।

ENMSS@6961@2स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः ॥ ६९६१॥

ENMSS@6962@1उन्मत्तानां भुज गानां मद्यपानां च दन्तिनाम् ।

ENMSS@6962@2स्त्रीणां राजकुलानां च विश्वसन्ति गतायुषः ॥ ६९६२॥
ENMSS@6963@1उन्मत्तानां भुज गानां शृ गिणां शस्त्रपाणिनाम् ।
ENMSS@6963@2विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ ६९६३॥
ENMSS@6964@1उन्मदतया कयाचित् कदाचिदपथप्रवृत्तमपि पुरुषम् ।
ENMSS@6964@2सद्यः सुहृदुपदेशः सृणिरिव करिणं निवर्त्तयति ॥ ६९६४॥
ENMSS@6965@1उन्मादगद्गदगिरो मदविह्वलाक्षा भ्रश्यन्निजप्रकृतयः कृतमस्मरन्तः ।
ENMSS@6965@2ऐश्वर्यसीधुरसपानविघूर्णमानाः के नाम न प्रतिपदं पुरुषाः स्खलन्ति ॥ ६९६५॥
ENMSS@6966@1उन्मादमेके पुष्यन्ति यान्त्यन्ये द्विषतां वशम् ।
ENMSS@6966@2दास्यमेके च गच्छन्ति परेषामर्थहेतुना ॥ ६९६६॥
ENMSS@6967@1उन्मीलत्त्रिवलीतर गवलया प्रोत्तु गपीनस्तन-
द्वन्द्वेनोद्यतचक्रवाकमिथुना वक्त्राम्बुजोद्भासिनी ।
ENMSS@6967@2कान्ताकारधरा नदीयमभितः क्रूराशया नेष्यते संसारार्णवमज्जनं यदि ततो दूरेण संत्यज्यताम् ॥ ६९६७॥
ENMSS@6968@1उन्मीलत्पुलकं विलोलदलकं स्विद्यत्कपोलस्थलं
भ्राम्यत्कुण्डलमाकुलाकुललसत्सीत्कारमुद्यत्करम् ।
ENMSS@6968@2किंचित्कुञ्चदुदञ्चितभ्रु विलसच्चोलं गलन्नीविकं स्याद् भूयोऽपि कदा मदाकुलदृशोर्बिम्बाधरास्वादनम् ॥ ६९६८॥
ENMSS@6969@1उन्मीलत्पुलका कुरेण निविडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधरसुधापाने मुधा नर्मभिः ।
ENMSS@6969@2आनन्दाभिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूत् प्रत्यूहो न तयोर्बभूव सुरतारम्भः प्रियंभावुकः ॥ ६९६९॥
ENMSS@6970@1उन्मीलत्युरसा गुणालिनिचिता निर्दूषणा भूषणा सोल्लासोषसि लोलया सुमनसा
सूक्त्या मनोहारिणी ।
ENMSS@6970@2शय्यामेत्य मृदुं मदीयकवितेवाम्भोजिनीनायिका कस्याप्युन्नतपूर्वपुण्यतपसः कण्ठं समालि गति ॥ ६९७०॥
ENMSS@6971@1उन्मीलत्गुडपाकतन्तुलतया रज्ज्वा भ्रमीरर्जयन्
दानान्तःश्रुतशर्कराचलमथः स्वेनामृतान्धाः स्मरः ।
ENMSS@6971@2नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत् सा भवज् जिह्वायाः कृतिमाह्वयेत परमां मत्कर्णयोः पारणाम् ॥ ६९७१॥

ENMSS@6972@1उन्मीलद्यौवनासि प्रियसखि विषमाः श्रेणयो नागराणां तस्मात् कोऽपि

त्वयाद्यप्रभृति न सहसा संमुखं वीक्षणीयः ।

ENMSS@6972@2यावच्चन्द्रार्कमेकः पतिरतिशयितश्रद्धया सेवितव्यः कर्तव्या रूपरक्षा

वचसि न हृदयं देयमस्मद्विधानाम् ॥ ६९७२॥

ENMSS@6973@1उन्मीलद्रसबिन्दुगन्धकुसुमावल्ल्यो वसन्तोदये कान्ताः कोमलपल्लवाः कति

कति क्रीडावने सन्ति न ।

ENMSS@6973@2सौभाग्यैकनिधे रसाल तदपि श्रीमञ्जरीशालिनस् त्वत्तोऽन्यत्र च

कुत्रचिन् मधुकरश्रेणी न विश्राम्यति ॥ ६९७३॥

ENMSS@6974@1उन्मीलद्वदनेन्दुकान्तिविसरैर्दूरं समुत्सारितं भग्नं पीनकुचस्थलस्य

च रुचा हस्तप्रभाभिर्हतम् ।

ENMSS@6974@2एतस्याः कलविंककण्ठकदलीकल्पं मिलत्कौतुकाद् अप्राप्ताभिमुखं रुषेव

सहसा केशेषु लग्नं तमः ॥ ६९७४॥

ENMSS@6975@1उन्मीलन्ति कियन्ति वा न कुसुमान्युष्णद्युतेरुद्गमे तत्त्वेतावति

बन्धुरित्यतिसखीत्यादित्यकान्तेति च ।

ENMSS@6975@2कीर्तिं दत्तवतां त्रिलोकविदितामेवं कवीनामृणं किं कृत्वेयमपाकरोतु

जनुषां कोट्यापि नालीकिनी ॥ ६९७५॥

ENMSS@6976@1उन्मीलन्ति नखैर्लुनीहि वहति क्षौमाञ्चलेनावृणु क्रीडाकाननमाविशन्ति

वलयक्काणैः समुत्त्रासय ।

ENMSS@6976@2इत्थं वञ्जुलदक्षिणानिलकुहूकण्ठीषु संकेतिक- व्याहाराः सुभग

त्वदीयविरहे तस्याः सखीनां मिथः ॥ ६९७६॥

ENMSS@6977@1उन्मीलन्ति निशानिशाचरवधूत्प्रोच्चाटनामान्त्रिकाः सायं सालससुप्तप

कजवनप्रोद्बोधवैतालिकाः ।

ENMSS@6977@2फुल्लत्प कजकोशगर्भकुहरप्रोद्भूतभृ गावली- झ

कारप्रणवोपदेशगुरवस्तीव्रद्युतेरंशवः ॥ ६९७७॥

ENMSS@6978@1उन्मीलन्ति मृणालकोमलरुचो राजीवसंवर्तिका- संवर्तव्रतवृत्तयः

कतिपये पीयूषभानोः कराः ।

ENMSS@6978@2अप्युस्रैर्धवलीभवत्सु गिरिषु क्षुब्धोऽयमुन्मज्जता विश्वेनेव तमोमयो

निधिरपामह्नाय फेनायते ॥ ६९७८॥

ENMSS@6979@1उन्मीलन्नयनान्तकान्तिलहरीनिष्पीतयोः केवलाद् आमोदादवधारणीयवपुषोः

कान्तासखेन क्षणम् ।

ENMSS@6979@2यत्कर्णोत्पलयोः स्थितेन भवता किंचित् समुद्बुञ्जितं भ्रातस्तिष्ठति कुत्र तत् कथय मे कान्तं प्रियाया मुखम् ॥ ६९७९॥

ENMSS@6980@1उन्मीलन्मणिरश्मिजालजटिलच्छायं रणत्क कणं बिभ्राणस्तव देव वैरिकदनक्रीडाकठोरः करः ।

ENMSS@6980@2त्यक्त्वा संयति जीवितानि रिपवो ये स्वर्गमार्गे गतास् तानाक्रष्टुमिवाविवेश रभसाच्चण्डद्युतेर्मण्डलम् ॥ ६९८०॥

ENMSS@6981@1उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूता कुर-

क्रीडत्कोकिलकाकलीकलरवैरुद्गीर्णकर्णज्वराः ।

ENMSS@6981@2नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-

प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ ६९८१॥

ENMSS@6982@1उन्मीलन्मुकुलकरालकुन्दकोश- प्रश्च्योतद्घनमकरन्दगन्धबन्धो ।

ENMSS@6982@2तामीषत्प्रचलविलोचनां नता गीम् आलिन् गन् पवन मम स्पृशा गम

गम् ॥ ६९८२॥

ENMSS@6983@1उन्मीलयन्ति कुसुमानि मनोरमाणि के नाम नात्र तरवः समयोचितानि ।

ENMSS@6983@2कस्येदृशं कथय दोहदमस्ति तस्य याद्दक्किनिर्मितमशोकमहीरुहस्य ॥ ६९८३॥

ENMSS@6984@1उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-

क्रोडक्रीडद्विजालीगरुदुदितमरुत्स्फालवाचालवीचि ः ।

ENMSS@6984@2एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-

व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः ॥ ६९८४॥

ENMSS@6985@1उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।

ENMSS@6985@2बभूव तस्याश्चतुरश्रशोभि वपुर्विभक्तं नवयौवनेन ॥ ६९८५॥

ENMSS@6986@1उन्मील्याक्षि सखीर्न पश्यसि न चाप्युक्ता ददास्युत्तरं नो वेत्सीदृशमत्र नेदृशमिमां शून्यामवस्थां गता ।

ENMSS@6986@2तल्पादृश्यकर कपञ्जरमिदं जीवेन लिप्तं मना मुञ्चन्ती किमु कर्तुमिच्छसि कुरु प्रेमान्यदेशागते ॥ ६९८६॥

ENMSS@6987@1उन्मुकुलिताधरपुटे भूतिकणत्रासमीलितार्धाक्षि ।

ENMSS@6987@2धूमोऽपि नेह विरम भ्रमरोऽयं श्वसितमनुसरति ॥ ६९८७॥

ENMSS@6988@1उन्मुक्तकञ्चुकतयेयमुदारकान्तिः शस्त्रीव शम्बररिपोरपनीतकोशा ।

ENMSS@6988@2रक्तावकुण्ठनपटीरचितापिधाना संध्याम्बुवाह्कलितेव शशा करेखा ॥ ६९८८॥

ENMSS@6989@1उन्मुक्तक्रमहारिमेरुशिखरात् क्रामन्तमन्यो धरः कोऽत्र त्वां शरभीकिशोरपरिषद्धौरेय धर्तुं क्षमः ।

ENMSS@6989@2तस्माद् दुर्गमश्‍ृ गल घनकलादुर्लालितात्मन् व्रज त्वद्वासाय स एव
कीर्णकनकज्योत्स्नो गिरीणां पतिः ॥ ६९८९॥

ENMSS@6990@1उन्मुक्तमानकलहा रमध्वं दयितान्विताः ।

ENMSS@6990@2इतीव मधुरालापाः कोकिला जगदुर्जनान् ॥ ६९९०॥

ENMSS@6991@1उन्मुक्ताभिर्दिवसमधुना सर्वतस्ताभिरेव स्वच्छायाभिर्निचुलितमिव प्रेक्ष्यते विश्वमेतत् ।

ENMSS@6991@2पर्यन्तेषु ज्वलति जलधौ रत्नसानौ च मध्ये चित्रा गीयं रमयति तमःस्तोमलीला धरित्री ॥ ६९९१॥

ENMSS@6992@1उन्मुच्य स्वजनानुपेक्ष्य तृणवत् प्राणानपि प्रेयसस् तीर्त्वा दुस्तरमर्णवं च वणिजः प्राप्ताः पटीराशया ।

ENMSS@6992@2श्वासैस्ते विनिवर्तिताः प्रतिभयैः स्वस्थो भवातःपरं त्वं वा केवलम गम गमुरग व्यालिम्प गन्धद्रवैः ॥ ६९९२॥

ENMSS@6993@1उन्मुद्रीकृतविश्वविस्मयभरैस्तत्तन्महार्घैर्गुणैर् दुर्गाधे हृदयाम्बुधौ तव भवेन् नः सूक्तिग गा यदि ।

ENMSS@6993@2विश्वश्चित्रमत गिनीघनरसस्यन्दिन्यमन्दध्वनिर् ग गासागरसंगमः पुनरिवापूर्वः समुन्मीलति ॥ ६९९३॥

ENMSS@6994@1उन्मूलितालानविलाभनाभिश् छिन्नस्खलच्छृ खलरोमराजिः ।

ENMSS@6994@2मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥ ६९९४॥

ENMSS@6995@1उन्मूल्य सितकेशांस्तु मूले मुले च तत्क्षिपेत् ।

ENMSS@6995@2ततः केशाः प्रजायन्ते कृष्णाः कौतुककारिणः ।

ENMSS@6995@3युक्त्या पूर्वोक्तया युञ्ज्यान् मेषश्‍ृ गीपयः सुधीः ॥ ६९९५॥

ENMSS@6996@1उन्मूल्यालानभूमीरुहमतितरसोत्खण्डिताण्ड् ऊवितानान्य- आकर्षन्नेष पादैर्मदजलकलुषः क्षिप्तनक्षत्रमालः ।

ENMSS@6996@2शुण्डादण्डाभिघातैर्नभसि विदलयन् पुष्करावर्तकादीन् धावत्याधूतमूर्धा हरिमभिरभसाद् देवपुत्रः करीन्द्रः ॥ ६९९६॥

ENMSS@6997@1उन्मृष्टं कुचसीम्नि पत्रमकरं दृष्ट्वा हठालि गनात् कोपो मास्तु

पुनर्लिखाम्यमुमिति स्मेरे रघूणां वरे ।

ENMSS@6997@2कोपेणारुणितोऽश्रुपातदलितः प्रेम्णा च विस्तारितो दत्तो मैथिलकन्यया दिशतु नः क्षेमं कटाक्षा कुरः ॥ ६९९७॥

ENMSS@6998@1उन्मृष्टपत्रा लुलितालकान्ताः कण्ठेषु लग्ना जघनं स्पृशन्तः ।

ENMSS@6998@2कुचस्थलीष्वाहतिमादधाना गता वधूनां प्रियतां जलौघाः ॥ ६९९८॥

ENMSS@6999@1उन्मेषं यो मम न सहते जातिवैरी निशायाम् इन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।

ENMSS@6999@2नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षाल् लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ ६९९९॥

ENMSS@7000@1उपकरोत्यपकृतो ह्युत्तमोऽप्यन्यथाधमः ।

ENMSS@7000@2मध्यमः साम्यमन्विच्छेद् अपरः स्वार्थतत्परः ॥ ७०००॥

ENMSS@7001@1उपकर्ताधिकाराढ्यः स्वापराधं न मन्यते ।

ENMSS@7001@2उपकारं ध्वजीकृत्य सर्वमेव विलुम्पति ॥ ७००१॥

ENMSS@7002@1उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमनुत्तमम् ।

ENMSS@7002@2सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥ ७००२॥

ENMSS@7003@1उपकर्तुं यथा स्वल्पः समर्थो न तथा महान् ।

ENMSS@7003@2प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः ॥ ७००३॥

ENMSS@7004@1उपकर्तुः कृतघ्नस्याप्युभयोरियती भिदा ।

ENMSS@7004@2सद्यो हि विस्मरत्याद्यः कृतं पश्चात् तु पश्चिमः ॥ ७००४॥

ENMSS@7005@1उपकर्तुः स्थिरं द्रव्यं यत्नस्तत्कालसंभवः ।

ENMSS@7005@2किमस्ति तालवृन्तस्य मन्दमारुतसंग्रहः ॥ ७००५॥

ENMSS@7006@1उपकर्तुमनुपकर्तुः प्रियाणि कर्तुं कृतान्यनुस्मर्तुम् ।

ENMSS@7006@2विनिपतितांश्चोद्धर्तुं कुलान्वितानामुचितमेतत् ॥ ७००६॥

ENMSS@7007@1उपकर्तुमप्रकाशं क्षन्तुं न्यूनेष्वयाचितं दातुम् ।

ENMSS@7007@2अभिसंधातुं च गुणैः शतेषु केचिद् विजानन्ति ॥ ७००७॥

ENMSS@7008@1उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ।

ENMSS@7008@2उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ ७००८॥

ENMSS@7009@1उपकारं सुहृद्वर्गे योऽपकारं च शत्रुषु ।

ENMSS@7009@2नृमेघो वर्षति प्राज्ञस्तस्येच्छन्ति सदोन्नतिम् ॥ ७००९॥

ENMSS@7010@1उपकारं स्मरन्तस्तु कृतज्ञत्ववशंवदाः ।

ENMSS@7010@2पदवीमुपकर्त् णां यान्ति निश्चेतना अपि ॥ ७०१०॥

ENMSS@7011@1निर्वाणमनु निर्वाति तपनं तपनोपलः ।
ENMSS@7011@2इन्दुमिन्दुमणिः किं च शुष्यन्तमनु शुष्यति ॥ ७०११॥
ENMSS@7012@1उपकारः परो धर्मः परोऽर्थः कर्मनैपुणम् ।
ENMSS@7012@2पात्रे दानं परः कामः परो मोक्षो वितृष्णता ॥ ७०१२॥
ENMSS@7013@1उपकारकमायतेर्भृशं  प्रसवः कर्मफलस्य भूरिणः ।
ENMSS@7013@2अनपायि निबर्हणं द्विषां  न तितिक्षासममस्ति साधनम् ॥ ७०१३॥
ENMSS@7014@1उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत् ।
ENMSS@7014@2पादलग्नं करस्थेन कण्टकेनेव कण्टकम् ॥ ७०१४॥
ENMSS@7015@1उपकारपरः प्रवरः  प्रत्युपकारं करोति मध्यस्थः ।
ENMSS@7015@2नीचस्तदपि न कुरुते  उपकार्वशाद् भवति शत्रुः सः ॥ ७०१५॥
ENMSS@7016@1उपकारपरः स्वभावत  सततं सर्वजनस्य सज्जनः ।
ENMSS@7016@2असतामनिशं तथाप्यहो  गुरुहृद्रोगकरी तदुन्नतिः ॥ ७०१६॥
ENMSS@7017@1उपकारप्रधानः स्याद् अपकारपरेऽप्यरौ ।
ENMSS@7017@2संपद्विपत्स्वेकमना हेतावीर्ष्येत् फले न तु ॥ ७०१७॥
ENMSS@7018@1उपकारफलं मित्रम् अपकारोऽरिलक्षणम् ।
ENMSS@7018@2॥। ॥। ॥। ॥। ॥। ॥। ॥। ॥। ॥। ॥। ॥ ७०१८॥
ENMSS@7019@1उपकारमेव तनुते  विपद्गतः सद्गुणो नितराम् ।
ENMSS@7019@2मूर्च्छां गतो मृतो वा  निदर्शनं पारदोऽत्र रसः ॥ ७०१९॥
ENMSS@7020@1उपकारशतेनापि गृह्यते केन दुर्जनः ।
ENMSS@7020@2साधुः संमानमात्रेण भवत्येवात्मविक्रयी ॥ ७०२०॥
ENMSS@7021@1उपकारशतेनापि दानैश्चापि सुविस्तरैः ।
ENMSS@7021@2लालनात् प्रीतिपूर्वाच्च न ग्राह्यो भगिनीसुतः ॥ ७०२१॥
ENMSS@7022@1उपकारश्चापकारो यस्य व्रजति विस्मृतिम् ।
ENMSS@7022@2पाषाणहृदयस्यास्य जीवतीत्यभिधा मुधा ॥ ७०२२॥
ENMSS@7023@1उपकाराच्च लोकानां निमित्तान्मृगपक्षिणाम् ।
ENMSS@7023@2भयाल्लोभाच्च मूर्खाणां मैत्री स्याद् दर्शनात् सताम् ॥ ७०२३॥
ENMSS@7024@1उपकाराद्दतेऽप्याशु मित्रं श्रेयसि तिष्ठति ।
ENMSS@7024@2मित्रवान् साधयत्यर्थान् दुःसाध्यानप्यनादरात् ॥ ७०२४॥
ENMSS@7025@1उपकाराय न जातः  सपदि सुजातः क्व जातवैरेऽपि ।
ENMSS@7025@2ग्रासयति ग्रस्तोऽपि  द्रोहिणममृतानि रोहिणीरमणः ॥ ७०२५॥
ENMSS@7026@1उपकाराय या पुंसां न परस्य न चात्मनः ।

ENMSS@7026@2पत्रसंचयसंभारैः किं तया भारविद्यया ॥ ७०२६॥

ENMSS@7027@1उपकारिणमपि पूज्यं  हन्ति महान्तं खलोऽत्रपोऽवसरे ।

ENMSS@7027@2धृष्टद्युम्नो मध्ये-  वीरं हतवान् गुरुं शान्तम् ॥ ७०२७॥

ENMSS@7028@1उपकारिणि विक्षीणे शनैः केदारवारिणि ।

ENMSS@7028@2सानुक्रोशतया शालिरभूत् पाण्डुरवा मुखः ॥ ७०२८॥

ENMSS@7029@1उपकारिणि विश्रब्धे  शुद्धमतौ यः समाचरति पापम् ।

ENMSS@7029@2तं जनमसत्यसंधं  भगवति वसुधे कथं वहसि ॥ ७०२९॥

ENMSS@7030@1उपकारिणि वीतमत्सरे वा  सदयत्वं यदि तत्र कोऽतिरेकः ।

ENMSS@7030@2अहिते सहसापराद्धलब्धे  सघृणं यस्य मनः सतां स धुर्यः ॥ ७०३०॥

ENMSS@7031@1उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।

ENMSS@7031@2अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ ७०३१॥

ENMSS@7032@1उपकारे कृतज्ञत्वम् अपकारे कृतघ्नता ।

ENMSS@7032@2विषयस्य गुणावेतौ कर्तुः स्यातां विपर्ययौ ॥ ७०३२॥

ENMSS@7033@1उपकारेण दूयन्ते न सहन्तेऽनुकम्पिताम् ।

ENMSS@7033@2आपत्स्वपि दुराराध्या नित्यदुःखा मनस्विनः ॥ ७०३३॥

ENMSS@7034@1उपकारेण नीचानाम् अपकारो हि जायते ।

ENMSS@7034@2पयःपानं भुजंगानां केवलं विषवर्धनम् ॥ ७०३४॥

ENMSS@7035@1उपकारेण वीरस्तु प्रतिकारेण युज्यते ।

ENMSS@7035@2अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ७०३५॥

ENMSS@7036@1उपकार्योपकारित्वं दूरे चेत् सा हि मित्रता ।

ENMSS@7036@2पुष्पवन्तौ किमासन्नौ पश्य कैरवपद्मयोः ॥ ७०३६॥

ENMSS@7037@1उपकृतं बहु तत्र किमुच्यते  सुजनता प्रथिता भवता परम् ।

ENMSS@7037@2विदधदीदृशमेव सदा सखे  सुखितमास्स्व ततः शरदां शतम् ॥ ७०३७॥

ENMSS@7038@1उपकृतमनेन सुतराम्  इत्यसतामस्ति न क्वचिदपेक्षा ।

ENMSS@7038@2होतुः स्वहस्तमाश्रित  उद्वहतोऽग्निर्दहत्येव ॥ ७०३८॥

ENMSS@7039@1उपकृतवताप्यनार्ये  नाश्वसितव्यं कृतिप्रियोऽस्मीति ।

ENMSS@7039@2पयसापि सिक्तमूलो  भवति हि मधुरो न पिचुमन्दः ॥ ७०३९॥

ENMSS@7040@1उपकृतवता श्रीरत्नाभ्यां हरेः शशिलेखया  मनसिजरिपोः पीयूषेणाप्यशेषदिवौकसाम् ।

ENMSS@7040@2कथमितरथा तेन स्थेयं यशोभरमन्थरं  यदि न मथनायासं

धीरः सहेत पयोनिधिः ॥ ७०४०॥

ENMSS@7041@1उपकृतिरेव खलानां  दोषस्य गरीयसो भवति हेतुः ।

ENMSS@7041@2अनुकूलाचरणेन हि  कुप्यन्ति व्याधयोऽत्यर्थम् ॥ ७०४१॥

ENMSS@7042@1उपकृतिसाहसिकतया  क्षतिमपि गणयन्ति नो गुणिनः ।

ENMSS@7042@2जनयन्ति हि प्रकाशं  दीपशिखाः स्वा गदाहेन ॥ ७०४२॥

ENMSS@7043@1उपकृत्य भवन्ति दूरतः  परतः प्रत्युपकारश कया ।

ENMSS@7043@2इयमेव हि सत्त्वशालिनां  महतां कापि कठोरचित्तता ॥ ७०४३॥

ENMSS@7044@1उपक्रमं वाञ्छितमाशु कुर्याद्  दूतोपयानात् क्रियमाणसंधिः ।

ENMSS@7044@2स चेद् विसंधिः स तु तत्र चैकः  कृतो भवत्यात्मसमुच्छ्रयश्च ॥ ७०४४॥

ENMSS@7045@1उपगूढवेलमलघूर्मिभुजैः  सरितामचुक्षुभदधीशमपि ।

ENMSS@7045@2रजनीकरः किमिव चित्रमदो  यदुरागिणां गणमन गलघुम् ॥ ७०४५॥

ENMSS@7046@1उपगूहति दवदहने  त्रिभुवनधन्यामरण्यानीम् ।

ENMSS@7046@2मूर्ता इवान्धकाराः  प्रतिदिशमपयान्ति कासरावलयः ॥ ७०४६॥

ENMSS@7047@1उपचरिताप्यतिमात्रं  पण्यवधूः क्षीणसंपदः पुंसः ।

ENMSS@7047@2पातयति दृशं व्रजतः  स्पृहया परिधानमात्रेऽपि ॥ ७०४७॥

ENMSS@7048@1उपचरिता हरिणदृशः  सज्ञनगोष्ठीषु मिश्रिता वाचः ।

ENMSS@7048@2चरितं क्लमनमदवनं  न विधेः कुटिलादपि त्रासः ॥ ७०४८॥

ENMSS@7049@1उपचारः कर्तव्यो  यावदनुत्पन्नसौहृदाः पुरुषाः ।

ENMSS@7049@2उत्पन्नसौहृदानाम्  उपचारः कैतवं भवति ॥ ७०४९॥

ENMSS@7050@1उपचारविधिज्ञोऽपि निर्धनः किं करिष्यति ।

ENMSS@7050@2निर कुश इवारूढो मत्तद्विरदमूर्धनि ॥ ७०५०॥

ENMSS@7051@1उपचारानुनयास्ते  कितवस्योपेक्षिताः सखीवचसा ।

ENMSS@7051@2अधुना निष्ठुरमपि यदि  स वदति कलिकैतवाद् यामि ॥ ७०५१॥

ENMSS@7052@1उपचितावयवा शुचिभिः कणैर् अलिकदम्बकयोगमुपेयुषी ।

ENMSS@7052@2सदृशकान्तिरलक्ष्यत मञ्जरी  तिलकजालकजालकमौक्तिकैः ॥ ७०५२॥

ENMSS@7053@1उपचितेषु परेष्वसमर्थतां  व्रजति कालवशाद् बलवानपि ।

ENMSS@7053@2तपसि मन्दगभस्तिरभीषुमान्  नहि महाहिमहानिकरोऽभवत् ॥ ७०५३॥

ENMSS@7054@1उपच्छन्द्यापि दातव्यं बलिने शान्तिमिच्छता ।

ENMSS@7054@2समूलमेव गान्धारिरप्रयच्छन् गतः क्षयम् ॥ ७०५४॥

ENMSS@7055@1उपजप्यानुपजपेद् बुध्येतैव च तत्कृतम् ।
ENMSS@7055@2युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः ॥ ७०५५॥
ENMSS@7056@1उपजापः कृतस्तेन तानाकोपवतस्त्वयि ।
ENMSS@7056@2आशु दीपयिताल्पोऽपि साग्नीनेधानिवानिलः ॥ ७०५६॥
ENMSS@7057@1उपजापश्चिरारोधोऽवस्कन्दस्तीव्रपौरुषम् ।
ENMSS@7057@2दुर्गस्य ल घनोपायाश्चत्वारः कथिता इमे ॥ ७०५७॥
ENMSS@7058@1उपजापसहान् विल घयन् स विधाता नृपतीन् महोद्धतः ।
ENMSS@7058@2सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकम् ॥ ७०५८॥
ENMSS@7059@1उपजापहृतस्वामिस्नेहसीम्नि पराश्रयम् ।
ENMSS@7059@2मौले वाञ्छति मेदिन्याः पत्युः पातो न संशयः ॥ ७०५९॥
ENMSS@7060@1उपजीवति स्म सततं दधतः परिमुग्धतां वणिगिवोडुपतेः ।
ENMSS@7060@2घनवीथिवीथिमवतीर्णवतो निधिरम्भसामुपचयाय कलाः ॥ ७०६०॥
ENMSS@7061@1उपजीव्या हता कन्या स्वार्थे पाकक्रिया हता ।
ENMSS@7061@2शूद्रभिक्षाहतो यागः कृपणस्य हतं धनं ॥ ७०६१॥
ENMSS@7062@1उपताप्यमानमलघूष्णिमभिः श्वसितैः सितेतरसरोजदृशः ।
ENMSS@7062@2द्रवतां न नेतुमधरं क्षमते नवनागवल्लिदलरागरसः ॥ ७०६२॥
ENMSS@7063@1उपदिशति लोकवृत्तं वितरति वित्तं विनोदयति चित्तम् ।
ENMSS@7063@2उत्तम्भयति महत्त्वं विद्या हृद्या सुराजसेवेव ॥ ७०६३॥
ENMSS@7064@1उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।
ENMSS@7064@2श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु ॥ ७०६४॥
ENMSS@7065@1उपदेशप्रदात् णां नराणां हितमिच्छताम् ।
ENMSS@7065@2परस्मिन्निहलोके च व्यसनं नोपपद्यते ॥ ७०६५॥
ENMSS@7066@1उपदेशो न दातव्यो यादृशे तादृशे नरे ।
ENMSS@7066@2पश्य वानरमूर्खेण सुगृही निर्गृहीकृता ॥ ७०६६॥
ENMSS@7067@1उपदेशो हि मूर्खाणां क्रोधायैव शमाय न ।
ENMSS@7067@2पयःपानं भुज गानां विषायैवामृताय न ॥ ७०६७॥
ENMSS@7068@1उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
ENMSS@7068@2पयःपानं भुज गानां केवलं विषवर्धनं ॥ ७०६८॥
ENMSS@7069@1उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
ENMSS@7069@2परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ ७०६९॥

ENMSS@7070@1उपधाशोधिताः सम्यग् ईहमानाः फलोदयम् ।

ENMSS@7070@2तेऽस्य सर्वं परीक्षेरन् सानुरागाः कृताकृतम् ॥ ७०७०॥

ENMSS@7071@1उपेत्य धीयते यस्माद् उपधेति ततः स्मृता ।

ENMSS@7071@2उपाय उपधा ज्ञेया तयामात्यान् परीक्षयेत् ॥ ७०७१॥

ENMSS@7072@1॥। ॥। ॥। ।

ENMSS@7072@2उपधित्रयशुद्धितोऽस्य किं कनकस्येव परं परीक्षणम् ॥ ७०७२॥

ENMSS@7073@1उपधिवसतिपिण्डान् गृह्णते नो विरुद्धांस् तनुवचनमनोभिः सर्वथा ये मुनीन्द्राः ।

ENMSS@7073@2व्रतसमितिसमेता ध्वस्तमोहप्रपञ्चा ददतु मम विमुक्तिं ते हतक्रोधयोधाः ॥ ७०७३॥

ENMSS@7074@1उपनतभये यो यो मार्गो हितार्थकरो भवेत् स स निपुणया बुद्ध्या सेव्यो
महान् कृपणोऽपि वा ।

ENMSS@7074@2करिकरनिभौ ज्याघाता कौ महास्त्रविशारदौ वलयरचितौ स्त्रीवद् बाहू
कृतौ न किरीटिना ॥ ७०७४॥

ENMSS@7075@1उपनतमतिपुण्यचयैः संपूर्णं रक्षितं च यत्नेन ।

ENMSS@7075@2संपदि विपदि त्राणं भवति निधानं च मित्रं च ॥ ७०७५॥

ENMSS@7076@1उपनदिपुलिने महापलाशः पवनसमुच्छलदेकपत्रपाणिः ।

ENMSS@7076@2दवदहनविनष्टजीवितानां सलिलमिवैष ददाति पादपानाम् ॥ ७०७६॥

ENMSS@7077@1उपनयति कपोले लोलकर्णप्रवाल- क्षणमुकुलनिवेशान्दोलनव्यापृतानाम् ।

ENMSS@7077@2परिमलितहरिद्रान् संप्रति द्राविडीनां नवनखपदतिक्तानातपः स्वेदबिन्दून् ॥ ७०७७॥

ENMSS@7078@1उपनयनविवाहावुत्सवैकप्रधानौ कलिविभवत एषां कालभेदानभिज्ञाः ।

ENMSS@7078@2विजहति न कदाचिद् वेदपाठैकयोग्ये वयसि च यवनानीवाचनाभ्यासमेते ॥ ७०७८॥

ENMSS@7079@1उपनयति मसिं पत्रं चेदं लिखामि किमत्र वा त्वमिति विनयभ्रंशो यूयं त्विति प्रणयक्षतिः ।

ENMSS@7079@2सुहृदिति मृषा नाथेत्यूनं नृपेति तटस्थता कथमिति ततः संदेष्टव्यो मया यदुनन्दनः ॥ ७०७९॥

ENMSS@7080@1उपनिषदः परिपीता  गीतापि न हन्त मतिपथं नीता ।
ENMSS@7080@2तदपि न हा विधुवदना  मानससदनाद् बहिर्याति ॥ ७०८०॥
ENMSS@7081@1उपनिहितहलीषासार्गलद्वारमारात् परिचकितपुरन्ध्रीसारिताभ्यर्णभाण्डम् ।
ENMSS@7081@2पवनरयतिरश्चीर्वारिधाराः प्रतीच्छन्  विशति वलितशृ गः पामरागारमुक्षा ॥ ७०८१॥
ENMSS@7082@1उपनीतनीतिनौकः  संसारविकारवारिवन्यासु ।
ENMSS@7082@2सत्पुरुषकर्णधारस् तारयति जनान् बहूनेकः ॥ ७०८२॥
ENMSS@7083@1उपनीय कलमकुडवं  कथयति सभयश्चिकित्सके हलिकः ।
ENMSS@7083@2शोणं सोमार्धनिभं  वधूस्तने व्याधिमुपजातम् ॥ ७०८३॥
ENMSS@7084@1उपनीय प्रियमसमय-  विदं च मे दग्धमानमपनीय ।
ENMSS@7084@2नर्मोपक्रम एव  क्षणदे दूतीव चलितासि ॥ ७०८४॥
ENMSS@7085@1उपनीय यन्नितम्बे  भुजंगमुच्चैरलम्बि विबुधैः श्रीः ।
ENMSS@7085@2एकः स मन्दरगिरिः  सखि गरिमाणं समुद्वहतु ॥ ७०८५॥
ENMSS@7086@1उपनेतुमुन्नतिमतेव दिवं  कुचयोर्युगेन तरसा कलिताम् ।
ENMSS@7086@2रभसोत्थितामुपगतः सहसा  परिरभ्य कश्चन वधूमरुधत् ॥ ७०८६॥
ENMSS@7087@1उपपत्तिभिरम्लाना नोपदेशैः कदर्थिताः ।
ENMSS@7087@2स्वसंवेदनसंवेद्यसाराः सहृदयोक्तयः ॥ ७०८७॥
ENMSS@7088@1उपपन्नं ननु शिवं सप्तस्वङ्गेषुयस्य मे ।
ENMSS@7088@2दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ॥ ७०८८॥
ENMSS@7089@1उपपरिसरं गोदावर्याः परित्यजताध्वगाः  सरणिमपरो मार्गस्तावद् भवद्भिरिहेक्ष्यताम् ।
ENMSS@7089@2इह हि विहितो रक्ताशोकः कयापि हताशया चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥ ७०८९॥
ENMSS@7090@1उपप्रदानं सान्त्वं वा भेदं काले च विक्रमम् ।
ENMSS@7090@2योगं च रक्षसाम् श्रेष्ठ तावुभौ च नयानयौ ॥ ७०९०॥
ENMSS@7091@1उपप्राकाराग्रं प्रहिणु नयने तर्कय मनाग्  अनाकाशे कोऽयं गलितहरिणः शीतकिरणः ।
ENMSS@7091@2सुधाबद्धग्रासैरुपवनचकोरैरनुसृतां  किरञ् ज्योत्स्नामच्छां नवलवलपाकप्रणयिनीम् ॥ ७०९१॥
ENMSS@7092@1उपप्लवोऽसौ किमु राजपुत्री  ज्योत्स्नाद्रवोऽसावुत वज्रपातः ।

ENMSS@7092@2अलं तया सैव हि जीवितं मे  धिङ् मामहं वा चरितार्थ एकः ॥ ७०९२॥

ENMSS@7093@1उपप्लुतं पातुमदो मदोद्धतैस् त्वमेव विश्वंभर विश्वमीशिषे ।

ENMSS@7093@2ऋते रवेः क्षालयितुं क्षमेत कः  क्षपातमस्काण्डमलीमसं नभः ॥ ७०९३॥

ENMSS@7094@1उपबर्हमम्बुजदृशो निजं भुजं  विरचय्य वक्रमपि गण्डमण्डले ।

ENMSS@7094@2निजसक्थि सक्थिनि निधाय सादरं  स्वपिति स्तनार्पितकराम्बुजो युवा ॥ ७०९४॥

ENMSS@7095@1उपभुक्तं यथा वासः स्रजो वा मृदिता यथा ।

ENMSS@7095@2एवं राज्यात् परिभ्रष्टः समर्थोऽपि निरर्थकः ॥ ७०९५॥

ENMSS@7096@1उपभुक्तखदिरवीटक-  जनिताधररागभङ्गभयात् ।

ENMSS@7096@2पितरि मृतेऽपि न वेश्या  रोदिति हा तात तातेति ॥ ७०९६॥

ENMSS@7097@1उपभुक्ताशेषवृषं  धावन्तं मृगशिरेशभोगाय ।

ENMSS@7097@2कः खेचरकेसरिणं  पश्यतु भास्वन्तमन्तकप्रतिमम् ॥ ७०९७॥

ENMSS@7098@1उपभोक्तुं न जानाति कदापि कृपणो जनः ।

ENMSS@7098@2आकण्ठजलमग्नोऽपि कुक्कुरो लेढि जिह्वया ॥ ७०९८॥

ENMSS@7099@1उपभोगकातराणां  पुरुषाणामर्थसंचयपराणाम् ।

ENMSS@7099@2कन्यामणिरिव सदने  तिष्ठत्यर्थः परस्यार्थे ॥ ७०९९॥

ENMSS@7100@1उपभोगादृते तस्य नाश एव न विद्यते ।

ENMSS@7100@2प्राक्तनं बन्धनं कर्म कोऽन्यथा कर्तुमर्हति ॥ ७१००॥

ENMSS@7101@1उपभोगाय च धनं जीवितं येन रक्षितम् ।

ENMSS@7101@2न रक्षिता तु भूर्येन किं तस्य धनजीवितैः ॥ ७१०१॥

ENMSS@7102@1उपभोगेन पुण्यानां प्राक्तनानां तथांहसाम् ।

ENMSS@7102@2कर्तव्यमिति नित्यानाम् अकामकरणात् तथा ॥ ७१०२॥

ENMSS@7103@1उपभोगैरपि त्यक्तं नात्मानमवसादयेत् ।

ENMSS@7103@2चण्डालत्वेऽपि मानुष्यं सर्वथा तात दुर्लभम् ॥ ७१०३॥

ENMSS@7104@1उपमा कालिदासस्य भारवेरर्थगौरवम् ।

ENMSS@7104@2दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥ ७१०४॥

ENMSS@7105@1उपमानमभूद् विलासिनां  करणं यत् तव कान्तिमत्तया ।

ENMSS@7105@2तदिदं गतमीदृशीम् दशां  न विदीर्ये कठिनाः खलु स्त्रियः ॥ ७१०५॥

ENMSS@7106@1उपययौ तनुतां मधुखण्डिता  हिमकरोदयपाण्डुमुखच्छविः ।

ENMSS@7106@2सदृशमिष्टसमागमनिर्वृतिं वनितयानितया रजनीवधूः ॥ ७१०६॥
ENMSS@7107@1उपरि कबरीबन्धग्रन्थेरथ ग्रथिताङ्गुली निजभुजलते तिर्यक्तन्व्या वितत्य विवृत्तया ।
ENMSS@7107@2विवृतविलसद्वामापाङ्गस्तनार्धकपोलया कुवलयदलस्रक्संदिग्धश्रियः प्रहिता दृशः ॥ ७१०७॥
ENMSS@7108@1उपरि करवालधारा- काराः क्रूरा भुजङ्गमपुङ्गवात् ।
ENMSS@7108@2अन्तः साक्षाद्द्राक्षा- दीक्षागुरवो जयन्ति केऽपि जनाः ॥ ७१०८॥
ENMSS@7109@1उपरिगतं हि सवर्णं हृत्वा करतो ददासि रन्तुं मे ।
ENMSS@7109@2धन्यः सरोजयुगलं त्वक्त्वा स्तनयुगमथास्पृशत् कृष्णः ॥ ७१०९॥
ENMSS@7110@1उपरि घनं घनपटलं तिर्यग्गिरयोऽपि नर्तितमयूराः ।
ENMSS@7110@2क्षितिरपि कन्दलधवला दृष्टिं पथिकः क्व पातयतु ॥ ७११०॥
ENMSS@7111@1उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम् ।
ENMSS@7111@2हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः ॥ ७१११॥
ENMSS@7112@1उपरिजतरुजानि याजमानां कुशलतया परिरम्भलोलुपोऽन्यः ।
ENMSS@7112@2प्रथितपृथुपयोधरां गृहाण स्वयमिति मुग्धवधूमुदास दोर्भ्याम् ॥ ७११२॥
ENMSS@7113@1उपरि तमालतरोः सखि परिणतशरदिन्दुमण्डलः कोऽपि ।
ENMSS@7113@2तत्र च मुरलीखुरली कुलमर्यादामधो नयति ॥ ७११३॥
ENMSS@7114@1उपरितलनिपातितेष्टकोऽयं शिरसि तनुर्विपुलश्च मध्यदेशे ।
ENMSS@7114@2असदृशजनसंप्रयोगभीरोर् हृदयमिव स्फुटितं महागृहस्य ॥ ७११४॥
ENMSS@7115@1उपरि परिप्लवते मम बालेयं गृहिणि हंसमालेव ।
ENMSS@7115@2सरस इव नलिननाला त्वमाशयं प्राप्य वससि पुनः ॥ ७११५॥
ENMSS@7116@1उपरि पीनपयोधरपातिता पटकुटीव मनोभवभूपतेः ।
ENMSS@7116@2विजयिनस्त्रिपुरारिजिगीषया तव विराजति भामिनि कञ्चुकी ॥ ७११६॥
ENMSS@7117@1उपरि मिहिरः क्रूरः क्रूरास्तलेऽचलभूमयो वहति पवनः पांशूत्कर्षी कृशः सरसो रसः ।
ENMSS@7117@2अहह न जहत्येते प्राणांस्तदैव किमध्वगा यदि न भवतः पत्रच्छत्रं विशन्ति महीरुहः ॥ ७११७॥
ENMSS@7118@1उपरि विधृतशारिप्रौढधन्विप्रसाराद् इह पयसि नदीनां गाहितुं नैव शक्ताः ।

ENMSS@7118@2तटनिकटनिरूढाः प्रस्थितौ यस्य चण्डाः सरलितकरदण्डाः कुम्भिनोऽम्भः पिबन्ति ॥ ७११८॥

ENMSS@7119@1उपरिष्ठा यदा नारी रमते कामुकं नरम् ।

ENMSS@7119@2विपरीतं रतं ज्ञेयं सर्वकामिजनप्रियम् ॥ ७११९॥

ENMSS@7120@1उपरिस्था भक्तिरन्तर्निर्मूला तारयेत् कथम् ।

ENMSS@7120@2नहि भारक्षमा दृष्टा वारां सान्द्रापि नीलिका ॥ ७१२०॥

ENMSS@7121@1उपरुन्धन्ति श्वासान् मुनयो नाश्नन्ति न पिबन्ति ।

ENMSS@7121@2स्तूयन्ते सुजनैः किं कण्ठे कुर्वन्ति कनकपाशमिमे ॥ ७१२१॥

ENMSS@7122@1उपर्यंशुमतः सिद्धाश्चरन्तो यस्य सानुषु ।

ENMSS@7122@2छत्राण्यातपसंत्रासाद् अवाचीनानि बिभ्रति ॥ ७१२२॥

ENMSS@7123@1उपर्यष्टौ शतान्याहुस्तथा भूयश्च सप्ततिः ।

ENMSS@7123@2गजानां तु परीमाणम् एतदेव विनिर्दिशेत् ॥ ७१२३॥

ENMSS@7124@1उपर्युपरि लोकस्य सर्वो गन्तुं समीहते ।

ENMSS@7124@2यतते च यथाशक्ति न च तद् वर्तते तथा ॥ ७१२४॥

ENMSS@7125@1उपलक्ष्य वर्णसंकर- मपगतगुणयोगमुज्झितस्थैर्यम् ।

ENMSS@7125@2पथिकाः समुद्विजन्ते कुदेशमिव वीक्ष्य शक्रधनुः ॥ ७१२५॥

ENMSS@7126@1उपलनिकषं सुवर्णं पुरुषो व्यवहारनिकष उद्दिष्टः ।

ENMSS@7126@2धूर्निकषो गोवृषभः स्त्रीणां तु न विद्यते निकषः ॥ ७१२६॥

ENMSS@7127@1उपलशकलमेतद् भेदकं गोमयानां वटुभिरुपहृतानां बर्हिषां स्तूपमेतत् ।

ENMSS@7127@2शरणमपि समिद्भिः शुष्यमाणाभिराभिर् विनमितपटलान्तं दृश्यते जीर्णकुड्यम् ॥ ७१२७॥

ENMSS@7128@1उपवनतरुनृत्याध्यापने लब्धवर्णो विरचितजलकेलिः पद्मिनीकामिनीभिः ।

ENMSS@7128@2प्रियसुहृदसमेषोराययौ योगियोग- स्थितिविदलनदक्षो दक्षिणो गन्धवाहः ॥ ७१२८॥

ENMSS@7129@1उपवननवमालिकाप्रसूनैः स्रजमपि या परिखिद्यते सृजन्ती ।

ENMSS@7129@2परिजनवनितोचितानि कर्माण्य् अपरिचितानि कथं विधास्यसि त्वम् ॥ ७१२९॥

ENMSS@7130@1उपवनपवनानुपातदक्षैर् अलिभिरलाभि यदङ्गनाजनस्य ।

ENMSS@7130@2परिमलविषयस्तदुन्नतानाम् अनुगमने खलु संपदोऽग्रतःस्थाः ॥ ७१३०॥

ENMSS@7131@1उपवनमिव वारिमध्यमग्नं  विमलतया प्रतिबिंबितं दधाना ।
ENMSS@7131@2शशिकरनिकरेण पूरितेव  क्वचिदुपनेयपयाः सुखाय वापी ॥ ७१३१॥
ENMSS@7132@1उपवनसलिलानां बालपद्मैर् भ्रमरपरभृतानां कण्ठनादैः ।
ENMSS@7132@2समदगतिविलासैः कामिनीनां  कथयति पटुवृत्तं मधुमासः ॥ ७१३२॥
ENMSS@7133@1उपविशति नृपनियुक्तः  केनचिदन्येन वा जनेनोक्तः ।
ENMSS@7133@2निजवेशजातिसमुचितम्  आसनमालोक्य सेवते सुमतिः ॥ ७१३३॥
ENMSS@7134@1उपविष्टः सभामध्ये यो न वक्ति स्फुटं वचः ।
ENMSS@7134@2तस्माद् दूरेण स त्याज्यो न यो वा कीर्तयेद् ऋतम् ॥ ७१३४॥
ENMSS@7135@1उपवीणयन्ति परमप्सरसो  नृपमानसिंह तव दानयशः ।
ENMSS@7135@2सुरशाखिमौलिकुसुमस्पृहया  नमनाय तस्य यतमानतमाः ॥ ७१३५॥
ENMSS@7136@1उपशमफलाद् विद्याबीजात् फलं धनमिच्छतां  भवति विफलः प्रारम्भो यत्तदत्र किमद्भुतम् ।
ENMSS@7136@2नियतविषयाः सर्वे भावा न यान्ति हि विक्रियां  जनयितुमलं शालेर्बीजं

न जातु यवाङ्कुरम् ॥ ७१३६॥
ENMSS@7137@1उपशमितमेघनादं  प्रज्वलितदशाननं रमितरामम् ।
ENMSS@7137@2रामायणमिव सुभगं  दीपदिनं हरतु वो दुरितम् ॥ ७१३७॥
ENMSS@7138@1उपशोभैव सहायाः  सिद्धिर्वीरस्य साहसे वसति ।
ENMSS@7138@2दलयति कुलानि करिणां  किल हरिणपरिग्रहः सिंहः ॥ ७१३८॥
ENMSS@7139@1उपसंध्यमास्त तनु सानुमतः  शिखरेषु तत्क्षणमशीतरुचः ।
ENMSS@7139@2करजालमस्तसमयेऽपि सताम्  उचितं खलूच्चतरमेव पदम् ॥ ७१३९॥
ENMSS@7140@1उपसर्गाः क्रियायोगे पाणिनेरिति संमतम् ।
ENMSS@7140@2निष्क्रियोऽपि तवारातिः सोपसर्गः सदा कथम् ॥ ७१४०॥
ENMSS@7141@1उपसर्गाः प्रवर्तन्ते दृष्टेऽप्यात्मनि योगिनः ।
ENMSS@7141@2ये तांस्ते संप्रवक्ष्यामि समासेन निबोध मे ॥ ७१४१॥
ENMSS@7142@1उपसर्गेऽन्यचक्रे च दुर्भिक्षे च भयावहे ।
ENMSS@7142@2असाधुजनसंपर्के यः पलायेत् स जीवति ॥ ७१४२॥
ENMSS@7143@1उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः ।
ENMSS@7143@2योगिनः संप्रवर्तन्ते सात्त्वराजसतामसाः ॥ ७१४३॥
ENMSS@7144@1उपस्थितः प्राकृतपुण्यपाकात्  पुरःस्थितो दक्षिणपाणिना स्वम् ।

ENMSS@7144@2शिरः स्पृशेद् दक्षिणचेष्टितो वा  यो मण्डलो मण्डललाभदोऽसौ ॥ ७१४४॥

ENMSS@7145@1उपस्थितस्य कामस्य प्रतिवादो न विद्यते ।

ENMSS@7145@2अपि निर्मुक्तदेहस्य कामरक्तस्य किं पुनः ॥ ७१४५॥

ENMSS@7146@1उपस्थितायां विपदि घोरायां स्वीयरक्षणे ।

ENMSS@7146@2धीमद्भिः पुरुषैर्युक्तं वस्त्रं त्यक्त्वा पलायनम् ॥ ७१४६॥

ENMSS@7147@1उपस्थिते प्राणहरे कृतान्ते  किमाशु कार्यं सुधिया प्रयत्नात् ।

ENMSS@7147@2वाक्कायचित्तैः सुखदं यमघ्नं  मुरारिपादाम्बुजमेव चिन्त्यम् ॥ ७१४७॥

ENMSS@7148@1उपस्थिते विप्लव एव पुंसां  समस्तभावः परिमीयतेऽन्तः ।

ENMSS@7148@2अवाति वायौ नहि तूलराशेर् गिरेश्च कश्चित् प्रतिभाति भेदः ॥ ७१४८॥

ENMSS@7149@1उपस्थिते विवाहे च दाने यज्ञे तथा विभो ।

ENMSS@7149@2समाचरति यो विघ्नं स मृत्वा जायते कृमिः ॥ ७१४९॥

ENMSS@7150@1उपहरणं विभवानां  संहरणं सकलदुरितजालस्य ।

ENMSS@7150@2उद्धरणं संसाराच्  चरणं वः श्रेयसेऽस्तु विश्वपतेः ॥ ७१५०॥

ENMSS@7151@1उपहासादिकं दूत्या नायिकायास्ततः परम् ।

ENMSS@7151@2अथ संभोगशृङ्गारे परस्परविलोकनम् ॥ ७१५१॥

ENMSS@7152@1उपहितं शिशिरापगमश्रिया  मुकुलजालमशोभत किंशुके ।

ENMSS@7152@2प्रणयिनीव नखक्षतमण्डनं  प्रमदया मदयापितलज्जया ॥ ७१५२॥

ENMSS@7153@1उपंशुक्रीडितोऽमात्यः स्वयं राजायते यतः ।

ENMSS@7153@2अवज्ञा क्रियते तेन सदा परिचयाद् ध्रुवम् ॥ ७१५३॥

ENMSS@7153@1उपाकृताया नवयौवनेन  यान्त्या गलत्साञ्जनबाष्पपूरम् ।

ENMSS@7153@2बाल्यश्रियः किं पदवी विरेजे  रोमावली खञ्जनलोचनायाः ॥ ७१५३॥

ENMSS@7154@1उपाददे तस्य सहस्ररश्मिस् त्वष्ट्रा नवं निर्मितमातपत्रम् ।

ENMSS@7154@2स तद्दुकूलाद् अविदूरमौलिर् बभौ पतद्गङ्ग इवोत्तमाङ्गे ॥ ७१५४॥

ENMSS@7155@1उपादाता यावन्न भवति भवादृग्गुणवताम्  असत्कल्पास्तावत् त्रिभुवनमहार्हा अपि गुणाः ।

ENMSS@7155@2अपि प्राग्दैत्यारेर्हृदयवसतेः कौस्तुभमणिः  स किं नासीदब्धौ श्रुतिरपि किमस्य क्वचिदभूत् ॥ ७१५५॥

ENMSS@7156@1उपाधिभिः सततसंगतोऽपि  नहि स्वभावं विजहाति भावः ।

ENMSS@7156@2आजन्म यो मज्जति दुग्धसिन्धौ  तथापि काकः किल कृष्ण एव ॥ ७१५६॥

ENMSS@7157@1उपाध्यायं पितरं मातरं च  येऽभिद्रुह्यन्ति मनसा कर्मणा वा ।

ENMSS@7157@2तेषां पापं भ्रूणहत्याविशिष्टं  तस्मान्नान्यः पापकृदस्ति लोके ॥ ७१५७॥

ENMSS@7158@1उपाध्यायश्च वैद्यश्च प्रतिभूर्भुक्तनायिका ।

ENMSS@7158@2सूतिका दूतिकाश्चैव सिद्धे कार्ये तृणोपमाः ॥ ७१५८॥

ENMSS@7159@1उपाध्यायान् दशाचार्य आचार्याणां शतं पिता ।

ENMSS@7159@2सहस्रं तु पित् न् माता गौरवेणातिरिच्यते ॥ ७१५९॥

ENMSS@7160@1उपाध्वं तत् पान्थाः पुनरपि सरो मार्गतिलकं  यदासाद्य स्वच्छं विलसथ विनीतक्लमभराः ।

ENMSS@7160@2इतस्तु क्षाराब्धेर्जरठमकरक्षुण्णपयसो  निवृत्तिः कल्याणी न पुनरवतारः कथमपि ॥ ७१६०॥

ENMSS@7161@1उपानहौ च यो दद्यात् पात्रभूते द्विजोत्तमे ।

ENMSS@7161@2सोऽपि लोकानवाप्नोति दैवतैरभिपूजितान् ॥ ७१६१॥

ENMSS@7162@1उपानीतं दूरात् परिमलमुपाघ्राय मरुता  समायासीदस्मिन् मधुरमधुलोभान्मधुकरः ।

ENMSS@7162@2परो दूरे लाभः कुपितफणिनश्चन्दनतरोः  पुनर्जीवन् यायाद् यदि तदिह लाभोऽयमतुलः ॥ ७१६२॥

ENMSS@7163@1उपान्तप्रोन्मीलद्विटपिजटिलां कौतुकवती  कदाचिद् गन्तासि प्रियसखि न शिप्रातटभुवम् ।

ENMSS@7163@2यदस्यां मुक्तास्रग्विहितसितभोगिभ्रमतया  वयोरूढः केकी लिखति नखरेण स्तनतटम् ॥ ७१६३॥

ENMSS@7164@1उपायं चिन्तयेत् प्राज्ञो ह्यपायमपि चिन्तयेत् ।

ENMSS@7164@2पश्यतो बकमूर्खस्य नकुलैर्भक्षिताः सुताः ॥ ७१६४॥

ENMSS@7165@1उपायं यं पुरस्कृत्य सेवते सेवकः प्रभुम् ।

ENMSS@7165@2अनन्तरज्ञस्तत्रैव योग्यं तं किल मन्यते ॥ ७१६५॥

ENMSS@7166@1उपायकुशलं वैद्यं भृत्यसंदूषणे रतम् ।

ENMSS@7166@2शूरमैश्वर्यकामं च यो न हन्ति स वध्यते ॥ ७१६६॥

ENMSS@7167@1उपायज्ञश्च योगज्ञस्तत्त्वज्ञः प्रतिभानवान् ।
ENMSS@7167@2स्वधर्मनिरतो नित्यं परस्त्रीषु पराङ्मुखः ।
ENMSS@7167@3वक्तोहवांश्चित्रकथः स्यादकुण्ठितवाक् सदा ॥ ७१६७॥
ENMSS@7168@1उपायनीकृतं यत् तु सुहृत्सम्बन्धिबन्धुषु ।
ENMSS@7168@2विवाहादिषु चाचारदत्तं ह्रीदत्तमेव तत् ॥ ७१६८॥
ENMSS@7169@1उपायपूर्वं लिप्सेत कालं वीक्ष्य समुत्पतेत् ।
ENMSS@7169@2पश्चात्तापाय भवति विक्रमैकरसज्ञता ॥ ७१६९॥
ENMSS@7170@1उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।
ENMSS@7170@2हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् ॥ ७१७०॥
ENMSS@7171@1उपायानां च सर्वेषाम् उपायः पण्यसंभवः ।
ENMSS@7171@2धनार्थं शस्यते ह्येकस्तदन्यः संशयात्मकः ॥ ७१७१॥
ENMSS@7172@1उपाया युक्तयो मायाः कालयापनमुच्यते ।
ENMSS@7172@2निरपायो जयस्तूर्णम् एक एव पराक्रमः ॥ ७१७२॥
ENMSS@7173@1उपायेन जयो यादृग् रिपोस्तादृङ् न हेतिभिः ।
ENMSS@7173@2उपायज्ञोऽल्पकायोऽपि न शूरैः परिभूयते ॥ ७१७३॥
ENMSS@7174@1उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
ENMSS@7174@2काकी कनकसूत्रेण कृष्णसर्पमघातयत् ॥ ७१७४॥
ENMSS@7175@1उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
ENMSS@7175@2शृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना ॥ ७१७५॥
ENMSS@7176@1उपायैरप्यशक्यास्ते जाने जेतुं नरेश्वराः ।
ENMSS@7176@2उपेक्षिता भविष्यन्ति संकल्पेऽप्यथ दुर्जयाः ॥ ७१७६॥
ENMSS@7177@1उपायैरिव तैः काले चतुर्भिः सुप्रयोजितैः ।
ENMSS@7177@2मैलुगिक्षोणिपालस्य राज्यं जातं सदोन्नतम् ॥ ७१७७॥
ENMSS@7178@1उपार्जितानामर्थानां त्याग एव हि रक्षणम् ।
ENMSS@7178@2तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ ७१७८॥
ENMSS@7179@1उपालभ्यो नायं सकलभुवनाश्चर्यमहिमा  हरेर्नाभीपद्मः प्रभवति हि सर्वत्र नियतिः ।
ENMSS@7179@2यदत्रैव ब्रह्मा पिबति निजमायुर्मधु पुनर् विलुम्पन्ति स्वेदाधिकममृतहृद्यं मधुलिहः ॥ ७१७९॥
ENMSS@7180@1उपासते यथा बाला मातरं क्षुधयार्दिताः ।
ENMSS@7180@2श्रेयस्कामास्तथा गङ्गाम् उपासन्तीह देहिनः ॥ ७१८०॥

ENMSS@7181@1उपास्यमानाविव शिक्षितुं ततो  मृदुत्वमप्रौढमृणालनालया ।

ENMSS@7181@2रराजतुर्माङ्गलिकेन संगतौ  भुजौ सुदत्या वलयेन कम्बुनः ॥ ७१८१॥

ENMSS@7182@1उपेक्षणीयैव परस्य वृद्धिः  प्रनष्टनीतेरजितेन्द्रियस्य ।

ENMSS@7182@2मदादियुक्तस्य विरागहेतुः  समूलघातं विनिहन्ति चान्ते ॥ ७१८२॥

ENMSS@7183@1उपेक्षितः क्षीणबलोऽपि शत्रुः  प्रमाददोषात् पुरुषैर्मदान्धैः ।

ENMSS@7183@2साध्योऽपि भूत्वा प्रथमं ततोऽसाव् असाध्यतां व्याधिरिव प्रयाति ॥ ७१८३॥

ENMSS@7184@1उपेक्षितानां मन्दानां धीरसत्त्वैरवज्ञया ।

ENMSS@7184@2अत्रासितानां क्रोधान्धैर्भवत्येषा विकत्थना ॥ ७१८४॥

ENMSS@7185@1उपेक्षेत प्रनष्टं यत् प्राप्तं यत् तदुपाहरेत् ।

ENMSS@7185@2न बालं न स्त्रियं चातिलालयेत् ताडयेन् न च ।

ENMSS@7185@3विद्याभ्यासे गृह्यकृत्ये तावुभौ योजयेत् क्रमात् ॥ ७१८५॥

ENMSS@7186@1उपेक्षेत समर्थः सन् धर्मस्य परिपन्थिनः ।

ENMSS@7186@2स एव सर्वनाशाय हेतुभूतो न संशयः ॥ ७१८६॥

ENMSS@7187@1उपेक्ष्यपक्षे भूपानां मानः स्वार्थस्य सिद्धये ।

ENMSS@7187@2स तु प्राणानुपेक्ष्यापि ग्राह्यपक्षे मनस्विनाम् ॥ ७१८७॥

ENMSS@7187A@1उपेक्ष्य लोष्टक्षेप्तारं लोष्टं दशति मण्डलः ।

ENMSS@7187A@2सिंहस्तु शरमपेक्ष्य शरक्षेप्तारमीक्षते ॥

ENMSS@7188@1उपेतः कोशदण्डाभ्यां सामात्यः सह मन्त्रिभिः ।

ENMSS@7188@2दुर्गस्थश्चिन्तयेत् साधु मण्डलं मण्डलाधिपः ॥ ७१८८॥

ENMSS@7188A@1उपेत्य तां दृढपरिरम्भलालसश्  चिरादभूः प्रमुषितचारुचन्दनः ।

ENMSS@7188A@2धृताञ्जनः सपदि तदक्षिचुम्बनाद्  इहैव ते प्रिय विदिता कृतार्थता ॥

ENMSS@7189@1उपैति क्षाराब्धिं सहति बहुवातव्यतिकरं  पुरो नानाभङ्गाननुभवति पश्यैष जलदः ।

ENMSS@7189@2कथंचिल्लब्धानि प्रवितरति तोयानि जगते  गुणं वा दोषं वा गणयति न दानव्यसनिता ॥ ७१८९॥

ENMSS@7190@1उपैति सस्यं परिणामरम्यतां  नदीरनौद्धत्यमपङ्कतां मही ।

ENMSS@7190@2नवैर्गुणैः संप्रति संस्तवस्थिरं  तिरोहितं प्रेम घनागमश्रियः ॥ ७१९०॥

ENMSS@7191@1उपोढरागाप्यबला मदेन सा  मदेनसा मन्युरसेन योजिता ।

ENMSS@7191@2न योजितात्मानमनङ्गतापितां  गतापि तापाय ममाद्य नेयते ॥ ७१९१॥

ENMSS@7192@1उपोढरागेण विलोलतारकं  तथा गृहीतं शशिना निशामुखम् ।

ENMSS@7192@2यथा समस्तं तिमिरांशुकं तया  पुरोऽपि रागाद् गलितं न लक्षितम् ॥ ७१९२॥

ENMSS@7193@1उपोदकी समायाति तिन्तिडीमन्त्रिणा सह ।

ENMSS@7193@2पलायध्वं पलायध्वं रे रे शाकविडम्बकाः ॥ ७१९३॥

ENMSS@7194@1उपोष्यैकादशीः सर्वास्तथा कृष्णाश्चतुर्दशीः ।

ENMSS@7194@2ध्यात्वा हरिहरं देवं प्राप्नोति परमं पदम् ॥ ७१९४॥

ENMSS@7195@1उप्ता कीर्तिलता गुणैस्तव विभो सिक्ता च दानोदकैर् मेरुस्तम्भमवाप्य दिक्षु वितता प्राप्ता नभोमण्डलम् ।

ENMSS@7195@2धूपैस्त्वत्प्रतिपक्षलक्षवनितानिःश्वासजैर्धूपिता  ऋक्षैः कोरकितेन्दुना कुसुमिता श्रीरामचन्द्र प्रभो ॥ ७१९५॥

ENMSS@7196@1उप्यन्ते विषवल्लिबीजविषमाः क्लेषाः प्रियाख्या नरैस् तेभ्यः स्नेहमया भवन्ति नचिराद् वज्राग्निगर्भाङ्कुराः ।

ENMSS@7196@2येभ्योऽमी शतशः कुकूलहुतभुग्दाहं दहन्तः शनैर् देहं दीप्रशिखासहस्रशिखरा रोहन्ति शोकद्रुमाः ॥ ७१९६॥

ENMSS@7197@1उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात् ।

ENMSS@7197@2न कल्पते पुनः सूत्या उप्तं बीजं च नश्यति ॥ ७१९७॥

ENMSS@7198@1एवं कामाशयं चित्तं कामानामतिसेवया ।

ENMSS@7198@2विरज्यते यथा राजन् नाग्निवत् कामबिन्दुभिः ॥ ७१९८॥

ENMSS@7199@1उभयमेव वदन्ति मनीषिणः  समयवर्षितया कृतकर्मणाम् ।

ENMSS@7199@2बलनिषूदनमर्थपतिं च तं  श्रमनुदं मनुदण्डधरान्वयम् ॥ ७१९९॥

ENMSS@7200@1उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतम् ।

ENMSS@7200@2अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥ ७२००॥

ENMSS@7201@1उभयोरपि निस्तर्तुं शक्तः साधुस्तथापदम् ।

ENMSS@7201@2शत्रोः स्वस्य च निस्तीर्णौ गजग्राहौ यथापदम् ॥ ७२०१॥

ENMSS@7202@1उभयोर्न स्वभोगेच्छा परार्थं धनसंचयम् ।

ENMSS@7202@2कृपणोदारयोः पश्य तथापि महदन्तरम् ॥ ७२०२॥

ENMSS@7203@1उभयोर्मेलने प्रीतिर्यदि स्यान् मेलनं तदा ।

ENMSS@7203@2एकेन न हि हस्तेन जायते तालवादनम् ॥ ७२०३॥

ENMSS@7204@1उभाभ्यां गतिरेकैव गर्भस्थस्य ऋणस्य च ।
ENMSS@7204@2हसन्ती धारयेद् गर्भं रुदन्ती प्रतिमुञ्चति ॥ ७२०४॥
ENMSS@7205@1उभाभ्यांएव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
ENMSS@7205@2तथा दैवेन युक्तं तु पौरुषं फलसाधकम् ॥ ७२०५॥
ENMSS@7206@1उभाभ्यांएव पक्षाभ्यां यथा खे पक्षिणं गतिः ।
ENMSS@7206@2तथैव ज्ञानकर्मभ्यां जायते परमं पदम् ॥ ७२०६॥
ENMSS@7207@1उभावेव चलौ यत्र लक्ष्यं चापि धनुर्धरः ।
ENMSS@7207@2तद् विज्ञेयं द्वयाचलं श्रमेणैव हि साध्यते ॥ ७२०७॥
ENMSS@7208@1उभौ यदि व्योम्नि पृथक्प्रवाहाव् आकाशगङ्गापयसः पतेताम् ।
ENMSS@7208@2तेनोपमीयेत तमालनीलम्  आमुक्तमुक्तालतमस्य वक्षः ॥ ७२०८॥
ENMSS@7209@1उभौ रम्भास्तम्भावुपरि विपरीतौ कमलयोस् तदूर्ध्वं रत्नाश्मस्थलमथ दुरूहं किमपि तत् ।
ENMSS@7209@2ततः कुम्भौ पश्चाद् बिसकिसलये कन्दलमथो  तदन्विन्दाविन्दीवरमधुकराः किं पुनरिदम् ॥ ७२०९॥
ENMSS@7210@1उभौ लोकावभिप्रेक्ष्य राजानमृषयः स्वयम् ।
ENMSS@7210@2असृजन् सुमहद् भूतम् अयं धर्मो भविष्यति ॥ ७२१०॥
ENMSS@7211@1उभौ श्वेतौ पक्षौ चरति गगनेऽवारितगतिः  सदा मीनं भुङ्क्ते वसति सकलः स्थाणुशिरसि ।
ENMSS@7211@2बके चान्द्रः सर्वो गुणसमुदयः किंचिदधिको  गुणाः स्थाने मान्या नरवर
न तु स्थानरहिताः ॥ ७२११॥
ENMSS@7212@1उमाकोमलहस्ताब्जसम्भावितललाटिकम् ।
ENMSS@7212@2हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥ ७२१२॥
ENMSS@7213@1उमातनूजेन गदाधरेण  प्रत्युत्सवं सेवितशंकरेण ।
ENMSS@7213@2गौरीशपुत्रेण रसज्ञहेतोर् विरच्यते कश्चन काव्यबन्धः ॥ ७२१३॥
ENMSS@7214@1उमा तिलकताले तु द्रुतौ लघुगुरू स्मृतौ ।
ENMSS@7214@2चाराख्यस्त्वडतालः स्याद् विद्वद्भिस्तेन गीयते ॥ ७२१४॥
ENMSS@7215@1उमामिमां समुद्वीक्ष्य शीतदीधितिशेखराम् ।
ENMSS@7215@2एषा तु भारती भानुं मत्तं स्वीकृत्य नृत्यति ॥ ७२१५॥
ENMSS@7216@1उमारूपेण यूयं ते संयमस्तिमितं मनः ।
ENMSS@7216@2शंभोर्यतध्वमाक्रष्टुम् अयस्कान्तेन लोहवत् ॥ ७२१६॥

ENMSS@7217@1उभे एव क्षमे वोढुम् उभयोर्बीजमाहितम् ।
ENMSS@7217@2सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम ॥ ७२१७॥
ENMSS@7218@1उमा वधूर्भवान् दाता याचितार इमे वयम् ।
ENMSS@7218@2वरः शंभुरलं ह्येष त्वत्कुलोद्भूतये विधिः ॥ ७२१८॥
ENMSS@7219@1उमावृषाङ्कौ शरजन्मना यथा  यथा जयन्तेन शचीपुरंदरौ ।
ENMSS@7219@2तथा नृपः सा च सुतेन मागधी  ननन्दतुस्तत्सदृशेन तत्समौ ॥ ७२१९॥
ENMSS@7220@1उरः कृत्वावेध्यं मणिफलकगाढस्थितकुचं  भुजावालम्ब्यैहीत्यमरवनिता व्योमगृहगाः ।
ENMSS@7220@2अपद्वारेणैव त्वरितपदमाभाष्य सहसा  हतं हस्तालम्बैर्हरति सुरलोकं रणमुखात् ॥ ७२२०॥
ENMSS@7221@1उरः पृष्ठं कटिश्चैव मुखतुल्यं समादिशेत् ।
ENMSS@7221@2कर्णौ सप्ताङ्गुलौ प्रोक्तौ तालुकं च षडङ्गुलम् ॥ ७२२१॥
ENMSS@7222@1उरःस्थलं कोऽत्र विना पयोधरं  बिभर्ति संबोधय मारुताशनम् ।
ENMSS@7222@2वदन्ति कं पत्तनसंभवं जनाः  फलं च किं गोपबधूकुचोपमभ् ॥ ७२२२॥
ENMSS@7223@1उरगी शिशवे बुभुक्षवे स्वाम्  अदिशत् फूत्कृतिमाननानिलेन ।
ENMSS@7223@2मरुदागमवार्तयापि शून्ये  समये जाग्रति संप्रवृद्ध एव ॥ ७२२३॥
ENMSS@7224@1उरसि निपतितानां स्रस्तधम्मिल्लकानां  मुकुलितनयनानां किंचिदुन्मीलितानाम् ।
ENMSS@7224@2उपरिसुरतखेदस्विन्नगण्डस्थलीनाम्  अधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ ७२२४॥
ENMSS@7225@1उरसि निहितस्तारो हारः कृता जघने घने  कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।
ENMSS@7225@2प्रियमभिसरस्येवं मुग्धे त्वमाहतडिण्डिमा  यदि किमधिकत्रासोत्कम्पा दिशः समुदीक्षसे ॥ ७२२५॥
ENMSS@7226@1उरसि फणिपतिः शिखी ललाटे  शिरसि विधुः सुरवाहिनी जटायाम् ।
ENMSS@7226@2प्रियसखि कथयामि किं रहस्यं  पुरमथनस्य रहोऽपि संसदेव ॥ ७२२६॥

ENMSS@7227@1उरसि मुरभिदः का गाढमालिङ्गितास्ते सरसिजमकरन्दामोदितानन्दने का ।
ENMSS@7227@2गिरिसमलघुवर्णैरर्णवाख्यातिसंख्यैर् गुरुभिरपि कृता का छन्दसां वृत्तिरस्ति ॥ ७२२७॥
ENMSS@7228@1उरस्तव पयोधराङ्कितमिदं कुतो मे क्षमा ततो मयि विधीयतां वसु पुरा यदङ्गीकृतम् ।
ENMSS@7228@2इति प्रचलचेतसः प्रियतमस्य वारस्त्रिया क्वणत्कनककङ्कणं करतलात् समाकृष्यते ॥ ७२२८॥
ENMSS@7229@1उरस्यस्य भ्रश्यत् कबरभरनिर्यत् सुमनसः पतन्ति स्वर्बालाः स्मरपरवशा दीनमनसः ।
ENMSS@7229@2सुरास्तं गायन्ति स्फुरिततनुगङ्गाधरमुखास् तवायं दृक्पातो यदुपरि कृपातो विलसति ॥ ७२२९॥
ENMSS@7230@1उरुगुं द्युगुरुं युत्सु चुकुशुस्तुष्टुवुः पुरु ।
ENMSS@7230@2लुलुभुः पुपुषुर्मुत्सु मुमुहुर्नु मुहुर्मुहुः ॥ ७२३०॥
ENMSS@7231@1उरोजवच्चक्रमनोज्ञरूपा केशावलीव भ्रमराजिता वा ।
ENMSS@7231@2संगीतवत् सत्पुटभेदहृद्या विद्येत नाभीसरसी मृगाक्ष्याः ॥ ७२३१॥
ENMSS@7232@1उरोजाताश्च कीराश्च तुरुष्कारट्टजाश्च ये ।
ENMSS@7232@2टक्कजाः सैन्धवा मध्याः स्थलजातास्तथा हयाः ॥ ७२३२॥
ENMSS@7233@1उरोभावोत्सेदं भवदपि विलासैरभिनवैर् मृगाक्ष्यास्तारुण्यं त्रिभुवनमिदं व्याकुलयति ।
ENMSS@7233@2स्तनाभोगस्फीतं यदि किल भवेत् का खलु कथा भवित्री किं चान्यद्

विजितमखिलं पुष्पधनुषा ॥ ७२३३॥
ENMSS@7234@1उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम् ।
ENMSS@7234@2त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत् ॥ ७२३४॥
ENMSS@7235@1उरोभुवि न तुङ्गिमा न च गतागते चङ्गिमा न वा वचसि वक्रिमा तरलिमा

न तादृग् भ्रुवोः ।
ENMSS@7235@2तथापि हरिणीदृशो वपुषि कापि कान्तिच्छटा

पटावृतमहामणिद्युतिरिवान्तरा लक्ष्यते ॥ ७२३५॥
ENMSS@7236@1उरो मासद्वये जाते त्रिभिर्मासैस्तथोदरम् ।

ENMSS@7236@2चतुर्मासैर्नितम्बं च हस्तपादाविव स्थितः ॥ ७२३६॥

ENMSS@7237@1उरोरुहादुद्गमितैः पयोभिर् आपूर्य केल्या निजमास्यगर्भम् ।

ENMSS@7237@2फूत्कृत्य मातुर्वदने हसन्तं तनूभवं पश्यति कोऽपि धन्यः ॥ ७२३७॥

ENMSS@7238@1उरोरुहाम्भोरुहदर्शनाय विमुञ्चतः कञ्चुकबन्धनानि ।

ENMSS@7238@2आनन्दनीराकुललोचनस्य प्रियस्य जातो विफलः प्रयासः ॥ ७२३८॥

ENMSS@7239@1उरो विशालं शस्तं च कक्षे दीर्घोन्नते शुभे ।

ENMSS@7239@2ऊरू वृत्तौ समौ बाहू गूढं जानु प्रशस्यते ॥ ७२३९॥

ENMSS@7240@1उर्वशी यदि रूपेण रम्भा यदि तिलोत्तमा ।

ENMSS@7240@2गोपाली मेनका चैव वर्जनीयाः परस्त्रियः ॥ ७२४०॥

ENMSS@7241@1उर्वीं गुर्वीं वहति सततं नृत्यतो भूतभर्तुर् भूत्वा हारो भवति शयनं किं च विश्वंभरस्य ।

ENMSS@7241@2एतत् कर्म त्रिजगति परं शेषनागैकशक्यं भेकानन्ये विपुलवपुषो भोगिनो भक्षयन्तु ॥ ७२४१॥

ENMSS@7242@1उर्वीं मौर्वीकिणभृति भवद्दोष्णि बिभ्रत्यशेषां शान्तक्लान्तिः किमपि कुरुते नर्मणा कर्म कूर्मः ।

ENMSS@7242@2कृत्वा वेलापुलिनलवलीपल्लवग्रासगोष्ठीं दिङ्गातङ्गाः सममथ सरिन्नाथपाथः पिबन्ति ॥ ७२४२॥

ENMSS@7243@1उर्वीङ्गुर्वीतिमुर्वीधर लघय शरैर्वैरिघैर्वीर्यगुर्वी स्वर्वीथीर्वीतदर्वीकरनिकरमदैर्वीरकुर्वीति गुर्वीः ।

ENMSS@7243@2खर्वी कुर्वीत कोऽन्यस्त्वमिव रिपुचमूर्वीजितैर्वैजयन्त्याः कुर्वन् दुर्वीक्ष्यमोजो निजमितरधनुर्वारणैर्वीतिहोत्रम् ॥ ७२४३॥

ENMSS@7244@1उर्वीपतेश्च स्फटिकाश्मनश्च शीलोज्झितस्त्रीहृदस्य चान्तः ।

ENMSS@7244@2असंनिधानात् सततस्थितीनाम् अन्योपरागः कुरुते प्रवेशम् ॥ ७२४४॥

ENMSS@7245@1उर्वीमुद्दामसस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टाम् इष्टैस्त्रैविष्टपानां विदधतु विधिवत् प्रीणनं विप्रमुख्याः ।

ENMSS@7245@2आकल्पान्तं च भूयात् स्थिरसमुपचिता संगतिः सज्ञनानां निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुःसहा वज्रलेपाः ॥ ७२४५॥

ENMSS@7246@1उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः ।

ENMSS@7246@2नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक् ॥ ७२४६॥

ENMSS@7247@1उर्व्यां कोऽपि महीधरो लघुतरो दोर्भ्यां धृतो लीलया  तेन त्वं दिवि भूतले च सततं गोवर्धनो गीयसे ।
ENMSS@7247@2त्वां त्रैलोक्यधरं वहामि कुचयोरग्रे न तद् गण्यते  किं वा केशव भाषणेन बहुना पुण्यैर्यशो लभ्यते ॥ ७२४७॥
ENMSS@7248@1उलूखलं यथा मध्ये तैलयन्त्रे दृढं स्थितम् ।
ENMSS@7248@2सर्वाधारस्तथा मेरुर्मध्ये भूमण्डले स्थितम् ॥ ७२४८॥
ENMSS@7249@1उल्बेन संवृतस्तस्मिन्न् आर्द्रैश्च बहिरावृतः ।
ENMSS@7249@2आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥ ७२४९॥
ENMSS@7250@1उल्लङ्घ्य जङ्घामवलम्बमाना  वेणी स्फुरत्यायतलोचनायाः ।
ENMSS@7250@2जित्वा जगच्चन्दनशाखिकायां  न्यस्तासिवल्लीव मनोभवेन ॥ ७२५०॥
ENMSS@7251@1उल्लङ्घ्य सरिदरण्य-  ग्रामगिरीन् कामकातरा यान्तु ।
ENMSS@7251@2अभिसारिण्य इवान्तस्-  तृष्णां निगदन्ति न स्वयं सुधियः ॥ ७२५१॥
ENMSS@7252@1उल्लङ्घ्यापि सखीवचः समुचितामुत्सृज्य लज्जामलं  हित्वा भीतिभरं निरस्य च निजं सौभाग्यगर्वं मनाक् ।
ENMSS@7252@2आज्ञां केवलमेव मन्मथगुरोरादाय नूनं मया  त्वं निःशेषविलासिवर्गगणनाचूडामणिः संश्रितः ॥ ७२५२॥
ENMSS@7253@1उल्लसत्सौरभैः पुष्पैर्बिभ्रन्मालां सुगुम्फिताम् ।
ENMSS@7253@2पर्य्यन्तस्थायिनोऽप्यन्यान् आमोदयति भूपतिः ॥ ७२५३॥
ENMSS@7254@1उल्लसितभ्रूः किमति-  क्रान्तं चिन्तयसि निस्तरङ्गाक्षि ।
ENMSS@7254@2क्षुद्रापचारविरसः  पाकः प्रेम्णो गुडस्येव ॥ ७२५४॥
ENMSS@7255@1उल्लसितभ्रूधनुषा  तवपृथुना लोचनेन रुचिराङ्गि ।
ENMSS@7255@2अचला अपि न महान्तः  के चञ्चलभावमानीताः ॥ ७२५५॥
ENMSS@7256@1उल्लसितलाञ्छनोऽयं  ज्योत्स्नावर्षी सुधाकरः स्फुरति ।
ENMSS@7256@2आसक्तकृष्णचरणः  शकट इव प्रकटितक्षीरः ॥ ७२५६॥
ENMSS@7257@1उल्लसितशीतदीधिति-  कलोपकण्ठे स्फुरन्ति तारौघाः ।
ENMSS@7257@2कुसुमायुधविधृतधनुर्-  निर्गतमकरन्दबिन्दुनिभाः ॥ ७२५७॥
ENMSS@7258@1उल्लापयन्त्या दयितस्य दूतीं  वध्वा विभूषां च निवेशयन्त्याः ।
ENMSS@7258@2प्रसन्नता कापि मुखस्य जज्ञे  वेषश्रिया नु प्रियवार्तया नु ॥ ७२५८॥
ENMSS@7259@1उल्लासोऽधरपल्लवस्य तनुते पर्याप्तमस्याः स्मिते  विन्यासो नयनाञ्चलस्य गमयत्युत्साहवत् साहसम् ।

ENMSS@7259@2रत्यागारपथामुखीनगमकं वैजात्यकक्षावधिः पर्यङ्के पदरोपणं पुनरपर्यन्ता विपर्यस्तता ॥ ७२५९॥

ENMSS@7260@1उल्लासो विरुतेन मङ्गलबलिग्रासेन विश्वासनं संचारेण कृतो विलोचनयुगे बाष्पोद्गमावग्रहः ।

ENMSS@7260@2यातोऽस्तम् रविरेष संप्रति पुरः स्वस्त्यस्तु ते गम्यताम् एते त्वामनुयान्तु

संप्रति मम प्राणाः प्रियान्वेषिणः ॥ ७२६०॥

ENMSS@7261@1उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन ।

ENMSS@7261@2निर्वापितः सकल एव रणे रिपूणां धारा जलैस्त्रिजगति ज्वलितः प्रतापः

॥ ७२६१॥

ENMSS@7262@1उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिबापि दृष्टिः ।

ENMSS@7262@2अश्मैव रत्यास्तदनर्ति पत्या छेदेऽप्यबोधं यदहर्षि लोम ॥ ७२६२॥

ENMSS@7263@1उल्लेखं निजमीक्षते भणितिषु प्रौढिं परां शिक्षते संधत्ते पदसंपदः परिचयं धत्ते ध्वनेरध्वनि ।

ENMSS@7263@2वैचित्र्यं वितनोति वाचकविधौ वाचस्पतेरन्तिके देव त्वद्गुणवर्णनाय कुरुते किं किं न वाग्देवता ॥ ७२६३॥

ENMSS@7264@1उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।

ENMSS@7264@2अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः

॥ ७२६४॥

ENMSS@7265@1उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।

ENMSS@7265@2स्त्रीबुद्ध्या न विशिष्येते ताः स्म रक्ष्याः कथं नरैः ॥ ७२६५॥

ENMSS@7266@1उषःकालश्च गर्गश्च शकुनं च बृहस्पतिः ।

ENMSS@7266@2अङ्गिराश्च मनोत्साहो विप्रवाक्यं जनार्दनः ॥ ७२६६॥

ENMSS@7267@1उषः शशंस गार्ग्यस्तु शकुनं तु बृहस्पतिः ।

ENMSS@7267@2मनोजयं तु माण्डव्यो विप्रवाक्यं जनार्दनः ॥ ७२६७॥

ENMSS@7268@1उषसि गुरुसमक्षं लज्जमाना मृगाक्षी रतिरुतमनुकर्तुं राजकीरे प्रवृत्ते ।

ENMSS@7268@2तिरयति शिशुलीलानर्तनच्छद्मताल- प्रचलवलयमालास्फालकोलाहलेन

॥ ७२६८॥

ENMSS@7269@1उषसि गुरुसमीपे वाससा सावधाना प्रियलिखितनखाङ्कं गोपयन्ती समन्तात् ।

ENMSS@7269@2किमिदमिति सखीभिः सादरं पृच्छ्यमाना हरि हरि हरिणाक्षी ह्रीसमुद्रे
निमग्ना ॥ ७२६९॥

ENMSS@7270@1उषसि निबिडयन्त्याः कुण्डलं केलिपर्या- विलविगलितमन्तः कर्णपालि प्रियायाः ।

ENMSS@7270@2सरसहसिततिर्यग्भङ्गुरापाङ्गरीतिः सुकृतिभिरवलीढा लोचनाभ्यां मुखश्रीः ॥ ७२७०॥

ENMSS@7271@1उषसि परिवर्तयन्त्या मुक्तादामोपवीततां नीतम् ।

ENMSS@7271@2पुरुषायितवैदग्ध्यं व्रीडावति कैर्न कलितं ते ॥ ७२७१॥

ENMSS@7272@1उषसि भ्रमरयुवानः स्वप्ने दृष्ट्वा सरोजसाम्राज्यम् ।

ENMSS@7272@2गतकल्पकुन्दतल्पाः सरसीसलिलानि जिघ्रन्ति ॥ ७२७२॥

ENMSS@7273@1उषसि मलयवासी जालमार्गप्रविष्टो विकचकमलरेणुं व्याकिरन् मोहचूर्णम् ।

ENMSS@7273@2सपदि शमितदीपो वायुचोरो वधूनां हरति सुरतखेदस्वेदमुक्ताफलानि ॥ ७२७३॥

ENMSS@7274@1उषस्येव भ्रान्तं हतजठरहेतोस्तत इतः स्वयं च स्वं बिभ्रद् विचरति कुटुम्बं दिशि दिशि ।

ENMSS@7274@2बतास्माभिः काकैरिव कवलमात्रैकमुदितैर् न चायुर्दुर्गत्योरवधिरिह लब्धः कथमपि ॥ ७२७४॥

ENMSS@7275@1उषापतिमुखाम्भोजे नरीनर्ति सरस्वती ।

ENMSS@7275@2ऋतुराजकवेरेव गायन्ती गुणगौरवम् ॥ ७२७५॥

ENMSS@7276@1उष्ट्राणां च विवाहेषु गीतं गायन्ति गर्दभाः ।

ENMSS@7276@2परस्परं प्रशंसन्ति अहो रूपमहो अहो ध्वनिः ॥ ७२७६॥

ENMSS@7277@1उष्णं जलं क्षिपेत् तत्र मात्रा नास्तीह कस्यचित् ।

ENMSS@7277@2पक्षैकं स्थापिते भाण्डे कोष्णस्थाने मनीषिणा ।

ENMSS@7277@3कुणपस्तु भवेदेव तरूणां पुष्टिकारकः ॥ ७२७७॥

ENMSS@7278@1उष्णकाले जलं दद्याच् शीतकाले हुताशनम् ।

ENMSS@7278@2प्रावृट्काले गृहं देयं सर्वकाले च भोजनम् ॥ ७२७८॥

ENMSS@7279@1उष्णमन्नं घृतं मद्यं तरुणी क्षीरभोजनम् ।

ENMSS@7279@2वापीकपवटच्छाया षड्कं तत् बलवर्धनम् ॥ ७२७९॥

ENMSS@7280@1उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः ।

ENMSS@7280@2तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते  क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते ॥ ७२८०॥

ENMSS@7281@1उष्णालु क्वचिदर्कधामनि मनाङ् निद्रालु शीतानिले  हालानां गृहयालु चुम्बदसकृल्लज्ञालु जायामुखम् ।

ENMSS@7281@2नित्यं निष्पतयालु तिर्यगवनीशय्याशयालु क्षणं  गीतेभ्यः स्पृहयालु धाम धवलं दीने दयालु श्रये ॥ ७२८१॥

ENMSS@7282@1उष्णीषवान् यथा वस्त्रैस्त्रिभिर्भवति संवृतः ।

ENMSS@7282@2संवृतोऽयं तथा देही सत्त्वराजसतामसैः ॥ ७२८२॥

ENMSS@7283@1उष्मायमाणस्तनमण्डलीभिर् वाराङ्गनाभिः स्फुटविभ्रमाभिः ।

ENMSS@7283@2आलिङ्गिता रात्रिषु शैशिरीषु  ते शेरते यैः प्रणतो शशाङ्कः ॥ ७२८३॥

ENMSS@7284@1ऊचिवानुचितमक्षरमेनं  पाशपाणिरपि पाणिमुदस्य ।

ENMSS@7284@2कीर्तिरेव भवतां प्रियदारा  दाननीरझरमौक्तिकहारा ॥ ७२८४॥

ENMSS@7284A@1ऊढा खड्गलता श्यामा त्वया मातङ्गदारिका ।

ENMSS@7284A@2अत एव भवान् मन्ये दूरं परिहृतः परैः ॥

ENMSS@7285@1ऊढापि द्युतरङ्गिणि त्रिजगतीवन्द्येन तेनाप्यहो  मौलौ बालकुरङ्गकेतनकलालीलावतंसाङ्किते ।

ENMSS@7285@2तारक्षारकरं करालमकरं सभ्वभ्रमभ्रंकषं  मुग्धे जाड्यनिधिं मुधा जलनिधिं यातासि चित्राः स्त्रियः ॥ ७२८५॥

ENMSS@7286@1ऊढामुनातिवाहय  पृष्ठे लग्नापि कालमचलापि ।

ENMSS@7286@2सर्वंसहे कठोर-  त्वचः किमङ्केन कमठस्य ॥ ७२८६॥

ENMSS@7287@1ऊढा येन महाधुराः सुविषमे मार्गे सदैकाकिना  सोढो येन कदाचिदेव न

निजे गोष्ठेऽन्यशौण्डध्वनिः ।

ENMSS@7287@2आसीद् यस्तु गवां गणस्य तिलकस्तस्यैद संप्रत्यहो  धिक् कष्टं धवलस्य

जातजरसो गोः पण्यमुद्घोष्यते ॥ ७२८७॥

ENMSS@7288@1ऊधश्छिन्द्याद्धि यो धेन्वाः क्षीरार्थी न लभेत् पयः ।

ENMSS@7288@2एवं राष्ट्रमयोगेन पीडितं न विवर्धते ॥ ७२८८॥

ENMSS@7289@1ऊनषोडशवर्षायाम् अप्राप्तः पञ्चविंशतिम् ।

ENMSS@7289@2यद्याधत्ते पुमान् गर्भः कुक्षिस्थः स विपद्यते ॥ ७२८९॥

ENMSS@7290@1ऊने दद्याद् गुरूनेव यावत् सर्वलघुर्भवेत् ।

ENMSS@7290@2प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥ ७२९०॥
ENMSS@7291@1ऊनेनापि हि तुच्छेन वैरिणापि कथंचन ।
ENMSS@7291@2मैत्री बुद्धिमता कार्या आपद्यपि निवर्तते ॥ ७२९१॥
ENMSS@7292@1ऊरीकर्तुं तुहिनकिरणप्रीतिधारामुदारां दूरीकर्तुं दिनकरकरक्लेशबाधामगाधाम् ।
ENMSS@7292@2यस्याः पुण्ये पयसि विशति स्नातुकामा त्रियामा प्रायस्तस्यास्तिमिरततिभिः श्यामलं नीरमस्याः ॥ ७२९२॥
ENMSS@7293@1ऊरुः कुरङ्गदृशश् चञ्चलचेलाञ्चलो भाति ।
ENMSS@7293@2सपताकः कनकमयो विजयस्तम्भः स्मरस्येव ॥ ७२९३॥
ENMSS@7294@1ऊरुद्वन्द्वमनिन्दितं प्रथयता श्रोणीं समातन्वता रोमालीं सृजता समागमयता नाभिं गभीरश्रिया ।
ENMSS@7294@2मध्यं क्षामयता स्तनौ घनयता कान्त्या मुखं लिम्पता तन्वङ्ग्या नवयौवनेन किमपि प्रत्यङ्गमुन्मीलितम् ॥ ७२९४॥
ENMSS@7295@1ऊरुद्वयं कदलकन्दलयोः सवंशं श्रोणिः शिलाफलकसोदरसन्निवेशा ।
ENMSS@7295@2वक्षः स्तनद्वितयताडितकुम्भशोभं सब्रह्मचारि शशिनश्च मुखं मृगाक्ष्याः ॥ ७२९५॥
ENMSS@7296@1ऊरुद्वयं मृगदृशः कदलस्य काण्डौ मध्यं च वेदिरतुलं स्तनयुग्ममस्याः ।
ENMSS@7296@2लावण्यवारिपरिपूरितशातकुम्भ- कुम्भौ मनोजनृपतेरभिषेचनाय ॥ ७२९६॥
ENMSS@7297@1ऊरुप्रकाण्डद्वितयेन तन्व्याः करः पराजीयत वारणीयः ।
ENMSS@7297@2युक्तं ह्रिया कुण्डलनच्छलेन गोपायति स्वं मुखपुष्करं सः ॥ ७२९७॥
ENMSS@7298@1ऊरुमूलगतनेत्रयुगस्य प्रेयसो रभसवेल्लितकेशी ।
ENMSS@7298@2चुम्बति स्म रतिकेलिविदग्धा हावहारि वदनं दयितस्य ॥ ७२९८॥
ENMSS@7299@1ऊरुमूलचपलेक्षणमघ्नन् यैर्वतंसकुमुमैः प्रियमेताः ।
ENMSS@7299@2चक्रिरे सपदि तानि यथार्थं मन्मथस्य कुसुमायुधनाम ॥ ७२९९॥
ENMSS@7300@1ऊरू रम्भा दृगपि कमलं शेवलं केशपाशो वक्रं चन्द्रो लपितममृतं मध्यदेशो मृणालम् ।
ENMSS@7300@2नाभिः कूपो वलिरपि सरित्पल्लवः किं च पाणिर् यस्याः सा चेद् उरसि न

कथं हन्त तापस्य शान्तिः ॥ ७३००॥

ENMSS@7301@1ऊरू रम्भे बाहू  लते विधात्रा कुचौ पुनः कमले ।

ENMSS@7301@2यौवनमुपवनमस्यां  मदनविलासाय किं रचितम् ॥ ७३०१॥

ENMSS@7302@1ऊरौ शिरस्तव निवेश्य दयावितीर्ण-  संयानपल्लवसमीरविनीतखेदम् ।

ENMSS@7302@2अत्रैव जन्मनि विभोः परमोपदेशम्  आकर्णयेयमपि किं मणिकर्णिकायाम् ॥ ७३०२॥

ENMSS@7303@1ऊर्जितं सज्ञनं दृष्ट्वा द्वेष्टि नीचः पुनः पुनः ।

ENMSS@7303@2कवलीकुरुते स्वस्थं विधुं दिवि विधुंतुदः ॥ ७३०३॥

ENMSS@7304@1ऊर्णां नैव ददाति नैव विषयो वाहस्य दोहस्य वा  तृप्तिर्नास्ति महोदरस्य

बहुभिर्घासैः पलाशैरपि ।

ENMSS@7304@2हा कष्टं कथमस्य पृष्ठशिखरे गोणी समारोप्यते  को गृह्णाति

कपर्दकैरलमिति ग्राम्यैर्गजो हस्यते ॥ ७३०४॥

ENMSS@7305@1ऊर्ध्वं गच्छन्ति यं त्यक्त्वा यं गृहीत्वा पतन्त्यधः ।

ENMSS@7305@2तस्य गौरवमर्थस्य तावतैवानुमीयताम् ॥ ७३०५॥

ENMSS@7306@1ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।

ENMSS@7306@2जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ॥ ७३०६॥

ENMSS@7307@1ऊर्ध्वं न क्षीरविच्छेदात् पयो धेनोरवाप्यते ।

ENMSS@7307@2एवं राष्ट्रादयोगेन पीडितान्नाप्यते बलिः ॥ ७३०७॥

ENMSS@7308@1ऊर्ध्वं नीरदवृन्दमैन्दवमिदं बिम्बं त्वधो निर्मितं  व्योम्नः

पल्वलचित्रितस्य निहितौ शैलावुपर्युन्नतौ ।

ENMSS@7308@2किं चाधः पुलिनोच्चयस्य कदलीकाण्डाववारोपितौ  तन्मन्ये चतुरस्य

पुष्पधनुषः सर्गोऽयमन्यादृशः ॥ ७३०८॥

ENMSS@7309@1ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।

ENMSS@7309@2प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥ ७३०९॥

ENMSS@7310@1ऊर्ध्वं याति चापमुष्टिर्गुणमुष्टिरधो भवेत् ।

ENMSS@7310@2स मुक्तो मार्गणो लक्ष्याद् दूरं याति न संशयः ॥ ७३१०॥

ENMSS@7311@1ऊर्ध्वंव्रीहित्रयं मानम् अङ्गुलस्य निगद्यते ।

ENMSS@7311@2हस्तोऽपि हि समाख्यातश्चतुर्विंशद्भिरङ्गुलैः ॥ ७३११॥

ENMSS@7312@1ऊर्ध्वं श्वसंस्ततः प्राणो यात्यलब्धस्थितिस्तनोः ।

ENMSS@7312@2तं यान्तमनुयात्येव जीवः कालप्रणोदितः ॥ ७३१२॥

ENMSS@7313@1ऊर्ध्वगं कपिलाभासम् अङ्गं यस्मिन् प्रतीयते ।
ENMSS@7313@2नकुलाङ्गं तु तं विद्यात् स्पर्शस्तस्याहिनाशनः ॥ ७३१३॥
ENMSS@7314@1ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच् श्रृणोति मे ।
ENMSS@7314@2धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ७३१४॥
ENMSS@7315@1ऊर्ध्ववेधी भवेज्ज्येष्ठो नाभिवेदी च मध्यमः ।
ENMSS@7315@2यः पादवेधी लक्ष्यस्य स कनिष्ठो मतो मया ॥ ७३१५॥
ENMSS@7316@1ऊर्ध्वशक्तिनिपातेन अधःशक्तेर्निकुञ्चनात् ।
ENMSS@7316@2मध्यशक्तिप्रबोधेन जायते परमं सुखम् ॥ ७३१६॥
ENMSS@7317@1ऊर्ध्वानना भास्करसंमुखीनाः  श्वानो रुवन्तो महते भयाय ।
ENMSS@7317@2एवं हि संध्यासमयेऽन्यदा तु  निर्वासकाः स्युर्नगरस्य तस्य ॥ ७३१७॥
ENMSS@7318@1ऊर्ध्वारोहे य आलम्बहेतुर्भूभृच्छिनत्ति तम् ।
ENMSS@7318@2कुठारिकस्तरुस्कन्धम् इवाधोगमनोन्मुखः ॥ ७३१८॥
ENMSS@7319@1ऊर्ध्वार्धे लक्षणं यस्य नाधोऽर्धे लक्षणं भवेत् ।
ENMSS@7319@2तं खङ्गं मध्यमं प्राहुः प्रवीणमतयो बुधाः ॥ ७३१९॥
ENMSS@7320@1ऊर्ध्वीकृतग्रीवमहो मुधैव  किं याचसे चातकपोत मेघम् ।
ENMSS@7320@2अत्यूर्जितं गर्जितमात्रमस्मिन्  अम्भोधरे बिन्दुलवस्तु दूरम् ॥ ७३२०॥
ENMSS@7321@1ऊर्ध्वीकृतास्या रविदत्तदृष्टयः  समेत्य सर्वे सुरविद्विषः पुरः ।
ENMSS@7321@2श्वानः स्वरेण श्रवणान्तशातिना  मिथो रुदन्तः करुणेन निर्ययुः ॥ ७३२१॥
ENMSS@7322@1ऊषरं कर्मसस्यानां क्षेत्रं वाराणसी पुरी ।
ENMSS@7322@2यत्र संलभ्यते मोक्षः समं चण्डालपण्डितैः ॥ ७३२२॥
ENMSS@7323@1ऊषरेषु च क्षेत्रेषु यथा बीजं हि निष्फलम् ।
ENMSS@7323@2उपकारोऽपि नीचानां कृतो भवति तादृशः ॥ ७३२३॥
ENMSS@7324@1ऊषरेषु विवरेषु चाम्भसां  वीचयोऽपि भवता विनिर्मिताः ।
ENMSS@7324@2क्षेत्रसीम्नि निहितास्तु बिन्दवो  वारिवाह भवतो नवो नयः ॥ ७३२४॥
ENMSS@7325@1ऊषरे सरिति शाल्मलीवने  दावपावकचितेऽपि चन्दने ।
ENMSS@7325@2तुल्यमर्पयति वारि वारिदे  कीर्तिरस्तु गुणगौरवैर्गतम् ॥ ७३२५॥
ENMSS@7326@1ऊष्मव्यपेता रहिताश्च वृद्ध्या  संयोगहीना लघवोऽपि चान्तः ।

ENMSS@7326@2श्लोकस्य वर्णा इव विद्विषस्ते पादान्तमागम्य गुरूभवन्ति ॥ ७३२६॥

ENMSS@7327@1ऊष्मा यस्यां धात्र्यां धूमो वा तत्र वारि नरयुगले ।

ENMSS@7327@2निर्देष्टव्या च शिरा महता वारिप्रवाहेण ॥ ७३२७॥

ENMSS@7328@1ऊष्मा हि वित्तजो वृद्धिं तेजो नयति देहिनाम् ।

ENMSS@7328@2किं पुनस्तस्य संभोगस्त्यागधर्मसमन्वितः ॥ ७३२८॥

ENMSS@7329@1ऋक्षस्य क्रोडसंधिप्रहितमुखतया मण्डलीभूतमूर्तेर् आरात् सुप्तस्य वीर त्वदरिवरपुरद्वारि नीहारकाले ।

ENMSS@7329@2प्रातर्निद्राविनोदक्रमजनितसुखोन्मीलितं चक्षुरेकं व्याधाः पालालभस्मस्थितदहनकणाकारमालोकयन्ति ॥ ७३२९॥

ENMSS@7330@1ऋक्षाणां भूरिधाम्नां श्रितमधिपतिना प्रस्फुरद्भीमतारं स्फारं नेत्रानलेन प्रसभनियमितोच्चापमीनध्वजेन ।

ENMSS@7330@2रामायत्तं पुरारेः कुमुदशुचि लसन्नीलसुग्रीवमङ्गं प्लावङ्गं सैन्यमन्यद् दशवदनशिरच्छेदहेतु श्रियै वः ॥ ७३३०॥

ENMSS@7331@1ऋक्षैर्वृतो हरिपदे निवसन् समीर- संतानशैत्यजनकः कुमुदप्रमोदी ।

ENMSS@7331@2निघ्नन् निशाचरतमः पृथुनीललक्ष्मा तारापतिः स्फुरति चित्रमनङ्गदोऽयम् ॥ ७३३१॥

ENMSS@7332@1ऋग्यजुःसामनामानस्त्रयो वेदास्त्रयी स्मृता ।

ENMSS@7332@2उभौ लोकाववाप्नोति त्रय्यां तिष्ठन् यथाविधि ॥ ७३३२॥

ENMSS@7333@1ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।

ENMSS@7333@2मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत् ॥ ७३३३॥

ENMSS@7333A@1ऋजुता धन्वगुणयोरस्तु वस्तुस्वरूपतः ।

ENMSS@7333A@2कार्यसिद्धौ प्रशस्येत वक्रतैव तयोः पुनः ॥

ENMSS@7334@1ऋजुत्वं च परित्यज्य कलां दर्शयतोऽर्चना ।

ENMSS@7334@2द्विजराजोऽनृजुत्वेन महेशेनापि मह्यते ॥ ७३३४॥

ENMSS@7335@1ऋजुत्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।

ENMSS@7335@2दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ ७३३५॥

ENMSS@7336@1ऋजुत्वमौनश्रुतिपारगामिता यदीयमेतत् परमेव हिंसितुम् ।

ENMSS@7336@2अतीव विश्वासविधायि चेष्टितं बहुर्महानस्य स दाम्भिकः शरः ॥ ७३३६॥

ENMSS@7337@1ऋजुदृशः कथयन्ति पुराविदो  मधुभिदं किल राहुशिरश्छिदम् ।

ENMSS@7337@2विरहिमूर्धभिदं निगदन्ति न  क्क नु शशी यदि तज्ञठरानलः ॥ ७३३७॥

ENMSS@7338@1ऋजुनयननिपातः कामतन्त्राभिघातस् तनुरपि तरलाक्ष्याः कस्य न स्यात्

कटाक्षः ।

ENMSS@7338@2इति नमितमुखेन्दुं पश्यति प्राणनाथं  जनसदसि विदग्धा

पक्ष्मणामन्तरेण ॥ ७३३८॥

ENMSS@7339@1ऋजुना निधेहि चरणौ  परिहर सखि निखिलनागराचारम् ।

ENMSS@7339@2इह डाकिनीति पल्ली-  पतिः कटाक्षेऽपि दण्डयति ॥ ७३३९॥

ENMSS@7340@1ऋजु पश्यति यः सर्वं चक्षुषानुपिबन्निव ।

ENMSS@7340@2आसीनमपि तूष्णीकम् अनुरज्यन्ति तं प्रजाः ॥ ७३४०॥

ENMSS@7341@1ऋजुरेष पक्षवानिति  काण्डे प्रीतिं खले च मा कार्षीः ।

ENMSS@7341@2प्रायेण त्यक्तगुणः  फलेन हृदयं विदारयति ॥ ७३४१॥

ENMSS@7342@1ऋज्वायतां च विरलां च नतोन्नतां च  सप्तर्षिवंशकुटिलां च

निवर्तनेषु ।

ENMSS@7342@2निर्मुच्यमानभुजगोदरनिर्मलस्य  सीमामिवाम्बरतलस्य विभज्यमानाम् ॥ ७३४२॥

ENMSS@7343@1ऋज्वायतां हि मुखतोरणलोलमालां  भ्रष्टां क्षितौ त्वमवगच्छसि

मूर्ख सर्पम् ।

ENMSS@7343@2मन्दानिलेन निशि या परिवर्तमाना  किंचित् करोति भुजगस्य विचेष्टितानि

॥ ७३४३॥

ENMSS@7344@1ऋज्वी दृष्टिरनुल्बणं विहसितं मन्दं परिस्पन्दितं  द्वेषो नर्मणि

दूरतीर्थगमने यत्नो रतिर्लिङ्गिषु ।

ENMSS@7344@2यस्यास्त्यक्तसुखस्पृहं किल वपुः पीनाल्पलम्बस्तनी  सक्षीरा

विटचेटकैकमहिषी रण्डा शिवायास्तु वः ॥ ७३४४॥

ENMSS@7345@1ऋज्वी स्थिरा सुवृत्ता  पाणिग्रहणोज्ज्वला सुवंशोत्था ।

ENMSS@7345@2संधारयति पतन्तं  संप्रति गृहणीव यष्टिर्माम् ॥ ७३४५॥

ENMSS@7346@1ऋणं कृतं त्वदत्तं चेद् बाधतेऽत्र परत्र च ।

ENMSS@7346@2न नश्येद् दुष्कृतं तद्वद् भुक्तिं वा निष्कृतिं विना ॥ ७३४६॥

ENMSS@7347@1ऋणं मित्रान्न कर्तव्यं न देयं चापि मित्रके ।

ENMSS@7347@2प्रीतिच्छेदकरी ज्ञेया यस्माद् वै ऋणकर्तरी ॥ ७३४७॥
ENMSS@7348@1ऋणं याञ्चा च वृद्धत्वं जारचोरदरिद्रताः ।
ENMSS@7348@2रोगश्च भुक्तशेषश्चाप्यष्ट कष्टाः प्रकीर्तिताः ॥ ७३४८॥
ENMSS@7349@1ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
ENMSS@7349@2भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ ७३४९॥
ENMSS@7350@1ऋणत्रयं द्विजातीनां जन्मनः प्रभृति स्थितम् ।
ENMSS@7350@2ऋणान्तरभृतां पुंसां जीवनं जीवनं विना ॥ ७३५०॥
ENMSS@7351@1ऋणत्रयं निराकारि नूत्नं चाकारि येन नो ।
ENMSS@7351@2स एकः सुकृती लोकः सर्वत्र सुखमेधते ॥ ७३५१॥
ENMSS@7352@1ऋणत्रयमपाकर्तुं शास्त्राज्ञाभङ्गभीः पुरः ।
ENMSS@7352@2चतुर्थर्णनिराकारे प्रत्यक्षं नृपतेर्भयम् ॥ ७३५२॥
ENMSS@7353@1ऋणदाता च दैवज्ञः श्रोत्रियः सुजला नदी ।
ENMSS@7353@2यत्र ह्येते न विद्यन्ते न तत्र दिवसं वसेत् ॥ ७३५३॥
ENMSS@7354@1ऋणदैः स्वजनैः पुत्रैर्लब्धक्षामप्रतिग्रहः ।
ENMSS@7354@2नित्यमायास्यते येन कलिदानेन तेन किम् ॥ ७३५४॥
ENMSS@7355@1ऋणपापसमुद्धाराद् ऋणोद्धारो वरः स्मृतः ।
ENMSS@7355@2परलोके दहेत् पापम् ऋणाग्निरिह तत्र च ॥ ७३५५॥
ENMSS@7356@1ऋणप्रदाता वैद्यस्तु श्रोत्रियः सजला नदी ।
ENMSS@7356@2राजा यत्र न विद्यन्ते न कुर्यात् तत्र संस्थितिम् ॥ ७३५६॥
ENMSS@7357@1ऋणमाद्यं निराकृत्य निराकर्तुमृणान्तरम् ।
ENMSS@7357@2प्रतिष्ठा राजते यस्य गृहस्थाश्रम एव सः ॥ ७३५७॥
ENMSS@7358@1ऋणवच्चिरसंशोध्यं वचसा प्रतिपादितम् ।
ENMSS@7358@2यन् नित्ययाचनद्वेषं याच्यदानेन तेन किम् ॥ ७३५८॥
ENMSS@7359@1ऋणशेषं रोगशेषं शत्रुशेषं न रक्षयेत् ।
ENMSS@7359@2याचकाद्यैः प्रार्थितः सन् न तीक्ष्णं चोत्तरं वदेत् ।
ENMSS@7359@3तत्कार्यं तु समर्थश्चेत् कुर्याद् वा कारयीत च ॥ ७३५९॥
ENMSS@7360@1ऋणशेषोऽग्निशेषश्च व्याधिशेषस्तथैव च ।
ENMSS@7360@2पुनश्च वर्धते यस्मात् तस्माच्छेषं च कारयेत् ॥ ७३६०॥
ENMSS@7361@1ऋणशेषोऽग्निशेषश्च शत्रुशेषस्तथैव च ।
ENMSS@7361@2पुनः पुनर्विवर्धेत स्वल्पोऽप्यनिवारितः ॥ ७३६१॥
ENMSS@7362@1ऋणसंबन्धिनः सर्वे पुत्रदारं पशुस्तथा ।

ENMSS@7362@2ऋणक्षये क्षयं यान्ति का तत्र परिदेवना ॥ ७३६२॥
ENMSS@7363@1ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
ENMSS@7363@2अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ ७३६३॥
ENMSS@7364@1ऋणानुबन्धरूपेण पशुपत्नीसुतालयाः ।
ENMSS@7364@2ऋणक्षये क्षयं यान्ति का तत्र परिदेवना ॥ ७३६४॥
ENMSS@7365@1ऋणिकैः कलहैर्नित्यम् अच्छिन्नगणनागतेः ।
ENMSS@7365@2दानद्विषोऽनपत्यस्य मन्दाग्नेश्च धनेन किम् ॥ ७३६५॥
ENMSS@7366@1ऋणीकृता किं हरिणीभिरासीद्  अस्याः सकाशान् नयनद्वयश्रीः ।
ENMSS@7366@2भूयोगुणेयं सकला बलाद् यत्  ताभ्योऽनयालभ्यत बिभ्यतीभ्यः ॥ ७३६६॥
ENMSS@7367@1ऋतुमत्यां तु तिष्ठन्त्यां स्वेच्छादानं विधीयते ।
ENMSS@7367@2तस्मादुद्वाहयेन् नग्नां मनुः स्वायंभुवोऽब्रवीत् ॥ ७३६७॥
ENMSS@7368@1ऋतुर्मासद्वयेनैव षण्मासैरयनं स्मृतम् ।
ENMSS@7368@2अयनद्वितयं वर्षो देवानां वासरो निशा ॥ ७३६८॥
ENMSS@7369@1ऋतुर्व्यतीतः परिवर्तते पुनः  क्षयं प्रयातः पुनरेति चन्द्रमाः ।
ENMSS@7369@2गतं गतं नैव तु संनिवर्तते  जलं नदीनां च नृणां च यौवनम् ॥ ७३६९॥
ENMSS@7370@1ऋतुस्नातां तु यो भार्यां नैव गच्छति मूढधीः ।
ENMSS@7370@2घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ ७३७०॥
ENMSS@7371@1ऋतुस्नाता पिबेन् नारी श्वेतकण्टारिकाजटाम् ।
ENMSS@7371@2पयसा पुत्रसंभूतिस्तस्याः संजायते ध्रुवम् ॥ ७३७१॥
ENMSS@7372@1ऋतेन जीवेदनृतेन जीवेन्  मितेन जीवेत् प्रमितेन जीवेत् ।
ENMSS@7372@2सत्यानृताभ्यामथवापि जीवेत्  श्ववृत्तिमेकां परिवर्जयेत् तु ॥ ७३७२॥
ENMSS@7373@1ऋते नियोगात् सामर्थ्यम् अवबोद्धुं न शक्यते ।
ENMSS@7373@2सहसा विनियोगो हि दोषवान् प्रतिभाति मे ॥ ७३७३॥
ENMSS@7374@1ऋते यदर्थं प्रणयाद् रक्ष्यते यच्च रक्षति ।
ENMSS@7374@2पूर्वोपचितसंबन्धं तन् मित्रं नित्यमुच्यते ॥ ७३७४॥
ENMSS@7375@1ऋते सेनाप्रणेतारं पृतना सुमहत्यपि ।
ENMSS@7375@2दीर्यते युद्धमासाद्य पिपीलिकपुटं यथा ॥ ७३७५॥
ENMSS@7376@1ऋत्विक्पुरोहिताचार्याः शिष्याः संबन्धिबान्धवाः ।
ENMSS@7376@2सर्वे पूज्याश्च मान्याश्च श्रुतवृत्तोपसंहिताः ॥ ७३७६॥

ENMSS@7377@1ऋद्धिमान् राक्षसो मूढश्चित्रम् नासौ यदुद्धतः ।
ENMSS@7377@2को वा हेतुरनार्याणां धर्म्ये वर्त्मनि वर्तितुम् ॥ ७३७७॥
ENMSS@7378@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@7378@2ऋद्धियुक्ता हि पुरुषा न सहन्ते परस्तवम् ॥ ७३७८॥
ENMSS@7379@1ऋषभोऽत्र गीयत इति  श्रुत्वा स्वरपारगा वयं प्राप्ताः ।
ENMSS@7379@2को वेद गोष्ठमेतद्  गोशान्तौ विहितबहुमानम् ॥ ७३७९॥
ENMSS@7380@1ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे ।
ENMSS@7380@2सत्यवादी हि लोकेऽस्मिन् परमं गच्छति क्षयम् ॥ ७३८०॥
ENMSS@7381@1ऋषयोऽप्युग्रतपसो दैवेनाभिप्रपीडिताः ।
ENMSS@7381@2उत्सृज्य नियमांस्तीव्रान् भ्रश्यन्ते काममन्युभिः ॥ ७३८१॥
ENMSS@7382@1ऋषयो मनवो देवा मनुपुत्रा महौजसः ।
ENMSS@7382@2कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ ७३८२॥
ENMSS@7383@1ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।
ENMSS@7383@2सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः ॥ ७३८३॥
ENMSS@7384@1ऋषिरयमतिथिश्चेद् विष्टरः पाद्यमर्घ्यं  तदनु च मधुपर्कः कल्प्यतां श्रोत्रियाय ।
ENMSS@7384@2अथ तु रिपुरकस्माद् द्वेष्टि नः पुत्रभाण्डं  तदिह नयविहीने कार्मुकस्याधिकारः ॥ ७३८४॥
ENMSS@7385@1ऋषिसेना विना वेदम् अप्रिया सहगामिनी ।
ENMSS@7385@2देवसेना विना दात् न् अविष्णुः पृथिवीपतिः ॥ ७३८५॥
ENMSS@7386@1ऋषींश्च देवांश्च महासुरांश्च  त्रैविद्यवृद्धांश्च वने मुनींश्च ।
ENMSS@7386@2कानापदो नोपनमन्ति लोके  परावरज्ञास्तु न संभ्रमन्ति ॥ ७३८६॥
ENMSS@7387@1ऋषीणां च नदीनां च कुलानां च महात्मनाम् ।
ENMSS@7387@2प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च ॥ ७३८७॥
ENMSS@7388@1ऋषीणां परमं गुह्यम् इदं भरतसत्तम ।
ENMSS@7388@2तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते ॥ ७३८८॥
ENMSS@7389@1ऋषेरस्याश्रमे पुण्ये शापसंत्रस्तमानसः ।
ENMSS@7389@2मुद्बोधतोऽपि प्रायोऽयं मृगात् सिंहः पलायते ॥ ७३८९॥
ENMSS@7390@1एकं काञ्चनभूधरं सुवलयं वासः सुधावारिधिं  तारं तारकराजमण्डलमिदं संप्राप्य सत्कुण्डलम् ।

ENMSS@7390@2दूरस्थापि च तेन तेन सदृशं त्वां भूषणं चापरं स्त्री
मानग्रहिलेव याचतितरां श्रीराम कीर्तिस्तव ॥ ७३९०॥
ENMSS@7391@1एकं चक्षुर्विवेको हि द्वितीयं सत्समागमः ।
ENMSS@7391@2तौ न स्तो यस्य स क्षिप्रं मोहकूपे पतेद् ध्रुवम् ॥ ७३९१॥
ENMSS@7392@1एकं चित्रमतीव दृष्टमिह यन्नालोकितं न श्रुतं किं कस्मै
कथयामि कस्य मनसि स्याद् वा मम प्रत्ययः ।
ENMSS@7392@2एकस्मिन् कनकस्य दाम्नि सरसीमैलिन्दमत्तद्विप-
ज्योत्स्नाचन्द्रचकोरचक्रचमरीवालाश्चमत्कुर्वते ॥ ७३९२॥
ENMSS@7393@1एकं जीवनमूलं चञ्चलमपि तापयन्तमपि सततम् ।
ENMSS@7393@2अन्तर्वहति वराकी सा त्वां नासेव निःश्वासम् ॥ ७३९३॥
ENMSS@7394@1एकं दन्तच्छदस्य स्फुरति जपवशादर्धमन्यत् प्रकोपाद् एकः पाणिः
प्रणन्तुं शिरसि कृतपदः क्षेप्तुमन्यस्तमेव ।
ENMSS@7394@2एकं ध्यानान्निमीलत्यपरमविषहं वीक्षितुं चक्षुरित्थं
तुल्यानिच्छापि वामा तनुरवतु स वो यस्य संध्यावसाने ॥ ७३९४॥
ENMSS@7395@1एकं दृष्ट्वा शतं दृष्ट्वा दृष्ट्वा पञ्चशतान्यपि ।
ENMSS@7395@2अतिलोभो न कर्तव्यश्चक्रं भ्रमति मस्तके ॥ ७३९५॥
ENMSS@7395A@1एकं द्विजं च स्पृहणीयवाचं मत्तद्विरेफं च मधुः पुपोष ।
ENMSS@7395A@2सतो गुणानप्यसतोऽपि दोषान् जात्या विहीनो न विवेक्तुमीष्टे ॥
ENMSS@7396@1एकं धाम शमीषु लीनमपरं सूर्योपलज्योतिषां व्याजादद्रिषु
गूढमन्यदुदधौ संगुप्तमौर्वायते ।
ENMSS@7396@2त्वत्तेजस्तपनांशुमांसलसमुत्तापेन दुर्गं भयाद् वार्क्षं पार्वतमौदकं
यदि ययुस्तेजांसि किं पार्थिवाः ॥ ७३९६॥
ENMSS@7397@1एकं ध्याननिमीलनान्मुकुलितप्रायं द्वितीयं पुनः पार्वत्या
वदनाम्बुजस्तनभरे श‍ृङ्गारभावालसम् ।
ENMSS@7397@2अन्यद् दूरविकृष्टचापमदनक्रोधानलोद्दीपितं शंभोर्भिन्नरसं
समाधिसमये नेत्रत्रयं पातु वः ॥ ७३९७॥
ENMSS@7398@1एकं नाम जडात्मकस्य मुषितं लावण्यमिन्दोस्तया नेत्राभ्यामसितोत्पलस्य
च रुचिः प्रायेण तन्नो मृषा ।
ENMSS@7398@2नो जानाति हृतामसौ पदगतिं मत्तो वराकः करी तन्वङ्ग्या विदतोऽपि
यन्मम हृतं चेतस्तदत्यद्भुतम् ॥ ७३९८॥
ENMSS@7399@1एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा तं मोहाच् श्रयते

मदः स च मदालस्येन निर्विद्यते ।

ENMSS@7399@2निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा  स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणानभिद्रुह्यति ॥ ७३९९॥

ENMSS@7400@1एकं महिषशिरःस्थितम्  अपरं सानन्दसुरगणप्रणतम् ।

ENMSS@7400@2गिरिदुहितुः पदयुगलं  शोणितमणिरागरञ्जितं जयति ॥ ७४००॥

ENMSS@7401@1एकं मित्रं भजते  मासेनेन्दुः स्वयं क्षयं गच्छन् ।

ENMSS@7401@2मित्रशतानि भजंस्त्वं  प्रतिक्षणं वृद्धिमुपयासि ॥ ७४०१॥

ENMSS@7402@1एकं मित्रं भूपतिर्वा यतिर्वा  एका भार्या सुन्दरी वा दरी वा ।

ENMSS@7402@2एकं शास्त्रं वेदमध्यात्मकं वा  एको देवः केशवो वा जिनो वा ॥ ७४०२॥

ENMSS@7403@1एकं लिङ्गं प्रमदा-  हृदयं विदधाति जर्जरं सहसा ।

ENMSS@7403@2तेषां षड्कं येषां  अन्तर्गूढं न ते कथं पशवः ॥ ७४०३॥

ENMSS@7404@1एकं वदति मनो मम  यामि न यामीति हृदयमपरं मे ।

ENMSS@7404@2हृदयद्वयमुचितं तव  सुन्दरि हृतकान्तचित्तायाः ॥ ७४०४॥

ENMSS@7405@1एकं वस्तु द्विधा कर्तुं बहवः सन्ति धन्विनः ।

ENMSS@7405@2धन्वी स मार एवैको द्वयोरैक्यं करोति यः ॥ ७४०५॥

ENMSS@7406@1एकं वस्तु यदस्ति विश्वजनतानन्दप्रमोदात्मकं  सत्यं तत्त्वमसीति वाक्यमखिलं त्वय्येव विश्राम्यति ।

ENMSS@7406@2त्वामाकर्ण्य न किंचिदन्यदवनीशृङ्गार भो मन्यते  त्वय्याप्ते जनकादिकीर्तिजनके किं ज्ञानमीमांसया ॥ ७४०६॥

ENMSS@7407@1एकं वा कुपितप्रियाप्रणयिनीं कृत्वा मनोनिर्वृतिं  तिष्ठामो निजचारुपीवरकुचक्रीडारसास्वादने ।

ENMSS@7407@2अन्यद् वा सुरसिन्धुसैकततटीदर्भाष्टकस्रस्तर-  स्थाने ब्रह्मपदं समाहितधियो ध्यायन्त एवास्महे ॥ ७४०७॥

ENMSS@7408@1एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।

ENMSS@7408@2सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविस्रवः ॥ ७४०८॥

ENMSS@7409@1एकं वै सेवते नित्यम् अन्यं चेतसि रोचते ।

ENMSS@7409@2पुरुषाणामलाभेन नारी चैव पतिव्रता ॥ ७४०९॥

ENMSS@7410@1एकं संदिग्धयोस्तावद् भावि तत्रेष्टजन्मनि ।

ENMSS@7410@2हेतुमाहुः स्वमन्त्रादीन् असङ्गानन्यथा विटाः ॥ ७४१०॥

ENMSS@7411@1एकं सागरतीरनीरनिकरस्फाराञ्जलिक्षालितैः  पुष्पैरच्युतपूजनं

निजकरव्यापारसंपादितैः ।

ENMSS@7411@2नो चेन् मञ्जुलमालतीदललसत्खट्वार्चिते मन्दिरे

कान्तातुङ्गनितम्बबिम्बसुरतक्रीडारसैः स्थीयते ॥ ७४११॥

ENMSS@7412@1एकं सुते मृगारिणी बहून् सूते वृकी सुतान् ।

ENMSS@7412@2उत्तारः प्रलयं यान्ति नाद्यमानाः कथंचन ॥ ७४१२॥

ENMSS@7413@1एकं हन्यान् न वा हन्याद् इषुः क्षिप्तो धनुष्मता ।

ENMSS@7413@2प्राज्ञेन तु मतिः क्षिप्ता हन्याद् गर्भगतानपि ॥ ७४१३॥

ENMSS@7414@1एकं हन्यान् न वा हन्याद् इषुर्मुक्तो धनुष्मता ।

ENMSS@7414@2बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद् राष्ट्रं सराजकम् ॥ ७४१४॥

ENMSS@7415@1एकं हन्यान् न वा हन्याद् इषुर्मुक्तो धनुष्मता ।

ENMSS@7415@2सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रिनिश्चयः ॥ ७४१५॥

ENMSS@7416@1एकं हि चक्षुरमलं सहजो विवेको विद्वद्भिरेव सह संवसतिर्द्वितीयम् ।

ENMSS@7416@2एतद् द्वयं भुवि न यस्य स तत्त्वतोऽन्धस् तस्यापमार्गचलने वद

कोऽपराधः ॥ ७४१६॥

ENMSS@7417@1एकः कर्णमहीपतिः प्रतिदिनं लक्षाधिका याचकाः कस्मै किं वितरिष्यतीति

मनसा चिन्तां वृथा मा कृथाः ।

ENMSS@7417@2आस्ते किं प्रतियाचकं सुरतरुः प्रत्यम्बुजं किं रविश् चन्द्रः किं

प्रतिकैरवं प्रतिलतागुल्मं किमम्भोधरः ॥ ७४१७॥

ENMSS@7418@1एकः कापुरुषो दीर्णो दारयेन् महतीं चमूम् ।

ENMSS@7418@2तं दीर्णमनु दीर्यन्ते योधाः शूरतमा अपि ॥ ७४१८॥

ENMSS@7419@1एकः कोऽपि महीधरो लघुतरो दोर्भ्यां धृतो लीलया तेन त्वं दिवि

भूतले च विदितो गोवर्द्धनोद्धारकः ।

ENMSS@7419@2त्वां त्रैलोक्यवहं वहामि कुचयोरग्रे सदा पुष्पवत् तत् किं केशव

जल्पितेन बहुना पुण्यैर्यशो लभ्यते ॥ ७४१९॥

ENMSS@7420@1एकः क्षमावतं दोषो द्वितीयो नोपलभ्यते ।

ENMSS@7420@2यदेनं क्षमया युक्तम् अशक्तं मन्यते जनः ॥ ७४२०॥

ENMSS@7421@1सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम् ।

ENMSS@7421@2क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥ ७४२१॥

ENMSS@7422@1एकः खलोऽपि यदि नाम भवेत् सभायां व्यर्थीकरोति विदुषामखिलं

प्रयासम् ।

ENMSS@7422@2एकापि पूर्णमुदरं मधुरैः पदार्थैर् आलोड्य रेचयति हन्त न मक्षिका किम् ॥ ७४२२॥

ENMSS@7423@1एकः पञ्चत्वमासाद्य जायते पुनरष्टधा ।

ENMSS@7423@2अहो वाणिज्यसंपत्तिः काशीपुरनिवासिनाम् ॥ ७४२३॥

ENMSS@7424@1एकः पथा न गन्तव्यं न सुप्तिं बाह्यमन्दिरे ।

ENMSS@7424@2जनवाक्यं न कर्तव्यं स्त्रीणामालोचनं विना ॥ ७४२४॥

ENMSS@7425@1एकः पापानि कुरुते फलं भुङ्क्ते महाजनः ।

ENMSS@7425@2भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ॥ ७४२५॥

ENMSS@7426@1एकः पालयते लोकम् एकः पालयते कुलम् ।

ENMSS@7426@2मज्जत्येको हि निरय एकः स्वर्गे महीयते ॥ ७४२६॥

ENMSS@7427@1एकः पुत्रो वरं विद्वान् बहुभिर्निर्गुणैस्तु किम् ।

ENMSS@7427@2एकस्तारयते वंशम् अन्ये संतापकारकाः ॥ ७४२७॥

ENMSS@7428@1एकः प्रजायते जन्तुरेक एव प्रलीयते ।

ENMSS@7428@2एकोऽनुभुङ्क्ते सुकृतम् एक एव च दुष्कृतम् ॥ ७४२८॥

ENMSS@7429@1एकः प्रयात्युपरमं द्रविणं तदीयं  हृत्वापरः प्रसभमुद्वहति प्रमोदम् ।

ENMSS@7429@2नो वेत्ति तत् स्वनिधने परकोशगामि  धिग् वासनामसममोहकृतान्धकाराम् ॥ ७४२९॥

ENMSS@7430@1एकः शतं योधयति प्राकारस्थो धनुर्धरः ।

ENMSS@7430@2शतं दशसहस्राणि तस्माद् दुर्गं विधीयते ॥ ७४३०॥

ENMSS@7431@1एकः शत्रुर्न द्वितीयोऽस्ति शत्रुर् अज्ञानतुल्यः पुरुषस्य राजन् ।

ENMSS@7431@2येनावृतः कुरुते संप्रयुक्तो  घोराणि कर्माणि सुदारुणानि ॥ ७४३१॥

ENMSS@7432@1एकः संग्रामरिङ्गत्तुरगखुररजोराजिभिर्नष्टदृष्टिर्
दिग्यात्राजैत्रमत्तद्विरदभरनमद्भूमिभग्नस्तथान्यः ।

ENMSS@7432@2वीराः के नाम तस्मात् त्रिजगति न ययुः क्षीणतां काणकुब्ज-न्यायादेतेन
मुक्तावभयमभजतां वासवो वासुकिश्च ॥ ७४३२॥

ENMSS@7433@1एकः संपन्नमश्नाति वस्ते वासश्च शोभनम् ।

ENMSS@7433@2योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः ॥ ७४३३॥

ENMSS@7434@1एकः संप्रति पाकशासनपुरीपीयूषसत्री पुरः  पारक्यं तमसामसौ कुमुदिनीचैतन्यचिन्तामणिः ।

ENMSS@7434@2मानोच्चाटनकार्मणं मृगदृशां देवो नभोऽम्भोनिधौ पश्योदञ्चति पञ्चबाणवणिजो यात्रावहित्रं शशी ॥ ७४३४॥

ENMSS@7435@1एकः स एव जीवति स्वहृदयशून्योऽपि सहृदयो राहुः ।

ENMSS@7435@2यः सकललघिमकारणम् उदरं न बिभर्ति दुष्पूरम् ॥ ७४३५॥

ENMSS@7436@1एकः स एव तेजस्वी सैहिकेयः सुरद्विषाम् ।

ENMSS@7436@2शिरोमात्रावशेषेण जीयन्ते येन शत्रवः ॥ ७४३६॥

ENMSS@7437@1एकः स एव परिपालयताञ्जगन्ति गौरीगिरीशचरितानुकृतिं दधानः ।

ENMSS@7437@2आभाति यो दशनशून्यमुखैकदेश- देहार्धहारितवधूक इवैकदन्तः ॥ ७४३७॥

ENMSS@7438@1एकः सकलजनानां हृदयेषु कृतास्पदो मदः शत्रुः ।

ENMSS@7438@2येनाविष्टशरीरो न शृणोति न पश्यति स्तब्धः ॥ ७४३८॥

ENMSS@7439@1एकः सखा प्रियो भूय उपकारी गुणान्वितः ।

ENMSS@7439@2हन्तव्यः स्त्रीनिमित्तेन कष्टमापतितं मम ॥ ७४३९॥

ENMSS@7440@1एकः स व्यसनी पुमानचरमैर्निःश्वासवातैः समं हा मे सा दयितेति यस्य वदतः प्राणाः समं निर्गताः ।

ENMSS@7440@2अन्ये तु व्यसनं क्षिपन्ति पशवः कान्तावियोगोद्भवैश् चिन्ताग्लानिविषाददैन्यजनितैर्बाष्पैरनाहारिणः ॥ ७४४०॥

ENMSS@7441@1एकः सुधांशुर्न कथंचन स्यात् तृप्तिक्षमस्त्वन्नयनद्वयस्य ।

ENMSS@7441@2त्वल्लोचनासेचनकस्तदस्तु नलास्यशीतद्युतिसद्वितीयः ॥ ७४४१॥

ENMSS@7442@1एकः स्तनस्तुङ्गतरः परस्य वार्तामिव प्रष्टुमगान् मुखाग्रम् ।

ENMSS@7442@2यस्याः प्रियार्धस्थितिमुद्वहन्त्याः सा पातु वः पर्वतराजपुत्री ॥ ७४४२॥

ENMSS@7443@1एकः स्थितोऽन्तः प्राप्तोऽन्यः परस्याद्यैव दुर्ग्रहः ।

ENMSS@7443@2किं करोमीति जननीं पृच्छन्तीष्वपरासु च ॥ ७४४३॥

ENMSS@7444@1एकः स्वादु न भुञ्जीत एकश्चार्थान् न चिन्तयेत् ।

ENMSS@7444@2एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥ ७४४४॥

ENMSS@7445@1एक एव खगो मानी वने वसति चातकः ।

ENMSS@7445@2पिपासितो वा म्रियते याचते वा पुरंदरम् ॥ ७४४५॥

ENMSS@7446@1एक एव खगो मानी सुखं जीवति चातकः ।

ENMSS@7446@2अर्थित्वं याति शक्रस्य न नीचमुपसर्पति ॥ ७४४६॥

ENMSS@7447@1एक एव चरेद् धर्मं नास्ति धर्मे सहायता ।

ENMSS@7447@2केवलं विधिमासाद्य सहायः किं करिष्यति ॥ ७४४७॥
ENMSS@7448@1एक एव दमे दोषो द्वितीयो नोपपद्यते ।
ENMSS@7448@2यदेनं क्षमया युक्तम् अशक्तं मन्यते जनः ॥ ७४४८॥
ENMSS@7449@1एतस्य तु महाप्राज्ञ दोषस्य सुमहान् गुणः ।
ENMSS@7449@2क्षमायां विपुला लोकाः सुलभा हि सहिष्णुना ॥ ७४४९॥
ENMSS@7450@1एक एव न भुञ्जीयाद् यदिच्छेच् शुभमात्मनः ।
ENMSS@7450@2द्वित्रिभिर्बन्धुभिः सार्धं भोजनं कारयेन् नरः ॥ ७४५०॥
ENMSS@7451@1एक एव पदार्थस्तु त्रिधा भवति वीक्षितः ।
ENMSS@7451@2कुणपं कमिनी मांसं योगिभिः कामिभिः श्वभिः ॥ ७४५१॥
ENMSS@7452@1एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् ।
ENMSS@7452@2नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥ ७४५२॥
ENMSS@7453@1एक एव महान् दोषो भवतां विमले कुले ।
ENMSS@7453@2लुम्पन्ति पूर्वजां कीर्तिं जाता जाता गुणाधिकाः ॥ ७४५३॥
ENMSS@7454@1एक एव लघुर्यत्र आदितालः स कथ्यते ।
ENMSS@7454@2विनोदे रासकस्तेन श्रोत् णां च सुखावहः ॥ ७४५४॥
ENMSS@7455@1एक एव सुहृद् धर्मो निधनेऽप्यनुयाति यः ।
ENMSS@7455@2शरीरेण समं नाशं सर्वमन्यद् हि गच्छति ॥ ७४५५॥
ENMSS@7456@1एक एव हितार्थाय तेजस्वी पार्थिवो भुवः ।
ENMSS@7456@2युगान्त इव भास्वन्तो बहवोऽत्र विपत्तये ॥ ७४५६॥
ENMSS@7457@1एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
ENMSS@7457@2एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ ७४५७॥
ENMSS@7458@1एक एव हि वन्ध्यायाः शोको भवति मानसः ।
ENMSS@7458@2अप्रजास्मीति संतापो न ह्यन्यः पुत्र विद्यते ॥ ७४५८॥
ENMSS@7459@1एक एवोपहारस्तु संधिरेतन्मतं हि नः ।
ENMSS@7459@2उपहारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः ॥ ७४५९॥
ENMSS@7460@1एककार्यनियोगेऽपि नानयोस्तुल्यशीलता ।
ENMSS@7460@2विवाहे च चितायां च यथा हुतभुजोर्द्वयोः ॥ ७४६०॥
ENMSS@7461@1एकक्षितिभृदुत्पन्नाः सच्छिद्राः कण्टकोल्बणाः ।
ENMSS@7461@2मिथः संघर्षणाद् वंशा दह्यन्ते साधुशाखिभिः ॥ ७४६१॥
ENMSS@7462@1एकगर्भोषिताः स्निग्धा मूर्ध्ना सत्कृत्य धारिताः ।
ENMSS@7462@2केशा अपि विरज्यन्ते जरया किमुताङ्गनाः ॥ ७४६२॥

ENMSS@7463@1एकगुणा भवति तिथिश्  चतुर्गुणं भवति नक्षत्रम् ।
ENMSS@7463@2चतुःषष्टिगुणं लग्नम्  एष ज्योतिषतन्त्रसिद्धान्तः ॥ ७४६३॥
ENMSS@7464@1एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
ENMSS@7464@2आक्रामत्येव तेजस्वी तथाप्यर्को नभस्तलम् ॥ ७४६४॥
ENMSS@7465@1एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः ।
ENMSS@7465@2क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः ॥ ७४६५॥
ENMSS@7466@1एकचित्तो लभेत् सिद्धिं द्विधाचित्तो विनश्यति ।
ENMSS@7466@2स्कन्धावारं हि गच्छन्तम् इषुकारो न पश्यति ॥ ७४६६॥
ENMSS@7467@1एकच्छत्रं क्षितितलमिदं भुञ्जते यन् नरेन्द्राः  स्वर्गास्थाने
मुदितमनसो यद् रमन्ते मुनीन्द्राः ।
ENMSS@7467@2यन् निर्वाणे निरुपमसुखं मर्त्यमुख्या लभन्ते  दानस्यायं स्फुरति महिमा
केवलस्यामलस्य ॥ ७४६७॥
ENMSS@7468@1एकच्छागं द्विरावेयं त्रिगवं पञ्चमाहिषम् ।
ENMSS@7468@2षडश्वं सप्तमातङ्गं शक्रस्यापि श्रियं हरेत् ॥ ७४६८॥
ENMSS@7469@1एकतः ऋतवः सर्वे समग्रवरदक्षिणाः ।
ENMSS@7469@2एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥ ७४६९॥
ENMSS@7470@1एकतः प्रणयपीडनं मुधा  मानधारणरसादरोऽन्यतः ।
ENMSS@7470@2रक्षती द्वयमिदं मनस्विनी  निर्वृणोतु कथमत्र जन्मनि ॥ ७४७०॥
ENMSS@7471@1एकतः सकला विद्या चातुर्यं पुनरेकतः ।
ENMSS@7471@2चातुर्येण विनाकृत्य सकला विकला कला ॥ ७४७१॥
ENMSS@7472@1एकतः सर्वपापानि मद्यपानं तथैकतः ।
ENMSS@7472@2एकतः सर्वदानानि ब्रह्मचर्यं तथैकतः ॥ ७४७२॥
ENMSS@7473@1एकतश्चतुरो वेदाः साङ्गोपाङ्गाः सविस्तराः ।
ENMSS@7473@2स्वाधीनास्ते नरश्रेष्ठ सत्यमेकं किलैकतः ॥ ७४७३॥
ENMSS@7474@1एकतश्चतुरो वेदा ब्रह्मचर्यं तथैकतः ।
ENMSS@7474@2एकतः सर्वपापानि मद्यपानं तथैकतः ॥ ७४७४॥
ENMSS@7475@1एकतश्च सुरसुन्दरीजनः  श्रीः प्रतीच्छति युयुत्सुमन्यतः ।
ENMSS@7475@2पाप्मना सह पलायतोऽयशश्  चैकतः कुलकलङ्ककारणम् ॥ ७४७५॥
ENMSS@7476@1एकतामिव गतस्य विवेकः  कस्यचिन् न महतोऽप्युपलेभे ।
ENMSS@7476@2भास्वता निदधिरे भुवनानाम्  आत्मनीव पतितेन विशेषाः ॥ ७४७६॥

ENMSS@7477@1एकतो दिवसान् बाला गणयत्येकतोऽन्तकः ।
ENMSS@7477@2न विद्मः प्रथमं कस्य यास्यामो वयमन्तिकम् ॥ ७४७७॥
ENMSS@7478@1एकतोऽपरितोषश्चेद् अन्यमन्यं महीभुजम् ।
ENMSS@7478@2निदाघपान्थवच्छायाम् अन्यामन्यामुपाश्रयेत् ॥ ७४७८॥
ENMSS@7478A@1एकतोऽपि भुवि भूरिशोऽभवन्  दीपकादहह पश्य दीपकाः ।
ENMSS@7478A@2अन्धकारनिधनाय भानुमन्-  मुक्तदिव्यविशिखादिवेषवः ॥
ENMSS@7479@1एकतोऽभ्युदितमिन्दुमण्डलं  स्मेरमास्यमसितभ्रुवोऽन्यतः ।
ENMSS@7479@2चञ्चुकोरकपुटीं चकोरिका  चालयत्युभयतोऽपि धावति ॥ ७४७९॥
ENMSS@7480@1एकतो मातृवात्सल्यं परतो गुणकोटयः ।
ENMSS@7480@2अनयोः समतां वक्तुं नालं ब्रह्मादयः सुराः ॥ ७४८०॥
ENMSS@7481@1एकतो वा कुलं कृत्स्नम् आत्मा वा कुलवर्धन ।
ENMSS@7481@2न समं सर्वमेवेति बुधानामेष निश्चयः ॥ ७४८१॥
ENMSS@7482@1एकतोव्याधिदुर्भिक्षप्रमुखा विपदोऽखिलाः ।
ENMSS@7482@2प्रजानामेकतस्त्वेका लुब्धता वसुधापतेः ॥ ७४८२॥
ENMSS@7483@1एकत्र कौलव्रतभङ्गशङ्का  विदग्धताभङ्गभयं परत्र ।
ENMSS@7483@2इत्याकुलानां कुलकामिनीनां  गतागतैरेव गता त्रियामा ॥ ७४८३॥
ENMSS@7484@1एकत्र नास्य रतिरित्यवधूयमानः  कोपादिव श्वसनकम्पविघूर्णितायाः
।
ENMSS@7484@2रक्तच्छदं मधुसुगन्धि सरोरुहिण्या  भृङ्गश्चुचुम्ब
कमलाननमादरेण ॥ ७४८४॥
ENMSS@7485@1एकत्र प्रपठन्ति साम च यजुश्चान्यत्र वेदान्तरं  हिंस्राश्चापि
मृगायिताश्च परतो यागोत्थधूमः शिवः ।
ENMSS@7485@2आतिथ्यादिविधिः परत्र विधिवत् पाद्यादिनापाद्यते  नानाशास्त्रविवेचनं
च वटुभिः संतन्यते सङ्गतैः ॥ ७४८५॥
ENMSS@7486@1एकत्र प्राकृतैः साम्यम् अन्यत्र परतन्त्रता ।
ENMSS@7486@2शुकस्य परितोषाय न वनं न च पत्तनम् ॥ ७४८६॥
ENMSS@7487@1एकत्र मधुनो बिन्दौ भक्षतेऽसंख्यदेहिनः ।
ENMSS@7487@2यो हि न स्यात् कृपा तस्य तस्मान् मधु न भक्षयेत् ॥ ७४८७॥
ENMSS@7488@1एकत्र वासादवसानभाजस् ताम्बूललक्ष्म्या इव संस्मरन्ती ।
ENMSS@7488@2वक्त्रेषु यद्वैरिविलासिनीनां  हासप्रभा तानवमाससाद ॥ ७४८८॥
ENMSS@7489@1एकत्र सार्थे व्रजतां बहूनां  तुल्येऽपि जाते शकुने फलानि ।

ENMSS@7489@2नानाप्रकाराणि भवन्ति येन तं हंसचारं प्रविचारयामः ॥ ७४८९॥

ENMSS@7490@1एकत्र स्फटिकतटांशुभिन्ननीरा नीलाश्मद्युतिभिदुराम्भसोऽपरत्र ।

ENMSS@7490@2कालिन्दीजलजनितश्रियः श्रयन्ते वैदग्धीमिह सरितः सुरापगायाः ॥ ७४९०॥

ENMSS@7491@1एकत्राददते जलं जलधरव्यूहाः परत्राप्यमी दीप्यद्दिक्करिणः परत्र वडवावक्त्रोद्गता वह्नयः ।

ENMSS@7491@2एतावत् सततव्ययेऽपि सुतरामाश्चर्यमम्भोनिधेस् ता एव स्थितयः स एव

महिमा सैवास्य गम्भीरता ॥ ७४९१॥

ENMSS@7492@1एकत्रापि हते जन्तौ पापं भवति दारुणम् ।

ENMSS@7492@2न सूक्ष्मानेकजन्तूनां घातिनो मधुपस्य किम् ॥ ७४९२॥

ENMSS@7493@1एकत्रासनसङ्गतिः परिहृता प्रत्युद्गमाद् दूरतस् ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।

ENMSS@7493@2आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥ ७४९३॥

ENMSS@7494@1एकत्रासनसङ्गते प्रियतमे पश्चादुपेत्यादराद् एकस्या नयने पिधाय महतः क्रीडानुबन्धच्छलात् ।

ENMSS@7494@2तिर्यग्वक्रितकन्धरः सपुलकस्वेदोद्गमानन्दिनीम् अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ ७४९४॥

ENMSS@7496@1एकत्वं न रसैः कयोः समजनि स्त्रीपुंसयोः प्रावृषि प्राप्तौ यद्रसनिर्भराविह धराकाशौ चिरादेकताम् ।

ENMSS@7496@2योषित्सङ्गमगूढसर्वतरुणः कालोऽयमालोक्यते छन्नः क्वापि दिवा युवापि

निशया क्रोडीकृतः क्रीडति ॥ ७४९६॥

ENMSS@7497@1एकदन्तं त्रिनयनं ज्वालानलसमप्रभम् ।

ENMSS@7497@2गणाध्यक्षं गजमुखं प्रणमामि विनायकम् ॥ ७४९७॥

ENMSS@7498@1एकदन्तद्युतिसितः शंभोः सूनुः श्रियेऽस्तु वः ।

ENMSS@7498@2विद्याकन्द इवोद्भिन्ननवाङ्कुरमनोहरः ॥ ७४९८॥

ENMSS@7499@1एकदा न विगृह्णीयाद् बहून् राजाभिघातिनः ।

ENMSS@7499@2सदर्पोऽप्युरगः कीटैर्बहुभिर्नाश्यते ध्रुवम् ॥ ७४९९॥

ENMSS@7500@1एकदेशमुपाध्याय ऋत्विग् यज्ञकृदुच्यते ।

ENMSS@7500@2एते मान्या यथापूर्वम् एभ्यो माता गरीयसी ॥ ७५००॥

ENMSS@7501@1एकद्विकरणे हेतू महापातकपञ्चके ।
ENMSS@7501@2न तृणे मन्यते कोपकामौ यः पञ्च कारयन् ॥ ७५०१॥
ENMSS@7502@1एकद्वित्रिकलाक्रमेण शशिनं गृह्णन्विमुञ्चन्नयं
यच्चण्डद्युतिरातनोति भगवानद्यापि चान्द्रायणम् ।
ENMSS@7502@2देवैतद् भवदीयभास्वरभुजस्तम्भप्रतापानल- स्पर्धायै
क्रमभुक्तलाञ्छनपशोर्नैतत् पुनः सेत्स्यति ॥ ७५०२॥
ENMSS@7503@1एकद्विप्रभृतिक्रमेण गणनामेषामिवास्तं यतां कुर्वाणा समकोचयद्
दशशतान्यम्भोजसंवर्तिकाः ।
ENMSS@7503@2भूयोऽपि क्रमशः प्रसारयति ताः संप्रत्यमूनुद्यतः संख्यातुं
सकुतूहलेव नलिनी भानोः सहस्रं करान् ॥ ७५०३॥
ENMSS@7504@1एकद्वेषु रसालशाखिषु मनागुन्मीलितं कुड्मलैः कर्णाकर्णिकया मिथः
कथममी घूर्णन्ति विश्वेऽध्वगाः ।
ENMSS@7504@2द्वित्रैः क्वापि किल श्रुताश्रुतमपि स्पष्टान्यपुष्टारुतं विष्वङ्मूर्छति
दुःसहो विरहिणीगेहेषु हाहारवः ॥ ७५०४॥
ENMSS@7505@1एकद्वैः किमभावि सूरिभिरथ द्वित्राणि मित्राणि किं व्यापन्नानि
गताश्च
किं त्रिचतुरा घोरा महाव्याधयः ।
ENMSS@7505@2सप्ताष्टैरलमिष्टमेतदपि नश्चेतः क्षणान् पञ्चषान् स्वात्मन्येव
रमस्व तेजसि गते कालेऽथवा सर्वतः ॥ ७५०५॥
ENMSS@7506@1एकद्वैर्दिवसैर्भविष्यति मनाग् दोरन्तरं दन्तुरं द्वित्रैरेव दिनैश्च
लोचनपथं रोमावली यास्यति ।
ENMSS@7506@2किं चाभूदिव वासरैस्त्रिचतुरैश्चाञ्चल्यमस्या दृशोस् तज्जेतुं
जगतीमनङ्ग किमतीवायासमालंबसे ॥ ७५०६॥
ENMSS@7507@1एकद्वैर्मधुबिन्दुभिर्मधुलिहः स्यादेव कुक्षिम्भरिः कस्मिन् वा कुसुमे
भवन्ति सुलभा तेऽमी पुनः पञ्चषाः ।
ENMSS@7507@2कालः कोऽपि स तादृशः परिणतो येनैकतृष्णाकुलो यद्यत् पुष्पमुपागमत्
कृपणवत् तेनास्य मा कुञ्चितम् ॥ ७५०७॥
ENMSS@7508@1एकधातुर्द्विखण्डः स्याद् यत्रोद्ग्राहस्ततः परम् ।
ENMSS@7508@2तृतीयं किंचिदुच्चं स्यात् खण्डं गमकशोभनम् ॥ ७५०८॥
ENMSS@7509@1एकनिभा यत्र मही तृणतरुवल्मीकगुल्मपरिहीना ।
ENMSS@7509@2तस्यां यत्र विकारो भवति धरित्र्यां जलं तत्र ॥ ७५०९॥

ENMSS@7510@1एकन्तु लोकवेदेभ्यः सारमाकृष्य कथ्यते ।
ENMSS@7510@2प्राणात्ययेऽपि न त्याज्यो न्याय्यो धर्मश्लथः पथः ॥ ७५१०॥
ENMSS@7511@1एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने ।
ENMSS@7511@2यद्येकोऽपि त्यजेदन्नं सर्वैरुच्छिष्टभोजनम् ॥ ७५११॥
ENMSS@7512@1एकपत्नीसमासक्तैर्भवद्भिः संहतैर्मिथः ।
ENMSS@7512@2स्थातव्यमप्रसादेन भेदमूलं हि योषितः ॥ ७५१२॥
ENMSS@7513@1एकपुंसा न गन्तव्यं काकसर्पस्य कारणात् ।
ENMSS@7513@2कर्कटस्य प्रसादेन ब्राह्मणो जीवितो यथा ॥ ७५१३॥
ENMSS@7514@1एकपुच्छश्चतुष्पादः ककुद्मान् लम्बकम्बलः ।
ENMSS@7514@2गोरपत्यं बलीवर्दो घासमत्ति सुखेन सः ॥ ७५१४॥
ENMSS@7515@1एकप्रियाचरणपद्मपरीष्टिजात-  क्लेशस्य मे हृदयमुत्तरलीचकार ।
ENMSS@7515@2उद्भिन्ननिर्भरमनोभवभावमुग्ध-  नानाङ्गनावदनचन्द्रमसां दिदृक्षा ॥ ७५१५॥
ENMSS@7516@1एकभवे रिपुपन्नगदुःखं  जन्मशतेषु मनोभवदुःखम् ।
ENMSS@7516@2चारुधियेति विचिन्त्य महान्तः  कामरिपुं क्षणतः क्षपयन्ति ॥ ७५१६॥
ENMSS@7516A@1एकभुक्तं सदारोग्यं द्विभुक्तं बलवर्द्धनम् ।
ENMSS@7516A@2त्रिभुक्तेर्व्याधिपीडा स्याच्चतुर्भुक्तेर्मृतिर्ध्रुवम् ॥
ENMSS@7517@1एकमपि क्षणं लब्ध्वा सम्यक्त्वं यो विमुञ्चति ।
ENMSS@7517@2संसारार्णवमुत्तीर्य लभते सोऽपि निर्वृतिम् ॥ ७५१७॥
ENMSS@7518@1एकमपि सतां सुकृतं  विकसति तैलं यथा जले न्यस्तम् ।
ENMSS@7518@2असतामुपकारशतं  संकुचति सुशीतले घृतवत् ॥ ७५१८॥
ENMSS@7519@1एकमप्यक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत् ।
ENMSS@7519@2पृथिव्यां नास्ति तद् द्रव्यं यद् दत्वा सोऽनृणी भवेत् ॥ ७५१९॥
ENMSS@7520@1एकमप्यत्र यो बिन्दुं भक्षयेन् मधुनो नरः ।
ENMSS@7520@2सोऽपि दुःखवृषाकीर्णे पतते भवसागरे ॥ ७५२०॥
ENMSS@7521@1एकमस्य परमेकमुद्यमं  निस्त्रपत्वमपरस्य वस्तुनः ।
ENMSS@7521@2नित्यमुष्णमहसा निरस्यते  नित्यमन्धतमसं प्रधावति ॥ ७५२१॥
ENMSS@7522@1एकमात्रो लघुः प्रोक्तो द्विमात्रश्च गुरुः स्मृतः ।
ENMSS@7522@2प्लुतस्त्रिमात्रको ज्ञेयो द्रुतः स्यादर्धमात्रकः ॥ ७५२२॥
ENMSS@7523@1एकमाशीविषो हन्ति शस्त्रेणैकश्च वध्यते ।

ENMSS@7523@2हन्ति विप्रः सराष्ट्राणि पुराण्यपि हि कोपितः ॥ ७५२३॥
ENMSS@7524@1एकमुत्कण्ठया व्याप्तम् अन्यद् दयितया हृतम् ।
ENMSS@7524@2चैतन्यमपरं धत्ते कियन्ति हृदयानि मे ॥ ७५२४॥
ENMSS@7525@1एकमेव गुणं प्राप्य नम्रतामगमद् धनुः ।
ENMSS@7525@2तवाशेषगुणा राज्ञः स्तब्धतेति सुविस्मयः ॥ ७५२५॥
ENMSS@7526@1एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् ।
ENMSS@7526@2एतेषामेव वर्णानां शुश्रूषामनसूयया ॥ ७५२६॥
ENMSS@7527@1एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
ENMSS@7527@2कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥ ७५२७॥
ENMSS@7528@1एकमेव पुरस्कृत्य दश जीवन्ति मानवाः ।
ENMSS@7528@2विना तेन न शोभन्ते यथा संख्याङ्कबिन्दवः ॥ ७५२८॥
ENMSS@7529@1एकमेव बलिं बद्ध्वा जगाम हरिरुन्नतिम् ।
ENMSS@7529@2अस्यास्त्रिबलिबन्धेन सैव मध्यस्य नम्रता ॥ ७५२९॥
ENMSS@7530@1एकमेव हि दारिद्र्यं क्लिश्नाति सकलं जगत् ।
ENMSS@7530@2तमहं शाब्दिकं वन्दे यश्चकार नपुंसकम् ॥ ७५३०॥
ENMSS@7531@1एकमेवाक्षि वामाक्षि रञ्जयाञ्जनलेखया ।
ENMSS@7531@2जायतामैन्दवे बिम्बे खञ्जनाम्बुजसंगमः ॥ ७५३१॥
ENMSS@7532@1एकमेवाद्वितीयं तद् यद् राजन् नावबुध्यसे ।
ENMSS@7532@2सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥ ७५३२॥
ENMSS@7533@1एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु ।
ENMSS@7533@2पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव ॥ ७५३३॥
ENMSS@7534@1एकयापि कलया विशुद्धया  योऽपि कोऽपि भजते गिरीशताम् ।
ENMSS@7534@2भूयसीरपि कलाः कलङ्किताः  प्राप्य कश्चिदपचीयते शनैः ॥ ७५३४॥
ENMSS@7535@1एकयैव गुरोर्दृष्ट्या द्वाभ्यां वापि लभेत यत् ।
ENMSS@7535@2न तत् तिसृभिरष्टाभिः सहस्रेणापि कस्यचित् ॥ ७५३५॥
ENMSS@7536@1एकरद द्वैमातुर  निस्त्रिगुण चतुर्भुजोऽपि पञ्चकर ।
ENMSS@7536@2जय षण्मुखनुत सप्त-  च्छदगन्धिमदाष्टतनुतनय ॥ ७५३६॥
ENMSS@7537@1एकवर्णं यथा दुग्धं बहुवर्णासु धेनुषु ।
ENMSS@7537@2तथा धर्मस्य वैचित्र्ये तत्त्वमेकं परं पुनः ॥ ७५३७॥
ENMSS@7538@1एकवर्णमिदं पूर्वं विश्वमासीद् युधिष्ठिर ।
ENMSS@7538@2कर्मक्रियाविभेदेन चातुर्वर्ण्यं प्रतिष्ठितम् ॥ ७५३८॥

ENMSS@7539@1एकवर्णो भवेद् यस्तु लक्षणैकेन संयुतः ।
ENMSS@7539@2स खड्गराजो नृपतेर्विज्ञेयः शुभकारकः ॥ ७५३९॥
ENMSS@7540@1एकवापीजलं पश्य इक्षौ मधुरतां व्रजेत् ।
ENMSS@7540@2निम्बे कटुकतां याति पात्रापात्राय भोजनम् ॥ ७५४०॥
ENMSS@7541@1एकवापीभवं तोयं पात्रापात्रविशेषतः ।
ENMSS@7541@2आम्रे मधुरतामेति निम्बे कटुकतामपि ॥ ७५४१॥
ENMSS@7542@1एकविंशतिरादिष्टाः नरकाः शास्त्रपारगैः ।
ENMSS@7542@2गर्भवाससमीपे ते कलां नार्हन्ति षोडशीम् ॥ ७५४२॥
ENMSS@7543@1एकविंशतिवर्णाङ्घ्रिर्भवेच् श‍ृङ्गारके रसे ।
ENMSS@7543@2कामदोऽभीष्टदः पुसां ताले तुरगलीलके ॥ ७५४३॥
ENMSS@7543@3॥। ॥। ॥। ॥। ॥। ॥। ॥ ७५४३॥
ENMSS@7544@1एकविंशतिवारेण कुक्कुटस्यासृजोक्षितम् ।
ENMSS@7544@2तत्क्षणाद् दाडिमीबीजं वर्धते फलति ध्रुवम् ॥ ७५४४॥
ENMSS@7545@1एकविंशतिसंजप्तं जलं मन्त्रेण पाययेत् ।
ENMSS@7545@2यदा वान्तिस्तदा मृत्युर्न वान्तिर्जीवति ध्रुवम् ॥ ७५४५॥
ENMSS@7546@1एकविद्याप्रधानोऽपि बहुज्ञानी भवेन् नरः ।
ENMSS@7546@2सुभाषितानि शिक्षेत यानि शास्त्रोद्धृतानि वै ॥ ७५४६॥
ENMSS@7547@1एकवृक्षसमारूढा नानावर्णा विहंगमाः ।
ENMSS@7547@2प्रातर्दश दिशो यान्ति का तत्र परिदेवना ॥ ७५४७॥
ENMSS@7548@1एकवृक्षे यथा रात्रौ नानापक्षिसमागमः ।
ENMSS@7548@2प्रातर्दश दिशो यान्ति तद्वद् भूतसमागमः ॥ ७५४८॥
ENMSS@7549@1एकवेशाश्रयाज्ञातेर्वर्णस्यापि प्रगोपनम् ।
ENMSS@7549@2यथा हस्तिपदेऽन्येषां लीयन्ते चरणा अपि ॥ ७५४९॥
ENMSS@7550@1एकशक्तिप्रहारेण म्रियतेऽश्वो नरोऽपि हि ।
ENMSS@7550@2सहेन् महाप्रहाराणां शतं युद्धेषु वारणः ॥ ७५५०॥
ENMSS@7551@1एकशीलवयोविद्याजातिव्यसनवृत्तयः ।
ENMSS@7551@2साहचर्ये भवेन् मित्रम् एभिर्यदि तु सार्जवैः ॥ ७५५१॥
ENMSS@7552@1एकश्चेत् पूर्वपुरुषः कुले यश्च बहुश्रुतः ।
ENMSS@7552@2अपरः पापकृन्मूर्खः कुलं कस्यानुवर्तते ॥ ७५५२॥
ENMSS@7553@1एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
ENMSS@7553@2यस्य कालः प्रयात्यग्रे तत्र का परिदेवना ॥ ७५५३॥

ENMSS@7554@1एकसुकृतेन दुष्कृत-  शतानि ये नाशयन्ति ते सेव्याः ।

ENMSS@7554@2न त्वेकदोषजनितो  येषां कोपः कृतशतघ्नः ॥ ७५५४॥

ENMSS@7555@1एकस्तपो द्विरध्यायी त्रिभिर्गीतं चतुः पथम् ।

ENMSS@7555@2सप्त पञ्च कृषीणां च सङ्ग्रामो बहुभिर्जनैः ॥ ७५५५॥

ENMSS@7557@1एकस्त्रिधा हृदि सदा वससि स्म चित्रं  यो विद्विषां च विदुषां च मृगीदृशां च ।

ENMSS@7557@2तापं च संमदरसं च रतिं च तन्वन्  शौर्योष्मणा च विनयेन च लीलया च ॥ ७५५७॥

ENMSS@7557A@1एकस्त्रेधा नयसुनिपुणैर्योगिभिः सेवकैर्वा  निर्बाधं यः सपदि विदितो भाति सर्वस्वरूपः ।

ENMSS@7557A@2सोऽयं नन्दव्रजमुपगतः साकमाभीरवृन्दैर् वृन्दारण्ये विहरति परानन्दभूतिर्मुकुन्दः ॥

ENMSS@7558@1एकस्त्वं गहनेऽस्मिन्  कोकिल न कलं कदाचिदपि कुर्याः ।

ENMSS@7558@2साजात्यशङ्कयामी  न त्वां निघ्नन्ति निर्दयाः काकाः ॥ ७५५८॥

ENMSS@7559@1एकस्त्वं मरुभूरुहेन्द्र विततैः शाखाशतैरञ्चितः पुष्प्यत्पुष्पफलान्वितैरमृदितैर्जीव्याः सहस्रं समाः ।

ENMSS@7559@2अश्रान्तं श्रमरुग्णपान्थजनतासर्वार्थनिर्वाहणं  कस्त्वां सात्त्विकमन्तरेण भुवनं निर्मातु धर्माशयः ॥ ७५५९॥

ENMSS@7560@1एकस्त्वमावहसि जन्मनि संक्षये च  भोक्तुं स्वयं स्वकृतकर्मफलानुबन्धम् ।

ENMSS@7560@2अन्यो न जातु सुखदुःखविधौ सहायः  स्वाजीवनाय मिलितं विटपेटकं ते ॥ ७५६०॥

ENMSS@7561@1एकस्थं जीवितेशे त्वयि सकलजगत्सारमालोकयामः  श्यामे चक्षुस्तवास्मिन् वपुषि निविशते नाल्पपुण्यस्य पुंसः ।

ENMSS@7561@2कस्यान्यत्रामृतेऽस्मिन् रतिरतिविपुला दृष्टिरेवामृतं ते दैत्यैरित्युच्यमानो मुनिभिरपि हरिः स्त्रैणरूपोऽवताद् वः ॥ ७५६१॥

ENMSS@7562@1एकस्माद् वृक्षाद् यज्ञपात्राणि राजन्  स्रुक् च द्रोणी वोढनी पीडनी च ।

ENMSS@7562@2एतद् राजन् ब्रुवतो मे निबोध  एकस्मात् पुरुषाज्जायतेऽसच्च सच्च ॥ ७५६२॥

ENMSS@7563@1एकस्मिञ् जनिरावयोः समजनि स्वच्छे सरोवारिणि  भ्रातः काचिदिहैव

कानिचिदहान्यत्र व्यतीतानि नौ ।

ENMSS@7563@2लब्धं तामरस त्वया मृगदृशां लीलावतंसास्पदं  शैवालं

विलुठामि पामरवधूपादाहते पाथसि ॥ ७५६३॥

ENMSS@7564@1एकस्मिञ् शयने पराङ्मुखतया वीतोत्तरं ताम्यतोर् अन्योन्यस्य हृदि

स्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।

ENMSS@7564@2दम्पत्योः शनकैरपाङ्गवलनान् मिश्रीभवच्चक्षुषोर् भग्नो मानकलिः

सहासरभसव्यावृत्तकण्ठग्रहः ॥ ७५६४॥

ENMSS@7565@1एकस्मिञ् शयने विपक्षरमणीनामग्रहे मुग्धया

सद्यःकोपपराङ्मुखग्लपितया चाटूनि कुर्वन्नपि ।

ENMSS@7565@2आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं  मा भूत् सुप्त

इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥ ७५६५॥

ENMSS@7566@1एकस्मिञ् शयने सरोरुहदृशोर्विज्ञाय निद्रां तयोर् एकां

पल्लवितावगुण्ठनपटामुत्कन्धरो दृष्टवान् ।

ENMSS@7566@2अन्यस्याः सविधं समेत्य निभृतव्यालोलहस्ताङ्गुलि-

व्यापारैर्वसनाञ्चलं चपलयन् स्वापच्युतिं क्लिप्तवान् ॥ ७५६६॥

ENMSS@7567@1एकस्मिन् दिवसे मया विचरता प्राप्तः कथंचिन् मणिर् मूल्यं यस्य न

विद्यते भवति चेत् पृथ्वी समस्ता ततः ।

ENMSS@7567@2सोऽयं दैववशादभूदतितरां काचोपमः साम्प्रतं  किं कुर्मः

कमुपास्महे क्व स सुहृद् यस्यैतदावेद्यते ॥ ७५६७॥

ENMSS@7568@1एकस्मिन्नप्यतिक्रान्ते दिने धर्मविवर्जिते ।

ENMSS@7568@2दस्युभिर्मुषितस्येव हृदयं दह्यते चिरम् ॥ ७५६८॥

ENMSS@7569@1एकस्मिन् नयने भृशं तपति यः काले स दाहक्रमो  येनातन्यत

यत्प्रकाशसमये नैशं पदं दुर्लभम् ।

ENMSS@7569@2सव्योमावयवस्य यस्य विदिता लोके प्रकाशस्थितिः  श्रीसूर्यः क्षणसेवितोऽपि

हि महादेवः स नस्त्रायताम् ॥ ७५६९॥

ENMSS@7570@1एकस्मिन्नेव जायेते कुले क्लीबमहारथौ ।

ENMSS@7570@2फलाफलवती शाखे यथैकस्मिन् वनस्पतौ ॥ ७५७०॥

ENMSS@7571@1एकस्मिन् मलयाचले बहुविधैः किं तैरकिंचित्करैः

काकोलूककपोतकोकिलकुलैरेकोऽपि पार्श्वस्थितः ।

ENMSS@7571@2केकी कूजति चेत् तदा विघटितव्यालावलीबन्धनः  सेव्यः स्यादिह

सर्वलोकमनसामानन्दनश्चन्दनः ॥ ७५७१॥

ENMSS@7572@1एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।

ENMSS@7572@2बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥ ७५७२॥

ENMSS@7573@1एकस्मिन् विजिते चित्ते विजितं सकलं जगत् ।

ENMSS@7573@2अजिते तु पुनस्तस्मिन् न पुत्रोऽपि विनिर्जितः ॥ ७५७३॥

ENMSS@7574@1एकस्मिन् विनिपातितेऽपि शिरसि क्रोधोपशान्तिः कुतः किंतु स्वानुनयाय

मूर्धनिधनं दृष्टं न यत्रारिणा ।

ENMSS@7574@2त्वत्तो मूर्धबहुत्वतः फलमिदं सम्यङ् मया लभ्यते छिन्नं

छिन्नमवेक्ष्य राक्षसपते स्वं दुर्नयं ज्ञास्यसि ॥ ७५७४॥

ENMSS@7575@1एकस्मै पूर्णमन्यस्मै कृशं तुल्यगुणोदये ।

ENMSS@7575@2भेदाद् यदर्पितं रागद्वेषदानेन तेन किम् ॥ ७५७५॥

ENMSS@7576@1एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम् ।

ENMSS@7576@2गतानुगतिको लोको न लोकः पारमार्थिकः ॥ ७५७६॥

ENMSS@7577@1एकस्य जन्मनोऽर्थे मूढाः कुर्वन्ति यानि पापानि ।

ENMSS@7577@2जनयन्ति तानि दुःखं तेषां जन्मान्तरसहस्रम् ॥ ७५७७॥

ENMSS@7578@1एकस्य तस्य मन्ये धन्यामभ्युन्नतिं जलधरस्य ।

ENMSS@7578@2विश्वं सशैलकाननम् आननमालोकते यस्य ॥ ७५७८॥

ENMSS@7579@1एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य ।

ENMSS@7579@2तावद् द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ ७५७९॥

ENMSS@7580@1एकस्य विश्वपापेन तापेऽनन्ते निमज्जतः ।

ENMSS@7580@2कः श्रौतस्यात्मनो भीरो भारः स्याद् दुरितेन ते ॥ ७५८०॥

ENMSS@7581@1एकस्य सृष्टिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले ।

ENMSS@7581@2भोगे भवानी समरेषु दुर्गा कोपेषु काली पुरुषेषु विष्णुः ॥ ७५८१॥

ENMSS@7582@1एकस्य हि प्रसादेन कृत्स्नो लोकः प्रसीदति ।

ENMSS@7582@2व्याकुलेनाकुलः सर्वो भवतीति विनिश्चयः ॥ ७५८२॥

ENMSS@7583@1एकस्यापि न यः शक्तो मनसः सन्निबर्हणे ।

ENMSS@7583@2महीं सागरपर्यन्तां कथं नु स विजेष्यते ॥ ७५८३॥

ENMSS@7584@1एकस्यापि मनोभुवस्तदबलापाङ्गैर्जगन्निर्जये कामं

निह्नुतसर्वविस्मयरसव्यक्तिप्रकारा वयम् ।

ENMSS@7584@2यस्त्वेनं सबलं च जेतुमभितस्तत्कम्पमात्रं भ्रुवोर् नारेभे सुगतस्तु

तद्गुणकथा स्तम्भाय नः केवलम् ॥ ७५८४॥

ENMSS@7585@1एकस्याप्यतिथेरन्नं यः प्रदातुं न शक्तिमान् ।

ENMSS@7585@2तस्यानेकपरिक्लेशे गृहे किं वसतः फलम् ॥ ७५८५॥

ENMSS@7586@1एकस्यायमुदेति मूर्धनि गिरेरन्यस्य चैव क्रमाद् अस्तं याति कलानिधिस्तदुभयोरस्तः प्रशस्तोऽचलः ।

ENMSS@7586@2को नामोदयिनं करोति न शिरोमाणिक्यमस्तं पुनर् यातं यः कुरुते भवानिव

स दुष्प्रापोऽयमुच्चैःशिराः ॥ ७५८६॥

ENMSS@7587@1एकस्यार्थाय यो हन्याद् आत्मनो वा परस्य वा ।

ENMSS@7587@2बहून् वै प्राणिनोऽथैकं भवेत् तस्येह पातकम् ॥ ७५८७॥

ENMSS@7588@1सुखमेधन्ति बहवो यस्मिंस्तु निहते सति ।

ENMSS@7588@2तस्मिन् हते नास्ति भद्रे पातकं नोपपातकम् ॥ ७५८८॥

ENMSS@7589@1एकस्यास्तपनकरैः करालिताया बिभ्राणः सपदि सितोष्णवारणत्वम् ।

ENMSS@7589@2सेवायै वदनसरोजनिर्जितश्रीर् आगत्य प्रियमिव चन्द्रमाश्चकार ॥ ७५८९॥

ENMSS@7590@1एकस्यैव न पर्याप्तम् अस्ति यद् ब्रह्मकोशजम् ।

ENMSS@7590@2आशया वर्द्धितस्यास्ति तस्याल्पमपि पूर्तिकृत् ॥ ७५९०॥

ENMSS@7591@1एकां कृत्वा तनुमनुपमां चन्द्रचूडेन सार्धं यस्त्यक्तोऽर्धः सततविरहक्लेशभागी भवान्या ।

ENMSS@7591@2तेनाङ्गानां रचितमुचितं संविभक्तेन कर्तुं नूनं दूनां तनुतनुलतां निर्ममे तां विरिञ्चिः ॥ ७५९१॥

ENMSS@7592@1एकाकिना तपो द्वाभ्यां पठनं गायनं त्रिभिः ।

ENMSS@7592@2चतुर्भिर्गमनं क्षेत्रं पञ्चभिर्बहुभी रणः ॥ ७५९२॥

ENMSS@7593@1एकाकिना न गन्तव्यं यदि कार्यशतं भवेत् ।

ENMSS@7593@2एककुक्कुटमात्रेण ब्राह्मणः परिरक्षितः ॥ ७५९३॥

ENMSS@7594@1एकाकिना न गन्तव्यं यदि कार्यशतान्यपि ।

ENMSS@7594@2कर्कटीजन्तुमात्रेण कालसर्पो निपातितः ॥ ७५९४॥

ENMSS@7595@1एकाकिनि वनवासिन्य् अराजलक्ष्मण्यनीतिशास्त्रज्ञे ।

ENMSS@7595@2सत्त्वोच्छ्रिते मृगपतौ राजेति गिरः परिणमन्ति ॥ ७५९५॥

ENMSS@7596@1एकाकिनीं रहः क्षीबां लब्ध्वा दुर्लभयोषितम् ।

ENMSS@7596@2अप्रौढोऽनुपभुज्यान्यदिने दूत्यार्थयेत यः ॥ ७५९६॥

ENMSS@7597@1विभूतिं रभसावाप्तां यश्च संत्यज्य तत्क्षणम् ।

ENMSS@7597@2नीत्या कामयतेऽन्येद्युः शोच्यस्ताभ्यां परोऽस्ति कः ॥ ७५९७॥

ENMSS@7598@1एकाकिनी यदबला तरुणी तथाहम्  अस्मिन् गृहे गृहपतिश्च गतो विदेशम् ।

ENMSS@7598@2किं याचसे तदिह वासमियं वराकी  श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ ॥ ७५९८॥

ENMSS@7599@1एकाकिन्या मम गृहमिदं यामिको मामकोऽन्धः  का मे नोदेत्यहह मनसस्तस्करेणात्र भीतिः ।

ENMSS@7599@2दैवेनैवं यदि न सुखितः स्याः श्रमेण प्रसुप्तः  पान्थ ब्रूमः किमिह सदृशो नैष नैशो निवासः ॥ ७५९९॥

ENMSS@7600@1एकाकी गृहसंत्यक्तः पाणिपात्रो दिगम्बरः ।

ENMSS@7600@2सोऽपि संबाध्यते लोके तृष्णया पश्य कौतुकम् ॥ ७६००॥

ENMSS@7601@1एकाकी चिन्तयेन् नित्यं विविक्ते हितमात्मनः ।

ENMSS@7601@2एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति ॥ ७६०१॥

ENMSS@7602@1एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।

ENMSS@7602@2कदा शंभो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ७६०२॥

ENMSS@7603@1एकाक्षरप्रदातारं यो गुरुं नैव मन्यते ।

ENMSS@7603@2श्वानयोनिशतं गत्वा चाण्डालेष्वभिजायते ॥ ७६०३॥

ENMSS@7604@1एका गङ्गा प्रयागे मलयपरिसरे चन्दनं मौक्तिकाली  कान्ताकण्ठे हिमांशुर्वियति सरसि श्वेतमब्जं तथास्याः ।

ENMSS@7604@2कालिन्दी कालसर्पा मरकततरलो लाञ्छनं भृङ्गमालेत्य् एवं ते यत्र कीर्तिः परिणमति युता यत्र शत्रोरकीर्त्या ॥ ७६०४॥

ENMSS@7605@1एकाग्निकर्म हवनं त्रेतायां यच्च हूयते ।

ENMSS@7605@2अन्तर्वेद्यां च यद् दानम् इष्टं तदभिधीयते ॥ ७६०५॥

ENMSS@7606@1एकाग्रः स्यादविवृतो नित्यं विवरदर्शकः ।

ENMSS@7606@2राजन् राज्यं सपत्नेषु नित्योद्विग्नः समाचरेत् ॥ ७६०६॥

ENMSS@7607@1एकाग्रताथ संकल्पः स्नायुवद् वर्द्धनक्षमौ ।

ENMSS@7607@2नित्याभ्यासप्रयोगाभ्याम् अधिकाधिकमृध्यतः ॥ ७६०७॥

ENMSS@7608@1एकाङ्घ्रिं विनिधाय कान्तचरणे तज्जानुदेशे परं  लीलोदञ्चितमध्यमा करयुगेणावर्ज्य तत्कन्धराम् ।

ENMSS@7608@2वक्षस्तस्य घनोन्नतस्तनभरेणापीड्य गाढं रसाद्  आस्यं धन्यतमस्य

पूर्णपुलका चन्द्रानना चुम्बति ॥ ७६०८॥

ENMSS@7609@1एकातपत्रं जगतः प्रभुत्वं  नवं वयः कान्तमिदं वपुश्च ।

ENMSS@7609@2अल्पस्य हेतोर्बहु हातुमिच्छन्  विचारमूढः प्रतिभासि मे त्वम् ॥ ७६०९॥

ENMSS@7610@1एकादशरुद्राणाम्  एका गौरीत्यनौचितीं मत्वा ।

ENMSS@7610@2राघव नृप तव यशसा  दशापि गौरीकृता हरितः ॥ ७६१०॥

ENMSS@7611@1एकादशस्थे गोविन्दे सर्वेऽप्येकादशे स्थिताः ।

ENMSS@7611@2किं कुर्वन्ति ग्रहाः सर्वे शनिरङ्गारको रविः ॥ ७६११॥

ENMSS@7612@1एकादशाक्षरात् पादाद् एकैकाक्षरवर्धितैः ।

ENMSS@7612@2खण्डैर्ध्रुवाः षोडश स्युः षड्विंशत्यक्षरावधि ॥ ७६१२॥

ENMSS@7613@1एकानपाङ्गैरपरांस्तरङ्गैर् भ्रुवोर्विलासैरितरं च हासैः ।

ENMSS@7613@2विमोहयन्त्यन्यमहो रहोभिः  को वा कलां वेद कलावतीनाम् ॥ ७६१३॥

ENMSS@7614@1एकान्तमन्दिरगतं मदनोपमेयं  तल्पोपविष्टमतुलं रतिरूपरम्या ।

ENMSS@7614@2बाला चकोरनयना नयनातिथिं तं  कृत्वा नमद्वदनपङ्कजमाननाम ॥ ७६१४॥

ENMSS@7615@1एकान्तशान्तमेकं  मन्यन्ते मानवा निवासाख्यम् ।

ENMSS@7615@2उग्रस्य च शीतस्य च  नाशकरं कार्ययुग्मस्य ॥ ७६१५॥

ENMSS@7616@1एकान्तशीलस्य दृढव्रतस्य  सर्वेन्द्रियप्रीतिनिवर्तकस्य ।

ENMSS@7616@2अध्यात्मयोगे गतमानसस्य  मोक्षो ध्रुवं नित्यमहिंसकस्य ॥ ७६१६॥

ENMSS@7617@1एकान्तसुन्दरविधानजडः क्व वेधाः  सर्वाङ्गकान्तिचतुरं क्व च रूपमस्याः ।

ENMSS@7617@2मन्ये महेश्वरभयान्मकरध्वजेन  प्राणार्थिना युवतिरूपमिदं गृहीतम् ॥ ७६१७॥

ENMSS@7618@1एकान्तेन हि सर्वेषां न शक्यं तात रोचितुम् ।

ENMSS@7618@2मित्रामित्रमथो मध्यं सर्वभूतेषु भारत ॥ ७६१८॥

ENMSS@7619@1एकान्ते वनतो गृहं शशिमुखोऽप्यन्यादृशो दृश्यते  क्षिप्रं साधय यातु पुत्रि सुदिने भुक्त्वान्यमावासकम् ।

ENMSS@7619@2श्वश्र्वा संभ्रमिता किलेति बहुशः संप्रेरयन्त्या वधूः  पान्थं वीक्ष्य बभञ्ज सस्मितमुखी सैवार्धसिद्धौदनम् ॥ ७६१९॥

ENMSS@7620@1एकान्ते विजने देशे पवित्रे निरुपद्रवे ।

ENMSS@7620@2कम्बलाजिनवस्त्राणाम् उपर्यासनमभ्यसेत् ॥ ७६२०॥

ENMSS@7621@1एकान्ते विजने रम्ये पवित्रे निरुपद्रवे ।
ENMSS@7621@2सुखासने समाधिः स्याद् वस्त्राजिनकुशोत्तरे ॥ ७६२१॥
ENMSS@7622@1एकान्ते सुखमास्यता परतरे चेतः समाधीयतां प्राणात्मा सुसमीक्ष्यतां जगदिदं तद्व्यापितं दृश्यताम् ।
ENMSS@7622@2प्राक्कर्म प्रविलोप्यतां चितिबलान् नाप्युत्तरे श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मनास्थीयताम् ॥ ७६२२॥
ENMSS@7623@1एकापवर्गसमये जगतोऽपवर्गः सर्वापवर्गसमये पुनरस्तशङ्कः ।
ENMSS@7623@2ईदृग्विधं कमपि पक्षमिहावलम्ब्य स्थातुं सुखं क्षममनेन पथा प्रवृत्तैः ॥ ७६२३॥
ENMSS@7624@1एकापि पञ्चशान्ता तारा वाञ्छाप्तये शुभासीना ।
ENMSS@7624@2लाभ उभाभ्यामधिकस् तिस्रो राज्याय यात्रायाम् ॥ ७६२४॥
ENMSS@7625@1एका प्रसूयते माता द्वितीया वाक् प्रसूयते ।
ENMSS@7625@2वाग्जातमधिकं प्रोचुः सोदर्यादपि बान्धवात् ॥ ७६२५॥
ENMSS@7626@1एका भार्या त्रयः पुत्रा द्वौ हलौ दश धेनवः ।
ENMSS@7626@2कल्पकालावसानेऽपि न ते यास्यन्ति विक्रियाम् ॥ ७६२६॥
ENMSS@7627@1एका भार्या त्रयः पुत्रा द्वौ हलौ दश धेनवः ।
ENMSS@7627@2ग्रामेवासः पुरासत्रैः स्वर्गादपि मनोहरः ॥ ७६२७॥
ENMSS@7628@1एका भार्या प्रकृतिमुखरा चञ्चला च द्वितीया पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः ।
ENMSS@7628@2शेषः शय्या शयनमुदधौ वाहनं पन्नगारिः स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥ ७६२८॥
ENMSS@7629@1एकाभूत् कुसुमायुधेषुधिरिव प्रव्यक्तपुङ्खावली जेतुर्मङ्गलपालिकेव पुलकैरन्या कपोलस्थली ।
ENMSS@7629@2लोलाक्षीं क्षणमात्रभाविविरहक्लेशासहां पश्यतो द्रागाकर्णयतश्च वीर भवतः प्रौढाहवाडम्बरम् ॥ ७६२९॥
ENMSS@7630@1एका भूरुभयोरैक्यम् उभयोर्दलकाण्डयोः ।
ENMSS@7630@2शालिश्यामाकयोर्भेदः फलेन परिचीयते ॥ ७६३०॥
ENMSS@7631@1एकामधीत्य विद्यां बिभेति बहुविद्यपरिषदं प्राप्तः ।
ENMSS@7631@2क्वासन्नशस्त्रनिकरः कुत्रैकशरः पुनः पुरुषः ॥ ७६३१॥
ENMSS@7632@1एकामिषप्रभवमेव सहोदराणाम् उज्जृम्भते जगति वैरमिति प्रसिद्धम् ।

ENMSS@7632@2पृथ्वीनिमित्तमभवत् कुरुपाण्डवानां तीव्रस्तथा हि भुवनक्षयकृद् विरोधः ॥ ७६३२॥
ENMSS@7633@1एकामिषाभिलाषो हि बीजं वैरमहातरोः ।
ENMSS@7633@2तिलोत्तमाभिलाषो हि यथा सुन्दोपसुन्दयोः ॥ ७६३३॥
ENMSS@7634@1एकाम्भोधीकृतायां भुवि जगदखिलं निर्जनीकृत्य खेलन् देवः कालीसहायः प्रसभविहरणोन्मुक्तलीलाट्टहासः ।
ENMSS@7634@2सद्यो दंष्ट्रांशुभिन्ने तमसि निजवपुर्बिम्बमालोक्य कस्त्वं कस्त्वं ब्रूहीति कोपादभिदधदभयं भैरवश्चेष्टतां वः ॥ ७६३४॥
ENMSS@7635@1एकारिमित्रयोश्चेत् परस्परं भूपयोर्भेदः ।
ENMSS@7635@2तदुपरि परिणतनीतिः सुखमभियोगं करोतु गतभीतिः ॥ ७६३५॥
ENMSS@7636@1एकारौकारयुक्ता हरिहरिजहराः पञ्च बाणाः स्मरस्य ख्याता लक्ष्याण्यमीषां हृदयकुचदृशो मूर्ध्नि गुह्ये क्रमेण ।
ENMSS@7636@2मर्मस्वेतेषु भूयो निजनयनधनुःप्रेरितैस्तैः पतद्भिः स्यन्दन्ते सुन्दरीणां ज्वलदनलनिभैर्बिन्दवः कामवाराम् ॥ ७६३६॥
ENMSS@7637@1एकार्थां सम्यगुद्दिश्य यात्रां यत्र हि गच्छतः ।
ENMSS@7637@2य संहतप्रयाणस्तु सन्धिः संयोग उच्यते ॥ ७६३७॥
ENMSS@7638@1एकार्थाभिनिवेशित्वम् अरिलक्षणमुच्यते ।
ENMSS@7638@2दारुणस्तु स्मृतः शत्रुर्विजिगीषुगुणान्वितः ॥ ७६३८॥
ENMSS@7639@1एकावलीकलितमौक्तिककैतवेन कस्याश्चिदुन्नतपयोधरयुग्मसेवाम् ।
ENMSS@7639@2चक्रुर्मनांसि यमिनामतिनिर्मलानि कंदर्पमुक्तशरपातकृतान्तराणि ॥ ७६३९॥
ENMSS@7640@1एकावस्थितिरस्तु वः पुरमुरप्रद्वेषिणोर्देवयोः प्रालेयाञ्जनशैलशृङ्गसुभगच्छायाङ्गयोः श्रेयसे ।
ENMSS@7640@2तार्क्ष्यत्रासविहस्तपन्नगफटा यस्यां जटापालयो बालेन्दुद्युतिकोशसुप्तजलजो यस्यां च नाभीह्रदः ॥ ७६४०॥
ENMSS@7641@1एका वा दुग्धिका तुम्बी शङ्खपुष्पी जटा धृता ।
ENMSS@7641@2कण्ठदन्तोद्भवा भूतवेदनाहरणक्षमा ॥ ७६४१॥
ENMSS@7642@1एकासनस्था जलवायुभक्षा मुमुक्षवस्त्यक्तपरिग्रहाश्च ।
ENMSS@7642@2पृच्छन्ति तेऽप्यम्बरचारिचारं दैवज्ञमन्ये किमुतार्थचित्ताः ॥ ७६४२॥
ENMSS@7643@1एकाहं जपहीनस्तु सन्ध्याहीनो दिनत्रयम् ।

ENMSS@7643@2द्वादशाहमनग्निस्तु शूद्र एव न संशयः ॥ ७६४३॥

ENMSS@7644@1एकाहनिष्पन्नमहाप्रबन्धः श्रीसिद्धराजप्रतिपन्नबन्धुः ।

ENMSS@7644@2श्रीपालनामा कविचक्रवर्त्ती प्रशस्तिमेतामकरोत् प्रशस्ताम् ॥ ७६४४॥

ENMSS@7645@1एकाहमपि कौन्तेय भूयिष्ठमुदकं कुरु ।

ENMSS@7645@2कुलं तारयते तात सप्त सप्त च सप्त च ॥ ७६४५॥

ENMSS@7646@1एकाहारेण संतुष्टः षट्कर्मनिरतः सदा ।

ENMSS@7646@2ऋतुकालाभिगामी च स विप्रो द्विज उच्यते ॥ ७६४६॥

ENMSS@7647@1एकिकेव निजवृन्दमध्यगाप्य् उच्चुकूज सभयं सितच्छदी ।

ENMSS@7647@2दन्तमूलमसकृच्च संशयाद् आममर्श करिणः करेणुका ॥ ७६४७॥

ENMSS@7648@1एकीकृतस्त्वचि निषिक्त इवावपीड्य निर्भुग्नपीनकुचकुड्मलयानया मे
।

ENMSS@7648@2कर्पूरहारहरिचन्दनचन्द्रकान्त- निष्यन्दशैवलमृणालहिमादिवर्गः
॥ ७६४८॥

ENMSS@7649@1एकीकृत्य किमोषधीपतिरसैराकाशभाण्डोदरे
फुल्लत्पङ्कजिनीजनाम्बुजमुखध्मातैः समन्तान् मुहुः ।

ENMSS@7649@2काष्ठोत्थारुणदीप्तिवह्निपटलैराताप्य सम्यग् भृशं तारापारदमारणं
वितनुते वैद्योऽनवद्यो रविः ॥ ७६४९॥

ENMSS@7650@1एकीभावं गतयोर् जलपयसोर्मित्रचेतसोश्चैव ।

ENMSS@7650@2व्यतिरेककृतौ शक्तिर् हंसानां दुर्जनानां च ॥ ७६५०॥

ENMSS@7651@1एकीभूय स्फुटमिव किमप्याचरद्भिः प्रलीनैर् एभिर्भूतैः स्मर कति
कृताः स्वान्त ते विप्रलम्भाः ।

ENMSS@7651@2तस्मादेषां त्यज परिचयं चिन्तय स्वव्यवस्थाम् आभाषस्ते किमु
न
विदितः खण्डितः पण्डितः स्यात् ॥ ७६५१॥

ENMSS@7652@1एके कुटीरकोणेऽपि न लक्ष्यन्ते स्थिताः क्वचित् ।

ENMSS@7652@2अन्येषां विभवस्यैतद् ब्रह्माण्डमपि संकटम् ॥ ७६५२॥

ENMSS@7653@1एके केचित् यतिकरगताः पात्रसंज्ञां लभन्ते गायन्त्यन्ये सरसमधुरं
वीणया संप्रयुक्ताः ।

ENMSS@7653@2एके तेषां सहगतिवशाद् दुस्तरं तारयन्ति केचित् तेषां ज्वलितहृदया
रक्तमेवापिबन्ति ॥ ७६५३॥

ENMSS@7654@1एके तुम्बा व्रतिकरगताः पात्रतामानयन्ति गायन्त्यन्ये सरसमधुरं
शुद्धवंशे विलग्नाः ।

ENMSS@7654@2एके तावद् ग्रथितसगुणा दुस्तरं तारयन्ति तेषां मध्ये ज्वलितहृदया रक्तमेके पिबन्ति ॥ ७६५४॥

ENMSS@7655@1एकेऽद्य प्रातरपरे पश्चादन्ये पुनः परे ।

ENMSS@7655@2सर्वे निःसीम्नि संसारे यान्ति कः केन शोच्यते ॥ ७६५५॥

ENMSS@7656@1एकेन केनचिदनर्घमणिप्रभेण काव्यं चमत्कृतिपदेन विना सुवर्णम् ।

ENMSS@7656@2निर्दोषलेशमपि रोहति कस्य चित्ते लावण्यहीनमिव यौवनमङ्गनानाम् ॥ ७६५६॥

ENMSS@7657@1एकेन केनापि गुणेन नीचोऽप्य् उच्चैः प्रतिष्ठां लभते जगत्सु ।

ENMSS@7657@2दृष्टान्तमग्रे मृदुताप्रसिद्धो दोषाकरोऽप्युच्चपदं प्रपन्नः ॥ ७६५७॥

ENMSS@7658@1एकेन चुलुकेनाब्धिर्निपीतः कुम्भयोनिना ।

ENMSS@7658@2तस्योदयेऽतः कालुष्यं त्यजन्त्यापो भयादिव ॥ ७६५८॥

ENMSS@7659@1एकेन चूर्णकुन्तलम् अपरेण करेण चिबुकमुन्नमयन् ।

ENMSS@7659@2पश्यामि बाष्पधौत- श्रुति नगरद्वारि तद्वदनम् ॥ ७६५९॥

ENMSS@7660@1एकेन चेत् परिहृतोऽसि महेश्वरेण किं खेदमावहसि केतक निर्गुणोऽसौ ।

ENMSS@7660@2अन्ये न किं जगति सन्ति परं गुणज्ञा ये त्वां वहन्ति शिरसा नरदेवदेवाः ॥ ७६६०॥

ENMSS@7661@1एकेन तिष्ठताधस्ताद् अन्येनोपरि तिष्ठता ।

ENMSS@7661@2दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥ ७६६१॥

ENMSS@7662@1एकेन प्रियसाक्षिणा जितवती वीणां वचोभिर्निजैर् गत्या मन्दिर एव विश्वगमनं हंसं जिगायाचिरात् ।

ENMSS@7662@2वक्रेणाद्वयमोदिनेन्दुमजयत् सर्वप्रमोदप्रदं दृष्ट्या लक्ष्यपदाग्रयेव दलयत्यम्भोरुहाणां मदम् ॥ ७६६२॥

ENMSS@7663@1एकेन राजहंसेन या शोभा सरसोऽभवत् ।

ENMSS@7663@2न सा बकसहस्रेण परितस्तीरवासिना ॥ ७६६३॥

ENMSS@7664@1एकेन रोमनालेन जातं पङ्केरुहद्वयम् ।

ENMSS@7664@2ज्ञात्वाधो धनमस्यास्ति खनन्ति निशि रागिणः ॥ ७६६४॥

ENMSS@7665@1एकेन शुष्कवृक्षेण दह्यमानेन वह्निना ।

ENMSS@7665@2दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ॥ ७६६५॥

ENMSS@7666@1एकेन संधिः कलहोऽपरेण कार्योऽभितो वा प्रसमीक्ष्य वृद्धिम् ।

ENMSS@7666@2एवं प्रयुञ्जीत जिगीषुरेता नीतीर्विजानन्नहितात्मसारम् ॥ ७६६६॥

ENMSS@7667@1एकेन स्मितपाटलाधररुचो जल्पन्त्यनल्पाक्षरं वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः ।
ENMSS@7667@2दूरोदारचरित्रचित्रविभवं ध्यायन्ति चान्यं धिया केनेत्थं परमार्थतोऽर्थवदिव प्रेमास्ति वामभ्रुवाम् ॥ ७६६७॥
ENMSS@7668@1एकेनांशेन धर्मार्थः कर्तव्यो भूतिमिच्छता ।
ENMSS@7668@2एकेनांशेन कामार्थ एकमंशं विवर्धयेत् ॥ ७६६८॥
ENMSS@7669@1एकेनाक्ष्णा परिततरुषा वीक्षते व्योमसंस्थं भानोर्बिम्बं सजललुलितेनापरेणात्मकान्तम् ।
ENMSS@7669@2अह्नश्छेदे दयितविरहा शङ्किनी चक्रवाकी द्वौ संकीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥ ७६६९॥
ENMSS@7670@1एकेनापाति लत्ता पतिवपुषि परेणापि पीतः पिता ते भ्रातान्येनापि शप्तस्त्रिभुवनतलतोऽन्येन निर्वासितासि ।
ENMSS@7670@2सद्यः श्रीवीरभूपस्तृणमिव मनुते त्वां सरोजालये यन् मातस्तज्ज्ञातिमात्रप्रणयिनि मयि तन्मा स्म कोपं विदध्याः ॥ ७६७०॥
ENMSS@7671@1एकेनापाति लत्ता पतिवपुषि परेणापि पीतोऽस्ति तातो भ्राता शप्तः परेण
त्रिभुवनतलतोऽन्येन निष्कासितासि ।
ENMSS@7671@2छन्नं गेहं परेणाऽकलि च तदपरेणास्ति सापत्न्यशीला तस्मान्नित्यं द्विजेभ्यो मधुरिपुमहिले त्वं वियुक्तासि मन्ये ॥ ७६७१॥
ENMSS@7672@1एकेनापि गुणवता जातिविशुद्धेन चारुकृत्येन ।
ENMSS@7672@2स्वकुलमलंकृतमखिलं मुकुटं मुक्ताफलेनेव ॥ ७६७२॥
ENMSS@7673@1एकेनापि गुणवता विद्यायुक्तेन साधुना ।
ENMSS@7673@2कुलं पुरुषसिंहेन चन्द्रेणेव प्रकाश्यते ॥ ७६७३॥
ENMSS@7674@1एकेनापि गुणेनर्द्धो लभते स्पृहणीयताम् ।
ENMSS@7674@2काकल्यैव पिको लोकैर्मोद्यते मलिनोऽप्यसौ ॥ ७६७४॥
ENMSS@7675@1एकेनापि गुणेनाहो स्पृहणीयो नरो भवेत् ।
ENMSS@7675@2कलाभृत्त्येन रुचिरश्चन्द्रो दोषाकरोऽपि सन् ॥ ७६७५॥
ENMSS@7676@1एकेनापि पयोधिना जलमुचस्ते पूरिताः कोटिशो जातो नास्य कुशाग्रलीनतुहिनश्लक्ष्णोऽपि तोयव्ययः ।
ENMSS@7676@2आहो शुष्यति दैवदृष्टिवलनादम्भोभिरम्भोमुचः संभूयापि विधातुमस्य रजसि स्तैमित्यमप्यक्षमाः ॥ ७६७६॥

ENMSS@7677@1एकेनापि विनीतेन सुतेनोद्ध्रियते कुलम् ।
ENMSS@7677@2गङ्गावतारणापारप्रथं पश्य भगीरथम् ॥ ७६७७॥
ENMSS@7678@1एकेनापि सुधीरेण सोत्साहेन रणं प्रति ।
ENMSS@7678@2सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात् ॥ ७६७८॥
ENMSS@7679@1अत एव हि वाञ्छन्ति भूपा योधान् महाबलान् ।
ENMSS@7679@2शूरान् धीरान् कृतोत्साहान् वर्जयन्ति च कातरान् ॥ ७६७९॥
ENMSS@7680@1एकेनापि सुपुत्रेण जायमानेन सत्कुलम् ।
ENMSS@7680@2शशिना चैव गगनं सर्वदैवोज्ज्वलीकृतम् ॥ ७६८०॥
ENMSS@7681@1एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना ।
ENMSS@7681@2आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ॥ ७६८१॥
ENMSS@7682@1एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना ।
ENMSS@7682@2कुलमुज्ज्वलतां याति चन्द्रेण गगनं यथा ॥ ७६८२॥
ENMSS@7683@1एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
ENMSS@7683@2सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥ ७६८३॥
ENMSS@7684@1एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
ENMSS@7684@2वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥ ७६८४॥
ENMSS@7685@1एकेनापि हि शूरेण पादाक्रान्तं महीतलम् ।
ENMSS@7685@2क्रियते भास्करेणेव स्फारस्फुरिततेजसा ॥ ७६८५॥
ENMSS@7686@1एकेनैव चिराय कृष्ण भवता गोवर्धनोऽयं धृतः  श्रान्तोऽसि
क्षणमास्स्व सांप्रतममी सर्वे वयं दध्महे ।
ENMSS@7686@2इत्युल्लासितदोष्णि गोपनिवहे किंचिद् भुजाकुण्चन-
न्यश्चच्छैलभरार्दिते विरमति स्मेरो हरिः पातु वः ॥ ७६८६॥
ENMSS@7687@1एकेनैव हि कश्चिद्  गुणेन जगति प्रसिद्धिमुपयाति ।
ENMSS@7687@2एकेन करेण गजः  करी न सूर्यः सहस्रेण ॥ ७६८७॥
ENMSS@7688@1एकेनोद्धृत्य खड्गं हृदि पतितमिषुं पाणिनैकेन भञ्जन्
भ्रूभेदालंकृतास्यः सरभसनयनः स्पष्टदष्टाधरोष्ठः ।
ENMSS@7688@2भीतैः क्रव्यादवृन्दैरनुपहततनुः कुञ्जरेन्द्रोपधानः  शेते
योधप्रधानो यदि मरणमिदं लभ्यते किं जयेन ॥ ७६८८॥
ENMSS@7689@1एकेयं रसना न शब्दमभजद् भेजेऽनुवारं परा  नेत्रं
किंचिदनूरुसङ्गमभवज्ज्ञातोरुसङ्गं परम् ।
ENMSS@7689@2रागः कश्चन निर्जगाम हृदयात् तस्थौ तथैवापरो  बाह्ये सत्पुलकोऽन्तरे

विपुलको जातोऽङ्कभूसंभ्रमः ॥ ७६८९॥

ENMSS@7690@1एके वारिनिधौ प्रवेशमपरे लोकान्तरालोकनं केचित् पावकयोगितां निजगदुः क्षीणेऽह्नि चण्डार्चिषः ।

ENMSS@7690@2मिथ्या चैतदसाक्षिकं प्रियसखि प्रत्यक्षतीव्रातपं मन्येऽहं पुनरध्वनीनरमणीचेतोऽधिशेते रविः ॥ ७६९०॥

ENMSS@7691@1एकेषां वाचि शुकवद् अन्येषां हृदि मूकवत् ।

ENMSS@7691@2हृदि वाचि तथान्येषां वल्गु वल्गन्ति सूक्तयः ॥ ७६९१॥

ENMSS@7692@1एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।

ENMSS@7692@2तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये ये तु घ्नन्ति निरर्थकं परहितं ते के न जामीमहे ॥ ७६९२॥

ENMSS@7693@1एकैकमक्षविषयं भजताममीषां संपद्यते यदि कृतान्तगृहातिथित्वम् ।

ENMSS@7693@2पञ्चाक्षगोचररतस्य किमस्ति वाच्यम् अक्षार्थमित्यमलधीरधियस्त्यजन्ति ॥ ७६९३॥

ENMSS@7694@1एकैकशोऽपि निघ्नन्ति विषया विषसंनिभाः ।

ENMSS@7694@2क्षेमी तु स कथं नु स्याद् यः समं पञ्च सेवते ॥ ७६९४॥

ENMSS@7695@1एकैकशो युवजनं विलङ्घमानाक्षनिकरमिव तरला ।

ENMSS@7695@2विश्राम्यति सुभग त्वाम् अङ्गुलिरासाद्य मेरुमिव ॥ ७६९५॥

ENMSS@7696@1एकैकशो विनिघ्नन्ति विषया विषसंनिभाः ।

ENMSS@7696@2किं पुनः पञ्च मिलिताः न कथं नाशयन्ति हि ॥ ७६९६॥

ENMSS@7697@1एकैकस्य यदादाय पुष्पस्य मधु संचितम् ।

ENMSS@7697@2किंचिन् मधुकरीवर्गैस्तदप्यश्नन्ति निर्घृणाः ॥ ७६९७॥

ENMSS@7698@1एकैकस्य शरस्यैव चतुष्पक्षाणि योजयेत् ।

ENMSS@7698@2षडङ्गुलप्रमाणेन पक्षच्छेदं च कारयेत् ॥ ७६९८॥

ENMSS@7699@1एकैकस्योपकारस्य प्राणान् दास्यामि ते कपे ।

ENMSS@7699@2प्रत्यहं क्रियमाणस्य शेषस्य ऋणिनो वयम् ॥ ७६९९॥

ENMSS@7700@1एकैकातिशयालवः परगुणज्ञानैकवैज्ञानिकाः सन्त्येते धनिकाः कलासु सकलास्वाचार्यचर्याचणाः ।

ENMSS@7700@2अप्येते सुमनोगिरां निशमनाद् बिभ्यत्यहो श्लाघया धूते मूर्धनि कुण्डले

कषणतः क्षीणे भवेतामिति ॥ ७७००॥

ENMSS@7701@1एकैकोऽसंख्यजीवानां घाततो मधुनः कणः ।

ENMSS@7701@2निष्पद्यते यतस्तेन मध्वश्नाति कथं बुधः ॥ ७७०१॥

ENMSS@7702@1एकैव कविता पुंसां ग्रामायाश्वाय हस्तिने ।

ENMSS@7702@2अन्ततोऽन्नाय वस्त्राय ताम्बूलाय च कल्पते ॥ ७७०२॥

ENMSS@7703@1एकैव काचिन् महतामवस्था  सूक्ष्माणि वस्त्राण्यथवा च कन्था ।

ENMSS@7703@2कराग्रलग्नाभिनवा च बाला  गङ्गातरङ्गेष्वथवाक्षमाला ॥ ७७०३॥

ENMSS@7704@1एकैव दण्डनीतिस्तु विद्येत्यौशनसाः स्थिताः ।

ENMSS@7704@2तस्यां हि सर्वविद्यानाम् आरम्भाः संप्रतिष्ठिताः ॥ ७७०४॥

ENMSS@7705@1एकैव संगमे बाला वियोगे तन्मयं जगत् ।

ENMSS@7705@2कृतोपकार एवायं वियोगः केन निन्द्यते ॥ ७७०५॥

ENMSS@7706@1एकैव सामृतमयी सुतरामनर्घ्या  काप्यस्त्यसौ हिमकरस्य कला ययैव ।

ENMSS@7706@2आरोपितो गुणविदा परमेश्वरेण  चूडामणौ न गणितोऽस्य कलङ्कदोषः ॥ ७७०६॥

ENMSS@7707@1एकैव सार्थका चिन्ता धर्मस्यार्थे विचिन्त्यते ।

ENMSS@7707@2द्वितीया सार्थका चिन्ता योगिनां धर्मनन्दिनी ॥ ७७०७॥

ENMSS@7708@1एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः

कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद् यतीनाम् ।

ENMSS@7708@2अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः  सन्मार्गालोकनाय

व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥ ७७०८॥

ENMSS@7709@1एको गिरिशः स्वामी  गणता तुल्यैव वल्लभत्वं च ।

ENMSS@7709@2किं कुर्मः कर्मगतौ  शुष्यति भृङ्गी विनायकः पीनः ॥ ७७०९॥

ENMSS@7710@1एको गोत्रे पुमान् प्रोक्तः प्राक्तनैः स्वकुटुम्बभृत् ।

ENMSS@7710@2एकोऽप्यनेकः पुरुषः परेषां भरणक्षमः ॥ ७७१०॥

ENMSS@7711@1एको जयति सद्वृत्तः किं पुनर्द्वौ सुसंहतौ ।

ENMSS@7711@2किं चित्रं यदि तन्वङ्ग्याः स्तनाभ्यां निर्जितं जगत् ॥ ७७११॥

ENMSS@7712@1एको जीवो बहवो देहा  एकं तत्त्वं बहवो मोहाः ।

ENMSS@7712@2एका विद्या बहुपाषण्डा  विबुधैः क्रियते किमिति वितण्डा ॥ ७७१२॥

ENMSS@7713@1एकोदरसमुद्भूता एकनक्षत्रजातकाः ।

ENMSS@7713@2न भवन्ति समाः शीले यथा बदरकण्टकाः ॥ ७७१३॥

ENMSS@7714@1एकोदराः पृथग्ग्रीवा अन्यान्यफलभक्षिणः ।
ENMSS@7714@2असंहता विनश्यन्ति भारुण्डा इव पक्षिणः ॥ ७७१४॥
ENMSS@7715@1एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ENMSS@7715@2ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः ॥ ७७१५॥
ENMSS@7716@1एको देवः केशवो वा शिवो वा  एकं मित्रं भूपतिर्वा यतिर्वा ।
ENMSS@7716@2एको वासः पत्तने वा वने वा  एका भार्या सुन्दरी वा दरी वा ॥ ७७१६॥
ENMSS@7717@1एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
ENMSS@7717@2विद्यैका परमा दृष्टिरहिंसैका सुखावहा ॥ ७७१७॥
ENMSS@7718@1एको न रोपितो यावद् उत्पन्नोऽयं व्रणोऽपरः ।
ENMSS@7718@2सत्यः प्रवादो यच्छिद्रेष्वनर्था यान्ति भूरिताम् ॥ ७७१८॥
ENMSS@7719@1एकोना विंशतिः स्त्रीणां स्नानार्थं सरयूं गता ।
ENMSS@7719@2विंशतिः पुनरायाता एको व्याघ्रेण भक्षितः ॥ ७७१९॥
ENMSS@7720@1एकोना विंशतिर्नार्यः क्रीडां कर्तुं वने गताः ।
ENMSS@7720@2विंशतिर्गृहमायाताः शेषो व्याघ्रेण भक्षितः ॥ ७७२०॥
ENMSS@7721@1एको नेता क्षत्रियो वा द्विजो वा  चैका विद्यान्वीक्षिकी वा त्रयी वा ।
ENMSS@7721@2एका भार्या वंशजा वा प्रिया वाप्य् एकं मित्रं भूपतिर्वा यतिर्वा ॥ ७७२१॥
ENMSS@7722@1एकोऽन्ते द्विसमस्त्रिलोचन इति ख्यातश्चतुर्भिः स्तुतो  वेदैः पञ्चमुखः षडाननपिता सप्तर्षिभिर्वन्दितः ।
ENMSS@7722@2अष्टाङ्गो नवतुल्य आमरगणे वासो दशाशा दधत्  स्वश्चैकादश सोऽवतान्न विजितो यो द्वादशात्मांशुभिः ॥ ७७२२॥
ENMSS@7723@1एकोऽपि कृष्णस्य कृतः प्रणामो  दशाश्वमेधावभृथेन तुल्यः ।
ENMSS@7723@2दशाश्वमेधी पुनरेति जन्म  कृष्णप्रणामी न पुनर्भवाय ॥ ७७२३॥
ENMSS@7724@1एकोऽपि कोऽपि सेव्यो यः क्षीणं क्षीणं पुनर्नवम् ।
ENMSS@7724@2अनुद्विग्नं करोत्येव सूर्यश्चन्द्रमसं यथा ॥ ७७२४॥
ENMSS@7725@1एकोऽपि गुणवान् पुत्रो निर्गुणेन शतेन किम् ।
ENMSS@7725@2एकश्चन्द्रस्तमो हन्ति न च ताराः सहस्रशः ॥ ७७२५॥
ENMSS@7726@1एकोऽपि गुणवान् पुत्रो निर्गुणैः किं शतैरपि ।
ENMSS@7726@2एकश्चन्द्रो जगन्नेत्रं नक्षत्रैः किं प्रयोजनम् ॥ ७७२६॥
ENMSS@7727@1एकोऽपि गुणवान् पुत्रो मा निर्गुणशतं भवेत् ।

ENMSS@7727@2एकश्चन्द्रस्तमो हन्ति न च ताराः सहस्रशः ॥ ७७२७॥

ENMSS@7728@1एकोऽपि जीयते हन्त कालिदासो न केनचित् ।

ENMSS@7728@2शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥ ७७२८॥

ENMSS@7729@1एकोऽपि त्रय इव भाति कन्दुकोऽयं कान्तायाः करतलरागरक्तरक्तः ।

ENMSS@7729@2भूमौ तच्चरणनखांशुगौरगौरः स्वःस्थः सन् नयनमरीचिनीलनीलः ॥ ७७२९॥

ENMSS@7730@1एकोऽपि यः सकलकार्यविधौ समर्थः सत्त्वाधिको भवतु किं बहुभिः प्रसूतैः ।

ENMSS@7730@2चन्द्रः प्रकाशयति दिङ्मुखमण्डलानि तारागणः समुदितोऽप्यसमर्थ एव ॥ ७७३०॥

ENMSS@7731@1एकोऽपि यत्र नगरे प्रसिद्धः स्याद् धनुर्धरः ।

ENMSS@7731@2ततो यान्त्यरयो दूरं मृगाः सिंहगृहादिव ॥ ७७३१॥

ENMSS@7732@1एकोऽपि वारणपतिर्द्विषतामनीकं युक्तं निहन्ति मदसत्त्वगुणोपपन्नः ।

ENMSS@7732@2नागेषु हि क्षितिभृतां विजयो निबद्धस् तस्माद् गजाधिकबलो नृपतिः सदा स्यात् ॥ ७७३२॥

ENMSS@7733@1एकोऽपि सिंहः साहस्रं यूथं मथ्नाति दन्तिनाम् ।

ENMSS@7733@2तस्मात् सिंहमिवोदारम् आत्मानं वीक्ष्य संपतेत् ॥ ७७३३॥

ENMSS@7734@1एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः ।

ENMSS@7734@2राजानं राजमात्रं वा प्रापयेन् महतीं श्रियम् ॥ ७७३४॥

ENMSS@7735@1एको बटुर्दर्भकुशाग्रपाणिर् वने वनैः सिञ्चति बालचूतान् ।

ENMSS@7735@2आम्राश्च सिक्ताः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरी प्रसिद्धा ॥ ७७३५॥

ENMSS@7736@1एको बहूनां मूर्खाणां मध्ये निपतितो बुधः ।

ENMSS@7736@2पद्मः पाथस्तरङ्गाणां इव विप्लवते ध्रुवम् ॥ ७७३६॥

ENMSS@7737@1एको बाणः स्फुरति वलितालोकनं कामिनीनां कामस्यान्यो मलयपवनः कामिनां मर्मभेदी ।

ENMSS@7737@2वीणावेणुक्वणितमपरश्चूतपुष्पं तुरीयः सर्वोत्कण्ठप्रथमसचिवः पञ्चमः पञ्चमोऽपि ॥ ७७३७॥

ENMSS@7738@1एको भवान् मम समं दश वा नमन्ति ज्याघोषपूरितवियन्ति शरासनानि ।

ENMSS@7738@2तल्लोकपालसहितः सह लक्ष्मणेन चापं गृहाण सदृशं क्षणमस्तु युद्धम् ॥ ७७३८॥

ENMSS@7739@1एको भावः सदा शस्तो यतीनां भावितात्मनाम् ।

ENMSS@7739@2श्रीलुब्धानां न लोकानां विशेषेण महीभुजाम् ॥ ७७३९॥

ENMSS@7740@1एकोऽभूत् पुलिनात् ततस्तु नलिनाच्चान्योऽपि नाकोरभूत् प्राच्यास्ते त्रय

एव दिव्यकवयो दीव्यन्तु देव्या गिरा ।

ENMSS@7740@2अर्वाञ्चो यदि गद्यपद्यरचनाचातुर्यवागुद्धतास् तान् सर्वानतिशय्य खेलतितरां शाकल्लमल्लः कविः ॥ ७७४०॥

ENMSS@7741@1एकोऽभून्नलिनात् ततश्च पुलिनाद् वल्मीकतश्चापरस् ते सर्वे कवयो भवन्ति गुरवस्तेभ्यो नमस्कुर्महे ।

ENMSS@7741@2अर्वाञ्चो यदि गद्यपद्यरचनैश्चेतश्चमत्कुर्वते तेषां मूर्ध्नि

ददामि वामचरणं कर्णाटराजप्रिया ॥ ७७४१॥

ENMSS@7742@1एको भेकः परममुदितः प्राप्य गोष्पादनीरं को मे को मे रटति सततं

स्पर्द्धया वाक्यमुच्चैः ।

ENMSS@7742@2गङ्गादीनां सकलसरितां प्राप्य तोयं समुद्रः किंचिद् गर्वं न वहति महान् प्रायशो भूरि रत्नैः ॥ ७७४२॥

ENMSS@7743@1एको मे शाश्वतात्मा सुखमसुखभुजो ज्ञानदृष्टिस्वभावो नान्यत् किंचिन्निजं मे तनुधनकरणभ्रातृभार्यासुखादि ।

ENMSS@7743@2कर्मोद्भूतं समस्तं चपलमसुखदं तत्र मोहो मुधा मे पर्यालोच्येति जीव स्वहितमवितथं मुक्तिमार्गं श्रय त्वम् ॥ ७७४३॥

ENMSS@7744@1एकोऽम्बुधिर्जगति जीवति येन तानि तावन्ति हन्त सलिलानि समुच्चितानि ।

ENMSS@7744@2येभ्यः कथंचिदपि किंचिदमी पयोदाः पीत्वा चिराय धरणीमपि तर्पयन्ति ॥ ७७४४॥

ENMSS@7745@1एको रविरतितेजा अतिशूरः केसरी वने वासी ।

ENMSS@7745@2अतिविपुलं खं शून्यं ह्यतिगम्भीरोऽम्बुधिः क्षारः ॥ ७७४५॥

ENMSS@7746@1एको रसः करुण एव निमित्त भेदाद् भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।

ENMSS@7746@2आवर्तबुद्बुदतरङ्गमयान् विकारान् अम्भो यथा सलिलमेव हि तत् समस्तम्

॥ ७७४६॥

ENMSS@7747@1एको रागिषु राजते प्रियतमादेहार्धहारी हरो  नीरागेषु जिनो विमुक्तललनासङ्गो न यस्मात् परः ।

ENMSS@7747@2दुर्वारस्मरबाणपन्नगविषव्यासङ्गमुग्धो जनः  शेषः कामविडम्बितो हि

विषयान् भोक्तुं न मोक्तुं क्षमः ॥ ७७४७॥

ENMSS@7748@1एकोऽर्थं विमृशेदेको धर्मे प्रकुरुते मनः ।

ENMSS@7748@2एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ॥ ७७४८॥

ENMSS@7749@1एको ललाटे द्वौ मूर्ध्नि द्वौ द्वौ पार्श्वोपपार्श्वयोः ।

ENMSS@7749@2द्वौ च वक्षसि विज्ञेयौ प्रयाणे चैक एव तु ॥ ७७४९॥

ENMSS@7750@1एको लोभो महाग्राहो लोभात् पापं प्रवर्तते ।

ENMSS@7750@2ततः पापादधर्माप्तिस्ततो दुःखं प्रवर्तते ॥ ७७५०॥

ENMSS@7751@1एको वित्तवतः सूनुः पितृहीनः सुयौवने ।

ENMSS@7751@2मुग्धे भूभुजि कायस्थः कामिस्पर्धी वणिक्सुतः ॥ ७७५१॥

ENMSS@7752@1नित्यातुरामात्यवैद्यप्रसिद्धस्य गुरोः सुतः ।

ENMSS@7752@2॥। ॥। प्रच्छन्नकामो जटाधरः ॥ ७७५२॥

ENMSS@7753@1नपुंसकप्रवादस्य प्रशमार्थी फलाशनः ।

ENMSS@7753@2मत्तो धूर्तसहायश्च राजसूनुर्निरङ्कुशः ॥ ७७५३॥

ENMSS@7754@1ग्राम्यो धातृद्विजसुतः प्राप्तलाभश्च गायनः ।

ENMSS@7754@2सद्यः सार्थपतिः प्राप्तः श्रीमान् दैवपरायणः ॥ ७७५४॥

ENMSS@7755@1गतानुगतिको मूर्खः शास्त्रोन्मादश्च पण्डितः ।

ENMSS@7755@2नित्यक्षीबश्च वेश्यानां जङ्गमाः कल्पपादपाः ॥ ७७५५॥

ENMSS@7756@1एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिनाम्  इत्येवं परिचिन्त्य मात्ममनसि व्याधानुतापं कृथाः ।

ENMSS@7756@2भूपानां भवनेषु किं च विमलक्षेत्रेषु गूढाशयाः  साधूनामरयो वसन्ति कति न त्वत्तुल्यकक्षा नराः ॥ ७७५६॥

ENMSS@7757@1एको वैश्यश्च द्वौ शूद्रौ ब्राह्मणास्त्रय एव च ।

ENMSS@7757@2विद्योपजीविनः पञ्च न गच्छेयुः समं स्वयम् ॥ ७७५७॥

ENMSS@7757A@1एको वैश्यो द्वौ च शूद्रौ क्षत्रियाः सप्त पञ्च वा ।

ENMSS@7757A@2नव नार्यो न गच्छेयुः न गच्छेद् ब्राह्मणत्रयम् ॥

ENMSS@7758@1एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः ।

ENMSS@7758@2स्वप्नेऽप्येवंविधा चिन्ता मृगेन्द्रस्य न जायते ॥ ७७५८॥

ENMSS@7759@1एकोऽहमस्मीति च मन्यसे त्वं  न हृच्छयं वेत्सि मुनिं पुराणम् ।

ENMSS@7759@2यो वेदिता कर्मणः पापकस्य  यस्यान्तिके त्वं वृजिनं करोषि ॥ ७७५९॥

ENMSS@7760@1एकोऽहमस्मीत्यात्मानं यत् त्वं कल्याण मन्यसे ।

ENMSS@7760@2नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः ॥ ७७६०॥

ENMSS@7761@1एको हरः प्रियाधर-  गुणवेदी दिविषदोऽपरे मूढाः ।

ENMSS@7761@2विषममृतं वा सममिति  यः पश्यन् गरलमेव पपौ ॥ ७७६१॥

ENMSS@7762@1एको हि कुरुते पापं कालपाशवशं गतः ।

ENMSS@7762@2नीचेनात्मापचारेण कुलं तेन विनश्यति ॥ ७७६२॥

ENMSS@7763@1एको हि खञ्जनवरो नलिनीदलस्थो  दृष्टः करोति चतुरङ्गबलाधिपत्यम् ।

ENMSS@7763@2किं मे करिष्यति भवद्वदनारविन्दे  जानामि नो नयनखञ्जनयुग्ममेतत् ॥ ७७६३॥

ENMSS@7764@1एको हि दोषो गुणसंनिपाते  निमज्जतीत्येतदयुक्तमुक्तम् ।

ENMSS@7764@2रूपादिकान् सर्वगुणान् निहन्ति  किं मौर्ख्यमेकं न शरीरभाजाम् ॥ ७७६४॥

ENMSS@7765@1एको हि दोषो गुणसंनिपाते  निमज्जतीन्दोः किरणेष्विवाङ्कः ।

ENMSS@7765@2केनापि नूनं कविना च दृष्टं  दारिद्र्यमेकं गुणराशिनाशि ॥ ७७६५॥

ENMSS@7766@1एको ह्यमात्यो मेधावी शूरो दान्तो विचक्षणः ।

ENMSS@7766@2राजानं राजपुत्रं वा प्रापयेन् महतीं श्रियम् ॥ ७७६६॥

ENMSS@7767@1एणः क्रीडति शूकरश्च खनति द्वीपी च गर्वायते  क्रोष्टा क्रन्दति
वल्गते च शशको वेगाद् रुरुर्धावति ।

ENMSS@7767@2निःशङ्कः करिपोतकस्तरुलतामुन्मोटते लीलया  हंहो सिंह विना त्वयाद्य
विपिने कीदृग्दशा वर्तते ॥ ७७६७॥

ENMSS@7768@1एणश्रेणिः शशकनिकरः शल्लकीनां कदम्बं  कोलव्यूहः स्पृशति
सुखितां यत्र तत्रापि कुञ्जे ।

ENMSS@7768@2को नामास्मिन् बत हतवने पादपस्तादृगुच्चैर् यस्य
च्छायामयमधिवसत्युष्णरुग्णो गजेन्द्रः ॥ ७७६८॥

ENMSS@7769@1एणाक्षीस्पृहयालुता न कथमप्यास्ते विवेकोदयान्  नित्यं प्रच्युतिशङ्कया
क्षणमपि स्वर्गे न मोदामहे ।

ENMSS@7769@2अप्यन्येषु विनाशिवस्तुविषयाभोगेषु तृष्णा न मे  स्वर्णद्याः पुलिने परं हरिपदध्यानं समीहामहे ॥ ७७६९॥

ENMSS@7770@1एणाद्याः पशवः किरातपरिषन्नैषा गुणग्राहिणी  संचारोऽपि न नागरस्य विषयोच्छिन्नं मुनीनां मनः ।

ENMSS@7770@2धूमेनैव सुगन्धिना प्रतिपदं दिक्चक्रमामोदयन्  आमूलं परिदह्यतेऽगुरुतरुः कस्मै किमाचक्ष्महे ॥ ७७७०॥

ENMSS@7771@1एणीगणेषु गुरुगर्वनिमीलिताक्षः  किं कृष्णसार खलु खेलसि काननेऽस्मिन् ।

ENMSS@7771@2सीमामिमां कलय भिन्नकरीन्द्रकुम्भ-  मुक्तामयीं हरिविहारवसुन्धरायाः ॥ ७७७१॥

ENMSS@7772@1एणीदृशः पाणिपुटे निरुद्धा  वेणी विरेजे शयनोत्थितायाः ।

ENMSS@7772@2सरोजकोशादिव निष्पतन्ती  श्रेणी घनीभूय मधुव्रतानाम् ॥ ७७७२॥

ENMSS@7773@1एणीदृशः श्रवणसीम्नि यदानयन्ति  तेनैव तस्य महिमा नवचम्पकस्य ।

ENMSS@7773@2त्वं तत्र नो विहरसे यदि भृङ्ग तेन  नैतस्य किंचिदपि तत् तु तवैव हानिः ॥ ७७७३॥

ENMSS@7774@1एणीदृशो विजयते वेणी पृष्ठावलम्बिनी ।

ENMSS@7774@2कशेव पञ्चबाणस्य युवतर्जनहेतवे ॥ ७७७४॥

ENMSS@7775@1एणी याति विलोक्य बालशलभान् शष्पाङ्कुरादित्सया  छत्रीकुड्मलकानि रक्षति चिरादण्डभ्रमाद् कुक्कुटी ।

ENMSS@7775@2धूत्वा धावति कृष्णकीटपटलश्रेणीं शिखण्डी शिरो  दूरादेव वनान्तरे विषधरग्रासाभिलाषातुरः ॥ ७७७५॥

ENMSS@7776@1एणीशाबविलोचनाभिरलसश्रोणीभरप्रौढि भिर् वेणीभूतरसक्रमाभिरभितः श्रेणीकृताभिर्वृतः ।

ENMSS@7776@2पाणी नाम विनोदयन् रतिपतेस्तूणीशयैः सायकैर् वाणीनामपदं परं व्रजजनक्षोणीपतिः पातु नः ॥ ७७७६॥

ENMSS@7777@1एणो गजः पतङ्गश्च भृङ्गो मीनस्तु पञ्चमः ।

ENMSS@7777@2शब्दस्पर्शरूपगन्धरसैरेते हताः खलु ॥ ७७७७॥

ENMSS@7778@1एतच्च तपसो मूलं तपसो मूलमेव च ।

ENMSS@7778@2सर्वदा कामविजयः संकल्पविजयस्तथा ॥ ७७७८॥

ENMSS@7779@1एतच्चतुर्गुणं तैलं तस्माच्चापि चतुर्गुणम् ।

ENMSS@7779@2कांजिकं प्रक्षिपेद् धीमांस्ततस्तैलं विपाचयेत् ॥ ७७७९॥

ENMSS@7780@1एतच्छ्रान्तविचित्रचत्वरपथं विश्रान्तवैतालिक-
श्लाघाश्लोकमगुञ्जिमञ्जुमुरजं विध्वस्तगीतध्वनि ।

ENMSS@7780@2व्यावृत्ताध्ययनं निवृत्तसुकविक्रीडासमस्यं नमद्- विद्वद्वादपथं कथं पुरमिदं मौनव्रते वर्तते ॥ ७७८०॥

ENMSS@7781@1एतच्छास्त्रार्थतत्त्वं तु मयाख्यातं तवानघ ।

ENMSS@7781@2अविश्वासो नरेन्द्राणाम् अपरं गुह्यमुच्यते ॥ ७७८१॥

ENMSS@7782@1एतज्जडाजडविवेचनमेतदेव क्षित्यादितत्त्वपरिशोधनकौशलं च ।

ENMSS@7782@2ज्ञानं च शैवमिदमागमकोटिलभ्यं मातुर्यदङ्घ्रियुगले निहितो मयात्मा ॥ ७७८२॥

ENMSS@7783@1एतत्करालकरवालनिकृत्तकण्ठ- नालोच्चलद्बहुलफेनिलबुद्बुदौघैः ।

ENMSS@7783@2सार्धं डमड्डमरुडांकृतिहूतभूत- वर्गेण भर्गगृहिणीं रुधिरैर्धिनोमि ॥ ७७८३॥

ENMSS@7784@1एतत् कवीन्द्रमुखचन्द्रमसः कदाचित् काव्याभिधानममृतं यदि नागलिष्यत् ।

ENMSS@7784@2संसारिणां विविधदुःखसहस्रभाजां चेतोविनोदसदनं किमिहाभविष्यत् ॥ ७७८४॥

ENMSS@7785@1एतत् कान्तमिदं कान्तम् इत्यावसथतृष्णया ।

ENMSS@7785@2तस्या भ्रमति सर्वाङ्गं मन्ये मूढ इव स्मरः ॥ ७७८५॥

ENMSS@7786@1एतत् कामफलं लोके यद् द्वयोरेकचित्तता ।

ENMSS@7786@2अन्यचित्तकृते कामे शवयोरिव संगमः ॥ ७७८६॥

ENMSS@7787@1एतत् कार्यममराः संश्रुतं मे धृतिः शमः सत्यधर्मानुवृत्तिः ।

ENMSS@7787@2ग्रन्थिं विनीय हृदयस्य सर्वं प्रियाप्रिये चात्मवशं नयीत ॥ ७७८७॥

ENMSS@7787A@1एतत् किं ननु कर्णभूषणमयं हारः सुकाञ्ची नवा बद्धा काचिदियं त्वयाद्य तिलकः श्लाघ्यः प्रिये कल्पितः ।

ENMSS@7787A@2प्रत्यङ्गं स्पृशतेति तत्क्षणभवद्रोमाञ्चमालाञ्चिता तन्वी मानमुपेक्षयैव शनकैर्धूर्तेन संमोचिता ॥

ENMSS@7788@1एतत् किं प्रणयिन्यपि प्रणयिनी यन् मानिनी जायते मन्ये मानविधौ भविष्यति
सुखं किंचिद् विशिष्टं रसात् ।

ENMSS@7788@2वाञ्छा तस्य सुखस्य मेऽपि हृदये जागर्ति नित्यं परं स्वप्नेऽप्येष

न मेऽपराध्यति पतिः कुप्यामि तस्मै कथम् ॥ ७७८८॥

ENMSS@7789@1एतत् किं श्रुतसदृशं त्वद्व्रतयोग्यं कुलानुरूपं वा ।

ENMSS@7789@2कृतवानसि यत् सुमते परिभूतगुणोदयं कर्म ॥ ७७८९॥

ENMSS@7790@1एतत्कीर्तिविवर्तधौतनिखिलत्रैलोक्यनिर्वासितैर् विश्रान्तिः कलिता कथासु जगतां श्यामैः समग्रैरपि ।

ENMSS@7790@2जज्ञे कीर्तिमयादहो भयभरैरस्मादकीर्तेः पुनः सा यन्नास्य कथापथेऽपि मलिनच्छाया बबन्ध स्थितिम् ॥ ७७९०॥

ENMSS@7791@1एतत्कुचस्पर्धितया धटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम् ।

ENMSS@7791@2तस्माच्च शिल्पान् मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः ॥ ७७९१॥

ENMSS@7792@1एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे सौहार्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।

ENMSS@7792@2इष्टान् देशान् विचर जलद प्रावृषा संभृतश्रीर् मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ७७९२॥

ENMSS@7793@1एतत् कोककुटुम्बिनीजनमनःशल्यं चकोराङ्गना-
चञ्चूकोटिकपाटयोर्घटितयोरुद्घाटिनी कुञ्चिका ।

ENMSS@7793@2दग्धस्यापि नवाङ्कुरः स्मरतरोरार्द्रागसां प्रेयसी- मानोद्दामगजाङ्कुशो विजयते मुग्धं सुधांशोर्वपुः ॥ ७७९३॥

ENMSS@7794@1एतत् तद् दुर्जयं लोके पुत्रदारमयं विषम् ।

ENMSS@7794@2जायन्ते च म्रियन्ते च यत् पीत्वा मोहिताः प्रजाः ॥ ७७९४॥

ENMSS@7795@1एतत् तद् धृतराष्ट्रवक्त्रसदृशं मेघान्धकारं नभो हृष्टो
गर्जति चातिदर्पितबलो दुर्योधनो वा शिखी ।

ENMSS@7795@2अक्षद्यूतजितो युधिष्ठिर इवाध्वानं गतः कोकिलो हंसाः संप्रति पाण्डवा इव वनादज्ञातचर्यां गताः ॥ ७७९५॥

ENMSS@7796@1एतत् तद्वक्त्रमत्र क्व तदधरमधु क्वायतास्ते कटाक्षाः क्वालापाः कोमलास्ते क्व स मदनधनुर्भङ्गुरो भ्रूविलासः ।

ENMSS@7796@2इत्थं खट्वाङ्गकोटौ प्रकटितदशनं मञ्जुगुञ्जत्समीरम्
रागान्धानामिवोच्चैरुपहसितमहो मोहजालं कपालम् ॥ ७७९६॥

ENMSS@7797@1एतत् तर्कय चक्रवाकसुदृशामाश्वासनादायिनः
प्रौढध्वान्तपयोधिमग्नजगतीदत्तावलम्बोत्सवाः ।

ENMSS@7797@2दीप्तांशोर्विकसन्ति दिङ्मृगदृशां काश्मीरपङ्कोदक-

व्यात्युक्षीचतुराः सरोरुहवनश्रीकेलिकाराः कराः ॥ ७७९७॥

ENMSS@7798@1एतत् तर्कय चक्रवाकहृदयाश्वासाय तारागण- ग्रासाय

स्फुरदिन्दुमण्डलपरीहासाय भासां निधिः ।

ENMSS@7798@2दिक्कान्ताकुचकुम्भकुङ्कुमरजोन्यासाय पङ्केरुहो- ल्लासाय

स्फुटवैरिकैरववनत्रासाय विद्योतते ॥ ७७९८॥

ENMSS@7799@1एतत् तस्य मुखात् कियत् कमलिनीपत्रे कणं वारिणो यन् मुक्तामणिरित्यमंस्त

स जडः शृण्वन् यदस्मादपि ।

ENMSS@7799@2अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैस् कुत्रोड्डीय गतो

ममेत्यनुदिनं निद्राति नान्तःशुचा ॥ ७७९९॥

ENMSS@7800@1एतत् तु मां दहति यद् गृहमस्मदीयं क्षीणार्थमित्यतिथयः

परिवर्जयन्ति ।

ENMSS@7800@2संशुष्कसान्द्रमदलेखमिव भ्रमन्तः कालात्यये मधुकराः करिणः

कपोलम् ॥ ७८००॥

ENMSS@7801@1एतत् ते भ्रूलतोद्भासि पाटलाधरपल्लवम् ।

ENMSS@7801@2मुखं नन्दनमुद्यानम् अतोऽन्यत् केवलं वनम् ॥ ७८०१॥

ENMSS@7802@1एतत् ते मुखमक्षतेन्दुलडहच्छायं भवल्लोचनं

नीलेन्दीवरनिर्विशेषमधरस्ते बन्धुजीवारुणः ।

ENMSS@7802@2भ्रूवल्लिस्तव कामकार्मुकलता लीलासहाध्यायिनी न ध्यायन्तु कथं नु

देव कथय त्वामेकमेणीदृशः ॥ ७८०२॥

ENMSS@7803@1एतत् पयोधरयुगं पतितं निरीक्ष्य खेदं वृथा वहसि किं

कमलायताक्षि ।

ENMSS@7803@2स्तब्धो विवेकरहितो जनतापकारी ह्यत्युन्नतः प्रपततीति किमत्र चित्रम्

॥ ७८०३॥

ENMSS@7804@1एतत् पुरः स्फुरति पद्मदृशां सहस्रम् अक्षिद्वयं कथय कुत्र

निवेशयामि ।

ENMSS@7804@2इत्याकलय्य नयनाम्बुरुहे निमील्य रोमाञ्चितेन वपुषा स्थितमच्युतेन

॥ ७८०४॥

ENMSS@7805@1एतत् पूतनचक्रमक्रमकृतग्रासार्धमुक्तैर्वृकान् उत्पुष्णत्परितो

नृमांसविघसैरादर्दरं क्रन्दतः ।

ENMSS@7805@2खर्जूरद्रुमदघ्नजङ्घमसितत्वङ्नद्धविष्वक्तत-
स्नायुग्रन्थिघनास्थिपञ्जरजरत्कङ्कालमालोक्यते ॥ ७८०५॥
ENMSS@7806@1एतत् प्रचण्डि समुदेत्यकलङ्कमूर्ति कल्माषिताम्बरतलं ग्रहचक्रवालम्
।
ENMSS@7806@2सूर्येन्दुसंपुटसमुद्गकवाटकोष- विश्लेषकीर्णनवरत्नकलापकान्ति
॥ ७८०६॥
ENMSS@7807@1एतत् सर्वं परिज्ञाय वृक्षारोपं समारभेत् ।
ENMSS@7807@2धर्मार्थकाममोक्षाणां द्रुमेभ्यः साधनं यतः ॥ ७८०७॥
ENMSS@7808@1एतत् सर्वं श‍ृणुत वचनं संग्रहादत्र सख्यः प्राणानां नः
फलमविकलं नूनमेषा सखी वः ।
ENMSS@7808@2विश्लेषेऽस्मिन् प्रचलति भृशं दीपिकेव प्रवाते सत्यामस्यां
वयमतमसः सर्वथा रक्षतैनाम् ॥ ७८०८॥
ENMSS@7809@1एतत् सर्वममात्यादि राजा नयपुरःसरः ।
ENMSS@7809@2नयत्युन्नतिमुद्युक्तो व्यसनी क्षयमेव च ॥ ७८०९॥
ENMSS@7810@1एतदत्र पथिकैकजीवितं पश्य शुष्यतितरां महत्सरः ।
ENMSS@7810@2रे मुधाम्बुधर रुद्धसद्गतिर् वर्धिता किमिति घट्टवाहिनी ॥ ७८१०॥
ENMSS@7811@1एतदनूपे वाच्यं जाङ्गलभूमौ च पञ्चभिः पुरुषैः ।
ENMSS@7811@2एतैरेव निमित्तैर् मरुभूमावष्टभिः कथयेत् ॥ ७८११॥
ENMSS@7812@1एतदर्थं श्रुते बुद्धिं करोति द्वेषदूषितः ।
ENMSS@7812@2यद् विवादैः करिष्यामि मानम्लानिं मनीषिणाम् ॥ ७८१२॥
ENMSS@7813@1एतदर्थं हि कुर्वन्ति राजानो धनसंचयम् ।
ENMSS@7813@2रक्षयित्वा तु चात्मानं यद्धनं तद् द्विजातये ॥ ७८१३॥
ENMSS@7814@1एतदर्थं हि राज्यानि प्रशासति नरेश्वराः ।
ENMSS@7814@2यदेषां सर्वकृत्येषु मनो न प्रतिहन्यते ॥ ७८१४॥
ENMSS@7815@1एतदर्थे कुलीनानां नृपाः कुर्वन्ति संग्रहम् ।
ENMSS@7815@2आदिमध्यावसानेषु न ते गच्छन्ति विक्रियाम् ॥ ७८१५॥
ENMSS@7816@1एतदुच्छ्वसितपीतमैन्दवं सोढुमक्षममिव प्रभारसम् ।
ENMSS@7816@2मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमा निबन्धनात् ॥ ७८१६॥
ENMSS@7817@1एतदेव कुलीनत्वम् एतदेव गुणार्जनम् ।
ENMSS@7817@2यत् सदैव सतां सत्सु विनयावनतं शिरः ॥ ७८१७॥
ENMSS@7818@1एतदेव तु विज्ञेयं स्वार्थधर्मविघातजे ।

ENMSS@7818@2विषयध्वंसजे शत्रोर्विषयप्रतिपीडनम् ॥ ७८१८॥
ENMSS@7819@1एतदेव परं शौर्यं यत् परप्राणरक्षणम् ।
ENMSS@7819@2नहि प्राणहरः शूरः शूरः प्राणप्रदोऽर्थिनाम् ॥ ७८१९॥
ENMSS@7819A@1एतदेव मम पुण्यमगण्यं यत् कृशोदरि दृशोरतिथिस्त्वम् ।
ENMSS@7819A@2दूरमस्तु मदघूर्णिततारं शारदेन्दुमुखि वीक्षणमक्ष्णोः ॥
ENMSS@7820@1एतदेव महच्चित्रं प्राक्तनस्येह कर्मणः ।
ENMSS@7820@2यदनात्मवतामायुर्यच्चानतिमतां श्रियः ॥ ७८२०॥
ENMSS@7821@1एतदेव हि पाण्डित्यम् इयमेव बहुज्ञता ।
ENMSS@7821@2अयमेव परो लाभो यत् स्वल्पाद् भूरिरक्षणम् ॥ ७८२१॥
ENMSS@7822@1एतदेव हि पाण्डित्यं एषा चैव कुलीनता ।
ENMSS@7822@2एष एव परो धर्म आयादूनतरो व्ययः ॥ ७८२२॥
ENMSS@7824@1एतदेवायुषः सारं निसर्गक्षणभङ्गिनः ।
ENMSS@7824@2स्निग्धर्मुग्धैर्विदग्धैश्च यदयन्त्रितमास्यते ॥ ७८२४॥
ENMSS@7824A@1एतदेवार्थसामर्थ्यं प्रत्यक्षेणोपलक्ष्यते ।
ENMSS@7824A@2पुत्रदारादिसंबन्धः पुंसां धननिबन्धनः ॥
ENMSS@7825@1एतदेवार्थसामर्थ्यं प्रत्यक्षेणोपलक्ष्यते ।
ENMSS@7825@2यत् स्कन्धबन्धे जीवद्भिः शवः शिबिकयोह्यते ॥ ७८२५॥
ENMSS@7826@1एतद्गन्धगजस्तृषाम्भसि भृशं कण्ठान्तमग्नत्तनुः फेनैः
पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्धिभिः ।
ENMSS@7826@2दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवमि- व्याजादभ्रमुवल्लभेन
विरहं निर्वापयत्यम्बुधेः ॥ ७८२६॥
ENMSS@7827@1एतद्दत्तासिघातस्रवदसृगसुहृद्वंशसार्द्रेन्धनैत् अद्-
दोरुद्दामप्रतापज्वलदनलमिलद्धूमधूमभ्रमाय ।
ENMSS@7827@2एतद्दिग्जैत्रयात्रासमसमरभरं पश्यतः कस्य नासीद्
एतन्नासीरवाजिव्रजखुरजरजोराजिराजिस्थलीषु ॥ ७८२७॥
ENMSS@7828@1एतद् दधाति नवयौवननर्तकस्य कश्मीरजच्छुरिततालकयुग्मलक्ष्मीम्
।
ENMSS@7828@2मध्ये समुच्छ्वसितवृत्ति मनागुपान्ते लब्धात्मसीम कुचकुड्मलयुग्ममस्याः
॥ ७८२८॥
ENMSS@7829@1एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं संग्रामाङ्गणसीम्नि
जङ्गमगिरिस्तोमभ्रमाधायिभिः ।

ENMSS@7829@2पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर- श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियम् ॥ ७८२९॥

ENMSS@7830@1एतद् देव यशस्करं नरपतेर्यत् तस्करे निग्रहो दीर्घं जीव यथापराधमधुरं दण्डं जगत्यावहन् ।

ENMSS@7830@2येनायं परिपन्थिपार्थिववधूसिन्दूरचौरस्त्वया बद्धश्च प्रतिदण्डभैरवकरी क्षिप्तश्च कारागृहे ॥ ७८३०॥

ENMSS@7831@1एतद् धनञ्जयो वाच्यो नित्योद्युक्तो वृकोदरः ।

ENMSS@7831@2यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ॥ ७८३१॥

ENMSS@7832@1एतद्धि परमं नार्याः कार्यं लोके सनातनम् ।

ENMSS@7832@2प्राणानपि परित्यज्य यद् भर्तृहितमाचरेत् ॥ ७८३२॥

ENMSS@7833@1एतद् बभ्रुकचानुकारिकिरणं राजद्रुहोऽह्नः शिरश्- छेदाभं वियतः प्रतीचि निपतत्यब्धौ रवेर्मण्डलम् ।

ENMSS@7833@2एषापि द्युरमा प्रियानुगमनं प्रोद्दामकाष्ठोत्थिते संध्याग्नौ विनिधाय तारकमिषाज्ज्ञातास्थिशेषस्थितिः ॥ ७८३३॥

ENMSS@7834@1एतद् बुद्धिमशेषाणां सत्त्वमातन्य योगवित् ।

ENMSS@7834@2परित्यजति सम्प्राप्य बुद्धिसौक्ष्म्यमनुत्तमम् ॥ ७८३४॥

ENMSS@7835@1एतद्भीतारिनारी गिरिबिलविगलद्वासरा निःसरन्ती स्वक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थि तोन्निद्रचन्द्रा ।

ENMSS@7835@2आक्रन्दद् भूरि यत्तन्नयनजलमिलच्चन्द्रहंसानुबिम्ब- प्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीन् न्यश्वसीच्च ॥ ७८३५॥

ENMSS@7836@1एतद् भीमपराक्रमेण रचितं संसारसारं सरः पाथोनाथकथापहस्तनकलावैचक्षणे दीक्षितम् ।

ENMSS@7836@2यन्माहात्म्यविलोकनाद्भुतरसाद्धूताम्बरश्री शिरः- स्रस्तं कुण्डलमम्बुबिम्बितरविव्याजेन विद्योतते ॥ ७८३६॥

ENMSS@7837@1एतद्भूषणकौशलं तव तनौ पश्येत् तदा माधवो राधे तत्सविधे हि चेतसिचले चेद् धैर्यमाधास्यति ।

ENMSS@7837@2इत्थं जल्पति शिल्पकारिणि जने तस्याः स्मरन्त्या हरिं सद्यः स्वेदसरिद्
व्यलम्पदमलं पत्रावलीमण्डलम् ॥ ७८३७॥

ENMSS@7838@1एतद्यशःक्षीरधिपूरगाहि पतत्यगाधे वचनं कवीनाम् ।

ENMSS@7838@2एतद्गुणानां गणनाङ्कपातः प्रत्यर्थिकीर्तीः खटिकाः क्षिणोति ॥ ७८३८॥

ENMSS@7839@1एतद् रहस्यं परमम् एतच्च परमं पदम् ।
ENMSS@7839@2एषा गतिर्विरक्तानाम् एषोऽसौ परमः शिवः ॥ ७८३९॥
ENMSS@7840@1एतद् विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः ।
ENMSS@7840@2न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकाङ्क्षिणः ॥ ७८४०॥
ENMSS@7841@1एतद् विद्वान् मदुदितं ज्ञानविज्ञाननैपुणम् ।
ENMSS@7841@2न निन्दति न च स्तौति लोके चरति सूर्यवत् ॥ ७८४१॥
ENMSS@7842@1एतद् विधानमातिष्ठेद् अरोगः पृथिवीपतिः ।
ENMSS@7842@2अस्वस्थः सर्वमेतत् तु भृत्येषु विनियोजयेत् ॥ ७८४२॥
ENMSS@7843@1एतद् विभाति चरमाचलचूडचुम्बि- हिण्डीरपिण्डरुचिशीतमरीचिबिम्बम् ।
ENMSS@7843@2उज्ज्वालितस्य रजनीं मदनानलस्य धूमं दधत् प्रकटलाञ्छनकैतवेन ॥ ७८४३॥
ENMSS@7844@1एतद् व्योमवनीवराहवलयं विश्वैकवीरस्मर-
स्कन्धावारमदान्धसिन्धुरकुलं श्यामावधूकैशिकम् ।
ENMSS@7844@2चक्षुष्याञ्जनवस्तु घूकसदसां विश्लिष्टचक्राह्वय-
स्तोमान्तर्गतधूमकेतनमहाधूम्या तमस्तार्यते ॥ ७८४४॥
ENMSS@7845@1एतन्नरेन्द्रवृषभ क्षपया व्रजन्त्या संरोपणार्थमिव गोपितमम्बुजेषु ।
ENMSS@7845@2उद्घाटयत्ययमशीतकरः करौघैः पद्माकरात् तिमिरबीजमिवालिवृन्दम् ॥ ७८४५॥
ENMSS@7846@1एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डर- प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लभ्यते ।
ENMSS@7846@2तत् पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना- दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ॥ ७८४६॥
ENMSS@7847@1एतन्मयमिव जातं निपतितमस्यां मनो नूनम् ।
ENMSS@7847@2नायात्यपि यदुपायात् कथमपि कायात् कुरङ्गनयनायाः ॥ ७८४७॥
ENMSS@7848@1एतन्मानिनि मानसं सुरसरो निर्लूनहेमाम्बुजं पार्वत्या प्रियपूजनार्थममुतो गङ्गासरिन्निर्गता ।
ENMSS@7848@2अस्माच्चित्रशिखण्डिभिश्च परमे पर्वण्युपादीयते
स्नानोत्तीर्णवृषाङ्कभस्मरजसां सङ्गात् पवित्रं पयः ॥ ७८४८॥
ENMSS@7849@1एतन्मालवमण्डलं विजयते सौजन्यरत्नाङ्कुरैः संपद्भिर्भ्रमधामभिः
किमपरं श्रृङ्गारसारैर्जनैः ।

ENMSS@7849@2यत्रारुह्य विचित्रचित्रवलभीर्लीलाशिलासद्मनां नीयन्ते जलदोदयेषु दिवसाः कान्तासखैः कामिभिः ॥ ७८४९॥

ENMSS@7850@1एतन्मुखं प्रियायाः शशिनं जित्वा कपोलयोः कान्त्या ।

ENMSS@7850@2तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम् ॥ ७८५०॥

ENMSS@7851@1एतल्लोचनमुत्पलभ्रमवशात् पद्मभ्रमादाननं भ्रान्त्या बिम्बफलस्य चाजनि दधद्वामाधरो वेधसा ।

ENMSS@7851@2तस्याः सत्यमनङ्गविभ्रमभुवः प्रत्यङ्गमासङ्गिनी

भ्रान्तिर्विश्वसृजोऽपि यत्र कियती तत्रास्मदादेर्मतिः ॥ ७८५१॥

ENMSS@7852@1एतस्माज्जलधेर्जलस्य कणिकाः काश्चिद् गृहीत्वा ततः पाथोदाः परिपूरयन्ति

जगतीं रुद्धाम्बरा वारिभिः ।

ENMSS@7852@2अस्मान् मन्दरकूटकोटिघटनाभीतिभ्रमत्तारकां प्राप्यैकां जलमानुषीं त्रिभुवने श्रीमानभूदच्युतः ॥ ७८५२॥

ENMSS@7853@1एतस्मात् कथमिन्द्रजालमपरं स्त्रीगर्भवासोऽस्थिरं रेतः श्च्योतति मस्तमस्तकपदाविर्भूतनानाङ्कुरम् ।

ENMSS@7853@2पर्यायेण शिशुत्वयौवनजरावेषैरशेषैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति मुहुर्निद्राति जागर्ति च ॥ ७८५३॥

ENMSS@7854@1एतस्मात् परमानन्दाच् शुद्धचिन्मात्ररूपिणः ।

ENMSS@7854@2जीवः संजायते पूर्वं तस्माच्चित्तं ततो जगत् ॥ ७८५४॥

ENMSS@7855@1एतस्मात् सरसश्चिराय चलितं चक्रेण चेतस्वता नीरक्षीरपरीक्षकेण सुधिया हंसेन हा निर्गतम् ।

ENMSS@7855@2निर्यातं निभृतं कलध्वनिकृता कारण्डवेन क्वचित् सार्धं केन करोतु सारसयुवा संभाषणं सव्यथः ॥ ७८५५॥

ENMSS@7856@1एतस्मादमृतं सुरैः शतमखेनोच्चैःश्रवाः सद्गुणः

कृष्णेनाद्भुतविक्रमैकवसतिर्लक्ष्मीः समासादिता ।

ENMSS@7856@2इत्यादि प्रचुराः पुरातनकथाः सर्वेभ्य एव श्रुता अस्माभिस्तु न दृष्टमत्र जलधौ मिष्टं पयोऽपि क्वचित् ॥ ७८५६॥

ENMSS@7857@1एतस्माद् विरमेन्द्रियार्थगहनादायासकादाश्रयाच्

श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ।

ENMSS@7857@2शान्तं भावमुपैहि संत्यज निजां कल्लोललोलां गतिं मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ ७८५७॥

ENMSS@7858@1एतस्मान् मां कुशलिनमभिज्ञानदानाद् विदित्वा  मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।

ENMSS@7858@2स्नेहानाहुः किमपि विरहे ह्रासिनस्ते ह्यभोगाद्  इष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ७८५८॥

ENMSS@7859@1एतस्मिन् कुसुमे स्वभावमहति प्रायो महीयः फलं   रम्यं स्वादु सुगन्धि

शीतलमलं प्राप्तव्यमित्याशया ।

ENMSS@7859@2शाल्मल्याः परिपाककालकलनाबोधेन कीरः स्थितो   यावत्

तत्पुटसंधिनिर्गतपतत्तूलं फलात् पश्यति ॥ ७८५९॥

ENMSS@7860@1एतस्मिन् घनचन्दनार्द्रवपुषो निद्राकषायेक्षणा

लीलालोलमृदूल्लसद्भुजलताव्याजृम्भमाण् आ मुहुः ।

ENMSS@7860@2निर्गच्छन्ति शनैरहःपरिणतौ मन्दा लतामन्दिरात्

स्वेदाम्भःकणदन्तुरस्तनतटाभोगाः कुरङ्गीदृशः ॥ ७८६०॥

ENMSS@7861@1एतस्मिन् घनबद्धसम्पदि वनोत्सङ्गे नवाप्तोष्मभिः   स्वच्छन्दं

गमितः सुखेन कतिभिः कालो न दन्तावलैः ।

ENMSS@7861@2धिग् जातोऽसि तदात्र दग्धसमये दन्तिन्यदा नोदकं   नो वृक्षा न

तृणानि केवलमयं दावानलः क्रीडति ॥ ७८६१॥

ENMSS@7862@1एतस्मिन् दाक्षिणाशानिलचलितलतालीनमत्तालिमाल् आ-

पक्षक्षोभावधूतच्युतबहलरजोह्लादिहृद्ये वसन्ते ।

ENMSS@7862@2प्रेमस्वेदार्द्रबाहुश्लथवलयरणत्प्रौढसीमन्तिनीनां   मन्दः कण्ठग्रहोऽपि

ग्लपयति हृदयं किं पुनर्विप्रयोगः ॥ ७८६२॥

ENMSS@7863@1एतस्मिन् दिवसस्य मध्यसमये वातोऽपि चण्डातप-   त्रासेनेव न

संचरत्यहिमगोर्बिम्बे ललाटंतपे ।

ENMSS@7863@2किं चान्यत्परितप्तधूलिलुठनप्लोषासहत्वादिव   च्छाया दूरगतापि

भूरुहतले व्यावर्त्य संलीयते ॥ ७८६३॥

ENMSS@7864@1एतस्मिन्नधिकपयःश्रियं वहन्त्यः   संक्षोभं पवनभुवा जवेन नीताः ।

ENMSS@7864@2वाल्मीकेररहितरामलक्ष्मणानां   साधर्म्यं दधति गिरां महासरस्यः

॥ ७८६४॥

ENMSS@7865@1एतस्मिन्नवदातकान्तिनि कुचद्वन्द्वे कुरङ्गीदृशः

संक्रान्तप्रतिबिम्बमैन्दवमिदं द्वेधा विभक्तं वपुः ।

ENMSS@7865@2आनन्दोत्तरलस्य पुष्पधनुषस्तत्कालनृत्योत्सव-

प्राप्तिप्रोद्यतकांस्यतालयुगलप्रायं समालोक्यते ॥ ७८६५॥

ENMSS@7866@1एतस्मिन् मदकलमल्लिकाक्षपक्ष- व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।

ENMSS@7866@2बाष्पाम्भःपरिपतनोद्गमान्तराले दृश्यन्तामविरहितश्रियो विभागाः ॥ ७८६६॥

ENMSS@7867@1एतस्मिन् मदजर्जरैरुपचिते कम्बूरवाडम्बरैः स्तैमित्यं मनसो दिशत्यनिभृतं धारारवे मूर्च्छति ।

ENMSS@7867@2उत्सङ्गे ककुभो निधाय रसितैरम्भोमुचां घोरयन् मन्ये मुद्रितचन्द्रसूर्यनयनं व्योमापि निद्रायते ॥ ७८६७॥

ENMSS@7868@1एतस्मिन् मरुमण्डले परिचलत्कल्लोलकोलाहल-क्रीडत्कङ्कमपङ्कमङ्कविलसन्निःशङ्कमत्स्यव्रजम् ।

ENMSS@7868@2केनेदं विकसत्कुशेशयकुटीकोणक्वणत्षट्पदं श्रेणिप्रीणितपान्थमुज्ज्वलजलं चक्रे विशालं सरः ॥ ७८६८॥

ENMSS@7869@1एतस्मिन् मृगयां गतेऽपि धनुषा बाणे समारोपितेऽप्य् आकर्णान्तगतेऽपि मुष्टिविगतेऽप्येनाङ्गलग्नेऽपि च ।

ENMSS@7869@2न त्रस्तं न पलायितं न चलितं नोत्कण्ठितं नोत्प्लुतं मृग्या यद् वशिनं करोति दयितं कामोऽयमित्याशया ॥ ७८६९॥

ENMSS@7870@1एतस्मिन् वनमार्गभूपरिसरे सौन्दर्यमुद्राङ्कितः प्रोद्यद्भिः फलपत्रपुष्पनिवहैश्चूतः स एकः परम् ।

ENMSS@7870@2यं वीक्ष्य स्मितवक्त्रमुद्गतमहासंतोषमुल्लासित-स्फारोत्कण्ठमकुण्ठितक्रमममी धावन्ति पान्थव्रजाः ॥ ७८७०॥

ENMSS@7871@1एतस्मिन् विजने वनेऽतनुतरुच्छन्नावकाशे सुखं तिष्ठामीति तव द्विषामधिपतिर्यावद् विधत्ते मतिम् ।

ENMSS@7871@2तावत् तत्र निपातितं भुवि भवन्नामाङ्कसेल्लाहतं दृष्ट्वा केसरिणः करङ्कमसमत्रासो मुहुर्मुर्च्छति ॥ ७८७१॥

ENMSS@7872@1एतस्मिन् विपिने मया बलवता नाज्ञापिताः के मृगाः कस्मै वा न फलं

विकीर्णमुचितं रोषस्य तोषस्य च ।

ENMSS@7872@2सोऽहं मूषकमद्य बन्धनगुणच्छेदार्थमभ्यर्थये नास्थां सोऽपि करोति दग्धहृदयं द्वेधा न किं भिद्यते ॥ ७८७२॥

ENMSS@7873@1एतस्मिन् विपुले प्लवंगमकुले जातो गुणैरग्रणीर् एकः क्वापि कपिः स कोऽपि

मरुतां वन्द्यो मरुन्नन्दनः ।

ENMSS@7873@2केलिप्राङ्गणवापिकावदभवद् यस्याम्भसां भर्तरि

द्राक्कल्लोलविकारकल्पितजगत्कम्पेऽपि झम्पारसः ॥ ७८७३॥

ENMSS@7874@1एतस्मिन् सरसि प्रसन्नपयसि प्राणत्रुटत्तालुना किंकोलाहलडम्बरेण खलु

रे मण्डूक मूकीभव ।

ENMSS@7874@2उन्मीलन्नयनावलीदलचलल्लक्ष्मीरणन्नूपुर- व्याहारप्रतिवादिनः प्रतिदिनं

प्रेषन्ति हंसस्वनाः ॥ ७८७४॥

ENMSS@7875@1एतस्मिन् सहसा वसन्तसमये प्राणेश देशान्तरं गन्तुं त्वं यतसे

तथापि न भयं तापात् प्रपद्येऽधुना ।

ENMSS@7875@2यस्मात् कैरवसारसौरभमुषा साकं सरोवायुना चान्द्री दिक्षु विजृम्भते

रजनिषु स्वच्छा मयूखच्छटा ॥ ७८७५॥

ENMSS@7876@1एतस्मिन् सुतनु लतागृहेऽतिरम्यं मालत्याः कुसुममनाचितं परेण ।

ENMSS@7876@2इत्युक्त्वा मृदुकरपल्लवं गृहीत्वा मुग्धाक्षीं रहसि निनाय कोऽपि

धूर्तः ॥ ७८७६॥

ENMSS@7877@1एतस्य कलामेकाम् अमृतमयूखस्य पार्वतीरमणः ।

ENMSS@7877@2वर्णावलिमिव वहति प्रतिमासं घट्यमानस्य ॥ ७८७७॥

ENMSS@7878@1एतस्य जाङ्गुलिक नार्पय मन्त्रदर्पाद् आस्ये निजाङ्गुलिमयं खलु कोऽपि

सर्पः ।

ENMSS@7878@2अत्रैव यस्य विषमेण विषेण दग्धास् ते त्वादृशा निरसवः पतिताः

सहस्रम् ॥ ७८७८॥

ENMSS@7879@1एतस्य रहसि वक्षसि सरसिजपत्रेण ताडितस्यापि ।

ENMSS@7879@2दयितस्य वीक्ष्य हसितं प्रियसखि हसितं ममाप्यासीत् ॥ ७८७९॥

ENMSS@7880@1एतस्य वेश्मनि कलावति हालिकस्य दुर्दैववैभववशात् पतितासि तन्वि ।

ENMSS@7880@2तद्वारिकुम्भवहनाय करीषकृत्यै चातुर्यमर्जय वशीकरणाय भर्तुः

॥ ७८८०॥

ENMSS@7881@1एतस्य सावनिभुजः कुलराजधानी काशी भवोत्तरणधर्मतरिः स्मरारेः ।

ENMSS@7881@2यामागता दुरितपूरितचेतसोऽपि पापं निरस्य चिरजं विरजीभवन्ति

॥ ७८८१॥

ENMSS@7882@1एतस्यां रतिवल्लभक्षितिपतेः क्रीडासरस्यां शनैः  संशोषं नयतीह शैशववधूस्तारुण्यतिग्मद्युतिः ।

ENMSS@7882@2अन्तःस्थापि यथा यथा कुचतटी धत्तेऽन्तरायद्वयं  लौल्यं हन्ति तथा तथाविधजले दृक्पीनमीनावलिः ॥ ७८८२॥

ENMSS@7883@1एतस्याः करिकुम्भसंनिभकुचप्राग्भारपृष्ठे लुठद्-गुञ्जागर्भगजेन्द्रमौक्तिकसरश्रेणीमनोहारिणि ।

ENMSS@7883@2दूरादेत्य तरङ्ग एष पतितो वेगाद् विलीनः कथं  को वान्योऽपि विलीयते

न सरसः सीमन्तिनीसंगमे ॥ ७८८३॥

ENMSS@7884@1एतस्याः स्तनपद्मकोरकयुगं यस्याननेन्दोः सित-  ज्योत्स्नाभिर्न भजत्यदो

मृगदृशः शङ्के विकासं पुनः ।

ENMSS@7884@2तस्मिंल्लोचनपङ्कजं विकसितं भ्रूभृङ्गसंसेवितं  स्वान्ते संशयमातनोति सुतरामेतन् ममैवासकृत् ॥ ७८८४॥

ENMSS@7885@1एतस्याः स्तनभारभङ्गुरमुरः कीर्णा नितम्बस्थली  मध्यं मज्जति नाभिगर्तपतितं नाभ्यञ्चलं चुम्बति ।

ENMSS@7885@2धैर्यं धेहि मनःकुरङ्ग पुरतो रोमावली वागुरा  एतद् भ्रान्तिगतागतव्यसनिनः किं वा विधेयं विधे ॥ ७८८५॥

ENMSS@7886@1एतस्या विरहज्वरः करतलस्पर्शैः परीक्ष्यो न यः  स्निग्धेनापि जनेन दाहभयतः प्रस्थंपचः पाथसाम् ।

ENMSS@7886@2निःशक्तीकृतचन्दनौषधिविधावस्मिंश्चमत्कारिणो  लाजस्फोटममी स्फुटन्ति मणयो विश्वेऽपि हारस्रजाम् ॥ ७८८६॥

ENMSS@7887@1एतस्योन्नतसर्वकर्मकृतिनस्त्रैलोक्यचूडामणेः

शंभुब्रह्मपुरंदरप्रभृतयः स्तुत्यै न शक्ता यदि ।

ENMSS@7887@2देवः पन्नगनायको भगवती वाणी स्वयं चेज्जडा  सैन्दर्यस्य निरूपणे वद कथं शक्तो भवेन् मानवः ॥ ७८८७॥

ENMSS@7888@1एतां नवाम्बुधरकान्तिमुदीक्ष्य वेणीम्  एणीदृशो यदि वदन्ति वदन्तु नाम ।

ENMSS@7888@2ब्रूमो वयं मुखसुधांशुसुधाभिलाषाद्  अभ्यागतां भुजगिनीं मणिमुद्वहन्तीम्

॥ ७८८८॥

ENMSS@7889@1एतां पश्य पुरःस्थलीमिह किल क्रीडाकिरातो हरः  कोदण्डेन किरीटिना

सरभसं चूडान्तरे ताडितः ।

ENMSS@7889@2इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापतेर् मन्दं मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम् ॥ ७८८९॥

ENMSS@7890@1एतां विलोकय तनूदरि ताम्रपर्णीम्  अम्भोनिधौ विवृतशुक्तिपुटोद्धृतानि ।

ENMSS@7890@2यस्याः पयांसि परिणाहिषु हारमूर्त्या  वामभ्रुवां परिणमन्ति पयोधरेषु ॥ ७८९०॥

ENMSS@7891@1एतांश्छिनद्मि यदि तन्मम जीवितेन  शण्ढस्य किं नु यदि सन्त्वथ गोपतेः किम् ।

ENMSS@7891@2आसे प्रसार्य यदि तज्जनता हसन्ति  भारैर्गुणैश्च वृषणैश्च हला श्रमो मे ॥ ७८९१॥

ENMSS@7892@1एतांस्ते भ्रमरौघनीलकुटिलान् बध्नामि किं कुन्तलान्  किं न्यस्यामि मधूकपाण्डुमधुरे गण्डेऽत्र पत्रावलीम् ।

ENMSS@7892@2किं चास्मिन् व्यपनीय बन्धनमिदं पङ्केरुहाणां दलत्-  कोषश्रीमुषि सर्वचित्तहरिणस्यारोपयामि स्तने ॥ ७८९२॥

ENMSS@7893@1एताः करोत्पीडितवारिधारा  दर्पात् सखीभिर्वदनेषु सिक्ताः ।

ENMSS@7893@2वक्रेतराग्रैरलकैस्तरुण्यश्  चूर्णारुणान् वारिलवान् वमन्ति ॥ ७८९३॥

ENMSS@7894@1उद्बन्धकेशश्च्युतपत्रलेखो  विश्लेषिमुक्ताफलपत्रवेष्टः ।

ENMSS@7894@2मनोज्ञ एव प्रमदामुखानाम्  अम्भोविहाराकुलितोऽपि वेषः ॥ ७८९४॥

ENMSS@7895@1एताः कानपि मण्डयन्ति पुरुषान् नानाविधैर्भूषणैर् एताः कानपि वञ्चयन्ति

च जनान् मिथ्यावचोभिः पुनः ।

ENMSS@7895@2एता वै रमयन्ति कानपि वरान् भावैर्मनोजोत्कटैः  स्वान्त भ्रान्त करोषि

किं बत मुधा नारीषु हार्दं हि तत् ॥ ७८९५॥

ENMSS@7896@1एताः पङ्किलकूलरूढनलदस्तम्बक्वणत्कम्बवः

क्रीडत्कर्कटचक्रवालविदलज्जम्बालतोयाविलाः ।

ENMSS@7896@2हृल्लेखं जनयन्त्यनूपसरितामुत्तुण्डगण्डूपदो-  त्कीर्णक्लिन्नमृदो

नदस्थपुटितप्रान्तास्तटीभूमयः ॥ ७८९६॥

ENMSS@7897@1एताः प्रफुल्लकमलोत्पलवक्त्रनेत्रा  गोपाङ्गनाः कनकचम्पकपुष्पगौराः ।

ENMSS@7897@2नानाविरागवसना मधुरप्रलापाः क्रीडन्ति वन्यकुसुमाकुलकेशहस्ताः ॥ ७८९७॥

ENMSS@7898@1एताः शार्दूलहेलादलितमृगकुलव्यक्तरक्ताभिषिक्त-

क्ष्मापीठास्वादलुब्धस्फुटतरकलहस्फारफ् एरण्डचण्डाः ।

ENMSS@7898@2वेल्लन्निर्मोकवल्लीवलयनिगडितानोकहक्रोडनीड-

क्रीडन्निःशूकघूकव्यतिकरमुखरा भूमयो भीषयन्ति ॥ ७८९८॥

ENMSS@7899@1एताः संप्रति गर्भगौरवभराद् राज्ञोऽवरोधाङ्गनाः कान्तारेषु पलायितुं बत कथं पद्भ्यां भवेयुः क्षमाः ।

ENMSS@7899@2इत्थं चेतसि संविभाव्य सदयं वैकुण्ठकण्ठीरव त्वन्नादावलिभिः सखीभिरिव किं तद्गर्भपातः कृतः ॥ ७८९९॥

ENMSS@7900@1एताः सत्यविहीना धनलवलीनाः सुखक्षणाधीनाः ।

ENMSS@7900@2वेश्या विशन्ति हृदयं मुखमधुरा निर्विचाराणाम् ॥ ७९००॥

ENMSS@7901@1एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः ।

ENMSS@7901@2प्रत्यागतप्रसादं चन्द्रमिवोपप्लवान् मुक्तम् ॥ ७९०१॥

ENMSS@7902@1एताःस्थानपरिग्रहेण शिवयोरत्यन्तकान्तश्रियः प्रालेयाचलमेखलावनभुवः पुष्णन्ति नेत्रोत्सवम् ।

ENMSS@7902@2व्यावल्गद्बलवैरिवारणवरप्रत्यग्रदन्ताहति-

श्वभ्रप्रस्रवदभ्रसिन्धुसवनप्रस्निग्धदेवद्रुमाः ॥ ७९०२॥

ENMSS@7903@1एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः ।

ENMSS@7903@2न तासां वल्लभो यस्मात् स्वसुतोऽपि सुखं विना ॥ ७९०३॥

ENMSS@7904@1एता गुरुश्रोणिपयोधरत्वाद् आत्मानमुद्वोढुमशक्नुवत्यः ।

ENMSS@7904@2गाढाङ्गदैर्बाहुभिरप्सु बालाः क्लेशोत्तरं रागवशात् प्लवन्ते ॥ ७९०४॥

ENMSS@7905@1एतादृशे कलियुगेऽपि शतेषु कश्चिज् जातादरो जगति यः श्रुतिमार्ग एव ।

ENMSS@7905@2यत् किंचिदाचरतु पात्रमसौ स्तुतीनां श्लाघ्यं मितापमपि किं न मरौ सरश्चेत् ॥ ७९०५॥

ENMSS@7906@1एतानि ऋतुपृष्ठवेदिविलुठद्विप्राणि वातप्रमी- च्छन्नोपान्ततरूणि पश्य दधते पुण्याश्रमाणि श्रियम् ।

ENMSS@7906@2यान्युत्क्षिप्य मनः पराञ्चति परं नारायणाराधन-

श्रद्धामोदितमेकदैव धनिकद्वारे च दारेषु च ॥ ७९०६॥

ENMSS@7907@1एतानि तानि नवयौवनगर्हितानि मिष्टान्नपानशयनासनलालितानि ।

ENMSS@7907@2हारार्धहारमणिमण्डितभूषणानि  भूमौ पतन्ति विलुठन्ति कलेवराणि ॥ ७९०७॥

ENMSS@7908@1एतानि तानि हरनेत्रशिखिप्रबन्ध-  दग्धस्मरव्रणविनाशरसायनानि ।

ENMSS@7908@2केषां न विस्मयकराणि नितम्बिनीनां  विश्वप्रियाणि नयनार्धविलोकितानि ॥ ७९०८॥

ENMSS@7909@1एतानि तान्यापतितानि काले  भाग्यक्षयान् निष्फलमुद्यमानि ।

ENMSS@7909@2तुरङ्गमस्येव रणे निवृत्ते  नीराजनाकौतुकमङ्गलानि ॥ ७९०९॥

ENMSS@7910@1एतानि निःसहतनोरसमञ्जसानि  शून्यं मनः पिशुनयन्ति गतागतानि ।

ENMSS@7910@2एते च तीरतरवः प्रथयन्ति तापम्  आलम्बितोज्झितपरिग्लपितैः प्रवालैः

॥ ७९१०॥

ENMSS@7911@1एतानि बालधवल प्रविहाय कामं  गोष्ठाङ्गणे तरलतर्णकचेष्टितानि ।

ENMSS@7911@2स्कन्धं निधेहि धुरि पूर्वधुरीणमुक्तो  नेतव्यतामुपगतोऽस्ति तवैष भारः ॥ ७९११॥

ENMSS@7912@1एतानि मम पद्यानि पठित्वा यः सभां गतः ।

ENMSS@7912@2स सदा पूज्यते राज्ञा सद्धर्मो नृगणैरिव ॥ ७९१२॥

ENMSS@7913@1एतानि विंशतिपदान्याचरिष्यति यो नरः ।

ENMSS@7913@2स जेष्यति रिपून् सर्वान् कल्याणश्च भविष्यति ॥ ७९१३॥

ENMSS@7914@1एता निषिक्तरजतद्रवसंनिकाशा  धारा जवेन पतिता जलदोदरेभ्यः ।

ENMSS@7914@2विद्युत् प्रदीपशिखया क्षणनष्टदृष्टाश्  छिन्ना इवाम्बरपटस्य दशाः पतन्ति ॥ ७९१४॥

ENMSS@7915@1एतानि सर्वदा तस्य न जायन्ते ततः परम् ।

ENMSS@7915@2स्त्रीसङ्गं वर्जयेद् यत्नाद् बिन्दुं रक्षेत् प्रयत्नतः ।

ENMSS@7915@3आयुःक्षयो बिन्दुनाशाद् असामर्थ्यं च जायते ॥ ७९१५॥

ENMSS@7916@1एतान् गुणांस्तात महानुभावान्  एको गुणः संश्रयते प्रसह्य ।

ENMSS@7916@2राजा यदा सत्कुरुते मनुष्यं  सर्वान् गुणानेष गुणोऽतिभाति ॥ ७९१६॥

ENMSS@7917@1एतान्यनिगृहीतानि व्यापादयितुमप्यलम् ।

ENMSS@7917@2अविधेया इवादान्ता हयाः पथि कुसारथिम् ॥ ७९१७॥

ENMSS@7918@1एतान्यवन्तीश्वरपारिजात- जातानि तारापतिपाण्डुराणि ।
ENMSS@7918@2संप्रत्यहं पश्यत दिग्वधूनां यशःप्रसूनान्यवतंसयामि ॥ ७९१८॥
ENMSS@7919@1एतान्यहानि किल चातकशावकेन नीतानि कण्ठकुहरस्थितजीवितेन ।
ENMSS@7919@2तस्यार्थिनो जलद पूरय वाञ्छितानि मा भूत् त्वदेकशरणस्य बत प्रमादः ॥ ७९१९॥
ENMSS@7920@1एतान्येव तु बन्धाय सप्त सूक्ष्माणि सर्वदा ।
ENMSS@7920@2भूरादीनां विरागोऽत्र संभवेद् यस्तु मुक्तये ॥ ७९२०॥
ENMSS@7921@1एता याः प्रेक्षसे लक्ष्मीश्छत्रचामरचञ्चलाः ।
ENMSS@7921@2स्वप्न एष महाबुद्धे दिनानि त्रीणि पञ्च च ॥ ७९२१॥
ENMSS@7922@1एता रावणजीमूताद् बाणधारा विनिःसृताः ।
ENMSS@7922@2विभान्ति राममासाद्य वारिधारा वर्षं यथा ॥ ७९२२॥
ENMSS@7923@1एतावच्छक्यमस्माभिर्वक्तुं त्वं गुणवानिति ।
ENMSS@7923@2रत्नाकरस्य रत्नौघपरिच्छेदे तु के वयम् ॥ ७९२३॥
ENMSS@7924@1एतावज्जन्मसाफल्यं देहिनामिह देहिषु ।
ENMSS@7924@2प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत् सदा ॥ ७९२४॥
ENMSS@7925@1एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता ।
ENMSS@7925@2ये पराधीनतां यातास्ते वै जीवन्ति के मृताः ॥ ७९२५॥
ENMSS@7926@1एतावता नन्वनुमेयशोभि काञ्चीगुणस्थानमनिन्दितायाः ।
ENMSS@7926@2आरोपितं यद् गिरिशेन पश्चाद् अनन्यनारीकमनीयमङ्कम् ॥ ७९२६॥
ENMSS@7927@1एतावतैव कार्येण मन्यध्वं नो कृतार्थताम् ।
ENMSS@7927@2कर्तव्यानां परा काष्ठा नेदानीं विद्यते खलु ॥ ७९२७॥
ENMSS@7928@1एतावत् सरसि सरोरुहस्य कृत्यं भित्त्वाम्भः सपदि बहिर्विनिर्गतं यत् ।
ENMSS@7928@2सौरभ्यं विकसनमिन्दिरानिवासस् तत् सर्वं दिनकरकृत्यमामनन्ति ॥ ७९२८॥
ENMSS@7929@1एतावदेव पर्याप्तं भिक्षोरेकान्तशायिनः ।
ENMSS@7929@2न तस्य म्रियते कश्चिन् म्रियते सोऽस्य कस्यचित् ॥ ७९२९॥
ENMSS@7930@1एतावदेव हि फलं पर्याप्तं ज्ञानसत्त्वयुक्तस्य ।
ENMSS@7930@2यद्यापत्सु न मुह्यति नाभ्युदये विस्मितो भवति ॥ ७९३०॥
ENMSS@7931@1एतावन्तं समयमनयः केसरोत्सङ्गरङ्गी हृद्भृङ्गीनां सततमहरस्त्वं सरःसंचरेषु ।

ENMSS@7931@2दैवादस्मिन् मधुप निपतन् कानने केतकीनाम्  एतां दीनामनुभव दशां

कीलितः कण्टकेषु ॥ ७९३१॥

ENMSS@7932@1एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः ।

ENMSS@7932@2यो भूतशोकहर्षाभ्याम् आत्मा शोचति हृष्यति ॥ ७९३२॥

ENMSS@7933@1एतावानेव पुरुषः कृतं यस्मिन् न नश्यति ।

ENMSS@7933@2यावच्च कुर्यादन्योऽस्य कुर्याद् बहुगुणं ततः ॥ ७९३३॥

ENMSS@7934@1एतावानेव पुरुषो यज्जायात्मा प्रजेति ह ।

ENMSS@7934@2विप्राः प्राहुस्तथा चैतद् यो भर्ता सा स्मृताङ्गना ॥ ७९३४॥

ENMSS@7935@1एतावानेव पुरुषो यदमर्षी यदक्षमी ।

ENMSS@7935@2क्षमवान् निरमर्षश्च नैव स्त्री न पुनः पुनः ॥ ७९३५॥

ENMSS@7936@1एताश्चतुष्टयकला  द्वात्रिंशत् क्रमधृताः समस्ता वा ।

ENMSS@7936@2संसारवञ्चकानां  विद्या विद्यावतामेव ॥ ७९३६॥

ENMSS@7937@1एताश्चन्द्रोदयेऽस्मिन्नविरलमुशलोत्क्षेपदोलायमान-

स्निग्धश्यामाग्रपीनस्तनकलसनमत्कण्ठनालाग्ररम्याः ।

ENMSS@7937@2उद्वेल्लद्बाहुवल्लीप्रचलितवलयश्रेणयः पामराणां  गेहिन्यो

दीर्घगीतिध्वनिजनितसुखास्तण्डुलान् कण्डयन्ति ॥ ७९३७॥

ENMSS@7938@1एताश्चलद्वलयसंहतिमेखलोत्थ-  झंकारनूपुररवाहृतराजहंस्यः ।

ENMSS@7938@2कुर्वन्ति कस्य न मनो विवशं तरुण्यो

वित्रस्तमुग्धहरिणीसदृशाक्षिपातैः ॥ ७९३८॥

ENMSS@7939@1एतासु केतकिलतासु विकासिनीषु  सौभाग्यमद्भुततरं भवती बिभर्ति ।

ENMSS@7939@2यत्कण्टकैर्व्यथितमात्मवपुर्न जानंस् त्वामेव सेवितुमुपक्रमते द्विरेफः ॥ ७९३९॥

ENMSS@7940@1एतास्ता दिवसान्तभास्करदृशो धावन्ति पौराङ्गनाः

स्कन्धप्रस्खलदंशुकाञ्चलधृतिव्यासङ्गबद्धादराः ।

ENMSS@7940@2प्रातर्यातकृषीवलागमभिया प्रोत्प्लुत्य वर्त्मच्छिदो

हट्टक्रीतपदार्थमूल्यकलनव्यग्राङ्गुलिग्रन्थयः ॥ ७९४०॥

ENMSS@7941@1एतास्ता मलयोपकण्ठसरितामेणाक्षि रोधोभुवश्  चापाभ्यासनिकेतनं भगवतः प्रेयो मनोजन्मनः ।

ENMSS@7941@2यासु श्यामनिशासु पीततमसो मुक्तामयीश्चन्द्रिकाः  पीयन्ते

विवृतोर्ध्वचञ्चु विचलत्कण्ठं चकोराङ्गनाः ॥ ७९४१॥

ENMSS@7942@1एतास्तु निर्घृणत्वेन निर्दयत्वेन नित्यशः ।

ENMSS@7942@2विशेषाज्ञाड्यकृत्येन दूषयन्ति कुलत्रयम् ॥ ७९४२॥

ENMSS@7943@1एता हसन्ति च रुदन्ति च कार्यहेतोर् विश्वासयन्ति च परं न च विश्वसन्ति ।

ENMSS@7943@2तस्मान् नरेण कुलशीलसमन्वितेन नार्यः श्मशानघटिका इव वर्जनीयाः

॥ ७९४३॥

ENMSS@7944@1एते कर्बुरितातपास्तत इतः संजायमानाम्बुद- च्छेदैः संप्रति केतकीदलमिलद्दर्भातिथेयोदयाः ।

ENMSS@7944@2ग्रामान्तोद्गतशालिबीजयवसाश्लेषप्रहृष्यन्मनो- गोवाहायतगीतिगर्भितदिशो रम्याः सखे वासराः ॥ ७९४४॥

ENMSS@7945@1एते किं ननु सत्यमेव तरवश्चश्चत्प्रसूनोत्कराः किं वा काननवाटिकेयमनघायस्याममी कोकिलाः ।

ENMSS@7945@2चित्रं कुत्र तिरोहिता मरुधरा सा यत्र मे पत्तनं नानानिर्झरवैभवं कुत इदं सद्यः समुन्मीलितम् ॥ ७९४५॥

ENMSS@7946@1एते कूर्चकचाः सकङ्कणरणत्कर्णाटसीमन्तिनी- हस्ताकर्षणलालिताः प्रतिदिनं प्राप्ताः परामुन्नतिम् ।

ENMSS@7946@2तेऽमी संप्रति पापिनापितकरभ्राम्यत्क्षुरप्रानन- क्षुण्णाः क्षोणितले पतन्ति परितः क्लृप्तापराधा इव ॥ ७९४६॥

ENMSS@7947@1एते केतकधूलिधूसररुचः शीतद्युतेरंशवः प्राप्ताः संप्रति पश्चिमस्य जलधेस्तीरं जराजर्जराः ।

ENMSS@7947@2अप्येते विकसत्सरोरुहवनीदृक्पातसंभाविताः प्राचीरागमुदीरयन्ति तरणेस्तारुण्यभाजः कराः ॥ ७९४७॥

ENMSS@7948@1एते केतकसूचिसौरभजुषः पौरप्रगल्भाङ्गना- व्यालोलालकवल्लरीविलुलनव्याजोपभुक्ताननाः ।

ENMSS@7948@2किंचोन्निद्रकदम्बकुड्मलकुटीधूलीलुठत्षद्पद- व्यूहव्याहृतिहारिणो विरहिणः कर्षन्ति वर्षानिलाः ॥ ७९४८॥

ENMSS@7949@1एतेऽक्ष्णोर्जनयन्ति कामविरुजं सीतावियोगे घना वाताः शीकरिणोऽपि लक्ष्मण दृढं संतापयन्त्येव माम् ।

ENMSS@7949@2इत्थं वृद्धपरंपरापरिणतैर्यस्मिन् वचोभिर्मुनीन् अद्याप्युन्मनयन्ति काननशुकाः सोऽयं गिरिर्माल्यवान् ॥ ७९४९॥

ENMSS@7950@1एते चन्द्रशिलासमुच्चयमयाश्चन्द्रातपप्रस्फुरत्-
सर्वाङ्गीणपयःप्रवृत्तसरितो झात्कुर्वते पर्वताः ।
ENMSS@7950@2येषामुन्मदजागरूकशिखिनि प्रस्थे नमेरुस्थिताः श्यामा
मेघगभीरगद्गदगिरः क्रन्दन्ति कोयष्टयः ॥ ७९५०॥
ENMSS@7951@1एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
ENMSS@7951@2इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ ७९५१॥
ENMSS@7952@1एते चान्ये च बहवः प्रयोगाः पारदारिकाः ।
ENMSS@7952@2देशे देशे प्रवर्तन्ते राजभिः संप्रवर्तिताः ॥ ७९५२॥
ENMSS@7952@1न त्वेवैतान् प्रयुञ्जीत राजा लोकहिते रतः ।
ENMSS@7952@2निगृहीतारिषड्वर्गस्तथा विजयते महीम् ॥ ७९५२॥
ENMSS@7954@1एते चान्ये च बहवो दोषाः प्रादुर्भवन्त्युत ।
ENMSS@7954@2नृपतौ मार्दवोपेते हर्षुले च युधिष्ठिर ॥ ७९५४॥
ENMSS@7955@1एते चापीन्द्रतुल्याः क्षितिपतितनया भीमसेनार्जुनाद्याः शूराः सत्यप्रतिज्ञा
दिनकररुचयः केशवेनोपगूढाः ।
ENMSS@7955@2ते दृष्टा पात्रहस्ता जगति कृपणवद् भैक्षचर्यानुयाताः कः शक्तो
भालपट्टे विधिकरलिखितां कर्मरेखां प्रमार्ष्टुम् ॥ ७९५५॥
ENMSS@7956@1एते चूतमहीरुहोऽप्यविरलैर्धूमायिताः षद्वदैर् एते प्रज्वलिताः
स्फुटत्किसलयोद्भेदैरशोकद्रुमाः ।
ENMSS@7956@2एते किंशुकशाखिनोऽपि मलिनैरङ्गारिताः कुड्मलैः कष्टं विश्रमयामि
कुत्र नयने सर्वत्र वामो विधिः ॥ ७९५६॥
ENMSS@7957@1एते जीर्णकुलायजालजटिलाः पांसूत्कराकर्षिणः
शाखाकम्पविहस्तदुःस्थविहगानाकम्पयन्तस्तरून् ।
ENMSS@7957@2हेलान्दोलितनर्तितोज्झितहतव्याघट्टितोन्मूलित- प्रोत्क्षिप्तभ्रमितैः
प्रपापटलकैः क्रीडन्ति झञ्झानिलाः ॥ ७९५७॥
ENMSS@7958@1एते ते गिरिकूटसंघटशिलासंघट्टशीर्णाम्भसः
प्रेङ्खच्चामरचारुसीकरकणस्मेरा दरीनिर्झराः ।
ENMSS@7958@2यत्पातेषु निकुञ्जकुञ्जरमुखभ्रश्यन्मृणालाङ्कुर- ग्रासोद्ग्रन्थितटं
रटन्ति परितः कण्ठीरवा भैरवम् ॥ ७९५८॥
ENMSS@7959@1एते ते दिवसा वियोगिगुरवः पूरोल्लसत्सिन्धवो विन्ध्यश्यामपयोदनीलनभसो
नीपार्जुनामोदिनः ।
ENMSS@7959@2आसन्नप्रसवालसां सहचरीमालोक्य नीडार्थिनीं

चञ्चुप्रान्तकिलिञ्जसंचयपरः काकोऽपि येष्वाकुलः ॥ ७९५९॥

ENMSS@7960@1एते ते दिवसास्त एव तरवस्ताश्च प्रगल्भस्त्रियस् तच्चैवाम्रवनं सकोकिलरुतं सेयं सचन्द्रा निशा ।

ENMSS@7960@2वातः सोऽपि च दक्षिणो धृतिहरः सोऽयं वसन्तानिलो हा तारुण्य विना

त्वयाद्य सकलं पालालभारायते ॥ ७९६०॥

ENMSS@7961@1एते ते दुरतिक्रमक्रममिलद्धर्मोर्मिमर्मच्छिदः कादम्बेन रजोभरेण ककुभो रुन्धन्ति जञ्झानिलाः ।

ENMSS@7961@2गाढारम्भनिरुद्धनीरदघटासंघट्ट अनीलीभवद्-

व्योमक्रोडकटाहपातुकपयोवेणीकणग्राहिणः ॥ ७९६१॥

ENMSS@7962@1एते ते पुरतो मरुस्थलभुवः प्रोच्चण्डदावानल-

ज्वालालीढकठोरसूरकिरणप्लुष्टच्छदाः शाखिनः ।

ENMSS@7962@2तानेतानवधीर्य खिन्नवपुषो दुःशीलझञ्झानिल- क्रीडाभिर्न पयोद गन्तुमुचितं वेलाभिषिक्तद्रुमान् ॥ ७९६२॥

ENMSS@7963@1एते ते मलयाद्रिकन्दरजुषस्तच्छाखिशाखावली-

लीलाताण्डवसंप्रदानगुरवश्चेतोभुवो बान्धवाः ।

ENMSS@7963@2चूतोन्मत्तमधुव्रतप्रणयिनीहुङ्कारझङ्कारिणो हा कष्टं प्रसरन्ति

पान्थयुवतीजीवद्रुहो वायवः ॥ ७९६३॥

ENMSS@7964@1एते त्वद्वदनानुकारिरुचयो राकासुधांश्वादयो नीत्वा ते स्मरणं दहन्ति

बत मामन्तःस्फुरन्त्यास्तव ।

ENMSS@7964@2त्वं स्वामिन्यसि तज्जहीहि जहि वा नेदं पुनः सांप्रतं यत्स्वस्पर्धिभिरेव

मर्दयसि मामेतैर्जघन्यैः प्रिये ॥ ७९६४॥

ENMSS@7965@1एते दरिद्रशिशवस्तनुजीर्णकन्थां स्कन्धे निधाय मलिनां पुलकाकुलाङ्गाः ।

ENMSS@7965@2सूर्यस्फुरत्करकरम्बितभित्तिदेश- लाभाय शीतसमये कलिमाचरन्ति ॥ ७९६५॥

ENMSS@7966@1एतेन बद्धबलिना संकोचमवाप्य वृद्धदेहेन ।

ENMSS@7966@2यातं हरिणेव मया द्वित्राणि पदानि कृच्छ्रेण ॥ ७९६६॥

ENMSS@7967@1एते नर्तितमौलयो गुणगणप्रस्तावनाभिर्मणेर् जायन्तां वणिजो वयं तु

कनक त्वत्कीर्तिवैतालिकाः ।

ENMSS@7967@2ते चाम्लानमुखेन हन्त भवता दाहच्छिदा वेदनाम्  अङ्गीकृत्य नरेन्द्रशेखरसुखासीनाः क्रियन्ते यतः ॥ ७९६७॥

ENMSS@7968@1एते नीवारवप्राः पृथुकुसुमसमित्पार्वतः कन्दरोऽयं  देवीयं जह्नुपुत्री सिकतिलशयितः शान्तनिःशङ्करङ्कः ।

ENMSS@7968@2कान्तारे दर्भदूर्वाचयशुचिनि वचः स्मार्तमावर्तयन्ति  ब्रह्माणो दुर्विपाकग्रहगहनतया यामिनीजागरूकाः ॥ ७९६८॥

ENMSS@7969@1एते नूतनचूतकोरकघनग्रासातिरेकीभवत्-  कण्ठध्वानजुषो हरन्ति हृदयं मध्येवनं कोकिलाः ।

ENMSS@7969@2येषामक्षिनिभेन भान्ति भगवद्भूतेशनेत्रानल-

ज्वालाजालकरालितासमशराङ्गारस्फुलिङ् गा इमे ॥ ७९६९॥

ENMSS@7970@1एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां  कष्टं द्रष्टैव नाभूद् भुवि समरसमालोकिलोकास्पदेऽपि ।

ENMSS@7970@2अश्वैरस्वैरवेगैः कृतखुरखुरलीमङ्क्षुविक्षुद्यमान-

क्ष्मापृष्ठोत्तिष्ठदन्धंकरणरण धुरारेणुधारान्धकारात् ॥ ७९७०॥

ENMSS@7971@1एते पञ्चदशानर्था ह्यर्थमूला मता नृणाम् ।

ENMSS@7971@2तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥ ७९७१॥

ENMSS@7972@1भिद्यन्ते भ्रातरो दाराः पितरः सुहृदस्तथा ।

ENMSS@7972@2एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥ ७९७२॥

ENMSS@7973@1अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः ।

ENMSS@7973@2त्यजन्त्याशुस्पृधो घ्नन्ति सहसोत्सृज्य सौहृदम् ॥ ७९७३॥

ENMSS@7974@1एते पल्लिपुरन्ध्रिनिर्भरजलक्रीडाहृताम्भःकण-

क्षोदक्षालितलग्नपान्थवनितानिःश्वासतीव्रातपाः ।

ENMSS@7974@2वान्ति स्वैरविहारकुञ्जरकरच्छिद्रोदराघूर्णन-

प्रारब्धोच्चमृदङ्गनादमुखरास्तापीनिकुञ्जानिलाः ॥ ७९७४॥

ENMSS@7975@1एते पल्लीपरिवृढवधूप्रौढकन्दर्पकेलि-

क्लिश्यत्पीनस्तनपरिसरस्वेदसंपद्विपक्षाः ।

ENMSS@7975@2वान्ति स्वैरं सरसि सरसि क्रोडदंष्ट्राविमर्द-

त्रुट्यद्भुन्द्रापरिमलगुणग्राहिणो गन्धवाहाः ॥ ७९७५॥

ENMSS@7976@1एते पाटीरवाटीनवविटपनटीलास्यशिक् षातिदक्षा

दोलाखेलत्पुरंध्रीश्रमजलकणिकाजालपातिप्रत् आनाः ।

ENMSS@7976@2सौरभ्यादापतद्भिर्मधुकरपटलैः पृष्ठतोऽनुप्रयाताः  कामाग्नेः

स्फारधाय्याः पथिककुलवधूबद्धवैराः समीराः ॥ ७९७६॥
ENMSS@7977@1एते पुरः सुरभिकोमलहोमधूम- लेखानिपीतनवपल्लवशोणिमानः ।
ENMSS@7977@2पुण्याश्रमाः श्रुतिसमोहितसामगीति- साकूतनिश्चलकुरङ्गकुलाः स्फुरन्ति ॥ ७९७७॥
ENMSS@7978@1एते प्रशस्ततरवो दन्तधावनकर्मणि ।
ENMSS@7978@2कण्टकिक्षीरवृक्षोत्थद्वादशाङ्गुलम् अव्रणम् ॥ ७९७८॥
ENMSS@7979@1एते बहुविधाः शोका विलापरुदिते तथा ।
ENMSS@7979@2वर्जनीया हि धीरेण सर्वावस्थासु धीमता ॥ ७९७९॥
ENMSS@7980@1एते मेकलकन्यकाप्रणयिनः पातालमूलस्पृशः संत्रासं जनयन्ति विन्ध्यभिदुरा वारां प्रवाहाः पुरः ।
ENMSS@7980@2लीलोन्मूलितनर्तितप्रतिहतव्यावर्तितप्रेरित-त्यक्तस्वीकृतनिह्नुतप्रचलितप्रोद्धूततीरद्रुमाः ॥ ७९८०॥
ENMSS@7981@1एते लक्ष्मण जानकीविरहिणं मां खेदयन्त्यम्बुदा मर्माणीव च घट्टयन्त्यलममी क्रूराः कदम्बानिलाः ।
ENMSS@7981@2इत्थं व्याहृतपूर्वजन्मविरहो यो राधया वीक्षितः सेर्ष्यं शङ्कितया स वः सुखयतु स्वप्नायमानो हरिः ॥ ७९८१॥
ENMSS@7982@1एते वयं तनुधनाः कृपणेयमुर्वी दीनाः शतं मृदु च विस्तरयन्ति वाचः ।
ENMSS@7982@2तद् भ्रातरः शकुनिफेरवसारमेया ढौकध्वमेतदहह स्फुटतु क्षणेन ॥ ७९८२॥
ENMSS@7983@1एते वयममी दाराः कन्येयं कुलजीवितम् ।
ENMSS@7983@2ब्रूत येनात्र वः कार्यम् अनास्था बाह्यवस्तुषु ॥ ७९८३॥
ENMSS@7984@1एते वश्यकरोपाया दुर्जने निष्फलाः स्मृताः ।
ENMSS@7984@2तत्संनिधिं त्यजेत् प्राज्ञः शक्तस्तं दण्डतो जयेत् ।
ENMSS@7984@3छलभूतैस्तु तद्रूपैरुपायैरेभिरेव वा ॥ ७९८४॥
ENMSS@7985@1एते वामविलोचनाकुचसखैः सोढव्यशीतार्तयः प्राप्ताः पश्चिमसैन्धवस्य मरुतः प्रेमच्छिदो वासराः ।
ENMSS@7985@2यत्रापास्य पुराणपङ्कजमयं देवः सश्रृङ्गारभूर् आदत्ते नवकुन्दकुड्मलशिखानिर्माणमन्यद् धनुः ॥ ७९८५॥
ENMSS@7986@1एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः शैलाः शाद्वलमुद्वमन्ति न वमन्त्येते पुनर्नायकान् ।

ENMSS@7986@2त्रैलोक्ये तरवः फलानि सुवते नैवारभन्ते जनान् धातः कातरमालपामि कुलटाहेतोस्त्वया किं कृतम् ॥ ७९८६॥

ENMSS@7987@1एते वैयाकरणपशवः स्वीयमायुर्वृथैव प्राज्ञंमन्याः श्रवणकटुभिः शब्दजालैः क्षिपन्ति ।

ENMSS@7987@2शश्वत्कान्ताधरमधुरतावर्णनं कुर्वतां नस् त्वाशीर्वादैरिह सहृदयाः प्रत्यहं वर्धयन्ते ॥ ७९८७॥

ENMSS@7988@1एते व्योमनि शोषयन्ति हरिणत्रासाच्चिरं चीवरे संध्याकर्मविधौ कमण्डलुमिमे पश्यन्ति रिक्तं भृतम् ।

ENMSS@7988@2भिक्षन्ते च फलान्यमी करपुटीपात्रेण चानोकहान् एषामर्घविधौ च संनिधिगताः पुष्प्यन्त्यकाण्डे लताः ॥ ७९८८॥

ENMSS@7989@1एते शारदकौमुदीकुलभुवः क्षीरोदधेः सोदराः शेषाहेः सुहृदो विनिद्रकुमुदश्रेणीमहःस्राविणः ।

ENMSS@7989@2शीतांशोः सहपांशुखेलनसखाः स्वःसिन्धुसंबन्धिनः प्रालेयाचलबन्धवस्तव गुणाः कैर्नेह कर्णार्पिताः ॥ ७९८९॥

ENMSS@7990@1एतेषां नवचक्राणाम् एकैकं ध्यायतो मुनेः ।

ENMSS@7990@2सिद्धयो मुक्तिसहिताः करस्थाः स्युर्दिने दिने ॥ ७९९०॥

ENMSS@7991@1एतेषामनुकूलो दक्षिणधृष्टौ शठश्चेति ।

ENMSS@7991@2भेदचतुष्टयमेषां वदाम्युदाहरणमेकैकम् ॥ ७९९१॥

ENMSS@7992@1एतेषु हा तरुणमारुतधूयमान- दावानलैः कवलितेषु महीरुहेषु ।

ENMSS@7992@2अम्भो न चेज्जलद मुञ्चसि मा विमुञ्च वज्रं पुनः क्षिपसि निर्दय कस्य हेतोः ॥ ७९९२॥

ENMSS@7993@1एते संततभृज्यमानचणकामोदप्रधाना मनः कर्ष्यन्त्यूषरसंनिवेशजरठच्छायाः स्थलीग्रामकाः ।

ENMSS@7993@2तारुण्यातिशयाग्रपामरवधूसोल्लासहस्तग्रह- भ्राम्यत्पीवरयन्त्रकध्वनिरसद्गम्भीरगेहोदराः ॥ ७९९३॥

ENMSS@7994@1एते संप्रति वैमनस्यमनिशं निःशङ्कमातन्वते कान्तारस्थलपद्मिनीपरिमलैरानन्दितेन्दिन्दिराः ।

ENMSS@7994@2उन्मीलत्सहकारकाननतटीवाचालपुंस्कोकिल- ध्वानाकर्णनकांदिशीकपथिकावस्कन्दिनो वासराः ॥ ७९९४॥

ENMSS@7995@1एते समुल्लसद्भासो राजन्ते कुन्दकोरकाः ।

ENMSS@7995@2शीतभीता लताकुन्दम् आश्रिता इव तारकाः ॥ ७९९५॥

ENMSS@7996@1एते स्निग्धतमा इति  मा मा क्षुद्रेषु कुरुत विश्वासम् ।
ENMSS@7996@2सिद्धार्थानामेषां  स्नेहोऽप्यश्रूणि पातयति ॥ ७९९६॥
ENMSS@7997@1एते हि कामकलिताः  परिमललीनालिवलयहुंकारैः ।
ENMSS@7997@2सूचितदानाः करिणो  बध्यन्ते क्षिप्रमबलाभिः ॥ ७९९७॥
ENMSS@7998@1एते हि गुणाः पङ्कज  सन्तोऽपि न ते प्रकाशमायान्ति ।
ENMSS@7998@2यल्लक्ष्मीवसतेस्तव  मधुपैरुपभुज्यते कोशः ॥ ७९९८॥
ENMSS@7999@1एते हि जीवाश्चिद्भावा भवे भावनया हिताः ।
ENMSS@7999@2ब्रह्मणः कलिताकाराः सहस्रायुतकोटिशः ॥ ७९९९॥
ENMSS@8000@1एते हि देहदाहाद्  विरहा इव दुःसहा भिषजः ।
ENMSS@8000@2ग्रीष्मदिवसा इवोग्रा  बहुतृष्णाः शोषयन्त्येव ॥ ८०००॥
ENMSS@8001@1एते हि विद्युद्गुणबद्धकक्षा  गजा इवान्योन्यमभिद्रवन्तः ।
ENMSS@8001@2शक्राज्ञया वारिधराः सधारा  गां रूप्यरज्ज्वेव समुद्धरन्ति ॥ ८००१॥
ENMSS@8002@1एते हि समुपासीना विहगा जलचारिणः ।
ENMSS@8002@2नावगाहन्ति सलिलम् अप्रगल्भा इवाहवम् ॥ ८००२॥
ENMSS@8003@1एतैः पिष्टतमालवर्णकनिभैरालिप्तमम्भोधरैः  संसक्तैरुपवीजितं सुरभिभिः शीतैः प्रदोषानिलैः ।
ENMSS@8003@2एषाम्भोदसमागमप्रणयिनी स्वच्छन्दमभ्यागता  रक्ता कान्तमिवाम्बरं प्रियतमा विद्युत् समालिङ्गति ॥ ८००३॥
ENMSS@8004@1एतैरार्द्रतमालपत्रमलिनैरापीतसूर्यं नभो  वल्मीकाः शरताडिता इव गजाः सीदन्ति धाराहताः ।
ENMSS@8004@2विद्युत् काञ्चनदीपिकेव रचिता प्रासादसंचारिणी  ज्योत्स्ना दुर्बलभर्तृकेव वनिता प्रोत्सार्य मेघैर्हृता ॥ ८००४॥
ENMSS@8005@1एतैरेव यदा गजेन्द्रमलिनैराध्मातलम्बोदरैर् गर्जद्भिः सतडिद्बलाकशबलैर्मेघैः सशल्यं मनः ।
ENMSS@8005@2तत् किं प्रोषितभर्तृवध्यपटहो हा हा हृताशो बकः  प्रावृट् प्रावृडिति ब्रवीति शठधीः क्षारं क्षते प्रक्षिपन् ॥ ८००५॥
ENMSS@8006@1एतैर्जह्नुसुताजलैरयमुनाभिन्नैरलग्नाञ्जनैर् नारीणां नयनैरकर्दमलवालिप्तैर्मृणालाङ्कुरैः ।
ENMSS@8006@2हारैरस्फुरदिन्द्रनीलतरलैः कुन्दैरलीनालिभिर् वेल्लद्भिर्भुवनं विभूषितमिदं शीतद्युतेरंशुभिः ॥ ८००६॥

ENMSS@8007@1एतैर्जातैः किमिह बहुभिर्भोगिभिः किं तु मन्ये  मान्यः कोऽपि प्रभवति

जगत्येकशेषः स शेषः ।

ENMSS@8007@2यस्मिन् गौरीपृथुकुचतटीकुङ्कुमस्थासकाङ्कः येन स्थाणोरुरसि रहितो

हारवल्लीविलासः ॥ ८००७॥

ENMSS@8008@1एतैर्दक्षिणगन्धवाहवलनैः श्रीखण्ड किं सौरभं  ब्रूमस्ते परितो

मधुव्रतयुवा येनायमानीयते ।

ENMSS@8008@2माकन्दादपहृत्य पङ्कजवनादुद्धूय कुन्दोदराद्

उद्भ्राम्यद्द्विपगण्डमण्डलतलादाकृष्य हृष्यन्मनाः ॥ ८००८॥

ENMSS@8009@1एतैर्यदि सुस्निग्धैर् वल्मीकैः परिवृतास्ततस्तोयम् ।

ENMSS@8009@2हस्तैस्त्रिभिरुत्तरतश्  चतुर्भिरर्धेन च नरस्य ॥ ८००९॥

ENMSS@8010@1एतैर्यद्यद् समादिष्टं शुभं वा यदि वाशुभम् ।

ENMSS@8010@2कर्तव्यं नियतं भीतैरप्रमत्तैर्बुभूषुभिः ॥ ८०१०॥

ENMSS@8011@1एतौ द्वौ दशकण्ठकण्ठकदलीकान्तारकान्तिच्छिद उ

वैदेहीकुचकुम्भकुङ्कुमरजःसान्द्रारुणाङ्काङ्कितौ ।

ENMSS@8011@2लोकत्राणविधानसाधुसवनप्रारम्भयूपौ भुजौ  देयास्तामुरुविक्रमौ

रघुपतेः श्रेयांसि भूयांसि वः ॥ ८०११॥

ENMSS@8012@1एनं विहाय तुलसीविपिनोपकण्ठं  गोप्यः परत्र नयनाम्बुजमीलनानि ।

ENMSS@8012@2कुर्वन्तु किंतु तुलसीदलनीलभासं  का वा मुकुन्दमनुविन्दतु लीनमस्मिन्

॥ ८०१२॥

ENMSS@8013@1एनसानेन तिर्यक् स्याद् इत्यादिः का विभीषिका ।

ENMSS@8013@2राजिलोऽपि हि राजेव स्वैः सुखी सुखहेतुभिः ॥ ८०१३॥

ENMSS@8014@1एनाममन्दमकरन्दविनिद्रबिन्दु-  संदोहदोहदपदं नलिनीं विमुच्य ।

ENMSS@8014@2हे मुग्ध षट्पद निरर्थकरागभाजि  जातं मनस्तव जपाकुसुमे किमत्र

॥ ८०१४॥

ENMSS@8015@1एभिर्जितैर्जितं सर्वं सरुतेन महात्मना ।

ENMSS@8015@2स्मृत्वा विवर्जयेदेतान् षड्दोषांश्च महीपतिः ॥ ८०१५॥

ENMSS@8016@1एभिर्दिनैस्तु शिष्याय गुरुः शस्त्राणि दापयेत् ।

ENMSS@8016@2संतर्प्य दानहोमाभ्यां सुरान् वेदविधानतः ॥ ८०१६॥

ENMSS@8017@1एभिर्नाशितयोगास्तु सकला देवयोनयः ।

ENMSS@8017@2उपसर्गैर्महाघोरैरावर्तन्ते पुनः पुनः ॥ ८०१७॥

ENMSS@8018@1एरण्डपत्रशयना  जनयन्ती स्वेदमलघुजघनतटा ।

ENMSS@8018@2धूलिपुटीव मिलन्ती  स्मरज्वरं हरति हलिकवधूः ॥ ८०१८॥

ENMSS@8019@1एरण्डबीजप्रतिमम् अङ्गं यस्मिन् प्रतीयते ।

ENMSS@8019@2महिषाख्यः स वै खड्गो नीलमेघसमच्छविः ॥ ८०१९॥

ENMSS@8020@1एरण्डभिण्डार्कनलैः प्रभूतैरपि संभृतैः ।

ENMSS@8020@2दारुकृत्यं यथा नास्ति तथा नाज्ञैः प्रयोजनम् ॥ ८०२०॥

ENMSS@8021@1एलाकरणढेकीभिर्वर्तन्या डूमडेन च ।

ENMSS@8021@2लम्भरासैकतालीभिः शुद्धसूडोऽष्टभिः स्मृतः ॥ ८०२१॥

ENMSS@8022@1एवं कदाचिन् नरकं स्वर्गं योन्यन्तराण्यपि ।

ENMSS@8022@2प्रयान्ति जीवा मोहेन मोहिता भवसंकटे ॥ ८०२२॥

ENMSS@8023@1एवं करणसामर्थ्यात् संयम्यात्मानमात्मना ।

ENMSS@8023@2नयापनयविद् राजा कुर्वीत हितमात्मनः ॥ ८०२३॥

ENMSS@8024@1एवं कर्तुं व वक्तुं च यो जानाति छलप्रियः ।

ENMSS@8024@2स करोतु स यात्वेवं कर्तुं भोक्तुं निजं हितम् ॥ ८०२४॥

ENMSS@8025@1एवं कुकर्म सर्वस्य फलत्यात्मनि सर्वदा ।

ENMSS@8025@2यो यद् वपति बीजं हि लभते सोऽपि तत्फलम् ॥ ८०२५॥

ENMSS@8026@1तस्मात् परविरुद्धेषु नोत्सहन्ते महाशयाः ।

ENMSS@8026@2एतदुत्तमसत्त्वानां विधिसिद्धं हि सद्व्रतम् ॥ ८०२६॥

ENMSS@8027@1एवं कुर्यात् समुदयं वृद्धिं चायस्य दर्शयेत् ।

ENMSS@8027@2ह्रासं व्ययस्य च प्राज्ञः साधयेच्च विपर्ययम् ॥ ८०२७॥

ENMSS@8028@1एवंगतस्य मम सांप्रतमेतदर्हम्  अत्रेदमौपयिकमित्थमिदं च साध्यम्
।

ENMSS@8028@2अस्मिन् प्रमाणमिदमित्यपि बोद्धुमम्ब  शक्तिर्न मे भुवनसाक्षिणि किं

करोमि ॥ ८०२८॥

ENMSS@8029@1एवं च भाषते लोकश्चन्दनं किल शीतलम् ।

ENMSS@8029@2पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते ॥ ८०२९॥

ENMSS@8030@1एवं चेत् सरसि स्वभावमहिमा जाड्यं किमेतादृशं  यस्मादेव निसर्गतः

सरलता किं ग्रन्थिमत्तेदृशी ।

ENMSS@8030@2मूलं चेच् शुचि पङ्कजश्रुतिरियं कस्माद् गुणा यद्यमी  किं छिद्राणि

सखे मृणाल भवतस्तत्त्वं न मन्यामहे ॥ ८०३०॥

ENMSS@8031@1एवं चेद् विधिना कृतोऽस्युपकृतौ कस्यांचिदप्यक्षमः  कामं मोपकृथास्ततस्तव मरो वाच्यं न धीरो भव ।

ENMSS@8031@2किं त्वारान् मृगतृष्णयोपजनयन्नम्भोमुचां वञ्चनां  प्रेम्णा कर्षसि तर्षमूर्छितधियोऽप्यन्यानतः शोच्यसे ॥ ८०३१॥

ENMSS@8032@1एवं चोरानचोराख्यान् वणिक्कारुकुशीलवान् ।

ENMSS@8032@2भिक्षुकान् कुहकांश्चान्यान् वारयेद् देशपीडनात् ॥ ८०३२॥

ENMSS@8033@1एवं जडेषु लोकेषु स्त्रीषु मुग्धासु का कथा ।

ENMSS@8033@2बुद्धिहीनप्रसादेन जीवामः केवलं वयम् ॥ ८०३३॥

ENMSS@8033A@1एवं जरा हन्ति च निर्विशेषं  स्मृतिं च रूपं च पराक्रमं च ।

ENMSS@8033A@2न चैव संवेगमुपैति लोकः  प्रत्यक्षतोऽपीदृशमीक्षमाणः ॥

ENMSS@8034@1एवंज्ञात्वा नरेन्द्रेण भृत्याः कार्या विचक्षणाः ।

ENMSS@8034@2कुलीनाः शौर्यसंपन्नाः शक्ता भक्ताः क्रमागताः ॥ ८०३४॥

ENMSS@8035@1एवंज्ञात्वा महाभागाः पुरुषेण विजानता ।

ENMSS@8035@2दिवा तत् कर्म कर्तव्यं येन रात्रौ सुखं स्वपेत् ॥ ८०३५॥

ENMSS@8036@1एवं दुरवधार्यैव गतिश्चित्तस्य योषिताम् ।

ENMSS@8036@2सवैरस्याविचारस्य नीचैकाभिमुखस्य च ॥ ८०३६॥

ENMSS@8037@1एवं चात्यक्तशीलानां ससत्त्वानां जितक्रुधाम् ।

ENMSS@8037@2तुष्टैवाचिन्तिता एव स्वयमायान्ति संपदः ॥ ८०३७॥

ENMSS@8038@1एवं देवोपहास्यत्वं लोके गच्छन्त्यबुद्धयः ।

ENMSS@8038@2लभन्ते नार्थसंसिद्धिं पूज्यन्ते तु सुबुद्धयः ॥ ८०३८॥

ENMSS@8039@1एवं द्रव्यं द्विपवनं सेतुबन्धमथाकरान् ।

ENMSS@8039@2रक्षेत् पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेत् ॥ ८०३९॥

ENMSS@8040@1एवं नरेश वनिताहृदये कदाचित्  कूटाद् ऋते वसति सत्यकथालवोऽपि ।

ENMSS@8040@2तत् सार्थसाध्यगमनासु सदैव तासु  शून्याटवीष्विव रमेत न भूतिकामः

॥ ८०४०॥

ENMSS@8041@1एवं न शक्नुवन्तीह यत् तत् कर्तुमशेषतः ।

ENMSS@8041@2यथाशक्ति न तस्यांशम् अपि कुर्वन्त्यबुद्धयः ॥ ८०४१॥

ENMSS@8042@1एवं निश्चितमभ्येति शुभमेव शुभात्मनाम् ।

ENMSS@8042@2एवं चातिक्रमो नाम क्लेशाय महतामपि ॥ ८०४२॥

ENMSS@8043@1अविश्वासास्पदं चैव स्त्रीणां स्पृशति नाशयम् ।

ENMSS@8043@2प्राणदानोपकारोऽपि किं तासामन्यदुच्यते ॥ ८०४३॥

ENMSS@8044@1एवं निसर्गचपला ललना विवेक-  वैराग्यदायिबहुदुश्चरितप्रबन्धाः ।

ENMSS@8044@2साध्वी तु काचिदपि तासु कुलं विशालं  यालंकरोत्यभिनवा खमिवेन्दुलेखा ॥ ८०४४॥

ENMSS@8045@1एवं निहत्य संग्रामे दुष्टशत्रुं मदोद्धतम् ।

ENMSS@8045@2जयतूर्यनिनादेन हर्षयन् सुभटान् स्वकान् ॥ ८०४५॥

ENMSS@8046@1॥। ॥। ॥। ॥। ॥। ॥। ।

ENMSS@8046@2एवं नोज्झति मूढोऽर्थान् यावदर्थैः स नोज्झितः ॥ ८०४६॥

ENMSS@8047@1॥। ॥। ॥। ॥। ॥। ॥। ।

ENMSS@8047@2एवं पशुश्च मूर्कश्च निर्विवेकमती समौ ॥ ८०४७॥

ENMSS@8048@1एवं पुत्राश्च पौत्राश्च ज्ञातयो बान्धवास्तथा ।

ENMSS@8048@2तेषु स्नेहो न कर्तव्यो विप्रयोगो हि तैर्ध्रुवम् ॥ ८०४८॥

ENMSS@8049@1एवं प्रज्ञैव परमं बलं न तु पराक्रमः ।

ENMSS@8049@2यत्प्रभावेण निहतः शशकेनापि केसरी ॥ ८०४९॥

ENMSS@8050@1एवं प्रयत्नं कुर्वीत यानशय्यासनाशने ।

ENMSS@8050@2स्थाने प्रसाधने चैव सर्वालङ्कारकेषु च ॥ ८०५०॥

ENMSS@8051@1एवं फलति सर्वस्य विधिः सत्त्वानुसारतः ।

ENMSS@8051@2तत् सुसत्त्वो भवेत् सत्त्वहीनं न वृण्वते श्रियः ॥ ८०५१॥

ENMSS@8052@1॥। ॥। ॥। ॥। ॥। ॥। ।

ENMSS@8052@2एवं बहु क्षपयति स्वल्पस्यार्थे धनान्धधीः ॥ ८०५२॥

ENMSS@8053@1एवं बहूनपि रिपून् समरप्रवृत्तान्  द्वेषाकुलानगणितस्वपरस्वरूपान् ।

ENMSS@8053@2एकोऽप्यनन्यसमपौरुषभग्नसार-  दर्पज्वराञ् जयति संयुगमूर्ध्नि धीरः ॥ ८०५३॥

ENMSS@8054@1एवं बुद्धेः परं बुद्धा संस्तभ्यात्मानमात्मना ।

ENMSS@8054@2जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ८०५४॥

ENMSS@8055@1एवं ब्रुवन्ति लोकेऽत्र धनिनां पुरतःस्थिताः ।

ENMSS@8055@2कुलीना अपि पापानां दृश्यन्ते धनलिप्सया ।

ENMSS@8055@3दरिद्रस्य मनुष्यस्य क्षितौ राज्यं प्रकुर्वतः ॥ ८०५५॥

ENMSS@8056@1एवं भवति लोकेऽस्मिन् देव सर्वस्य सर्वदा ।

ENMSS@8056@2प्राक्कर्मोपार्जितं जन्तोः सर्वमेव शुभाशुभम् ॥ ८०५६॥

ENMSS@8057@1एवं भवन्ति वेश्याः  स्वार्थैकरता व्यपेतसद्भावाः ।

ENMSS@8057@2अभिलषितविषयसिद्धेः  का हानिस्तदपि युष्माकम् ॥ ८०५७॥

ENMSS@8058@1एवं मनः कर्मवशं प्रयुङ्क्ते  अविद्ययात्मन्युपधीयमाने ।

ENMSS@8058@2प्रीतिर्न यावन्मयि वासुदेवे  न मुच्यते देहयोगेन तावत् ॥ ८०५८॥

ENMSS@8059@1॥। ॥। ॥। ॥। ॥। ॥। ।

ENMSS@8059@2एवं मूढप्रभुर्वेत्ति निग्रहं नाप्यनुग्रहम् ॥ ८०५९॥

ENMSS@8060@1एवं मूढस्य मूढत्वं स्वार्थान्धस्यातिचित्रता ।

ENMSS@8060@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ८०६०॥

ENMSS@8061@1एवं मोहप्रभवो  रागो न स्त्रीषु कस्य दुःखाय ।

ENMSS@8061@2तास्वेव विवेकभृतां  भवति विरागस्तु मोक्षाय ॥ ८०६१॥

ENMSS@8062@1एवं यथाह भवती मम सर्वदोषाः  कः स्वामिना कुवलयाक्षि सहानुबन्धः ।

ENMSS@8062@2एषोऽञ्जलिर्विरचितः कुरु निग्रहं मे  दासेऽपराधवति कोऽवसरः क्षमायाः ॥ ८०६२॥

ENMSS@8063@1एवं लेपत्रयं कुर्यात् सप्तमे सप्तमेऽहनि ।

ENMSS@8063@2ततो जन्मावधि कचाः कृष्णाः स्युर्भ्रमरप्रभाः ॥ ८०६३॥

ENMSS@8064@1एवं लोकं परं विद्यान् नश्वरं कर्मनिर्मितम् ।

ENMSS@8064@2सतुल्यातिशयध्वंसं यथा मण्डलवर्तिनाम् ॥ ८०६४॥

ENMSS@8065@1एवं वशीकृतस्वात्मा नित्यं स्मितमुखो भवेत् ।

ENMSS@8065@2त्यजेद् भ्रकुटिसंकोचं पूर्वाभाषी जगत्सुहृत् ॥ ८०६५॥

ENMSS@8066@1एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।

ENMSS@8066@2लीलाकमलपत्राणि गणयामास पार्वती ॥ ८०६६॥

ENMSS@8067@1एवं विचारश्चिन्ता च सारं राज्येऽधिकं नु किम् ।

ENMSS@8067@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ८०६७॥

ENMSS@8068@1एवंविधान् गजाञ् जात्यान् वनादानीय पार्थिवः ।

ENMSS@8068@2विनये शिष्यवत् कुर्यात् पुत्रवत् परिपालयेत् ॥ ८०६८॥

ENMSS@8069@1एवंविधे भावि न वेति चित्ते  निवेश्य कार्यं भषणं विमुञ्चेत् ।

ENMSS@8069@2संभक्ष्य पिण्डं स्थिरतां गतस्य  चेष्टादिकं तस्य निरूपणीयम् ॥ ८०६९॥

ENMSS@8070@1एवं विलोक्यास्य गुणाननेकान्  समस्तपापारिनिरासदक्षान् ।

ENMSS@8070@2विशुद्धबोधा न कदाचनापि  ज्ञानस्य पूजां महतीं त्यजन्ति ॥ ८०७०॥

ENMSS@8071@1एवं विषप्रयोगेण शत्रूणां क्षुद्रधातकम् ।
ENMSS@8071@2क्षीणेन क्रियते यत् तु विषदण्डः स उच्यते ॥ ८०७१॥
ENMSS@8072@1एवं विषह्य विधुरस्य विधेर्नियोगम्  आपत्सु रक्षितचरित्रधना हि साध्व्यः ।
ENMSS@8072@2गुप्ताः स्वसत्त्वविभवेन महत्तमेन  कल्याणमादधति पत्युरथात्मनश्च ॥ ८०७२॥
ENMSS@8073@1एवंवृत्तस्य राज्ञस्तु शिलोञ्छेनापि जीवतः ।
ENMSS@8073@2विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥ ८०७३॥
ENMSS@8074@1एवं वेधत्रयं कुर्याच् शङ्खदुन्दुभिनिःस्वनैः ।
ENMSS@8074@2ततः प्रणम्य गुरवे धनुर्बाणान् निवेदयेत् ॥ ८०७४॥
ENMSS@8075@1एवं श्रमविधिं कुर्याद् यावत् सिद्धिः प्रजायते ।
ENMSS@8075@2श्रमे सिद्धे च वर्षासु नैव ग्राह्यं धनुः करे ॥ ८०७५॥
ENMSS@8076@1एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयम् ।
ENMSS@8076@2मनोवाक्कर्मभिर्नित्यं शुभं कर्म समाचरेत् ॥ ८०७६॥
ENMSS@8077@1एवं सन्त्येव देवेह् भर्तृभक्ताः कुलाङ्गनाः ।
ENMSS@8077@2न पुनः सर्वथा सर्वा दुर्वृत्ता एव योषितः ॥ ८०७७॥
ENMSS@8078@1एवं सर्वं विधायेदम् इतिकर्तव्यमात्मनः ।
ENMSS@8078@2युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ॥ ८०७८॥
ENMSS@8079@1एवं सर्वजगद् विलोक्य कलितं दुर्वारवीर्यात्मना  निस्त्रिंशेन समस्तसत्त्वसमितिप्रध्वंसिना मृत्युना ।
ENMSS@8079@2सद्रत्नत्रयशातमार्गणगणं गृह्णन्ति तच्छित्तये  सन्तः शान्तधियो जिनेश्वरतपः साम्राज्यलक्ष्मीश्रिताः ॥ ८०७९॥
ENMSS@8080@1एवं सर्वजनानां  दुःखकरं जठरशिखिनमतिविषमम् ।
ENMSS@8080@2संतोषजलैरमलैः  शमयन्ति यतीश्वरा ये ते ॥ ८०८०॥
ENMSS@8081@1एवं सर्वमिदं कृत्वा यन् मयासादितं शुभम् ।
ENMSS@8081@2तेन स्यां सर्वसत्त्वानां सर्वदुःखप्रशान्तिकृत् ॥ ८०८१॥
ENMSS@8082@1एवं सर्वमिदं राजा संमन्त्र्य सह मन्त्रिभिः ।
ENMSS@8082@2व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं व्रजेत् ॥ ८०८२॥
ENMSS@8083@1एवं सर्वात्मना कार्या रक्षा योगविदानिशम् ।
ENMSS@8083@2धर्मार्थकाममोक्षाणां शरीरं साधनं यतः ॥ ८०८३॥
ENMSS@8084@1एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।

ENMSS@8084@2कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥ ८०८४॥
ENMSS@8085@1एवं साधारणं देहम् अव्यक्तप्रभवाप्ययम् ।
ENMSS@8085@2को विद्वानात्मसात्कृत्वा हन्ति जन्तूनृतेऽसतः ॥ ८०८५॥
ENMSS@8086@1एवं सिद्धो भवेद् योगी वञ्चयित्वा विधानतः ।
ENMSS@8086@2कालं कलितसंसारं पौरुषेणाद्भुतेन हि ॥ ८०८६॥
ENMSS@8087@1एवं स्थापय सुभ्रु बाहुलतिकामेवं कुरु स्थानकं  नात्युच्चैर्नम कुञ्चयाग्रचरणौ मां पश्य तावत् क्षणम् ।
ENMSS@8087@2एवं नर्तयतः स्ववक्रमुरजेनाम्भोधरध्वानिना  शंभोर्वः परिपान्तु नर्तितलयच्छेदाहतास्तालिकाः ॥ ८०८७॥
ENMSS@8088@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@8088@2एवं स्वदोषः प्रकटोऽप्यज्ञैर्दैव न बुध्यते ॥ ८०८८॥
ENMSS@8089@1एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् ।
ENMSS@8089@2परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति ॥ ८०८९॥
ENMSS@8090@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@8090@2एवं हि कुरुते देव योषिदीर्ष्यानियन्त्रिता ॥ ८०९०॥
ENMSS@8091@1शिक्षयत्यन्यपुरुषाऽसंगमीर्ष्यैव हि स्त्रियः ।
ENMSS@8091@2तदीर्ष्यामप्रकाश्यैव रक्ष्या नारी सुबुद्धिना ॥ ८०९१॥
ENMSS@8092@1रहस्यं च न वक्तव्यं वनितासु यथा तथा ।
ENMSS@8092@2पुरुषेणेच्छता क्षेमम् ॥। ॥। ॥। ॥ ८०९२॥
ENMSS@8093@1एवमज्ञातहृदया मूर्खाः कृत्वा विपर्ययम् ।
ENMSS@8093@2घ्नन्ति स्वार्थं परार्थं च तादृग् ददति चोऽत्तरम् ॥ ८०९३॥
ENMSS@8094@1एवमनेकविधं विदधाति  यो जननार्णवपातनिमित्तम् ।
ENMSS@8094@2चेष्टितमङ्गजबाणविभिन्नो  नेह सुखी न परत्र सुखी सः ॥ ८०९४॥
ENMSS@8095@1एवमन्याय्यया बुद्ध्या कृतं कर्माशुभावहम् ।
ENMSS@8095@2तस्मात् तन् न्याय्यया कुर्याद् बकेनाहेः कृतं यथा ॥ ८०९५॥
ENMSS@8096@1एवमन्योन्यसंचारं षड्गुण्यं योऽनुपश्यति ।
ENMSS@8096@2स बुद्धिनिगलैर्बद्धैरिष्टं क्रीडति पार्थिवैः ॥ ८०९६॥
ENMSS@8097@1एवमपास्तमतिः क्रमतोऽत्र  पुष्पधनुर्धरवेगविधूतः ।
ENMSS@8097@2किं न जनो लभते जननिन्द्यो  दुःखमसह्यमनन्तमवाच्यम् ॥ ८०९७॥
ENMSS@8098@1एवमभ्याहते लोके कालेनाभिनिपीडिते ।

ENMSS@8098@2सुमहद् धैर्यमालम्ब्य मनो मोक्षे निवेशयेत् ॥ ८०९८॥
ENMSS@8099@1एवमल्पश्रुतो मन्त्री कल्याणाभिजनोऽप्युत ।
ENMSS@8099@2धर्मार्थकामसंयुक्तं नालं मन्त्रं परीक्षितुम् ॥ ८०९९॥
ENMSS@8100@1एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम् ।
ENMSS@8100@2सर्वस्य तपसो मूलम् आचारं जगृहुः परम् ॥ ८१००॥
ENMSS@8101@1एवमाप्तवचनात् स पौरुषं  काकपक्षकधरेऽपि राघवे ।
ENMSS@8101@2श्रद्दधे त्रिदशगोपमात्रके  दाहशक्तिमिव कृष्णवर्त्मनि ॥ ८१०१॥
ENMSS@8102@1एवमालि निगृहीतसाध्वसं  शंकरो रहसि सेव्यतामिति ।
ENMSS@8102@2सा सखीभिरुपदिष्टमाकुला  नास्मरत् प्रमुखवर्तिनि प्रिये ॥ ८१०२॥
ENMSS@8103@1एवमाश्रमविरुद्धवृत्तिना  संयमः किमिति जन्मतस्त्वया ।
ENMSS@8103@2सत्त्वसंश्रयसुखोऽपि दूष्यते  कृष्णसर्पशिशुनेव चन्दनः ॥ ८१०३॥
ENMSS@8104@1एवमुत्तमजन्मानस्तिर्यञ्चोऽप्यापदि प्रिये ।
ENMSS@8104@2प्रभुं नोज्झन्ति मित्रं वा तारयन्ति ततः पुनः ॥ ८१०४॥
ENMSS@8105@1हीनजात्युद्भवा ये तु तेषां स्पृशति नाशयम् ।
ENMSS@8105@2कदाचिदपि सत्त्वं वा स्नेहो वा चञ्चलात्मनाम् ॥ ८१०५॥
ENMSS@8106@1एवमुपचीयमानं  स्तोकं स्तोकं विचिन्वतः पुण्यम् ।
ENMSS@8106@2संपद्यते विशालं  श्रुतिमप्येवं तपोऽप्येवम् ॥ ८१०६॥
ENMSS@8107@1एवमेव क्रियायुक्ता सर्वसौभाग्यदायिनी ।
ENMSS@8107@2यस्यैषा च भवेद् भार्या देवेन्द्रोऽसौ न मानुषः ॥ ८१०७॥
ENMSS@8108@1एवमेव नहि जीव्यते खलात्  तत्र का नृपतिवल्लभे कथा ।
ENMSS@8108@2पूर्वमेव हि सुदुःसहोऽनलः  किं पुनः प्रबलवायुनेरितः ॥ ८१०८॥
ENMSS@8109@1एवमेव मनुष्येषु तेषु पूर्वापकारिषु ।
ENMSS@8109@2विश्वासो नोपगन्तव्यो नदी गतजला यथा ॥ ८१०९॥
ENMSS@8110@1एवमेव हि योऽश्वत्थं रोपयेद् विधिना नरः ।
ENMSS@8110@2यत्र कुत्रापि वा स्थाने गच्छेत् स भवनं हरेः ॥ ८११०॥
ENMSS@8111@1एष एव मनस्तापः पङ्के मग्नस्य दन्तिनः ।
ENMSS@8111@2पतते यत् समुद्धर्तुं ज्ञातयो निभृतस्मिताः ॥ ८१११॥
ENMSS@8112@1एष क्रीडान्तताम्यत्कुसुमपुरवधूवक्त्रसौरभ्यबन्धुर् मुग्धं निद्राजडानां रसितमनुसरोद्राघयन् सारसानाम् ।
ENMSS@8112@2आवात्यङ्गानुकूलश्चलितविचकिलश्रेणिगन्धानुधावद्-
रोलम्बोद्धुष्यमाणस्मरजयबिरुदाडम्बरो मातरिश्वा ॥ ८११२॥

ENMSS@8113@1एष क्षुन्नाति पङ्कं दलति कमलिनीमत्ति गुन्द्राप्ररोहान् आरान् मुस्तास्थलानि

स्थपुटयति जलान्युत्कसेतूनि याति ।

ENMSS@8113@2प्राप्तः प्राप्तः प्रविष्टो वनगहनमयं याति यातीति सैन्यैः

पश्चादन्विष्यमाणः प्रविशति विषमान् काननान्तान् वराहः ॥ ८११३॥

ENMSS@8114@1एष गजोऽद्रिमस्तकतले कलभपरिवृतः क्रीडति वृक्षगुल्मगहने

कुसुमभरनते ।

ENMSS@8114@2मेघरवं निशम्य मुदितः पवनजवसमः सुन्दरि वंशपत्रपतितं

पुनरपि कुरुते ॥ ८११४॥

ENMSS@8115@1एष चारुमुखि योगतारया युज्यते तरलबिम्बया शशी ।

ENMSS@8115@2साध्वसादुपगतप्रकम्पया कन्ययेव नवदीक्षया वरः ॥ ८११५॥

ENMSS@8116@1एष तूङ्गमरवीचिडम्बरः क्षोभमात्रमगमत् पयोनिधिः ।

ENMSS@8116@2विभ्रमैस्तदुदयक्रमोचितैर् उल्ललास ललनासु मन्मथः ॥ ८११६॥

ENMSS@8116A@1एष दुर्नियतिदण्डचण्डिम- प्रेरितो बत रविर्गतच्छविः ।

ENMSS@8116A@2स्थास्यति स्वयमधःपतन् कियत्- कालमम्बरविलम्बिभिः करैः ॥

ENMSS@8117@1एष धर्मस्तु सुश्रोणि पितुर्मातुश्च वश्यता ।

ENMSS@8117@2अतश्चाज्ञां व्यतिक्रम्य नाहं जीवितुमुत्सहे ॥ ८११७॥

ENMSS@8118@1एष धर्मो मयाख्यातो नारीणां परमा गतिः ।

ENMSS@8118@2या नारी कुरुते चान्यत् सा याति नरकं ध्रुवम् ॥ ८११८॥

ENMSS@8119@1एष बकः सहसैव विपन्नः शाठ्यमहो क्व नु तद् गतमस्य ।

ENMSS@8119@2साधु कृतान्तक कश्चिदपि त्वां वञ्चयितुं न कुतोऽपि समर्थः ॥ ८११९॥

ENMSS@8120@1एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शंकरोऽयं

दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः ।

ENMSS@8120@2एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये नृत्यन्ति व्योम्नि

चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः ॥ ८१२०॥

ENMSS@8121@1एष भो निर्मलज्योत्स्नो राहुणा ग्रस्यते शशी ।

ENMSS@8121@2जलं कूलावपातेन प्रसन्नं कलुषायते ॥ ८१२१॥

ENMSS@8122@1एष रविस्तेजस्वी खद्योतोऽप्येष हन्त तेजस्वी ।

ENMSS@8122@2एष रसालः शाखी शाखी शाखोटकोऽप्येषः ॥ ८१२२॥

ENMSS@8123@1एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः ।

ENMSS@8123@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ८१२३॥
ENMSS@8124@1एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
ENMSS@8124@2मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ॥ ८१२४॥
ENMSS@8125@1एष विशेषः स्पष्टो वह्नेश्च त्वत्प्रतापवह्नेश्च ।
ENMSS@8125@2अङ्कुरति तेन दग्धं दग्धस्यानेन नोद्भवो भूयः ॥ ८१२५॥
ENMSS@8126@1एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलः ।
ENMSS@8126@2हीयमानमहरत्ययातपं पीवरोरु पिबतीव बर्हिणः ॥ ८१२६॥
ENMSS@8127@1एष षट्पदयुवा मदायतः कुन्द यापयति यामिनीस्त्वयि ।
ENMSS@8127@2दुर्वहा तदपि नापचीयते पद्मिनीविरहवेदना हृदि ॥ ८१२७॥
ENMSS@8128@1एष सान्द्रतिमिरे गगनान्ते वारिणीव मलिने यमुनायाः ।
ENMSS@8128@2भाति पक्षपुटगोपितचञ्चू राजहंस इव शीतमयूखः ॥ ८१२८॥
ENMSS@8129@1एष सूर्यांशुसंतप्तो मृगः कुतरुमाश्रितः ।
ENMSS@8129@2साधुर्भाग्यपरिक्षीणो नीचं प्राप्येव सीदति ॥ ८१२९॥
ENMSS@8130@1एष स्वभावो नारीणाम् अनुभूय पुरा सुखम् ।
ENMSS@8130@2अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि ॥ ८१३०॥
ENMSS@8131@1एष स्वर्गतरङ्गिणीजलमिलद्दिग्दन्तिदन्तद्युतिर्
भ्रश्यद्राजतकुम्भविभ्रमधरः शीतांशुरभ्युद्यतः ।
ENMSS@8131@2हंसीयत्यमलाम्बुजीयति लसड्डिण्डीरपिण्डीयति स्फारस्फाटिककुण्डलीयति
दिशामानन्दकन्दीयति ॥ ८१३१॥
ENMSS@8132@1एष हि प्रथमो धर्मः क्षत्रियस्याभिषेचनम् ।
ENMSS@8132@2येन शक्यं महाप्राज्ञ प्रजानां परिपालनम् ॥ ८१३२॥
ENMSS@8133@1एषां गोपवधूविलाससुहृदां राधारहःसाक्षिणां भद्रं भद्र
कलिन्दशैलतनयातीरे लताशाखिनाम् ।
ENMSS@8133@2विच्छिन्ने स्मरतल्पकल्पनविधिच्छेदाय योगेऽधुना ते जाने
जरठीभवन्ति विलसन्नीलत्विषः पल्लवैः ॥ ८१३३॥
ENMSS@8134@1एषां पल्लवमंशुकानि कुसुमं मुक्ताः फलं विद्रुमं वैडूर्यं
दलमङ्कुरो मरतकं हैमं च शाखाशतम् ।
ENMSS@8134@2एते के जगतीरुहो वनजुषाप्यज्ञातपूर्वा मया प्रायः सारममी दिवो
विटपिनः
किं तैर्ममान्यो भरः ॥ ८१३४॥
ENMSS@8135@1एषा का जघनस्थली सुललिता प्रोन्मत्तकामाधिका भ्रूभङ्गं कुटिलं

त्वनङ्गधनुषः प्रख्यं प्रभाचन्द्रवत् ।

ENMSS@8135@2राकाचन्द्रकपोलपङ्कजमुखी क्षामोदरी सुन्दरी वेणीदण्डमिदं विभाति तुलितं वेल्लद्भुजं गच्छति ॥ ८१३५॥

ENMSS@8136@1एषा का नवयौवना शशिमुखी कान्ता पथो गच्छति निद्राव्याकुलिता विघूर्णनयना संपक्कबिम्बाधरा ।

ENMSS@8136@2केशैर्व्याकुलिता नखैर्विदलिता दन्तैश्च खण्डीकृता केनेदं रतिराक्षसेन रमिता शार्दूलविक्रीडिता ॥ ८१३६॥

ENMSS@8137@1एषा कान्ता व्रजति ललितं वेपमाना गुल्मच्छन्नं वनमुरुनगैः संप्रविद्धम् ।

ENMSS@8137@2हा हा कष्टं किमिदमिति नो वेद्मि मूढो व्यक्तं क्रोधच्छरभललितं कर्तुकामा ॥ ८१३७॥

ENMSS@8138@1एषा का परिपूर्णचन्द्रवदना गौरीमृगा क्षोभिनी लीलामत्तगजेन्द्रहंसगमना - - । - - । - ।

ENMSS@8138@2निःश्वासाधरगन्धशीतलमुखी वाचा मृदूल्लासिनी स श्लाघ्यः पुरुषस्स जीवति वरो यस्य प्रिया हीदृशी ॥ ८१३८॥

ENMSS@8139@1एषा का प्रस्तुताङ्गी प्रचलितनयना हंसलीला व्रजन्ती द्वौ हस्तौ कुङ्कुमार्द्रौ कनकविरचिता - । - - । - - ।

ENMSS@8139@2- ऊंगांगेगता सा बहुकुसुमयुता बद्धवीणा हसन्ती ताम्बूलं वामहस्ते मदनवशगता गूह्य शालां प्रविष्टा ॥ ८१३९॥

ENMSS@8140@1एषा का भुक्तमुक्ता प्रचलितनयना स्वेदलग्नाङ्गवस्त्रा प्रत्यूषे याति बाला मृग इव चकिता सर्वतः शङ्कयन्ती ।

ENMSS@8140@2केनेदं वक्त्रपद्मं स्फुरदधररसं षद्पदेनैव पीतं स्वर्गः केनाद्य भुक्तो हरनयनहतो मन्मथः कस्य तुष्टः ॥ ८१४०॥

ENMSS@8141@1एषा का रतिहावभावविलसच्चन्द्राननं बिभ्रती गात्रं चम्पकदामगौरसदृशं पीनस्तनालम्बिता ।

ENMSS@8141@2पद्भ्यां संचरति प्रगल्भहरिणी संलीलया स्वेच्छया किं चैषा गगनाङ्गना भुवितले संपादिता ब्रह्मणा ॥ ८१४१॥

ENMSS@8142@1एषा का स्तनपीनभारकठिना मध्ये दरिद्रावती विभ्रान्ता हरिणी विलोलनयना
संत्रस्तयूथोद्गता ।

ENMSS@8142@2अंतःस्वेदगजेन्द्रगण्डगलिता संलीलया गच्छति दृष्ट्वा रूपमिदं

प्रियाङ्गगहनं वृद्धोऽपि कामायते ॥ ८१४२॥

ENMSS@8143@1एषा कुसुमनिषण्णा  तृषितापि सती भवन्तमनुरक्ता ।

ENMSS@8143@2प्रतिपालयति मधुकरी  न खलु मधु विना त्वया पिबति ॥ ८१४३॥

ENMSS@8144@1एषागतैव निबिरीसनितम्बबिम्ब-  भारेण पक्ष्मलदृशः क्रियते तु विघ्नः ।

ENMSS@8144@2यान्त्या इतीव दयितान्तिकमेणदृष्टेर् अग्रे जगाम गदितुं लघुचित्तवृत्तिः ॥ ८१४४॥

ENMSS@8145@1एषा जिगीषति पृथुस्तबका लता त्वां  पर्याप्तपीननिबिडस्तनभारखिन्नाम् ।

ENMSS@8145@2अस्याः प्रिये विचिनुमः स्तबकांस्तथान्याः  कर्तुं यथा न हि कदापि लताः
स्मरेयुः ॥ ८१४५॥

ENMSS@8146@1एषा ते हर का सुगात्रि कतमा मूर्ध्नि स्थिता किं जटा  हंसः किं भजते
जटां नहि शशी चन्द्रो जलं सेवते ।

ENMSS@8146@2मुग्धे भूतिरियं कुतोऽत्र सलिलं भूतिस्तरङ्गायते  इत्थं यो विनिगूहते त्रिपथगां पायात् स वः शंकरः ॥ ८१४६॥

ENMSS@8147@1एषा दोषा यथार्था प्रियतम भवतो हन्त जाता वियोगे  स्त्रीहत्यापातकीति प्रथितिमुपगते लाञ्छनीति त्रिलोक्याम् ।

ENMSS@8147@2नैवं भूयोऽपराधं बत दयित कदाप्याचरिष्यामि सत्यं  त्वत्त्यक्तां मां सुतिग्मैर्मनसिजशमनः सायकैर्हन्तुमुत्कः ॥ ८१४७॥

ENMSS@8148@1एषा धर्मपताकिनी तटसुधासेवावसन्नाकिनी  शुष्यत्पातकिनी भगीरथतपःसाफल्यहेवाकिनी ।

ENMSS@8148@2प्रेमारूढपिनाकिनी गिरिसुतास्याकेकरालोकिनी  पापाडम्बरडाकिनी त्रिभुवनानन्दाय
मन्दाकिनी ॥ ८१४८॥

ENMSS@8149@1एषा पुष्करिणी मराल मलिनैश्छन्ना कुवीथीजलैर् यस्यामज्ञतया विधेरकृपया चेद् वस्तुमाकाङ्क्षसे ।

ENMSS@8149@2विश्रम्भो बकमण्डलेषु विनयो भेकेषु संबन्धिता  रात्र्यन्धेषु विधीयतां कृपणता कोयष्टिकश्रेणिषु ॥ ८१४९॥

ENMSS@8150@1एषा प्रवासं कथमप्यतीत्य  याता पुनः संशयमन्यथैव ।

ENMSS@8150@2को नाम पाकाभिमुखस्य जन्तोर् द्वाराणि दैवस्य पिधातुमीष्टे ॥ ८१५०॥

ENMSS@8151@1एषा फुल्लकदम्बनीपसुरभौ काले घनोद्भासिते कान्तस्यालयमागता समदना

हृष्टा जलार्द्रालका ।

ENMSS@8151@2विद्युद्वारिदगर्जितैः सचकिता त्वद्दर्शनाकाङ्क्षिणी पादौ

नूपुरलग्नकर्दमधरौ प्रक्षालयन्ती स्थिता ॥ ८१५१॥

ENMSS@8152@1एषा भविष्यति विनिद्रसरोरुहाक्षी कामस्य कापि दयिता तनुजानुजा वा ।

ENMSS@8152@2यः पश्यति क्षणमिमां कथमन्यथासौ कामस्तमस्तकरुणस्तरुणं

हिनस्ति ॥ ८१५२॥

ENMSS@8153@1एषा मनो मे प्रसभं शरीरात् पितुः पदं मध्यममुत्पतन्ती ।

ENMSS@8153@2सुराङ्गना कर्षति खण्डिताग्रात् सूत्रं मृणालादिव राजहंसी ॥ ८१५३॥

ENMSS@8154@1एषा रङ्गप्रवेशेन कलानां चैव शिक्षया ।

ENMSS@8154@2स्वरान्तरेण दक्षा हि व्याहर्तुं तन्न मुच्यताम् ॥ ८१५४॥

ENMSS@8155@1एषा लता यदि विलासवती कथं स्याद् विद्युल्लता यदि कथं भविता

धरण्याम् ।

ENMSS@8155@2वस्तुं मनोजनृपतेर्नगरी गरीयो- वक्षोजदुर्गविषमा किमकारि धात्रा

॥ ८१५५॥

ENMSS@8156@1एषा व्रजन्ती ललितं स्मयन्ती सखीजनैः सार्धमतिप्रगल्भा ।

ENMSS@8156@2सुरीव नित्यं सुरतासुखाप्ता विभाति भूमीधरपाठकस्त्री ॥ ८१५६॥

ENMSS@8157@1एषा सा विन्ध्यमध्यस्थलविपुलशिलोत्सङ्गरङ्गत्तरङ्गा

संभोगश्रान्ततीराश्रयशबरवधूशर्म दा नर्मदा च ।

ENMSS@8157@2यस्याः सान्द्रद्रुमालीललिततलमिलत्सुन्दरीसंनिरुद्धैः सिद्धैः सेव्यन्त

एते मृगमृदितदलत्कन्दलाः कूलकच्छाः ॥ ८१५७॥

ENMSS@8158@1एषासि वयसो दर्पात् कुलपुत्रानुसारिणी ।

ENMSS@8158@2केशेषु कुसुमाढ्येषु सेवितव्येषु कर्षिता ॥ ८१५८॥

ENMSS@8159@1एषा हि प्रकृतिः स्त्रीणाम् आसृष्टे रघुनन्दन ।

ENMSS@8159@2समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च ॥ ८१५९॥

ENMSS@8160@1एषा हि मे रणगतस्य दृढा प्रतिज्ञा द्रक्ष्यन्ति यन्न रिपवो जघनं

हयानाम् ।

ENMSS@8160@2युद्धेषु भाग्यचपलेषु न मे प्रतिज्ञा  दैवं यदिच्छति जयं च पराजयं च ॥ ८१६०॥

ENMSS@8161@1एषु स्पर्शो वरस्त्रीणां स्वान्तहारी मुनेरपि ।

ENMSS@8161@2अतोऽप्रमत्तः सेवेत विषयांस्तु यथोचितान् ॥ ८१६१॥

ENMSS@8162@1एषैव काचन विनिद्रसरोरुहाक्षी  कामस्य कापि दयिता तनुजानुजा वा ।

ENMSS@8162@2यः पश्यति क्षणमिमां कथमन्यथासौ  कामस्तमस्तकरुणं तरुणं निहन्ति ॥ ८१६२॥

ENMSS@8163@1एषैव महती लज्जा सदाचारस्य भूपतेः ।

ENMSS@8163@2यदकालभवो मृत्युस्तस्य संस्पृशति प्रजाः ॥ ८१६३॥

ENMSS@8164@1एषैव योषितां धन्या शीलं च लभते सुखम् ।

ENMSS@8164@2दिवा पतिव्रता भूयो नक्तं च कुलटा यतः ॥ ८१६४॥

ENMSS@8165@1एषोऽग्निहोत्रीति बिभर्ति गास्ता  विक्रीय दुग्धं सलिलं जुहोति ।

ENMSS@8165@2ख्यातोऽस्ति लोकेष्वृतुकालगामी  रजस्वलां याति दिवापि वेश्याम् ॥ ८१६५॥

ENMSS@8166@1एषोञ्झटस्य भवतो गृहिणी त्वपर्णा  स्थाणुः स्वयं तव च सूनुरसौ विशाखः ।

ENMSS@8166@2त्वत्तः फलं क इह वाञ्छति वामदेव  जन्मक्षयः परमसौ तव दर्शनेन ॥ ८१६६॥

ENMSS@8167@1एषोत्तुङ्गतरङ्गलङ्घिततटोत्सङ्गा पतङ्गात्मजा  पूर्णेयं तरिरम्बुभिर्न हि हरेः शङ्का कलङ्कादपि ।

ENMSS@8167@2काठिन्यं भज नाद्य सुन्दरि वयं राधे प्रसादेन ते  जीवामः स्फुटमातरीकुरु गिरिद्रोणीविनोदोत्सवम् ॥ ८१६७॥

ENMSS@8168@1एषोऽम्बुदनिःस्वनतुल्यरवः  क्षीबः स्खलमानविलम्बगतिः ।

ENMSS@8168@2श्रुत्वा घनगर्जितमद्रितटे  वृक्षान् प्रति मोटयति द्विरदः ॥ ८१६८॥

ENMSS@8169@1एषोऽहमद्रितनयामुखपद्मजन्मा  प्राप्तः सुरासुरमनोरथदूरवर्ती ।

ENMSS@8169@2स्वप्नेऽनिरुद्धघटनाधिगताभिरूप-  लक्ष्मीफलामसुरराजसुतां विधाय ॥ ८१६९॥

ENMSS@8170@1एष्टव्या बहवः पुत्रा गुणवन्तो बहुश्रुताः ।

ENMSS@8170@2तेषां वै समवेतानाम् अपि कश्चिद् गयां व्रजेत् ॥ ८१७०॥

ENMSS@8171@1एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।

ENMSS@8171@2यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ ८१७१॥

ENMSS@8172@1एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।

ENMSS@8172@2यत्रासौ प्रथितो लोकेष्वक्षय्यकरणो वटः ॥ ८१७२॥

ENMSS@8173@1एष्यति मा पुनरयमिति  गमने यदमङ्गलं मयाकारि ।

ENMSS@8173@2अधुना तदेव कारणम्  अवस्थितौ दग्धगेहपतेः ॥ ८१७३॥

ENMSS@8174@1एष्यन्ति यावद् गणनाद् दिगन्तान्  नृपाः स्मरार्ताः शरणे प्रवेष्टुम् ।

ENMSS@8174@2इमे पदाब्जे विधिनापि सृष्टास् तावत्य एकाङ्गुलयोऽत्र लेखाः ॥ ८१७४॥

ENMSS@8175@1एष्यन्त्यवश्यमधुना हृदयाधिनाथा  मुग्धा मुधा कुरुत मा विविधं विलापम् ।

ENMSS@8175@2इत्थं शशंसुरिव गर्जितकैतवेन  पाथोधराः पथिकपङ्कजलोचनाभ्यः ॥ ८१७५॥

ENMSS@8176@1एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।

ENMSS@8176@2इति वित्रस्तसारङ्गनेत्रया को न वञ्चितः ॥ ८१७६॥

ENMSS@8177@1एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।

ENMSS@8177@2एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥ ८१७७॥

ENMSS@8178@1एहि तत्र चिनुवः सुकौसुमं  कौ सुमञ्जुसुमनस्तरुश्रियाम् ।

ENMSS@8178@2एकिकामिति ततान मानिनीम्  आनिनीय कपटाद् रहः क्षणम् ॥ ८१७८॥

ENMSS@8179@1एहि विश्वात्मने वत्से भिक्षा त्वं परिकल्पिता ।

ENMSS@8179@2अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ॥ ८१७९॥

ENMSS@8180@1एहि हे रमणि पश्य कौतुकं  धूलिधूसरतनुं दिगम्बरम् ।

ENMSS@8180@2सापि तद्वदनपङ्कजं पपौ  भ्रातरुक्तमपि किं न बुध्यते ॥ ८१८०॥

ENMSS@8181@1एह्यागच्छ समाविशासनमिदं कस्माच्चिराद् दृश्यसे  का वार्त्तेति सुदुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात् ।

ENMSS@8181@2एवं ये समुपागतान् प्रणयिनः प्रत्यालपन्त्यादरात्  तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा ॥ ८१८१॥

ENMSS@8182@1एह्यालिङ्ग त्वरयति मनो दुर्बला वासरश्रीर् आश्लिष्टासि क्षपय रजनीमेकिका

चक्रवाकि ।

ENMSS@8182@2नान्यासक्तो न खलु कुपितो नानुरागच्युतो वा  दैवाधीनः सपदि भवतीमस्वतन्त्रस्त्यजामि ॥ ८१८२॥

ENMSS@8183@1एह्येहि क्व गतासि मैथिलि मृगः प्राप्तो मया काञ्चनीम्  एतस्य

त्वचमुच्चरामि कुचयोर्विन्यस्य वर्णांशुकम् ।
ENMSS@8183@2मत्सौभाग्यबुभुत्सयापि विपिनेष्वेकाकिनी मा स्म भूर् विद्विष्टा मयि संचरन्ति सरले मायाविनो राक्षसाः ॥ ८१८३॥
ENMSS@8184@1एह्येहि वत्स रघुनन्दन रामभद्र  चुम्बामि मूर्धनि चिराय परिष्वजे त्वाम् ।
ENMSS@8184@2आरोप्य वा हृदि दिवानिशमुद्वहामि  वन्देऽथवा चरणपुष्करकद्वयं ते ॥ ८१८४॥
ENMSS@8185@1एह्येहीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः  प्रोड्डीयेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः ।
ENMSS@8185@2हंसैरुज्झितपङ्कजैरतितरां सोद्वेगमुद्वीक्षितः  कुर्वन्नञ्जनमेचका इव दिशो मेघः समुत्तिष्ठति ॥ ८१८५॥
ENMSS@8186@1ऐकगुण्यमनीहायाम् अभावः कर्मणां फलम् ।
ENMSS@8186@2अथ द्वैगुण्यमीहायां फलं भवति वा न वा ॥ ८१८६॥
ENMSS@8187@1ऐकमत्यमुपागम्य शास्त्रदृष्टेन चक्षुषा ।
ENMSS@8187@2मन्त्रिणो यत्र निरतास्तमाहुर्मन्त्रमुत्तमम् ॥ ८१८७॥
ENMSS@8188@1बह्व्योऽपि मतयो गत्वा मन्त्रिणामर्थनिर्णये ।
ENMSS@8188@2पुनर्यत्रैकतां प्राप्तः स मन्त्रो मध्यमः स्मृतः ॥ ८१८८॥
ENMSS@8189@1अन्योऽन्यं मतिमास्थाय यत्र संप्रतिभाष्यते ।
ENMSS@8189@2न चैकमत्ये श्रेयोऽस्ति मन्त्रः सोऽधम उच्यते ॥ ८१८९॥
ENMSS@8190@1ऐणं चर्म पलाशवेश्म पुरतो दृष्ट्वैव कृष्णाजिनं  भिक्षार्थी क्षुधितस्तपोवनधिया किं धार्मिक भ्राम्यसि ।
ENMSS@8190@2एनां भिल्लपुरीमवैहि सुरभीश्रृङ्गेण यत्र स्थितैः  पीयन्ते वनवह्निदग्धमहिषीमांसोपदंशं सुराः ॥ ८१९०॥
ENMSS@8191@1ऐन्दवादर्चिषः कामी शिशिरं हव्यवाहनम् ।
ENMSS@8191@2अबलाविरहक्लेशविह्वलो गणयत्ययम् ॥ ८१९१॥
ENMSS@8192@1ऐन्दवी वहति नाडिका यदा  स्वेच्छया प्रविशति प्रभञ्जनः ।
ENMSS@8192@2पोतकी व्रजति दक्षिणा यदा  स्यात् तदा सकलमीप्सितं फलम् ॥ ८१९२॥
ENMSS@8193@1ऐन्द्रं धनुः पाण्डुपयोधरेण  शरद् दधानार्द्रनखक्षताभम् ।
ENMSS@8193@2प्रसादयन्ती सकलङ्कमिन्दुं  तापं रवेरप्यधिकं चकार ॥ ८१९३॥
ENMSS@8194@1ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ।

ENMSS@8194@2प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥ ८१९४॥
ENMSS@8195@1ऐन्द्र्यां दिगवलोकित- सूर्याभिमुखो गृहे गृहिणः ।
ENMSS@8195@2राजभयं चौरभयं वधकलहः पशुभयं च स्यात् ॥ ८१९५॥
ENMSS@8196@1ऐरावणन्ति करिणः फणिनोऽप्यशेषाः शेषन्ति हन्त विहगा अपि हंसितारः ।
ENMSS@8196@2नीलोत्पलानि कुमुदन्ति च सर्वशैलाः कैलासितुं व्यवसिता भवतो यशोभिः ॥ ८१९६॥
ENMSS@8197@1ऐरावणाननमदाम्बुकणावपात- संसक्ततामरसरेणुपिशङ्गिताङ्गः ।
ENMSS@8197@2चण्डानिलाहततुषारविशीर्णपक्षः क्षीणः क्षितौ मधुकरो विवशोऽत्र शेते ॥ ८१९७॥
ENMSS@8198@1ऐरावणे सुरवधूपरिगीयमान- युष्मद्यशःश्रवणनिश्चलकर्णताले ।
ENMSS@8198@2निर्विघ्नमापिबति भृङ्गकुलं मदाम्भः कल्याणमावहति कस्य न चेष्टितं ते ॥ ८१९८॥
ENMSS@8199@1ऐशान्यां पतनं दुष्टं विदिशोऽन्याश्च शोभनाः ।
ENMSS@8199@2हर्षपुष्टिकराश्चैव सिद्धिदाः शस्त्रकर्मणि ॥ ८१९९॥
ENMSS@8200@1ऐशान्यां संप्राप्तिर् घृतपूर्णानां भवेदनडुहश्च ।
ENMSS@8200@2एवं फलं गृहपतेर् गृहपृष्ठसमाश्रिते भवति ॥ ८२००॥
ENMSS@8201@1ऐश्वर्यं नहुषस्य शंभुविषयश्रद्धा दशास्यस्य सा शौर्यं श्रीरघुनायकस्य सहजं गाम्भीर्यमम्भोनिधेः ।
ENMSS@8201@2दातृत्वं बलिकर्णयोरिह जगत्येकत्र चेत् स्यात् तदा श्रीवीरक्षितिपालमौलिनृपतेः साम्यं कथंचिद् भवेत् ॥ ८२०१॥
ENMSS@8202@1ऐश्वर्यतिमिरं चक्षुः पश्यन्नापि न पश्यति ।
ENMSS@8202@2पश्चाद् विमलतां याति दारिद्र्यगुलिकाञ्जनैः ॥ ८२०२॥
ENMSS@8203@1ऐश्वर्यधनरत्नानां प्रत्यमित्रेऽपि तिष्ठताम् ।
ENMSS@8203@2दृष्टा हि पुनरावृत्तिर्जीवतामिति नः श्रुतम् ॥ ८२०३॥
ENMSS@8204@1ऐश्वर्यमत्तः पापिष्ठो मधुपानमदादपि ।
ENMSS@8204@2ऐश्वर्यमदमत्तानां गतिरूर्ध्वा न विद्यते ॥ ८२०४॥
ENMSS@8205@1ऐश्वर्यमदपापिष्ठा मदाः पानमदादयः ।
ENMSS@8205@2एश्वर्यमदमत्तो हि नापतित्वा विबुध्यते ॥ ८२०५॥
ENMSS@8206@1ऐश्वर्यमदमत्तांश्च मत्तान् मद्यमदेन च ।
ENMSS@8206@2अप्रमत्ताः शठाः शूरा विक्रान्ताः पर्युपासते ॥ ८२०६॥

ENMSS@8207@1ऐश्वर्यमदमत्तानां क्षुधितानां च कामिनाम् ।
ENMSS@8207@2अहंकारविमूढानां विवेको नैव जायते ॥ ८२०७॥
ENMSS@8208@1ऐश्वर्यमध्रुवं प्राप्य ध्रुवधर्मे मतिं कुरु ।
ENMSS@8208@2क्षणादेव विनाशिन्यः सम्पदोऽप्यात्मना सह ॥ ८२०८॥
ENMSS@8209@1ऐश्वर्यमल्पमेत्य  प्रायेण हि दुर्जनो भवति मानी ।
ENMSS@8209@2सुमहत्प्राप्यैश्वर्यं  प्रशमं प्रतिपद्यते सुजनः ॥ ८२०९॥
ENMSS@8209A@1ऐश्वर्यमव्याहतमावहन्तु  हेरम्बपादाम्बुजपांसवो नः ।
ENMSS@8209A@2ये निर्वहन्ति श्रुतिसुन्दरीणां  सीमन्तसिन्दूरपरागलक्ष्मीम् ॥
ENMSS@8210@1ऐश्वर्यमीर्ष्या नैर्घृण्यं क्षीबत्वं निर्विवेकता ।
ENMSS@8210@2एकैकं किं न यत् कुर्यात् पञ्चाङ्गित्वे तु का कथा ॥ ८२१०॥
ENMSS@8211@1ऐश्वर्यवन्तोऽपि हि निर्धनास्ते  व्यर्थश्रमा जीवितमात्रसाराः ।
ENMSS@8211@2कृता न लोभोपहतात्मभिर्यैः  सुहृत्स्वयंग्राहविभूषणा श्रीः
॥ ८२११॥
ENMSS@8212@1ऐश्वर्यस्य परा काष्ठा यत्र नित्यं विभाव्यते ।
ENMSS@8212@2धनदः स न केषां स्यात् स्पृहणीयगुणोदयः ॥ ८२१२॥
ENMSS@8213@1ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो  ज्ञानस्योपशमः
शमस्य विनयो वित्तस्य पात्रे व्ययः ।
ENMSS@8213@2अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता  सर्वेषामपि
सर्वकारणमिदं शीलं परं भूषणम् ॥ ८२१३॥
ENMSS@8214@1ऐश्वर्यात् सह संबन्धं न कुर्याच्च कदाचन ।
ENMSS@8214@2गते च गौरवं नास्ति आगते च धनक्षयः ॥ ८२१४॥
ENMSS@8215@1ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते  तं गच्छन्त्यनु
ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया ।
ENMSS@8215@2भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया  भक्त्या कार्यधुरं
वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः ॥ ८२१५॥
ENMSS@8216@1ऐश्वर्येऽपि क्षमा यस्य दारिद्र्येऽपि हितैषिता ।
ENMSS@8216@2आपत्तावपि धीरत्वं दधतो मर्त्यता कथम् ॥ ८२१६॥
ENMSS@8217@1ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ।
ENMSS@8217@2रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥ ८२१७॥
ENMSS@8218@1ऐहलौकिकपारत्र्यं कर्म पुंभिर्निषेव्यते ।
ENMSS@8218@2कर्माण्यपि तु कल्याणि लभते काममास्थितः ॥ ८२१८॥

ENMSS@8219@1ऐहलौकिकमीहन्ते मांसशोणितवर्धनम् ।
ENMSS@8219@2पारलौकिककार्येषु प्रसुप्ताभृशनास्तिकाः ॥ ८२१९॥
ENMSS@8220@1ऐहिकामुष्मिकान् कामांल्लोभमोहात्मकांश्च यान् ।
ENMSS@8220@2निरुध्यास्ते सदा योगी प्राप्तिः स्यात् सार्वकामिकी ॥ ८२२०॥
ENMSS@8221@1ओंकारः पुरुषः पूर्वः व्याहृतिः प्रकृतिः स्त्रियः ।
ENMSS@8221@2उभयोः करसंयोगे वस्त्रेणाच्छादयेन् नरः ॥ ८२२१॥
ENMSS@8222@1ओंकारशब्दो विप्राणां यस्य राष्ट्रे प्रवर्तते ।
ENMSS@8222@2स राजा हि भवेद् योगी व्याधिभिश्च न पीड्यते ॥ ८२२२॥
ENMSS@8223@1ओंकाराः कुसुमायुधोपनिषदां मन्त्रानुवादः स्मर- स्वाध्यायस्य रतेः पुनर्भवविधौ गन्धाभिरामश्रुतिः ।
ENMSS@8223@2चित्ताकर्षणसाध्यसिद्धिरसतीनेत्रस्य कर्णज्वरः पान्थानां सहकारकाननसुधासेकः पिकानां ध्वनिः ॥ ८२२३॥
ENMSS@8224@1ओंकारे सत्प्रदीपे मृगय गृहपतिं सूक्ष्ममेकान्तरस्थं संयम्य द्वारवाहं पवनमविरतं नायकं चेन्द्रियाणाम् ।
ENMSS@8224@2वाग्जालं कस्य हेतोर्वितरसि हि गिरां दृश्यते नैव किंचिद् देहस्थं पश्य नाथं भ्रमसि किमपरे शास्त्रमोहान्धकारे ॥ ८२२४॥
ENMSS@8225@1ओंकारो मदनद्विजस्य गगनक्रोडैकदंष्ट्राङ्कुरस् तारामौक्तिकशुक्तिरन्धतमसस्तम्बेरमस्याङ्कुशः ।
ENMSS@8225@2शृङ्गारार्गलकुञ्चिका विरहिणीमानच्छिदा कर्तरी संध्यावारवधूनखक्षतिरियं चान्द्री कला राजते ॥ ८२२५॥
ENMSS@8226@1ओंकारो यस्य कन्दः सलिलमुपनिषन् न्यायजालं मृणालं ब्रह्माण्डं यस्य काण्डं प्रसरति परितो यस्य यागः परागः ।
ENMSS@8226@2भृङ्गध्वानः पुराणं विजनसुरधुनीतीरवासोऽधिवासो यस्यानन्दो मरन्दः पुरहरचरणाम्भोरुहं तद् भजामः ॥ ८२२६॥
ENMSS@8227@1ओं नमः परमार्थैकरूपाय परमात्मने ।
ENMSS@8227@2स्वेच्छावभासितासत्यभेदभिन्नाय शंभवे ॥ ८२२७॥
ENMSS@8228@1ओं ह्रौं शिखास्थाने शंकराय नमः ।
ENMSS@8228@2ओं ह्रौं बाह्वोः केशवाय नमः ।
ENMSS@8228@2ओं ह्रौं नाभिमध्ये ब्रह्मणे नमः ।
ENMSS@8228-3ओं ह्रौं जङ्घयोर्गणपतये नमः ।
ENMSS@8229@1ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।

ENMSS@8229@2क्षेत्रिकस्यैव तद् बीजं न बीजी लभते फलम् ॥ ८२२९॥

ENMSS@8230@1ओजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः ।

ENMSS@8230@2यद् विभुः शशिमयूखसखः सन्न् आददे विजयि चापमनङ्गः ॥ ८२३०॥

ENMSS@8231@1ओजोभाजां यद् रणे संस्थितानाम् आदत् तीव्रं सार्धमङ्गेन नूनम् ।

ENMSS@8231@2ज्वालाव्याजादुद्वमन्ती तदन्तस्- तेजस्तारं दीप्तजिह्वा ववाशे ॥ ८२३१॥

ENMSS@8232@1ओमित्येतत्परं ब्रह्म श्रुतीनां मुखमक्षरम् ।

ENMSS@8232@2प्रसीदतु सतां स्वान्तेष्वेकं त्रिपुरुषीमयम् ॥ ८२३२॥

ENMSS@8233@1ओषामासे मत्सरोत्पातवाता- श्लिष्यद्दन्तक्ष्मारुहां घर्षणोत्थैः ।

ENMSS@8233@2यौगान्तैर्वा वह्निभिर्वारणानाम् उच्चैर्मूर्धव्योम्नि नक्षत्रमाला ॥ ८२३३॥

ENMSS@8234@1ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानाम् ।

ENMSS@8234@2फुल्ललोचनविनीलसरोजैर् अङ्गनास्यचषकैर्मधुवारः ॥ ८२३४॥

ENMSS@8235@1ओष्ठाग्रं स्फुरतीक्षणे विचलतः कूपोदरे मत्स्यवद् धम्मिल्लः कुसुमाश्रितो विगलितः प्राप्नोति बन्धं पुनः ।

ENMSS@8235@2प्रच्छन्नौ व्रजतः स्तनौ प्रकटतां श्रोणीतटं दृश्यते नीवी च स्खलति स्थितापि सुदृढं कामेङ्गितं योषिताम् ॥ ८२३५॥

ENMSS@8236@1सौभाग्यरूपपरिहासगुणानुराग- संकीर्तनेन दयितस्य च लब्धसौख्यम् ।

ENMSS@8236@2संबन्धिमित्रमुखदर्शनदत्तदूर- तोषं परोक्षमपि कामगुणेङ्गितं स्यात् ॥ ८२३६॥

ENMSS@8237@1ओष्ठे बिम्बफलाशयालमलकेषूत्पाकजम्बूधिया कर्णालंकृतिभाजि दाडिमफलभ्रान्त्या च शोणे मणौ ।

ENMSS@8237@2निष्पत्त्या सकृदुत्पलच्छददृशामात्तक्लमानां मरौ राजन् गूर्जरराजपञ्जरशुकैः सद्यस्तृषा मूर्च्छितम् ॥ ८२३७॥

ENMSS@8238@1औचित्यं स्तुत्यानां गुणरागश्चन्दनादिलेपानाम् ।

ENMSS@8238@2कन्या शोककराणां बुद्धिविहीनोऽनुकम्प्यानाम् ॥ ८२३८॥

ENMSS@8239@1औचित्यप्रच्युताचारो युक्त्या स्वार्थं न साधयेत् ।

ENMSS@8239@2व्याजबालिवधेनैव रामकीर्तिः कलङ्किता ॥ ८२३९॥

ENMSS@8240@1औचित्यमेकमेकत्र गुणानां राशिरेकतः ।

ENMSS@8240@2विषायते गुणग्राम औचित्यपरिवर्जितः ॥ ८२४०॥

ENMSS@8241@1औज्झि प्रियाङ्गैर्घृणयैव रूक्षा  न वारिदुर्गात् तु वराटकस्य ।
ENMSS@8241@2न कण्टकैरावरणाच्च कान्तिर् धूलीभृता काञ्चनकेतकस्य ॥ ८२४१॥
ENMSS@8242@1औत्सुक्यगर्भा भ्रमतीव दृष्टिः  पर्याकुलं क्वापि मनः प्रयाति ।
ENMSS@8242@2वियुज्यमानस्य गुणान्वितेन  निरन्तरप्रेमवता जनेन ॥ ८२४२॥
ENMSS@8243@1औत्सुक्यमात्रमवसादयति प्रतिष्ठा  क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
ENMSS@8243@2नातिश्रमापनयनाय यथा श्रमाय  राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ ८२४३॥
ENMSS@8244@1औत्सुक्यहेतुं विवृणोषि न त्वं  तत्त्वावबोधैकरसो न तर्कः ।
ENMSS@8244@2तथापि रम्भोरु करोमि लक्ष्यम्  आत्मानमेषां परिदेवितानाम् ॥ ८२४४॥
ENMSS@8245@1औत्सुक्यात् परिमिलतां  त्रपया संकोचमञ्चतां च मुहुः ।
ENMSS@8245@2नवसंगमयोर्यूनोर् नयनानामुत्सवो जयति ॥ ८२४५॥
ENMSS@8246@1औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया  तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
ENMSS@8246@2दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे  संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ॥ ८२४६॥
ENMSS@8247@1औदार्यं दाक्षिण्यं  पापजुगुप्सा च निर्मलो बोधः ।
ENMSS@8247@2लिङ्गानि धर्मसिद्धेः  प्रायेण जनप्रियत्वं च ॥ ८२४७॥
ENMSS@8248@1औदार्यं भुवनत्रयेऽपि विदितं संभूतिरम्भोनिधेर् वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ।
ENMSS@8248@2एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥ ८२४८॥
ENMSS@8249@1औदार्यं सधने नयो गुणिजने लज्ञा कुलस्त्रीजने  सत्काव्यं वदने मदो
द्विरदने पुंस्कोकिलः कानने ।
ENMSS@8249@2रोलम्बः कमले नखाङ्करचना कान्ताकपोलस्थले  तन्वी तल्पतले भवानपि
विभो भूमण्डले मण्डनम् ॥ ८२४९॥
ENMSS@8250@1औदासीन्यं दयालूनाम् अर्थिनां भाग्यहीनता ।
ENMSS@8250@2नहि स्वमुखवैरूप्यं दर्पणस्यापराधतः ॥ ८२५०॥
ENMSS@8251@1औदुम्बराणि पुष्पाणि श्वेतवर्णं च वायसम् ।

ENMSS@8251@2मत्स्यपादं जले पश्येन् न नारीहृदयस्थितम् ॥ ८२५१॥
ENMSS@8252@1औन्नत्यं भवतः सुमेरुशिखरोच्छ्रायोपमां गाहते व्याप्तिस्ते गिरिराजमूलमहिमन्यायेन निर्णीयते ।
ENMSS@8252@2एकस्यापि न किंतु चातकशिशोः पूर्त्यै पयो वर्तते वन्ध्यापीनपयोधरोपमतया बुद्धोऽसि पाथोधर ॥ ८२५२॥
ENMSS@8253@1औरसं मैत्रसंबद्धं तथा वंशक्रमागतम् ।
ENMSS@8253@2रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥ ८२५३॥
ENMSS@8254@1औरसानपि पुत्रान् हि त्यजन्त्यहितकारिणः ।
ENMSS@8254@2समर्थान् संप्रगृह्णन्ति जनानपि नराधिपाः ॥ ८२५४॥
ENMSS@8255@1औरसीं भगिनीं वापि भार्यां वाप्यनुजस्य यः ।
ENMSS@8255@2प्रचरेत नरः कामात् तस्य दण्डो वधः स्मृतः ॥ ८२५५॥
ENMSS@8256@1और्वा इवातिलुब्धा भवन्ति धनलवणवारिबहुतृष्णाः ।
ENMSS@8256@2तृणलवमिव निजदेहं त्यजन्ति लेशं न वित्तस्य ॥ ८२५६॥
ENMSS@8257@1औषधं मूढवैद्यानां त्यजन्तु ज्वरपीडिताः ।
ENMSS@8257@2परसंसर्गसंसक्तं कलत्रमिव साधवः ॥ ८२५७॥
ENMSS@8258@1औषधानां च मन्त्राणां बुद्धेश्चैव महात्मनाम् ।
ENMSS@8258@2असाध्यं नास्ति लोकेऽत्र किंचिद् ब्रह्माण्डमध्यगम् ॥ ८२५८॥
ENMSS@8259@1औषधानि च मन्त्राणि नक्षत्रं शकुनं ग्रहाः ।
ENMSS@8259@2भाग्यकाले प्रसन्नाः स्युरभाग्ये निष्फलाश्च ते ॥ ८२५९॥
ENMSS@8260@1औषधान्यगदो विद्या दैवी च विविधा स्थितिः ।
ENMSS@8260@2तपसैव प्रसिध्यन्ति तपस्तेषां हि साधनम् ॥ ८२६०॥
ENMSS@8261@1औषधायापि यो मर्त्यो मध्वस्यति विचेतनः ।
ENMSS@8261@2कुयोनौ जायते सोऽपि किं पुनस्तत्र लोलुपः ॥ ८२६१॥
ENMSS@8262@1औषसातपभयादपलीनं वासरच्छविविरामपटीयः ।
ENMSS@8262@2संनिपत्य शनकैरथ निम्नाद् अन्धकारमुदवाप समानि ॥ ८२६२॥
ENMSS@8263@1औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम् ।
ENMSS@8263@2धारयन्ति महात्मानो राजानः प्रायशो भुवि ॥ ८२६३॥
ENMSS@8263@3तस्मात् सर्वास्ववस्थासु मान्याः पूज्याश्च पार्थिवाः ॥ ८२६३॥
ENMSS@8264@1औष्मायमाणनवयौवनमुग्धभावाः श्रृङ्गारसागरमनोज्ञतरङ्गलेखाः ।
ENMSS@8264@2कन्दर्पकेलिरसलब्धयशःपताकाः पण्याङ्गनाः पुरमिमामधिवासयन्ति ॥ ८२६४॥

ENMSS@8265@1कंचन वञ्चनचतुरे  प्रपञ्चय त्वं मुरान्तके मानम् ।
ENMSS@8265@2बहुवल्लभे हि पुरुषे  दाक्षिण्यं दुःखमुद्वहति ॥ ८२६५॥
ENMSS@8266@1कंचित् कालं नय गिरिगुहागह्वरे रे मुधैव  क्रीडन् हालाहलरसलसद्दर्प मा सर्प ! सर्प ।
ENMSS@8266@2माद्यन्नुद्यत्सजलजलदव्याकुले मेघकाले  येन प्राप्तो वनविहरणोत्कण्ठया नीलकण्ठः ॥ ८२६६॥
ENMSS@8267@1कंचित् क्षणं ननु सहस्व विमुञ्च वासो  जागर्त्ययं परिजनो धिगपत्रपोऽसि ।
ENMSS@8267@2एषोऽञ्जलिः शमय दीपमिति प्रियाया  वाचो रतादपि परां मुदमावहन्ति ॥ ८२६७॥
ENMSS@8268@1कंचिदेव समयं समागतं  त्वां न विस्मरति शश्वदम्बुजम् ।
ENMSS@8268@2मानसे विहर हंस मानसे  मा विमुञ्च पुनरस्य सौहृदम् ॥ ८२६८॥
ENMSS@8269@1कंजानना कम्जपरागपुञ्ज-  गुञ्जन्मिलिन्दावलिकुन्तलश्रीः ।
ENMSS@8269@2विद्वद्द्विजाक्रान्तमुखान्तराला  ज्योतिर्विदार्या तटिनीव भाति ॥ ८२६९॥
ENMSS@8270@1कं न स्पृशन्ति पुरुषं व्यसनानि काले  को वा निरन्तरसुखी य इहास्ति
लोके ।
ENMSS@8270@2दुःखं सुखं च परिणामवशादुपैति  नक्षत्रचक्रमिव खे परिवर्तमानम् ॥ ८२७०॥
ENMSS@8271@1कं पृच्छामः सुराः स्वर्गे निवसामो वयं भुवि ।
ENMSS@8271@2किं वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा ॥ ८२७१॥
ENMSS@8272@1कं प्रति कथयितुमीशे  संप्रति को वा प्रतीतिमायातु ।
ENMSS@8272@2गोपतितनयाकुञ्जे  गोपवधूटीविटं ब्रह्म ॥ ८२७२॥
ENMSS@8273@1कं योजयन् मनुजोऽर्थं लभेत  निपातयन् नष्टदृशं हि गर्ते ।
ENMSS@8273@2एवं नराणां विषयस्पृहा च  निपातयन् निरये त्वन्धकूपे ॥ ८२७३॥
ENMSS@8274@1कं विशेषमवलम्ब्य योषितः  प्रेयसे भजसि वर्चसे भुवम् ।
ENMSS@8274@2त्यागहेतुरपि तुल्य एव ते  सापि सापि मलमोचनस्थली ॥ ८२७४॥
ENMSS@8275@1कं संजघान कृष्णः  का शीतलवाहिनी गङ्गा ।
ENMSS@8275@2के दारपोषणरताः  कं बलवन्तं न बाधते शीतम् ॥ ८२७५॥
ENMSS@8276@1कंसं ध्वंसयते मुरं तिरयते हंसं तथा हिंसते  बाणं क्षीणयते बकं लघयते पौण्ड्रं तथा लुम्पते ।

ENMSS@8276@2भौमं क्षामयते बलाद् बलभिदो दर्पं पराकुर्वते क्लिष्टं शिष्टगणं प्रणम्रमवते कृष्णाय तुभ्यं नमः ॥ ८२७६॥

ENMSS@8277@1कंसारातेर्वद गमनं केन स्यात् कस्मिन् दृष्टिं संलभते स्वल्पेच्छुः ।

ENMSS@8277@2कं सर्वेषां शुभकरमूचुर्धीराः किं कुर्यास्त्वं सुजन सशोकं लोकम् ॥ ८२७७॥

ENMSS@8278@1कंसारिचरणोद्भूतसिन्धुकल्लोललालितम् ।

ENMSS@8278@2मन्ये हंस मनो नीरे कुल्यानां रमते कथम् ॥ ८२७८॥

ENMSS@8279@1कंसो रावणो रामश्च राजा दुर्योधनस्तथा ।

ENMSS@8279@2चत्वारोऽपि महामूर्खाः पञ्चमः शालिवाहनः ॥ ८२७९॥

ENMSS@8280@1कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति ।

ENMSS@8280@2एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च ॥ ८२८०॥

ENMSS@8281@1कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत् सूकरः कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः ।

ENMSS@8281@2के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ॥ ८२८१॥

ENMSS@8282@1कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च ।

ENMSS@8282@2माधुर्यमिक्षौ कटुतां च निम्बे स्वभावतः सर्वमिदं हि सिद्धम् ॥ ८२८२॥

ENMSS@8283@1कः कर्णारिपिता गिरीन्द्रतनया कस्य प्रिया कस्य तुक् को जानाति परेङ्गितं

विषमगुः कुत्रोदभूत् कामिनाम् ।

ENMSS@8283@2भार्या कस्य विदेहजा तुदति का भौमेऽह्नि निन्द्यश्च कस्

तत्प्रत्युत्तरमध्यमाक्षरपदं सर्वार्थसंपत्करम् ॥ ८२८३॥

ENMSS@8284@1कः कस्य पुरुषो बन्धुः किमाप्यं कस्य केनचित् ।

ENMSS@8284@2यदेको जायते जन्तुरेक एव विनश्यति ॥ ८२८४॥

ENMSS@8285@1तस्मान् माता पिता चेति राम सज्जेत यो नरः ।

ENMSS@8285@2उन्मत्त इव स ज्ञेयो नास्ति कश्चिद्धि कस्यचित् ॥ ८२८५॥

ENMSS@8286@1कः कान्तारमगात् पितुर्वचनतः संश्लिष्य कण्ठस्थलीं कामी किं कुरुते च गृध्रहठतश्छिन्नं प्ररूढं च किम् ।

ENMSS@8286@2का रक्षः कुलकालरात्रिरभवच्चन्द्रातपं द्वेष्टि को रामश्चुम्बति

रावणस्य वदनं सीतावियोगातुरः ॥ ८२८६॥

ENMSS@8287@1कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।

ENMSS@8287@2कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥ ८२८७॥

ENMSS@8288@1कः कुर्याद् भुवनं सर्वं कः समुन्मूलयेद् द्रुमान् ।

ENMSS@8288@2किं प्रतीके भवेन् मुख्यं कः परत्रैति पुण्यताम् ॥ ८२८८॥

ENMSS@8289@1कः कोपः कः प्रणयो  नटविटहतमस्तकासु वेश्यासु ।

ENMSS@8289@2रजकशिलातलसदृशं  यासां जघनं च वदनं च ॥ ८२८९॥

ENMSS@8290@1कः कौ के कं कौ कान्  हसति च हसतो हसन्ति हरिणाक्ष्या ।

ENMSS@8290@2अधरः पल्लवमङ्गी  हंसौ कुन्दस्य कोरकान् दन्ताः ॥ ८२९०॥

ENMSS@8291@1कः खे गच्छति का रम्या का जप्या किं विभूषणम् ।

ENMSS@8291@2को वन्द्यः कीदृशी लङ्का वीरमर्कटकम्पिता ॥ ८२९१॥

ENMSS@8292@1कः खे चरति कः शब्दं चोरं दृष्ट्वा करोति च ।

ENMSS@8292@2कैरवाणामरिः को वा कोपानामालयश्च कः ॥ ८२९२॥

ENMSS@8293@1कः खे भाति, हतो निशाचरपतिः केनाम्बुधौ मज्जति  कः, कीदृक् तरुणीविलासगमनं, को नाम राज्ञां प्रियः ।

ENMSS@8293@2पत्रं किं नृपतेः, किमप्सु ललितं, को रामरामाहरो

मत्प्रश्नोत्तरमध्यमाक्षरपदं यत् तत् तवाशीर्वचः ॥ ८२९३॥

ENMSS@8294@1कः परेतनगरीपुरंदरः  को भवेदथ तदीयकिंकरः ।

ENMSS@8294@2कृष्णनाम जगदेकमङ्गलं  कण्ठपीठमुररीकरोति चेत् ॥ ८२९४॥

ENMSS@8295@1कः पश्यति खुरमहसः  संमुखमपि तेजसां सहस्रस्य ।

ENMSS@8295@2कलितं शशभृद्धाम्नो  यो मण्डलखण्डनं सहते ॥ ८२९५॥

ENMSS@8296@1कः पुष्पजातिं सुरभिं विधत्ते  कश्चन्दनं वै शिशिरीकरोति ।

ENMSS@8296@2कः प्रार्थयेद् भानुमिह प्रकाशे  साधुस्तथा स्वेन परोपकारी ॥ ८२९६॥

ENMSS@8297@1कः पूज्यः सद्वृत्तः  कमधममाचक्षते चलितवृत्तम् ।

ENMSS@8297@2केन जितं जगदेतत्  सत्यतितिक्षावता पुंसा ॥ ८२९७॥

ENMSS@8298@1कः पूज्यः, सुजनत्वमेति कतमः, क्व स्थीयते पण्डितैः  श्रीमत्या शिवया

च केन भुवने युद्धं कृतं दारुणम् ।

ENMSS@8298@2किं वाञ्छन्ति सदा जना, युवजना ध्यायन्ति किं मानसे

मत्प्रश्नोत्तरमध्यमाक्षरपदं भूयात् तवाशीर्वचः ॥ ८२९८॥

ENMSS@8298A@1कः पौरवे वसुमतीं शासति  शासितरि दुर्विनीतानाम् ।

ENMSS@8298A@2अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥

ENMSS@8299@1कः प्रसूते पूरोवातं कः प्रेरयति वारिदम् ।

ENMSS@8299@2प्राप्ते तु श्रावणे मासि भवत्येकार्णवं जगत् ॥ ८२९९॥

ENMSS@8300@1कः प्राज्ञो वाञ्छति स्नेहं वेश्यासु सिकतासु च ।

ENMSS@8300@2विमुच्यते वा भवता वस्तुधर्मोऽयमीदृशः ॥ ८३००॥

ENMSS@8301@1कः प्रार्थितोऽपि दास्यति तृणतुषपरिमाणमात्रमप्यधिकम् ।

ENMSS@8301@2अन्तर्ललाटसंपुट- विकटाक्षरमालिकां मुक्त्वा ॥ ८३०१॥

ENMSS@8302@1कः प्रार्थ्यते मदनविह्वलया युवत्या भाति क्व पुण्ड्रकमुपैति कथं बतायुः ।

ENMSS@8302@2क्वानादरो भवति, केन च राजतेऽब्जं बाह्यास्थि किं फलमुदाहर नालिकेरम् ॥ ८३०२॥

ENMSS@8303@1कः शक्रः कतमः स्रष्टा वराकः कतमो यमः ।

ENMSS@8303@2सत्यव्रतानां भूपानां कर्तुं शासनलङ्घनम् ॥ ८३०३॥

ENMSS@8304@1कः शमः क्रियतां प्राज्ञाः प्रियाप्रीतौ परिश्रमः ।

ENMSS@8304@2भस्मीभूतस्य भूतस्य पुनरागमनं कुतः ॥ ८३०४॥

ENMSS@8305@1कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।

ENMSS@8305@2शङ्कनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता ॥ ८३०५॥

ENMSS@8306@1कः श्लाघनीयजन्मा माघनिशीथेऽपि यस्य सौभाग्यम् ।

ENMSS@8306@2प्रालेयानिलदीर्घः कथयति काञ्चीनिनादोऽयम् ॥ ८३०६॥

ENMSS@8307@1कः स्यादम्बुदयाचको, युवतयः कं कामयन्ते पतिं लज्जा केन निवार्यते,

निकटके दासे कथं यावनी ।

ENMSS@8307@2भाषा दर्शयतेति वस्तुषु महाराष्ट्रे कदा वा भवेद् आद्यान्ताक्षरयोर्हि लोपरचनाचातुर्यतः पूर्यताम् ॥ ८३०७॥

ENMSS@8308@1कः स्वभावगभीराणां लक्षयेद् बहिरापदम् ।

ENMSS@8308@2बालापत्येन भृत्येन यदि सा न प्रकाश्यते ॥ ८३०८॥

ENMSS@8309@1क आत्मा कः परो वात्र स्वीयः पारक्य एव वा ।

ENMSS@8309@2स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम् ॥ ८३०९॥

ENMSS@8310@1क आलिप्तः प्रियः कोऽस्याः कं ध्यायति कमीक्षते ।

ENMSS@8310@2इति चिन्ता न यस्यासीत् स पूज्यः पण्ययोषिताम् ॥ ८३१०॥

ENMSS@8311@1॥। ॥।

ENMSS@8311@2क ईप्सितार्थस्थिरनिश्चयं मनः

ENMSS@8311@3पयश्च निम्नाभिमुखं प्रतीपयेत् ॥ ८३११॥

ENMSS@8312@1क एकस्त्वं पुष्पायुध मम समाधिव्ययविधौ सुपर्वाणः सर्वे यदि कुसुमशस्त्रास्तदपि किम् ।

ENMSS@8312@2इतीवैनान् नूनं य इह सुमनोस्त्रत्वमनयत् स वः शास्ता शस्त्रं दिशतु

दशदिङ्गारविजयी ॥ ८३१२॥

ENMSS@8313@1ककुभकरीरावेक- त्र संयुतौ ककुभबिल्वौ वा ।

ENMSS@8313@2हस्तत्रयेऽम्बु पश्चान् नरैर्भवत्येकविंशत्या ॥ ८३१३॥

ENMSS@8314@1ककुभस्य फलं पुष्पं लाक्षा श्रीवासगुग्गुलू ।

ENMSS@8314@2श्वेतापराजितामूलं विडङ्गान्वितसर्षपाः ॥ ८३१४॥

ENMSS@8315@1ककुभां मुखानि सहसोज्ज्वलयन् दधदाकुलत्वमधिकं रतये ।

ENMSS@8315@2अदिदीपदिन्दुरपरो दहनः कुसुमेषुमत्रिनयनप्रभवः ॥ ८३१५॥

ENMSS@8316@1ककुभि ककुभि ध्वान्तक्षुब्धं वितत्य विधाय च श्रुतिपुटभिदो गर्जाः श्रेयः कृतं परमम्बुदैः ।

ENMSS@8316@2कथमितरथा जातोद्वेगः समुज्झितपल्वलः कनककमलोत्तंसे हंसः स नन्दति मानसे ॥ ८३१६॥

ENMSS@8317@1ककुभि ककुभि भ्रान्त्वा भ्रान्त्वा विलोक्य विलोकितं मलयजसमो दृष्टोऽस्माभिर्न कोऽपि महीरुहः ।

ENMSS@8317@2उपचितरसो दाहे च्छेदे शिलातलघर्षणे- ऽप्यधिकमधिकं यत् सौरभ्यं तनोति मनोहरम् ॥ ८३१७॥

ENMSS@8318@1कक्षे किं मितपुस्तकं किमुदकं (किं) काव्यसारोदकं दीर्घं किं यदि ताडपत्रलिखितं किं चात्र गौडाक्षरम् ।

ENMSS@8318@2गन्धः किं यदि रामरावणकथासंग्रामगन्धो महत् किं वारं बहु जल्पसे शृणु सखे नाम्ना पुराणो झषः ॥ ८३१८॥

ENMSS@8319@1कङ्कगृध्रसृगालेषु दंशेषु मशकेषु च ।

ENMSS@8319@2पन्नगेषु च जायन्ते नराः क्रोधपरायणाः ॥ ८३१९॥

ENMSS@8320@1कङ्कहंसशशादानां मत्स्यादक्रौञ्चकेकिनाम् ।

ENMSS@8320@2गृध्राणां कुक्कुटानां च पक्षा एतेषु शोभनाः ॥ ८३२०॥

ENMSS@8321@1कङ्केलिरेष किमचेतन एव सत्यं नम्रः स्वयं न कुसुमानि ददाति यस्ते ।

ENMSS@8321@2धूर्तोऽथवा नमति नायमुदस्तबाहु- व्यक्तोन्नतस्तनतटान्तदिदृक्षयेव

॥ ८३२१॥

ENMSS@8322@1कचकुचचुबुकाग्रे पाणिषु व्यापृतेषु

प्रथमजलधिपुत्रीसंगमेऽनङ्गधाम्नि ।

ENMSS@8322@2ग्रथितनिबिडनीवीबन्धनिर्मोचनार्थं चतुरधिककराशः पातु

वश्चक्रपाणिः ॥ ८३२२॥

ENMSS@8323@1कचग्रहमनुग्रहं दशनखण्डनं मण्डनं दृगञ्जनमवञ्चनं

मुखरसार्पणं तर्पणम् ।

ENMSS@8323@2नखार्दनमतर्दनं निबिडपीडनं क्रीडनं करोति रतिसङ्गमे

मकरकेतनः कामिनाम् ॥ ८३२३॥

ENMSS@8324@1कचग्रहसमुल्लसत्कमलकोषपीडाजड-

द्विरेफकलकूजितानुकृतसीत्कृतालंकृताः ।

ENMSS@8324@2जयन्ति सुरतोत्सवव्यतिकरे कुरङ्गीदृशां

प्रमोदमदनिर्भरप्रणयचुम्बिनो विभ्रमाः ॥ ८३२४॥

ENMSS@8325@1कचग्रहोत्तानितमर्धकुड्मलं त्रपाचलत्तारकमन्दलोचनम् ।

ENMSS@8325@2बलाद्गृहीताधरवेदनाकुलं कदा पिबेयं ननु तत् प्रियामुखम् ॥ ८३२५॥

ENMSS@8326@1कचभारात् कुचभारः कुचभाराद् भीतिमेति कचभारः ।

ENMSS@8326@2कचकुचभाराज्जघनं कोऽयं चन्द्रानने चमत्कारः ॥ ८३२६॥

ENMSS@8327@1कचमूलबद्धपन्नग- निश्वासविषाग्निधूमहतमध्यम् ।

ENMSS@8327@2ऐशानमिव कपालं स्फुटलक्ष्मा स्फुरति शशिबिम्बम् ॥ ८३२७॥

ENMSS@8328@1कचा यूकावासा मुखमजिनबद्धास्थिनिचयम् कुचौ मांसग्रन्थी जठरमपि

विष्ठादिधटिका ।

ENMSS@8328@2मलोत्सर्गे यन्त्रं जघनमबलायाः क्रमयुगं तदाधारस्थूणे तदिह

किमु रागाय महताम् ॥ ८३२८॥

ENMSS@8328A@1कचैरर्धच्छिन्नैः करनिहितरक्तैः कुचतटैर्

नखोत्कृत्तैर्गण्डैरुपलहतिशीर्णैश्च निटिलैः ।

ENMSS@8328A@2विदीर्णैराक्रन्दाद् विकलगदितैः कण्ठविवरैर्

मनस्तक्ष्णोत्यन्तःपुरपरिजनानां स्थितिरियम् ॥

ENMSS@8328B@1कच्चित् कान्तारभाजां भवति परिभवः कोऽपि शौवापदो वा प्रत्यूहेन

क्रतूनां न खलु मखभुजो भुञ्जते वा हवींषि ।

ENMSS@8328B@2कर्तुं वा कच्चिदन्तर्वसति वसुमतीदक्षिणः सप्ततन्तुर् यत्संप्राप्तोऽसि

किं वा रघुकुलतपसामीदृशोऽयं विवर्तः ॥
ENMSS@8329@1कच्चित् पशव्यं निरुजं भूर्यम्बुतृणवीरुधम् ।
ENMSS@8329@2वृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ ८३२९॥
ENMSS@8330@1कच्चित् सहस्रान् मूर्खाणाम् एकमिच्छसि पण्डितम् ।
ENMSS@8330@2पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान् निःश्रेयसं महत् ॥ ८३३०॥
ENMSS@8331@1कच्चित् सौम्य प्रियसहचरी विद्युदालिङ्गति त्वाम्
आविर्भूतप्रणयसुमुखाश्चातका वा भजन्ते ।
ENMSS@8331@2पौरस्त्यो वा सुखयति मरुत्साधुसंवाहनाभिर्
विष्वग्बिभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ॥ ८३३१॥
ENMSS@8332@1कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे  प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि ।
ENMSS@8332@2निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः  प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ८३३२॥
ENMSS@8333@1कच्चिदर्थेन वा धर्मम् अर्थं धर्मेण वा पुनः ।
ENMSS@8333@2उभौ वा प्रीतिलोभेन कामेन न विबाधसे ॥ ८३३३॥
ENMSS@8334@1कच्चिदर्थं च धर्मं च कामं च जायतां वर ।
ENMSS@8334@2विभज्य काले कालज्ञ सर्वान् भरत सेवसे ॥ ८३३४॥
ENMSS@8335@1कच्छान्ववायजलधेरमृतांशुरन्यः  प्रत्यर्थिवंशदहनः सुमना गुणज्ञः ।
ENMSS@8335@2विद्याप्रियो नयपरो मतिमान् वदान्यः  मीवारभूपतिरुदेतु यशो वितन्वन्
॥ ८३३५॥
ENMSS@8336@1कज्जलतिलककलङ्कित-  मुखचन्द्रे गलितसलिलकणकेशि ।
ENMSS@8336@2नवविरहदहनतूलो  जीवयितव्यस्त्वया कतमः ॥ ८३३६॥
ENMSS@8337@1कज भज विकासमभितस् त्यज संकोचं भ्रमत्ययं भ्रमरः ।
ENMSS@8337@2यद्यपि न भवति कार्यं  तथापि तुष्टस्तनोत्ययं कीर्तिम् ॥ ८३३७॥
ENMSS@8338@1कज्जलहिमकनकरुचः  सुपर्णवृषहंसवाहनाः शं वः ।
ENMSS@8338@2जलनिधिगिरिकमलस्था  हरिहरकमलासना ददतु ॥ ८३३८॥
ENMSS@8339@1कटकत्वं पृथग्घेम्नस्तरंगत्वं पृथग् जलात् ।
ENMSS@8339@2यथा न संभवत्येवं न जगत् पृथगीश्वरात् ॥ ८३३९॥
ENMSS@8340@1कटकानि भजन्ति चारुभिर् नवमुक्ताफलभूषणैर्भुजैः ।

ENMSS@8340@2नियतं दधते च चित्रकैर् अवियोगं पृथुगण्डशैलतः ॥ ८३४०॥
ENMSS@8341@1कटकिनः कटुकरसान् करीरखदिरादिविटपतरुगुल्मान् ।
ENMSS@8341@2उपभुञ्जाना करभी दैवादाप्नोति मधुरमधुजालम् ॥ ८३४१॥
ENMSS@8342@1कटाक्षेणापीषत् क्षणमयि निरीक्षेत यदि सा तदानन्दः सान्द्रः स्फुरति
पिहिताशेषविषयः ।
ENMSS@8342@2सरोमाञ्चोदञ्चत्कुचकलशनिर्भिन्नवसनः परीरम्भारम्भः क इव
भविताम्भोरुहदृशः ॥ ८३४२॥
ENMSS@8343@1कटाक्षैराक्षिप्तः प्रियसखि रहः केलिभवने वने पुष्पव्याजात्
कुचयुगमिदं चापि वलितम् ।
ENMSS@8343@2रतासक्तं दृष्ट्वा हरिनमिथुनं चाल्पहसितं तथापि प्रेयान् मे न
किमपि जानाति किमिति ॥ ८३४३॥
ENMSS@8344@1कटिर्मुष्टिग्राह्या द्विपुरुषभुजग्राह्यमुदरं स्तनौ घण्टालोलौ जघनमिव
गन्तुं व्यवसितौ ।
ENMSS@8344@2स्मितं भेरीनादो मुखमपि च पत्युर्भयकरं तथाप्येषा रण्डा परिभवति
संतापयति च ॥ ८३४४॥
ENMSS@8345@1कटिर्विटशतैर्घृष्टा पान्थपीतोज्झितं मुखम् ।
ENMSS@8345@2स्तनौ सहस्रमृदितौ यस्याः कस्यास्तु सा निजा ॥ ८३४५॥
ENMSS@8345A@1कटिस्थकरवैशाखस्थानकस्थनराकृतिम् ।
ENMSS@8345A@2द्रव्यैः पूर्णं स्मरेल्लोकं स्थित्युत्पत्तिव्ययात्मकैः ॥
ENMSS@8346@1कटीतटनिकुञ्जेषु संचरन् वातकुञ्जरः ।
ENMSS@8346@2एरण्डतैलसिंहस्य गन्धमाघ्राय धावति ॥ ८३४६॥
ENMSS@8347@1कटु क्वणन्तो मलदायकाः खला- स्तुदन्त्यलं बन्धनशृङ्खला इव ।
ENMSS@8347@2मनस्तु साधुध्वनिभिः पदे पदे हरन्ति सन्तो मणिनूपुरा इव ॥
८३४७॥
ENMSS@8348@1कटुतिक्तकषायरसैः पवनः पित्तं कटूष्णलवणाम्लैः ।
ENMSS@8348@2स्निग्धमधुराम्लवणैः श्लेष्मा कोपं प्रयाति तरोः ॥ ८३४८॥
ENMSS@8349@1कटुतीक्ष्णोष्णलवणक्षाराम्लादिब् हिरुल्बणैः ।
ENMSS@8349@2मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः ॥ ८३४९॥
ENMSS@8350@1कटुभिरपि कठोरचक्रवाकोत्- करविरहज्वरशान्तिशीतवीर्यैः ।
ENMSS@8350@2तिमिरहतमयं महोभिरञ्ञ् जयति जगन्नयनौघमुष्णभानुः ॥ ८३५०॥
ENMSS@8351@1कटुमधुराण्यामोदैः पर्णैरुत्कीर्णपत्रभङ्गानि ।

ENMSS@8351@2दमनकवनानि संप्रति काण्डैरेकान्तपाण्डूनि ॥ ८३५१॥

ENMSS@8352@1कटु रटसि किमेवं कर्णयोः कुञ्जरारेर् अविदितनिजबुद्धे किं न विज्ञातमस्ति ।

ENMSS@8352@2शितरकरदंष्ट्राटङ्कनिर्भिन्नकुम्भं मशक गलकरन्ध्रे हस्तियूथं ममज्ज ॥ ८३५२॥

ENMSS@8353@1कटुविशिखशिखिप्रपञ्च पञ्चा- नन धनदप्रियमित्र मित्रनेत्र ।

ENMSS@8353@2धृतसकलविकल्प कल्पशेष- प्रकटमहानट नाटय प्रसादम् ॥ ८३५३॥

ENMSS@8354@1कटूनामिह सार्थत्वात् कामं भवति संग्रहः ।

ENMSS@8354@2तथापि वृत्तिर्न तथा रसज्ञानुमतिक्षमा ॥ ८३५४॥

ENMSS@8355@1कटौ न कलमेखला न कुचमण्डले मालिका दृशोरपि न चाञ्जनं न

पुनरस्ति रागोऽधरे ।

ENMSS@8355@2प्रियेण सहचारिणा मदनतस्करस्योच्चकैस् ततस्त्वमसि लुण्ठिता निधुवने

वने शोभने ॥ ८३५५॥

ENMSS@8355A@1कटुस्वरस्त्वं पिकभूत् तथापि श्लाघ्योऽसि सम्यक् पिकपुत्रपालात् ।

ENMSS@8355A@2आह्लादनाच्चन्द्र इवात्तलक्ष्मा कस्तूरिका गन्धभृतेव कृष्णा ॥

ENMSS@8356@1कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविद् आहिनः ।

ENMSS@8356@2आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ८३५६॥

ENMSS@8357@1कट्वेर्वारौ यथा पक्के मधुरः सन् रसोऽपि न ।

ENMSS@8357@2प्राप्यते ह्यात्मनि तथा नापक्ककरणे ज्ञता ॥ ८३५७॥

ENMSS@8358@1कठिनं वा मधुरं वा प्रस्तुतवचनं मनोहारि ।

ENMSS@8358@2वामे गर्दभनादश् चित्तप्रीत्यै प्रयाणेषु ॥ ८३५८॥

ENMSS@8359@1कठिनः कृशमूलश्च दुर्लभो दक्षिणेतरः ।

ENMSS@8359@2कश्चित् कल्याणगोत्रोऽपि मनुष्यैर्नोपजीव्यते ॥ ८३५९॥

ENMSS@8360@1कठिनकुचौ तव बाले तरलसरोजाक्षि तावकं चक्षुः ।

ENMSS@8360@2कुटिलसुकेशि कचास्ते मिथ्या भणितं कृशाङ्गि तव मध्यम् ॥ ८३६०॥

ENMSS@8361@1कठिनतरदामवेष्टन- लेखासंदेहदायिनो यस्य ।

ENMSS@8361@2राजन्ति वलिविभङ्गाः स पातु दामोदरो भवतः ॥ ८३६१॥

ENMSS@8362@1कठिनस्यापि हृदयं गुणवानार्द्रयेद् दृशा ।

ENMSS@8362@2चन्द्रकान्तोपलं चन्द्रः स्वांशुभिर्द्रावयत्यसौ ॥ ८३६२॥

ENMSS@8363@1कठिनहृदये मुञ्च क्रोधं सुखप्रतिघातकं  लिखति दिवसं यातं यातं यमः किल मानिनि ।

ENMSS@8363@2वयसि तरुणे नैतद् युक्तं चले च समागमे  भवति कलहो यावत् तावद्
वरं सुभगे रतम् ॥ ८३६३॥

ENMSS@8364@1कठिनहृदये मुञ्च भ्रान्तिं व्यलीककथाश्रयां  पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनम् ।

ENMSS@8364@2किमिदमथ वा सत्यं मुग्धे त्वयाद्य विनिश्चितं  यदभिरुचितं तन् मे कृत्वा प्रिये सुखमास्यताम् ॥ ८३६४॥

ENMSS@8365@1कठिनास्तीक्ष्णवक्राश्च तीक्ष्णोदर्कास्तथैव च ।

ENMSS@8365@2गणकैः किं नु लेखन्यस्ता वा किं ते विनिर्मिताः ॥ ८३६५॥

ENMSS@8366@1कठिने दुर्गमे वासो गुप्तशक्तिप्रकाशनम् ।

ENMSS@8366@2रणे पुत्रः यथा शोच्यः कलहं वेश्यया सह ॥ ८३६६॥

ENMSS@8367@1कठोरनखराहतद्विरदकुम्भपीठस्थली-
लुठद्रुधिररञ्जितोल्ललितकेसरः केसरी ।

ENMSS@8367@2गभीररवकातरातुरतरातुरव्याहृतैः  पतन् हरिणकैः समं समरभूमिकां लज्जते ॥ ८३६७॥

ENMSS@8368@1कठोरपारावतकण्ठमेचकं  वपुर्वृषस्कन्धसुबन्धुरांसकम् ।

ENMSS@8368@2प्रसन्नसिंहस्तिमितं च वीक्षितं  ध्वनिश्च मङ्गल्यमृदङ्गमांसलः
॥ ८३६८॥

ENMSS@8369@1कठोरास्थिग्रन्थिव्यतिकररणत्कारमुखरः
खरस्नायुच्छेदक्षणविहितवेगव्युपशमः ।

ENMSS@8369@2निरातङ्कः पङ्केष्विव पिशितपिण्डेषु विलस-  न्नसिर्गात्रं गात्रं सपदि लवशस्ते विकिरतु ॥ ८३६९॥

ENMSS@8370@1कण इव पुरां वह्नेर्भस्मावधूलनसङ्गतो  जयति बहलालोकस्फारावधूतनिशोदयः ।

ENMSS@8370@2स्मरहरजटाबन्धग्रन्थिर्भुजङ्गफणामणि-  स्त्रिदशतटिनीपूरानीतः स्फुरन्निव तारकः ॥ ८३७०॥

ENMSS@8371@1कणाचामतुषाङ्गारान् यत्नेन परिरक्षसि ।

ENMSS@8371@2मूषकापहृतं कोषे रत्नराशिं न पश्यसि ॥ ८३७१॥
ENMSS@8372@1कण्टकस्य तु भग्नस्य दन्तस्य चलितस्य च ।
ENMSS@8372@2अमात्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् ॥ ८३७२॥
ENMSS@8373@1कण्टकान् कूपमग्निं च वर्जयन्ति यथा नराः ।
ENMSS@8373@2तथा नृशंसकर्माणं वर्जयन्ति नरा नरम् ॥ ८३७३॥
ENMSS@8374@1कण्टकावरणं यादृक् फलितस्य फलाप्तये ।
ENMSS@8374@2तादृग् दुर्जनसङ्गोऽपि साधुसङ्गाय बाधनम् ॥ ८३७४॥
ENMSS@8375@1कण्टकिततनुशरीरा लज्जामुकुलायमाननयनेयम् ।
ENMSS@8375@2तव कुमुदिनीव वाञ्छति नृचन्द्र बाला करस्पर्शम् ॥ ८३७५॥
ENMSS@8376@1कण्टकेनापि ये स्पृष्टा यान्ति कामपि विक्रियाम् ।
ENMSS@8376@2तेऽपि शस्त्रनिकृन्तस्य पशोर्मांसानि भुञ्जते ॥ ८३७६॥
ENMSS@8377@1कण्टकेनापि विद्धस्य महती वेदना भवेत् ।
ENMSS@8377@2चक्रभीषणखड्गाद्यैर्मार्यमाणस्य किं पुनः ॥ ८३७७॥
ENMSS@8378@1कण्टकैरिव विदारितपादः पद्मिनीपरिचितैरपराद्रेः ।
ENMSS@8378@2आरुरोह सरसीरुहबन्धुः स्कन्धमम्बुधितटीगमनाय ॥ ८३७८॥
ENMSS@8378A@1कण्टको दारुखण्डं च वितनोति गलव्यथाम् ।
ENMSS@8378A@2व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥
ENMSS@8379@1कण्टक्यकण्टकानां व्यत्यासेऽम्भस्त्रिभिः करैः पश्चात् ।
ENMSS@8379@2खात्वा पुरुषत्रितयं त्रिभागयुक्तं धनं वा स्यात् ॥ ८३७९॥
ENMSS@8380@1कण्टारिकाया अन्योक्तिः सणान्योक्तिरुदाहृता ।
ENMSS@8380@2धत्तूरपादपान्योक्तिरवधेया तृणोक्तयः ॥ ८३८०॥
ENMSS@8381@1कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् ।
ENMSS@8381@2अप्युपात्तममृतं भवद्वपुर्- भेदवृत्ति यदि मे न रोचते ॥ ८३८१॥
ENMSS@8382@1कण्ठगतैरप्यसुभिः कस्यात्मा नोपसर्पते जातु ।
ENMSS@8382@2मूर्खस्य विषादस्य च गर्वस्य तथा कृतघ्नस्य ॥ ८३८२॥
ENMSS@8383@1कण्ठग्रहं न वात्येव भर्तुः क्रुद्धापि यत्नतः ।
ENMSS@8383@2कङ्कणश्रेणिकेवासौ दोषमेवावलम्बते ॥ ८३८३॥
ENMSS@8384@1उन्मत्तेव प्रमत्तेव प्रहृष्टेवातुरेव च ।
ENMSS@8384@2न शक्योपासितुं रामा प्रौढं यौवनमाश्रिता ॥ ८३८४॥
ENMSS@8385@1सुखदुःखप्रदायिन्यस्तृतीये यौवने स्थिताः ।
ENMSS@8385@2जायन्ते गहना रामाः संसारस्येव रीतयः ॥ ८३८५॥

ENMSS@8386@1कण्ठग्रहे शिथिलतां गमिते कथंचिद्  यो मन्यते मरणमेव सुखाभ्युपायम् ।
ENMSS@8386@2गच्छन् स एष न बलाद् विधृतो युवाभ्याम्  इत्युज्झिते भुजलते वलयैरिवास्याः ॥ ८३८६॥
ENMSS@8387@1कण्ठच्छायमिषेण कल्परजनीमुत्तंसमन्दाकिनी-  रूपेण प्रलयाब्धिमूर्ध्वनयनव्याजेन कल्पानलम् ।
ENMSS@8387@2भूषापन्नगकेलिपानकपटादेकोनपञ्चाश तं  वातानप्युपसंहरन्नवतु वः कल्पान्तशान्तौ शिवः ॥ ८३८७॥
ENMSS@8388@1कण्ठच्छेदविशीर्यमाणरुधिरप्राग्भारभग्न् अद्युतेर् येन स्मेरमुखेन होमशिखिनः संधुक्षणाकाङ्क्षिणा ।
ENMSS@8388@2भ्रूभङ्गः शितिकण्ठकण्ठफणिने फूत्कारहेतोः कृतः शौटीर्यव्रततुष्टधूर्जटिरसौ किं वर्ण्यते रावणः ॥ ८३८८॥
ENMSS@8389@1कण्ठच्छेदे सुवर्णं चेत् क्षुरं यद्वद्धितं न हि ।
ENMSS@8389@2बन्धुरप्यपकारी चेत् सर्वैस्त्याज्यस्तथैव सः ॥ ८३८९॥
ENMSS@8390@1कण्ठमाकुञ्च्य हृदये स्थापयेद् दृढमिच्छया ।
ENMSS@8390@2जालंधरो बन्ध एष सुधाव्ययनिवारणः ॥ ८३९०॥
ENMSS@8391@1कण्ठश्रियं कुवलयस्तबकाभिराम-  दामानुकारिविकटच्छविकालकूटाम् ।
ENMSS@8391@2बिभ्रत् सुखानि दिशतादुपहारपीत-  धूपोत्थधूममलिनामिव धूर्जटिर्वः ॥ ८३९१॥
ENMSS@8392@1कण्ठश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया ।
ENMSS@8392@2तुल्यावस्था सखीवेयं तनुराश्वास्यते मम ॥ ८३९२॥
ENMSS@8393@1कण्ठसक्तमृदुबाहुबन्धनं  न्यस्तपादतलमग्रपादयोः ।
ENMSS@8393@2प्रार्थयन्त शयनोत्थितं प्रियास् तं निशात्ययविसर्गचुम्बनम् ॥ ८३९३॥
ENMSS@8394@1कण्ठस्तस्याः कुवलयदृशः काञ्चनः कोऽपि कम्बुर् लावण्याम्बुस्मरनरपतेरर्घ्यमाविः करोति ।
ENMSS@8394@2तिस्रो रेखास्त्रिभुवनजयव्यञ्जिकास्तत्र तत् किं  न स्यान्मध्ये त्रिवलिरचना पौनरुक्त्याय धातुः ॥ ८३९४॥
ENMSS@8395@1कण्ठस्था या भवेद् विद्या सा प्रकाश्या सदा बुधैः ।
ENMSS@8395@2या गुरौ पुस्तके विद्या तया मूढः प्रतार्यते ॥ ८३९५॥
ENMSS@8396@1कण्ठस्य तस्याः स्तनबन्धुरस्य  मुक्ताकलापस्य च निस्तलस्य ।

ENMSS@8396@2अन्योन्यशोभाजननाद् बभूव  साधारणो भूषणभूष्यभावः ॥ ८३९६॥
ENMSS@8397@1कण्ठस्य विदधे कान्तिं मुक्ताभरणता यथा ।
ENMSS@8397@2तस्याः स्वभावरम्यस्य मुक्ताभरणता तथा ॥ ८३९७॥
ENMSS@8398@1कण्ठादूर्ध्वं विनिर्याति प्राणा याश्चाक्षरैः सह ।
ENMSS@8398@2ददामीत्यक्षरैर्दातुः पुनः श्रोत्राद् विशन्ति ते ॥ ८३९८॥
ENMSS@8399@1कण्ठाद्रक्तं पिबति गुणिनां मद्यमांसं न भुङ्क्ते  विष्णुद्रव्यं हरति कुरुते द्वादशीषूपवासम् ।
ENMSS@8399@2सांख्यं श्रुत्वापहरति गवां ब्राह्मणानां च वृत्तिं  पापो दम्भः कलियुगसखः कस्य मित्रं नियोगी ॥ ८३९९॥
ENMSS@8400@1कण्ठान्तः क्वणितं दिवाकरकरक्लान्त्या रजोविप्लवैस् तन्नेत्राश्चलकुश्चनं शितकुशप्रान्तक्षतैः सीत्कृतिः ।
ENMSS@8400@2श्वासोर्मिप्रभवो वनेचरभिया त्वद्वैरिवामभ्रुवाम्  एवं देव मरोस्तटेऽपि सुरतक्रीडानुरूपः क्रमः ॥ ८४००॥
ENMSS@8401@1कण्ठालंकारघण्टाघणघणरणिताध्मातरोदःकटाहः कण्ठेकालाधिरोहोचितघनसुभगं भावुकस्निन्धपृष्ठः ।
ENMSS@8401@2साक्षाद् धर्मो वपुष्मान् धवलककुदनिर्धूतकैलासकूटः  कूटस्थो वः ककुद्मान् निबिडतरतमःस्तोमतृण्यां वितृण्यात् ॥ ८४०१॥
ENMSS@8402@1कण्ठालिङ्गनमङ्गलं घनकुचाभोगोपभोगोत्सवं  श्रोणीसंगमसौभगं च सततं मत्प्रेयसीनां पुरः ।
ENMSS@8402@2प्राप्तुं कोऽयमितीर्ष्ययेव यमुनाकूले बलाद्यः स्वयं  गोपीनामहरद् दुकूलनिचयं कृष्णः स पुष्णातु नः ॥ ८४०२॥
ENMSS@8403@1कण्ठावसक्तमृदुबाहुलतास्तुरङ्गाद्  राजावरोधनवधूरवतारयन्तः ।
ENMSS@8403@2आलिङ्गनान्यधिकृताः स्फुटमापुरेव  गण्डस्थलीः शुचितया न चुचुम्बुरासाम् ॥ ८४०३॥
ENMSS@8404@1कण्ठाश्लेषिणमुन्नतस्तनभरश्रोणीतटग्राहिणं  संसक्तोरुयुगं गृहीतजघनप्राकारमप्यन्ततः ।
ENMSS@8404@2द्रागेव श्लथबन्धमिन्दुवदना गाढावमर्दासहं  विज्ञायात्यजदाशु काञ्चनपटं व्रीडाकुलापि क्षणम् ॥ ८४०४॥
ENMSS@8405@1कण्ठे क एष तव वल्लभ नूपुरोऽयं  तत् पादभूषणमयं वलयस्तदानीम् ।
ENMSS@8405@2इत्यादिवाच्यमविभाव्य वचो मृगाक्ष्या  ज्ञानेऽपि तद्विहृतमुत्सुकतां

तनोति ॥ ८४०५॥

ENMSS@8405A@1कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्षन् क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्कणीचक्रवालः ।

ENMSS@8405A@2दत्तातङ्कोऽङ्गनानामनुसृतसरणिः संभ्रमादश्वपालैः प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः ॥

ENMSS@8406@1कण्ठे गद्गदता स्वेदो मुखे वैवर्ण्यवेपथू ।

ENMSS@8406@2म्रियमाणस्य चिह्नानि यानि तान्येव याचतः ॥ ८४०६॥

ENMSS@8407@1कण्ठे चिन्तामणिर्ज्ञेयश्चिन्तितार्थप्रदः सदा ।

ENMSS@8407@2आवर्तः पृष्ठवंशे यः स सूर्याख्यः शुभः स्मृतः ॥ ८४०७॥

ENMSS@8408@1कण्ठे जीवितमानने तव गुणाः पाणौ कपोलस्तनौ संतापस्त्वयि मानसं

नयनयोरच्छिन्नधारं पयः ।

ENMSS@8408@2सर्वं निष्करुण त्वदीयविरहे सालम्बनं किं पुनस् तस्याः संप्रति जीविते

बत सखीवर्गो निरालम्बनः ॥ ८४०८॥

ENMSS@8409@1कण्ठे मदः कोद्रवजो हृदि ताम्बूलजो मदः ।

ENMSS@8409@2लक्ष्मीमदस्तु सर्वाङ्गे पुत्रदारमुखेष्वपि ॥ ८४०९॥

ENMSS@8410@1कण्ठे मौक्तिकमालिकाः स्तनतटे कार्पूरमच्छं रजः सान्द्रं

चन्दनमङ्गके वलयिताः पाणौ मृणालीलताः ।

ENMSS@8410@2तन्वी नक्तमियं चकास्ति शुचिनी चीनांशुके बिभ्रती

शीतांशोरधिदेवतेव गलिता व्योमाग्रमारोहतः ॥ ८४१०॥

ENMSS@8411@1कण्ठे रज्जुं बद्ध्वा मृतस्य पुंसस्तु रज्जुमादाय ।

ENMSS@8411@2तस्याः खण्डं कण्ठे बद्धं गण्डस्रजं हरति ॥ ८४११॥

ENMSS@8412@1कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम् ।

ENMSS@8412@2तदेव वाग्भूय मुखे मृगाक्ष्याः श्रोतुः श्रुतौ याति सुधारसत्वम् ॥ ८४१२॥

ENMSS@8413@1कण्ठोचितोऽपि हुंकृति- मात्रनिरस्तः पदान्तिके पतितः ।

ENMSS@8413@2यस्याश्चन्द्रशिखः स्मर- भल्लनिभो जयति सा चण्डी ॥ ८४१३॥

ENMSS@8414@1कण्डूयते दक्षिणपाणिना चेत् स सारमेयो वदनं तदानीम् ।

ENMSS@8414@2भक्तैः प्रभूतैः सह भूमिपालैर् भोज्यानि भक्ष्याणि चिरं भवन्ति

॥ ८४१४॥

ENMSS@8415@1कण्डूलद्विपगण्डपिण्डकषणाकम्प् एन सम्पातिभिर् धर्मस्रंसितबन्धनैः

स्वकुसुमैरर्चन्ति गोदावरीम् ।

ENMSS@8415@2छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः

कूजत्क्लान्तकपीतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥ ८४१५॥

ENMSS@8416@1कण्डूयमानः खलु दक्षिणेन हस्तेन भालं भषणो ददाति ।

ENMSS@8416@2प्रभाविनम्रीकृतराजचक्रं राज्याभिषेके वरपट्टबन्धम् ॥ ८४१६॥

ENMSS@8417@1कतरत् पुरहर परुषं हालाहलकवलयाचनावचसोः ।

ENMSS@8417@2एकैव तव रसज्ञा तदुभयरसतारतम्यज्ञा ॥ ८४१७॥

ENMSS@8418@1कति कति न पुनश्चरन्ति हन्ति प्रतिशिखरं प्रतिकाननं कुरङ्गाः ।

ENMSS@8418@2तदपि जनमनोविनोदहेतुर् विलसति केष्वपि कोऽपि नाभिगन्धः ॥ ८४१८॥

ENMSS@8419@1कति कति न मदोद्धताश्चरन्ति प्रतिशिखरि प्रतिकाननं कुरङ्गाः ।

ENMSS@8419@2क्वचिदपि पुनरुत्तमा मृगास्ते मदयति यन् मद एव मेदिनीशान् ॥ ८४१९॥

ENMSS@8420@1कति कति न लताः कलिताः संचरता चञ्चरीकरसिकेन ।

ENMSS@8420@2नलिनि भवन्मधु मधुरं यत् पीतं तत् तदेव परिपीतम् ॥ ८४२०॥

ENMSS@8421@1कति कति न वसन्ते वल्लयः शाखिनो वा सुरभितसुमनोभिर्भूषिताङ्गा बभूवुः ।

ENMSS@8421@2तदपि युवजनानां प्रीतये केवलोऽभूद् अभिनवकलिकालीभारशाली रसालः

॥ ८४२१॥

ENMSS@8422@1कतिचिदुद्धतनिर्भरमत्सराः कतिचिदात्मवचःस्तुतिशालिनः ।

ENMSS@8422@2अहह केऽपि निरक्षरकुक्षयस् तदिह संप्रति कं प्रति मे श्रमः ॥ ८४२२॥

ENMSS@8422A@1कतिचिद् दिवसानि काण्डशेषाः पतिताशेषपुराणजीर्णपर्णाः ।

ENMSS@8422A@2तरवस्त्वचि गर्हितप्रवालाः समवाप्यन्त न नामतो विवेक्तुम् ॥

ENMSS@8423@1कतिचिद् दिवसानि तया गमिता- नि गृहे तव सङ्गमरोचनया ।

ENMSS@8423@2कतिचिद् विपिने नलिनीशयने वचनेन पिकीमदमोचनया ॥ ८४२३॥

ENMSS@8424@1न वनेऽपि रतिर्भवनेऽपि न यं प्रतिरूपविनिर्ज्जितरोचनया ।

ENMSS@8424@2करुणावरुणालय किं क्रियताम् अरुणायतपङ्कजलोचनया ॥ ८४२४॥

ENMSS@8425@1कति ते कबरीभारः सुमनःसङ्गात् प्रियेऽतिनीलत्वात् ।

ENMSS@8425@2भवति च कलापवत्त्वान् निर्जैरसेव्यः कथं न स्यात् ॥ ८४२५॥

ENMSS@8426@1कति न सन्ति जना जगतीतले तदपि तद्विरहाकुलितं मनः ।

ENMSS@8426@2कति न सन्ति निशाकरतारकाः कमलिनी मलिनी रविणा विना ॥ ८४२६॥

ENMSS@8427@1कति न सन्ति महीषु महीरुहः सुरभिपुष्परसालफलालयः ।

ENMSS@8427@2सुरभयन्ति न केऽपि च भूरुहान् इति यशोऽस्ति परं तव चन्दन ॥ ८४२७॥

ENMSS@8428@1कति नो विषया निभालिताः कति वा भूमिभुजो न शीलिताः ।

ENMSS@8428@2धरणीधर तावकान् गुणान् अवधार्याजगणं गुरुं लघुम् ॥ ८४२८॥

ENMSS@8429@1कतिपयदिवसस्थायिनि मदकारिणि यौवने दुरात्मानः ।

ENMSS@8429@2विदधति तथापराधं जन्मैव यथा वृथा भवति ॥ ८४२९॥

ENMSS@8430@1कत्तिपयदिवसस्थायी पूरो दूरोन्नतोऽपि भविता ते ।

ENMSS@8430@2तटिनि तटद्रुमपातन- पातकमेकं चिरस्थायि ॥ ८४३०॥

ENMSS@8431@1कतिपयदिवसैः क्षयं प्रयायात् कनकगिरिः कृतवासरावसानः ।

ENMSS@8431@2इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे ॥ ८४३१॥

ENMSS@8432@1कतिपयनिमेषवर्तिनि जन्मजरामरणविह्वले जगति ।

ENMSS@8432@2कल्पान्तकोटिबन्धुः स्फुरति कवीनां यशःप्रसरः ॥ ८४३२॥

ENMSS@8433@1कतिपयपुरस्वामी कायव्ययैरपि दुर्ग्रहो मितवितरिता मोहेनाहो मयानुसृतः
पुरा ।

ENMSS@8433@2त्रिभुवनपतिर्बुद्ध्याराध्योऽधुना स्वपदप्रदः पुनरधिगतस्तत् प्राचीनो दुनोति दिनव्ययः ॥ ८४३३॥

ENMSS@8434@1कतिपयसहकारपुष्परम्यस् तनुतुहिनोऽल्पविनिद्रसिन्दुवारः ।

ENMSS@8434@2सुरभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः ॥ ८४३४॥

ENMSS@8435@1कति पल्लविता न पुष्पिता वा तरवः सन्ति समन्ततो वसन्ते ।

ENMSS@8435@2जगतो विजये तु पुष्पकेतोः सहकारी सहकार एक एव ॥ ८४३५॥

ENMSS@8436@1कतिषु न कृता सेवा के वा न वाग्विभवैः स्तुतास् तृणमपि गुणप्रीतः प्रादान्न कोऽपि विपश्चिताम् ।

ENMSS@8436@2अयमिह परं दुःखज्वालाकलापमखण्डयत् कनकपयसां धारादण्डैरकाण्डघनाघनः ॥ ८४३६॥

ENMSS@8437@1कति सन्ति नोन्नतिभृतस्तरवस् तदपि त्वमेव गुरुकीर्तिवरः ।

ENMSS@8437@2निबिडादरं नवमरन्दहरः सहकार कारणमिह भ्रमरः ॥ ८४३७॥

ENMSS@8438@1कति सन्ति लता विपिने कुसुम- स्तवकानमिताः खलु पल्लविताः ।

ENMSS@8438@2प्रतिचम्पकचन्दननीपवनी- नवपङ्कजिनीमधुसंवलिताः ॥ ८४३८॥

ENMSS@8439@1सुचिरं कुसुमेषु परिभ्रमता न च मालति कापि तथा मिलिता ।

ENMSS@8439@2मधुपेन पुनर्मधुपानविधौ हृदये न यथा भवती कलिता ॥ ८४३९॥

ENMSS@8440@1कति सन्ति लवङ्गलता ललिता नवकोरकिता धरणीसुतले ।

ENMSS@8440@2कति बन्धुरगन्धभृतस्तरवो गुरवो निवसन्ति गिरौ मलये ॥ ८४४०॥

ENMSS@8441@1कत्यक्षीणि करोटयः कति कति द्वीपिद्विपानां त्वचः काकोलाः कति पन्नगाः

कति सुधाधाम्नश्च खण्डाः कति ।

ENMSS@8441@2किं च त्वं च कति त्रिलोकजननि त्वद्वारिपूरोदरे मज्जज्जन्तुकदम्बकं

समुदयत्येकैकमादाय यत् ॥ ८४४१॥

ENMSS@8442@1कत्यश्वाः कति धेनवः कति गजाः कत्यद्भुताः पादपाः सुन्दर्यः कति

सुस्रुवः कति महारत्नान्यनर्घ्याण्यपि ।

ENMSS@8442@2जातैका किल कन्यका जलनिधेर्दातुं प्रसक्ता यदा सर्वं तद् व्ययितं

तदा परिणतौ नामैकमुच्छेषितम् ॥ ८४४२॥

ENMSS@8443@1कथंचित् कालिदासस्य कालेन बहुना मया ।

ENMSS@8443@2अवगाढेव गम्भीरमसृणौधा सरस्वती ॥ ८४४३॥

ENMSS@8444@1कथंचिदह्नि हृदये कुशलैर्विनिवेशिता ।

ENMSS@8444@2शिक्षा गौरखरेणेव राज्ञा विस्मार्यते निशि ॥ ८४४४॥

ENMSS@8445@1कथंचिन् नैदाघे दिवस इव कोपे विगलिते प्रसत्तौ प्राप्तायां तदनु

च निशायामिव शनैः ।

ENMSS@8445@2स्मितज्योत्स्नारम्भक्षपितविरहध्वान्तनिवहो मुखेन्दुर्मानिन्याः स्फुरति

कृतपुण्यस्य सुरते ॥ ८४४५॥

ENMSS@8446@1कथं ते त्यक्तसद्वृत्ताः सुखं रात्रिषु शेरते ।

ENMSS@8446@2मरणान्तरिता येषां नरकेषूपपत्तयः ॥ ८४४६॥

ENMSS@8447@1कथं त्वदुपलम्भाशाविहताविह तादृशी ।

ENMSS@8447@2अवस्था नालमारोढुम् अङ्गनामङ्गनाशिनी ॥ ८४४७॥

ENMSS@8447A@1कथं न रमते चित्तं धर्मेऽनेकसुखप्रदे ।

ENMSS@8447A@2जीवानां दुःखभीरूणां प्रायो मिथ्यादृशो यतः ॥

ENMSS@8448@1कथं न लज्जितस्तादृक् सविता तेजसां निधिः ।

ENMSS@8448@2ब्रह्माण्डखण्डिकां प्राप्य कुर्वन् पादप्रसारिकाम् ॥ ८४४८॥

ENMSS@8449@1कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः ।

ENMSS@8449@2अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ ८४४९॥

ENMSS@8450@1कथं नु तं बन्धुरकोमलाङ्गुलिं  करं विहायासि निमग्नमम्भसि ।

ENMSS@8450@2अचेतनं नाम गुणं न लक्षयेन्  मयैव कस्मादवधीरिता प्रिया ॥ ८४५०॥

ENMSS@8451@1कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि ।

ENMSS@8451@2भ्राता वा भ्रातरं हन्यात् सौमित्रे प्राणमात्मानः ॥ ८४५१॥

ENMSS@8452@1कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु ।

ENMSS@8452@2कथं वाभ्यनुजानातु साहसैकरसां क्रियाम् ॥ ८४५२॥

ENMSS@8453@1कथं न्विदं कमलविशाललोचने  गृहं घनैः पिहितकरे निशाकरे ।

ENMSS@8453@2अचिन्तयन्त्यभिनववर्षविद्युतस् त्वमागता सुतनु यथा प्रभावती ॥ ८४५३॥

ENMSS@8454@1कथं चैषा तन्वी प्रकृतिसुकुमाराङ्गलतिका  प्रगल्भव्यापारं रतिकलहखेदं विषहते ।

ENMSS@8454@2नलिन्यास्तिग्मोऽपि प्रभवति सुखायैव सविता  प्रकृष्टे प्रेम्ण्येवं किमिव न सहन्ते युवतयः ॥ ८४५४॥

ENMSS@8455@1कथं प्रियाया अनुकम्पितायाः  सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ।

ENMSS@8455@2सुहृत्सु च स्नेहसितः शिशूनां  कलाक्षराणामनुरक्तचित्तः ॥ ८४५५॥

ENMSS@8456@1पुत्रान् स्मरंस्ता दुहित् हृदस्या  भ्रात् न् स्वस्त्रा पितरौ च दीनौ ।

ENMSS@8456@2गृहान् मनोज्ञोरुपरिच्छदांश्च  वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥ ८४५६॥

ENMSS@8457@1कथं भार्यामृते धर्मम् अर्थं वा पुरुषः प्रभो ।

ENMSS@8457@2प्राप्नोति काममथ वा तस्यां त्रितयमाहितम् ॥ ८४५७॥

ENMSS@8458@1तथैव भर्तारमृते भार्या धर्मादिसाधने ।

ENMSS@8458@2न समर्था त्रिवर्गोऽयं दाम्पत्यं समुपाश्रितः ॥ ८४५८॥

ENMSS@8459@1कथं ममोरसि कृतपक्षनिःस्वनः  शिलीमुखोऽपहितदिति (?)  जल्पति प्रिये ।

ENMSS@8459@2निवृत्य किं किमिति ब्रुवाणयानया  ससाध्वसं कुपितममोचि कान्तया ॥ ८४५९॥

ENMSS@8460@1कथं मुग्धे कथं वक्रे कान्तायास्ते विलोचने ।

ENMSS@8460@2कथं जनानुरागाय कथं जनविपत्तये ॥ ८४६०॥

ENMSS@8461@1कथं यतेत मनुजौ भिन्नैव प्रकृतिर्यतः ।
ENMSS@8461@2एकस्थानसमुत्पन्न सुधाक्ष्वेडभिदा स्मृता ॥ ८४६१॥
ENMSS@8462@1कथं राजा स्थितो धर्मे परदारान् परामृशेत् ।
ENMSS@8462@2रक्षणीया विशेषेण राजदारा महाबल ॥ ८४६२॥
ENMSS@8463@1कथं विलोकेयममुं युवानं  कुमुद्वतीबन्धुमिवोज्झिहानम् ।
ENMSS@8463@2भर्तुः स्वसा भाद्रचतुर्थिकेव  कलङ्कयत्यर्धविलोकनेऽपि ॥ ८४६३॥
ENMSS@8464@1कथं वीथीमस्मानुपदिशसि धर्मप्रणयिनीं  प्रसीद स्वां शिष्यामतिखलमुखीं शाधि मुरलीम् ।
ENMSS@8464@2हरन्ती मर्यादां शिव शिव परे पुंसि हृदयं  नयन्ती धृष्टेयं यदुवर यथा नाह्वयति नः ॥ ८४६४॥
ENMSS@8465@1कथं संबोध्यते राजा सुग्रीवस्य च का प्रिया ।
ENMSS@8465@2निर्धनाः किं च वाञ्छन्ति किं कुर्वन्ति मनीषिणः ॥ ८४६५॥
ENMSS@8466@1कथं स दन्तरहितः सूर्यः सूरिभिरुच्यते ।
ENMSS@8466@2यो मीनराशिं मुक्तैव मेषं भोक्तुं समुद्यतः ॥ ८४६६॥
ENMSS@8467@1कथनेन विनाप्याशां पूरयन्ति हि साधवः ।
ENMSS@8467@2प्रतिगेहं भासते हि विवस्वान् कथनं विना ॥ ८४६७॥
ENMSS@8468@1कथमगणितपूर्वं द्रक्ष्यते तं नरेन्द्रः  कथमपुरुषवाक्यं श्रोष्यते सिद्धवाक्यः ।
ENMSS@8468@2कथमविषयवन्ध्यं धारयिष्यत्यमर्षं  प्रणिपतति निरुद्धः सत्कृतो धर्षितो वा ॥ ८४६८॥
ENMSS@8469@1कथमद्य कथं च श्व इति जीवनचिन्तया ।
ENMSS@8469@2या कृथा हा वृथा दैन्यम् आयुरन्तं प्रयच्छति ॥ ८४६९॥
ENMSS@8470@1कथमपि कृतप्रत्यापत्तौ प्रिये स्खलितोत्तरे  विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतम् ।
ENMSS@8470@2असहनसखीश्रोत्रप्राप्तिं विशङ्क्य ससंभ्रमं  विवलितदृशा शून्ये गेहे समुच्छ्वसितं पुनः ॥ ८४७०॥
ENMSS@8471@1कथमपि तव वृन्दारण्यमाहात्म्यवृन्दं  न हि कथयितुमुच्चैरीश्वरोऽप्यीश्वरः स्यात् ।
ENMSS@8471@2अपि च तृणफलानां यस्य लुब्धो रसाय  प्रभुरमृतभुजामप्याश्रयद् वत्सभावम् ॥ ८४७१॥

ENMSS@8472@1कथमपि न निषिद्धो दुःखिना भीरुणा वा द्रुपदतनयपाणिस्तेन पित्रा

ममाद्य ।

ENMSS@8472@2तव भुजबलदर्पाध्यायमानस्य वामः शिरसि चरण एष न्यस्यते

वारयैनम् ॥ ८४७२॥

ENMSS@8473@1कथमपि परिचितमुद्रा भुजभुद्रासङ्गतं स्वप्ने ।

ENMSS@8473@2उषसि निमीलतनयना शयनान्तः कान्तमामृषति ॥ ८४७३॥

ENMSS@8474@1कथमपि सखि क्रीडाकोपाद् व्रजेति मयोदिते कठिनहृदयस्त्यक्त्वा शय्यां

बलाद् गत एव सः ।

ENMSS@8474@2इति सरभसध्वस्तप्रेम्णि व्यपेतघृणे स्पृहां पुनरपि हतव्रीडं

चेतः करोति करोमि किम् ॥ ८४७४॥

ENMSS@8475@1कथमपि हि भवन्ति क्षेत्रसद्बीजयोगाज्जगदुपकृतिहेतोर्नात्मवृत्त्यै

फलन्ति ।

ENMSS@8475@2दधति फलसमृद्ध्या दूरमानम्रभावं ननु जगति सुशूकाः साधवः

शालयश्च ॥ ८४७५॥

ENMSS@8476@1कथमप्यधिगतरन्ध्रैर् अध्युषिता यदि गुहाखुभिः क्षुद्रैः ।

ENMSS@8476@2इयतैव किं मृगाधिप निजविक्रमनिर्विदं वहसि ॥ ८४७६॥

ENMSS@8477@1कथमर्थं निषेधन्तु श्रुतयः स्मृतयोऽपि वा ।

ENMSS@8477@2यासामेकं पदमपि न चलत्यर्थतो विना ॥ ८४७७॥

ENMSS@8478@1कथमवनिप दर्पो यन्निशातासिधारा- दलनगलितमूर्ध्ना विद्विषां

स्वीकृता श्रीः ।

ENMSS@8478@2ननु तव निहतारेरप्यसौ किं न नीता त्रिदिवमपगताङ्गैर्वल्लभा

कीर्तिरेभिः ॥ ८४७८॥

ENMSS@8479@1कथमसौ न भजत्यशरीरतां हतविवेकपदो हतमन्मथः ।

ENMSS@8479@2प्रहरतः कदलीदलकोमले भवति यस्य दया न वधूजने ॥ ८४७९॥

ENMSS@8480@1कथमसौ मदनो न नमस्यतां स्थितविवेकपदो मकरध्वजः ।

ENMSS@8480@2मृगदृशं कदलीललितं वपुर् यदभि हन्ति शरैः कुसुमोद्भवैः

॥ ८४८०॥

ENMSS@8481@1कथमियति वनान्ते कश्चिदेको न तादृग् वरवनतरुरुच्चैः

पुष्पवल्लीफलाढ्यः ।

ENMSS@8481@2जगदसुखविधातुर्दग्धधातुर्नियोगा- द्धवखदिरपलाशाः केवलं

वृद्धिभाजः ॥ ८४८१॥

ENMSS@8482@1कथमिव तव संमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य ।

ENMSS@8482@2इति विरचितमल्लिकाविकासः स्मयत इव स्म मधुं निदाघकालः ॥ ८४८२॥

ENMSS@8483@1कथमिह मनुष्यजन्मा संप्रविशति सदसि विबुधगमितायाम् ।

ENMSS@8483@2येन न सुभाषितामृतम् आह्लादि निपीतमा तृप्तेः ॥ ८४८३॥

ENMSS@8484@1कथमुत्पद्यते धर्मः कथं धर्मः प्रवर्धते ।

ENMSS@8484@2कथं च स्थाप्यते धर्मः कथं धर्मो विनश्यति ॥ ८४८४॥

ENMSS@8485@1सत्येनोत्पद्यते धर्मो दयादानैर्विवर्धते ।

ENMSS@8485@2क्षमया स्थाप्यते धर्मः क्रोधलोभैर्विनश्यति ॥ ८४८५॥

ENMSS@8486@1कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽष्टमीन्दुखण्डम् ।

ENMSS@8486@2कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात् ॥ ८४८६॥

ENMSS@8487@1कथमेतत् कुचद्वन्द्वं पतितं तव सुन्दरि ।

ENMSS@8487@2पश्याधः खनने मूढ पतन्ति गिरयोऽपि च ॥ ८४८७॥

ENMSS@8488@1कथय कथमिवाशा जायतां जीविते मे मलयभुजगवान्ता वान्ति वाताः

कृतान्ताः ।

ENMSS@8488@2अयमपि खलु गुञ्जन् मञ्जु माकन्दमौलौ चुलुकयति मदीयां चेतनां

चञ्चरीकः ॥ ८४८८॥

ENMSS@8488A@1कथय कथमुरोजदामहेतोर् यदुपतिरेष चिनोति चम्पकानि ।

ENMSS@8488A@2भवति करतले यदस्य कम्पः प्रियसखि मत्स्मृतिरेव मत्सपत्नी ॥

ENMSS@8489@1कथय किमपि दृष्टं स्थानमस्ति श्रुतं वा व्रजति दिनकरोऽयं

यत्र नास्तं कदाचित् ।

ENMSS@8489@2इति विहगसमूहान् नित्यमेवास्ति पृच्छन् रजनिविरहभीतश्चक्रवाकी

वराकः ॥ ८४८९॥

ENMSS@8490@1कथय किमिदं जात्या ख्यातं किमस्य वराटकैः कतिभिरथवा लभ्यं

चैतत् प्रयोजनमस्य किम् ।

ENMSS@8490@2प्रतिपदमिति ग्रामीणानां गणेन लघूकृतं बत करतले रत्नं कृत्वा

विषीदति वाणिजः ॥ ८४९०॥

ENMSS@8491@1कथयत इव नेत्रे कर्णमूलं प्रयाते सुमुखि तव कुचाभ्यां वर्त्य पश्यावनीं वा ।
ENMSS@8491@2स्खलति यदि कथंचित् ते पदाम्भोजयुग्मं तव तनुतरमध्यं भज्यते नौ न दोषः ॥ ८४९१॥
ENMSS@8492@1कथयत कथमेषा मेनया विप्रदत्ता शिव शिव गिरिपुत्रो वृद्धकापालिकाय ।
ENMSS@8492@2इति वदति पुरंध्रीमण्डले सिद्धिलेश- व्ययकृतवरवेषः पातु वः श्रीमहेशः ॥ ८४९२॥
ENMSS@8493@1कथय निपुणे कस्मिन् दृष्टः कथं नु कियच्चिरं किमभिलिखितं किं तेनोक्तं कदा स इहैष्यति ।
ENMSS@8493@2इति बहुविधप्रेमोल्लासप्रकल्पितविस्तराः प्रियतमकथाः स्वल्पेऽप्यर्थे प्रयान्ति न नष्टताम् ॥ ८४९३॥
ENMSS@8494@1कथयानिमिषोऽस्म्यहं कथं ते वपुरालोकनमात्र एव जातः ।
ENMSS@8494@2अधरामृतपायिनां भवत्या सुरतावाप्तिररालकेशि युक्ता ॥ ८४९४॥
ENMSS@8494A@1कथाभिर्देशानां कथमपि च कालेन बहुना समायाते कान्ते सखि रजनिरर्धं गतवती ।
ENMSS@8494A@2ततो यावल्लीलाप्रणयकुपितास्मि प्रकुपिता सपत्नीव प्राची दिगियमभवत् तावदरुणा ॥
ENMSS@8495@1कथासु ये लब्धरसाः कवीनां ये नानुरज्यन्ति कथान्तरेषु ।
ENMSS@8495@2न ग्रन्थिपर्णप्रणयाश्चरन्ति कस्तूरिकागन्धमृगास्तृणेषु ॥ ८४९५॥
ENMSS@8495A@1कथितावधिजीवितावधिर् गणयन्ती दिवसाननुक्षणम् ।
ENMSS@8495A@2दयिताश्रुभरेण जीव्यते बत रेखा कतिचिद्विलुम्पता ॥
ENMSS@8496@1कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् ।
ENMSS@8496@2निर्विद्येत गृहान्मर्त्यो यत् क्लेशनिवहा गृहाः ॥ ८४९६॥
ENMSS@8497@1कदम्बवृक्षसारस्तु विद्युत्पातनिवारणः ।
ENMSS@8497@2विद्युत्पातस्य नो भीतिर्देवराजेऽति कीर्तनात् ॥ ८४९७॥
ENMSS@8498@1कदर्थितस्यापि हि धैर्यवृत्तेर् न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
ENMSS@8498@2अधोमुखस्यापि कृतस्य वह्नेर् नाधः शिखा यान्ति कदाचिदेव ॥ ८४९८॥
ENMSS@8499@1कदर्यमाक्रोशकमश्रुतं च वराकसम्भूतममान्यमानिनम् ।
ENMSS@8499@2निष्ठूरिणं कृतवैरं कृतघ्नम् एतान् भृशार्तोऽपि न जातु याचेत्

॥ ८४९९॥

ENMSS@8500@1कदर्योपार्जितं वित्तं भोग्यं भाग्यवतां भवेत् ।

ENMSS@8500@2दन्ता अदन्ति कष्टेन जिह्वा ग्रसति लीलया ॥ ८५००॥

ENMSS@8501@1कदली कदली करभः करभः  करिराजकरः करिराजकरः ।

ENMSS@8501@2भुवनत्रितयेऽपि बिभर्ति तुलाम्  इदमूरुयुगं न चमूरुदृशः ॥ ८५०१॥

ENMSS@8502@1कदलीकन्दवद्धर्मो न रोहति बहिर्गतः ।

ENMSS@8502@2छादितस्तु फलं चारु सूते पनसमूलवत् ॥ ८५०२॥

ENMSS@8503@1कदलीकरभसमानां  कलयति यो रूपक्लृप्तिम् अतिरुचिराम् ।

ENMSS@8503@2सोपायाद् दृढयोगं  गमितोरसिकोपकरणविषयतया ॥ ८५०३॥

ENMSS@8504@1कदलीप्रकाण्डरुचिरोरुतरौ  जघनस्थलीपरिसरे महति ।

ENMSS@8504@2रशनाकलापकगुणेन वधूर् मकरध्वजद्विरदमाकलयत् ॥ ८५०४॥

ENMSS@8504A@1कदली बत जङ्घायाः सादृश्यं लभते कथम् ।

ENMSS@8504A@2शैत्यं हि सहजं तत्र तत्र कालानुरूपता ॥

ENMSS@8505@1कदलीवनमध्यस्थो वह्निर्मन्दपराक्रमः ।

ENMSS@8505@2अविवेकिजनस्थाने गुणवान् किं करिष्यति ॥ ८५०५॥

ENMSS@8506@1कदलीसारनिःसारे मृगतृष्णेव चञ्चले ।

ENMSS@8506@2स्थावरे जंगमे सर्वे भूतग्रामे चतुर्विधे ॥ ८५०६॥

ENMSS@8507@1कदा कान्तागारे परिमलमिलत्पुष्पशयने  शयानः कान्तायाः कुचयुगमहं वक्षसि वहन् ।

ENMSS@8507@2अये कान्ते मुग्धे कुटिलनयने चन्द्रवदने  प्रसीदेत्याति क्रोशन् निमिषमिव

नेष्यामि दिवसान् ॥ ८५०७॥

ENMSS@8508@1कदा कार्योद्योगं सकलमपि संन्यस्य सहसा  स्मरन् नित्यं शान्तं हृदयवचनागोचरमहः ।

ENMSS@8508@2विभो मायातीत प्रथम परमानन्दनिबिड  प्रसीदेत्याक्रोशन् निमिषमिव

नेष्यामि दिवसान् ॥ ८५०८॥

ENMSS@8509@1कदा गण्डादञ्चन्मदलुलितसिन्दूरसुभगं  नमस्कुर्वन्

पद्मामलमधुरमूर्तिं गणपतिम् ।

ENMSS@8509@2गजास्य श्रीशम्भोःसुत सुमुख लम्बोदर विभो  प्रसीदेत्याक्रोशन् निमिषमिव

नेष्यामि दिवसान् ॥ ८५०९॥

ENMSS@8510@1कदाचन महाकार्ये लघुरेवोपयुज्यते ।

ENMSS@8510@2किं दूरीकृत्य दीर्घादि दूर्वां क्षेमाय नादृतः ॥ ८५१०॥
ENMSS@8511@1कदाचित् कवचं भेद्यं नाराचेन शरेण वा ।
ENMSS@8511@2अपि वर्षशताघाते ब्राह्मणाशीर्न भिद्यते ॥ ८५११॥
ENMSS@8512@1कदाचित् कष्टेन द्रविणमधमाराधनवशान् मया लब्धं स्तोकं निहितमवनौ तस्करभयात् ।
ENMSS@8512@2ततो नित्ये कश्चित् क्वचिदपि तदाखुर्बिलगृहे- ऽनयल्लब्धोऽप्यर्थोन भवति यदा कर्म विषमम् ॥ ८५१२॥
ENMSS@8513@1कदाचित् कालिन्दीतटविपिनसङ्गीतकरवो मुदाभीरीनारीवदनकमलास्वादमधुपः ।
ENMSS@8513@2रमाशम्भुब्रह्मामरपतिगणेशर्चितपदो जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ८५१३॥
ENMSS@8514@1कदाचित् पाञ्चाली विपिनभुवि भीमेन बहुशः कृशाङ्गि श्रान्तासि क्षणमिह निषीदेति गदिता ।
ENMSS@8514@2शनैः शीतच्छायं तटविटपिनं प्राप्य मुदिता पुरः पत्युः कामाच्छ्वशुरमियमालिङ्गति सती ॥ ८५१४॥
ENMSS@8515@1कदाचित् साधुतामेति पुरः शिशुरसन्मतिः ।
ENMSS@8515@2प्राक् पाण्डुपत्राः कुत्रापि चोयन्ते चारुभूरुहाः ॥ ८५१५॥
ENMSS@8516@1कदाचिदपि संजातम् अकार्यादिष्टसाधनम् ।
ENMSS@8516@2यदनिष्टं तु सत्कार्यान् नाकार्यप्रेरकं हि तत् ॥ ८५१६॥
ENMSS@8517@1कदाचिदारोहति सौधमुन्नतं कदाचिदायाति धरातलं पुनः ।
ENMSS@8517@2कदाचिदास्यं विनिवेश्य जालके प्रियं नवोढा तु सलज्जमीक्षते ॥ ८५१७॥
ENMSS@8518@1कदा ते सानन्दं विततनवदूर्वाञ्चिततटी- कुटीरे तीरे वा सवनमनु मन्वादिकथितैः ।
ENMSS@8518@2कथाबन्धैरन्धङ्करणकरणग्राममनियमाद् यमादुज्झन् भीतिं भगवति भवेयं प्रमुदितः ॥ ८५१८॥
ENMSS@8519@1कदा द्रक्ष्यामि नन्दस्य बालकं नीपमालकम् ।
ENMSS@8519@2पालकं सर्वसत्त्वानां लसत्तिलकभालकम् ॥ ८५१९॥
ENMSS@8520@1कदाधरदले बाले दन्तकेसरशोभिते ।
ENMSS@8520@2भवामि त्वन्मुखाम्भोजे रसिको मधुपो यथा ॥ ८५२०॥
ENMSS@8521@1कदा नु कन्यागमनप्रवादं प्रक्षालयेयं जगति प्ररूढम् ।

ENMSS@8521@2इतीव भास्वान् परिवृद्धतापस् तुलां विशुद्ध्यर्थमिवारुरोह ॥ ८५२१॥

ENMSS@8522@1कदा नु चारुबिम्बोष्ठं तस्याः पद्ममिवाननम् ।

ENMSS@8522@2ईषदुन्नम्य पास्यामि रसायनमिवातुरः ॥ ८५२२॥

ENMSS@8523@1कदा नौ संगमो भावीत्याकीर्णे वक्तुमक्षमम् ।

ENMSS@8523@2अवेत्य कान्तमबला लीलापद्मं न्यमीलयत् ॥ ८५२३॥

ENMSS@8524@1कदापि नाश्रयेत् प्राज्ञोऽकरुणं मिष्टभाषिणम् ।

ENMSS@8524@2प्रच्छन्नमसहिष्णुं वा गुडमिश्रं विषं यथा ॥ ८५२४॥

ENMSS@8525@1कदापि नोग्रदण्डः स्यात् कटुभाषणतत्परः ।

ENMSS@8525@2भार्या पुत्रोऽप्युद्विजते कटुवाक्यात् प्रदण्डतः ॥ ८५२५॥

ENMSS@8525@3पशवोऽपि वशं यान्ति दानैश्च मृदुभाषणैः ॥ ८५२५॥

ENMSS@8525A@1कदापि वेश्या न गुणार्थिनी स्याद् रूपार्थिनी नैव हितार्थिनी च ।

ENMSS@8525A@2विद्यार्थिनी नापि न मन्यसे चेद् वार्तां शृणु त्वं कयवन्नकस्य ॥

ENMSS@8526@1कदा पुण्यक्षेत्रे करकलितरुद्राक्षवलयो दधत् स्वान्ते
शान्तेऽखिलशिवपदं श्रीशिवपदम् ।

ENMSS@8526@2महेश श्रीकण्ठ स्मरहर हर त्र्यम्बक शिव प्रसीदेत्याक्रोशान्
निमिषमिव नेष्यामि दिवसान् ॥ ८५२६॥

ENMSS@8527@1कदा ब्रह्मेशानत्रिदशपतिमुख्यैः सुरगणैः स्तुतं विष्वक्सेनं
जितदनुजसेनं हृदि भजन् ।

ENMSS@8527@2अये विष्णो जिष्णो गरुडरथ विश्वम्भर हरे प्रसीदेत्याक्रोशन्
निमिषमिव
नेष्यामि दिवसान् ॥ ८५२७॥

ENMSS@8528@1कदा भागीरथ्या भवजलधिसंतारतरणेः
स्खलद्वीचीमालाचपलतलविस्तारितमुदः ।

ENMSS@8528@2तमःस्थाने कुञ्जे क्वचिदपि निविश्याहृतमना भविष्याम्येकाकी नरकमथने
ध्यानरसिकः ॥ ८५२८॥

ENMSS@8529@1कदा भिक्षाभक्तैः करकलितगङ्गाम्बुतरलैः शरीरं मे
स्थास्यत्युपरतसमस्तेन्द्रियसुखम् ।

ENMSS@8529@2कदा ब्रह्माभ्यासस्थिरतनुतयारण्यविहगाः पतिष्यन्ति स्थाणुभ्रमहतधियः
स्कन्धशिरसि ॥ ८५२९॥

ENMSS@8530@1कदा मुखं वरतनु कारणादृते तवागतं क्षणमयि कोपपात्रताम् ।

ENMSS@8530@2अपर्वणि ग्रहकलुषेन्दुमण्डला विभावरी कथय कथं भविष्यति ॥ ८५३०॥

ENMSS@8531@1कदा वाराणस्याममरतटिनीरोधसि वसन् वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।

ENMSS@8531@2अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन प्रसीदेति क्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ ८५३१॥

ENMSS@8532@1कदा वा साकेते विमलसरयूतीरपुलिने चरन्तं श्रीरामं जनकतनयालक्ष्मणयुतम् ।

ENMSS@8532@2अये राम स्वामिन् जनकतनयावल्लभ विभो प्रसीदेत्याक्रोशन् निमिषमिव

नेष्यामि दिवसान् ॥ ८५३२॥

ENMSS@8533@1कदा वृन्दारण्ये नवघननिभं नन्दतनयं परीतं गोपीभिः क्षणरुचिमनोज्ञाभिरभितः ।

ENMSS@8533@2गमिष्यामस्तोषं नयनविषयीकृत्य कृतिनो वयं प्रेमोद्रेकस्खलितगतयो वेपथुभृतः ॥ ८५३३॥

ENMSS@8534@1कदा वृन्दारण्ये मिहिरदुहितुः सङ्गमहिते मुहुर्भ्रामं भ्रामं चरितलहरीं गोकुलपतेः ।

ENMSS@8534@2लपन्नुच्चैरुच्चैर्नयनपयसां वेणिभिरहं करिष्ये सोत्कण्ठो निविडमवसेकं विटपिनाम् ॥ ८५३४॥

ENMSS@8535@1कदा वृन्दारण्ये विमलयमुनातीरपुलिने चरन्तं गोविन्दं हलधरसुदामादिसहितम् ।

ENMSS@8535@2अये कृष्ण स्वामिन् मधुरमुरलीवादन विभो प्रसीदेत्याक्रोशन् निमिषमिव

नेष्यामि दिवसान् ॥ ८५३५॥

ENMSS@8536@1कदा शयानो मणिकर्णिकायां कर्णे जपाम्यक्षरमिन्दुमौलेः ।

ENMSS@8536@2अवाप्य मुद्रां गतमोहमुद्रां नालोकयिष्यामि पुनः प्रपञ्चम् ॥ ८५३६॥

ENMSS@8537@1कदा श्रीमत्पङ्केरुहवनविकाशिप्रसृमर- प्रथापुञ्जं तेजः किमपि कलयन्नौपनिषदम् ।

ENMSS@8537@2ग्रहेश श्रीभानो मिहिर तरणे सूर्य सवितः प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ ८५३७॥

ENMSS@8538@1कदा संसारजालान्तर्बद्धं त्रिगुणरज्जुभिः ।

ENMSS@8538@2आत्मानं मोचयिष्यामि शिवभक्तिशलाकया ॥ ८५३८॥

ENMSS@8539@1कदा सम्यग् ध्यायन्ननुपमचरित्रं मणिगण- स्फुरद्भूषाचित्रं पुररिपुकलत्रं किमपि तत् ।

ENMSS@8539@2शिवे दुर्गे कात्यायनि जननि भक्तप्रणयिनि प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ ८५३९॥

ENMSS@8540@1कदा हि मूर्खो वचनेषु भीतः खलो न कुत्रापि छलेष्वदक्षः ।

ENMSS@8540@2अन्धेन काचिद् युवती हि दृष्टा कस्यात्र कामेषु भवेच्च लज्जा ॥ ८५४०॥

ENMSS@8541@1कदा ह्यहं समेष्यामि भरतेन महात्मना ।

ENMSS@8541@2शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन ॥ ८५४१॥

ENMSS@8542@1कनकं सुगन्धि तव तन्वि वपुर् मधुरो मणिश्च सखि तेऽप्यधरम् ।

ENMSS@8542@2निगडं सुखस्य करणं भवतीं सृजतो विधेर्निरवधिर्महिमा ॥ ८५४२॥

ENMSS@8543@1कनककमलकान्तैः सद्य एवाम्बुधौतैः श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः ।

ENMSS@8543@2उषसि वदनबिम्बैरंससंसक्तकेशैः श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य ॥ ८५४३॥

ENMSS@8544@1कनककमलकान्तैराननैः पाण्डुगण्डैर् उपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः ।

ENMSS@8544@2मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान् स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ॥ ८५४४॥

ENMSS@8545@1कनककलशश्रेणी यत्र प्रभाकरचुम्बनैर् अतिखरकराघातैर्मध्यन्दिने शिथिलीकृता ।

ENMSS@8545@2द्रवति भजते दार्ढ्यं सिक्ता समीरणकम्पित- ध्वजपटसमानीतस्वर्गापगाजलबिन्दुभिः ॥ ८५४५॥

ENMSS@8546@1कनककुन्डलमण्डितभाषिणे शकरिपुर्विषयान् दश विद्विषः ।

ENMSS@8546@2मगधकेकयकेरलकोशलान् करिशतं च मदालसलोचनम् ॥ ८५४६॥

ENMSS@8547@1कनकक्रमुकायितं पुरस्ताद् अथ पङ्केरुहकोरकायमाणम् ।

ENMSS@8547@2क्रमशः कलशायमानमास्ते सुदृशो वक्षसि कस्य भागधेयम् ॥ ८५४७॥

ENMSS@8548@1कनकच्छत्रमम्बायाः कुरुते कुतुकं महत् ।

ENMSS@8548@2विशदेव दृशोरन्तर्यन्निर्गच्छति मूर्धनि ॥ ८५४८॥

ENMSS@8549@1कनकद्रवकान्तिकान्तया मिलितं राममुदीक्ष्य कान्तया ।
ENMSS@8549@2चपलायुतवारिदभ्रमान् ननृते चातकपोतकैर्वने ॥ ८५४९॥
ENMSS@8549A@1कनकद्रवगौरमम्बरं दधतोरुद्वितयेन सुन्दरम् ।
ENMSS@8549A@2उदयन्मणिनूपुरप्रभा- सरणिश्रेणिजटालजानुकम् ॥
ENMSS@8550@1कनकनिकषभासा सीतयालिङ्गिताङ्गो नवकुवलयदामश्यामवर्णाभिरामः ।
ENMSS@8550@2अभिनव इव विद्युन्मण्डितो मेधखण्डः शमयतु मम तापं सर्वतो रामचन्द्रः ॥ ८५५०॥
ENMSS@8551@1कनकनिकषस्वच्छे राधापयोधरमण्डले नवजलधरश्यामामात्मद्युतिं प्रतिबिम्बिताम् ।
ENMSS@8551@2असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपञ् जयति जनितव्रीडानम्रप्रियाहसितो हरिः ॥ ८५५१॥
ENMSS@8552@1कनकभङ्गपिशङ्गदलैर्दधे सरजसारुणकेशरचारुभिः ।
ENMSS@8552@2प्रियविमानितमानवतीरुषां निरसनैरसनैरवृथार्थता ॥ ८५५२॥
ENMSS@8553@1कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते ।
ENMSS@8553@2न स विरौति न चापि न शोभते भवति योजयितुर्वचनीयता ॥ ८५५३॥
ENMSS@8554@1कनकमृगमुदस्य स्वां कुटीं संप्रविष्टः क्वचिदपि न वधूटीं नोददर्शाङ्गनादौ ।
ENMSS@8554@2तदपि स रघुवीरः पर्णशालागृहान्तर् न विशति हृदयाशातन्तुनाशातिभीरुः ॥ ८५५४॥
ENMSS@8555@1कनकरसमसृणवर्तित- हयगन्धामूलमिश्रपर्युषितम् ।
ENMSS@8555@2माहिषमिह नवनीतं गतबीजे कनकफलमध्ये
ENMSS@8556@1गोमयगाढोद्वर्तित- पूर्वं पश्चादनेन संलिप्तम् ।
ENMSS@8556@2भवति हयलिङ्गसदृशं लिङ्गं कठिनाङ्गनादयितम् ॥ ८५५६॥
ENMSS@8557@1कनकस्य तु पञ्चाङ्गं कर्पूरं केतकीरजः ।
ENMSS@8557@2आत्मशुक्रेण संयुक्तं वश्यकृद् भक्षितं स्त्रियाः ॥ ८५५७॥
ENMSS@8558@1कनकहरिणं हत्वा रामो ययौ निजमाश्रमं जनकतनयां प्राणेभ्योऽपि प्रियामविलोकयन् ।
ENMSS@8558@2दृढमुपगतैर्बाष्पापूरैर्निमीलितलोचनो न विशति कुटीमाशातन्तुप्रणाशभयादसौ ॥ ८५५८॥
ENMSS@8559@1कनकाचलकान्तिचौर्यभाजोः कुचयोः कुङ्कुमपङ्कपूजनानि ।

ENMSS@8559@2अनिबन्धनमेव बन्धनं ते कृशताभागिनि किं नु मध्यभागे ॥ ८५५९॥

ENMSS@8560@1कनकाचलजित्वरस्तनीनां रमणीनां खलु यत्र सन्निवेशः ।

ENMSS@8560@2मनसः परमाणुतां वदन्तः कथमद्यापि न तार्किकास्त्रपन्ते ॥ ८५६०॥

ENMSS@8561@1कनिष्ठाङ्गुलिवत् स्थूलं पूर्वार्धकृतकुञ्चितम् ।

ENMSS@8561@2अभावे दन्तकाष्ठस्य प्रतिषिद्धदिनेऽपि च ।

ENMSS@8561@3अपां द्वादशगण्डूषैर्मुखशुद्धिर्भविष्यति ॥ ८५६१॥

ENMSS@8562@1कनिष्ठेषु च सर्वेषु समत्वेनानुवर्तते ।

ENMSS@8562@2समोपभोगजीवेषु यथैव तनयेषु च ॥ ८५६२॥

ENMSS@8562A@1कनीनिकाकान्तिभिरञ्जनं दृशोः स्मितत्विषा चन्दनचर्च्चनं हृदः ।

ENMSS@8562A@2कटाक्षभाभिर्नवमुत्पलं श्रुतेस् तदा वधूनामिति भूषणान्यभान् ॥

ENMSS@8562B@1कनीनिकेव नेत्रस्य कुसुमस्येव सौरभम् ।

ENMSS@8562B@2सम्यक्त्वमुच्यते सारं सर्वेषां धर्मकर्मणाम् ॥

ENMSS@8563@1कन्थां वहसि दुर्बुद्धे गर्दभैरपि दुर्वहाम् ।

ENMSS@8563@2शिखायज्ञोपवीताभ्यां भारः कस्ते भविष्यति ॥ ८५६३॥

ENMSS@8563A@1कन्दमूलानि ये मूढाः सूर्यदेवे जर्नादने ।

ENMSS@8563A@2भक्षयन्ति नराः पार्थ ते वै नरक गामिनः ॥

ENMSS@8564@1कन्दर्पकण्डूलकटाक्षबन्दीर् इन्दीवराक्षीरभिलष्यमाणान् ।

ENMSS@8564@2मन्दस्मिताधारमुखारविन्दान् वन्दामहे वल्लवधूर्तपादान् ॥ ८५६४॥

ENMSS@8565@1कन्दर्पकन्दलि सलीलदृशा लुनीहि कोपाङ्कुरं चरणयोः शरणातिथिः स्याम् ।

ENMSS@8565@2पश्य प्रसीद चरमाचलचूलचुम्बि बिम्बं विधोर्लवलपाण्डुरमस्तमेति ॥ ८५६५॥

ENMSS@8566@1कन्दर्पज्वरसंज्वराकुलतनोराश्चर्यमस्याश्चिरं चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु संताम्यति ।

ENMSS@8566@2किं तु क्लान्तिवशेन शीतलतरं त्वामेकमेव क्षणं ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥ ८५६६॥

ENMSS@8567@1कन्दर्पदर्पकलिताङ्गमनोहराणां प्रेम्णा स्वयं सुरतमन्दिरमागतानाम् ।

ENMSS@8567@2अङ्गानि कोमलतराणि मनोरमाणां धन्या नराः सरभसं हि परिष्वजन्ते ॥ ८५६७॥

ENMSS@8568@1कन्दर्पदेवस्य विमानसृष्टिः प्रासादमाला रसपार्थिवस्य ।
ENMSS@8568@2चैत्रस्य सर्वर्तुविशेषचिह्नं दोलाविलासः सुदृशां रराज ॥ ८५६८॥
ENMSS@8569@1कन्दर्पप्रतिभूनिवेशितवलीरेखावलीशोभिते
लीलोदश्चितबाहुपाशयुगलापातैश्च भोः कामुकाः ।
ENMSS@8569@2वेश्यानां विपुले नितम्बफलके शारैः कटाक्षैरितो यद्वः क्रीडितमत्र
दास्यति पुरो दारिद्र्यमेवोत्तरम् ॥ ८५६९॥
ENMSS@8570@1कन्दर्पप्रतिमल्लकान्तिविभवं कादम्बिनीबान्धवं
वृन्दारण्यविलासिनीव्यसनिनं वेषेण भूषामयम् ।
ENMSS@8570@2मन्दस्मेरमुखाम्बुजं मधुरिमव्यामृष्टबिम्बाधरं वन्दे
कन्दलितार्द्रयौवनवनं कैशोरकं शार्ङ्गिणः ॥ ८५७०॥
ENMSS@8571@1कन्दर्पश्च रतिश्च कुङ्कुममृदालेपेन मूषाद्वयं कुर्वाते रससाधनाय
विधिवत् कस्तूरिकामुद्रया ।
ENMSS@8571@2अन्तर्दर्पकबाणतापितयुवप्रेमोष्मभूयस्तया निर्याता रसबिन्दवो बहिरितो
हारस्य मुक्ताच्छलात् ॥ ८५७१॥
ENMSS@8572@1कन्दर्पस्य जगत्त्रयीविजयिनः साम्राज्यदीक्षागुरुः
कान्तामानशिलोञ्छवृत्तिरखिलध्वान्ताभिचा रे कृती ।
ENMSS@8572@2देवस्त्र्यम्बकमौलिमण्डनसरित्तीरस्थलीतापसः श्रृङ्गाराध्वरदीक्षितो
विजयते राजा द्विजानामयम् ॥ ८५७२॥
ENMSS@8573@1कन्दर्पादपि सुन्दराकृतिरिति प्रौढोत्सलद्रागया वृद्धत्वं
वरयोषितोऽनयदिति त्रासाकुलस्वान्तया ।
ENMSS@8573@2मारस्यापि शरैरभेद्यहृदिति श्रद्धाभरप्रह्वया पायाद् वः
स्फुटबाष्पकम्पपुलकं रत्या जिनो वन्दितः ॥ ८५७३॥
ENMSS@8574@1कन्दर्पादपि सुन्दरो रविमहाः प्रत्यर्थिसीमन्तिनी-
वक्त्राम्भोजसुधाकरोऽतिविभवो युद्धेषु पार्थोपमः ।
ENMSS@8574@2रक्षाकृज्जगतः स्वकीर्तिविदितो रामोऽस्तु युक्तो मुदा दानीं शङ्करसेवको
वरगुणो नीत्युत्तमः सर्वदा ॥ ८५७४॥
ENMSS@8575@1कन्दर्पे नलकूवरे कुमुदिनीकान्तेऽप्यवज्ञावतां त्वत्सौन्दर्यकथासु
तासु मरुतां वृत्तासु कौतूहलात् ।
ENMSS@8575@2प्राप्ता तानवमुर्वशी रतिरतिक्लान्ता हता रोहिणी जाता किंच
खरस्मरज्वरभरा रम्भापि रम्भातनुः ॥ ८५७५॥
ENMSS@8576@1कन्दर्पैककृपाणवल्लरि वने कस्माद् अकस्यादियं हे कालागुरुबालमञ्जरि

हहा मोहादिह प्रारुहः ।

ENMSS@8576@2सह्यन्तामुपजातसौरभपरिष्वङ्गैस्तदङ्गैरिमाः कान्तैः

कान्तपुरंध्रिकुन्तलभरच्छायैः कुठारच्छिदः ॥ ८५७६॥

ENMSS@8577@1कन्दलयत्यानन्दं निन्दति मन्दानिलेन्दुचन्दनकम् ।

ENMSS@8577@2मन्दयति मन्दभावं संधत्ते संपदोऽपि सत्सङ्गः ॥ ८५७७॥

ENMSS@8577A@1कन्दलीषु कुटजेषु मालती- जालकेषु नवकेतकीषु च ।

ENMSS@8577A@2कन्थरासु मधुना सुकेकिनां संविभक्त इव वारिदोदयः ॥

ENMSS@8578@1कन्दाग्रात् प्रोत्थितः प्राणः सदा वहति देहिनाम् ।

ENMSS@8578@2हृद्गतं जीवमाश्वास्य बहिर्गत्वा निवर्तते ॥ ८५७८॥

ENMSS@8579@1कन्दुको भित्तिनिःक्षिप्त इव प्रतिफलन् मुहुः ।

ENMSS@8579@2आपतत्यात्मनः प्रायो दोषोऽन्यस्य चिकीर्षितः ॥ ८५७९॥

ENMSS@8580@1कन्दे सुन्दरता दले सरलता वर्णस्य संपूर्णता स्कन्धे बन्धुरता फले

सरसता कस्यापरस्येदृशी ।

ENMSS@8580@2धन्यस्त्वं सहकार खिन्नपथिकाधार स्थितः सत्पथे दीर्घायुर्भव

साधु साधु विधिना मेधाविना निर्मितः ॥ ८५८०॥

ENMSS@8581@1कन्दैः कन्दलितं वनैः किशलितं वल्लीभिरुज्जृम्भितं वृक्षैः

पल्लवितं जनैः प्रमुदितं धाराधरे वर्षति ।

ENMSS@8581@2भ्रातश्चातक पातकं किमपि ते सम्यग् न जानीमहे येनास्मिन् न पतन्ति

चञ्चुपुटके द्वित्राः पयोबिन्दवः ॥ ८५८१॥

ENMSS@8582@1कन्धरां समपहाय कं धरां प्राप्य संयति जहास कस्यचित् ।

ENMSS@8582@2मां किलानमयतः स्वपूर्तये दुर्भरात् किमुदराद्वियोगतः ॥ ८५८२॥

ENMSS@8583@1कन्धरावनतस्योर्वी गतस्याधोमुखस्य ते ।

ENMSS@8583@2लज्जा न नाम निर्लज्जा गर्वो न गलितः कथम् ॥ ८५८३॥

ENMSS@8584@1कन्यां कामप्युदूह्य प्रविजहदुदयद्यौवनामज्ञ एनां द्रव्याशापाशकृष्टो

भ्रमति चिरतरं हन्त देशान्तरेषु ।

ENMSS@8584@2अन्योन्याश्लेषवाञ्छाविगलितवयसोरात्तमालिन्यम् अत्योर् दंपत्योर्व्याकृतैवं

हतविधिरुभयोर्लोकयोः शोकयोगम् ॥ ८५८४॥

ENMSS@8584A@1कन्यां छत्रं फलं पक्वं दीपमन्नं महाध्वजम् ।

ENMSS@8584A@2मन्त्रं वा लभते यो हि तस्य चिन्तितसिद्धयः ॥

ENMSS@8585@1कन्यां भुङ्क्ते रजःकालेऽग्निः शशी लोमदर्शने ।

ENMSS@8585@2स्तनोद्भवेषु गन्धर्वास्तत् प्रागेव प्रदीयते ॥ ८५८५॥
ENMSS@8586@1कन्यां रूपवतीं दृष्ट्वा मोहं गच्छेन् महानपि ।
ENMSS@8586@2चण्डाल्यामप्यरुन्धत्यां वसिष्ठो मोहितोऽभवत् ॥ ८५८६॥
ENMSS@8587@1कन्याकर्तितसूत्रेण बद्धापामार्गमूलिका ।
ENMSS@8587@2ऐहाहिकज्वरं हन्ति शिखायामतिवेगतः ॥ ८५८७॥
ENMSS@8588@1कन्या काचिदिहापि कर्मणि पणः स्यादित्यसूयाचलत्-
सीतापाङ्गमयूखमांसलमुखज्योत्स्नाविलुप्तीं दिवम् ।
ENMSS@8588@2कुर्वाणेन रघूद्वहेन चकृषे नारायणीयं धनुः  संधायाथ शरश्च
भार्गवगतिच्छेदादमोघीकृतः ॥ ८५८८॥
ENMSS@8589@1कन्या कौतुकमात्रकेण विधवा संमर्दमात्रार्थिनी  वेश्या वित्तलवेच्छया
स्वगृहिणी गत्यन्तरासंभवात् ।
ENMSS@8589@2वाञ्छन्तीत्थमनेककारणवशात् पुंभिः स्त्रियः संगमं
शुद्धस्नेहनिबन्धना परवधूः पुण्यैः परैः प्राप्यते ॥ ८५८९॥
ENMSS@8590@1कन्यागते सवितरि तिष्ठन्ति पितरो गृहे ।
ENMSS@8590@2शून्यं प्रेतपुरं तत्र यावद् वृश्चिकदर्शनम् ॥ ८५९०॥
ENMSS@8590A@1कन्या-गो-भूम्यलीकानि न्यासापहरणं तथा ।
ENMSS@8590A@2कूटसाक्ष्यं च पञ्चेति स्थूलासत्यानि संत्यजेत् ॥
ENMSS@8590B@1कन्यागोशङ्खभेरीदधिफलकुसुमं पावको दीप्यमानो  नागेन्द्रोऽश्वो
रथो वा नृपतिरभिमुखः पूर्णकुम्भो ध्वजो वा ।
ENMSS@8590B@2उत्क्षिप्ता नैव भूमिर्खलचरयुगलं सिद्धमन्नं शतायुर् वेश्यास्त्री
मद्यमांसो हितमपि गदितं मङ्गलं प्रस्थितानाम् ॥
ENMSS@8591@1कन्यादात्रे तु ह्यधनं दस्यवे सधनं नरम् ।
ENMSS@8591@2गुप्तं जिघांसवे नैव विज्ञातमपि दर्शयेत् ॥ ८५९१॥
ENMSS@8592@1कन्या निष्कासिता श्रेष्ठा वधूः श्रेष्ठा प्रवेशिता ।
ENMSS@8592@2अन्नं संकलितं श्रेष्ठं धर्मः श्रेष्ठो दिने दिने ॥ ८५९२॥
ENMSS@8593@1कन्याप्रसूतस्य धनुःप्रसङ्गाद्  अङ्गाधिकासादितविक्रमस्य ।
ENMSS@8593@2धनंजयाधीनपराक्रमस्य  हिमस्य कर्णस्य च को विशेषः ॥ ८५९३॥
ENMSS@8594@1कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं  सम्बन्धे विपरीतमेव
तदभूदाराधनं ते मयि ।
ENMSS@8594@2त्वं कामेन तथाविधोऽस्यपहृतः सम्बन्धबीजं च तद्  घोरेऽस्मिन्
मम जीवलोकनरके पापस्य धिग जीवितम् ॥ ८५९४॥

ENMSS@8595@1कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
ENMSS@8595@2बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥ ८५९५॥
ENMSS@8595A@1कन्याविक्रयिणश्चैव रसविक्रयिणस्तथा ।
ENMSS@8595A@2विषविक्रयिणश्चैव नरा निरयगामिनः ॥
ENMSS@8596@1कन्ये समालोकय कान्यकुब्जम्  अकुब्जकीर्तिं नरनाथमेनम् ।
ENMSS@8596@2ककुब्जये यस्य धरापरागैर् भवन्ति वारांनिधयः स्थलानि ॥ ८५९६॥
ENMSS@8597@1कपटं च बहुतरं न जानाति हि कश्चन ।
ENMSS@8597@2कौलिको विष्णुरूपेण भुञ्जति राजकन्यकाम् ॥ ८५९७॥
ENMSS@8598@1कपटकलितनिद्रं मन्दमालोकयन्ती  प्रियमधरमधूनि स्वेच्छया पातुमैच्छत् ।
ENMSS@8598@2मदनमदमनोज्ञा लज्जयाकृष्टचित्ता  मुकुलितमुखपद्मा चित्रसंस्थेव तस्थौ ॥ ८५९८॥
ENMSS@8599@1कपटनटनकोटेर्धूर्जटेः सन्नटस्योद्-  भटविकटजटाभिस्ताडिताः शैलकूटात् ।
ENMSS@8599@2खरतरकरघातैरुत्थिता दिक्स्थितास्ते  नभसि निरवलम्बं दन्तिनः संचरन्ति ॥ ८५९९॥
ENMSS@8600@1कपटपटुता द्रोहे चित्तं सतां च विमानने  मतिरपनये शाठ्यं मित्रे सुतेष्वपि वञ्चना ।
ENMSS@8600@2कृतकमधुरा वाक् प्रत्यक्षं परोक्षविघातिनी  कलियुगमहाराजस्यैताः स्वराज्यविभूतयः ॥ ८६००॥
ENMSS@8601@1कपटवचनभाजा केनचिद् वारयोषा  सकलरसिकगोष्ठीवञ्चिका वञ्चितासौ ।
ENMSS@8601@2इति विहसति रिङ्गद् भृङ्गविक्षिप्तचक्षुर् विकचकुसुमकान्तिच्छद्मना केलिकुञ्जः ॥ ८६०१॥
ENMSS@8602@1कपटशतनदीष्णैर्वैरिभिर्वञ्चितोऽपि  निकृतिकरणदक्षोऽप्यत्र संसारभीरुः ।
ENMSS@8602@2तनुवचनमनोभिर्वक्रतां यो न याति  गतमलमृजुमानं तस्य साधोर्वदन्ति ॥ ८६०२॥
ENMSS@8603@1कपटादपि रिपुहननं  कुर्यादिति नीतिरौशनसी ।
ENMSS@8603@2हननमृते च गुरुमते  बन्धादि विधीयते रिपोः कपटैः ॥ ८६०३॥
ENMSS@8604@1कपटेन पुनर्नैव व्यापारो यदि या कृतः ।

ENMSS@8604@2पुनर्न परिपाकार्हा हण्डिका काष्ठनिर्मिता ॥ ८६०४॥

ENMSS@8605@1कपर्दी भूतिसंपन्नो जगतीपतिरद्वयः ।

ENMSS@8605@2धिग्दैवमव्ययः सोऽपि भृङ्गी शुष्यत्यतो भृशम् ॥ ८६०५॥

ENMSS@8606@1कपाटमुद्घाटय चारुनेत्रे कामोऽस्ति शत्रुर्मम पृष्ठलग्नः ।

ENMSS@8606@2आपूरितं तस्य शरैः शरीरं चन्द्रानने त्वां शरणं प्रपन्नः

॥ ८६०६॥

ENMSS@8607@1कपाटमुद्घाटय लोललोचने कन्दर्पशत्रुर्मम पृष्ठलग्नः ।

ENMSS@8607@2आकृष्य बाणं शिथिलीकरोति चन्द्रानने त्वां शरणागतोऽस्मि ॥ ८६०७॥

ENMSS@8608@1कपाटविस्तीर्णमनोरमोरः- स्थलस्थितिश्रीललनस्य तस्य ।

ENMSS@8608@2आनन्दिताशेषजना बभूव सर्वाङ्गसङ्गिन्यपरैव लक्ष्मीः ॥ ८६०८॥

ENMSS@8609@1कपालं वृक्षमूलानि कुचेलससहायता ।

ENMSS@8609@2समता चैव सर्वस्मिन्न् एतन् मुक्तस्य लक्षणम् ॥ ८६०९॥

ENMSS@8610@1कपाल उपहारश्च संतानः संगतस्तथा ।

ENMSS@8610@2उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ ८६१०॥

ENMSS@8611@1अदृष्टनर आदिष्ट आत्मामिष उपग्रहः ।

ENMSS@8611@2परिक्रयस्तथोच्छिन्नस्तथा च परदूषणः ॥ ८६११॥

ENMSS@8612@1स्कन्धोपनेयः संधिश्च षोडशः परकीर्तितः ।

ENMSS@8612@2इति षोडशकं प्राहुः संधिं सन्धिविचक्षणाः ॥ ८६१२॥

ENMSS@8613@1कपालसंधिर्विज्ञेपः केवलं समसंधिकः ।

ENMSS@8613@2संप्रदानाद् भवति य उपहारः स उच्यते ॥ ८६१३॥

ENMSS@8614@1कपाले गम्भीरः कुहरिणि जटासंधिषु कृशः

समुत्तालश्चूडाभुजगफणरत्नव्यतिकरे ।

ENMSS@8614@2मृदुर्लेखाकोणे रयवशविलोलस्य शशिनः पुनीयाद् दीर्घं वो हरशिरसि

गङ्गाकलकलः ॥ ८६१४॥

ENMSS@8615@1कपाले मार्जारः पय इति करान् लेढि शशिनः तरुच्छिद्रप्रोतान् बिसमिति

करी संकलयति ।

ENMSS@8615@2रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति प्रभामत्तश्चन्द्रो

जगदिदमहो विप्लवयति ॥ ८६१५॥

ENMSS@8616@1कपाले यद्वदापः स्युः श्वदृतौ वा यथा पयः ।

ENMSS@8616@2आश्रयस्थानदोषेण वृत्तहीने तथा श्रुतम् ॥ ८६१६॥

ENMSS@8617@1कपालैर्यो बद्धः कथमखिलविश्वप्रभुरसाव् अनार्यैरस्माभिः परमियमपूर्वैव रचना ।
ENMSS@8617@2यदिन्दोः पीयूषद्रवमयमयूखोत्करकिरः कलङ्कोरत्नं तु प्रतिफणमनर्घं विषभृताम् ॥ ८६१७॥
ENMSS@8618@1कपिकच्छूमूलेन च निजचरणविलेपनाद् भवति ।
ENMSS@8618@2बीजस्तम्भः पुंसो बहुशो दृष्टः प्रयोगोऽयम् ॥ ८६१८॥
ENMSS@8619@1कपिकच्छूमूलेन च मदविह्वलछागमूत्रपिष्टेन ।
ENMSS@8619@2मिलनं स्तब्धीकरणं मूलेन दुरालभायाश्च ॥ ८६१९॥
ENMSS@8620@1कपिकुलनखमुखखण्डित- तरुतलफलभोजनो वरं पुरुषः ।
ENMSS@8620@2न पुनर्धनमदगर्वित- मुखभङ्गकदर्थिता वृत्तिः ॥ ८६२०॥
ENMSS@8621@1कपिरपि च कापिशायन- मदमत्तो वृश्चिकेन संदष्टः ।
ENMSS@8621@2अपि च पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य ॥ ८६२१॥
ENMSS@8622@1कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ।
ENMSS@8622@2वेदाक्षरविचारेण स शूद्रो नरकं व्रजेत् ॥ ८६२२॥
ENMSS@8622A@1कपिलानां सहस्राणि यो विप्रेभ्यः प्रयच्छति ।
ENMSS@8622A@2एकस्य जीवितं दद्यान् न च तुल्यं युधिष्ठिर ॥
ENMSS@8623@1कपीनां वसयाश्वानां वह्निदाहसमुद्भवा ।
ENMSS@8623@2व्यथा विनाशमभ्येति तमः सूर्योदये यथा ॥ ८६२३॥
ENMSS@8624@1कपेर्मध्यं शिशुर्बद्धा यथोन्नतपदं व्रजेत् ।
ENMSS@8624@2तद्वद्रक्षकमाश्रित्य पदमुन्नतमाश्रयेत् ॥ ८६२४॥
ENMSS@8625@1कपोलं पक्ष्मभ्यः कलयति कपोलात् कुचतटं कुचान्मध्यं मध्यान्नवमुदितनाभीसरसिजम् ।
ENMSS@8625@2न जानीमः किं नु क्व नु कियदनेन व्यवसितं यदस्याः प्रत्यङ्गं नयनजलबिन्दुर्विहरति ॥ ८६२५॥
ENMSS@8626@1कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
ENMSS@8626@2यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ॥ ८६२६॥
ENMSS@8627@1कपोलपत्रान् मकरात् सकेतुर् भ्रूभ्यां जिगीषुर्धनुषां जगन्ति ।
ENMSS@8627@2इहावलम्ब्यास्ति रतिं मनोभू रज्यद्वयस्यो मधुनाधरेण ॥ ८६२७॥
ENMSS@8628@1कपोलपालीं तव तन्वि मन्ये लावण्यधन्ये दिशमुत्तराख्याम् ।
ENMSS@8628@2विभाति यस्यां ललितालकायां मनोहरा वै श्रवणस्य लक्ष्मीः ॥ ८६२८॥

ENMSS@8629@1कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ ।
ENMSS@8629@2अपश्यन्ताविवान्योन्यमीदृक्षां क्षमतां गतौ ॥ ८६२९॥
ENMSS@8630@1कपोलयोरिन्दुजितोरमुष्याः प्रसर्पतोरेव मिथो जयाय ।
ENMSS@8630@2स्वयं स्वयंभूः कृतरोधमन्तर् व्यधत्त नासामिह साम्यदण्डम् ॥ ८६३०॥
ENMSS@8631@1कपोलव्यालोलश्रवणनवमाकन्दकलिका- मरन्दव्यामिश्रास्तव वरतनु स्वेदपृषतः ।
ENMSS@8631@2रतिव्यत्यासस्य श्रममपलपेयुर्यदि भवेद् अभेदोपक्रान्तक्वणितरशनादाम जघनम् ॥ ८६३१॥
ENMSS@8632@1कपोलादुड्डीनैर्भयवशविलोलैर्मधुकरैर् मदाम्भःसंलोभादुपरि पतितुं बद्धपटलैः ।
ENMSS@8632@2चलद्बर्हच्छत्रश्रियमिव दधानोऽतिरुचिराम् अविघ्नं हेरम्बो भवदघविघातं घटयतु ॥ ८६३२॥
ENMSS@8632A@1कपोलावुन्मीलत्पुलकनिकुरम्बौ मयि मनाङ् मृशत्यन्तःस्मेरस्तबकितमुखाम्भोरुहरुचः ।
ENMSS@8632A@2कथंकारं शक्याः परिगदितुमिन्दीवरदृशो दलद्द्राक्षानिर्यद्रसभरसपक्षा भणितयः ॥
ENMSS@8633@1कपोले जानक्याः करिकलभदन्तद्युतिमुषि स्मरस्मेरं गण्डोड्डमरपुलकं वक्त्रकमलम् ।
ENMSS@8633@2मुहुः पश्यञ् शृण्वन् रजनिचरसेनाकलकलं जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥ ८६३३॥
ENMSS@8634@1कपोले पत्त्रालीं पुलकिनि विधातुं व्यवसितः स्वयं श्रीराधायाः करकलितवर्तिर्मधुरिपुः ।
ENMSS@8634@2अभूद् वक्त्रेन्दौ यन् निहितनयनः कम्पितभुजस् तदेतत् सामर्थ्यं तदभिनवरूपस्य जयति ॥ ८६३४॥
ENMSS@8635@1कपोले पत्त्राली करतलनिरोधेन मृदिता निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
ENMSS@8635@2मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥ ८६३५॥
ENMSS@8636@1कपोले पाण्डुत्वं किमपि जलधारां नयनयोस् तनौ कार्श्यं दैन्यं वचसि हृदि दावानलशिखाम् ।

ENMSS@8636@2अवज्ञां प्राणेषु प्रकृतिषु विपर्यासमधुना  किमन्यद् वैराग्यं सकलविषयेष्वाकलयते ॥ ८६३६॥

ENMSS@8637@1कपोलेऽम्भोजाक्ष्याः प्रियदशनचिह्नं प्रियदृशोः  सरोजाक्षी वक्रच्युतभुजगवल्लीरसलवम् ।

ENMSS@8637@2सपत्नी दृष्ट्वारादुरुतरविनिश्वासतरलो-  न्नतोरोजद्वन्द्वं रहसि शनकै रोदिति मुहुः ॥ ८६३७॥

ENMSS@8638@1कपोलौ लोलाक्ष्या मधुमुकुललीलाविजयिना-  वुरोजौ रेजाते कनककलशाभोगसुभगौ ।

ENMSS@8638@2दृशौ वातोत्खेलत्तरलतरनीलोत्पलरुचौ  वचो नो जानीमः किममृतमयं किं विषमयम् ॥ ८६३८॥

ENMSS@8638A@1कफमूत्रमलप्रायं निर्जन्तुर्जगतीतले ।

ENMSS@8638A@2यत्नाद्यदुत्सृजेत्साधुः सोत्सर्गसमितिर्भवेत् ॥

ENMSS@8639@1कबन्धः परिघाभासो दृश्यते भास्करान्तिके ।

ENMSS@8639@2जग्रास सूर्यं स्वर्भानुरपर्वणि महाग्रहः ॥ ८६३९॥

ENMSS@8640@1कमठपृष्ठकठोरमिदं धनुर् मधुरमूर्तिरसौ रघुनन्दनः ।

ENMSS@8640@2कथमधिज्यमनेन विधीयताम्  अहह तात पणस्तव दारुणः ॥ ८६४०॥

ENMSS@8641@1कमण्डलूपमोऽमात्यस्तनुत्यागी बहुग्रहः ।

ENMSS@8641@2नृपते किङ्कणो मूर्खो दरिद्रः किंवराटकः ॥ ८६४१॥

ENMSS@8642@1कमनीयतानिवासः  कर्णस्तस्या विचित्रमणिभूषः ।

ENMSS@8642@2सविधप्रसूतरत्नं  शङ्खनिधिं दूरतरमकरोत् ॥ ८६४२॥

ENMSS@8642A@1कमनीयतारहारा  चन्दनपरिहसितचारुनीहारा ।

ENMSS@8642A@2परिचितपाण्ड्यविहारा  कमलमुखीयं कराश्चदुपहारा ॥

ENMSS@8643@1कमनेकतमादानं  सुरतनरजतुच्छलं तदासीनम् ।

ENMSS@8643@2अप्यतिमानं खमते  सोऽगनिकानं नरं जेतुम् ॥ ८६४३॥

ENMSS@8644@1कमलं कवलीकृतं न वा  सलिलं वा न सलीलमाहुतम् ।

ENMSS@8644@2करिणा परिणामदारुणो  ददृशे विन्ध्यवने मृगाधिपः ॥ ८६४४॥

ENMSS@8645@1कमलं तव पदकमले  विमले मम देहि चञ्चरीकत्वम् ।

ENMSS@8645@2नान्यत् किमपि च काङ्क्षे  पश्चाद् गानं किमस्ति भिक्षायाः ॥ ८६४५॥

ENMSS@8646@1कमलं भवनं रजोऽङ्गरागो  मधु पानं मधुराः प्रियाप्रलापाः ।

ENMSS@8646@2शयनं मृदु केसरोपधानं  भ्रमरस्याम्भसि का न राजलीला ॥ ८६४६॥

ENMSS@8646A@1कमलदृशोऽधिकपोलं  दशनक्षतपङ्क्तिराभाति ।

ENMSS@8646A@2यूनो वशयितुमिच्छोर् जपमालेवातनोः प्रवालमयी ॥

ENMSS@8647@1कमलनयन युष्मद्विप्रयोगातुरा सा  सरसि सरसिजान्तः स्नातुकामा ममज्ज ।

ENMSS@8647@2द्रुततरमनुयायाद् यावदूर्ध्वं कृशाङ्गी  हरि हरि हरिणाक्षी पङ्कमग्ना बभूव ॥ ८६४७॥

ENMSS@8648@1कमलनयनाकर्णाभूषे स्फुरन्मणिमञ्जुले  त्रिभुवनतले दृष्ट्वामोदं प्रयाति न को युवा ।

ENMSS@8648@2शमभटशिरश्छेत्तुं सज्जीकृते बत वेधसा  न किमु कुमते रज्जूत्क्षिप्ते विबोधसि चक्रके ॥ ८६४८॥

ENMSS@8649@1कमलपल्लववारिकणोपमं  किमिव पासि सदा निधनं धनम् ।

ENMSS@8649@2कलभकर्णचलाश्चलचश्चलं  स्थिरतराणि यशांसि न जीवितम् ॥ ८६४९॥

ENMSS@8650@1कमलभूतनया वदनाम्बुजे  वसतु ते कमला करपल्लवे ।

ENMSS@8650@2वपुषि ते रमतां कमलाङ्गजः  प्रतिदिनं हृदये कमलापतिः ॥ ८६५०॥

ENMSS@8651@1कमलमधुनस्त्यक्त्वा पानं विहाय नवोत्पलं  प्रकृतिसुभगां गन्धोद्दामामपास्य च मालतीम् ।

ENMSS@8651@2शठमधुकराः क्लिश्यन्तीमे कटाम्बुषु दन्तिनां  सुलभमपहायैऽवं लोकः कटेषु हि रज्यते ॥ ८६५१॥

ENMSS@8652@1कमलमनम्भसि कमले  च कुवलये तानि कनकलतिकायाम् ।

ENMSS@8652@2सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥ ८६५२॥

ENMSS@8653@1कमलमिव चारु वदनं  मृणालमिव कोमलं भुजायुगलम् ।

ENMSS@8653@2अलिमालेव च नीला  तवैव मदिरेक्षणे कबरी ॥ ८६५३॥

ENMSS@8654@1कमलमुकुलमृद्वी फुल्लराजीवगन्धः  सुरतपयसि यस्याः सौरभं दिव्यमङ्गे ।

ENMSS@8654@2चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे  स्तनयुगलमनर्घ्यं श्रीफलश्रीविडम्बि ॥ ८६५४॥

ENMSS@8655@1तिलकुसुमसमानां बिभ्रती नासिकां च  द्विजगुरुसुरपूजां श्रद्दधाना सदैव ।

ENMSS@8655@2कुवलयदलकान्तिः कापि चाम्पेयगौरी विकचकमलकोशाकारकामातपत्रा ॥ ८६५५॥

ENMSS@8656@1व्रजति मृदु सलीलं राजहंसीव तन्वी त्रिवलिवलितमघ्या हंसवाणी सुवेषा ।

ENMSS@8656@2मृदु शुचि लघु भुङ्क्ते मानिनी गाढलज्जा धवलकुसुमवासोवल्लभा पद्मिनी स्यात् ॥ ८६५६॥

ENMSS@8657@1कमलमुखि सर्वतोमुख- निवारणं विदधदेव भूषयति ।

ENMSS@8657@2रोधोरुद्धस्वरसास् तरङ्गिणीस्तरलनयनाश्च ॥ ८६५७॥

ENMSS@8658@1कमलवदना पीनोत्तुङ्गं घटाकृति बिभ्रती स्तनयुगमियं तन्वी श्यामा विशालदृगश्चला ।

ENMSS@8658@2विशददशना मध्यक्षामा वृथेति जनाः श्रमं विदधति मुधा रागादुच्चैरनीदृशवर्णने ॥ ८६५८॥

ENMSS@8659@1कमलवनचिताम्बुः पाटलामोदरम्यः सुखसलिलनिषेकः सेव्यचन्द्रांशुहारः ।

ENMSS@8659@2व्रजतु तव निदाघः कामिनीभिः समेतो निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥ ८६५९॥

ENMSS@8660@1कमलशरधिरम्भासैकतानुक्रमाढ्यं कनककलशभाराक्रान्तसौदामिनीकम् ।

ENMSS@8660@2किसलयितमृणालं हारगर्भप्रवालं कुवलयितशशाङ्कं कौशलं सा विधातुः ॥ ८६६०॥

ENMSS@8661@1कमलाः पाकविनम्रा मूलतलाघ्रातसुरभिकह्लाराः ।

ENMSS@8661@2पवनाकम्पितशिरसः प्रायः कुर्वन्ति परिमलश्लाघाम् ॥ ८६६१॥

ENMSS@8661A@1कमलाकुचकनकाचल- जलधरमाभीरसुन्दरीमदनम् ।

ENMSS@8661A@2अधिततशेषफणावलि- कमलवनीभृङ्गमच्युतं वन्दे ॥

ENMSS@8662@1कमलाक्षि विलम्ब्यतां क्षणं कमनीये कचभारबन्धने ।

ENMSS@8662@2दृढलग्नमिदं दृशोर्युगं शनकैरद्य समुद्धराम्यहम् ॥ ८६६२॥

ENMSS@8663@1कमलाचिबुकोन्नायी कृष्णस्य करः करोतु कल्याणम् ।

ENMSS@8663@2मुकुर इव नीलवृन्तो भाति नितान्तं तदाननं येन ॥ ८६६३॥

ENMSS@8664@1कमलानि पानमधुभाजनानि नः पिदधाति यः स विधुरेष गोचरः ।

ENMSS@8664@2इति रोषणैरिव मधुव्रतैर्धुतं दधती मुखं सुरभिचारुमारुतम् ॥ ८६६४॥

ENMSS@8665@1कमलाभ्यां सुधासिन्धुवदनेक्षणयोस्तुलाम् ।
ENMSS@8665@2कलयन्तु परे किं तु क्वेमे पङ्केरुहे क्व ते ॥ ८६६५॥
ENMSS@8666@1कमलासनकमलेक्षण-  कमलारिकिरीटकमलभृद्वाहैः ।
ENMSS@8666@2नुतपदकमला कमला  करधृतकमला करोतु मे कुशलम् ॥ ८६६६॥
ENMSS@8667@1कमलिनि मलिनीकरोषि चेतः  किमिति बकैरवहेलितानभिज्ञैः ।
ENMSS@8667@2परिणतमकरन्दमार्मिकास्ते  जगति भवन्तु चिरायुषो मिलिन्दाः ॥ ८६६७॥
ENMSS@8668@1कमलिनि विमले जले जनिस्ते  तदुचितमाचरणं न संतनोषि ।
ENMSS@8668@2मलिनमलिकुलं यतस्त्वमन्तः  शशिकिरणान् विमलान् बहिष्करोषि ॥ ८६६८॥
ENMSS@8669@1कमलिनीमलिनी दयितं विना  न सहते सह तेन निषेविताम् ।
ENMSS@8669@2तमधुना मधुना निहितं हृदि  स्मरति सा रतिसारमहर्निशम् ॥ ८६६९॥
ENMSS@8670@1कमलिनीवनकेलिकलारसी  गुणवशीकृतकैरविणीगुणः ।
ENMSS@8670@2अलिरसौ तव सौरभलोभतः  पतति केतकिकण्टकसंकटे ॥ ८६७०॥
ENMSS@8671@1कमलेः समकेशं ते कमलेर्ष्याकरं मुखम् ।
ENMSS@8671@2कमलेख्यं करोषि त्वं कमलेवोन्मदिष्णुषु ॥ ८६७१॥
ENMSS@8672@1कमले कमला शेते हरः शेते हिमालये ।
ENMSS@8672@2क्षीराब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया ॥ ८६७२॥
ENMSS@8673@1कमले कमले नित्यं मधूनि पिबतस्तव ।
ENMSS@8673@2भविष्यन्ति न सन्देहः कष्टं दोषाकरोदये ॥ ८६७३॥
ENMSS@8674@1कमले कमलोत्पत्तिः श्रूयते न च दृश्यते ।
ENMSS@8674@2बाले तव मुखाम्भोजे दृष्टमिन्दीवरद्वयम् ॥ ८६७४॥
ENMSS@8675@1कमले निधाय कमलं  कलयन्ती कमलवासिनं कमले ।
ENMSS@8675@2कमलयुगादुद्भूतं  कमलं कमलेन वारयति ॥ ८६७५॥
ENMSS@8676@1कमलेव मतिर्मतिरिव कमला  तनुरिव विभा विभेव तनुः ।
ENMSS@8676@2धरणीव धृतिर्धृतिरिव धरणी  सततं विभाति बत यस्य ॥ ८६७६॥
ENMSS@8676A@1कमलोदरकोमलपादतलं  गणनापरिवर्जितबाहुबलम् ।
ENMSS@8676A@2प्रणमामि जगत्रयबोधिकरं  गिरनारविभूषणनेमिजिनम् ॥
ENMSS@8677@1कमितुरभिसृत्वरीणां  गौराङ्गीणामिहेन्दुधवलासु ।
ENMSS@8677@2उड्डयमानानामिव  रजनिषु परमीक्ष्यते छाया ॥ ८६७७॥
ENMSS@8677A@1कम्पः स्वेदः श्रमो मूर्च्छा भ्रमिर्ग्लानिर्बलक्षयः ।

ENMSS@8677A@2राजयक्ष्मादिरोगाश्च भवेयुर्मैथुनोत्थिताः ॥
ENMSS@8677B@1कम्पक्षितीशमनिशं कथयन्ति सन्तः सङ्गीतदुग्धजलधेरुदितं सुधांशुम् ।
ENMSS@8677B@2साहित्यमानससरोवरराजहंसं सङ्ग्रामरङ्गनटनस्थितिसूत्रधारम् ॥
ENMSS@8678@1कम्पते गुणमुष्टिस्तु मार्गणस्य हि पृष्ठतः ।
ENMSS@8678@2संमुखी स्याद् धनुर्मुष्टिस्तदा वामे गतिर्भवेत् ॥ ८६७८॥
ENMSS@8679@1कम्पन्ते कपयो भृशं जडकृशं गोऽजाविकं ग्लायति श्वा चुल्लीकुहरोदरं क्षणमपि क्षिप्तोऽपि नैवोज्झति ।
ENMSS@8679@2शीतार्तिव्यसनातुरः पुनरयं दीनो जनः कूर्मवत् स्वान्यङ्गानि शरीर एव हि निजे निह्नोतुमाकाङ्क्षति ॥ ८६७९॥
ENMSS@8680@1कम्पन्ते गिरयः पुरंदरभिया मैनाकमुख्याः पुनः क्रन्दन्त्यम्बुधराः स्फुरन्ति बडवावक्त्रोद्गता वह्नयः ।
ENMSS@8680@2भोः कुम्भोद्भव मुच्यतां जलनिधिः स्वस्त्यस्तु ते सांप्रतं निद्रालुः श्लथबाहुवल्लिकमलाश्लेषो हरिः सीदति ॥ ८६८०॥
ENMSS@8681@1कम्पप्रदोऽसौ शिशिरर्तुचौरो मुष्णाति वृक्षान् हरते किमस्मान् ।
ENMSS@8681@2इतीव भीत्वा परिपाण्डुराणि जातानि शुष्काणि तृणानि भूमौ ॥ ८६८१॥
ENMSS@8682@1कम्पितं भीतमुद्धृष्टम् अव्यक्तमनुनासिकम् ।
ENMSS@8682@2काकस्वरं शिरःस्थं च तथा स्थानविवर्जितम् ॥ ८६८२॥
ENMSS@8683@1कम्पितः पतसि पादकयुग्मे नेत्रकोणनिहतोऽपि भयार्तः ।
ENMSS@8683@2युध्यसे किमिषुभिः प्रिय भीरुं भाषुकामिति हसंश्चलितोऽन्यः ॥ ८६८३॥
ENMSS@8684@1कम्पी कोऽभिविधौ किमव्ययमिह क्वास्ते द्रवत्वं पुनः स्याद् रूपं प्रथमाद्द्वितीयवचने किं वेः खमद्याह्वय ।
ENMSS@8684@2को धातुर्गतिगन्धयोर्द्रविणिनां किं याचते भिक्षुकः प्रश्नानां द्रुतमुत्तराणि वद रे भय्या जलेबी खवा ॥ ८६८४॥
ENMSS@8685@1कम्पोपरुद्धसर्वाङ्गैर्गलत्स्वेदोदबिन्दुभिः ।
ENMSS@8685@2त्वदारब्धैर्महीनाथ वैरिभिर्वनितायितम् ॥ ८६८५॥
ENMSS@8686@1कम्बाघातैर्वपुषि निहतैरुच्छलच्छोणितौघैः कारागारैर्निबिडनिगडैर्लङ्घनं चुम्बनं च ।
ENMSS@8686@2एवं ज्ञात्वा विरम सुमते मा कुरु त्वं नियोगं कर्णोपान्ते मलिनवदना लेखिनी फूत्करोति ॥ ८६८६॥

ENMSS@8687@1कम्बुकण्ठि चरणः शनैश्चरो  राहुरेष तव केशकलापः ।
ENMSS@8687@2न च्युतं तदपि यौवनमेतत्  सा पयोधरगुरोरनुकम्पा ॥ ८६८७॥
ENMSS@8688@1कयापि क्रीडतु ब्रह्मा दिव्याः स्त्रीर्दीव्यत स्वयम् ।
ENMSS@8688@2कलिस्तु चरतु ब्रह्म प्रैत वातिप्रियाय वः ॥ ८६८८॥
ENMSS@8689@1कयासि कामिन् सुरतापराधात्  पादानतः कोपनयावधूतः ।
ENMSS@8689@2तस्याः करिष्यामि दृढानुतापं  प्रवालशय्याशरणं शरीरम् ॥ ८६८९॥
ENMSS@8690@1करं गृहीत्वा परिमृद्य मन्दं  कटिं निपीड्यानुविमृज्य चोरुम् ।
ENMSS@8690@2नीवीमपाकृत्य विलक्षणायाः  शठो मनोजोपनिषत् पपाठ ॥ ८६९०॥
ENMSS@8691@1करं प्रसार्य सूर्येण दक्षिणाशावलम्बिना ।
ENMSS@8691@2न केवलमनेनात्मा दिवसोऽपि लघूकृतः ॥ ८६९१॥
ENMSS@8692@1करकङ्कटकुट्यङ्कखङ्गसंघट्टटाङ्कृतैः ।
ENMSS@8692@2कालरात्र्या प्रनृत्यन्त्या रणवीणेव वाद्यते ॥ ८६९२॥
ENMSS@8693@1करकजलपूतभूतल-  निहितपदो विहितविकृतहुंकारः ।
ENMSS@8693@2अपि वितथमन्त्रगणना-  व्यग्रसमग्राङ्गुलीपर्वा ॥ ८६९३॥
ENMSS@8694@1करकम्पितखङ्गयष्टिभीमे  रणसंनाहितरामनाथवीरे ।
ENMSS@8694@2अरिभूभृदमर्त्यसुन्दरीणाम्  अचलन् दक्षिणवामलोचनानि ॥ ८६९४॥
ENMSS@8695@1करकलितदारनरके  शेरत इह ये सजन्ति भवसिन्धौ ।
ENMSS@8695@2रसिकास्त एव मान्या  मन्यन्तां धन्यमात्मानम् ॥ ८६९५॥
ENMSS@8696@1करकलितपिनाक नाकनाथ  द्विषदुरुमानसशूल शूलपाणे ।
ENMSS@8696@2भव वृषभविमान मानशौण्ड  त्रिजगदकारणतारक प्रसीद ॥ ८६९६॥
ENMSS@8697@1करकाकृतभीकभेकलोक-  प्रतिपाल्याः किमु सागरेण कुल्याः ।
ENMSS@8697@2वलभित्कुलिशप्रहारभीरु-  क्षितिभृद्रक्षणदक्षिणेन तुल्याः ॥ ८६९७॥
ENMSS@8697A@1करकिशलयचाल्यमानसूर्प-  क्रमनमदुन्नमदक्षिपक्ष्मपालि ।
ENMSS@8697A@2करनिहितकनीनिकं स्मिताक्ष्याः  क्षणमपि नोत्पवनं जहाति चेतः
॥
ENMSS@8698@1करकिसलयं धूत्वा धूत्वा विलम्बितमेखला  क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति ।
ENMSS@8698@2स्थगयति मुहुः पत्युर्नेत्रे विहस्य समाकुला  सुरतविरतौ रम्यं तन्वी पुनः पुनरीक्ष्यते ॥ ८६९८॥
ENMSS@8698A@1करकिसलयमूलं धुन्वतीनां स धन्यः  श्रवणपथमनल्पं यस्य पुंसः प्रविष्टाः ।

ENMSS@8698A@2नवरतपरिरम्भे बालसीमन्तिनीनां  अहह न न न मा मा मुञ्च मुञ्चेति

वाचः ॥

ENMSS@8699@1करचरणकाञ्चिहार-  प्रहारमवचिन्त्य बलगृहीतकचः ।

ENMSS@8699@2प्रणयी चुम्बति दयिता-  वदनं स्फुरदधरमरुणाक्षम् ॥ ८६९९॥

ENMSS@8700@1करचरणकृतं वा कायजं कर्मजं वा  श्रवणनयनजं वा मानसं वापराधम् ।

ENMSS@8700@2विहितमविहितं वा सर्वमेतत् क्षमस्व  जय जय करुणाब्धे श्रीमहादेव शंभो ॥ ८७००॥

ENMSS@8701@1करचरणनासमादौ  कर्णौ गृह्णाति रक्ततां गमयन् ।

ENMSS@8701@2शीतं गुरुकृतपीडं  पश्चादङ्गानि कूर्म इव ॥ ८७०१॥

ENMSS@8702@1करचरणेन प्रहरति  यथा यथाङ्गेषु कोपतरलाक्षी ।

ENMSS@8702@2रोषयति परुषवचनैस् तथा तथा प्रेयसीं रसिकः ॥ ८७०२॥

ENMSS@8703@1करचुलुकजलो महोदधिश्  चरणनिबद्धमहो निजाङ्गणम् ।

ENMSS@8703@2निजसदनसमं रसातलं  भवति नृणां व्यवसायशालिनाम् ॥ ८७०३॥

ENMSS@8704@1करजदशनचिह्नं नैशमङ्गेऽन्यनारी-  जनितमिति सरोषामीर्ष्यया शङ्कमानाम् ।

ENMSS@8704@2स्मरसि न खलु दत्तं मत्तयैतत्त्वयैव  स्त्रियमनुनयतीत्थं व्रीडमानां विलासी ॥ ८७०४॥

ENMSS@8705@1करजपदविभूषिता यथा त्वं  सुदति दशनविक्षताधरा च ।

ENMSS@8705@2गतिरपि चरणावलग्नमन्दा  त्वमसि मृगसमाक्षि कामदत्ता ॥ ८७०५॥

ENMSS@8706@1करजालमपूर्वचेष्टितं वस् तदभीष्टप्रदमस्तु तिग्मभासः ।

ENMSS@8706@2क्रियते भवबन्धनाद् विमुक्तिः  प्रणतानामुपसेवितेन येन ॥ ८७०६॥

ENMSS@8707@1करञ्जारग्वधारिष्टसप्तपर्णत्वचाकृतः ।

ENMSS@8707@2उपचारः क्रिमिहरो मूत्रमुस्तविडङ्गवान् ॥ ८७०७॥

ENMSS@8708@1करटिकरटे भ्रस्यद्दानप्रवाहपिपासया  परिसरसरद्भृङ्गश्रेणी करोति यदा रवम् ।

ENMSS@8708@2वदति शिरसः कम्पैर्नास्मान्निवारय वारण  वितर वितरामानं दानं चलाः किल संपदः ॥ ८७०८॥

ENMSS@8709@1करणभगणदोषं वारसंक्रान्तिदोषं  कुतिथिकुलिकदोषं यामयामार्धदोषम् ।

ENMSS@8709@2कुजशनिरविदोषं राहुकेत्वादिदोषं हरति सकलदोषं चन्द्रमाः संमुखस्थः ॥ ८७०९॥

ENMSS@8710@1करतरलितबन्धं कञ्चुकं कुर्वतीनां प्रतिफलितमिदानीं दैपमाताम्रमर्चिः ।

ENMSS@8710@2स्तनतटपरिणाहे भामिनीनां भविष्यन् नखपदलिपिलीलासूत्रपातं करोति

॥ ८७१०॥

ENMSS@8711@1करतलयुगपरिणद्धे कुचकलशे कुङ्कुमारुणे तस्याः ।

ENMSS@8711@2सिन्दूरिते करिपतेः कुम्भे नक्षत्रमालेव ॥ ८७११॥

ENMSS@8712@1करदीकरणं राज्ञां रिपूणां परिमर्दनम् ।

ENMSS@8712@2भूमेरुपार्जनं भूयो राजवृत्तं तु चाष्टधा ॥ ८७१२॥

ENMSS@8713@1करनखरविदीर्णध्वान्तकुम्भीन्द्रकुम्भात् तुहिनकणमिषेण क्षिप्तमुक्ताप्ररोहः ।

ENMSS@8713@2अयमुदयधरित्रीधारिमूर्धाविरुढो नयनपथमुपेतो भानुमत्केसरीन्द्रः ॥ ८७१३॥

ENMSS@8714@1करपदाननलोचननामभिः शतदलैः सुतनोर्विरहज्वरे ।

ENMSS@8714@2रविमहो बहुपीतचरं चिराद् अनिशतापमिषादुदसृज्यत ॥ ८७१४॥

ENMSS@8715@1करपातैर्दुरालोकैस्तीक्ष्णः संतापयन् प्रजाः ।

ENMSS@8715@2भानुर्न भवता तुल्यः क्षणसंरक्तमण्डलः ॥ ८७१५॥

ENMSS@8716@1करप्रचेयामुत्तुङ्गप्रभुशक्तिं प्रथीयसीम् ।

ENMSS@8716@2प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ॥ ८७१६॥

ENMSS@8717@1करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।

ENMSS@8717@2पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥ ८७१७॥

ENMSS@8718@1करभ किमिदं दीर्घोच्छ्वासैः क्षिणोषि शरीरकं विरम शठ हे कस्यात्यन्तं सखे सुखमागतम् ।

ENMSS@8718@2चर किसलयं स्वस्थः पीलोर्विमुञ्च मधुस्पृहां पुनरपि भवान् कल्याणानां भविष्यति भाजनम् ॥ ८७१८॥

ENMSS@8719@1करभदयिते यत्तत् पीतं सुदुर्लभमेकदा मधु वनगतं तस्यालाभे विरौषि किमुत्सुका ।

ENMSS@8719@2कुरु परिचितैः पीलोः पत्रैर्धृतिं मरुगोचरैर् जगति सकले कस्यावाप्तिः सुखस्य निरन्तरा ॥ ८७१९॥

ENMSS@8720@1करभदयिते योऽसौ पीलुस्त्वया मधुलुब्धया  व्यपगतघनच्छायस्त्यक्तो न सादरमीक्षितः ।

ENMSS@8720@2चलकिसलयः सोऽपीदानीं प्ररूढनवाङ्कुरः  करभदयितावृन्दैरन्यैः सुखं परिभुज्यते ॥ ८७२०॥

ENMSS@8721@1करभ यदि कदाचित् प्रभ्रमन् दैवयोगान्  मधुकरकुलतस्त्वं प्रापयेथा मधूनि ।

ENMSS@8721@2विरम विरम तेभ्यः सन्ति शष्पाण्यरण्ये  प्रथममुखरसास्ते शोषयन्त्येव पश्चात् ॥ ८७२१॥

ENMSS@8722@1करभ रभसात् क्रोष्टुं वाञ्छस्यहो श्रवणज्वरं  शरणमथवानृज्वी दीर्घा तवैव शिरोधरा ।

ENMSS@8722@2बहुगलबिलावृत्तिश्रान्तोच्चलिष्यति वाङ् मुखात्  कियति समये को जानीते
भविष्यति कस्य किम् ॥ ८७२२॥

ENMSS@8723@1करमुदयमहीधरस्तनाग्रे  गलिततमःपटलांशुके निवेश्य ।

ENMSS@8723@2विकसितकुमुदेक्षणं विचुम्ब-  त्ययममरेशदिशो मुखं सुधांशुः ॥ ८७२३॥

ENMSS@8724@1करयुग्मपद्ममुकुलापवर्जितैः  प्रतिवेश्म लाजकुसुमैरवाकिरन् ।

ENMSS@8724@2अवदीर्णशुक्तिपुटमुक्तमौक्तक-  प्रकरैरिव प्रियरथाङ्गमङ्गनाः ॥ ८७२४॥

ENMSS@8725@1करयोः कलहायमानयोर् उभयोरेव पयोधरोपरि ।

ENMSS@8725@2वलयावलयो बलाबलं  बहुवेलं पतयालवो जगुः ॥ ८७२५॥

ENMSS@8726@1कररुद्धनीवि दयितोपगतौ  गलितं त्वराविरहितासनया ।

ENMSS@8726@2क्षणदृष्टहाटकशिलासदृश-  स्फुरदूरुभित्ति वसनं ववसे ॥ ८७२६॥

ENMSS@8727@1कररुहशिखानिखात  भ्रान्त्वा विश्रान्त रजनिदुरवाप ।

ENMSS@8727@2रविरिव यन्त्रोल्लिखितः  कृशोऽपि लोकस्य हरसि दृशम् ॥ ८७२७॥

ENMSS@8728@1करलालितोऽपि दहति  ज्वलति व्यजनेन वीज्यमानोऽपि ।

ENMSS@8728@2दहन इवानिर्वाणं  न विमुञ्चत्युष्णतां पिशुनः ॥ ८७२८॥

ENMSS@8729@1करवारिरुहेण संधुनाने  तरवारिं नृपतौ मुकुन्ददेवे ।

ENMSS@8729@2रचयन्त्यमरावतीतरुण्यः  प्रथमं काञ्चनपारिजातमालाः ॥ ८७२९॥

ENMSS@8730@1करवालकरालवारिधारा  यमुना दिव्यतरङ्गिणी च कीर्तिः ।

ENMSS@8730@2तव कामद तीर्थराज दूराद्  अनुबध्नाति सरस्वती कवीनाम् ॥ ८७३०॥

ENMSS@8731@1करशीकरशीतलं वितन्वन्  वनभूभागमुदग्रदावदग्धम् ।
ENMSS@8731@2पुरतोऽश्वति चेन् न यूथनाथः  कलभानां सुलभस्तदा न पन्थाः ॥ ८७३१॥
ENMSS@8732@1करसादोऽम्बरत्यागस्तेजोहानिः सरागता ।
ENMSS@8732@2वारुणीसङ्गजावस्था भानुनाप्यनुभूयते ॥ ८७३२॥
ENMSS@8732A@1करस्थमप्येवममी कृषीवलाः  क्षिपन्ति बीजं पृथुपङ्कसङ्कटे ।
ENMSS@8732A@2वयस्य केनापि कथं विलोकितः  समस्ति नास्तीत्यथवा फलोदयः ॥
ENMSS@8733@1करस्थमुदकं त्यक्त्वा घनस्थमभिवाञ्छति ।
ENMSS@8733@2सिद्धमन्नं परित्यज्य भिक्षामटति दुर्मतिः ॥ ८७३३॥
ENMSS@8734@1करस्पर्शारम्भात् पुलकितपृथूरोजकलशो  श्रमाम्भो वामार्धे वमति मदनाकूतिसुलभम् ।
ENMSS@8734@2विभोर्वारं वारं कृतसमधिकोद्धूलनविधेस् तनौ भस्मस्नानं कथमपि समाप्तं विजयते ॥ ८७३४॥
ENMSS@8735@1कराग्रजाग्रच्छतकोटिरर्थी  ययोरिमौ तौ तुलयेत् कुचौ चेत् ।
ENMSS@8735@2सर्वं तदा श्रीफलमुन्मदिष्णु  जातं वटीमप्यधुना न लब्धुम् ॥ ८७३५॥
ENMSS@8736@1कराद्गलितखाद्यस्य का हानिः करिणो भवेत् ।
ENMSS@8736@2पिपीलिका तु तेनैव बिभर्ति स्वकुटुम्बकम् ॥ ८७३६॥
ENMSS@8737@1करानीतं पटानीतं स्त्रियानीतं तथैव च ।
ENMSS@8737@2एरण्डपत्रैरानीतं देवतानां च नार्हति ॥ ८७३७॥
ENMSS@8737A@1करान् तिरोधाय तरून्निपीड्य  शिला अवस्कन्द्य महीयसोऽपि ।
ENMSS@8737A@2उज्जृम्भितः कालवशात् तदन्यस् तेषामधस्तात्पुनरेव जातः ॥
ENMSS@8738@1कराम्बुजसजत्समाक्षवलया  तनुस्तव शुभे जितेन्दुसुषमा ।
ENMSS@8738@2छिनत्तु दुरितच्छटां मम नदी  तटीमिव चलज्जलोद्धतगतिः ॥ ८७३८॥
ENMSS@8739@1कराम्भोजे कञ्जी मदनमदभञ्जी पदजुषां  मनःपुञ्जारञ्जी मधुरमणिमञ्जीरचरणः ।
ENMSS@8739@2कलाकूतव्यञ्जी व्रजयुवतिसञ्जी जलमुचां  गभीराभागञ्जी मम स परमञ्जीवनधनम् ॥ ८७३९॥
ENMSS@8740@1करारविन्देन पदारविन्दं  मुखारविन्दे विनिवेशयन्तम् ।
ENMSS@8740@2वटस्य पत्रस्य पुटे शयानं  बालं मुकुन्दं सततं स्मरामि ॥ ८७४०॥

ENMSS@8741@1करालकालरुपेण जनतादुरितापहा ।
ENMSS@8741@2तारणी तरिणी भूयाद् अमुना यमुनाम्बुना ॥ ८७४१॥
ENMSS@8742@1करालवाचालमुखाश्वमूखनैर् ध्वस्ताम्बरा वीक्ष्य दिशो रजस्वलाः ।
ENMSS@8742@2तिरोबभूवे गहनैर्दिनेश्वरो रजोन्धकारैः वरितः कुतोऽप्यसौ ॥ ८७४२॥
ENMSS@8743@1करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः ।
ENMSS@8743@2पाषाणैस्ताडितः स्वप्ने सद्यो मृत्युं लभेन् नरः ॥ ८७४३॥
ENMSS@8744@1कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
ENMSS@8744@2अविचार्य प्रियं कुर्यात् तन् मित्रं मित्रमुच्यते ॥ ८७४४॥
ENMSS@8745@1करा हिमांशोरपि तापयन्तीत्येतत् प्रिये चेतसि नैव शङ्क्यम् ।
ENMSS@8745@2वियोगतप्तं हृदयं मदीयं तत्र स्थितां त्वां समुपैति तापः ॥ ८७४५॥
ENMSS@8746@1करिकपोलमदोद्धतबुद्धितो मलिनपङ्कजवृन्दमिहाश्रयन् ।
ENMSS@8746@2कनकगौरममं नवचम्पकं मधुप चञ्चल मुञ्चसि किं मुधा ॥ ८७४६॥
ENMSS@8747@1करिकलभ विमुञ्च लोलतां चर विनयव्रतमानताननः ।
ENMSS@8747@2मृगपतिनखकोटिभङ्गुरो गुरुरुपरि क्षमते न तेऽङ्कुशः ॥ ८७४७॥
ENMSS@8748@1करिकवलितमृष्टैः शाखिशाखाग्रपत्रैर् अरुणसरणयोऽमी सर्वतो भीषयन्ते ।
ENMSS@8748@2चलितशबरसेनादत्तगोश्रृङ्गचण्ड- ध्वनिचकितवराहव्याकुला विन्ध्यपादाः ॥ ८७४८॥
ENMSS@8748A@1करिकुम्भतुलामुरोजयोः क्रियमाणां कविभिर्विश्रृङ्खलैः ।
ENMSS@8748A@2कथमालि श्रृणोषि सादरं विपरीतार्थविदो हि योषितः ॥
ENMSS@8749@1करिकृष्णाश्वगन्धा च नवनीतं च माहिषम् ।
ENMSS@8749@2एतेषां मर्दनाल्लिङ्गवृद्धिः संजायते परा ॥ ८७४९॥
ENMSS@8750@1करिणश्च हस्तिकर्णैर् निर्देश्या वाजिनोऽश्वकर्णेन ।
ENMSS@8750@2गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥ ८७५०॥
ENMSS@8751@1करिन् मा गर्जोच्चैर्मृगपतिरिहास्तेऽतिनिकटे न दृष्टस्त्वं दैवादपसर सुदूरं द्रुतमितः ।
ENMSS@8751@2न किं पश्यस्यग्रे खरनखरनिर्दारितकरि- प्रकीर्णास्थिश्रेणीधवलितमिमं शैलकटकम् ॥ ८७५१॥
ENMSS@8752@1करिमदपरिमलवाही वहति बहिर्गिरिसरित्समीर इति ।

ENMSS@8752@2मृदुगर्भान्तर्मार्वं  न जहाति गुहागृहस्य हरिगृहिणी ॥ ८७५२॥
ENMSS@8753@1करिवरमृदितवलीमुख-  नलकैर्मूलेषु कीलितस्य तरोः ।
ENMSS@8753@2संवत्सरं च यावत्  फलिनस्य फलानि जायन्ते ॥ ८७५३॥
ENMSS@8754@1करिष्यति कलानाथः कुतुकी करमम्बरे ।
ENMSS@8754@2इति निर्वापयामास रविदीपं निशाङ्गना ॥ ८७५४॥
ENMSS@8755@1करिष्यन् न प्रभाषेत कृतान्येव च दर्शयेत् ।
ENMSS@8755@2धर्मकामार्थकार्याणि तथा मन्त्रो न भिद्यते ॥ ८७५५॥
ENMSS@8756@1करिष्यते यत्र सुदुश्चराणि  प्रसत्तये गोत्रभिदस्तपांसि ।
ENMSS@8756@2शिलोच्चयं चारुशिलोच्चयं तम्  एष क्षणान्नेष्यति गुह्यकस्त्वाम्
॥ ८७५६॥
ENMSS@8757@1करिष्यामि करिष्यामि करिष्यामीति चिन्तया ।
ENMSS@8757@2मरिष्यामि मरिष्यामि मरिष्यामीति विस्मृतम् ॥ ८७५७॥
ENMSS@8758@1करिष्येऽवश्यमित्युक्तिः करिष्यन्नपि दुष्यसि ।
ENMSS@8758@2दृष्टादृष्टा हि नायत्ताः कार्यीया हेतवस्तव ॥ ८७५८॥
ENMSS@8758@1करी बरीभरीति चेद् दिशं सरीसरीति कां  स्थिरीचरीकरीति चेत् न
चञ्चरीकरीतिकाम् ।
ENMSS@8758@2दरीधरीति केतकं वरीवरीति सारसं  जरीजरीति मञ्जरी
निरीतिरीतिरीदृशी ॥ ८७५८॥
ENMSS@8759@1करीषमध्ये निहितं तत् सर्वं पञ्चमासकम् ।
ENMSS@8759@2द्रवीभूतं ततः सर्वम् उद्धरेत् तेन लेपयेत् ॥ ८७५९॥
ENMSS@8760@1करुणमभिहितं त्रपा निरस्ता  तदभिमुखं च विमुक्तमश्रु ताभिः ।
ENMSS@8760@2प्रकुपितमभिसारणेऽनुनेतुं  प्रियमियती ह्यबलाजनस्य भूमिः ।
ENMSS@8761@1करुणाद्रवमेव दुर्जनः  सुतरां सत्पुरुषं प्रबाधते ।
ENMSS@8761@2मृदुकं हि भिनत्ति कण्टकः  कठिने कुण्ठक एव जायते ॥ ८७६१॥
ENMSS@8761A@1करे कृत्वा तूलं कुचकलशमूलं विदधती   स्फुटं वारं वारं
तरलयति हारं सुवदना ।
ENMSS@8761A@2समीचीना मीनायतनयननीलोत्पलदला  वितन्वाना तन्तून् विकलयति
जन्तूनविकलम् ॥
ENMSS@8762@1करे च दक्षिणे व्याधिं हृदि राज्यादिलाभदा ।
ENMSS@8762@2पृष्ठे चोपद्रवं हन्त्युदरे मिष्टान्नभोजनम् ॥ ८७६२॥

ENMSS@8763@1करेण कण्डूयति दक्षिणेन  यक्षो यदा वामकरं तदानीम् ।
ENMSS@8763@2प्रभूतमातङ्गघटासमृद्धं  ब्रूते समन्तात् पृथिवीपतित्वम् ॥ ८७६३॥
ENMSS@8764@1करेण करिणा वीरः सुगृहीतोऽपि कोपिना ।
ENMSS@8764@2असिनासून् जहाराशु तस्यैव स्वय्मक्षतः ॥ ८७६४॥
ENMSS@8765@1करेण ते रणेष्वन्तकरेण द्विषतां हताः ।
ENMSS@8765@2करेणवः क्षरद्रक्ता भान्ति संध्याघना इव ॥ ८७६५॥
ENMSS@8766@1करेण दानं मुनिराददानो  भक्तस्य संकेतमिति ब्रवीति ।
ENMSS@8766@2लोकद्वयेच्छाफलसंप्रदाने  दत्तो मया दक्षिणहस्त एषः ॥ ८७६६॥
ENMSS@8767@1करेण वाञ्छेव विधुं विधर्तुं  यमित्थमात्थादरिणी तमर्थम् ।
ENMSS@8767@2पातुं श्रुतिभ्यामपि नाधिकुर्वे  वर्णं श्रुतेर्वर्ण इवान्तिमः किम् ॥ ८७६७॥
ENMSS@8768@1करेण वातायनलम्बितेन  स्पृष्टस्त्वया चण्डि कुतूहलिन्या ।
ENMSS@8768@2आमुञ्चतीवाभरणं द्वितीयम्  उद्भिन्नविद्युद्वलयो घनस्ते ॥ ८७६८॥
ENMSS@8768A@1करेण सलिलार्द्रेण न गण्डौ नापरं करम् ।
ENMSS@8768A@2नेक्षणे च स्पृशेत् किं तु स्प्रष्टव्ये जानुनी श्रिये ॥
ENMSS@8769@1करेणुर्नाहूता निजकवलभागप्रणयिनी  न चामृष्टः स्नेहात् करकिसलयेनापि कलभः ।
ENMSS@8769@2स येनासौ दर्पात् प्रतिगजजिगीषारभसतः  क्रुधा धावन् मग्नो ह्रदपयसि
कष्टं करिपतिः ॥ ८७६९॥
ENMSS@8769A@1करे दानं हृदि ध्यानं मुखे मौनं गृहे धनम् ।
ENMSS@8769A@2तीर्थे यानं गिरि ज्ञानं मण्डनं महतामिदम् ॥
ENMSS@8769B@1करे वामे वासस्तदपरकरे हारलतिकां  वहन्त्या बिम्बोष्ठे पतिदशनदत्तव्रणपदम् ।
ENMSS@8769B@2परिम्लानां मालां शिरसि शशिखण्डं स्तनतटे  रतान्तोत्तिष्ठन्त्या जगदपि न मूल्यं मृगदशः ॥
ENMSS@8770@1करे विधृत्येश्वरया गिरां सा  पान्था पथीन्द्रस्य कृता विहस्य ।
ENMSS@8770@2वामेति नामैव बभाज सार्धं  पुरन्ध्रिसाधारणसंविभागम् ॥ ८७७०॥
ENMSS@8771@1करे विभाति तन्वङ्ग्या रणद्वलयसंहतिः ।
ENMSS@8771@2मनःकुरङ्गबन्धाय पाशालीव मनोभुवः ॥ ८७७१॥
ENMSS@8772@1करे वेणीमेणीसदृशनयना स्नानविरतौ  दधाना हर्म्याग्रे हरनयनतेजोहुतमपि ।

ENMSS@8772@2इयं मुग्धा दुग्धाम्बुधिबहलकल्लोलसदृशा  दृशा वारं वारं मनसिजतरुं पल्लवयति ॥ ८७७२॥

ENMSS@8773@1करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमता  मुखे सत्या वाणी विजयि

भुजयोर्वीर्यमतुलम् ।

ENMSS@8773@2हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयोर् विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ८७७३॥

ENMSS@8773A@1करैरुपात्तान् कमलोत्करेभ्यो  निजैर्विवस्वान् विकचोदरेभ्यः ।

ENMSS@8773A@2तस्या निचिक्षेप मुखारविन्दे  स्वेदापदेशान्मकरन्दबिन्दून् ॥

ENMSS@8774@1करैर्वा प्रमितैर्ग्रामैर्वत्सरे प्रबलं रिपुम् ।

ENMSS@8774@2तोषयेत् तद्धि दानं स्याद् यथायोगेषु शत्रुषु ॥ ८७७४॥

ENMSS@8775@1करोति कालः सकलं संहरेत् काल एव हि ।

ENMSS@8775@2कालः स्थापयते विश्वं कालाधीनमिदं जगत् ॥ ८७७५॥

ENMSS@8776@1करोऽतिताम्रो रामाणां तन्त्रीताडनविभ्रमम् ।

ENMSS@8776@2करोति सेर्ष्यं कान्ते च श्रवणोत्पलताडनम् ॥ ८७७६॥

ENMSS@8777@1करोति दोषं न तमत्र केसरी  न दन्दशूको न करी न भूमिपः ।

ENMSS@8777@2अतीव रुष्टो न च शत्रुरुद्धतो  यमुग्रमिथ्यात्वरिपुः शरीरिणाम् ॥ ८७७७॥

ENMSS@8778@1करोति निर्मलाधारस्तुच्छस्यापि महार्घताम् ।

ENMSS@8778@2अम्बुनो बिन्दुरल्पोऽपि शुक्तौ मुक्ताफलं भवेत् ॥ ८७७८॥

ENMSS@8779@1करोति नीडं भुवि चेद् वराही  समान्यपत्यानि विजायते वा ।

ENMSS@8779@2समुद्भवद्भानुमयूखवह्नौ  जाज्वल्यते तज्जगती समस्ता ॥ ८७७९॥

ENMSS@8780@1करोति पापं योऽज्ञानान् नात्मनो वेत्ति च क्षमम् ।

ENMSS@8780@2प्रद्वेष्टि साधुवृत्तांश्च स लोकस्यैति वाच्यताम् ॥ ८७८०॥

ENMSS@8780A@1करोति पुष्पैर्जिननायकस्य  पूजं त्रिकालं तनुमान् सदा यः ।

ENMSS@8780A@2तस्यामरेशावनिनाथचक्र-  वर्त्यादिलक्ष्मीर्वशगा भवेद् द्राक् ॥

ENMSS@8781@1करोति पूज्यमानोऽपि लोकव्यसनदीक्षितः ।

ENMSS@8781@2दर्शने दर्शने त्रासं गृहाहिरिव दुर्जनः ॥ ८७८१॥

ENMSS@8782@1करोति मांसं बलमिन्द्रियाणां  ततोऽभिवृद्धिं मदनस्य तस्मात् ।

ENMSS@8782@2करोत्ययुक्तिं प्रविचिन्त्य बुद्ध्या  त्यजन्ति मांसं त्रिविधेन सन्तः ॥ ८७८२॥

ENMSS@8783@1करोति यः परद्रोहं जनस्यानपराधिनः ।

ENMSS@8783@2तस्य राज्ञः स्थिरापि श्रीः समूलं नाशमृच्छति ॥ ८७८३॥
ENMSS@8784@1करोति योऽशेषजनातिरिक्तां संभावनामर्थवतीं क्रियाभिः ।
ENMSS@8784@2संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥ ८७८४॥
ENMSS@8785@1करोति लाभहीनेन गौरवेण किमाश्रितः ।
ENMSS@8785@2क्षामस्येन्दोर्गुणं धत्ते कमीश्वरशिरोधृतिः ॥ ८७८५॥
ENMSS@8785A@1करोति विरतिं धन्यो यः सदा निशिभोजनात् ।
ENMSS@8785A@2सोऽर्धं पुरुषायुषस्य स्यादवश्यमुपोषितः ॥
ENMSS@8786@1करोति वैरं स्फुटमुच्यमानः प्रतुष्यति श्रोत्रसुखैरपथ्यैः ।
ENMSS@8786@2विवेकशून्यः प्रभुरात्ममानी महाननर्थः सुहृदां बतायम् ॥ ८७८६॥
ENMSS@8787@1करोति शोभामलके स्त्रियाः को दृश्या न कान्ता विधिना च कोक्ता
।
ENMSS@8787@2अङ्गे तु कस्मिन् दहनः पुरारेः सिन्दूरबिन्दुर्विधवाललाटे ॥ ८७८७॥
ENMSS@8788@1करोति संसारशरीरभोग- विरागभावं विदधाति रागम् ।
ENMSS@8788@2शीलव्रतध्यानतपःकृपासु ज्ञानी विमोक्षाय कृतप्रयासः ॥ ८७८८॥
ENMSS@8789@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@8789@2करोति सफलं जन्तोः कर्म यच्च करोति सः ॥ ८७८९॥
ENMSS@8790@1करोति सहकारस्य कलिकोत्कलिकोत्तरम् ।
ENMSS@8790@2मन्मनो मन्मनोऽप्येष मत्तकोकिलनिस्वनः ॥ ८७९०॥
ENMSS@8791@1करोति सुहृदां दैन्यम् अहितानां तथा मुदम् ।
ENMSS@8791@2अकाले च जरां पित्रोः कुसुतः कुरुते ध्रुवम् ॥ ८७९१॥
ENMSS@8792@1करोति स्वमुखेनैव बहुधान्यस्य खण्डनम् ।
ENMSS@8792@2नमः पतनशीलाय मुसलाय खलाय च ॥ ८७९२॥
ENMSS@8793@1करोति हुंहुं श्रृगिति ध्वनिं यो नेष्टो न दुष्टः स यतो रतार्थी ।
ENMSS@8793@2चलश्चलः स्यात् कलहाय शब्दः किकीति दीप्तो गुरुरुग्लुशान्तः ॥
८७९३॥
ENMSS@8793A@1करोति हे दैत्यसुत यावन्मात्रं परिग्रहम् ।
ENMSS@8793A@2तावन्मात्रं स एवास्य दुःखं चेतसि यच्छति ॥
ENMSS@8793B@1करोतु करटः शब्दं सर्वदा प्राङ्गणे वसन् ।
ENMSS@8793B@2न श्रृणोति बुधः प्रीत्या श्रृणोति पिकभाषितम् ॥
ENMSS@8794@1करोतु तादृशीं प्रीतिं यादृशी नीरपङ्कयोः ।
ENMSS@8794@2रविणा शोषिते नीरे पङ्कदेहो विशीर्यते ॥ ८७९४॥
ENMSS@8795@1करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।

ENMSS@8795@2फलं पुनस्तदेव स्याद् यद् विधेर्मनसि स्थितम् ॥ ८७९५॥
ENMSS@8796@1करोमीशोऽपि नाक्रान्तिं परितापेन खेदवान् ।
ENMSS@8796@2दरिद्रोऽपि न वाञ्छामि तेन जीवाम्यनामयः ॥ ८७९६॥
ENMSS@8797@1करोम्यहमिदं तदा कृतमिदं करिष्याम्यदः पुमानिति सदा क्रियाकरणकारणव्यापृतः ।
ENMSS@8797@2विवेकरहिताशयो विगतसर्वधर्मक्षमो न वेत्ति गतमप्यहो जगति कालमत्याकुलः ॥ ८७९७॥
ENMSS@8798@1करोषि तास्त्वमुत्खातमोहस्थाने स्थिरा मतीः ।
ENMSS@8798@2पदं यतिः सुतपसा लभतेऽतः सशुक्लिम ॥ ८७९८॥
ENMSS@8798A@1करोषि यत् प्रेत्यहिताय किंचित् कदाचिदल्पं सुकृतं कथंचित् ।
ENMSS@8798A@2मा जीहरस्तन्मदमत्सराद्यैर् विना च तन्मा नरकातिथिर्भूः ॥
ENMSS@8799@1करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसंभ्रमा ।
ENMSS@8799@2सखीषु निर्वाच्यमधार्ष्ट्यदूषितं प्रियाङ्गसंश्लेषमवाप मानिनी ॥ ८७९९॥
ENMSS@8800@1करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमम् ।
ENMSS@8800@2उपेयुषी कल्पलताभिशङ्कया कथं न्वितस्त्रस्यति षट्पदावलिः ॥ ८८००॥
ENMSS@8801@1करौ शरदिजाम्बुजक्रमविलासशिक्षागुरू पदौ विबुधपादपप्रथमपल्लवोल्लङ्घिनौ ।
ENMSS@8801@2दृशौ दलितदुर्मदत्रिभुवनोपमानश्रियौ विलोकय विलोचनामृतमहो महः शैशवम् ॥ ८८०१॥
ENMSS@8802@1कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया गृध्रोलूककदम्बकस्य पुरतः काकोऽपि हंसायते ।
ENMSS@8802@2कीर्त्या ते धवलीकृते त्रिभुवने क्ष्मापाल लक्ष्मीः पुनः कृष्णं वीक्ष्य बलोऽयमित्युपहितव्रीडं शनैर्जल्पति ॥ ८८०२॥
ENMSS@8803@1कर्कशं दुःसहवाक्यं जल्पन्ति वञ्चिताः परैः ।
ENMSS@8803@2कुर्वन्ति द्यूतकारस्य कर्णनासादिछेदनम् ॥ ८८०३॥
ENMSS@8804@1कर्कशतर्कविचार- व्यग्रः किं वेत्ति काव्यहृदयानि ।
ENMSS@8804@2ग्राम्य इव कृषिविलग्नश् चञ्चलनयनावचोरहस्यानि ॥ ८८०४॥
ENMSS@8805@1कर्कशेन तु चापेन यः कृष्टौ हीनमुष्टिना ।
ENMSS@8805@2मत्स्यपुच्छा गतिस्तस्य सायकस्य प्रकीर्तिता ॥ ८८०५॥

ENMSS@8806@1कर्कोटिकार्कयोर्मूलं चूर्णयित्वा च सर्षपान् ।
ENMSS@8806@2सर्पिषा पाययेन् मन्त्री स्थावरक्ष्वेडशान्तये ॥ ८८०६॥
ENMSS@8807@1कर्णं चक्षुरजीगणत्तव पितुस्तातः पिता ते पुनः
शक्त्याधारकुमारमप्यजगणत्तं कातरत्वेन सः ।
ENMSS@8807@2देवोगान्महिषीति पश्यति जगत्त्वेवं विवेक्तुं पुनः प्रागल्भ्यं प्रथयन्ति वस्तदपि च प्रज्ञाधनाः साधवः ॥ ८८०७॥
ENMSS@8808@1कर्णः सर्वशिरोगतस्त्रिभुवने कर्णेन किं न श्रूतं विश्राम्यन्ति मृगीदृशामपि दृशः कर्णे न चित्रं क्वचित् ।
ENMSS@8808@2आश्चर्यं पुनरेतदेव यदयं निश्छिद्रसन्मण्डलः सप्ताम्भोनिधिमेखलां वसुमतीं धत्ते जगन्मण्डलः ॥ ८८०८॥
ENMSS@8809@1कर्णकल्पितरसालमञ्जरी- पिञ्जरीकृतकपोलमण्डलः ।
ENMSS@8809@2निष्पतन्नयनवारिधारया राधया मधुरिपुर्निरीक्ष्यते ॥ ८८०९॥
ENMSS@8810@1कर्णगतेयममोघा दृष्टिस्तव शक्तिरिन्द्रदत्ता च ।
ENMSS@8810@2सा नासादितविजया क्वचिदपि नापार्थपतितेयम् ॥ ८८१०॥
ENMSS@8810A@1कर्णद्वयावनतकाञ्चनतालपत्रा वेण्यन्तलम्बिमणिमौक्तिकहेमगुच्छा ।
ENMSS@8810A@2कूर्पासकोत्कवचितस्तनबाहुमूला लाटी नितम्बपरिवृत्तदशान्तनीवी ॥
ENMSS@8811@1कर्णलङ्घिगुणोत्कर्षा वदान्या धन्विनो यथा ।
ENMSS@8811@2निष्फलान् न विमुञ्चन्ति मार्गणान् समितौ स्थिता ॥ ८८११॥
ENMSS@8812@1कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः ।
ENMSS@8812@2क्षपणकतामपि धत्ते पिबति सुरां नरकपालेन ॥ ८८१२॥
ENMSS@8813@1कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ENMSS@8813@2ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ॥ ८८१३॥
ENMSS@8813A@1कर्णस्फुरत्कनककुण्डलकान्तिरम्यम् आदृष्टिगोचरकुचद्वयलोभनीयम् ।
ENMSS@8813A@2कालेयबिन्दुकलिकायितकुङ्कुमाङ्कं कर्णाटयौवतमिदं कमनीयरूपम् ॥
ENMSS@8814@1कर्णस्य भूषणमिदं ममायतिविरोधिनः ।
ENMSS@8814@2इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलङ्घ्यते ॥ ८८१४॥
ENMSS@8815@1कर्णाक्षिदन्तच्छदबाहुपाणि- पादादिनः स्वाखिलतुल्यजेतुः ।
ENMSS@8815@2उद्वेगभागद्वयताभिमानाद् इहैव वेधा व्यधित द्वितीयम् ॥ ८८१५॥

ENMSS@8816@1कर्णाग्रन्थितकिंतनुर्नतशिरा बिभ्रज्जराजर्जर-
स्फिक्संधिप्रविवेशितप्रविचलल्लाङ्गूलनालः क्षणम् ।
ENMSS@8816@2आराद् वीक्ष्य विपक्षमाक्रमकृतक्रोधस्फुरत्कन्धरं श्वा
मल्लीकलिकाविकाशिदशनः किंचित् क्कणन् गच्छति ॥ ८८१६॥
ENMSS@8817@1कर्णाग्रे पीडिते येषां सिन्दूराभस्य दर्शनम् ।
ENMSS@8817@2शोणितस्य भवेत् क्षिप्रं ते वाह्याश्चिरजीविनः ॥ ८८१७॥
ENMSS@8818@1कर्णाटं देहि कर्णाधिकविधिविहितत्याग लाटं ललाट- प्रोत्तुङ्ग
द्राविडं वा प्रचलभुजबलप्रौढिमागाढराढम् ।
ENMSS@8818@2प्रस्फूर्जद्गुर्जरं वा दलितरिपुवधूगर्भ वैदर्भकं वा गाजी
राजीवदृष्टे कुशशतमथवा शाहजल्लालुदीन ॥ ८८१८॥
ENMSS@8819@1कर्णाटीदशनाङ्कितः शितमहाराष्ट्रीकटाक्षाहततः प्रौढान्ध्रीस्तनपीडितः
प्रणयिनीभ्रूभङ्गवित्रासितः ।
ENMSS@8819@2लाटीबाहुविवेष्टितश्च मलयस्त्रीतर्जनीतर्जितः सोऽयं संप्रति
राजशेखरकविर्वाराणसीं वाञ्छति ॥ ८८१९॥
ENMSS@8820@1कर्णाभ्यर्णविदीर्णसृक्कविकटव्यादानदीप्ताग्निभिर्
दंष्ट्राकोटिविशङ्कटैरित इतो धावद्भिराकीर्यते ।
ENMSS@8820@2विद्युत्पुञ्जनिकाशकेशनयनभ्रूश्मश्रुजालैर्न भो
लक्ष्यालक्ष्यविशुष्कदीर्घवपुषामुल्कामु खानां मुखैः ॥ ८८२०॥
ENMSS@8821@1कर्णाभ्यर्णारिश्रृङ्गक्षतिरुधिररसास्वादनाबद्धगर्ध-
ध्वाङ्क्षच्छायात्तभीतिप्रतिहतधवलीवर्गसं वर्धनेच्छः ।
ENMSS@8821@2शीलव्याक्रुद्धगोपीलगुडहतिनमत्पृष्ठवंशः कथंचित् प्रातः
केदारनीरं कलमदलभिया कूणिताक्षो महोक्षः ॥ ८८२१॥
ENMSS@8822@1कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान् खलानाम् ।
ENMSS@8822@2निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ॥ ८८२२॥
ENMSS@8823@1कर्णारुन्तुदमन्तरेण रणितं गाहस्व काक स्वयम् माकन्दं
मकरन्दसुन्दरमिदं त्वां कोकिलं मन्महे ।
ENMSS@8823@2भव्यानि स्थलसौष्ठवेन कतिचिद् वस्तूनि कस्तूरिकां
नेपालक्षितिपालभालतिलके पङ्कं न शङ्केत कः ॥ ८८२३॥
ENMSS@8824@1कर्णारुन्तुदमेव कोकिलरुतं तस्याः श्रुते भाषिते चन्द्रे
लोकरुचिस्तदाननरुचेः प्रागेव संदर्शनात् ।
ENMSS@8824@2चक्षुर्मीलनमेव तन्नयनयोरग्रे मृगीणां वरं हैमो वल्ल्यपि तावदेव

ललिता यावन्न सा लक्ष्यते ॥ ८८२४॥

ENMSS@8825@1कर्णार्पितो लोध्रकषायरूक्षे  गोरोचनाक्षेपनितान्तगौरे ।

ENMSS@8825@2तस्याः कपोले परभागलाभाद्  बबन्ध चक्षूंषि यवप्ररोहः ॥ ८८२५॥

ENMSS@8825A@1कर्णालङ्करणं कदा कृतमिति स्पर्शः कपोले कृतः  कीदृक् कान्तमहो नु कञ्चुकमिति न्यस्तः करो वक्षसि ।

ENMSS@8825A@2रागः साहजिकः किमेष वदनेऽप्यस्पर्शि बिम्बाधरो  मोग्ध्येनैव मृगीदृशि व्यवसितं निर्विघ्नमासीन्मम ॥

ENMSS@8826@1कर्णाहतिव्यतिकरं करिणामुपेक्ष्य  दानं व्यवस्यति मधुव्रत एष तिक्तम् ।

ENMSS@8826@2स्मर्तव्यतामुपगतेषु सरोरुहेषु  धिग् जीवितव्यसनमस्य मलीमसस्य ॥ ८८२६॥

ENMSS@8827@1कर्णिकादिष्विव स्वर्णम् अर्णवादिष्विवोदकम् ।

ENMSS@8827@2भेदिष्वभेदि यत् तस्मै परस्मै महसे नमः ॥ ८८२७॥

ENMSS@8828@1कर्णिकारलताः फुल्लकुसुमाकुलषद्पदाः ।

ENMSS@8828@2सकज्जलशिखा रेजुर्दीपमाला इवोज्ज्वलाः ॥ ८८२८॥

ENMSS@8829@1कर्णिकारससौवीरगुप्तां त्रिकटुमाधवीम् ।

ENMSS@8829@2यष्टीधान्यगुडक्षीरं दष्टो मत्तशुना पिबेत् ॥ ८८२९॥

ENMSS@8830@1कर्णिनालीकनाराचा निर्हरन्ति शरीरतः ।

ENMSS@8830@2वाक्शल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ॥ ८८३०॥

ENMSS@8831@1कर्णे कान्तागमनवचनश्राविणि स्वर्णभूषां  तस्यादर्शिन्यकृत नयने श्यामिकामञ्जनेन ।

ENMSS@8831@2स्थाप्यः कुत्र प्रिय इति परामृश्य हारावृताङ्के  हृत्पर्यङ्के पुलकपटलीतूलिकामास्तृणोति ॥ ८८३१॥

ENMSS@8832@1कर्णे चामरचारुकम्बुकलिका कण्ठे मणीनां गणः  सिन्दूरप्रकरः शिरःपरिसरे पार्श्वान्तिके किङ्किणी ।

ENMSS@8832@2लब्धश्चेन् नृपवाहनेन करिणा बद्धेन भूषाविधिस् तत् किं भूधरधूलिधूसरतनुर्मान्यो न वन्यः करी ॥ ८८३२॥

ENMSS@8833@1कर्णेजपः कुटिलमूर्तिरसव्यपाणिर् अग्रेसरस्तदितरस्तव बद्धमुष्टिः ।

ENMSS@8833@2तन्मार्गणास्तदपि लक्षममी लभन्ते  धानुष्क तत् किमपि कौशलमद्भुतं ते ॥ ८८३३॥

ENMSS@8834@1कर्णेजपा अपि सदा कुटिलस्वभावा दुष्टाशया निरभिसंधितवैरिभूताः ।
ENMSS@8834@2सोहार्दहृष्टहृदया मयि सन्तु येषां जिह्वापटुर्विनिमयेषु गुणा गुणानाम् ॥ ८८३४॥
ENMSS@8835@1कर्णेजपानां वचनप्रपञ्चान्- महात्मनः क्वापि न दूषयन्ति ।
ENMSS@8835@2भुजङ्गमानां गरलप्रसङ्गान्- नापेयतां यान्ति महासरांसि ॥ ८८३५॥
ENMSS@8836@1कर्णे तत् कथयन्ति दुन्दुभिरवै राष्ट्रे यदुद्घोषितं तन्नम्राङ्गतया वदन्ति करुणं यस्मात् त्रपावान् भवेत् ।
ENMSS@8836@2श्लाघन्ते तदुदीर्यते यदरिणाप्युग्रं न मर्मान्तकृद् ये केचिन् ननु शाठ्यमौग्ध्यनिधयस्ते भूभृतां रञ्जकाः ॥ ८८३६॥
ENMSS@8837@1कर्णे ताटङ्कलक्ष्मीमुरसि मकरिकापत्रमूरौ दुकूलं सव्येऽर्धे दक्षिणे च द्विरसनभसितव्यालकृत्तीर्दधानः ।
ENMSS@8837@2कण्ठे निःसीमशीर्षस्रजमथ विदधद्वीक्षितः शैलपुत्र्या सभ्रूविक्षेपमन्तःस्मितललितमुखो भूतभर्तावताद् वः ॥ ८८३७॥
ENMSS@8838@1कर्णे तालदलं तनौ मलयजं कर्पूरवासोंऽशुके चूले गुम्फितकेतकीदलभरः कण्ठे नवैकावली ।
ENMSS@8838@2वासः श्रीवनवाससीमनि वचश्रीः सत्कवेरुक्तयो वक्त्रे नागरखण्डमस्तु पुरतः प्रेमाकुलाः कुन्तलाः ॥ ८८३८॥
ENMSS@8839@1कर्णेन घातयित्वा घटोत्कचं शक्रशक्तिनिर्मोक्षात् ।
ENMSS@8839@2जीवितमरक्षि पार्थैः स्वात्मानं सर्वतो रक्षेत् ॥ ८८३९॥
ENMSS@8840@1कर्णेन निर्जितोऽस्मीति चिन्तां चिन्तामणे त्यज ।
ENMSS@8840@2जिता देवद्रुमाः पञ्च न दुःखं पञ्चभिः सह ॥ ८८४०॥
ENMSS@8841@1कर्णे बद्धा रवौ श्वेततुरंगरिपुमूलिका ।
ENMSS@8841@2सर्वज्वरहरा श्वेतमन्दारस्य च मूलिका ॥ ८८४१॥
ENMSS@8842@1कर्णे यन्न कृतं सखीजनवचो यन्नादृता बन्धुवाक् यत् पादे निपतन्नपि प्रियतमः कर्णोत्पलेनाहतः ।
ENMSS@8842@2तेनेन्दुर्दहनायते मलयजालेपः स्फुलिङ्गायते रात्रिः कल्पशतायते बिसलताहारोऽपि भारायते ॥ ८८४२॥
ENMSS@8843@1कर्णेऽवतंसयितुमर्पयितुं शिखासु माष्टुं रतिश्रमजलं चषके निधातुम् ।
ENMSS@8843@2कण्ठे गुणं रचयितुं वलयान् विधातुं स्त्रीणां मनोऽतिलुलुभे

शशिनः करेषु ॥ ८८४३॥

ENMSS@8844@1कर्णोत्तंसः शिशुशुकवधूपिच्छलीलं शिरीषं सान्तःसूत्राः परिमलमुचो मल्लिकानां च हाराः ।

ENMSS@8844@2मुक्तागौरैर्वलयरचनाकन्दलाग्रैर्बिसानां ग्रीष्मारम्भे रमयति नवं मण्डनं कामिनीनाम् ॥ ८८४४॥

ENMSS@8845@1कर्णोत्तालितकुन्तलान्तनिपतत्तोयक्षणासङ्गिना हारेणेव वृतस्तनी पुलकिता शीतेन सीत्कारिणी ।

ENMSS@8845@2निर्धौताञ्जनशोणकोणनयना स्नानावसानेऽङ्गना प्रस्यन्दत्कबरीभरा न कुरुते कस्य स्पृहार्द्रं मनः ॥ ८८४५॥

ENMSS@8845A@1कर्णोत्पलं कटाक्षाः कान्तिस्ते कनककञ्चुकविशेषः ।

ENMSS@8845A@2हसितानि सिन्धुकन्ये हारास्स्तनशैलनिर्झरविहाराः ॥

ENMSS@8846@1कर्णोत्पलान्नयनमपि गतिच्युतात्ते तन्मीलने मुखमयं न जहाति भृङ्गः ।

ENMSS@8846@2येनैवमद्य विनिवारयसि प्रमत्ते तस्मिन् करेऽपि न किमम्बुजसाम्यदोषः ॥ ८८४६॥

ENMSS@8847@1कर्णोत्पलेनापि मुखं सनाथं लभेत नेत्रद्युतिनिर्जितेन ।

ENMSS@8847@2यद्येतदीयेन ततः कृतार्था स्वचक्षुषी किं कुरुते कुरङ्गी ॥ ८८४७॥

ENMSS@8848@1कर्णोत्सङ्गविसर्पिणी नयनयोः कान्तिर्वतंसोत्पलं लाक्षासंभ्रमनिर्व्यपेक्षमधरं लावण्यमेवाञ्चति ।

ENMSS@8848@2हारोऽस्याः स्मितचन्द्रिकैव कुचयोरङ्गप्रभा कञ्चुकी तन्व्याः केवलमङ्गभारमधुना मन्ये परं भूषणम् ॥ ८८४८॥

ENMSS@8849@1कर्णौ तावत् कुवलयदृशां लोचनाम्भोरुहाभ्याम् अभ्याक्रान्तौ कनकरुचिरो भालदेशोऽपि नेयः ।

ENMSS@8849@2इत्याशङ्काकुलितमनसा वेधसा कज्जलौघैः सीमारेखा व्यरचि निबिडभ्रूलताकैतवेन ॥ ८८४९॥

ENMSS@8850@1कर्णौ सपत्न्यः प्रविशालयेयुर् विशालयेयुर्न कदापि नेत्रे ।

ENMSS@8850@2विद्या सदभ्यासवशेन लभ्या सौजन्यमभ्यासवशादलभ्यम् ॥ ८८५०॥

ENMSS@8850A@1कर्तव्यं जिनवन्दनं विधिपरैर्हर्षोल्लसन्मानसैः सच्चारित्रविभूषिताः प्रतिदिनं सेव्याः सदा साधवः ।

ENMSS@8850A@2श्रोतव्यं च दिने दिने जिनवचो मिथ्यात्वनिर्नाशनं दानादौ व्रतपालने

च सततं कार्या रतिः श्रावकैः ॥

ENMSS@8851@1कर्तव्यं त्वेव कर्मेति मनोरेष विनिश्चयः ।

ENMSS@8851@2एकान्तेन ह्यनीहोऽयं पराभवति पूरुषः ॥ ८८५१॥

ENMSS@8852@1कर्तव्यं न करोति बन्धुभिरपि स्नेहात्मभिर्बोधितः कामित्वादवमन्यते हितमतं धीरोऽप्यभीष्टं नरः ।

ENMSS@8852@2निष्कामस्य न विक्रिया तनुभृतो लोके क्वचिद् दृश्यते यत्तस्मादिदमेव मूलमखिलानर्थस्य निर्धारितम् ॥ ८८५२॥

ENMSS@8853@1कर्तव्यं भूमिपालेन शरणागतरक्षणम् ।

ENMSS@8853@2कपोतरक्षणं श्येनात् कृत्वा कीर्तिं शिबिर्गतः ॥ ८८५३॥

ENMSS@8854@1कर्तव्यं वचनं सर्वैः समूहहितवादिनाम् ।

ENMSS@8854@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ८८५४॥

ENMSS@8855@1कर्तव्यः प्रतिदिवसं प्रसन्नचित्तैः स्वल्पोऽपि व्रतनियमोपवासधर्मः ।

ENMSS@8855@2प्राणेषु प्रहरति नित्यमेव मृत्युर् भूतानां महति कृतेऽपि हि प्रयत्ने ॥ ८८५५॥

ENMSS@8856@1कर्तव्यः संचयो नित्यं न तु कार्योऽतिसंचयः ।

ENMSS@8856@2अतिसंचयशीलोऽयं धनुषा जम्बुको हतः ॥ ८८५६॥

ENMSS@8857@1कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि ।

ENMSS@8857@2अकर्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ॥ ८८५७॥

ENMSS@8858@1कर्तव्या चार्थसारेऽपि काव्ये शब्दविचित्रता ।

ENMSS@8858@2विना घण्टाटणत्कारं गजो गच्छन्न शोभते ॥ ८८५८॥

ENMSS@8859@1कर्तव्यानि च मित्राणि दुर्बलानि बलानि च ।

ENMSS@8859@2पश्य कूर्मपतिर्बद्धो मूषिकेण विमोचितः ॥ ८८५९॥

ENMSS@8860@1कर्तव्यान्येव मित्राणि सबलान्यबलानि च ।

ENMSS@8860@2हस्तियूथं वने बद्धं मूषकैर्यद् विमोचितम् ॥ ८८६०॥

ENMSS@8861@1कर्तव्ये साहसं नित्यम् उत्कटं हि विगर्हितम् ।

ENMSS@8861@2अतिसाहसदोषेण भीमः सर्पवशं गतः ॥ ८८६१॥

ENMSS@8861A@1कर्तव्यो गुणसंग्रहः परिहते देयं निजं मानसं श्रोतव्यं वचनामृतं जिनवचः कार्यं यथास्थानवत् ।

ENMSS@8861A@2दातव्यं यतिपुङ्गवेषु निजकं न्यायप्रकल्प्यं धनं श्रद्धेयं सततं सतां सुचरितश्रेयस्करोऽयं विधिः ॥

ENMSS@8862@1कर्तव्योऽप्याश्रयः श्रेयान् फलं भाग्यानुसारतः ।
ENMSS@8862@2नीलकण्ठस्य कण्ठेऽपि वासुकिर्वायुभक्षकः ॥ ८८६२॥
ENMSS@8863@1कर्तव्यो भ्रातृषु स्नेहो विस्मर्तव्या गुणेतराः ।
ENMSS@8863@2संबन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि ॥ ८८६३॥
ENMSS@8864@1कर्तव्यो हृदि वर्तते यदि तरोरस्योपकारस्तदा मा कालं गमयाम्बुवाह समये सिञ्चैनमम्भोभरैः ।
ENMSS@8864@2शीर्णे पुष्पफले दले विगलिते मूले गते शुष्कतां कस्मै किं हितमाचरिष्यसि परीतापस्तु ते स्थास्यति ॥ ८८६४॥
ENMSS@8865@1कर्ता कारयिता चैव प्रेषको ह्यनुमोदकः ।
ENMSS@8865@2सकृतं दुष्कृतं चैव चत्वारः समभागिनः ॥ ८८६५॥
ENMSS@8866@1कर्ता कारयिता चैव यश्चैवमनुमन्यते ।
ENMSS@8866@2शुभं वा यदि वा पापं तेषामपि समं फलम् ।
ENMSS@8867@1कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽतिमानी कृष्णाकेशोत्तरीयव्यपनयनमरुत् पाण्डवा यस्य दासाः ।
ENMSS@8867@2राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः ॥ ८८६७॥
ENMSS@8868@1कर्तुं त्रिलोचनादन्यो न पार्थविजयं क्षमः ।
ENMSS@8868@2तदर्थः शक्यते द्रष्टुं लोचनद्वयिभिः कथम् ॥ ८८६८॥
ENMSS@8869@1कर्तुमकर्तुं शक्तः सकलं जगदेतदन्यथाकर्तुम् ।
ENMSS@8869@2यस्तं विहाय रामं कामं मा धेहि मानसान्यस्मिन् ॥ ८८६९॥
ENMSS@8870@1कर्तुमिष्टमनिष्टं वा कः प्रभुर्विधिना विना ।
ENMSS@8870@2कर्तारमन्यमारोप्य लोकस्तुष्यति कुप्यति ॥ ८८७०॥
ENMSS@8871@1कर्दमवदात्मवैभवम् उल्लास्य च मानवीं प्रजां सुचिरम् ।
ENMSS@8871@2तपनोत्तापप्लुष्टं स्ववपुः कृत्वा गतं सरसा ॥ ८८७१॥
ENMSS@8872@1कर्पासबीजमज्ञानां चूर्णं तैलेन पाचयेत् ।
ENMSS@8872@2तेन संजायते पुष्पं युवतीनां चिराद् गतम् ॥ ८८७२॥
ENMSS@8872A@1कर्पासभस्मतक्रास्थिवर्जं सर्वं सितं शुभम् ।
ENMSS@8872A@2गोवाजिगजदेवर्षिवर्जं कृष्णं तु निन्दितम् ॥
ENMSS@8873@1कर्पासास्थिप्रचयनिचिता निर्धनश्रोत्रियाणां येषां वात्याप्रविततकुटीप्राङ्गणान्ता बभूवुः ।
ENMSS@8873@2तत्सौधानां परिसरभुवि त्वत्प्रसादादिदानीं

क्रीडायुद्धच्छिदुरयुवतीहारमुक्ताः पतन्ति ॥ ८८७३॥

ENMSS@8874@1कर्पूरं चन्दनं कुष्ठं तुलसी सर्जसंभवम् ।

ENMSS@8874@2मुस्तं शिलारसं चैव धत्तूरमगुरुस्तथा ॥ ८८७४॥

ENMSS@8875@1शेफाली शतपुष्पा च सर्षपास्तगरं गुडः ।

ENMSS@8875@2तथा रुद्रजटा सर्वम् एतदेकत्र कारयेत् ॥ ८८७५॥

ENMSS@1564@1(अनेन योगराजेन धूपिताम्बरभूषणः ।

ENMSS@1564@2धूपिताङ्गस्त्रिभुवनं मनुजः कुरुते वशम् ॥ १५६४॥)

ENMSS@8876@1कर्पूर इव दग्धोपि शक्तिमान् यो जने जने ।

ENMSS@8876@2नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥ ८८७६॥

ENMSS@8877@1कर्पूरगौरं करुणावतारं  संसारसारं भुजगेन्द्रहारम् ।

ENMSS@8877@2सदा वसन्तं हृदयारविन्दे  भवं भवानीसहितं नमामि ॥ ८८७७॥

ENMSS@8878@1कर्पूरचन्दनरजो धवलं वहन्तीम्  आश्यानचन्दनविलेपनमङ्गमङ्गम् ।

ENMSS@8878@2अन्तर्गतस्य दहती महतः स्मराग्नेर् दग्धस्य संक्षयवशादिव भस्मशेषम् ॥ ८८७८॥

ENMSS@8879@1कर्पूरद्रवशीकरोत्करमहानीहारमग्नामिव प्रत्यग्रामृतफेनपङ्कपटलीलेपोपदिग्धामिव ।

ENMSS@8879@2स्वच्छैकस्फटिकाश्मवेश्मजठरक्षिप्तामिव क्ष्मामिमां  कुर्वन् पार्वणशर्वरीपतिरसावुद्दाममुद्योतते ॥ ८८७९॥

ENMSS@8880@1कर्पूरधूलिधवलद्युतिपूरधौत-  दिङ्मण्डले शिशिररोचिषि तस्य यूनः ।

ENMSS@8880@2लीलाशिरोंऽशुकनिवेशविशेषक्लृप्ति-  व्यक्तस्तनोन्नतिरभून्नयनावनौ सा ॥ ८८८०॥

ENMSS@8880A@1कर्पूरधूलीरचितालवालः  कस्तूरिकाकल्पितदोहदश्रीः ।

ENMSS@8880A@2हिमाम्बुपूरैरभिषिच्यमानः  प्राश्चं गुणं मुञ्चति किं पलाण्डुः ॥

ENMSS@8881@1कर्पूरधूलीरचितालवालः  कस्तूरिकाकुङ्कुमलिप्तदेहः ।

ENMSS@8881@2सुवर्णकुम्भैः परिषिच्यमानो  निजं गुणं मुञ्चति किं पलाण्डुः ॥ ८८८१॥

ENMSS@8882@1कर्पूरन्तकि केतकन्तकि शरद्राकाशशाङ्कन्तकि  श्रीचन्द्रन्तकि चन्दनन्तकि सुधासाराच्छपूरन्तकि ।

ENMSS@8882@2कैलासन्तकि दुग्धसागरलसत्स्वच्छाच्छदुन्धन्तकि  श्रीशम्भुन्तकि कीर्तयस्तव विभो दर्वीकरेन्द्रन्तकि ॥ ८८८२॥

ENMSS@8883@1कर्पूरन्ति सुधाद्रवन्ति कमलाहासन्ति हंसन्ति च प्रालेयन्ति हिमालयन्ति करकासारन्ति हारन्ति च ।

ENMSS@8883@2त्रैलोक्याङ्गनरङ्गलङ्घिमगतिप्रागल्भ्यसंभावित् आः शीतांशोः किरणच्छटा इव जयन्त्येतर्हि तत्कीर्तयः ॥ ८८८३॥

ENMSS@8884@1कर्पूरपूरच्छविवादविद्या- संवावदूकद्युतिशुक्तिताम्रे ।

ENMSS@8884@2इन्दौ नृपद्वेषि तमोवितानं सूर्योदये रोदिति चक्रवाकी ॥ ८८८४॥

ENMSS@8885@1कर्पूरपूरतुलनां कलयन्ति कीर्तेः श्रीरामचन्द्र तव यत् कवयः कथं तत् ।

ENMSS@8885@2त्वद्वैरिणामतितरामपकीर्तितोऽस्याः स्याद् धूसरत्वमिति तत्र वयं प्रतीमः

॥ ८८८५॥

ENMSS@8886@1कर्पूरप्रतिपन्थिनो हिमगिरिग्रावाग्रसंघर्षिणः

क्षीराम्भोनिधिमध्यगर्भजयिनो गङ्गौघसर्वंकषाः ।

ENMSS@8886@2स्वच्छन्दं हरिचन्दनद्युतितुदः कुन्देन्दुसंवादिनस्

तस्यासन्नरविन्दकन्दरुचयोऽनेके गुणाः केचन ॥ ८८८६॥

ENMSS@8887@1कर्पूरभल्लातकशङ्खचूर्णं क्षारो यवानां समनःशिलश्च ।

ENMSS@8887@2तैलं विपक्वं हरितालमिश्रं निर्मूललोमानि करोति सद्यः ॥ ८८८७॥

ENMSS@8888@1कर्पूरमिश्रसेहुण्डदुग्धलेपेन जायते ।

ENMSS@8888@2शेफसो महती वृद्धिः कठिनस्त्रीसुखावहा ॥ ८८८८॥

ENMSS@8889@1कर्पूरमिश्रेण च कण्टकारी- बीजोद्भवेनैव रसेन लिप्तम् ।

ENMSS@8889@2लिङ्गं रते द्रावकरं वधूनां संजायतेऽत्यन्तसुखावहं च ॥ ८८८९॥

ENMSS@8890@1कर्पूर रे परिमलस्तव मर्दितस्य श्रीखण्ड रे परिमलस्तव घर्षितस्य ।

ENMSS@8890@2रे काकतुण्ड तव वह्निगतस्य गन्धः कस्तूरिका स्वयमथाधितगन्धदृष्टा

॥ ८८९०॥

ENMSS@8891@1कर्पूरवर्तिरिव लोचनतापहन्त्री फुल्लाम्बुजस्रगिव कण्ठसुखैकहेतुः ।

ENMSS@8891@2चेतश्चमत्कृतिपदं कवितेव रम्या नम्या नरीभिरमरीव हि सा विरेजे

॥ ८८९१॥

ENMSS@8892@1कर्पूरादपि कैरवादपि दलत्कुन्दादपि स्वर्णदी- कल्लोलादपि केतकादपि ललत्कान्तादृगन्तादपि ।

ENMSS@8892@2दूरोन्मुक्तकलङ्कशंकरशिरःशीतांशुखण्डादपि श्वेताभिस्तव कीर्तिभिर्धवलिता सप्तार्णवा मेदिनी ॥ ८८९२॥

ENMSS@8893@1कर्पूराम्बुनिषेकभाजि सरसैरम्भोजिनीनां दलैर् आस्तीर्णेऽपि विवर्तमानवपुषोः स्रस्तस्रजि स्रस्तरे ।

ENMSS@8893@2मन्दोन्मेषदृशेः किमन्यदभवत्सा काप्यवस्था तयोर् यस्यां चन्दनचन्द्रचम्पकदलश्रेण्यादि वह्नीयते ॥ ८८९३॥

ENMSS@8894@1कर्पूरायितसैकताय शिशिरक्षोदायमानातप- व्यूहाय व्यजनानिलायितमहाझञ्झामरुद्रंहसे ।

ENMSS@8894@2अस्मै तन्वि निदाघवासरवयोमध्याभिसारक्रमो- त्साहात्युत्सवसाहसाय महते सौहार्दमीहामहे ॥ ८८९४॥

ENMSS@8895@1कर्पूरीयन्ति भूमौ सरसि सरभसं कैरवीयन्ति गङ्गा- कल्लोलीयन्ति नाके दिशि दिशि परितः केतकीयन्ति किं च ।

ENMSS@8895@2हंसीयन्त्यन्तरिक्षे कमलदलदृशां मौक्तिकीयन्ति कण्ठे शुक्तीयन्त्यम्बुराशौ विशदविसरुचो रश्मयः शीतरश्मेः ॥ ८८९५॥

ENMSS@8896@1कर्पूरेण स्थलविरचना कुङ्कुमेनालवालं माध्वीकानि प्रतिदिनपयः पञ्चबाणः कृषाणः ।

ENMSS@8896@2तत्रोत्पन्ना यदि किल भवेत् काञ्चनी कापि वल्ली सा चेदस्याः किमपि
लभते सुभ्रुवः सौकुमार्यम् ॥ ८८९६॥

ENMSS@8897@1कर्पूरैः किमपूरि किं मलयजैरालेपि किं पारदैर् अक्षालि स्फटिकोपलैः किमघटि द्यावापृथिव्योर्वपुः ।

ENMSS@8897@2एतत् तर्कय कैरवक्लमहरे शृङ्गारदीक्षागुरौ दिक्कान्तामुकुरे चकोरसुहृदि प्रौढे तुषारत्विषि ॥ ८८९७॥

ENMSS@8898@1कर्पूरैरिव पारदैरिव सुधास्यन्दैरिवाप्लाविते जाते हन्त दिवापि देव ककुभां गर्भे भवत्कीर्तिभिः ।

ENMSS@8898@2धृत्वाङ्गे कवचं निबध्य शरधिं कृत्वा पुरो माधवं कामः कैरवबान्धवोदयधिया धुन्वन् धनुर्धावति ॥ ८८९८॥

ENMSS@8899@1कर्म खल्विह कर्तव्यं जातेनामित्रकर्शन ।

ENMSS@8899@2अकर्माणो हि जीवन्ति स्थावरा नेतरे जनाः ॥ ८८९९॥

ENMSS@8900@1कर्म चात्महितं कार्यं तीक्ष्णं वा यदि वा मृदु ।

ENMSS@8900@2ग्रस्यतेऽकर्मशीलस्तु सदानर्थैरकिंचनः ॥ ८९००॥

ENMSS@8901@1कर्म चैव हि सर्वेषां कारणानां प्रयोजकम् ।

ENMSS@8901@2श्रेयःपापीयसां चात्र फलं भवति कर्मणाम् ॥ ८९०१॥

ENMSS@8902@1कर्मजन्यशरीरेषु रोमाः शारीरमानसाः ।
ENMSS@8902@2शरा इव पतन्तीह विमुक्ता दृढधन्विभिः ॥ ८९०२॥
ENMSS@8903@1कर्मजाः प्रभवन्त्येव यथाकालमुपद्रवाः ।
ENMSS@8903@2एतत्तु कष्टं यच्छत्रुः कर्ताहमिति मन्यते ॥ ८९०३॥
ENMSS@8903A@1कर्म जीवं च संश्लिष्टं परिज्ञातात्मनिश्चयः ।
ENMSS@8903A@2विभिन्नीकुरुते साधुः सामायिकशलाकया ॥
ENMSS@8904@1कर्मज्ञानं च मोक्षाय कर्मण्यर्थोऽधिकारिता ।
ENMSS@8904@2अतोऽर्थैनैव कैवल्यं न कैवल्येन लभ्यते ॥ ८९०४॥
ENMSS@8905@1कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः ।
ENMSS@8905@2प्रत्यक्षं दृश्यते लोके कृतस्याप्यकृतस्य च ॥ ८९०५॥
ENMSS@8906@1कर्मणः संचयात् स्वर्गनरकौ मोक्षबन्धने ।
ENMSS@8906@2कर्मणो ज्ञायते जन्तुर्बीजादिव नवाङ्कुरः ॥ ८९०६॥
ENMSS@8907@1कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
ENMSS@8907@2रजसस्तु फलं दुःखम् अज्ञानं तमसः फलम् ॥ ८९०७॥
ENMSS@8908@1सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च ।
ENMSS@8908@2प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ ८९०८॥
ENMSS@8909@1कर्मणां तु प्रशस्तानाम् अनुष्ठानं सुखावहम् ।
ENMSS@8909@2तेषामेवाननुष्ठानं पश्चात् तापकरं महत् ॥ ८९०९॥
ENMSS@8910@1कर्मणाचरितं पूर्वं सद्भिराचरितं च यत् ।
ENMSS@8910@2तदेवास्थाय मोदन्ते दान्ताः शमपरायणाः ॥ ८९१०॥
ENMSS@8911@1कर्मणा जायते जन्तुः कर्मणैव विलीयते ।
ENMSS@8911@2सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥ ८९११॥
ENMSS@8912@1अस्ति चेदीश्वरः कश्चित् फलरूप्यन्यकर्मणाम् ।
ENMSS@8912@2कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः ॥ ८९१२॥
ENMSS@8913@1कर्मणा तक्षकारेण मनुष्यो यत्तु पुत्रिका ।
ENMSS@8913@2वासनारज्जुमाकृष्य सवंकर्मसु चोदितः ॥ ८९१३॥
ENMSS@8913A@1कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते ।
ENMSS@8913A@2तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥
ENMSS@8914@1कर्मणा बाध्यते बुद्धिर्बुद्ध्या कर्म न बाध्यते ।
ENMSS@8914@2सुबुद्धिरपि यद् रामो हैमं हरिणमन्वगात् ॥ ८९१४॥
ENMSS@8915@1कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ।

ENMSS@8915@2अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन् न तु ॥ ८९१५॥
ENMSS@8916@1कर्मणा मनसा वाचा यदभीक्ष्णं निषेवते ।
ENMSS@8916@2तदेवापहरत्येनं तस्मात् कल्याणमाचरेत् ॥ ८९१६॥
ENMSS@8916A@1कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ।
ENMSS@8916A@2अक्लेशजननं प्रोक्तं त्वहिंसा परमर्षिभिः ॥
ENMSS@8917@1कर्मणामिष्टदुष्टानां जायते फलसंक्षयः ।
ENMSS@8917@2चेतसोऽर्थकषायत्वाद् यत्र सा घ्वस्तिरुच्यते ॥ ८९१७॥
ENMSS@8917A@1कर्मणा मोहनीयेन मोहितं सकलं जगत् ।
ENMSS@8917A@2धन्या मोहं समुत्सार्य तपस्यन्ति महाधियः ॥
ENMSS@8918@1कर्मणा येन तेनेह मृदुना दारुणेन वा ।
ENMSS@8918@2उद्धरेद् दीनमात्मानं समर्थो धर्ममाचरेत् ॥ ८९१८॥
ENMSS@8919@1कर्मणा रहितं ज्ञानं पङ्गुना सदृशं भवेत् ।
ENMSS@8919@2न तेन प्राप्यते किंचित् न च किंचित् प्रसाध्यते ॥ ८९१९॥
ENMSS@8920@1एवं ज्ञानेन हीनं यत् कर्मान्धेन समं स्मृतम् ।
ENMSS@8920@2मार्गो वा मार्गलक्ष्यं वा नैव तस्य प्रतीयते ॥ ८९२०॥
ENMSS@8921@1कर्मणा मनसा वाचा कर्तव्यं कर्म कुर्वतः ।
ENMSS@8921@2तस्मादेवेष्टसंसिद्धिश्चतुरस्रा प्रजायते ॥ ८९२१॥
ENMSS@8922@1कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः ।
ENMSS@8922@2लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ ८९२२॥
ENMSS@8923@1कर्मणोऽपि प्रधानत्वं किं कुर्वन्ति शुभा ग्रहाः ।
ENMSS@8923@2वसिष्ठदत्तलग्नेऽपि जानकी दुःखभागिनी ॥ ८९२३॥
ENMSS@8924@1कर्मणो यस्य यः कालः तत्कालव्यापिनी तिथिः ।
ENMSS@8924@2तया कर्माणि कुर्वीत ह्रासवृद्धिं न कारयेत् ॥ ८९२४॥
ENMSS@8925@1कर्मणो हि प्रधानेन बुद्धिना किं प्रयोजनम् ।
ENMSS@8925@2पाषाणस्य कुतो बुद्धिस्ततो देवो भविष्यति ॥ ८९२५॥
ENMSS@8926@1कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
ENMSS@8926@2अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ ८९२६॥
ENMSS@8927@1कर्मण्यकर्म यः पश्येद् अकर्मणि च कर्म यः ।
ENMSS@8927@2स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ ८९२७॥
ENMSS@8928@1कर्मण्यकर्मविधिरेष यदाचरन्ति  कर्माणि तत्तदनुबन्धजिहासयेति ।
ENMSS@8928@2सत्यं तथाप्यभिनवो भविता न बन्धः  प्राचीनबन्धहरणे क इवाभ्युपायः

॥ ८९२८॥

ENMSS@8929@1कर्मण्यकोविदाः स्तब्धा मूर्खाः पण्डितमानिनः ।

ENMSS@8929@2वदन्ति चाटुकान् मूढा यया माध्व्या गिरोत्सुकाः ॥ ८९२९॥

ENMSS@8930@1कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

ENMSS@8930@2मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ८९३०॥

ENMSS@8931@1कर्म त्यजेम यदि नूनमधः पतेम  यद्याचरेम न कदापि भवं तरेम ।

ENMSS@8931@2कर्म त्यजेदिति चरेदिति च प्रवृत्ता  भावेन केन निगमा इति न प्रतीमः

॥ ८९३१॥

ENMSS@8932@1कर्मदायादवल्लोकः कर्मसंबन्धलक्षणः ।

ENMSS@8932@2कर्माणि चोदयन्तीह यथान्योन्यं तथा वयम् ॥ ८९३२॥

ENMSS@8933@1कर्मब्रह्मविचारणां विजहतो भोगापवर्गप्रदां  घोषं कंचन

कण्ठशोषफलकं कुर्वन्त्यमी तार्किकाः ।

ENMSS@8933@2प्रत्यक्षं न पुनाति नापहरते पापानि पीलुच्छटा  व्यप्तिर्नावति नैव

पात्यनुमितिर्नो पक्षता रक्षति ॥ ८९३३॥

ENMSS@8934@1कर्मभिः स्वैरवाप्तस्य जन्मनः पितरौ यथा ।

ENMSS@8934@2राज्ञं तथान्ये राज्यस्य प्रवृत्तावेव कारणम् ॥ ८९३४॥

ENMSS@8935@1कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् ।

ENMSS@8935@2अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः ॥ ८९३५॥

ENMSS@8936@1कर्मभूमिरियं ब्रह्मन् फलभूमिरसौ मता ।

ENMSS@8936@2इह यत् क्रियते कर्म तत् परत्रोपभुज्यते ॥ ८९३६॥

ENMSS@8937@1कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर ।

ENMSS@8937@2तीक्ष्णं सर्वजनो हन्ति सर्पं दुष्टमिवागतम् ॥ ८९३७॥

ENMSS@8938@1कर्म सर्वोत्तमं किं मे करणीयं भवेदिति ।

ENMSS@8938@2मानवः प्रभवेद् वेत्तुं लब्ध्वा स्थैर्यं शमं तथा ॥ ८९३८॥

ENMSS@8939@1कर्माणि जन्मान्तरसंचितानि  महान्ति विज्ञानमहाहुताशे ।

ENMSS@8939@2सर्वाणि दग्धानि भवन्ति सद्यो  महानलस्यास्ति किमार्द्रभावः ॥ ८९३९॥

ENMSS@8940@1कर्माणि बध्नन्ति शुभाशुभानि  कर्तात्रमौपाधिकमेव जीवम् ।

ENMSS@8940@2परं न तत्साक्षिणमस्तदोषम्  आभीरमद्यात् किमजे शयाने ॥ ८९४०॥

ENMSS@8941@1कर्माणि यानि लोके  दुःखनिमित्तानि लज्जनीयानि ।
ENMSS@8941@2सर्वाणि तानि कुरुते  जठरनरेन्द्रस्य वशमितो जन्तुः ॥ ८९४१॥
ENMSS@8941A@1कर्माणि सर्वाणि च मोहनीये  दुःखानि सर्वाणि दरिद्रतायाम् ।
ENMSS@8941A@2पापानि सर्वाणि च चौर्यभावे  दोषा अशेषा अनृते भवन्ति ॥
ENMSS@8942@1कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ।
ENMSS@8942@2पश्येत् पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥ ८९४२॥
ENMSS@8943@1कर्मानिष्टं विधत्ते भवति परवशो लज्जते नो जनानां  धर्माधर्मौ न वेत्ति त्यजति गुरुकुलं सेवते नीचलोकम् ।
ENMSS@8943@2भूत्वा प्राज्ञः कुलीनः प्रथितपृथुगुणो माननीयो बुधोऽपि  ग्रस्तो येनात्र देही नुद मदनरिपुं जीव तं बुःखदक्षम् ॥ ८९४३॥
ENMSS@8943A@1कर्मानुभावदुःखित  एवं मोहान्धकारगहनवति ।
ENMSS@8943A@2अन्ध इव दुर्गमार्गे  भ्रमति हि संसारकान्तारे ॥
ENMSS@8944@1कर्मानुमेयाः सर्वत्र परोक्षगुणवृत्तयः ।
ENMSS@8944@2तस्मात् परोक्षवृत्तीनां फलैः कर्म विभावयेत् ॥ ८९४४॥
ENMSS@8945@1कर्मान्यजन्मनि कृतं सदसच्च दैवं  तत् केवलं भवति जन्मनि सत्कुलाद्ये ।
ENMSS@8945@2बाल्यात् परं विनयसौष्ठवपात्रतापि  पुंदैवजा कृषिवदित्यत उद्यमेत ॥ ८९४५॥
ENMSS@8946@1कर्मापराधात् सत्त्वानां विनाशे समुपस्थिते ।
ENMSS@8946@2अनयो नयरूपेण बुद्धिमाक्रम्य तिष्ठति ॥ ८९४६॥
ENMSS@8947@1कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
ENMSS@8947@2तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ८९४७॥
ENMSS@8948@1कर्मारण्यं दहति शिखिवन्मातृवत्पाति दुःखात्  सम्यग्रीतिं वदति गुरुवत् स्वामिवद् यद् बिभर्ति ।
ENMSS@8948@2तत्त्वातत्त्वप्रकटनपटुः स्पष्टमाप्नोति पूतं  तत् संज्ञानं विगलितमलं ज्ञानदानेन मर्त्यः ॥ ८९४८॥
ENMSS@8949@1कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
ENMSS@8949@2इन्द्रियार्थान् विंमूढात्मा मिथ्याचारः स उच्यते ॥ ८९४९॥
ENMSS@8950@1यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
ENMSS@8950@2कर्मेन्द्रियैः कर्मयोगम् असक्तः स विशिष्यते ॥ ८९५०॥
ENMSS@8950A@1कर्मेन्धनं यदज्ञानात् संचितं जन्मकानने ।

ENMSS@8950A@2उपवासशिखी सर्वं तद्भस्मीकुरुते क्षणात् ॥
ENMSS@8950B@1कर्मेन्धनं समाश्रित्य दृढा सद्भावनाहुतिः ।
ENMSS@8950B@2धर्मध्यानाग्निना कार्या दीक्षितेनाग्निकारिका ॥
ENMSS@8951@1कर्मैव कारणं चात्र सुगतिं दुर्गतिं प्रति ।
ENMSS@8951@2कर्मैव प्राक्तनमपि क्षणं किं कोऽस्ति चाक्रियः ॥ ८९५१॥
ENMSS@8952@1कर्मौक्तिनर्मनिर्माणैः प्रातः प्रातः प्रधावताम् ।
ENMSS@8952@2धनं धनं प्रलपतां निधनं विस्मृतं नृणाम् ॥ ८९५२॥
ENMSS@8952A@1कर्मोदयाद् भवगतिर् भवगतिमूला शरीरनिर्वृत्तिः ।
ENMSS@8952A@2देहादिन्द्रियविषया  विषयनिमित्ते च सुखदुःखे ॥
ENMSS@8953@1कार्यस्य निःसंशयमात्महेतोः  सरूपतां हेतुभिरभ्युपेत्य ।
ENMSS@8953@2दुःखस्य कार्यं सुखमामनन्तः  स्वेनैव वाक्येन हता वराकाः ॥ ८९५३॥
ENMSS@8954@1कर्षणान्वेषणे यातुः क्षुतं जलदवृष्टये ।
ENMSS@8954@2हेमादिभूषणे नव्ये विधृते भूषणाप्तये ॥ ८९५४॥
ENMSS@8955@1कर्षति वपति लुनीते  दीव्यति सीव्यति पुनाति वयते च ।
ENMSS@8955@2विदधाति किं न कृत्यं  जठरानलशान्तये तनुमान् ॥ ८९५५॥
ENMSS@8956@1कर्षद्भिः सिचयाञ्चलानतिरसात् कुर्वद्भिरालिङ्गनं  गृह्णानैः
कचमालिखद्भिरधरं विद्रावयद्भिः कुचौ ।
ENMSS@8956@2प्रत्यक्षेऽपि कलिङ्गमण्डलपतेरन्तःपुराणामहो  धिक्कष्टं
विटपैर्विटैरिव वने किं नाम नाचेष्टितम् ॥ ८९५६॥
ENMSS@8957@1कलं कमुक्तं तनुमध्यनामिका  स्तनद्वयी च त्वदृते न हन्त्यतः ।
ENMSS@8957@2न याति भूतं गणने भवन्मुखे  कलङ्कमुक्तं तनुमध्यनामिका ॥ ८९५७॥
ENMSS@8958@1कलकण्ठ गणास्वाद्ये कामस्यास्त्रे निजाङ्कुरे ।
ENMSS@8958@2निम्बवृत्तिभिरुद्गदीर्णे न चूतः परितप्यते ॥ ८९५८॥
ENMSS@8959@1कलकलमपरा मुधा विधाय  क्षितितिलकान् नयनान्तमाससाद ।
ENMSS@8959@2अवतरति मृगीदृशां तृतीयं  मनसिजचक्षुरुपायदर्शनेषु ॥ ८९५९॥
ENMSS@8960@1कलकोकिलनादविवादबलद्-  भ्रमरावलिलोलरसालद्रुम- ।
ENMSS@8960@2क्रममालतिकादिकदम्बलसत्-  कुसुमागममोदमनोजशरैः ॥ ८९६०॥
ENMSS@8961@1परिपीडितया विधुसान्द्रकला-  कमलाकरचम्पकसंगदधत्- ।
ENMSS@8961@2पवनैरनुचिन्तितया प्रिय सा  सखि सम्प्रति किं क्रियतेऽबलया ॥ ८९६१॥

ENMSS@8962@1कलक्कणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।

ENMSS@8962@2पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम् ॥ ८९६२॥

ENMSS@8963@1कलक्काणे वीणे विरम रणितात् कोकिल सखे सखेदो माभूस्त्वं द्रुहिणविहितस्ते

परिभवः ।

ENMSS@8963@2सुधे मुञ्च स्पर्धामधरमधुसंसर्गसरसाः स्फुटन्त्येता वाचः किमपि

कमनीया मृगदृशः ॥ ८९६३॥

ENMSS@8964@1कलङ्कदाशो गगनाम्बुराशौ प्रसार्य चन्द्रातपतन्तुजालम् ।

ENMSS@8964@2लग्नोडुमीनांल्लघु संजिघृक्षुश् चन्द्रप्लवस्थश्चरमाब्धिमेति

॥ ८९६४॥

ENMSS@8965@1कलङ्कयन्ति सन्मार्गजुषः परिभवन्त्यलम् ।

ENMSS@8965@2वात्या इवातिचपलाः स्त्रियो भूरिरजोवृताः ॥ ८९६५॥

ENMSS@8966@1तत् तासु न प्रसक्तव्यं धीरसत्त्वैः सुबुद्धिभिः ।

ENMSS@8966@2शीलमभ्यसनीयं तु वीतरागपदाप्तये ॥ ८९६६॥

ENMSS@8967@1कलङ्कहीनः क्षयदोषशून्यः सदा निवृत्तस्तमसो भयाच्च ।

ENMSS@8967@2बताभविष्यद् द्विजनायकोऽपि तदापि मन्ये न तवाननाभम् ॥ ८९६७॥

ENMSS@8968@1कलङ्किनः प्रिये दोषाकरस्य च जडस्य च ।

ENMSS@8968@2न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ॥ ८९६८॥

ENMSS@8969@1कलङ्किनि जले क्वापि सौरं प्रतिफलन् महः ।

ENMSS@8969@2तमोऽपहत्वं तनुते समृद्धिं च दिने दिने ॥ ८९६९॥

ENMSS@8970@1कलङ्की निःशङ्कं परितपतु शीतद्युतिरसौ भुजङ्गव्यासङ्गीवमतु

गरलं चन्दनरसः ।

ENMSS@8970@2स्वयं दग्धो दाहं वितरतु मनोभूरपि भृशं जगत्प्राण

प्राणानपहरसि किं ते समुचितम् ॥ ८९७०॥

ENMSS@8970A@1कलङ्केन यथा चन्द्रः क्षारेण लवणाम्बुधिः ।

ENMSS@8970A@2कलहेन तथा भाति ज्ञानवानापि मानवः ॥

ENMSS@8971@1कलत्रं पृष्ठतः कृत्वा रमते यः परस्त्रियः ।

ENMSS@8971@2अधर्मश्चापदस्तस्य सद्यः फलति नित्यशः ॥ ८९७१॥

ENMSS@8972@1कलत्रचिन्ताकुचितस्य पुंसः श्रुतं च शीलं च गुणाश्च सर्वे ।

ENMSS@8972@2अपक्वकुम्भे निहिता इवापः प्रयान्ति देहेन समं विनाशम् ॥ ८९७२॥

ENMSS@8973@1कलत्रनिन्दागुरुणा किलैवम्  अभ्याहतं कीर्तिविपर्ययेण ।
ENMSS@8973@2अयोघनेनाय इवाभितप्तं  वैदेहिबन्धोर्हृदयं विदद्रे ॥ ८९७३॥
ENMSS@8974@1कलत्रपुत्रादिनिमित्ततः क्वचिद्  विनिन्द्यरूपे विहितेऽपि कर्मणि ।
ENMSS@8974@2इदं कृतं कर्म विनिन्दितं सतां  मयेति भव्यश्चकितो विनिन्दति ॥ ८९७४॥
ENMSS@8975@1कलत्रभारेण विलोलनीविना  गलद्दुकूलस्तनशालिनोरसा ।
ENMSS@8975@2वलिव्यपायस्फुटरोमराजिना  निरायतत्त्वादुदरेण ताम्यता ॥ ८९७५॥
ENMSS@8976@1विलम्बमानाकुलकेशपाशया  कयाचिदाविष्कृतबाहुमूलया ।
ENMSS@8976@2तरुप्रसूनान्यपदिश्य सादरं  मनोधिनाथस्य मनः समाददे ॥ ८९७६॥
ENMSS@8977@1कलत्रमात्मा सुहृदो धनानि  वृथा भवन्तीह निमेषमात्रात् ।
ENMSS@8977@2मुहुर्मुहुश्चाकुलितानि तानि  तस्मान् न विद्वानतिविग्रही स्यात् ॥ ८९७७॥
ENMSS@8977A@1कलत्रहरणल्केशात् खिन्नानामात्मनस्तनौ ।
ENMSS@8977A@2धर्तुमुत्सुकता नष्टेः सुदृशां सुधियामिव ॥
ENMSS@8978@1कलभ तवान्तिकमागतम्  अलिमेतं मा कदाप्यवज्ञासीः ।
ENMSS@8978@2अपि दानसुन्दराणां  द्विपधुर्याणामयं शिरोधार्यः ॥ ८९७८॥
ENMSS@8979@1कलमाक्रान्तविश्वस्य मषीकृष्णस्य भोगिनः ।
ENMSS@8979@2आसन्नबन्धनस्यान्ते दिविरस्य धनेन किम् ॥ ८९७९॥
ENMSS@8980@1कलमं फलभारातिगुरुमूर्धतया शनैः ।
ENMSS@8980@2विनामान्तिकोद्भूतं समाघ्रातुमिवोत्पलम् ॥ ८९८०॥
ENMSS@8980A@1कलमधुररक्तकण्ठी  शयने मदिरालसा समदना च ।
ENMSS@8980A@2वक्रापरवक्राभ्याम्  उपतिष्ठतु वारमुख्या त्वाम् ॥
ENMSS@8981@1कलमाः पाकविनम्रा  मूलतलाघ्रातसुरभिकल्हाराः ।
ENMSS@8981@2पवनाकम्पितशिरसः  प्रायः कुर्वन्ति परिमलश्लाघाम् ॥ ८९८१॥
ENMSS@8982@1कलमान्तनिर्गतमषी-  बिन्दुव्याजेन साञ्जनाश्रुकणा ।
ENMSS@8982@2कायस्थलुण्ठ्यमाना  रोदिति खिन्नेव राजश्रीः ॥ ८९८२॥
ENMSS@8983@1कलय कमलमस्मिन्नित्युदीर्य स्थितानां  प्रतिफलितमुखेषु न्यस्तहस्तारविन्दाः ।
ENMSS@8983@2स्फटिकविपिनमध्ये माणिकप्रेयसीनां  निभृतहसितपात्रं यत्र याता युवानः ॥ ८९८३॥
ENMSS@8984@1कलयति कमलोपमानमक्ष्णोः  प्रथयति वाचि सुधारसस्य साम्यम् ।

ENMSS@8984@2सखि कथय किमाचरामि कान्ते  समजनि तत्र सहिष्णुतैव दोषः ॥ ८९८४॥

ENMSS@8985@1कलयति किं न सदा फलतां बहुफलतां च स वृक्षः ।

ENMSS@8985@2यस्य परोपकृतौ कश्चिन् न सपक्षोऽपि विपक्षः ॥ ८९८५॥

ENMSS@8986@1कलयति कुवलयमाला-  ललितं कुटिलः कटाक्षविक्षेपः ।

ENMSS@8986@2अधरः किसलयलीला-  माननमस्याः कलानिधिविलासम् ॥ ८९८६॥

ENMSS@8987@1कलयति मम चेतस्तल्पमङ्गारकल्पं  ज्वलयति मम गात्रं चन्दनं चन्द्रकश्च ।

ENMSS@8987@2तिरयति मम नेत्रे मोहजन्मान्धकारो  विकृतबहुविकारं मन्मथो मां दुनोति ॥ ८९८७॥

ENMSS@8988@1कलयतु हंसविलासगतिं  स बकः सरसि वराकः ।

ENMSS@8988@2नीरक्षीरविवेकविधौ  तस्य कुतः परिपाकः ॥ ८९८८॥

ENMSS@8989@1कलय वलयं धम्मिल्लेऽस्मिन्निवेशय मल्लिकां  रचय सिचयं मुक्ताहारं विभूषय सत्वरम् ।

ENMSS@8989@2मृगमदमषीपत्रालेपं कुरुष्व कपोलयोः  सहचरि समायातः प्रातः स ते हृदयप्रियः ॥ ८९८९॥

ENMSS@8990@1कलयसि वयस्य कस्मात्  त्वं रुचिरं भारतीशास्त्रम् ।

ENMSS@8990@2अत्रोऽक्तिप्रत्युक्तौ  कलय मिथो भूरिशस्त्रपातरणम् ॥ ८९९०॥

ENMSS@8991@1कलया तुषारकिरणस्य पुरः  परिमन्दभिन्नतिमिरौघजटम् ।

ENMSS@8991@2क्षणमभ्यपद्यत जनैर्न मृषा  गगनं गणाधिपतिमूर्तिरिति ॥ ८९९१॥

ENMSS@8992@1कलयात्र प्रकाश्यं चेत् किंचिद्वा दिव्यजीवने ।

ENMSS@8992@2तस्यामपि प्रकाशा स्याद् विशाला शान्तिरुज्ज्वला ॥ ८९९२॥

ENMSS@8992A@1कलये किसलयमधरं  शङ्के पङ्केरुहं करद्वन्द्वम् ।

ENMSS@8992A@2मन्ये मनसिजवेत्रं  गात्रं नेत्रैकमोहनं तन्व्याः ॥

ENMSS@8992B@1कलरवकण्ठकरम्बित-  कलरवकलकण्ठकूजिते सुरते ।

ENMSS@8992B@2तव मनुमीलितलोचन-  माननमवलोकितुं प्रिये कलये ॥

ENMSS@8993@1कलशे निजहेतुदण्डजः  किमु चक्रभ्रमकारितागुणः ।

ENMSS@8993@2स तदुच्चकुचौ भवन् प्रभा-  झरचक्रभ्रममातनोति यत् ॥ ८९९३॥

ENMSS@8994@1कलहः कदापि मास्त्विति  कलितशरीरैक्ययोः शिवयोः ।

ENMSS@8994@2अहमस्म्यहमस्मीति  प्राप्तः कलहो मम त्राणे ॥ ८९९४॥

ENMSS@8995@1कलहकलभविन्ध्यः कोपगृध्रश्मशानं  व्यसनभुजगरन्ध्रं

द्वेषदस्युप्रदोषः ।

ENMSS@8995@2सुकृतवनदवाग्निर्मार्दवाम्भोदवायुर् नयनलिनतुषारोऽत्यर्थमर्थानुरागः ॥ ८९९५॥

ENMSS@8996@1कलहकलया यत् संवृत्यै त्रपावनतानना पिहितपुलकोद्भेदं सुभ्रूश्चकर्ष न कञ्चुकम् ।

ENMSS@8996@2दयितमभितस्तामुत्कण्ठां विवव्रुरनन्तरं झटिति तटिति त्रुट्यन्तोऽन्तः स्तनांशुकसन्धयः ॥ ८९९६॥

ENMSS@8997@1कलहप्रियातिदीर्घा खर्वा वा श्यामपीतहरिता वा ।

ENMSS@8997@2लम्बोष्ठी लघुनासा लघुशिथिलस्तनविभागा च ॥ ८९९७॥

ENMSS@8998@1कलहमातनुते मदिरावशस् तमिह येन निरस्यति जीवितम् ।

ENMSS@8998@2वृषमपास्यति संचिनुते मलं धनमपैति जनैः परिभूयते ॥ ८९९८॥

ENMSS@8999@1कलहान्तरिताप्रलपनम् अतः परं नायकस्य शिक्षा च ।

ENMSS@8999@2संभोगाविष्करणं कुलटा संकीर्णमिति च शृङ्गारः ॥ ८९९९॥

ENMSS@9000@1कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम् ।

ENMSS@9000@2कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥ ९०००॥

ENMSS@9001@1कलहायन्ते मूढाः कः प्रतिभूः श्वः प्रभात इति ।

ENMSS@9001@2तस्यामेव रजन्यां कः प्रतिभूः स्वस्य सत्तायाम् ॥ ९००१॥

ENMSS@9002@1कलां तामैन्दवीं वन्दे यया यादष्पतिः पिता ।

ENMSS@9002@2आरुह्य हरमूर्धानं कृतस्त्रैलोक्यमूर्धनि ॥ ९००२॥

ENMSS@9003@1कलाः सर्वे हरेरेव सप्रजापतयस्तथा ।

ENMSS@9003@2एते त्वंशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ॥ ९००३॥

ENMSS@9003A@1कलाकलापसम्पन्ना उपकर्तुः परञ्मुखाः ।

ENMSS@9003A@2न भवन्ति महात्मानः सरसः शिखिनो यथा ॥

ENMSS@9004@1कलाकाष्ठामुहूर्तानां कालस्य व्रजतां जवात् ।

ENMSS@9004@2न लक्ष्यते विभागेन दीपस्येवार्चिषां गतिः ॥ ९००४॥

ENMSS@9005@1कलात्तमायालवकान्तमूर्तिः कलक्वणद्वेणुनिनादरम्यः ।

ENMSS@9005@2श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥ ९००५॥

ENMSS@9006@1कलाधारो वक्रः स्फुरदधररागो नवतनुर् गलन्मानावेशास्तरुणरमणीर्नागर इव ।

ENMSS@9006@2घनश्रोणीबिम्बे नयनमुकुले चाधरदले कपोले ग्रीवायां

कुचकलशयोश्चुम्बति शशी ॥ ९००६॥

ENMSS@9007@1कलाधिनाथाधिगमाद् द्वितीये किमद्वितीयेति तनोषि गर्वम् ।

ENMSS@9007@2अयि त्वमस्मद्वचसि प्रतीया अयं तृतीयामुपगन्तुकामः ॥ ९००७॥

ENMSS@9008@1कलाधिनाथानयनाय सायं कुमुद्वतीप्रेषित एव भृङ्गः ।

ENMSS@9008@2किमिन्दुनालिङ्ग्य सरागमङ्के कृतः कलङ्कभ्रममातनोति ॥ ९००८॥

ENMSS@9009@1कलानां ग्रहणादेव सौभाग्यमुपजायते ।

ENMSS@9009@2देशकालौ त्वपेक्ष्यासां प्रयोगः संभवेन्न वा ॥ ९००९॥

ENMSS@9010@1कलानाथः कामं भजति बहुदोषाङ्किततनुं कुमुद्वत्यास्तस्मिन्नपि भवति

किं नाम न रुचिः ।

ENMSS@9010@2न पद्मिन्या मोदः किमुदयत्युष्णमहसि प्रिये प्रायो दोषान् न गणयति

चित्तं मृगदृशः ॥ ९०१०॥

ENMSS@9010A@1कलानिधिकरस्पर्शात् प्रसन्नोल्लासितारका ।

ENMSS@9010A@2बिभ्रणाम्बरमानीलं कामिनी यामिनीयते ॥

ENMSS@9011@1कलानिधिरयं रवेः समुपलभ्य रूपं स्वयं दिनान्तसमयेऽस्पृशत्

सपदि पद्मिनीं रागवान् ।

ENMSS@9011@2धवान्यकरसंगमान्मुकुलितेति पूर्वाकृतिं समीक्ष्य जहसुः प्रिया

ध्रुवमभूदतः पाण्डुरः ॥ ९०११॥

ENMSS@9012@1कलापिनां चारुतयोपयान्ति वृन्दानि लापोढघनागमानाम् ।

ENMSS@9012@2वृन्दानिलापोढघनागमानां कलापिनां चारुतयोऽपयान्ति ॥ ९०१२॥

ENMSS@9013@1कलाभिरुच्छ्रिता वेश्या रूपशीलगुणान्विता ।

ENMSS@9013@2लभते गणिकाशब्दं स्थानं च जनसंसदि ॥ ९०१३॥

ENMSS@9014@1कलामिन्दुः करं दाता धारां धाराधरो यदि ।

ENMSS@9014@2संकोचयिष्यते तर्हि जीविष्यति कथं जगत् ॥ ९०१४॥

ENMSS@9015@1कलारत्नं गीतं गगनतलरत्नं दिनमणिः सभारत्नं विद्वान्

श्रवणपुटरत्नं हरिकथा ।

ENMSS@9015@2निशारत्नं चन्द्रः शयनतलरत्नं शशिमुखी महीरत्नं श्रीमाञ्जयति

रघुनाथो नृपवरः ॥ ९०१५॥

ENMSS@9016@1कलावतः सैव कला ययाधःक्रियते भवः ।

ENMSS@9016@2बह्वीभिश्च कलाभिः किं याभिरङ्कः प्रदर्श्यते ॥ ९०१६॥

ENMSS@9017@1कलावति क्षततमसि प्रभावति स्फुटोदये जननयनाभिनन्दिनि ।

ENMSS@9017@2ददुर्दृशं शशिनि रुषाभिसारिकाः क्वचिद् भवत्यतिसुभगोऽपि दुर्भगः ॥ ९०१७॥

ENMSS@9018@1कलावति चलां दृष्टिं न कुर्यास्त्वं मुहुर्मुहुः ।

ENMSS@9018@2लग्नोऽपि न तथा बाणो बाधते चालितो यथा ॥ ९०१८॥

ENMSS@9019@1कलासीमा काव्यं सकलगुणसीमा वितरणं भये सीमा मृत्युः सकलसुखसीमा

सुवदना ।

ENMSS@9019@2तपःसीमा मुक्तिः सकलकृतिसीमाश्रितभृतिः प्रिये सीमाह्लादः

श्रवणसुखसीमा हरिकथा ॥ ९०१९॥

ENMSS@9020@1कला सेवाथ धर्मार्थौ तृष्णादारिद्र्यपद्धती ।

ENMSS@9020@2सन्तोषक्षान्तिकरुणा वैराग्यं तदनु स्तुतिः ॥ ९०२०॥

ENMSS@9021@1कलास्तास्ताः सम्यग्वहसि यदसि त्वं द्विजपतिर् द्युतिस्तादृग्गूला जनिरपि

च रत्नाकरकुले ।

ENMSS@9021@2बहु ब्रूमः किं वा पुरहरशिरोमण्डनमसि त्वदीयं तत् सर्वं शशधर

कलङ्काद् विफलितम् ॥ ९०२१॥

ENMSS@9022@1कलिकलुषसङ्कटाकुल- कुटुम्बसंवलनखेदविकलस्य

ENMSS@9022@2प्रतिनिधिरिव प्रवासः संसारविरागसुखसमुद्रस्य ॥ ९०२२॥

ENMSS@9023@1कलिकलुषे मनसि स्वे कथमिव जगदार्जवं लभते ।

ENMSS@9023@2चक्षुर्दोषे जाग्रति चन्द्रद्वित्वं कुतो यातु ॥ ९०२३॥

ENMSS@9024@1कलिकालमियं यावद् अगस्त्यस्य मुनरेपि ।

ENMSS@9024@2मानसं खण्डयत्यत्र शशिखण्डानुकारिणी ॥ ९०२४॥

ENMSS@9025@1कलितगरिमा श्रोणिर्मध्यं विवृद्धवलित्रयं हृदयमुदयल्लज्जं

मञ्जच्चिरन्तनचापलम् ।

ENMSS@9025@2मुकुलितकुचं वक्षश्चक्षुर्मनाग्धृतवक्रिम क्रमपरिगलद्बाल्यं

तस्या वपुस्तनुते श्रियम् ॥ ९०२५॥

ENMSS@9026@1कलितमम्बरमाकलयन् करैर् मृदितपङ्कजकोशपयोधरः ।

ENMSS@9026@2विकसदुत्पलनेत्रविलोकितः सखि निशां सरसीकुरुते विधुः ॥ ९०२६॥

ENMSS@9027@1कलितो रुचिरं न कर्म चेत् क्रियतेऽनङ्गकृतेः कुतः फलम् ।

ENMSS@9027@2स्मरतो हृदि पुण्डरीकदृग् भजतेऽसौ सफलस्ततः श्रमः ॥ ९०२७॥

ENMSS@9028@1कलिन्दगिरिनन्दिनीतटवनान्तरं भासयन् सदा पथि गतागतश्रमभरं

हरन् प्राणिनाम् ।

ENMSS@9028@2लतावलिशतावृतो मधुरया रुचा संभृतो  ममाशु हरतु श्रमानतितमां तमालद्रुमः ॥ ९०२८॥

ENMSS@9028A@1कलिन्दजानीरभरेऽर्धमग्ना  बकाः प्रकामं कृतभूरिशब्दाः ।

ENMSS@9028A@2ध्वान्तेन वैराद् विनिर्गीर्यमाणाः  क्रोशन्ति मन्ये शशिनः किशोराः ॥

ENMSS@9029@1कलिभूपे समायाते धर्मोऽधर्मायते भुवि ।

ENMSS@9029@2अधर्मः सर्वतः पुंसां हन्त धर्मवदर्थ्यते ॥ ९०२९॥

ENMSS@9030@1कलिमायान्तमुत्प्रेक्ष्य विलीयन्ते सुरा अपि ।

ENMSS@9030@2तदाश्रितस्य धर्मादेः का कथा जीवने पुनः ॥ ९०३०॥

ENMSS@9031@1कलिलं चैकरात्रेण पञ्चरात्रेण बुद्बुदम् ।

ENMSS@9031@2पक्षैकेनाण्डकः सोऽथ मासपूर्णे शिरो कुरु ॥ ९०३१॥

ENMSS@9032@1कलिसाम्राज्यमासाद्य न भेतव्यं भवान्तरात् ।

ENMSS@9032@2धर्मानुष्ठानमूढावां भीतिरेकावशिष्यते ॥ ९०३२॥

ENMSS@9033@1कलुषं कटुकं लवणं विरसं  सलिलं यदि वाशुभगन्धि भवेत् ।

ENMSS@9033@2तदनेन भवत्यमलं सुरसं  ससुगन्धि गुणैरपरैश्च युतम् ॥ ९०३३॥

ENMSS@9034@1कलुषं च तवाहितेष्वकस्मात्  सितपङ्केरुहसोदरश्रि चक्षुः ।

ENMSS@9034@2पतितं च महीपतीन्द्र तेषां  वपुषि प्रस्फुटमापदां कटाक्षैः ॥ ९०३४॥

ENMSS@9035@1कलुषं मधुरं चाम्भः सर्वं सर्वत्र सांप्रतम् ।

ENMSS@9035@2अनार्जवजनस्येव कृतकव्याहृतं वचः ॥ ९०३५॥

ENMSS@9036@1कलेरन्ते भविष्यन्ति नररूपेण राक्षसाः ।

ENMSS@9036@2मनुष्यान् भक्षयिष्यन्ति वित्ततो न शरीरतः ॥ ९०३६॥

ENMSS@9037@1कलेर्दोषनिधे राजन्न् अस्ति ह्येको महान् गुणः ।

ENMSS@9037@2कीर्तिनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥ ९०३७॥

ENMSS@9037A@1कलौ कराले न सुखं लभेत  पक्षद्वयादेव विरोधकाले ।

ENMSS@9037A@2मध्यस्थता प्रत्युत निन्द्यतेऽपि  समन्ततो हा स कले प्रभावः ॥

ENMSS@9038@1कलौ कले खले मित्रे पुत्रे दुर्व्यसनान्विते ।

ENMSS@9038@2तस्करेषु प्रवृद्धेषु लुब्धे राज्ञि धनेन किम् ॥ ९०३८॥

ENMSS@9039@1कलौ गङ्गा काश्यां त्रिपुरहरपुर्यां भगवती  प्रशस्ता देवानामपि भवति सेव्यानुदिवसम् ।

ENMSS@9039@2इति व्यासो ब्रूते मुनिजनधुरीणो हरिकथा- सुधापानस्वस्थो गलितभवबन्धोऽतुलमतिः ॥ ९०३९॥
ENMSS@9040@1कलौ जगपत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम् ।
ENMSS@9040@2नार्चयिष्यन्ति मैत्रेय पाखण्डोपहता जनाः ॥ ९०४०॥
ENMSS@9041@1कलौ दशसहस्रेषु हरिस्त्यजति मेदिनीम् ।
ENMSS@9041@2तदर्धं जाह्नवीतोयं तदर्धं ग्रामदेवताः ॥ ९०४१॥
ENMSS@9041A@1कलौ युगे कल्मषमानसानाम् अन्यत्र धर्मे खलु नाधिकारः ।
ENMSS@9041A@2रामेति वर्णद्वयमादरेण सदा जपन्मुक्तिमुपेति जन्तुः ॥
ENMSS@9042@1कल्की कल्कं हरतु जगतः स्फूर्जदूर्जैस्वितेजा वेदोच्छेदस्फुरितदुरितध्वंसने धूमकेतुः ।
ENMSS@9042@2येनोत्क्षिप्य क्षणमसिलतां धूमवत् कल्मषेच्छान् म्लेच्छान् हत्वा दलितकलिनाकारि सत्यावतारः ॥ ९०४२॥
ENMSS@9043@1कल्पक्षोणिरुहोऽयमित्यनुदिनं भूमीसुरैर्भाव्यसे कामोऽसाविति कामिनीभिरभितश्चित्ते चिरं चिन्त्यसे ।
ENMSS@9043@2श्रीनारायण एव केवलमिति प्रेम्णा श्रिया ध्यायसे त्वं कालोऽयमिति प्रतिक्षितिधरैरेकोऽप्यनेकात्मभृत् ॥ ९०४३॥
ENMSS@9044@1कल्पतरुकामदोग्ध्री- चिन्तामणिधनदशङ्खानाम् ।
ENMSS@9044@2रचितो रजोभरपयस् तेजःश्वासान्तराम्बरैरेषः ॥ ९०४४॥
ENMSS@9045@1कल्पद्रुमः कल्पितमेव सूते सा कामधुक् कामितमेव दोग्धि ।
ENMSS@9045@2चिन्तामणिश्चिन्तितमेव दत्ते सतां हि सङ्गः सकलं प्रसूते ॥ ९०४५॥
ENMSS@9046@1कल्पद्रुमान् विगतवाञ्छजने सुमेरौ रत्नान्यगाधसलिले सरितामधीशे ।
ENMSS@9046@2धात्रा श्रियं निदधता प्रखलेषु नित्यम् अत्युज्ज्वलः खलु घटे निहितः प्रदीपः ॥ ९०४६॥
ENMSS@9047@1कल्पद्रुमाश्च सन्तश्च नार्हन्ति समशीर्षिकाम् ।
ENMSS@9047@2अर्थिनां प्रार्थिताः पूर्वे फलन्त्यन्ये स्वयं यतः ॥ ९०४७॥
ENMSS@9048@1कल्पद्रुमैः किं कनकाचलस्थैः परोपकारप्रतिलम्भदुःस्थैः ।
ENMSS@9048@2वरं करीरो मरुमार्गवर्ती यः पान्थसार्थं कुरुते कृतार्थम् ॥ ९०४८॥
ENMSS@9049@1कल्पद्रुमो न जानाति न ददाति बृहस्पतिः ।
ENMSS@9049@2अयं तु जगतीजानिर्जानाति च ददाति च ॥ ९०४९॥
ENMSS@9050@1कल्पद्रुमोऽपि काले न भवेद् यदि फलप्रदः ।

ENMSS@9050@2को विशेषस्तदा तस्य वन्यैरन्यमहीरुहैः ॥ ९०५०॥
ENMSS@9050A@1कल्पद्रोरपि कल्पद्रुर्महतोऽपि मणेर्मणिः ।
ENMSS@9050A@2देवानामपि पूज्योऽसि कियत् ते मम पूरणम् ॥
ENMSS@9051@1कल्पयति येन वृत्तिं सदसि च सद्भिः प्रशस्यते येन ।
ENMSS@9051@2स गुणस्तेन गुणवता विवर्धनीयश्च रक्ष्यश्च ॥ ९०५१॥
ENMSS@9051A@1कल्पयेदेकशः पक्ष रोमश्मश्रुकचान्नखान् ।
ENMSS@9051A@2न चात्मदशनाग्रेण स्वपाणिभ्यां च नोत्तमः ॥
ENMSS@9052@1कल्पवृक्षशिखरेषु संप्रति प्रस्फुरद्भिरविकल्पसुन्दरि ।
ENMSS@9052@2हारयष्टिगणनामिवांशुभिः कर्तुमुद्यतकुतूहलः शशी ॥ ९०५२॥
ENMSS@9053@1कल्पस्थायि न जीवितम् ऐश्वर्यं नाप्यते च यदभिमतम् ।
ENMSS@9053@2लोकस्तथाप्यकार्यं कुरुते कार्यं किमुद्दिश्य ॥ ९०५३॥
ENMSS@9054@1कल्पान्तक्रूरकेलिः क्रतुकदनकरः कुन्दकर्पूरकान्तिः क्रीडन् कैलासकूटे कलितकुमुदिनीकामुकः कान्तकायः ।
ENMSS@9054@2कङ्कालक्रीडनोत्कः कलितकलकलः कालकालीकलत्रः कालिन्दीकालकण्ठः कलयतु कुशलं कोऽपि कापालिको नः ॥ ९०५४॥
ENMSS@9055@1कल्पान्तपवना वान्तु यान्तु चैकत्वमर्णवाः ।
ENMSS@9055@2तपन्तु द्वादशादित्या नास्ति निर्मनसः क्षतिः ॥ ९०५५॥
ENMSS@9056@1कल्पान्तवाससंक्षोभलङ्घिताशेशभूभ् ऋतः
ENMSS@9056@2स्थैर्यप्रसादमर्यादास्ता एव हि महोदधेः ॥ ९०५६॥
ENMSS@9057@1कल्पान्ते क्रोधनस्य त्रिपुरविजयिनः क्रीडया संचरिष्णोः कृत्वापि प्राणिजातैर्निजमुखकुहरातिथ्यमप्राप्ततृप्तेः ।
ENMSS@9057@2दिग्भित्तीः प्रेक्ष्य शून्याः प्रलयजलनिधिप्रेक्षितात्मीयमूर्ति-ग्रासव्यासक्तमोघश्रमजनितरुषः पान्तु वो गर्जितानि ॥ ९०५७॥
ENMSS@9058@1कल्पान्ते शमितत्रिविक्रममहाकङ्कालबद्धस्फुरच्-छेषस्यूतनृसिंहपाणिनखरप्रोतादिकोलामिषः ।
ENMSS@9058@2विश्वैकार्णवताविशेषमुदितौ तौ मत्स्यकूर्मावुभौ कर्षन् धीवरतां गतोऽस्यतु सतां मोहं महाभैरवः ॥ ९०५८॥
ENMSS@9058A@1कल्प्यते किमिति कर्मणचिन्ता- स्वेदमेदुरमिदं निजचेतः ।
ENMSS@9058A@2पश्यतां नयति पूर्वभवात्तं पुण्यमेव भुवनानि किमन्यत् ॥
ENMSS@9059@1कल्याणं कथयामि किं सहचरि स्वैरेषु शश्वत् पुरा यस्या नाम समीरितं मुररिपोः प्राणेश्वरीति त्वया ।

ENMSS@9059@2साहं प्रेमभिदाभयात् प्रियतमं दृष्ट्वापि दूतं प्रभोः सन्दिष्टास्मि
न वेति संशयवती पृच्छामि नो किंचन ॥ ९०५९॥
ENMSS@9060@1कल्याणं नः किमधिकमितो जीवनार्थं यदस्माल् लूत्वा वृक्षानहह
दहसि भ्रातरङ्गारकार ।
ENMSS@9060@2किं त्वेतस्मिन्नशनिपिशुनैरातपैराकुलानाम् अध्वन्यानामशरणमरुप्रान्तरे
कोऽभ्युपायः ॥ ९०६०॥
ENMSS@9061@1कल्याणं परिकल्प्यतां पिककुले रोहन्तु वाञ्छाप्तयो हंसानामुदयोऽस्तु
पूर्णशशिनः स्ताद्भद्रमिन्दीवरे ।
ENMSS@9061@2इत्युद्बाष्पवधूगिरः प्रतिपदं संपूरयन्त्यान्तिके कान्तः
प्रस्थितिकल्पितोपकरणः सख्या भृशं वारितः ॥ ९०६१॥
ENMSS@9062@1कल्याणं भगवत्कथाकथनतः काव्यं विधातुः कवेस् तस्यैवाङ्कतया
क्वचिद् रचयतः शृङ्गारवीरादिकम् ।
ENMSS@9062@2को दोषो भविता यदत्र कविताशीलैः समाश्रीयते पन्था
व्यासवसुंधराश्रुतिभवग्रन्थादिषु प्रेक्षितः ॥ ९०६२॥
ENMSS@9063@1कल्याणं भवतां यशः प्रसरतां धर्मः सदा वर्धतां संपत्तिः
प्रथतां प्रजा प्रणमतां शत्रुक्षयो जायताम् ।
ENMSS@9063@2वाक्यं संवदतां वपुः प्रभवतां लक्ष्मीपतिः प्रीयताम् आयुस्ते
शरदां शतं विजयतां दानाय दीर्घायुषे ॥ ९०६३॥
ENMSS@9064@1कल्याणं भवतेऽस्तु कोकिलकुलाकल्पाय येन श्रुति- क्रूरक्रोष्टुरुतार्दितं
कलरवैर्विश्वं समाश्वासितम् ।
ENMSS@9064@2अत्यन्ताभ्यसनाभ्युदित्वरबृहन्नादावबोधोल्लस-
च्छब्दब्रह्मरसानुभूतिजनितानन्दौघनिष्यन्दिभिः ॥ ९०६४॥
ENMSS@9065@1कल्याणं वः क्रियासुर्मिलदटनियुगस्थास्नुगीर्वाणभोगि-
स्त्रैणव्यत्यस्तकल्पद्रुमनवसुमनोनागहारावलीनि ।
ENMSS@9065@2नालीकाश्लिष्टलक्ष्मीकरतलकमलोद्वान्तमाध्वीकधारा- तिम्यत्फालेक्षणानि
त्रिपुरहरधनुर्ज्यालताकर्षणानि॥ ९०६५॥
ENMSS@9066@1कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलद्रोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
ENMSS@9066@2प्रत्नं वेतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वातङ्कूराजिहीर्षादरविवृतफणाशृङ्गभूषाभुजंगम् ॥ ९०६६॥
ENMSS@9067@1कल्याणदो भवेद् वीरे ध्रुवकश्चन्द्रशेखरः ।

ENMSS@9067@2द्विदिग्वर्णपदं यत्र त्रिपुटे च विधीयते ॥ ९०६७॥
ENMSS@9067@3द्रुतद्वन्द्वं लघुद्वन्द्वं ताले त्रिपुटसंज्ञके ॥ ९०६७॥
ENMSS@9067A@1कल्याणपादपारामं श्रुतगङ्गाहिमाचलम् ।
ENMSS@9067A@2ज्ञानाम्भोजरविं देवं वन्दे श्रीज्ञाननन्दनम् ॥
ENMSS@9068@1कल्याणभाक् सदा कार्ये सर्वसौभाग्यवर्धिनी ।
ENMSS@9068@2या खल्वेतादृशी भार्या सा देवी न तु मानुषी ॥ ९०६८॥
ENMSS@9068A@1कल्याणमावहतु नः कुहनावराहो यस्यास्थिसीम्नि निखिलं प्रतिरोमकूपम्
।
ENMSS@9068A@2आभाति सप्रणयमुद्वहतो धरित्रीं स्वेदाभिधान इव सात्त्विकहावभेदः
॥
ENMSS@9069@1कल्याणामावहतु वः शिवयोः शरीरम् एकं यदीयमसितच्छविकण्ठमूलम्
।
ENMSS@9069@2वामेतरेऽपि कुरुते सितभासि भागे प्रारब्धशैलतनयापरिणामशङ्काम्
॥ ९०६९॥
ENMSS@9070@1कल्याणवाक्क्रमिव किं पदमत्र कान्तं सद्भूपतेस्त्वमिव कः परितोषकारी
।
ENMSS@9070@2कः सर्वदा वृषगतिस्त्वमिवातिमात्रं भूत्याश्रितः कथय
पालितसर्वभूतः ॥ ९०७०॥
ENMSS@9071@1कल्याणस्तु यथाशक्ति करोति सफलं वचः ।
ENMSS@9071@2शठः पक्षौ चलयति द्वावप्यर्थोपलिप्सया ॥ ९०७१॥
ENMSS@9072@1कल्याणहितवान् भूपो गुरूणां दोषगुप्तकः ।
ENMSS@9072@2सममतिः सुखे दुःखे समरे चापलायितः ॥ ९०७२॥
ENMSS@9073@1कुलशीलेषु सम्पन्नो नीतिधर्मेषु पण्डितः ।
ENMSS@9073@2तथैव पूज्यते राजा चतुरस्रः प्रकीर्तितः ॥ ९०७३॥
ENMSS@9074@1कल्याणाङ्गरुचानुरक्तमनसा त्वं येन संप्रार्थ्यते यस्यार्थे सुमुखि
त्वया पुनरसुत्यागेऽपि संनह्यते ।
ENMSS@9074@2सोऽयं सुन्दरि पञ्चबाणविशिखव्यालीढदोरन्तर-
स्वैरोत्पीडितपीवरस्तनतटस्त्वद्दोर्लतापञ्जरे ॥ ९०७४॥
ENMSS@9075@1कल्याणानां त्वमसि महसां भाजनं विश्वसूर्ते धुर्यां लक्ष्मीमथ
मयि भृशं धेहि देव प्रसीद ।
ENMSS@9075@2यद् यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन् मे भद्रं भद्रं वितर
भगवन् भूयसे मङ्गलाय ॥ ९०७५॥

ENMSS@9076@1कल्याणानां निधानं कलिमलमथनं पावनं पावनानां  पाथेयं यन्
मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।
ENMSS@9076@2विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां  बीजं
धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम ॥ ९०७६॥
ENMSS@9077@1कल्याणानि ददातु वो गणपतिर्यस्मिन् नु तुष्टे सति  क्षोदीयस्यपि कर्मणि
प्रभवितुं ब्रह्मापि जिह्मायते ।
ENMSS@9077@2जाते यच्चरणप्रणामसुलभे सौभाग्यभाग्योदये  रङ्कस्याङ्कमनङ्कुशा
निविशते देवेन्द्रलक्ष्मीरपि ॥ ९०७७॥
ENMSS@9077@1कल्याणायभवन्तु खण्डपरशोः कोटीरवाटीरुहां  वल्लीनां वलयानि
वेल्लदुरगश्रेणीनि शोणत्विषाम् ।
ENMSS@9077@2उन्मीलत्कनकारविन्दकलिकाकिञ्जल्कपुञ्जक्षरद्-
धूलीधूसरसिद्धसिन्धुलहरीसिन्दूरितेन्दूनि वः ॥ ९०७७॥
ENMSS@9078@1कल्याणि चन्दनरसैः परिषिच्य गात्रं  द्वित्राण्यहानि कथमप्यतिवाहयेथाः
।
ENMSS@9078@2अङ्के निधाय भवतीं परिरभ्य दोर्भ्यां  नेष्यामि सूर्यकिरणानपि
शीतलत्वम् ॥ ९०७८॥
ENMSS@9079@1कल्याणि पाणिपतितानि विना विचारम्  एतानि मोक्तुमुचितानि न मौक्तिकानि ।
ENMSS@9079@2गुञ्जेति संजनयते यदिह भ्रमन्ते  हस्तारविन्दनयनोत्पलयोः प्रभैव
॥ ९०७९॥
ENMSS@9080@1कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
ENMSS@9080@2एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ९०८०॥
ENMSS@9081@1कल्याणोल्लाससीमा कलयतु कुशलं कालमेघाभिरामा  काचित् साकेतधामा
भवगहनगतिक्लान्तिहारिप्रणामा ।
ENMSS@9081@2सौन्दर्यह्रीणकामा धृतजनकसुतासादरापाङ्गधामा  दिक्षु प्रख्यातभूमा
दिविषदभिनुता देवता रामनामा ॥ ९०८१॥
ENMSS@9082@1कल्योत्थानपरा नित्यं गुरुशुश्रूषणे रता ।
ENMSS@9082@2सुसंमृष्टगृहा चैव गोशकृत्कृतलेपना ॥ ९०८२॥
ENMSS@9083@1कल्लोलक्षिप्तपङ्कत्रिपुरहरशिरःस्वःस्रवन्तीमृणालं  कर्पूरक्षोदजालं
कुसुमशरवधूसीधुभृङ्गारनालम् ।

ENMSS@9083@2एतद् दुग्धाब्धिबन्धोर्गगनकमलिनीपत्रपानीयबिन्दोर् अन्तस्तोषं न केषां

किसलयति जगन्मण्डनं खण्डमिन्दोः ॥ ९०८३॥

ENMSS@9083A@1कल्लोलचपला लक्ष्मीः संगमाः स्वप्नसन्निभाः ।

ENMSS@9083A@2वात्याव्यतिकरोत्क्षिप्ततूलतुल्यं च यौवनम् ॥

ENMSS@9084@1कल्लोलवेल्लितदृषत्परुषप्रहारै रत्नान्यमूनि मकरालय मावमंस्थाः ।

ENMSS@9084@2किं कौस्तुभेन विहितो भवतो न नाम याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि ॥ ९०८४॥

ENMSS@9085@1कल्लोलसंचलदगाधजलैरलोलैः कल्लोलिनीपरिवृढैः किमपेयतोयैः ।

ENMSS@9085@2जीयात् स जर्जरतनुर्गिरिनिर्झरोऽयं यद्विप्रुषापि तृषिता

वितृषीभवन्ति ॥ ९०८५॥

ENMSS@9086@1कल्लोलैः स्थगयन् मुखानि ककुभामभ्रंलिहैरम्भसा क्षारेणापि

दिवानिशं जलनिधे गर्जन् न विश्राम्यसि ।

ENMSS@9086@2एतत्ते यदि घोरनक्रनिलयं स्वादु व्यधास्याद् विधिः किं कर्तासि तदा

न वेद्मि तरलैः स्वैरेव दुश्चेष्टितैः ॥ ९०८६॥

ENMSS@9087@1कल्लोलैर्विकिरत्वसौ गिरिवरान् वेलाविलासोत्थितैः शब्दैर्वा बधिरीकरोतु

ककुभो धत्तां च विस्तीर्णताम् ।

ENMSS@9087@2पान्थानां रवितापतप्तवपुषां तृष्णातिरेकच्छिदः किं साम्यं

प्रतनोः करोतु सरसोऽप्यब्धिः कृताडम्बरः ॥ ९०८७॥

ENMSS@9088@1कवयः कवयन्तु तैलभुक्ताः सरसा एव परन्तु दाक्षिणात्याः ।

ENMSS@9088@2अपि लोचनचञ्चला हरिण्यो मदिराक्ष्या न समाः कटाक्षपातैः ॥ ९०८८॥

ENMSS@9089@1कवयः कालिदासाद्याः कवयो वयमप्यमी ।

ENMSS@9089@2पर्वते परमाणौ च वस्तुत्वमुभयोरपि ।

ENMSS@9090@1कवयः किं न पश्यन्ति किं न भक्षन्ति वायसाः ।

ENMSS@9090@2प्रमदाः किं न कुर्वन्ति किं न जल्पन्ति मद्यपाः ॥ ९०९०॥

ENMSS@9091@1कवयः किं न पश्यन्ति किं न भक्षन्ति वायसाः ।

ENMSS@9091@2मद्यपाः किं न जल्पन्ति किं न कुर्वन्ति योषितः ॥ ९०९१॥

ENMSS@9092@1कवयः परितुष्यन्ति नेतरे कविसूक्तिभिः ।

ENMSS@9092@2नह्यकूपारवत् कूपा वर्धन्ते विधुकान्तिभिः ॥ ९०९२॥

ENMSS@9093@1कवलयति न चेतस्तस्य दारिद्र्यदुःखं न च पिशुनजनोक्तिः कर्णकण्डूं

करोति ।

ENMSS@9093@2वरकविकृतगोष्ठीबन्धगन्धोपभोगे  य इह मधु वमन्तीं काव्यचिन्तां करोति ॥ ९०९३॥

ENMSS@9094@1कवयति पण्डितराजे  कवयन्त्यन्येऽपि विद्वांसः ।

ENMSS@9094@2नृत्यति पिनाकपाणौ  नृत्यन्त्यन्येऽपि भूतवेतालाः ॥ ९०९४॥

ENMSS@9095@1कवयो वद कुत्र कीदृशाः  कठिनं किं विदितं समन्ततः ।

ENMSS@9095@2अधुना तव वैरियोषितां  हृदि तापः प्रबलो विहाय काः ॥ ९०९५॥

ENMSS@9095A@1कवलयसि चन्द्रदीधिती-  र्निविरलमश्नासि नूनमङ्गारान् ।

ENMSS@9095A@2अधिकतरमुष्णमनयोः  किमिह चकोरावधारयसि ॥

ENMSS@9096@1कवलितमिह नालं कन्दलं चेह दृष्टम्  इह हि कुमुदकोशे पीतमम्भः सुशीतम् ।

ENMSS@9096@2इति विरटति रात्रौ पर्यटन्ती तटान्ते  सहचरपरिमुक्ता चक्रवाकी वराकी

॥ ९०९६॥

ENMSS@9097@1कविः करोति काव्यानि पण्डितो वेत्ति तद्रसम् ।

ENMSS@9097@2कामिनीकुचकाठिन्यं पतिर्जानाति नो पिता ॥ ९०९७॥

ENMSS@9098@1कविः करोति काव्यानि स्वादु जानाति पण्डितः ।

ENMSS@9098@2सुन्दर्या अपि लावण्यं पतिर्जानाति नो पिता ॥ ९०९८॥

ENMSS@9099@1कविः करोति पद्यानि लालयत्युत्तमो जनः ।

ENMSS@9099@2तरुः प्रसूते पुष्पाणि मरुद् वहति सौरभम् ॥ ९०९९॥

ENMSS@9100@1कविः पिता पोषयति पालको रसिकः पतिः ।

ENMSS@9100@2कवितायुवतेर्नूनं सोदरास्तु विवेकिनः ॥ ९१००॥

ENMSS@9101@1कविः सूयति काव्यानि हृदा दधति सज्जनाः ।

ENMSS@9101@2सूते मुक्ताः पयोराशिर्वहन्ति तरुणीस्तनाः ॥ ९१०१॥

ENMSS@9102@1कविताकलनेन किं नृपाणां  यदि कवयो न लभन्ति पूर्णकामाः ।

ENMSS@9102@2नयनेन किमेणलोचनानां  यदि वक्रं न विलोकिता युवानः ॥ ९१०२॥

ENMSS@9103@1कविताकुन्दविकासन-  कृतिने विजितजनतानिदाघाय ।

ENMSS@9103@2दलितोद्दामाघाय  प्रणतिं कलयामि माघाय ॥ ९१०३॥

ENMSS@9104@1कविता वनिता कस्य न मोदाय सचेतसः ।

ENMSS@9104@2रस एव सदा तस्या नरीनर्तीव सर्वतः ॥ ९१०४॥

ENMSS@9105@1कवित्वं न श‍ृणोत्येव कृपणः कीर्तिवर्जितः ।

ENMSS@9105@2नपुंसकः किं कुरुते पुरःस्थितमृगीदृशा ॥ ९१०५॥

ENMSS@9106@1कवित्वगानप्रियवादसत्या- न्यस्या विधाता व्यधिताधिकण्ठम् ।

ENMSS@9106@2रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः ॥ ९१०६॥

ENMSS@9107@1कवित्वप्रोद्गुम्फश्रवणकृतझम्पव्यतिकरं चिरं येषां स्वान्तं समजनि नितान्तं रसवशम् ।

ENMSS@9107@2अमीषां पीयूषापचितसुरयोषाधरपुटो- ल्लसन्माधुर्ये वा समुदयति किं वा रतिरपि ॥ ९१०७॥

ENMSS@9108@1कवित्वमारोग्यमतीव मेधा स्त्रीणां प्रियत्वं कनकस्य लाभः ।

ENMSS@9108@2सर्वेषु तथ्यं स्वजनेषु पूजा स्वर्गस्थितानां किल चिह्नमेतत् ॥ ९१०८॥

ENMSS@9108A@1कवित्वशक्तिर्हि दिवोऽवतीर्णा भूमौ सुधासार इवार्यपुण्यात् ।

ENMSS@9108A@2पुनर्ग्रहीतुं निजवस्तु देवाः समागतास्तत् कवयः समुत्काः ॥

ENMSS@9109@1कवित्वे वादित्वं कनककुसुमे सौरभगुणो धनित्वे दातृत्वं विषमतरुफले स्वादुरसता ।

ENMSS@9109@2कुलीने सौजन्यं मृगमदरसे रागरचना प्रभुत्वे विद्वत्त्वं परभृतमुखे मानुषवचः ॥ ९१०९॥

ENMSS@9109A@1कविभावकृतं चिह्नम् अन्यत्रापि न दुष्यति ।

ENMSS@9109A@2मुखमिष्टार्थसंसिद्धं किं हि न स्यात् कृतात्मनाम् ॥

ENMSS@9110@1कविभिर्नृपसेवासु चित्रालंकारहारिणी ।

ENMSS@9110@2वाणी वेश्येव लोभेन परोपकरणीकृता ॥ ९११०॥

ENMSS@9111@1कविमतिरिव बहुलोहा सुघटितचक्रा प्रभातवेलेव ।

ENMSS@9111@2हरमूर्तिरिव हसन्ती भाति विधूमानलोपेता ॥ ९१११॥

ENMSS@9112@1कविरनुहरति च्छायां पदमेकं पादमेकमर्धं वा ।

ENMSS@9112@2सकलप्रबन्धहर्त्रे साहसकर्त्रे नमस्तस्मै ॥ ९११२॥

ENMSS@9113@1कविरमरः कविरचलः कविरभिनन्दश्च कालिदासश्च ।

ENMSS@9113@2अन्ये कवयः कपयश् चापलमात्रं पदं दधति ॥ ९११३॥

ENMSS@9114@1कविरविमहोत्कर्षान् हर्षन् प्रपञ्चय पञ्चषान् स्खलसि रसने किं वा सर्वान् प्रवक्तुमनीश्वरे ।

ENMSS@9114@2गणयति यदप्येतान् धाता दिनावलिमालया तदपि भगवानेषामन्तं कदापि

न विन्दति ॥ ९११४॥

ENMSS@9115@1कविरहिताः कविलापा  जायन्ते कण्ठशोषणायैव ।
ENMSS@9115@2संमुखगतः कविश्चेत्  भवति कुलपितापि कविकुलपितैव ॥ ९११५॥
ENMSS@9116@1कविरेव कवेर्वेत्ति काव्यकर्मणि कौशलम् ।
ENMSS@9116@2शेषाहिरेव जानाति भुवो भारस्य निश्चयम् ॥ ९११६॥
ENMSS@9116A@1कविर्भारद्वाजो जगदवधिजाग्रन्निजयशा
रसश्रेणीमर्मव्यवहरणहेवाकरसिकः ।
ENMSS@9116A@2यदीयानां वाचां रसिकहृदयोल्लासनविधा-  वमन्दानन्दात्मा परिणयति
सन्दर्भमहिमा ॥
ENMSS@9117@1कविवाक्यामृततीर्थ-  स्नानैः पूता भृशं यशोदेहाः ।
ENMSS@9117@2येषां त एव भूपा  जीवन्ति मृता वृथैवान्ये ॥ ९११७॥
ENMSS@9118@1कविविद्यादुराधर्षो यो राक्षस इवापरः ।
ENMSS@9118@2दक्षिणस्थो लब्धवर्णो विख्यातः कविराक्षसः ॥ ९११८॥
ENMSS@9119@1कविषु दधतमुत्कर्षं  विस्फुरदनवद्यहृद्यवाग्वर्षम् ।
ENMSS@9119@2इह खलु खलप्रधर्षं  श्रीहर्षं नौमि हर्षसंघर्षम् ॥ ९११९॥
ENMSS@9120@1कविहृदयेष्वनसूया  कस्तूरीकर्दमेष्वमालिन्यम् ।
ENMSS@9120@2अक्षारता पयोधा-  ववनीपालेषु पाण्डित्यम् ॥ ९१२०॥
ENMSS@9121@1कवीनां च बुधानां च वदान्यानां च यो गुरुः ।
ENMSS@9121@2नानाशास्त्रचणप्रज्ञः शिवनाथः स नम्यते ॥ ९१२१॥
ENMSS@9122@1कवीनां महतां सूक्तैर्गूढार्थान्तरसूचिभिः ।
ENMSS@9122@2विध्यमानश्रुतेर्माभूद् दुर्जनस्य कथं व्यथा ॥ ९१२२॥
ENMSS@9123@1कवीनां मानसं नौमि तरन्ति प्रतिभाम्भसि ।
ENMSS@9123@2यत्र हंसवयांसीव भुवनानि चतुर्दश ॥ ९१२३॥
ENMSS@9124@1कवीनां संतापो भ्रमणमभितो दुर्गतिरिति  त्रयाणांपञ्चत्वं रचयसि
न तच्चित्रमधिकम् ।
ENMSS@9124@2चतुर्णां वेदानां व्यरचि नवता वीर भवता  द्विषत्सेनालीनाभयुतमपि
लक्षं त्वमकृथाः ॥ ९१२४॥
ENMSS@9125@1कवीनामगलद् दर्पो नूनं वासवदत्तया ।
ENMSS@9125@2शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥ ९१२५॥
ENMSS@9126@1कवीन्दुं नौमि वाल्मीकिं यस्य रामायणीं कथाम् ।
ENMSS@9126@2चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः ॥ ९१२६॥
ENMSS@9127@1कवीन्द्राणामासन् प्रथमतरमेवाङ्गणभुवश्

चलद्भृङ्गासङ्गाकुलकरिमदामोदमधुराः ।

ENMSS@9127@2अमी पश्चात् तेषामुपरि पतिता रुद्रनृपतेः कटाक्षाः

क्षीरोदप्रसरदुरुवीचीसहचराः ॥ ९१२७॥

ENMSS@9128@1कवीश्वराणां वचसां विनोदैर् नन्दन्ति विद्यानिधयो न चान्ये ।

ENMSS@9128@2चन्द्रोपला एव करैः सुधांशोर् द्रवन्ति नान्या दृषदः कदाचित् ॥ ९१२८॥

ENMSS@9129@1कवेरभिप्रायमशब्दगोचरं स्फुरन्तमार्द्रेषु पदेषु केवलम् ।

ENMSS@9129@2वदद्भिरङ्गैः कृतरोमविक्रियैर् जनस्य तूष्णीं भवतोऽयमञ्जलिः

॥ ९१२९॥

ENMSS@9130@1कशाभिरिव हैमीभिर्विद्युद्भिरभिताडितम् ।

ENMSS@9130@2अन्तःस्तनितनिर्घोषं सवेदनमिवाम्बरम् ॥ ९१३०॥

ENMSS@9131@1कश्च प्रत्यक्षमुत्सृज्य संशयस्थमलक्षणम् ।

ENMSS@9131@2आयतिस्थं चरेद् धर्मं क्षत्रबन्धुरनिश्चितम् ॥ ९१३१॥

ENMSS@9132@1कश्चिच्छस्त्रापातमूढोऽपवोढुर् लब्ध्वा भूयश्चेतनामाहवाय ।

ENMSS@9132@2व्यावर्तिष्ट क्रोशतः सख्युरुच्चैस् त्यक्तश्चात्मा का च लोकानुवृत्तिः

॥ ९१३२॥

ENMSS@9133@1कश्चित् कराभ्यामुपगूढनालम् आलोलपत्राभिहतद्विरेफम् ।

ENMSS@9133@2रजोभिरन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयांचकार ॥ ९१३३॥

ENMSS@9134@1कश्चित् कष्टं किरति करकाजालमेकोऽतिमात्रं गर्जत्येव क्षिपति

विषयं वैद्युतं वह्निमन्यः ।

ENMSS@9134@2सूते वातं जवनमपरस्तेन जानीहि तावत् किं व्यादत्से विहग वदनं

तत्र तत्राम्बुवाहे ॥ ९१३४॥

ENMSS@9135@1कश्चित् कस्यचिदेव स्यात् सुहृद् विश्रम्भभाजनम् ।

ENMSS@9135@2पद्मं विकासयत्यर्कः संकोचयति कैरवम् ॥ ९१३५॥

ENMSS@9136@1कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः शापेनास्तंगमितमहिमा

वर्षभोग्येण भर्तुः ।

ENMSS@9136@2यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं

रामगिर्याश्रमेषु ॥ ९१३६॥

ENMSS@9137@1कश्चित् क्रन्दति कालकर्कशकराकृष्टं विनष्टं हठाद् उत्कृष्टं

तनयं विलोक्य पुरतः पुत्रेति हा हा क्वचित् ।

ENMSS@9137@2कश्चिन्नर्तकनर्तकीपरिवृतो नृत्यत्यहो कुत्रचिच् चित्रं

संसृतिपद्धतिः प्रथयति प्रीतिं च कष्टं च नः ॥ ९१३७॥
ENMSS@9138@1कश्चित् तरति काष्ठेन सुगम्भीरां महानदीम् ।
ENMSS@9138@2स तारयति तत् काष्ठं स च काष्ठेन तार्यते ॥ ९१३८॥
ENMSS@9139@1कश्चित् तावत् त्वया दृष्टः श्रुतो वा शङ्कितोऽपि वा ।
ENMSS@9139@2क्षितौ वा यदि वा स्वर्गे यस्य मृत्युर्न विद्यते ॥ ९१३९॥
ENMSS@9140@1कश्चित् पण्यस्त्रीणां विभवोपचितान्यपुरुषयोजनया ।
ENMSS@9140@2विदधाति स्माराधन- मधनत्वमुपागतः कामी ॥ ९१४०॥
ENMSS@9141@1कश्चित् पान्थस्तृषार्तः पथि तपऋतौ गम्यमानोऽन्यपान्थं
पप्रच्छानन्दलीनो वद पथिक कुतो जह्नुकन्याप्रवाहः ।
ENMSS@9141@2तेनासौ शीघ्रवाचा प्रचलितमनसा विप्रवर्येण चोचे सूच्यग्रे
कूपषट्कं तदुपरि नगरी तत्र गङ्गाप्रवाहः ॥ ९१४१॥
ENMSS@9142@1कश्चित् पुमान् क्षिपति मां प्रति रूक्षवाक्यैः सोऽहं क्षमाभरणमेत्य
मुदं प्रयामि ।
ENMSS@9142@2शोकं व्रजामि पुनरेवमयं तपस्वी चारित्रतः स्खलितवानिति मन्निमित्तम्
॥ ९१४२॥
ENMSS@9143@1कश्चिदाम्रवणं छित्त्वा पलाशांश्च निपिञ्चति ।
ENMSS@9143@2पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ॥ ९१४३॥
ENMSS@9144@1कश्चिदाश्रयसौन्दर्याद् धत्ते शोभामसज्जनः ।
ENMSS@9144@2प्रमदालोचनन्यस्तं मलीमसमिवाञ्जनम् ॥ ९१४४॥
ENMSS@9145@1कश्चिद् दैवेन सौमित्रे योद्धुमुत्सहते पुमान् ।
ENMSS@9145@2यस्य न ग्रहणं किंचित् कर्मणोऽन्यत्र दृश्यते ॥ ९१४५॥
ENMSS@9146@1कश्चिद् दैवेन सौमित्रै योद्धुमुत्सहते सह ।
ENMSS@9146@2यस्येह विग्रहोपायो न कथंचन विद्यते ॥ ९१४६॥
ENMSS@9147@1कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य ।
ENMSS@9147@2वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श ॥ ९१४७॥
ENMSS@9148@1कश्चिद् यथाभागमवस्थितेऽपि स्वसंनिवेशाद् व्यतिलङ्घिनीव ।
ENMSS@9148@2वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे ॥ ९१४८॥
ENMSS@9149@1कश्चिद् वाचं रचयितुमलं श्रोतुमेवापरस्ताम् कल्याणी ते मतिरुभयतो
विस्मयं नस्तनोति ।
ENMSS@9149@2न ह्येकस्मिन्नतिशयवतां संनिपातो गुणानाम् एकः सूते
कनकमुपलस्तत्परीक्षाक्षमोऽन्यः ॥ ९१४९॥

ENMSS@9150@1कश्चिन् नवं पल्लवमाददाति  कश्चित् प्रसूनानि फलानि कश्चित् ।
ENMSS@9150@2परं करालेऽस्य निदाघकाले  मूले न दाता सलिलस्य कश्चित् ॥ ९१५०॥
ENMSS@9151@1कश्चिन् मालासमं मित्रं कश्चिन् मित्रं तुलासमम् ।
ENMSS@9151@2कश्चिन् मेरुसमं मित्रं कश्चिन् मित्रं महीसमम् ॥ ९१५१॥
ENMSS@9152@1कश्चिन्मूर्च्छामेत्य गाढप्रहारः  सिक्तः शीतैः शीकरैर्वारणस्य ।
ENMSS@9152@2उच्छ्श्वास प्रस्थिता तं जिघृक्षुर् व्यर्थाकूता नाकनारी मुमूर्च्छ ॥ ९१५२॥
ENMSS@9153@1कश्चुम्बति कुलपुरुषो  वेश्याधरपल्लवं मनोज्ञमपि ।
ENMSS@9153@2चारभटचौरचेटक-  नटविटनिष्ठीवनशरावम् ॥ ९१५३॥
ENMSS@9154@1कश्मीरान् गन्तुकामस्य मीरशाहाख्यभूपतेः ।
ENMSS@9154@2शाहाबुद्दीनभूमीन्द्रः प्राहिणोदिति लेखकम् ॥ ९१५४॥
ENMSS@9155@1किमेवमविशङ्कितः शिशुकुरङ्ग लोलक्रमं  परिक्रमितुमीहसे विरम नैव शून्यं वनम् ।
ENMSS@9155@2स्थितोऽत्र गजयूथनाथमथनोच्छलच्छोणितच्-छटापटलभासुरोत्कटसटाभरः केसरी ॥ ९१५५॥
ENMSS@9155A@1कषायकलुषो जीवो रागरञ्जितमानसः ।
ENMSS@9155A@2चतुर्गतिभवाम्भोधौ भिन्ननौरिव सीदति ॥
ENMSS@9155B@1कषायपशुभिर्दुष्टैर्धर्मकामार्थनाश कैः ।
ENMSS@9155B@2शममन्त्रहतैर्यज्ञं विधेहि विहितं बुधैः ॥
ENMSS@9156@1कषायमुक्तं कथितं चरित्रं  कषायवृद्धावुपघातमेति ।
ENMSS@9156@2यदा कषायः शममेति पुंसस् तदा चरित्रं पुनरेति पूतम् ॥ ९१५६॥
ENMSS@9156A@1कषायरागवचनं वीतरागोऽधरस्तव ।
ENMSS@9156A@2विहारः कण्ठदेशश्च दूति प्रव्रजितासि किम् ॥
ENMSS@9156B@1कषायविजये सौख्यम् इन्द्रियाणां च निग्रहे ।
ENMSS@9156B@2जायते परमोत्कृष्टम् आत्मनो भवभेदि यत् ॥
ENMSS@9156C@1कषायविषयार्तानां देहिनां नास्ति निर्वृतिः ।
ENMSS@9156C@2तेषां च विरमे सौख्यं जायते परमाद्भुतम् ॥
ENMSS@9156D@1कषायविषयाहारत्यागो यत्र विधीयते ।
ENMSS@9156D@2उपवासः स विज्ञेयः शेषं लङ्घनकं विदुः ॥
ENMSS@9157@1कषायसङ्गौ सहते न वृत्तं  समार्द्रचक्षुर्न दिनं च रेणुम् ।

ENMSS@9157@2कषायसङ्गौ विधुनन्ति तेन  चारित्रवन्तो मुनयः सदापि ॥ ९१५७॥
ENMSS@9157A@1कषायान् शत्रुवत् पश्येद् विषयान् विषवत् तथा ।
ENMSS@9157A@2मोहं च परमं व्याधिम् एवमूचुर्विचक्षणाः ॥
ENMSS@9157B@1कषाया विषया योगाः प्रमादाविरती तथा ।
ENMSS@9157B@2मिथ्यात्वमार्तरौद्रे चेत्यशुभं प्रति हेतवः ॥
ENMSS@9157C@1कषायास्तन्निहन्तव्यास्तथा तत्सहचारिणः ।
ENMSS@9157C@2नोकषायाः शिवद्धारा गलीभूता मुमुक्षुभिः ॥
ENMSS@9158@1कषायैरुपवासैश्च कृतामुल्लाघतां नृणाम् ।
ENMSS@9158@2निजौषधकृतां वैद्यो निवेद्य हरते धनम् ॥ ९१५८॥
ENMSS@9159@1कष्टं कर्मेति दुर्मेधाः कर्तव्याद् विनिवर्तते ।
ENMSS@9159@2न साहसमनारभ्य श्रेयः समुपलभ्यते ॥ ९१५९॥
ENMSS@9160@1कष्टं खलु मूर्खत्वं  कष्टं खलु यौवने च दारिद्र्यम् ।
ENMSS@9160@2कष्टादपि कष्टतरं  परगृहवासः प्रवासश्च ॥ ९१६०॥
ENMSS@9161@1कष्टं च खलु मूर्खत्वं कष्टं च खलु यौवनम् ।
ENMSS@9161@2कष्टात् कष्टतरं चैव परगेहनिवासनम् ॥ ९१६१॥
ENMSS@9162@1कष्टं जीवति गणको  गणिका कथकश्च सेवको वैद्यः ।
ENMSS@9162@2दिवसे दिवसे मरणं  परजनमनरञ्जनी वृत्तिः ॥ ९१६२॥
ENMSS@9163@1कष्टं नैव परिस्थिते समुदियात् कार्येषु नो जातुचित्  संजायेत न चापि तद्व्यतिकराद् बाह्यादकिंचित्करात् ।
ENMSS@9163@2कस्माच्चित् खलु भावतोऽन्तरभवात् त्वस्माकमुत्पद्यते  प्राणस्यैव विशेषतोऽन्तरशयाद् भावात् समुज्जृम्भते ॥ ९१६३॥
ENMSS@9164@1कष्टं वने निवसतोऽत्र सदा नरस्य  नो केवलं निजतनुप्रभवं भवेच्च ।
ENMSS@9164@2दैवं च पित्र्यमखिलं न विभाति कृत्यं  तस्माद् गृहे निवसतात्महितं प्रचिन्त्यम् ॥ ९१६४॥
ENMSS@9165@1कष्टं साहसकारिणि  तव नयनार्धेन सोऽध्वनि स्पृष्टः ।
ENMSS@9165@2उपवीतादपि विदितो  न द्विजदेहस्तपस्वी ते ॥ ९१६५॥
ENMSS@9166@1कष्टं हृदि ज्वलति शोकमयो ममाग्निस् ते चक्षुषी च विरहज्वरजागरुके ।
ENMSS@9166@2एतन्मनो भ्रमति विष्वगसूंस्तथापि  त्वं पश्यतोहर इव स्मर हर्तुकामः ॥ ९१६६॥

ENMSS@9167@1कष्टा वृत्तिः पराधीना कष्टो वासो निराश्रयः ।
ENMSS@9167@2निर्धनो व्यवसायश्च सर्वकष्टा दरिद्रता ॥ ९१६७॥
ENMSS@9168@1कष्टा वेधव्यथा कष्टो नित्यं च वहनक्लमः ।
ENMSS@9168@2श्रवणानामलंकारः कपोलस्य तु कुण्डलम् ॥ ९१६८॥
ENMSS@9169@1कष्टे नोपार्जितं वित्तं हेलया क्वापि निर्गतम् ।
ENMSS@9169@2किं करोमि क्व गच्छामि निर्भाग्योऽहं भुवस्तले ॥ ९१६९॥
ENMSS@9170@1कष्टो जनः कुलधनैरनुरञ्जनीयस् तन्नो यदुक्तमशिवं न हि तत् क्षमं ते ।
ENMSS@9170@2नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ ९१७०॥
ENMSS@9170A@1कष्टोपार्जितमत्र वित्तम्खिलं द्यूते मया योजितं विद्या कष्टतरं गुरोरधिगता व्यापारिता कुस्तुतौ ।
ENMSS@9170A@2पारम्पर्यसमागता च विनयो वामेक्षणायां कृतः सत्पात्रे किमहं करोमि विवशः कालेऽद्य नेदीयसि ॥
ENMSS@9171@1कस्तस्य जीवितार्थः सति विभवे कश्च तस्य पुरुषार्थः ।
ENMSS@9171@2योऽर्थिनमभिमुखमागतम् अनभिमुखः सन् विसर्जयति ॥ ९१७१॥
ENMSS@9172@1कस्तां निन्दति लुम्पति कः स्मरफलकस्य बर्णकं मुग्धः ।
ENMSS@9172@2को भवति रत्नकण्टकम् अमृते कस्यारुचिरुदेति ॥ ९१७२॥
ENMSS@9173@1कस्तावद् बलिकर्णभार्गवमहादानप्रमाणस्तवः कश्चासौ कुरुपाण्डपाण्डुरयशः प्रस्तावनाविस्तरः ।
ENMSS@9173@2यावद् वर्षति वीरसिंहतनयो वृष्टीरिमाः काञ्चनीर् धाराः प्रावृषि तावदञ्जनरुचिर्धारा न धाराधरः ॥ ९१७३॥
ENMSS@9174@1कस्तूरिकां तृणभुजामटवीमृगाणां निक्षिप्य नाभिषु चकार च तान् वधार्हान् ।
ENMSS@9174@2मूढो विधिः सकलदुर्जनलोलजिह्वा- मूले स्म निक्षिपति चेत् सकलोपकारः
॥ ९१७४॥
ENMSS@9175@1कस्तूरिकां हरिण मुञ्च वनोपकण्ठं मा सौरभेण ककुभः सुरभीकुरुष्व ।
ENMSS@9175@2आस्तां यशो ननु किरातशराभिघातात् त्रातापि हन्त भविता भवतो दुरापः
॥ ९१७५॥

ENMSS@9176@1कस्तूरिकाचन्दनकुङ्कुमानि  सौभाग्यचिह्नानि विलासिनीनाम् ।

ENMSS@9176@2प्रयागमृत्स्नातिलकक्रियैव  सौभाग्यचिह्नं विधवाललाटे ॥ ९१७६॥

ENMSS@9177@1कस्तूरिकातिलकमालि विधाय सायं  स्मेरानना सपदि शीलय सौधमौलिम् ।

ENMSS@9177@2प्रौढिं भजन्तु कुमुदानि मुदामुदाराम्  उल्लासयन्तु परितो हरितो मुखानि

॥ ९१७७॥

ENMSS@9177A@1कस्तूरिकादिक्रयविक्रयाङ्गां  यदृच्छया यद्विपणिं गतानाम् ।

ENMSS@9177A@2सौरभ्यमङ्गेषु समग्रलग्नम्  न हीयते पञ्चषमप्यहानि ॥

ENMSS@9178@1कस्तूरिकामृगाणाम्  अण्डाद् गन्धगुणमखिलमादाय ।

ENMSS@9178@2यदि पुनरहं विधिः स्यां  खलजिह्वायां निवेशयिष्यामि ॥ ९१७८॥

ENMSS@9179@1कस्तूरी जायते कस्मात् को हन्ति करिणां शतम् ।

ENMSS@9179@2किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायनम् ॥ ९१७९॥

ENMSS@9180@1कस्तूरीति, किमङ्ग, सांपरिमलद्रव्यं किमप्यामरं  पेया किं, न हि, कीदृशी, मृगदृशां श्रृङ्गारलीलास्पदम् ।

ENMSS@9180@2धार्या कुत्र, कुचस्थलीषु, कुचयोः स्थौल्यं ततो हीयते  क्लिष्टः क्लिश्यति पक्कणैश्च बहुशः कस्तूरिकाविक्रयी ॥ ९१८०॥

ENMSS@9181@1कस्तूरीतिलकं तस्या  जनयति शोभां भ्रुवोरन्तः ।

ENMSS@9181@2कोदण्डमध्यलग्नं  फलमिव पञ्चेषुबाणस्य ॥ ९१८१॥

ENMSS@9182@1कस्तूरीतिलकं बाले भाले मा कुरु मा कुरु ।

ENMSS@9182@2अद्य साम्यं भजामीति जृम्भते शशलाञ्छनः ॥ ९१८२॥

ENMSS@9183@1कस्तूरीतिलकं बाले भाले मा कुरु मा कुरु ।

ENMSS@9183@2कलङ्कशङ्कया राहुर्ग्रसिष्यति तवाननम् ॥ ९१८३॥

ENMSS@9184@1कस्तूरीतिलकं ललाटफलके वक्षःस्थले कौस्तुभं  नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम् ।

ENMSS@9184@2सर्वाङ्गे हरिचन्दनं च कलयन् कण्ठे च मुक्तावलिं गोपस्त्रीपरिवेष्टतो विजयते गोपालचूडामणिः ॥ ९१८४॥

ENMSS@9185@1कस्तूरीतिलकं ललाटरचितं नासामणिं निस्तलं  वक्रं कुञ्चितकेशपाशमनिशं दृष्टिं निसृष्टां पुरः ।

ENMSS@9185@2पुंसां मानसमत्स्यबन्धनविधौ धत्सेऽत्र वत्से स्वयं जम्बूवज्ञलबिन्दुवज्ञलजवज्ञम्बालवज्ञालवत् ॥ ९१८५॥

ENMSS@9186@1कस्तूरीतिलकन्ति भालफलके देव्या मुखाम्भोरुहे  रोलम्बन्ति

तमालबालमुकुलोत्तंसन्ति मौलिं प्रति ।

ENMSS@9186@2याः कर्णे विकचोत्पलन्ति कुचयोरङ्के च कालागुरु- स्थासन्ति प्रथयन्तु

तास्तव शिवं श्रीकण्ठकण्ठत्विषः ॥ ९१८६॥

ENMSS@9187@1कस्तूरीयन्ति भाले तदनु नयनयोः कज्जलीयन्ति कर्ण- प्रान्ते

नीलोत्पलीयन्त्युरसि मरकतालंकृतीयन्ति देव्याः ।

ENMSS@9187@2रोमालीयन्ति नाभेरुपरि हरिमणीमेखलीयन्ति मध्ये कल्याणं कुर्युरेते

त्रिजगति पुरजित्कण्ठभासां विलासाः ॥ ९१८७॥

ENMSS@9188@1कस्तूरीवरपत्रभङ्गनिकरो भ्रष्टो न गण्डस्थले नो लुप्तं सखि

चन्दनं स्तनतटे धौतं न नेत्राञ्जनम् ।

ENMSS@9188@2रागो न स्खलितस्तवाधरपुटे ताम्बूलसंवर्धितः किं रुष्टासि

गजेन्द्रमत्तगमने किं वा शिशुस्ते पतिः ॥ ९१८८॥

ENMSS@9189@1कस्तूरी सितिमानमागतवती शौक्ल्यं गताः कुन्तला नीलं चोलमभूत्

सितं धवलिमा जातो मणीनां गणे ।

ENMSS@9189@2ध्वान्तं शान्तमभूत् समं नरपते त्वत्कीर्तिचन्द्रोदये

त्रैलोक्येद्ध्यभिसारसाहसरसः शान्तः कुरङ्गीदृशाम् ॥ ९१८९॥

ENMSS@9189A@1कस्तूर्या तत्कपोलद्वयभुवि मकरीनिर्मितौ प्रस्तुतायां निर्मित्सूनां

स्ववक्षस्यतिपरिचयनात् त्वत्प्रशस्तीरुपांशु ।

ENMSS@9189A@2वीर श्रीसिंहभूप त्वदहितकुभुजां राज्यलक्ष्मीसपत्नी- मानव्याजेन

लज्ज्ञां सपदि विदधते स्वावरोधे प्रगल्भाः ॥

ENMSS@9190@1कस्ते शशाङ्क मोहः सुधाकरोऽहं न कोऽपि मद्भिन्नः ।

ENMSS@9190@2किं ननु पश्यसि निजभा- जयि वनिताया मुखं मूढ ॥ ९१९०॥

ENMSS@9191@1कस्ते शौर्यमदो योद्धुं त्वय्येकं सप्तिमास्थिते ।

ENMSS@9191@2सप्तसप्तिसमारुढा भवन्ति परिपन्थिनः ॥ ९१९१॥

ENMSS@9192@1कस्त्वं, कृष्णमवेहि मां किमिह ते, मन्मन्दिराशङ्कया युक्तं

तन्नवनीतभाजनपुटे न्यस्तः किमर्थं करः ।

ENMSS@9192@2कर्तुं तत्र पिपीलिकापनयनं, सुप्ताः किमुद्बोधिता बाला, वत्सगतिं

विवेक्तुमिति संजल्पन् हरिः पातु वः ॥ ९१९२॥

ENMSS@9193@1कस्त्वं, कोऽपि, कुतोऽसि, रत्नवसतेस्तीरादहं नीरधेर्, लब्धं

किंचन, गर्जितैर्बधिरता दृग्व्याहतिः सैकतैः ।

ENMSS@9193@2मा खेदं कुरु तादृगौर्वदहनज्वालावलीदुःसहं क्षारोदं यदुपास्य

जीवसि सखे श्लाघ्यं न तन् मन्यसे ॥ ९१९३॥
ENMSS@9194@1कस्त्वं कोऽहं कुत आयातः  का मे जननी को मे तातः ।
ENMSS@9194@2इति परिभावय सर्वमसारं  सर्वं त्यक्त्वा स्वप्नविचारम् ॥ ९१९४॥
ENMSS@9195@1कस्त्वं, तासु यदृच्छया, कितव यास्तिष्ठन्ति गोपाङ्गनाः  प्रेमाणं न विदन्ति यास्, तव हरे किं तासु ते कैतवम् ।
ENMSS@9195@2एषा हन्त हताशया यदभवं त्वय्येकताना परं  तेनास्याः प्रणयोऽधुना खलु मम प्राणैः समं यास्यति ॥ ९१९५॥
ENMSS@9196@1कस्त्वं, पीतांबरोऽहं, किमु वदसि मृषा चांबरं केन पीतं  मुग्धे कंसस्य शत्रुः, शिव शिव सालिलं सस्यवैरि क्व दृष्टम्।
ENMSS@9196@2मल्लास्यध्वंसनोऽहं किमिति निजमहो लास्यमध्वंसि चेति व्याहारैर्वल्लवीनां निशि भवतु मुदेऽनुत्तरः श्रीपतिर्वः ॥ ९१९६॥
ENMSS@9197@1कस्त्वं ब्रह्म, न्नपूर्वः, क्व च तव वसति, र्याखिला ब्रह्मसृष्टिः कस्ते नाथो, ह्यनाथः, क्व च तव जनको, नैव तातं स्मरामि
ENMSS@9197@2किं तेऽभीष्टं ददामि, त्रिपदपरिमिता भूमि, रल्पं किमेतत्  त्रैलोक्यं, भावगर्भं बलिमिदमवदद् वामनो वः स पायात् ॥ ९१९७॥
ENMSS@9198@1कस्त्वं ब्रह्मन्न्, अपूर्वस्, त्वदनुचरजनो, नास्त्यनाथोऽहमेकः,  किं दद्यामीप्सितं ते, त्रिपदविहरणस्थानमेतत्, कियत्ते ।
ENMSS@9198@2त्रैलोक्यं तद् द्विजातेर्मम शमनिरतस्येति सम्मूढभावा  विष्णोर्वाचः सुरारौ कृतकपटपदन्यासमुग्धाः पुनन्तु ॥ ९१९८॥
ENMSS@9199@1कस्त्वं भद्र, खलेश्वरोऽहम्, इह किं घोरे वने स्थीयते, शार्दूलादिभिरेव हिंस्रपशुभिः भोज्योऽहमित्याशया ।
ENMSS@9199@2कस्मात् कष्टमिदं त्वया व्यवसितं, मद्देहमाम्साशिनः प्रत्युत्पन्ननृमांसभक्षणधियस्ते घ्नन्तु सर्वान्नरान् ॥ ९१९९॥
ENMSS@9200@1कस्त्वं भोः, कथयामि दैवहतकं मां विद्धि शाखोटकं  वैराग्यादिव वक्षि, साधु विदितं, कस्मादिदं, कथ्यते ।
ENMSS@9200@2वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते  न च्छायापि परोपकारकरणे मार्गस्थितस्यापि मे ॥ ९२००॥
ENMSS@9201@1कस्त्वं भोः, कविरस्मि, तत् किमु सखे क्षीणोऽस्य, नाहारतो  धिग् देशं
गुणिनोऽपि, दुर्मतिरियं देशं न मामेव धिक् ।
ENMSS@9201@2पाकार्थी क्षुधितो यदैव विदधे पाकाय दुद्धिं तदा  विन्ध्ये

नेन्धनमम्बुधौ न सलिलं नान्नं धरित्रीतले ॥ ९२०१॥

ENMSS@9202@1कस्त्वं भो निशि, केशवः, शिरसिजैः किं नाम गर्वायसे भद्रे शौरिरहं, गुणैः र्पितृगतैः पुत्रस्य किं स्यादिह ।

ENMSS@9202@2चक्री चन्द्रमुखि, प्रयच्छसि न मे कुण्डीं घटीं देहिनीम् इत्थं गोपवधूहृतोत्तरतया दुःस्थो हरिः पातु वः ॥ ९२०२॥

ENMSS@9203@1कस्त्वं लोहितलोचनास्यचरणो, हंसः, कुतो मानसात् किं तत्रास्ति, सुवर्णपङ्कजवनान्यम्भः सुधासन्निभम् ।

ENMSS@9203@2रत्नानां निचयाः प्रवालमणयो वैडूर्यरोहाः क्वचिच्, अम्बूका अपि सन्ति,

नेति च बकैराकर्ण्य हीहीकृतम् ॥ ९२०३॥

ENMSS@9204@1कस्त्वं वानर, रामराजभवने लेखार्थसंवाहको, यातः कुत्र पुरागतः स हनुमान् निर्दग्धलङ्कापुरः ।

ENMSS@9204@2वद्धो राक्षससूनुनेति कपिभिः संताडितस्तर्जितः स व्रीडात्तपराभवो वनमृगः कुत्रेति न ज्ञायते ॥ ९२०४॥

ENMSS@9204A@1कस्त्वं, शूली, प्रविश भिषजां वेश्म, वैद्यं न जाने, स्थाणुर्बाले, न वदति तरु-र्नीलकण्ठः प्रमुग्धे ।

ENMSS@9204A@2केकामेकां वद त्वं, पशुपतिरबले, नैव दृष्टे विषाणे इत्येवं शैलकन्याप्रतिवचनजडः पातु वः पार्वतीशः ॥

ENMSS@9205@1कस्त्वं शूली, मृगय भिषजं नीलकण्ठः प्रियेऽहं केकामेकां वद, पशुपति,-र्नैवदृश्ये विषाणे ।

ENMSS@9205@2मुग्धें स्थाणुः, स चरति कथं, जीवितेशः शिवाया गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः ॥ ९२०५॥

ENMSS@9206@1कस्मात् कस्मिन् समुत्पन्ने सरागं भुवनत्रयम् ।

ENMSS@9206@2अत्रादौ कथितं श्लोके यो जानाति स पण्डितः ॥ ९२०६॥

ENMSS@9207@1कस्मात् कोऽहं किमपि च भवान् कोऽयमत्र प्रपञ्चः स्वं स्वं वेद्यं गगनसदृशं पूर्णतत्त्वप्रकाशम् ।

ENMSS@9207@2आनन्दाख्यं समरसघने बाह्यमन्तर्विहीने निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥ ९२०७॥

ENMSS@9208@1कस्मात् तन्वि तनूनि सम्प्रति समान्यङ्गानि जातानि ते कस्मात् कोकनदप्रभं

मुखमिदं जातं हि चन्द्रोपमम् ।

ENMSS@9208@2एवं पृच्छति वल्लभेऽम्बुजमुखि प्रोष्यस्वभावादिति व्यावृत्याथ

तया सगद्गदरवं मुक्तश्च बाष्पोत्करः ॥ ९२०८॥

ENMSS@9209@1कस्मात् त्वं क्व नु दृश्यते सुखमुखं क्वास्तेऽन्धकारः परं क्व

स्त्रीषु स्मरधूमकेतुरुदितेओ दृष्टा युवानः क्व ते ।

ENMSS@9209@2गन्ता क्व क्व च पञ्चमः क्व णसकृत् क्वात्संकुरो निद्गतः

क्वानन्दैकरसोदयः क्व नु सती कैवाध्वगस्तत्कथा ॥ ९२०९॥

ENMSS@9210@1कस्मात् त्वं, तातगेहाद्, अपरमभिनवा ब्रूहि का तत्र वार्ता, देव्या देवो

जितः, किं वृषडमरुचिताभस्मभोगीन्द्रचन्द्रान् ।

ENMSS@9210@2इत्येवं बर्हिनाथे कथयति सहसा भर्तृभिक्षाविभूषा- वैगुण्योद्वेगजन्मा

जगदवतु चिरं हारवो भृङ्गरीटेः ॥ ९२१०॥

ENMSS@9211@1कस्मात् त्वं दुर्बलासीति सख्यस्तां परिपृच्छति ।

ENMSS@9211@2त्वयि संनिहिते तासु दद्यात् कथय सोत्तरम् ॥ ९२११॥

ENMSS@9212@1कस्मात् त्वं, भवदालयाद्, वद सखे क्षेमं, तवानुग्रहाद्, दृष्टा मे

सुभगा, न तेऽस्ति सुभगा दृष्टा भवद्गेहिनी ।

ENMSS@9212@2स्वर्भानुं विषमेक्षणं विषधरं काकं वराकी गृहे

चन्द्रानङ्गसमीरकोकिलभयाद् व्यग्रा लिखन्ती मुहुः ॥ ९२१२॥

ENMSS@9213@1कस्मात् त्वं हि विखिद्यसे कतिपयैरेव प्रिये वासरैर् आयाता वयमेहि धेहि

पुरतः प्रास्थानिकं मङ्गलम् ।

ENMSS@9213@2एवं वादिनि वल्लभे दयितया निःश्वस्य पाणौ कृती मङ्गल्यः कलशो

विलोचनपयोधाराभिरापूरितः ॥ ९२१३॥

ENMSS@9214@1कस्मात् पार्वति निष्ठुरासि, सहजः शैलोद्भवानामयं निःस्नेहासि कथं,

न भस्मपुरुषः स्नेहं बिभर्ति क्वचित् ।

ENMSS@9214@2कोपस्ते मयि निष्फलः प्रियतमे, स्थाणौ फलं किं भवेद् इत्थं

निर्वचनीकृतो गिरिजया शंभुश्चिरं पातु वः ॥ ९२१४॥

ENMSS@9215@1कस्मात् संल्किश्यते विद्वान् व्यर्थयार्थेहयासकृत् ।

ENMSS@9215@2कस्यचिन् मायया नूनं लोकोऽयं सुविमोहितः ॥ ९२१५॥

ENMSS@9216@1कस्मात् सत्यवतीसुतेन मुनिना नोक्तं भविष्यत्कथा- मध्ये

रूपमनादिमध्यनिधनस्येहं हरेर्मानुषम् ।

ENMSS@9216@2इत्थं व्युत्थितविश्वकण्टकचमूनिर्मूलनव्यापृतं

संग्रामाम्बरसूर्यमम्बरचरास्त्वां वीक्ष्य संशेरते ॥ ९२१६॥

ENMSS@9217@1कस्मादद्य न भूषितं वपुरिदं सद्भूषणैः काञ्चनैः

कस्मादच्छतराणि नाद्य वसनान्यङ्गीकृतानि त्वया ।

ENMSS@9217@2उक्ता सेति मया मनोज्ञ विजने बाला विशालाक्ष मा क्षिप्रं रोदनमेकमेव

विदधे प्रत्युत्तरं नो ददौ ॥ ९२१७॥

ENMSS@9218@1कस्मादिदं नयनमस्तमिताञ्जनश्रि विश्रान्तपत्ररचनौ च कुतः

कपोलौ ।

ENMSS@9218@2शृङ्गारवारिरुहकाननराजहंसि कस्मात् कृशासि विरसासि मलीमसासि

॥ ९२१८॥

ENMSS@9219@1कस्मादिन्दुरसौ धिनोति जगतीं पीयूषगर्भैः करैः कस्माद् वा जलधारयैव

धरणिं धाराधरः सिञ्चति ।

ENMSS@9219@2भ्रामं भ्राममयं च नन्दयति वा कस्मात् त्रिलोकीं रविः साधूनां हि

परोपकारकरणे नोपाध्यपेक्षं मनः ॥ ९२१९॥

ENMSS@9220@1कस्माद् दूति श्वसिषि निभृतं, सत्वरावर्तनेन भ्रष्टो रागः

किमधरदले, प्रार्थनाभिस्त्वदर्थम् ।

ENMSS@9220@2स्रस्ता चेयं किमलकततिस्, तत्पदालुण्ठनेन वासस्तस्य त्वयि वद कथं,

प्रत्ययार्थं तवैव ॥ ९२२०॥

ENMSS@9221@1कस्माद् भग्नाः सुमुखि वलया, मार्गपातान्निशायां किं ते वक्त्रं

विगतरचनं, क्षालितं धूलिपूर्णम् ।

ENMSS@9221@2ओष्ठे रागः किमपि गलित, स्त्वद्व्यथोच्छ्वासवातैस् तद्वासः किं,

हृतमिति मया वस्त्रलोभात् किलेति ॥ ९२२१॥

ENMSS@9222@1कस्माद् भयमिह मरणाद् अन्धादपि को विशिष्यते रागी ।

ENMSS@9222@2कः शूरो यो ललना- लोचनबाणैर्न विव्यथितः ॥ ९२२२॥

ENMSS@9223@1कस्मिञ्छेते मुरारिः क्व न खलु वसतिर्वायसी को निषेधः स्त्रीणां

रागस्तु कस्मिन् क्व नु खलु सितिमा शैरिसंबोधनं किम् ।

ENMSS@9223@2संबुद्धिः काऽहिमांशोर्विधिहरवयसां चापि संबुद्धयः का ब्रूते

लुब्धः कथं वा कुरुकुलहननं केन तत् केशवेन ॥ ९२२३॥

ENMSS@9224@1कस्मान् म्लायसि मालतीव मृदितेत्यालीजने पृच्छति व्यक्तं नोदितमार्तयापि

विरहे शालीनया बालया ।

ENMSS@9224@2अक्ष्णोर्बाष्पचयं निगृह्य कथमप्यालोकितः केवलं

किंचित्कुड्मलकोटिभिन्नशिखरश्चूतद्रुमः प्राङ्गणे ॥ ९२२४॥

ENMSS@9225@1कस्मिन् कर्मणि सामर्थ्यम् अस्य नोत्तपतेतराम् ।

ENMSS@9225@2अयं साधुचरस्तस्माद् अञ्जलिर्बध्यतामिह ॥ ९२२५॥

ENMSS@9226@1कस्मिन्नपि मते सत्ये हताः सर्वमतत्यजः ।

ENMSS@9226@2तद्दृष्ट्या व्यर्थतामात्रम् अनर्थस्तु न धर्मजः ॥ ९२२६॥

ENMSS@9227@1कस्मिन् वसन्ति वद मीनगणा विकल्पं किं वापदं वदति किं कुरुते

विवस्वान् ।

ENMSS@9227@2विद्युल्लतावलयवान् पथिकाङ्गनानाम् उद्वेजको भवति कः खलु वारिवाहः

॥ ९२२७॥

ENMSS@9228@1कस्मिन् स्वपिति कंसारिः कावृत्तिरधमा नृणाम् ।

ENMSS@9228@2किं ब्रूते पितरं बालः किं दृष्ट्वा रमते मनः ॥ ९२२८॥

ENMSS@9229@1कस्मै किं कथनीयं कस्य मनःप्रत्ययो भवति ।

ENMSS@9229@2रमयति गोपवधूटी कुञ्जकुटीरे परं ब्रह्म ॥ ९२२९॥

ENMSS@9230@1कस्मैचित् कपटाय कैटभरिपूरःपीठदीर्घालयां देवि त्वामभिवाद्य

कुप्यसि न चेत् तत् किंचिदाचक्ष्महे ।

ENMSS@9230@2यत् ते मन्दिरमम्बुजन्म किमिदं विद्यागृहं यच्च ते

नीचान्नीचतरोपसर्पणमपामेतत् किमाचार्यकम् ॥ ९२३०॥

ENMSS@9230A@1कस्मैचित् प्रतिपाद्य विक्रमजितां विप्राय विश्वंभराम् अब्धौ

वैभवलब्धवासरसिकः क्षेमाय रामोऽस्तु वः ।

ENMSS@9230A@2श्लाघन्ते रणसीम्नि यस्य चरितं कालाग्निकूलंकष-

ज्वालोद्गारिकुठारकुक्षिनिहितक्ष्मापालचक्रा न् जनान् ॥

ENMSS@9231@1कस्मैचिद् द्विजबन्धवे कियदपि क्षीरं पुरा नाथते दत्तो येन

दयारसैकवपुषा दुग्धोद एवार्णवः ।

ENMSS@9231@2श्रीश्रीवल्लभकल्पपादपसुधाचिन्तामणीब् हिः समं स स्वामी मम

दैवतं तदितरो नाम्नापि नाम्नायते ॥ ९२३१॥

ENMSS@9232@1कस्मै नमः सुरैरपि सुतरां क्रियते दयाप्रधानाय ।

ENMSS@9232@2कस्मादुद्विजितव्यं संसारारण्यतः सुधिया ॥ ९२३२॥

ENMSS@9233@1कस्मै यच्छति सज्जनो बहुधनं सृष्टं क्षगत् केन वा शम्भोर्भानि

च को गले युवतिभिर्वेण्यां च का धार्यते ।

ENMSS@9233@2गौरीशः कमताडयच्चरणतः का रक्षिता राक्षसैर् आरोहादवरोहतः

कलयतामेकं द्वयोरुत्तरम् ॥ ९२३३॥

ENMSS@9234@1कस्मै हन्त फलाय सज्जन गुणग्रामार्जने सज्जसि स्वात्मोपस्करणाय चेन्

मम वचः पथ्यं समाकर्णय ।

ENMSS@9234@2ये भावा हृदयं हरन्ति नितरां शोभाभरैः संभृतास् तैरेवास्य

कलेः कलेवरपुषो दैनंदिनं वर्तनम् ॥ ९२३४॥

ENMSS@9235@1कस्य करान्न स्खलिता नीरनिधिक्लेदपिच्छिला लक्ष्मीः ।

ENMSS@9235@2भृगुचरणधूलिपरुषे हृदि परिबद्धा हरेः स्थिरेयमभूत् ॥ ९२३५॥

ENMSS@9236@1कस्यचिज्ञायते जन्तोः पादाघातस्तवाध्वनि ।

ENMSS@9236@2पदभङ्गव्यथा शम्भो जृम्भते जम्भवैरिणः ॥ ९२३६॥

ENMSS@9237@1कस्यचित् किमपि नो हरणीयं मर्मवाक्यमपि नोच्चरणीयम् ।

ENMSS@9237@2श्रीपतेः पदयुगं स्मरणीयं लीलया भवजलं तरणीयम् ॥ ९२३७॥

ENMSS@9238@1कस्यचित् समदनं मदनीय- प्रेयसीवदनपानपरस्य ।

ENMSS@9238@2स्वादितः सकृदिवासव एव प्रत्युत क्षणविदंशपदेऽभूत् ॥ ९२३८॥

ENMSS@9239@1कस्यचिन्न हि दुर्बुद्धेश्छन्दतो जायते मतिः ।

ENMSS@9239@2यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥ ९२३९॥

ENMSS@9240@1कस्य तृषं न क्षपयसि पिबति न कस्तव पयः प्रविश्यान्तः ।

ENMSS@9240@2यदि सन्मार्गसरोवर नक्री न क्रोडमधिवसति ॥ ९२४०॥

ENMSS@9241@1कस्य दोषः कुले नास्ति व्याधिना को न पीडितः ।

ENMSS@9241@2व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम् ॥ ९२४१॥

ENMSS@9242@1कस्य न दयितं वित्तं चित्तं ह्रियते न कस्य वित्तेन ।

ENMSS@9242@2किं तु यशोधनलुब्धा वाञ्छन्ति न दुष्कृतैरर्थान् ॥ ९२४२॥

ENMSS@9243@1कस्य न प्रतिहतं बत चक्षुर् ध्वान्तसन्ततिभिरड्डमराभिः ।

ENMSS@9243@2केवलं मनसिजप्रतिहतानां नावधूतमभिसारवधूनाम् ॥ ९२४३॥

ENMSS@9244@1कस्य न वाहनयोग्या मुग्धधियस्तुच्छसाधने लग्नाः ।

ENMSS@9244@2प्रीततया प्रशमरुचश् चपलासु स्त्रीषु येऽदान्ताः ॥ ९२४४॥

ENMSS@9245@1कस्य नो कुरुते मुग्धे पिपासाकुलितं मनः ।

ENMSS@9245@2अयं ते विद्रुमच्छायो मरुमार्ग इवाधरः ॥ ९२४५॥

ENMSS@9246@1कस्य मरौ दुरधिगमः कमले कः कथय विरचितावासः ।

ENMSS@9246@2कैस्तुष्यति चामुण्डा रिपवस्ते वद कुतो भ्रष्टाः ॥ ९२४६॥

ENMSS@9247@1कस्य माता कस्य पिता कस्य बन्धुर्महामुने ।

ENMSS@9247@2विभ्रमश्च स्मृतिभ्रंशात् तेन मुह्यन्ति जन्तवः ॥ ९२४७॥
ENMSS@9248@1कस्य माता पिता कस्य कस्य भार्या सुतोऽपि वा ।
ENMSS@9248@2जातौ जातौ हि जीवानां भविष्यन्त्यपरेऽपरे ॥ ९२४८॥
ENMSS@9248A@1कस्य वक्तव्यता नास्ति सोपायं को न जीवति ।
ENMSS@9248A@2व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम् ॥
ENMSS@9249@1कस्य वशे प्राणिगणः  सत्यप्रियभाषिणो विनीतस्य ।
ENMSS@9249@2क्व स्थातव्यं न्याय्ये  पथि दृष्टादृष्टलाभाय ॥ ९२४९॥
ENMSS@9249A@1कस्य स्यान्न स्खलितं पूर्णाः सर्वे मनोरथाः कस्य ।
ENMSS@9249A@2कस्येह सुखं नित्यं दैवेन न खण्डितः को वा ॥
ENMSS@9250@1कस्य स्वर्गश्रियो वश्याः कस्य चैन्द्रं पदं भुवि ।
ENMSS@9250@2कं देवा बहु मन्यन्ते सङ्ग्रामे मरणादृते ॥ ९२५०॥
ENMSS@9251@1सङ्ग्रामे मरणं पुण्यं गयायां मरणे तथा ।
ENMSS@9251@2गङ्गायां मरणे मोक्षः सङ्ग्रामे मरणं सुखम् ॥ ९२५१॥
ENMSS@9252@1यदि वस्तुं मनः पुंसां स्वर्गस्त्रीभिः समं चिरात् ।
ENMSS@9252@2अपरां सुखितां कृत्वा सङ्ग्रामे म्रियतां तदा ॥ ९२५२॥
ENMSS@9253@1कस्यांचिद् वाचि कैश्चिन्ननु यदि विहितं दूषणं दुर्दुरूढैश्
छिन्नं किं नस्तदा स्यात् प्रथितगुणवतां काव्यकोटीश्वराणाम् ।
ENMSS@9253@2वाहाश्चेद् गन्धवाहाधिकविहितजवाः पञ्चषाश्चान्धखंजाः  का हानिः
शेरशाहक्षितिपकुलमणेरश्वकोटीश्वरस्य ॥ ९२५३॥
ENMSS@9254@1कस्याख्याय व्यतिकरमिमं मुक्तदुःखो भवेयं  को जानीते
निभृतमुभयोरावयोः स्नेहसारम् ।
ENMSS@9254@2जानात्येकं शशधरमुखि प्रेमतत्त्वं मनो मे  त्वामेवैतच्चिरमनुगतं
तत् प्रिये किं करोमि ॥ ९२५४॥
ENMSS@9255@1॥। ॥। ॥। ॥।
ENMSS@9255@2कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
ENMSS@9255@3नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ९२५५॥
ENMSS@9256@1कस्यादेशात् क्षपयति तमः सप्तसप्तिः प्रजानां  छायाहेतोः पथि
विटपिनामञ्जलिः केन बद्धः ।
ENMSS@9256@2अभ्यर्थ्यन्ते नवजलमुचः केन वा वृष्टिहेतोर् जात्यैवैते परहितविधौ
साधवो बद्धकाङ्क्षाः ॥ ९२५६॥

ENMSS@9257@1कस्या नाम किमत्र नास्ति विदितं यद् वीक्ष्यमाणोऽप्ययं लोको मूक इवास्ति

मां प्रति पुनः सर्वो जनस्तप्यते ।

ENMSS@9257@2शक्यं दर्शयितुं न पूगफलवत् कृत्वा द्विधेदं वपुर् यत् सत्यं

सखि वीक्षितः खलु मया नूनं चतुर्थ्याः शशी ॥ ९२५७॥

ENMSS@9258@1कस्यानित्येष्वनित्यस्य स्नेहो भवितुमर्हति ।

ENMSS@9258@2येन जन्मसहस्राणि द्रष्टव्यो न पुनः प्रियः ॥ ९२५८॥

ENMSS@9259@1कस्यानिमेषवितते नयने दिवौको- लोकादृते जगति ते अपि वै गृहीत्वा ।

ENMSS@9259@2पिण्डे प्रसारितमुखेन तिमे किमेतद् दृष्टं न बालिश विशद्बडिशं

त्वयान्तः ॥ ९२५९॥

ENMSS@9260@1कस्यापि कोऽपि कुरुते न सुखं दुःखं न दैवमपहाय ।

ENMSS@9260@2विदधाति वृथा गर्वं खलोऽहमहितस्य हन्तेति ॥ ९२६०॥

ENMSS@9261@1कस्यापि कोऽप्यतिशयोऽस्ति स तेन लोके ख्यातिं प्रयाति न हि सर्वविदस्तु

सर्वे ।

ENMSS@9261@2किं केतकी फलति किं पनसः सुपुष्पः किं नागवल्ल्यपि च

पुष्पफलैरुपेता ॥ ९२६१॥

ENMSS@9261A@1कस्यापि चाग्रतो नैव प्रकाश्यः स्वगुणः स्वयम् ।

ENMSS@9261A@2अतुच्छत्वेन तुच्छोऽपि वाच्यः परगुणः पुनः ॥

ENMSS@9262@1कस्यामोदं कमलं वदनमिदं ते प्रिये न संतनुयात् ।

ENMSS@9262@2अवलम्ब्य मित्रमेकं विकसति न यदन्यथा जातु ॥ ९२६२॥

ENMSS@9263@1कस्याश्चित् सुभग इति श्रुतश्चिरं यस् तं

दृष्ट्वाधिगतरतेर्निमीलिताक्ष्याः ।

ENMSS@9263@2निस्पन्दं वपुरवलोक्य सौविदल्लाः सन्तेपुर्विधुरधियो निशान्तवध्वाः

॥ ९२६३॥

ENMSS@9264@1कस्याश्चिन् मुखमनु धौतपत्रलेखं व्यातेने सलिलभरावलम्बिनीभिः

।

ENMSS@9264@2किञ्जल्कव्यतिकरपिञ्जरान्तराभिश् चित्रश्रीरलमलकाग्रवल्लरीभिः

॥ ९२६४॥

ENMSS@9265@1कस्यास्ति नाशो मनसो वितत्या क्व सर्वथा नास्ति भयं विमुक्तौ

।

ENMSS@9265@2शल्यं परं किं निजमूर्खतैव  के के ह्युपास्या गुरवश्च सन्तः ॥ ९२६५॥

ENMSS@9266@1कस्येदं भवनं, ममैव, भवती का सुभ्रु, लाटाङ्गना  केयं, मुग्धतरा सखी मम, पतिर्गेहेऽस्ति किं, तेन वा ।

ENMSS@9266@2इत्थं पान्थवचो दिनान्तसमये गूढार्थमाकर्ण्य वै मन्दान्दोलितकुण्डलस्तबकया तन्व्यावधूतं शिरः ॥ ९२६६॥

ENMSS@9267@1कस्येमौ पितरौ मनोभववता तापेन संयौजिताव् अन्योन्यं तनयादिकं जनयतो भूम्यादिभूतात्मभिः ।

ENMSS@9267@2इत्थं दुःस्थमतिर्मनोभवरतिर्यो मन्यते नास्तिकः  शान्तिस्तस्य कथं भवेद् धनवतो दुष्कर्मधर्माश्रयात् ॥ ९२६७॥

ENMSS@9268@1कस्येयं तरुणि प्रपा, पथिक नः, किं पीयतेऽस्यां, पयो  धेनूनामथ माहिषं बधिर रे वारः, कथं मङ्गलः ।

ENMSS@9268@2सोमो वाथ शनैश्चरो, ऽमृतमिदं, तत्तेऽधरे दृश्यते  श्रीमत्पान्थ विलाससुन्दर सखे यद् रोचते तत् पिब ॥ ९२६८॥

ENMSS@9269@1कस्योदपत्स्यत रुचिर्विरसावसाने  स्तोकस्थितावनुचितप्रभवे भवेऽस्मिन् ।

ENMSS@9269@2नारायणस्मृतिकथामृतपानगोष्ठी  चेतोविनोदनमियं यदि नाम न स्यात्

॥ ९२६९॥

ENMSS@9270@1कस्योपयोगमात्रेण धनेन रमते भनः ।

ENMSS@9270@2पदप्रमाणमाधारम् आरूढः को न कम्पते ॥ ९२७०॥

ENMSS@9271@1कस्राघातैः सुरभिरभितः सत्वरं ताडनीयो  गाढाम्रेडं मलयमरुतः श‍ृङ्खलादाम दत्त ।

ENMSS@9271@2कारागारे क्षिपत तरसा पञ्चमं रागराजं  चन्द्रं चूर्णीकुरुत च शिलापट्टके पिष्टपेषम् ॥ ९२७१॥

ENMSS@9272@1कह्लारस्पर्शगर्भैः शिशिरपरिगमात् कान्तिमद्भिः कराग्रैश् चन्द्रेणालिङ्गितायास्तिमिरनिवसने स्रंसमाने रजन्याः ।

ENMSS@9272@2अन्योन्यालोकिनीभिः परिचयजनितप्रेमनिष्यन्दिनीभिर् दूरारूढे प्रमोदे हसितमिव परिस्पष्टमाशावधूभिः ॥ ९२७२॥

ENMSS@9273@1कांचिद् दिनार्धसमये रविरश्मितप्तां नीलांशुकाञ्चलनिलीनमुखेन्दुम्बिम्बाम् ।

ENMSS@9273@2तां तादृशीं समनुवीक्ष्य कविर्जगाद  राहुर्दिवा ग्रसति पर्व विना

किलेन्दुम् ॥ ९२७३॥

ENMSS@9274@1कां तपस्वी गतोऽवस्थाम् इति स्मेराविव स्तनौ ।

ENMSS@9274@2वन्दे गौरीघनाश्लेषभवभूतिसिताननौ ॥ ९२७४॥

ENMSS@9275@1कांश्चिच्चाटुवचःशतैर्निजसुताप्रेमातिरेकै ः परान् अन्यान् वक्ररवाक्रमैर्धनवतः प्रापय्य गेहं निजम् ।

ENMSS@9275@2प्राग्दत्तग्रहणप्रगल्भकितवव्याजादवष्टभ्य तान् कुट्टिन्यः स्फुटमप्रगल्भचरितानेतान् निहन्तुं क्षमाः ॥ ९२७५॥

ENMSS@9276@1कांश्चित् कल्पशतं कृतस्थितिचयान् कांश्चिद् युगानां शतं कांश्चिद् वर्षशतं तथा कतिपयान् जन्तून् दिनानां शतम् ।

ENMSS@9276@2तांस्तान् कर्मभिरात्मनः प्रतिदिनं संक्षीयमाणायुषः कालोऽयं कवलीकरोति सकलान् भ्रातः कुतः कौशलम् ॥ ९२७६॥

ENMSS@9277@1कांश्चित् तुच्छयति प्रपूरयति वा कांश्चिन्नयत्युन्नतिं कांश्चित् पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान् ।

ENMSS@9277@2अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधयन् एष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः ॥ ९२७७॥

ENMSS@9278@1कांश्चिदर्थान् नरः प्राज्ञो लघुमूलान् महाफलान् ।

ENMSS@9278@2क्षिप्रमारभते कर्तुं न विघ्नयति तादृशान् ॥ ९२७८॥

ENMSS@9279@1कांसीकृतासीत् खलु मण्डलीन्दोः संसक्तरश्मिप्रकरा स्मरेण ।

ENMSS@9279@2तुला च नाराचलता निजैव मिथोनुरागस्य समीकृतौ वाम् ॥ ९२७९॥

ENMSS@9280@1कांस्यस्वन इवाभाति यस्मिन् खड्गहते ध्वनिः ।

ENMSS@9280@2खड्गोत्तमं तं वदति गिरिशः शुभवर्धनम् ॥ ९२८०॥

ENMSS@9281@1कां हरिरभरत् सूकररूपः कामरिरहितामिच्छति भूपः ।

ENMSS@9281@2केनाकारि च मन्मथजननं केन विराजति तरुणीवदनम् ॥ ९२८१॥

ENMSS@9282@1काकः काञ्चनपञ्जरे विनिहितः पद्माकरे कौशिकः श्राद्धे श्वा विनियोजितो हुतवहे हव्यः पलाण्डुः कृतः ।

ENMSS@9282@2सर्वं तेन कृतं किमत्र बहुना मद्यं महाशान्तये येनाज्ञानवता महीयसि पदे नीचः समारोपितः ॥ ९२८२॥

ENMSS@9283@1काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।

ENMSS@9283@2वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥ ९२८३॥

ENMSS@9284@1काकः कोकिलमुन्नमय्य कुरुते चूते फलास्वादनं भुङ्क्ते राजशुकं

निवार्य कुररः क्रीडापरो दाडिमम् ।

ENMSS@9284@2घूको बर्हिणमास्य शाखिशिखरे शेते सजानिः सुखं हा जातं विपरीतमद्य

विपिने श्येने परोक्षं गते ॥ ९२८४॥

ENMSS@9285@1काकः पक्षबलेन भूपतिगृहे ग्रासं यदि प्राप्तवान् किं वा तस्य

महत्त्वमस्य लघुता पञ्चाननस्यागता ।

ENMSS@9285@2येनाक्रम्य करीन्द्रगण्डयुगलं निर्भिद्य हेलालवाल् लब्ध्वा ग्रासवरं

वराटकधिया मुक्तागणस्त्यज्यते ॥ ९२८५॥

ENMSS@9286@1काकः पक्षिषु चाण्डालः स्मृतः पशुषु गर्दभः ।

ENMSS@9286@2नराणां कोऽपि चाण्डालः स्मृतः सर्वेषु निन्दकः ॥ ९२८६॥

ENMSS@9287@1काकः पद्मवने धृतिं न लभते हंसश्च कूपोदके क्रोष्टा

सिंहगुहान्तरे सुविपुले नीचस्तु भद्रासने ।

ENMSS@9287@2कुस्त्री सत्पुरुषं न जातु भजते सा सेव्यते दुर्जनैः या यस्य

प्रकृतिर्विधातृविहिता सा तस्य किं वार्यते ॥ ९२८७॥

ENMSS@9288@1काकः श्वानोऽकुलीनश्च बिडालः सर्प एव च ।

ENMSS@9288@2अकुलीना च या नारी तुल्यास्ते परिकीर्तिताः ॥ ९२८८॥

ENMSS@9289@1काकः स्वभावचपलः परिशुद्धवृत्तिर् लब्ध्वा बलिं स्वजनमाह्वयते

परांश्च ।

ENMSS@9289@2चर्मास्थिमांसवति हस्तिकलेवरेऽपि श्वा द्वेष्टि हन्ति च परान्

कृपणस्वभावः ॥ ९२८९॥

ENMSS@9290@1काक आह्वयते काकान् याचको न तु याचकान् ।

ENMSS@9290@2काकयाचकयोर्मध्ये वरं काको न याचकः ॥ ९२९०॥

ENMSS@9291@1काककुर्कुटकायस्थाः सजातिपरिपोषकाः ।

ENMSS@9291@2सजातिपरिहन्तारः सिंहाः श्वानो द्विजा गजाः ॥ ९२९१॥

ENMSS@9292@1काकचञ्चुपुटीकृत्य ओष्ठौ प्रोक्तानिलं पिबेत् ।

ENMSS@9292@2ओंकारध्वनिनाकृष्य पूरयेद् यावदन्तरम् ॥ ९२९२॥

ENMSS@9293@1काकजङ्घाजटा निद्रां कुरुते मस्तके स्थिता ।

ENMSS@9293@2पुष्योद्धृतं शुनः पित्तम् अपस्मारघ्नमञ्जनात् ॥ ९२९३॥

ENMSS@9294@1काकजङ्घारसः कर्णे क्षिप्तो बाधिर्यनाशनः ।

ENMSS@9294@2हन्ति कर्णे जटा बद्धा तस्या नेत्रामयं ध्रुवम् ॥ ९२९४॥

ENMSS@9295@1काकतालीययोगेन यदनात्मवति क्षणम् ।

ENMSS@9295@2करोति प्रणयं लक्ष्मीस्तत् तस्याः स्त्रीत्वचापलम् ॥ ९२९५॥
ENMSS@9296@1काकतालीयवत् प्राप्तं दृष्ट्वापि निधिमग्रतः ।
ENMSS@9296@2न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥ ९२९६॥
ENMSS@9297@1काकतुण्डोक्तिरपरा मल्लिकोक्तिरनोपमा (?) ।
ENMSS@9297@2पाटलोक्तिश्च पद्मोक्तिः पद्मिन्युक्तिः स्फुटाः स्मृताः ॥ ९२९७॥
ENMSS@9298@1काक त्वं फलनम्रविपिनं दैवात्समासादयन् किं कर्णौ बधिरीकरोषि परुषैः क्रेंकारकोलाहलैः ।
ENMSS@9298@2मौनं चेदवलम्बसे रतभरप्रक्रान्तपुंस्कोकिल- भ्रान्त्यापि त्वयि सञ्चरन्ति न कथं मुग्धाकटाक्षच्छटाः ॥ ९२९८॥
ENMSS@9299@1का कथा बाणसंधाने ज्याशब्देनैव दूरतः ।
ENMSS@9299@2हुंकारेणेव धनुषः स हि विघ्नान् व्यपोहति ॥ ९२९९॥
ENMSS@9300@1काकमांसं तथोच्छिष्टं स्तोकं तदपि दुर्बलम् ।
ENMSS@9300@2भक्षितेनापि किं तेन येन तृप्तिर्न जायते ॥ ९३००॥
ENMSS@9301@1काकमाची तथा कुष्ठं गोतक्रेण च पाचयेत् ।
ENMSS@9301@2नाशयेन् मण्डलिक्ष्वेडम् अगदोऽयं सुनिश्चितम् ॥ ९३०१॥
ENMSS@9302@1काकमाचीशिफा कर्णे बद्धा रात्रिज्वरापहा ।
ENMSS@9302@2पाणिस्थं वृषवृन्दाकं द्यूते वितनुते जयम् ॥ ९३०२॥
ENMSS@9303@1काकवराकमरालमवैषि न जर्जरिताऽर्जुनतार्य कुतः ।
ENMSS@9303@2विक्रमवैरिवधूजनलोचन- कज्जलवज्जलमज्जनतः ॥ ९३०३॥
ENMSS@9304@1काकश्च द्रुमकुट्टश्च मण्डूको नीलमक्षिकः ।
ENMSS@9304@2लद्द्वया सह पञ्चैते गजं जघ्नुरुपायतः ॥ ९३०४॥
ENMSS@9305@1काकस्य कति वा दन्ता मेषस्याण्डे कियत् पलम् ।
ENMSS@9305@2गर्दभे कति रोमाणि व्यर्थैषातु विचारणा ॥ ९३०५॥
ENMSS@9306@1काकस्य चञ्चुर्यदि हेमयुक्ता माणिक्ययुक्तौ चरणौ च तस्य ।
ENMSS@9306@2एकैकपक्षे गजराजमुक्ता तथापि काको न च राजहंसः ॥ ९३०६॥
ENMSS@9307@1काकस्य वृष्टिहेतोर् नीडं दिक्षु प्रशस्यते तिसृषु ।
ENMSS@9307@2दुर्भिक्षमरणहेतुर् भवति सयाम्येषु कोणेषु ॥ ९३०७॥
ENMSS@9308@1काकाः किं किं न कुर्वन्ति क्रोङ्कारं यत्र तत्र वा ।
ENMSS@9308@2शुक एव परं वक्ति नृपहस्तोपलालितः ॥ ९३०८॥
ENMSS@9309@1काकाः प्रभुप्रणिहितैः पिकपट्टबद्धेर् माकन्दबृन्दमकरन्दरसं लभन्ताम् ।

ENMSS@9309@2प्राप्ते वसन्तसमये कथमाचरन्ति कर्णामृतानि कलपञ्चमकूजितानि ॥ ९३०९॥

ENMSS@9310@1काकानां कोकिलानां च सीमाभेदः कथं भवेत् ।

ENMSS@9310@2यदि विश्वसृजा साक्षं न कृता कर्णशष्कुली ॥ ९३१०॥

ENMSS@9311@1काकानां प्रीतियोगं चिरसहवसतिं कोकिलापेक्षसे चेत् तर्हि त्वं तद्वदेव श्रवणपुटपटून् कुत्सितान् कूज शब्दान् ।

ENMSS@9311@2अभ्यासस्तत्र नो चेत् तव गलदमृता गीरियं गुप्यतां वा तामाकर्ण्य स्वजातेरननुगुणगुणं त्वाममी सन्त्यजेयुः ॥ ९३११॥

ENMSS@9312@1का कान्ता कालियारातेः पुनरर्थे किमव्ययम् ।

ENMSS@9312@2किं वन्द्यं सर्वदेवानां फलेषु किमु सुन्दरम् ॥ ९३१२॥

ENMSS@9313@1का का प्रिया प्रियतमं परिरभ्य दोर्भ्याम् अभ्यागतेऽपि मिहिरे न जहाति
निद्राम् ।

ENMSS@9313@2जागर्तु सञ्चयतु चोलमितीव काकाः काकालिरालिरिव गूढगिरश्चकार ॥ ९३१३॥

ENMSS@9314@1का काबला निधुवनश्रमपीडिताङ्गी निद्रां गता दयितबाहुलतानुबद्धा ।

ENMSS@9314@2सा सा तु यातु भवनं मिहिरोद्गमोऽयं सम्केतवाक्यमिति काकचया वदन्ति
॥ ९३१४॥

ENMSS@9314A@1का कामधेनुरिह कश् चिन्तामणिरपि च कल्पशाखी कः ।

ENMSS@9314A@2सर्वाण्यमूनि भुवने पर्यायवचांसि पुण्यस्य ॥

ENMSS@9315@1काका मूर्ध्नि सुखं वसन्ति शतशः शाखासु शाखामृगा घूकाः कोटरगह्वरेषु मशलैर्दंशैश्च सान्द्रं दलम् ।

ENMSS@9315@2आधारः कियतामसि स्थिरतरं शुद्धं च लब्धं यशः पान्था नोपसरन्ति चेत् क्षतमितः किं वृक्षराजस्य ते ॥ ९३१५॥

ENMSS@9316@1का काली का मधुरा का शीतलवाहिनी गङ्गा ।

ENMSS@9316@2कं संजघान कृष्णः कं बलवन्तं न बाधते शीतम् ॥ ९३१६॥

ENMSS@9317@1काकाल्लौल्यं यमात् क्रौर्यं स्थपतेर्दृढघातिताम् ।

ENMSS@9317@2एकैकाक्षरमादाय कायस्थः केन निर्मितः ॥ ९३१७॥

ENMSS@9317A@1काका वृका घुकबकाश्च भेकाः प्रणम्य युष्मानिदमेव याचे ।

ENMSS@9317A@2कोलाहलं मा कुरुत क्षमध्वं पुंस्कोकिलः कूजति मञ्जुरावम् ॥

ENMSS@9318@1काकिन्याः पत्रमूलं सहचरसहितं केतकीनां च कन्दं  छायाशुष्कं च भृङ्गं त्रिफलरसयुतं तैलमध्ये निधाय ।

ENMSS@9318@2लौहे पात्रे प्रणीतं धरणितलगतं मासमात्रस्थितं तत्  केशाः काशप्रकाशा अलिकुलसदृशाः सम्भवन्त्यस्य लेपात् ॥ ९३१८॥

ENMSS@9319@1काकुं करोषि गृहकोणकरीषपुञ्ज-  गूढाङ्ग किं ननु वृथा कितव प्रयाहि ।

ENMSS@9319@2कुत्राद्य जीर्णतरणिभ्रमनातिभीत-  गोपाङ्गनागणविडम्बनचातुरी ते ॥ ९३१९॥

ENMSS@9320@1काकुत्स्थस्य दशाननो न कृतवान् दारापहारं यदि  क्वाम्भोधिः क्व च

सेतुबन्धघटना क्वोत्तीर्य लङ्काजयः ।

ENMSS@9320@2पार्थस्यापि पराभवं यदि रिपुर्नादात् क्व तादृक् तपो  नीयन्ते रिपुभिः समुन्नतिपदं प्रायः परं मानिनः ॥ ९३२०॥

ENMSS@9321@1काकुत्स्थस्य प्रतापाग्निर्दीप्तपिङ्गैर्वलीमुखैः ।

ENMSS@9321@2निर्वाणो राक्षसेन्द्रस्य मन्ये नीलैर्निशाचरैः ॥ ९३२१॥

ENMSS@9322@1काकुत्स्थेन शिरांसि यानि शतशश्छिन्नानि मायानिधेः  पौलस्त्यस्य विमानसीमनि तथा भ्रान्तानि नाकौकसाम् ।

ENMSS@9322@2तान्येवास्य धनुःश्रमप्रशमनं कुर्वन्ति सीतापतेः

क्रीडाचामरडम्बरानुकृतिभिर्लोलायमानै ः कचैः ॥ ९३२२॥

ENMSS@9323@1का कृता विष्णुना कीदृग् योषितां कः प्रशस्यते ।

ENMSS@9323@2असेव्यः कीदृशः स्वामी को निहन्ता निशातमः ॥ ९३२३॥

ENMSS@9324@1काके कर्णपुटीकठोरनिनदे पीयूषधाररस-

स्यन्दोदञ्चितचारुपञ्चमरुते साधारणे मय्यपि ।

ENMSS@9324@2वन्यां वृत्तिमयं व्यधादिति मुधा वत्स व्यथां मा कृथाः  क्व कैवं न कृतं जनेषु निकृतं दुर्मेधसा वेधसा ॥ ९३२४॥

ENMSS@9325@1काके कार्ष्ण्यमलौकिकं धवलिमा हंसे निसर्गस्थितो  गांभीर्ये महदन्तरं वचसि यो भेदः स किं कथ्यते ।

ENMSS@9325@2एतावत्सु विशेषणेष्वपि सखे यत्रेदमालोक्यते  के काकाः खलु के च

हंसशिशवो देशाय तस्मै नमः ॥ ९३२५॥

ENMSS@9326@1काके शौचं द्यूतकारेषु सत्यं  सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।

ENMSS@9326@2क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता  राजा मित्रं केन दृष्टं श्रुतं

वा ॥ ९३२६॥

ENMSS@9327@1काकैः सह विवृद्धस्य कोकिलस्य कला गिरः ।

ENMSS@9327@2खलसङ्गेऽपि नैष्ठुर्यं कल्याणप्रकृतेः कुतः ॥ ९३२७॥

ENMSS@9327A@1काकैः सार्द्धं वसन् हंसः क्षोभते चावसीदति ।

ENMSS@9327A@2गतः कोमल एवाऽसो जिह्मो दुष्टो न काकवत् ॥

ENMSS@9328@1काकैरिमांश्चित्रबर्हान् मयूरान्  पराजैष्ठाः पाण्डवान् धार्तराष्ट्रैः ।

ENMSS@9328@2हित्वा सिंहान् क्रोष्टुकान् गूहमानः  प्राप्ते काले शोचिता त्वं नरेन्द्र ॥ ९३२८॥

ENMSS@9329@1काकैर्निष्कुषितं श्वभिः कबलितं वीचीभिरान्दोलितं  स्रोतोभिश्चलितं तटान्तमलिनं गोमायुभिर्लोडितम् ।

ENMSS@9329@2दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानः कदा  द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागीरथि स्वं वपुः ॥ ९३२९॥

ENMSS@9330@1काकोदुम्बरिकायां  वल्मीको दृश्यते शिरा तस्मिन् ।

ENMSS@9330@2पुरुषत्रये सपादे  पश्चिमदिक्स्था न सा वहति ॥ ९३३०॥

ENMSS@9331@1काकोलः कलकण्ठिका कुवलयं कादम्बिनी कर्दमः  कंसारिः कबरी कृपाणलतिका कस्तूरिका कज्जलम् ।

ENMSS@9331@2कालिन्दी कषपट्टिका करिघटा कामारिकण्ठस्थली  यस्यैते करदा भवन्ति

सखि तद्वन्दे विनिद्रं तमः ॥ ९३३१॥

ENMSS@9332@1का खलेन सह स्पर्धा सज्जनस्याभिमानिनः ।

ENMSS@9332@2भाषणं भीषणं साधु दूषणं यस्य भूषणम् ॥ ९३३२॥

ENMSS@9333@1का गणना विषयवशे  पुंसि वराके वराङ्गना स्पृहया ।

ENMSS@9333@2व्याजेन वीक्षमाणा  ध्यानधियां स्पृशति सज्ज्ञानम् ॥ ९३३३॥

ENMSS@9334@1काङ्क्षितेनाप्यलब्धेन भोगार्हे नवयौवने ।

ENMSS@9334@2जराजीर्णशरीरस्य भारेणेव धनेन किम् ॥ ९३३४॥

ENMSS@9335@1काचं मणिं काञ्चनमेकसूत्रे  मुग्धा निबध्नन्ति किमत्र चित्रम् ।

ENMSS@9335@2विचारवान् पणिनिरेकसूत्रे  श्वानं युवानं मघवानमाह ॥ ९३३५॥

ENMSS@9336@1काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।

ENMSS@9336@2अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ९३३६॥

ENMSS@9337@1काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।

ENMSS@9337@2तथा सत्संनिधानेन मूर्खो याति प्रवीणताम् ॥ ९३३७॥

ENMSS@9337A@1काचकामलदोषेण पश्येन् नेत्रे विपर्ययम् ।

ENMSS@9337A@2अभ्याख्यानं वदेज्जिह्वा तत्र रागक उच्यते ॥

ENMSS@9338@1का चक्रे हरिणा, धने कृपणधीः कीदृग्, भुजंगेऽस्ति किं, कीदृक्, कुम्भसमुद्भवस्य जठरं, कीदृग्यियासुर्वधूः ।

ENMSS@9338@2श्लोकः कीदृगभीप्सितः सुकृतिनां, कीदृङ्नभो निर्मलं, क्षोणीमाह्वय सर्वगं किमुदितं रात्रौ सरः कीदृशम् ॥ ९३३८॥

ENMSS@9339@1काचाः काञ्चनभूषिताः कति न वा पुष्णन्ति रत्नश्रियं मौलौ वा कति

नोद्वहन्त्यपधियस्तानेव रत्नभ्रमात् ।

ENMSS@9339@2अक्ष्णां ये पुनरुन्मृजन्ति तिमिरं यैर्नाम रत्नाकरः सिन्धुस्ते पृथगेव हन्त मणयस्तेष्वप्यभिज्ञाः पृथक् ॥ ९३३९॥

ENMSS@9340@1काचित् कराभ्यां कुसुमानि नीत्वा दधार शंभोः पदयोः समीपे ।

ENMSS@9340@2विवक्षया मन्मथदुष्प्रवृत्तेः समुत्सृजन्ती विशिखानिवाग्रे ॥ ९३४०॥

ENMSS@9341@1काचित् कीर्णा रजोभिर्दिवमनुविदधे भिन्नवक्रेन्दुलक्ष्मीर् अश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।

ENMSS@9341@2भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत् कम्पमापुः प्रस्थाने पार्थिवानामशिवमिति पुरोभावि नार्यः शशंसुः ॥ ९३४१॥

ENMSS@9342@1काचित् कृता कृतिरिति त्वयि सार्पितेति कापि प्रमोदकणिका मम नान्तरङ्गे ।

ENMSS@9342@2मौढ्यं मदीयमिह यद्विदितं ममैव किं त्वम्ब विश्वसिमि दीनशरण्यतां ते ॥ ९३४२॥

ENMSS@9343@1काचित् तृषार्ता वनिता निदाघे गङ्गां समभ्येत्य सुधासवर्णाम् ।

ENMSS@9343@2आदाय तद्वारि करद्वयेन विलोकयन्ती न पपौ किमेतत् ॥ ९३४३॥

ENMSS@9343-5 (करकिसलयकान्तिकान्त्या शोणितशङ्कयेति ।)

ENMSS@9344@1काचित् पदैरस्खलितैः सखेलं वान्तीषु शुद्धान्तकरेणुकासु ।

ENMSS@9344@2राजाङ्गनानामकरोदवज्ञां श्रोणीभरे च स्तनगौरवे च ॥ ९३४४॥

ENMSS@9345@1काचित् पुरा विरहिणी परिवृद्धिहेतोर् यस्यै दिदेश सलिलं नवमालिकायै ।

ENMSS@9345@2सा पुष्पितैव जलमश्रुवशाद् वियोगे तस्यै प्रदाय कथमप्यनृणी बभूव ॥ ९३४५॥

ENMSS@9346@1काचित् स्वर्णलता तदूर्ध्वममलश्चन्द्रस्तदभ्यन्तरे पद्मे तन्निकटं तिलस्य कुसुमं तत्सन्निधौ पल्लवे ।

ENMSS@9346@2हेम्नः किंचिदधस्तयोश्च कलशौ कान्तौ जगन्मोहनौ  स्वस्त्येतत् प्रकरोतु वस्त्रिजगतां किं ब्रह्मकृष्णादिभिः ॥ ९३४६॥

ENMSS@9347@1काचिद् बलिना क्रान्ता  काचिन् न जहाति कामिनं रुचिरम् ।

ENMSS@9347@2अन्या पानकगोष्ठ्यां  नयति दिनं प्रीतकैः सार्धम् ॥ ९३४७॥

ENMSS@9348@1काचिद् बालकवन्महीतलगता मूलच्छिदाकारणं  द्रव्येणार्जनपुष्पितापि विफली काचिच्च जातिप्रभा ।

ENMSS@9348@2काचिच्छ्रीः कदलीव भोगसुभगा सत्पुण्यबीजच्युता  सर्वाङ्गे सुभगा रसाललतिकावत् पुण्यबीजाङ्किता ॥ ९३४८॥

ENMSS@9349@1काचिद् बाला रमणवसतिं प्रेषयन्ती करण्डं  दासीहस्तात् सभयमलिखद् व्यालमस्योपरिष्टात् ।

ENMSS@9349@2गौरीकान्तं पवनतनयं चम्पकं चात्र भावं  पृच्छत्यार्यो निपुणतिलको मल्लिनाथः कवीन्द्रः ॥ ९३४९॥

ENMSS@9350@1काचिद् विभूषयति दर्पणसक्तहस्ता  बालातपेषु वनिता वदनारविन्दम् ।

ENMSS@9350@2दन्तच्छदं प्रियतमेन निपीतसारं  दन्ताग्रभिन्नम् अवकृष्य निरीक्षते च ॥ ९३५०॥

ENMSS@9351@1काचिद् वियोगानलतप्तगात्री  प्राणान् समाधारयितुं लिलेख ।

ENMSS@9351@2बाह्वोर्भुजङ्गं हृदि राहुबिम्बं  नाभौ च कर्पूरमयं महेशम् ॥ ९३५१॥

ENMSS@9352@1काचिद् विलोलनयना रमणे स्वकीये  दूरं गते सति मनोभवबाणखिन्ना ।

ENMSS@9352@2त्यक्तं शरीरमचिरान् मलयाद्रिवायुं  सौरभ्यशालिनमहो पिबति स्म चित्रम् ॥ ९३५२॥

ENMSS@9353@1काचिद् विहृत्य किल कन्तुककेलिरङ्गाद्  भूरेणुरूषिततनुर्निरगान्मृगाक्षी ।

ENMSS@9353@2उत्फुल्लपङ्कजवने सुचिरं चरित्वा  किञ्जल्करेणुपरिधूसरितेव लक्ष्मीः ॥ ९३५३॥

ENMSS@9354@1का चिन्ता मम जीवने यदि हरिर्विश्वंभरो गीयते  नो चेदर्भकजीवनाय जननीस्तन्यं कथं निर्ममे ।

ENMSS@9354@2इत्यालोच्य मुहुर्मुहुर्यदुपते लक्ष्मीपते केवलं  त्वत्पादाम्बुजसेवनेन सततं कालो मया नीयते ॥ ९३५४॥

ENMSS@9355@1काचिन्नितम्बार्पितवामहस्ता  दोर्लेखया कुञ्चितया नताङ्गी ।

ENMSS@9355@2क्षमापतौ मार्गणमोक्षदक्षम्  अकल्पयच्चापमिव स्मरस्य ॥ ९३५५॥

ENMSS@9356@1काचिन्निदेशाज्ञरतीजनानां  कुलोचितं किंचिदिहालपन्ती ।
ENMSS@9356@2कुञ्जद्रुमालेखनमाचरन्ती  संज्ञापितालीभिरभूत् सलज्जा ॥ ९३५६॥
ENMSS@9357@1काचिन्निवारितबहिर्गमना जनन्या  द्रष्टुं हरं भवनजालकमाससाद ।
ENMSS@9357@2तस्या विलोचनमदृश्यत दाशयन्त्र-  यन्त्रोपरुद्धशफरोपमितं क्षणेन ॥ ९३५७॥
ENMSS@9358@1काचिन्मृगाक्षी प्रियविप्रयोगे  गन्तुं निशापारमपारयन्ती ।
ENMSS@9358@2उद्गातुमादाय करेण वीणाम्  एणाङ्कमालोक्य शनैरहासीत् ॥ ९३५८॥
ENMSS@9359@1काचे मणिर्मणौ काचो येषां बुद्धिः प्रवर्तते ।
ENMSS@9359@2न तेषां संनिधौ भृत्यो नाममात्रोऽपि तिष्ठति ॥ ९३५९॥
ENMSS@9360@1काचो मणिर्मणिः काचो येषां तेऽन्ये हि देहिनः ।
ENMSS@9360@2सन्ति ते सुधियो येषां काचः काचो मणिर्मणिः ॥ ९३६०॥
ENMSS@9360A@1काञ्चनाङ्गि कमनीयकलापौ  कञ्चुलीकवचितौ लिकुचौ ते ।
ENMSS@9360A@2पाणिना ननु वहामि मुहूर्तं  देहि मेऽधरमणिं तव दास्यम् ॥
ENMSS@9361@1काञ्चिकेन समालोड्य भक्षयेत् प्रातरन्वहम् ।
ENMSS@9361@2षण्मासयोगतो हन्ति पलितं वलिभिः सह ।
ENMSS@9361@3दुग्धान्नभोजनासक्तश्चिरंजीवी भवेन् नरः ॥ ९३६१॥
ENMSS@9362@1काञ्चीं काञ्ची न धत्ते कलयति न दृशा केरली केलितल्पं  सिन्दूरं दूर एव क्षिपति करतलन्यस्तमान्ध्री पुरन्ध्री ।
ENMSS@9362@2सौराष्ट्री मार्ष्टि भूयः सपदि नयनयो रक्तयो रक्तिमानं  कार्णाटी कर्णिकायां मलिनयति मनो मानसिंहप्रयाणे ॥ ९३६२॥
ENMSS@9362A@1काञ्चीकलक्वणितकोमलनाभिकान्ति  पारावतध्वनितचित्रितकण्ठपालिम् ।
ENMSS@9362A@2उद्भ्रान्तलोचनचकोरमनङ्गरङ्गम्  आशास्महे कमपि वारविलासवत्याः ॥
ENMSS@9363@1काञ्ची कांचिदियं चकार जघनन्यस्ता गतेर्मन्दतां  गाढं बद्धमिदं च कञ्चुकमदादुच्छूनतां वक्षसः ।
ENMSS@9363@2नेत्रप्रान्तमथाकुलं कलयति श्रोत्रावतंसद्वयं  तत्कोऽयं बत मत्प्रसाधनविधौ सख्यैषमस्त्वत्क्रमः ॥ ९३६३॥
ENMSS@9364@1काञ्चीगुणग्रथितकाञ्चनचेलदृश्य-
चण्डातपांशुकविभापरभागशोभि ।
ENMSS@9364@2पर्यङ्कमण्डलपरिष्करणं पुरारेर् ध्यायामि ते निखिलमम्ब नितम्बबिम्बम्

॥ ९३६४॥

ENMSS@9365@1काञ्चीगुणैः काञ्चनरत्नचित्रैर् नो भूषयन्ति प्रमदा नितम्बम् ।

ENMSS@9365@2न नूपुरैर्हंसरुतं भजद्भिः पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ९३६५॥

ENMSS@9366@1काञ्चीगुणैर्विरचिता जघनेषु लक्ष्मीर् लब्धा स्थितिः स्तनतटेषु च रत्नहारैः ।

ENMSS@9366@2नो भूषिता वयमितीव नितम्बिनीनां कार्श्यं निरर्गलमधार्यत मध्यभागैः ॥ ९३६६॥

ENMSS@9367@1काञ्चीदामकबन्धनं सललिता कर्णोत्पलैस्ताडना हेलालिङ्गविघ्नमाहितरुषा मौनेन निर्भर्त्सनम् ।

ENMSS@9367@2किं पूर्वोचितमेतदत्र सहसा विस्मृत्य मन्योर्भरान्-

मय्युत्कण्ठमनस्यदर्शनपथं यातास्यहो कोपने ॥ ९३६७॥

ENMSS@9368@1काञ्चीदाम दृढं विधाय कवरीमाबध्य गाढं गुणैर् वक्षोजादपसार्य हारमसकृद् व्याधूय कर्णोत्पलम् ।

ENMSS@9368@2दूरोत्सारितकङ्कणा विधुमुखी सोत्प्रासहासं हठात् कण्ठे कस्य करोति

हन्त दयिताश्लेषाय दोर्बन्धनम् ॥ ९३६८॥

ENMSS@9369@1काञ्चीदाम निवेशयन् वितनुते वासः श्लथं सुभ्रुवो हारं वक्षसि योजयन् करतलं धत्ते कुचाम्भोरुहे ।

ENMSS@9369@2जल्पंश्चाटुवचोऽधरं धयति यत् प्रेयान् कुतो विस्मयः पांसुं चक्षुषि विक्षिपन् यदि धनं गृह्णासि पाटच्चरः ॥ ९३६९॥

ENMSS@9369A@1काञ्चीसीमनि कापि काञ्चनमयी निश्रेणिका राजते तामासाद्य रणोत्सवेन

महता केनापि धीर त्वया ।

ENMSS@9369A@2सद्यः कण्टकशालिना करयुगेनाक्रम्य शैलद्वयं तस्योपान्तनिवासिनश्च शशिनः स्फीता सुधा लप्स्यते ॥

ENMSS@9370@1काञ्च्या गाढतरावबद्धवसनप्रान्ता किमर्थं पुनर् मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति ।

ENMSS@9370@2मातः सुप्तिम् अपीह लुम्पति ममेत्यारोपितक्रोधया पर्यस्य स्वपनच्छलेन शयने दत्तोऽवकाशस्तया ॥ ९३७०॥

ENMSS@9371@1काठिन्यं कुचयोः स्रष्टुं वाञ्छन्त्यः पादपद्मयोः ।

ENMSS@9371@2निन्दन्ति च विधातारं त्वद्धाटीष्वरियोषितः ॥ ९३७१॥

ENMSS@9372@1काठिन्यं कुचकुम्भयोर्नयनयोश्चाञ्चल्यमेतद् द्वयं भो ब्रह्मन्

भवता कथं न पदयोरस्माकमासादितम् ।

ENMSS@9372@2इत्थं श्रीनरसिंह ते त्रिभुवनाधीशस्य घाटीभिया कान्तारेषु मिथः पलायनपरा जल्पन्ति वैरिस्त्रियः ॥ ९३७२॥

ENMSS@9373@1काठिन्यं गिरिषु सदा मृदुता सलिले ध्रुवा प्रभा सूर्ये ।

ENMSS@9373@2वैरमसज्जनहृदये सज्जनहृदये पुनः क्षान्तिः ॥ ९३७३॥

ENMSS@9374@1काठिन्यमङ्गैर्निखिलैर्निरस्तं स्तनौ कृशाङ्ग्याः शरणं जगाम ।

ENMSS@9374@2अधः पतिष्याव इतीव भीत्या न शक्नुतस्तावपि हातुमेतत् ॥ ९३७४॥

ENMSS@9375@1काणः कुब्जोऽथ खञ्जः श्रुतिबलविकलो वामनः पङ्गुरन्धः षण्डोऽपि च्छिन्ननासः परिजनरहितो दुर्भगो रोगदेही ।

ENMSS@9375@2दुष्पुत्रो दुष्कलत्रः स्वजनपरिजनैर्निन्दिनो हीनमानः सत्यं यज्जायते तत् स्वकृतमिदमहो चेष्टते जीवलोके ॥ ९३७५॥

ENMSS@9376@1काणाः कमलपत्राक्षाः कदर्याः कल्पशाखिनः ।

ENMSS@9376@2कातरा विक्रमादित्याः कविदृग्गोचरं गताः ॥ ९३७६॥

ENMSS@9377@1काणाः कुब्जाश्च षण्डाश्च तथा वृद्धाश्च पङ्गवः ।

ENMSS@9377@2एते चान्तःपुरे नित्यं नियोक्तव्याः क्षमाभृता ॥ ९३७७॥

ENMSS@9378@1काणाः खञ्जाश्च कुब्जाश्च अतिविद्धाश्च पङ्गुलाः ।

ENMSS@9378@2एतेष्वन्तः पुररक्षायां नियोज्याः पार्थिवेन तु ॥ ९३७८॥

ENMSS@9378A@1काणाश्छटाश्च रंडाश्च तथा वृद्धाश्च पङ्गवः ।

ENMSS@9378A@2एते चान्तःपुरे नित्यं नियोक्तव्याः क्षमाभृता ॥

ENMSS@9378B@1काणो निमग्नविषमोन्नतदृष्टिरेकः शक्तो विरागजनने जननातुराणाम् ।

ENMSS@9378B@2यो नैव कस्यचिदुपैति मनःप्रियत्वम् आलेख्यकर्म लिखितोऽपि किमु

स्वरूपः ॥

ENMSS@9379@1कातरताकेकरित- स्मरलज्जारोषमसृणमधुराक्षी ।

ENMSS@9379@2योक्तुं न मोक्तुमथवा वलतेऽसावर्थलब्धरतिः ॥ ९३७९॥

ENMSS@9380@1कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।

ENMSS@9380@2अतः सिद्धिं समेताभ्याम् उभाभ्यामन्वियेष सः ॥ ९३८०॥

ENMSS@9381@1कातर्यं तु न कार्मणं न न परं दम्भो न किं योषितां यच्चित्ता तनुचापलं मधुविधुद्वेषस्तनुत्वं तनोः ।

ENMSS@9381@2अस्माकं सखि पश्य संप्रति तनू रोमापि वक्रायते सद्यः प्रोषित

नाथयाभिनवया पान्थस्त्रियो हासिताः ॥ ९३८१॥

ENMSS@9382@1कातर्यं दुर्विनीतत्वं कार्पण्यमविवेकता ।

ENMSS@9382@2सर्वं मार्जन्ति कवयः शालीनां मुष्टिकिंकराः ॥ ९३८२॥

ENMSS@9383@1का तव काग्ता कस्ते पुत्रः  संसारोऽयमतीव विचित्रः ।

ENMSS@9383@2कस्य त्वं वा कुत आयातस् तत् त्वं चिन्तय तदिदं भ्रातः ॥ ९३८३॥

ENMSS@9384@1का तारैर्मम गर्जितैरुपरता धाराम्बुभिः का हता  का मोहं गमिता वियोगविधुरा का वा कदम्बानिलैः ।

ENMSS@9384@2नीता का च विलोलतां मदकलैः केकारबैर्बर्हिणाम्  इत्थं पान्थगृहेषु पश्यति घनो विद्युत्प्रदीपैरिव ॥ ९३८४॥

ENMSS@9385@1कात्यायनीकुसुमकामनया किमर्थं  कान्तारकुक्षिकुहरं कुतुकाद् गतासि ।

ENMSS@9385@2पश्य स्तनस्तबकयोस्तव कण्टकाङ्कं  गोपः सुकण्ठि बत पश्यति जातकोपः ॥ ९३८५॥

ENMSS@9386@1कात्र श्रीः श्रोणिबिम्बे स्रवदुदरपुरावस्तिखद्वारवाच्ये  लक्ष्मीः का कामिनीनां कुचकलशयुगे मांसपिण्डस्वरूपे ।

ENMSS@9386@2का कान्तिर्नेत्रयुग्मे जलकलुषजुषि श्लेष्मरक्तादिपूर्णे  का शोभावर्तगर्ते निगदत यदहो मोहिनस्ताः स्तुवन्ति ॥ ९३८६॥

ENMSS@9386A@1का त्वं कामिनि जाह्नवी, किमिह ते, भर्ता हरो नन्वसाव् अम्भस्त्वं किल

वेत्सि मन्मथकलां, जानात्ययं ते पतिः ।

ENMSS@9386A@2स्वामिन् सत्यमिदं, नहि प्रियतमे सत्यः कुतः कामिनां  इत्येवं हरजाह्नवीगिरिसुतासंजल्पितं पातु वः ॥

ENMSS@9387@1का त्वं, कुन्तलमल्लकीर्तिर्, अहह क्वासि स्थिता, न क्वचित्  सख्यस्तास्तव कुत्र कुत्र वद वाग् लक्ष्मीस्तथा कान्तयः ।

ENMSS@9387@2वाग् याता चतुराननस्य वदनं लक्ष्मीर्मुरारेरुरः  कान्तिर्मण्डलमैन्दवं मम पुनर्नाद्यापि विश्रामभूः ॥ ९३८७॥

ENMSS@9388@1का त्वं पद्मपलाशाक्षि पीतकौशेयवासिनि ।

ENMSS@9388@2द्रुमस्य शाखामालम्ब्य तिष्ठसि त्वमनिन्दते ॥ ९३८८॥

ENMSS@9389@1का त्वं पुत्रि, नरेन्द्र लुब्धकवधूर्, हस्ते किमेतत्, पलं  क्षामं किं, सहजं ब्रवीमि नृपते यद्यादराच्छ्रूयते ।

ENMSS@9389@2गायन्ति त्वदरिप्रियाश्रुतटिनीतीरेषु सिद्धाङ्गना  गीतान्धा न तृणं

चरन्ति हरिणास्तेनामिषं दुर्बलम् ॥ ९३८९॥

ENMSS@9390@1का त्वं, माधवदूतिका, वदसि किं, मानं जहीहि प्रिये धूर्तः सोऽन्यमना,

मनागपि सखि त्वय्यादरं नोज्झति ।

ENMSS@9390@2इत्यन्योन्यकथारसैः प्रमुदितां राधां सखीवेषवान् नीत्वा कुञ्जगृहं

प्रकाशिततनुः स्मेरो हरिः पातु वः ॥ ९३९०॥

ENMSS@9391@1का त्वं, मुक्ति, रुपागतास्मि भवती कस्मादकस्मादिह श्रीकृष्णस्मरणेन

देव भवतो दासीपदं प्रापिता ।

ENMSS@9391@2दूरे तिष्ठ मनागनागसि कथं कुर्यादनार्यं मयि

त्वद्गन्धान्निजनामचन्दनरसालेपस्य लोपो भवेत् ॥ ९३९१॥

ENMSS@9392@1का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ।

ENMSS@9392@2आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥ ९३९२॥

ENMSS@9393@1कादम्बिनी कम्बलिका कदम्ब- केदारकान्ताकुचकुट्टिमं च ।

ENMSS@9393@2कस्तूरिका केतकपुष्पगन्धः केकारवः प्रावृषि हर्षमूलम् ॥ ९३९३॥

ENMSS@9394@1कादम्बिनी किमियमालि कदम्बमूले किं वा तमालतरुरेव किमन्धकारः ।

ENMSS@9394@2जानासि नैव सखि गोपकुलाङ्गनानां कौलव्रतव्रततिभङ्गकरः करीन्द्रः ॥ ९३९४॥

ENMSS@9394A@1का दीयतां तव रघूद्वह सम्यगाशीर् निष्कण्टकानि विहितानि जगन्ति येन ।

ENMSS@9394A@2आशास्महे ननु तथापि सह स्ववीरैर् भूकाश्यपोपमसुतद्वितया वधूः स्यात् ॥

ENMSS@9395@1का दुर्दशा कुपितनिर्दयचित्रगुप्त- वित्रासितस्य जगतो यदि देवि न स्याः ।

ENMSS@9395@2त्वं कर्मबन्धनविमोचनधर्मराज- लेखाधिकारपरिशोधनजातपत्री ॥ ९३९५॥

ENMSS@9396@1का द्यौः, किं बलसद्म, का वसुमती, स्यात् सर्वमेतद् यदि प्रत्यक्षं न

भवेत् कदाचिदपि किं ते सर्वसन्दर्शिनः ।

ENMSS@9396@2भ्राम्यन्तः प्रलपन्तु नाम विदितं मण्डूक सम्यक् त्वया मुक्त्वेमं परमं

कुकूपमितरत् किं नाम संभाव्यते ॥ ९३९६॥

ENMSS@9397@1कानने सरिदुद्देशे गिरीणामपि कन्दरे ।

ENMSS@9397@2पश्यन्त्यन्तकसंकाशं त्वामेकं रिपवः पुरः ॥ ९३९७॥

ENMSS@9398@1का नाम बुद्धिहीनस्य विधेरविदग्धता ।

ENMSS@9398A@2कूष्माण्डानां न यश्चक्रे तैलमूर्णां च दन्तिनाम्

ENMSS@9399@1कानि स्थानानि दग्धान्यतिशयगहनाः सन्ति के वा प्रदेशाः किं वा शेषं

वनस्य स्थितमिति पवनासङ्गविस्पष्टतेजाः ।

ENMSS@9399@2चण्डज्वालावलीढस्फुटिततरुलताग्रन्थिमुक्ताट्टहासो दावाग्निः शुष्कवृक्षे

शिखरिणि गहनेऽधिष्ठितः पश्यतीव ॥ ९३९९॥

ENMSS@9400@1कानीनस्तु पितामहः समभवत् पित्रादयो गोलकास् तत्पुत्राश्च

युधिष्ठिरप्रभृतयः कुण्डा ह्यमी पाण्डवाः ।

ENMSS@9400@2पञ्चानां द्रुपदात्मजा सहचरी युद्धे हता बान्धवा श्रीकृष्णेन

कुलं कलङ्कनिचितं नीतं जगद्वन्दितम् ॥ ९४००॥

ENMSS@9401@1कानीनस्य मुनेः स्वबान्धववधूवैधव्यविध्वंसिनो नप्तारः खलु

गोलकस्य तनयाः कुण्डाः स्वयं पाण्डवाः ।

ENMSS@9401@2तेऽमी पञ्च समानयोनिरतयस्तेषां गुणोत्कीर्तनाद् अक्षय्यं सुकृतं

भवेदविकलं, धर्मस्य सूक्ष्मा गतिः ॥ ९४०१॥

ENMSS@9401A@1कान्तं कन्दर्पपुष्पं स्तनतटशशिनं रागवृक्षप्रवालं

शय्यायुद्धाभिघातं सुरतरथरणश्रान्तधुर्यप्रतोमद् ।

ENMSS@9401A@2उन्मेषं विभ्रमाणां करजपदमयं गुह्यसम्भोगचिह्नं रागाक्रान्ता

वहन्तां जघननिपतितं कर्कशाः स्त्रीकिशोर्यः ॥

ENMSS@9402@1कान्तं खलगिरा काव्यं लभते भूयसीं रुचम् ।

ENMSS@9402@2स्पृष्टं च दंष्ट्रया हृद्यं यथा हेमविभूषणम् ॥ ९४०२॥

ENMSS@9403@1कान्तं निरीक्ष्य वलयाङ्कितकण्ठदेशं मुक्तास्तया परभिया परुषा

न वाचः ।

ENMSS@9403@2दूतीमुखे मृगदृशा स्खलदम्बुपूरा दूरात्परं निदधिरे नयनान्तपाताः

॥ ९४०३॥

ENMSS@9403A@1कान्तं रूपं यौवनं चारुलीलं दानं दाक्षिण्यं वाक् च सामोपपन्ना

।

ENMSS@9403A@2यं प्राप्यैते सद्गुणाः भान्ति सर्वे लोके कामिन्यः का न तस्य प्रसाद्याः ॥

ENMSS@9404@1कान्तं वक्ति कपोतिकाकुलतया नाथान्तकालोऽधुना व्याधोऽधो

धृतचापसज्जितशरः श्वेनः परिभ्रामति ।

ENMSS@9404@2इत्थं सत्यहिना स दष्ट इषुणा श्येनोऽपि तेनाहतस् तूर्णं तौ तु

यमालयं प्रति गतौ दैवी विचित्रा गतिः ॥ ९४०४॥

ENMSS@9405@1कान्तं विचिन्त्य सुलभेतरसंप्रयोगां  श्रुत्वा विदर्भपतिमानमितं बलैश्च ।

ENMSS@9405@2धाराभिरातप इवाभिहतं सरोजं  दुःखायते च हृदयं सुखमश्नुते च ॥ ९४०५॥

ENMSS@9406@1कान्तं विना नदीतीरं मदमालोक्य केकिनी ।

ENMSS@9406@2अत्र क्रियापदं गुप्तं यो जानाति स पण्डितः ॥ ९४०६॥

ENMSS@9407@1कान्तं वीक्ष्य विपक्षपक्ष्मलदृशः पादाम्बुजालक्तकैर्
आलिप्ताननमानतीकृतमुखी चित्रार्पितेवाभवत् ।

ENMSS@9407@2रूक्षं नोक्तवती न वा कृतवती निःश्वासकोष्णे दृशौ
प्रातर्मङ्गलमङ्गना करतलादादर्शमादर्शयत् ॥ ९४०७॥

ENMSS@9408@1कान्तः कटाक्षपातेन भ्रामयन्नयनद्वयम् ।

ENMSS@9408@2सुगन्धिमारुतो तात शृङ्गाररससेवितः ॥ ९४०८॥

ENMSS@9409@1कान्तः करं स्पृशति जल्पति चाटुवाचम्  आलोकते मुखमपाकुरुते दुकूलम् ।

ENMSS@9409@2इत्येव केवलमनङ्ग विलासभीता  स्वप्नेऽपि पश्यति नवोढसरोरुहाक्षी ॥ ९४०९॥

ENMSS@9410@1कान्तः कुचादेककरेण वेणीम्  एणीदृशः कर्षति कौतुकेन ।

ENMSS@9410@2अन्याङ्गनासङ्गमशुद्धिहेतोः  श्यामां भुजङ्गीमिव हेमकुम्भात् ॥ ९४१०॥

ENMSS@9411@1कान्तः कृतान्तचरितः कुटिला तदम्बा  वज्रोपमानि वचनानि च दुर्जनानाम् ।

ENMSS@9411@2प्रत्यङ्गमन्तरतनोः प्रहरन्ति बाणाः  प्राणाः पुनः सखि बहिर्न खलु प्रयान्ति ॥ ९४११॥

ENMSS@9412@1कान्तः पदेन हत इति  सरलामपराध्य किं प्रसादयथ ।

ENMSS@9412@2सोऽप्येवमेव सुलभः  पदप्रहारः प्रसादः किम् ॥ ९४१२॥

ENMSS@9413@1कान्तः पुत्रि हठाद् गतश्चरणयोर्न त्वं निपत्य स्थिता  बद्धो
मेखलयानया रतिरहः सख्या न वा फूत्कृतम् ।

ENMSS@9413@2का लज्जा मुषितासि किं प्रकटितैरेभिर्विलक्षस्मितैर् आः पापे विरहानलस्य न शिखा जानासि मर्मच्छिदः ॥ ९४१३॥

ENMSS@9414@1कान्तदूत्य इव कुङ्कुमताम्राः  सायमण्डलमभित्वरयन्त्यः ।

ENMSS@9414@2सादरं ददृशिरे वनिताभिः  सौधजालपतिता रविभासः ॥ ९४१४॥

ENMSS@9415@1कान्तप्रकर्षं दशनच्छदेन  सन्ध्याघने बद्धपदं हरन्त्याः ।

ENMSS@9415@2तस्या गृहोद्यानसरोगतस्य  हस्तस्य एवाम्बुरुहस्य रागः ॥ ९४१५॥
ENMSS@9416@1कान्तर्मूर्ध्नि दधती विधित्सया  तन्मणेः श्रवणपूरमुत्पलम् ।
ENMSS@9416@2रन्तुमर्चनमिवाचरत् पुरः  सा स्ववल्लभतनो मनोभुवः ॥ ९४१६॥
ENMSS@9417@1कान्तया कान्तसंयोगे किमकारि नवोढया ।
ENMSS@9417@2अत्रापि चोत्तरं वक्तुम् अवधिर्ब्रह्मणो वयः ॥ ९४१७॥
ENMSS@9418@1कान्तयानुगतः कोऽयं पीनस्कन्धो मदोद्धतः ।
ENMSS@9418@2मृगाणां पृष्ठतो याति शम्बरो रूढयौवनः ॥ ९४१८॥
ENMSS@9419@1कान्तया सपदि कोऽप्युपगूढः  प्रौढपाणिरपनेतुमियेष ।
ENMSS@9419@2संहतस्तनतिरस्कृतदृष्टिर् भ्रष्टमेव न दुकूलमपश्यत् ॥ ९४१९॥
ENMSS@9420@1कान्तवेश्म बहु संदिशतीभिर् यातमेव रतये रमणीभिः ।
ENMSS@9420@2मन्मथेन परिलुप्तमतीनां  प्रायशः स्खलितमप्युपकारि ॥ ९४२०॥
ENMSS@9421@1कान्तसंगमपराजितमन्यौ  वारुणीरसनशान्तविवादे ।
ENMSS@9421@2मानिनीजन उपाहितसंधौ  संदधे धनुषि नेषुमनङ्गः ॥ ९४२१॥
ENMSS@9422@1कान्तस्ते कमलाभिरामनयने कल्पे हि देशान्तरं  गन्तेति श्रुतमद्य लोकवचनात् तथ्यं किमेतद् वचः ।
ENMSS@9422@2पृष्टा सेति मया दयाधननिधे प्रोवाच दीनानना  यत् तद् वक्तुमपि क्षमा
न रसना मे जायते साम्प्रतम् ॥ ९४२२॥
ENMSS@9423@1कान्तां कामपि कामयत्यनुदिनं ध्यानापदेशादयं  येनामुं मुनयोऽप्यनादिनिधनं ध्यायन्ति धौतस्पृहाः ।
ENMSS@9423@2इत्यङ्कात् स्वकरे हृते गिरिजया पादे च पद्मासनाद्  विश्वं पातु पुरन्ध्रिनद्धवपुषः शम्भोः समाधिव्ययः ॥ ९४२३॥
ENMSS@9424@1कान्तां क्वापि विलम्बिनीं कलरुतैराहूय भूयस्ततो  दिग्भागानवलोक्य रङ्गवसुधामुत्सृज्य पद्भ्यां ततः ।
ENMSS@9424@2एष स्फारमृदङ्गनादमधुरैरम्भोमुचामारवैर्
बर्हश्रेणिकृतातपत्ररचनो हृष्टः शिखी नृत्यति ॥ ९४२४॥
ENMSS@9425@1कान्तां दृष्ट्वा चरणयुगलक्षालनाय प्रवृत्ताम्  अस्मिन् राष्ट्रे श्रियमिति वचः पापठीति प्रयत्नात् ।
ENMSS@9425@2देवस्य त्वेति च पुनरसौ वीटिकायाः प्रदाने  जामाता ते जडमतिरयं छान्दसः किं करोमि ॥ ९४२५॥
ENMSS@9426@1कान्तां हित्वा विरहविधुरारम्भखेदालसाङ्गीं  मामुल्लङ्घ्य व्रजतु

पथिकः कोऽपि यद्यस्ति शक्तिः ।

ENMSS@9426@2इत्याशोकी जगति सकले वल्लरी चोरिकेव प्राप्तारम्भे कुसुमसमये कामदेवेन

दत्ता ॥ ९४२६॥

ENMSS@9427@1कान्ताः किं न शशाङ्ककान्तिधवलाः सौधालयाः कस्यचित्

काञ्चीदामविराजितोरुजघना सेव्या न किं कामिनी ।

ENMSS@9427@2किं वा श्रोत्ररसायनं सुखकरं श्रव्यं न गीतादिकं विश्वं

किन्तु विलोक्य मारुतचलं सन्तस्तपः कुर्वते ॥ ९४२७॥

ENMSS@9427A@1कान्ताकटाक्षवपुषे नमः कुसुमधन्वने ।

ENMSS@9427A@2जायते येन सच्छायो विरसोऽपि भवद्रुमः ॥

ENMSS@9428@1कान्ताकटाक्षविशिखा न खनन्ति यस्य चित्तं न निर्दहति

कोपकृशानुतापः ।

ENMSS@9428@2कर्षन्ति भूरिविषयाश्च न लोभपाशा लोकत्रयं जयति कृत्स्नमिदं

स धीरः ॥ ९४२८॥

ENMSS@9429@1कान्ता कर्षणलोलकेरलवधूधम्मिल्लमल्लीरजश्-

चौराश्चोडनितम्बिनीस्तनतटे निष्पन्दतामागताः ।

ENMSS@9429@2रेवाशीकरधारिणोऽन्ध्रमुरलस्त्रीमानमुद्राभि दो वाता वान्ति

नवीनकोकिलवधूहूंकारवाचालिताः ॥ ९४२९॥

ENMSS@9430@1कान्ताकेलिं कलयतु तरुः कोऽपि कश्चित् प्रभूणाम् अत्यानन्दं जनयतु

फलैः कोऽपि लोकान् धिनोतु ।

ENMSS@9430@2धन्यं मन्ये मलयजमहो यः प्रभूतोपतापं संसारस्य

द्रुतमपनयत्यात्मदेहव्ययेन ॥ ९४३०॥

ENMSS@9431@1कान्ताकेलिमयोपि भूतकरुणाशान्तोऽप्यसौ संयमी

क्रीडारूढसमाधिभङ्गविकटभ्रूभङ्गभीमाननः ।

ENMSS@9431@2दृष्ट्वाकृष्टशरासनं यदकरोत् क्रुद्धः पिनाकी स्मरं त्वामप्यद्य

दृशा तदेव कुरुते क्रोधादयं कौशिकः ॥ ९४३१॥

ENMSS@9432@1कान्ता चन्द्रोदयो वीणापञ्चमध्वनिरित्यमी ।

ENMSS@9432@2ये नन्दयन्ति सुखितान् दुःखितान् व्यथयन्ति ते ॥ ९४३२॥

ENMSS@9433@1कान्ताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपयानिव मन्दमन्दम् ।

ENMSS@9433@2हर्म्येषु माल्यमदिरापरिभोगगन्धान् आविश्चकार रजनीपरिवृत्तिवायुः

॥ ९४३३॥

ENMSS@9434@1कान्ताजनेन रहसि प्रसभं गृहीत-  केशे रते स्मरसहासवतोषितेन ।

ENMSS@9434@2प्रेम्णा मनस्सु रजनीष्वपि हैमनीषु  के शेरते स्म रसहासवतोषितेन ॥ ९४३४॥

ENMSS@9435@1कान्ता ददाति मदनं  मदनः संतापमसममनुपशयम् ।

ENMSS@9435@2संतापो मरणमहो  तथापि शरणं नृणां सैव ॥ ९४३५॥

ENMSS@9435A@1कान्ताधरसुधास्वादाद्यूनं यज्जायते सुखम् ।

ENMSS@9435A@2बिन्दुः पार्श्वे तदध्यात्मशास्त्रास्वादसुखोदधेः ॥

ENMSS@9436@1कान्ताधरासवनिपानमुपास्य धीमान्  पीयूषपानकृतये न रुचिं प्रयाति ।

ENMSS@9436@2तत्रास्ति चेन्मधुरिमा बत कोऽपि सत्यं  किं नाम तात तृषिटाः क्षुधिताः पुनः स्युः ॥ ९४३६॥

ENMSS@9437@1कान्तानवाधररसामृततृष्णयेव  बिम्बं पपात शशिनो मधुभाजने यत् ।

ENMSS@9437@2निःशेषिते मधुनि लज्जितचित्तवृत्ति  तत् तन्मुखाब्जजितकान्तितया विनष्टम् ॥ ९४३७॥

ENMSS@9438@1कान्तानां कुवलयमप्यपास्तमक्ष्णोः  शोभाभिर्न मुखरुचाहमेकमेव ।

ENMSS@9438@2संहर्षादलिविरुतैरितीव गायंल्  लोलोर्मौ पयसि महोत्पलं ननर्त ॥ ९४३८॥

ENMSS@9439@1कान्तानां कृतपुलकः स्तनाङ्गरागे  वक्त्रेषु च्युततिलकेषु मौक्तिकाम्भः ।

ENMSS@9439@2संपेदे श्रमसलिलोद्गमो विभूषां  रम्याणां विकृतिरपि श्रियं तनोति ॥ ९४३९॥

ENMSS@9440@1कान्तानां वदनेन्दुकान्तिमधुना धत्ते सुधादीधितिः  खेलत्खञ्जनपङ्क्तयो मृगदृशां तन्वन्ति नेत्रश्रियम् ।

ENMSS@9440@2पद्मानि श्वसितस्य सौरभमभिद्रुह्यन्ति वामभ्रुवाम्  अभ्यस्यन्ति च राजहंसवनिताः पीनस्तनीनां गतिम् ॥ ९४४०॥

ENMSS@9441@1कान्तानुरागचतुरोऽसि मनोहरोऽसि  नाथोऽसि किं च नवयौवनभूषितोऽसि ।

ENMSS@9441@2इत्थं निगद्य सुदृशा वदने प्रियस्य  निश्वस्य बाष्पलुलिता निहिता दृगन्ताः ॥ ९४४१॥

ENMSS@9441A@1कान्तानेत्रार्धपाता वदनरुचिकराः सस्मिता भ्रूविलासाः साकारा वाक्यलेशाः
सहतलनिनदा दृष्टनष्टाश्च हासाः ।
ENMSS@9441A@2नाभीकक्षस्तनानां विवरणमसकृत्स्पर्शनं मेखलानां श्वासायासाश्च
दीर्घा मदनशरहतां कामिनीं सूचयन्ति ॥
ENMSS@9441B@1कान्तान्यर्धनिरीक्षितानि मधुरा हासोपदंशाः कथाः
पीनश्रोणिनिरुद्धशेषमतुलस्पर्शं तदर्धासनम् ।
ENMSS@9441B@2स्नेहव्यक्तिकरान् करव्यतिकरांस्तांस्तांश्च रम्यान् गुणान् वेश्याभ्यः
प्रणयादृतेऽपि लभते ज्ञातोपचारो जनः ॥
ENMSS@9441C@1कान्ताप्रीतिपरानुजो विनयवान् हृन्नन्दनो नन्दनो भाग्यं
स्वर्ललनोपभोग्यममला लक्ष्मीः सुखं निस्तुषम् ।
ENMSS@9441C@2पूजा राजकुले यशोऽतिविशदं गोष्ठी समं कोविदैर् दानेऽतिव्यसनं
रतिर्जिनमते स्यात् कस्यचित् पुण्यतः ॥
ENMSS@9442@1कान्तामुखं सुरतकेलिविमर्दखेद- संजातघर्मकणविच्छुरितं
रतान्ते ।
ENMSS@9442@2आपाण्डुरं तरलतारनिमीलिताक्षं संस्मृत्य हे हृदय किं शतधा
न यासि ॥ ९४४२॥
ENMSS@9443@1कान्तामुखद्युतिजुषामपि चोद्गतानां शोभां परां कुरवकद्रुममञ्जरीणाम्
।
ENMSS@9443@2दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य कन्दर्पबाणपतनव्यथितं
हि चेतः ॥ ९४४३॥
ENMSS@9444@1कान्तामुखास्वादपराङ्मुखा यत् पान्थाः शशाङ्कस्य करैर्विमृष्टाः ।
ENMSS@9444@2सुदुःसहं तापमिमे प्रयान्ति मन्ये ततौ नैव सुधेतरत्र ॥ ९४४४॥
ENMSS@9445@1कान्तायाः करजैः कपोलफलके पत्रावली कल्पिता केलिद्यूतपणीकृतो
विहरता पीतः स बिम्बाधरः ।
ENMSS@9445@2स्वेदार्द्रीकृतचन्दनस्तनतटी सानन्दमालिङ्गिता निर्विष्टा विषयाः
शिवात्ममहसि न्यस्तं मनः संप्रति ॥ ९४४५॥
ENMSS@9446@1कान्ताया विकसद्विलासहसितस्वच्छांशवश्चामरं
संसक्तावभिषेकहेमकलशौ यच्चन्दनाङ्कौ स्तनौ ।
ENMSS@9446@2यत्कार्तस्वरकान्ति चारु जघनं सिंहासनं भूभुजां साम्राज्यं तदिदं
जयाजयमयः शेषस्तु चिन्तामयः ॥ ९४४६॥
ENMSS@9447@1कान्तारं न यथेतरो ज्वलयितुं दक्षो दवाग्निं विना दावाग्निं न यथा

परः शमयितुं शक्तो विनाम्भोधरम् ।
ENMSS@9447@2निष्णातः पवनं विना निरसितुं नान्यो यथाम्भोधरं  कर्मौघं सुकृतं विना किमपरं हन्तुं समर्थं तथा ॥ ९४४७॥
ENMSS@9448@1कान्तारं परितो ज्वलत्यतिबले दावानले दैवतो  गोमायोर्गह्नां गुहां परिपतन् दर्पोद्धुरः केसरी ।
ENMSS@9448@2यद्व्यापादयति स्म तं न कृपया तेनैष तस्मिन् वने सिंहानामभयप्रदोऽहमधुनेत्युत्पुच्छमुद्धावति ॥ ९४४८॥
ENMSS@9449@1कान्तारः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा ।
ENMSS@9449@2विशालश्च तथा नन्दः षोढाः निःसारुको भवेत् ॥ ९४४९॥
ENMSS@9450@1कान्तारपादपानां  यथा फलं मानुषैरननुभोग्यम् ।
ENMSS@9450@2एवमनार्येष्वर्थाः  मनसाऽप्यार्यैरननुभोग्याः ॥ ९४५०॥
ENMSS@9451@1कान्तारभूमिरुहमौलिनिवासशीलाः  प्रायः पलायनपरा जनवीक्षणेन ।
ENMSS@9451@2कूजन्ति तेऽपि हि शुकाः खलु रामनाम  सङ्गः स्वभावपरिवर्तविधौ निदानम् ॥ ९४५१॥
ENMSS@9452@1कान्तारवनदुर्गेषु कृच्छ्रास्वापत्सु संभ्रमे ।
ENMSS@9452@2उद्यतेषु च शस्त्रेषु नास्ति सत्त्ववतां भयम् ॥ ९४५२॥
ENMSS@9453@1कान्ता रुचिं मुनिजनस्तरुणोऽवियोगी  कामश्च रत्नमणिरुञ्ज्वलकङ्कणेन ।
ENMSS@9453@2धत्ते पयोधरयुगे कुचभूषणेन  हारे हरे हिमकरे मकरे करे च ॥ ९४५३॥
ENMSS@9454@1कान्तारे घनतिमिरे भुजंगमेभ्यो  नो भीता न च गणिता महापगापि ।
ENMSS@9454@2किं बाले वहसि भयं मदङ्गसंगात्  विक्रीते करिणि किमङ्कुशे विवादः ॥ ९४५४॥
ENMSS@9455@1कान्तारे जलवृक्षवैरिणि मुहुस्त्वद्वैरिवामभ्रुवो  बालैराकुललोचनैः प्रतिपदं रुद्धक्रमाश्चङ्क्रमे ।
ENMSS@9455@2पृथ्वीचण्डरुचे पटच्चरदशासंघट्टदीप्तप्रभं सिञ्चन्त्यञ्जलिसञ्चिताश्रुभिरलं युष्मत्प्रतापानलम् ॥ ९४५५॥
ENMSS@9456@1कान्तारे दैवगत्या कथमपि गलितान्यन्तरालोक्य भक्ष्याण्युड्डीयोड्डीय भूयस्तरुशिखरशिखामेव तेभ्यः श्रयन्ते ।

ENMSS@9456@2इत्थं त्वद्वैरिनारी गिरिषु नरपते जम्बुलम्बीकदम्ब- भ्रान्त्या भर्तुर्बुभुक्षोः कथयति पुरतश्चेष्टितं षट्पदानाम् ॥ ९४५६॥

ENMSS@9457@1कान्तारेषु करावलम्बिशिशवः पादैः स्रवल्लोहितैर् अर्चन्त्यः पदवीं विलोचनजलैरावेदयन्त्यः शुचम् ।

ENMSS@9457@2दृष्टाः पान्थजनैर्विवृत्य सकृपं हाशब्दगर्भैर्मुखैर् यन्त्यह्ना सकलेन योजनतुरीयांशं तवारिस्त्रियः ॥ ९४५७॥

ENMSS@9458@1कान्तारेषु च काननेषु च सरित्तीरेषु च क्ष्माभृताम् उत्सङ्गेषु च पत्तनेषु च सरिद्भर्तुस्तटान्तेषु च ।

ENMSS@9458@2भ्रान्ताः केतकगर्भपल्लवरुचः श्रान्ता इव क्ष्मापते कान्ते नन्दनकन्दलीपरिसरे रोहन्ति ते कीर्तयः ॥ ९४५८॥

ENMSS@9459@1कान्तारेष्वपि विश्रामो नरस्याध्वनिकस्य वै ।

ENMSS@9459@2यः सदारः स विश्वास्यस्तस्माद् दाराः परा गतिः ॥ ९४५९॥

ENMSS@9460@1कान्तावियोगः स्वजनापमानं ऋणस्य शेषं कुनृपस्य सेवा ।

ENMSS@9460@2दारिद्र्यभावाद् विमुखं च मित्रं विनाग्निना पञ्च दहन्ति कायम् ॥ ९४६०॥

ENMSS@9461@1कान्ताश्लेषपराङ्मुखं यदि दहेद् दोषाकरः कंचन स्थाने तर्हि यतः स हन्त विधिना हन्तुं व्यधायीदृशान् ।

ENMSS@9461@2कष्टं यत्पुनरेष चन्दनभुवो लब्धप्रभावोऽभितः स्वर्णद्याद्यवगाहको मरुदयं दग्धं प्रचण्डोज्वलम् ॥ ९४६१॥

ENMSS@9462@1कान्तासुहृद्गुणकथाश्रवणोत्सुकस्य रम्या विनिद्रनयनस्य गता ममासौ ।

ENMSS@9462@2सर्वेन्द्रियार्थजनितानि हि सेव्यमाना दीर्घा स्ववृत्तिरिव हन्ति सुखानि निद्रा ॥ ९४६२॥

ENMSS@9463@1कान्तिं कुङ्कुमकेशरान्मधुरतां द्राक्षारसस्यासवाद् वैदर्भीपरिपाकपूतवचसः काव्यात् कवेर्मार्दवम् ।

ENMSS@9463@2पार्श्वादेव जरातुरेण विधिना तं तं गृहीत्वा गुणं सृष्टा हन्त हरन्ति कस्य न मनः कश्मीरवामभ्रुवः ॥ ९४६३॥

ENMSS@9464@1कान्तिं केतककोरकद्युतिसखीं राकामृगाङ्कस्य यच् चञ्चच्चञ्चु चुलुम्पति प्रतिदिनं प्रेम्णा चकोरार्भकः ।

ENMSS@9464@2तन् मन्ये नयनामृतं रतिपतेर्मृत्युञ्जयेनार्थिना तेनेदं रमणीकपोलफलके लावण्यमालोकितम् ॥ ९४६४॥

ENMSS@9465@1कान्तिकल्लोलवलितां नयनामृतवाहिनीम् ।

ENMSS@9465@2भजमानं स्वयं सुभ्रु कस्त्वां न बहु मन्यते ॥ ९४६५॥
ENMSS@9465A@1कान्तिप्रकर्षं दशनच्छदेन  सन्ध्याघने बद्धपदं हरन्त्याः ।
ENMSS@9465A@2तस्या गृहोद्यानसरोगतस्य  हस्तस्य एवाम्बुरुहस्य रागः ॥
ENMSS@9466@1कान्तिमयाददतिविमलाद्  अविरतविश्वोपकारगतकालात् ।
ENMSS@9466@2सुदशान् महतोतिमहान्  प्रसरति दीपान् प्रदीप इव ॥ ९४६६॥
ENMSS@9467@1कान्तिर्यस्य विनिद्रनीलनलिनच्छायासखी सुभ्रुवां  यत्पङ्केऽपि मुदोऽस्ति यस्य सुरभिः कासां रसोऽगोचरः ।
ENMSS@9467@2अङ्गारार्थितया जनेरतिजडैरुड्डामरैः पामरैः  पश्यैष प्रगुणैर्गुणैरपि गुरुर्दग्धः स कालागुरुः ॥ ९४६७॥
ENMSS@9468@1कान्तिर्यस्य शरन्निशाकरकलालावण्यसंवादिनी  तं विक्रेतुमिहासि यासि
किमहो हारं विहारं श्रियः ।
ENMSS@9468@2एतां पश्य पुरः पुलिन्दनगरीं भूपाः कुरङ्गीदृशां  यत्रैता गलकन्दले च कुचयोरङ्के च गुञ्जास्रजः ॥ ९४६८॥
ENMSS@9469@1कान्तिर्लोचनवर्तिरद्भुतमयी मूर्तिर्महत् सौरभं  निःष्यन्दोऽथ सुधाकरादपि सुधास्यन्दादपि ह्लादकः ।
ENMSS@9469@2सर्वोऽयं विरलो जगत्यपि गुणग्रामोऽभिरामो हहा पश्योत्तंसभुजंगसंगमजुषः श्रीखण्ड ते खण्डितः ॥ ९४६९॥
ENMSS@9469A@1कान्तिश्चन्द्रमसो मृगस्य नयने बाहू मृणालस्य ते  हंसानां गमनं सरोजवदने हेम्नो घटौ ते कुचौ ।
ENMSS@9469A@2एतत्ते परकीयवस्तु सकलं नमैकमात्रं तव  मानं मा कुरु मानिनि प्रियतमे रूपाभिमानं प्रति ॥
ENMSS@9470@1कान्तिश्रिया निर्जितपद्मरागं  मनोज्ञगन्धं द्वयमेव शस्तम् ।
ENMSS@9470@2नवप्रबुद्धं जलजं जलेषु  स्थलेषु तस्या वदनारविन्दम् ॥ ९४७०॥
ENMSS@9470A@1कान्तिस्ते कनकाचलप्रतिनिधिः कान्ताकुचस्पर्धि ते  सौभाग्यं क्षितिपालदर्शनविधौ त्वत्पूर्वकं दर्शनम् ।
ENMSS@9470A@2सौरभ्यं सकलातिशायि भवतो जम्बिर किं ब्रूमहे  कर्पूरप्रतिकूलता यदि न ते त्वय्येव सर्वे गुणाः ॥
ENMSS@9471@1कान्तिस्ते यदि निर्मला यदि गुणा लक्ष्मीर्यदि स्थायिनी  मा गाः पद्म मदं
तथापि गलिता ह्येते शरद्वासराः ।
ENMSS@9471@2संस्पर्शेन तुषारवारिपृषतामालूनमूर्तेः सरो-  मध्येऽत्रैव

वराटकेन भवतः स्थेयं पुनः केवलम् ॥ ९४७१॥

ENMSS@9472@1कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ  स्वस्ति स्वस्ति निमीलयामि

नयने यावन् न शून्या दिशः ।

ENMSS@9472@2आयाता वयम् आगमिष्यति सुहृद्वर्गस्य भाग्योदयैः  सन्देशो वद

कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥ ९४७२॥

ENMSS@9473@1कान्ते कथंचित् कथितप्रयाणे  क्षणं विनम्रा विरहार्दिताङ्गी ।

ENMSS@9473@2ततस्तमालोक्य कदागतोऽसीत्यालिङ्ग्य मुग्धा मुदमाससाद ॥ ९४७३॥

ENMSS@9474@1कान्ते कनकजम्बीरं करे किमपि कुर्वति ।

ENMSS@9474@2आगारलिखिते भानौ बिन्दुमिन्दुमुखी ददौ ॥ ९४७४॥

ENMSS@9475@1कान्ते कलितचोलान्ते दीपे वैरिणि दीप्यति ।

ENMSS@9475@2आसीदसितपद्माक्ष्याः पक्ष्मो नयनमुद्रणम् ॥ ९४७५॥

ENMSS@9476@1कान्ते काञ्चुलिकावलोकिनि कलावत्या नमन्त्या स्थितं  तस्मिन् कोमलकाकुभाषिणि

तया स्पन्दी निरुद्धोऽधरः ।

ENMSS@9476@2उत्थायाथ करस्पृशि प्रियतमे यूनोर्नवे संगमे  काञ्चीकूजितकैतवेन

मदनो द्यौःशान्तिमभ्यस्यति ॥ ९४७६॥

ENMSS@9476A@1कान्ते कथय कथं वा  गच्छसि पानीयशालिकामेका ।

ENMSS@9476A@2अङ्गमनङ्गं नितराम्  अङ्कुरयति पङ्कजाक्षि वयोऽपि तव ॥

ENMSS@9477@1कान्ते किं कुपितासि, कः परजने प्राणेश कोपो भवेत्  कोऽयं सुभ्रु पर,

स्त्वमेव, दयिते दासोऽस्मि किं ते परः ।

ENMSS@9477@2इत्युक्त्वा प्रणतः प्रियः क्षितितलादुत्थाप्य सानन्दया  नेत्राम्भःकणिकाङ्किते

स्तनतटे तन्व्या समारोपितः ॥ ९४७७॥

ENMSS@9478@1कान्ते कुटिलमालोक्य कर्णकण्डूयनेन किम् ।

ENMSS@9478@2कामं कथय कल्याणि किङ्करः करवाणि यत् ॥ ९४७८॥

ENMSS@9479@1कान्ते गृहाण त्वमिमां स्वमालाम्  अकारणं किं कलहं करोषि ।

ENMSS@9479@2यत्पूर्वपादं मनुषेऽत्र शुद्धं  तत् तथ्यमेवास्ति न चेदिदं स्यात्

॥ ९४७९॥

ENMSS@9480@1कान्ते घोरकृतान्तवक्रकुहरात् त्वं पुण्यपुञ्जेन मे  मुक्ता कृन्त

तदर्जनश्रमभरं प्रत्यङ्गमालिङ्ग्य माम् ।

ENMSS@9480@2इत्याकर्ण्य निमीलितार्धनयनं स्मेरं शनैरानतं  सोल्लासं वदनाम्बुजं

मृगदृशः स्वैरं चुचुम्ब प्रियः ॥ ९४८०॥

ENMSS@9481@1कान्ते जग्मुषि ताम्रचूडरटितं श्रुत्वा प्रबुद्धा जवात्  किंचिद् वासवदिङ्मुखं प्रविकसद् दृष्ट्वा गवाक्षाध्वना ।

ENMSS@9481@2संत्रासेन समीरिता प्रियतमप्रेम्णावरुद्धा शनैर् उत्थानोपनिवेशनानि कुरुते तल्पे मुहुः पांसुला ॥ ९४८१॥

ENMSS@9482@1कान्ते तथा कथमपि प्रथितं मृगाक्ष्या  चातुर्यमुद्धतमनोभवया रतेषु ।

ENMSS@9482@2तत्कूजितान्यनुवदद्भिरनेकवारं  शिष्यायितं गृहकपोतशतैर्यथा स्यात् ॥ ९४८२॥

ENMSS@9483@1कान्ते तल्पमुपागते विगलिता नीवी स्वयं तत्क्षणात्  तद्वासः श्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् ।

ENMSS@9483@2एतावत् सखि वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः  कोऽसौ कास्मि रतं
तु किं कथमिति स्वल्पापि मे न स्मृतिः ॥ ९४८३॥

ENMSS@9484@1कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युन्नमत्-  पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।

ENMSS@9484@2दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वानपि प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितम् ॥ ९४८४॥

ENMSS@9484A@1कान्ते त्वत्कुचचूचुकौ तदुपरि स्मेरा च हारावली  तद्वक्रं तरुणाङ्गि बिम्बितमनुच्छायालताश्यामताम् ।

ENMSS@9484A@2त्वं सर्वाङ्गमनोरमे त्रिजगतां बध्नासि दृष्ट्या मनो जम्बूवञ्जलबिन्दुवञ्जलजवञ्जम्बालवञ्जालवत् ॥

ENMSS@9485@1कान्ते त्वन्नेत्रकान्तं पुरु कमलवनं त्वन्मुखस्योपमेयश्  चन्द्रः प्रत्यक्षसिद्धः पिककुलमपि च त्वत्स्वरस्यानुकारि ।

ENMSS@9485@2रम्भाकाण्डस्त्वदूरुच्छविरपि सुलभः कम्बवश्च त्वदीयाः  कण्ठाकारा शिखण्डास्तव कचसदृशास्तत् कथं तेऽसमत्वम् ॥ ९४८५॥

ENMSS@9486@1कान्ते धावय मे पादाविति भर्त्रा निवेदिता ।

ENMSS@9486@2न तया धावितौ पादौ भर्तुराज्ञा न लङ्घिता ॥ ९४८६॥

ENMSS@9487@1कान्तेन प्रहितो नवः प्रियसखीवर्गेण बद्धस्पृहश्  चित्तेनोपहृतः स्मराय न समुत्स्रष्टुं गतः पाणिना ।

ENMSS@9487@2आमृष्टो मुहुरीक्षितो मुहुरभिघ्रातो मुहुर्लोठितः  प्रत्यङ्गं च मुहुः

कृतो मृगदृशा किं किं न चूताङ्कुरः ॥ ९४८७॥

ENMSS@9488@1कान्ते नितान्तं दयिताकुचान्त- चोलाञ्चलं कर्षति हर्षमुग्धे ।

ENMSS@9488@2बभार बाला नमितास्यहास्य- लेशापदेशादपरं निचोलम् ॥ ९४८८॥

ENMSS@9489@1कान्ते नितान्तमेतैर् वचनै रुषितेव लक्ष्यते भवती ।

ENMSS@9489@2क इवोष्यते न वचनैर् उक्तैरागांस्यपह्नोतुम् ॥ ९४८९॥

ENMSS@9489A@1कान्ते कृतागसि पुरः परिवर्तमाने सख्यं सरोजशशिनोः सहसा बभूव ।

ENMSS@9489A@2रोषाक्षरं सुदृशि वक्तुमपारयन्त्याम् इन्दीवरद्वयमवाप तुषारधाराम्

॥

ENMSS@9489B@1कान्ते पश्यति सानुरागमबला साचीकरोत्याननं तस्मिन् कामकलाकलापकुशले

व्यावृत्तवक्त्रे किल ।

ENMSS@9489B@2पश्यन्ती मुहुरन्तरङ्गमदना दोलायमानेक्षणा लज्जामन्मथमध्यगापि

नितरां तस्याभवत् प्रीतये ॥

ENMSS@9490@1कान्ते यामि, क्व, देशान्तर, मपि शयना, न्नेति, किं सद्मनोऽपि

क्वैतावन्मात्र, माः किं कथयसि नगरा, न्न प्रिये निर्वृतोऽपि ।

ENMSS@9490@2इत्याकर्ण्योक्तवस्तुक्रमघनघनहृद्वेदना वेद नाहं काहं कुत्रास्मि

कोऽयं बत हतसमयोऽप्यस्मि वा नास्मि वेति ॥ ९४९०॥

ENMSS@9491@1कान्ते विचित्रसुरतक्रमबद्धरागे सङ्केतकेऽपि मृगशाबदृशा रसेन ।

ENMSS@9491@2तत्कूजितं किमपि येन तदीयतल्पं नाल्पैः परीतमनुकूजितलावकौघैः

॥ ९४९१॥

ENMSS@9492@1कान्ते विलासिनि कलावति पद्मनेत्रे नित्यं त्वयि प्रियतमे रमते मनो मे ।

ENMSS@9492@2इत्थं भवन्तमुरुभावनया वदन्तं श्रीकृष्ण मां बुधजना अपि हा

हसन्ति ॥ ९४९२॥

ENMSS@9493@1कान्ते सागसि कञ्चुकस्पृशि तया साचीकृतग्रीवया मुक्ताः

कोपकषायमन्मथशरत्क्रूराः कटाक्षाङ्कुराः ।

ENMSS@9493@2साकूतं दरहासकेसरवचोमाध्वीकधारालसा प्रीतिः कल्पलतेव काचन

महादानीकृता सुभ्रुवा ॥ ९४९३॥

ENMSS@9493A@1कान्ते सागसि काचिदन्तिकगते निर्भर्त्स्य रोषारुणैर्

भ्रूभङ्गीकुटिलैरपाङ्गवलनैरालोकमान् आ मुहुः ।

ENMSS@9493A@2बध्वा मेखलया सपत्नरमणीपादाब्जलाक्षाङ्कितं लीलानीलसरोरुहेण

निटिलं हन्ति स्म रोषाकुला ॥

ENMSS@9494@1कान्ते सागसि यापिते प्रियसखीवेषं विधायागते भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्संगमाकाङ्क्षया ।

ENMSS@9494@2मुग्धे दुष्करमेतदित्यतितरामुक्त्वा सहासं बलाद् आलिङ्ग्य च्छलितास्मि तेन कितवेनाद्य प्रदोषागमे ॥ ९४९४॥

ENMSS@9495@1कान्ते स्नेहनिधौ समीयुषि मधौ जित्वा श्रियं शैशिरीं विश्लेषादिव तस्य पाण्डिमभृतामालीलतानामियम् ।

ENMSS@9495@2कर्तुं नूतनचित्रपत्ररचनां किं काननश्रीरिमां प्राचीनां
पवनाञ्चलेन परितः पत्रावलीं लुम्पति ॥ ९४९५॥

ENMSS@9496@1कान्ते हन्त सुकोमला बत मता प्राग् व्यर्थमेव भ्रमात् किंतु त्वं भुवि
निष्ठुरा निरुपमा पश्यस्यपीमं न माम् ।

ENMSS@9496@2तस्माद् वक्षसि ते पयोधरमिषाद् धात्रा निखायार्पितौ शैलेन्द्राविति सांप्रतं न हि चिरं सौख्यं परक्लेशितुः ॥ ९४९६॥

ENMSS@9497@1कान्तो नर्मणि नैपुणेन विदितस्त्वं शैशवद्वेषिणी
क्रीडाशैलशिरोमणिर्गृहमिदं रम्यो वसन्तोत्सवः ।

ENMSS@9497@2सख्यः कामकथोपचारचतुराः संभोगकालेऽधुना मानो वा कलहोऽथवा यदि कदा तच्चेतसो निर्वृतिः ॥ ९४९७॥

ENMSS@9498@1कान्तो यास्यति दूरदेशमिति मे चिन्ता परं जायते लोकानन्दकरो हि
चन्द्रवदने वैरायते चन्द्रमाः ।

ENMSS@9498@2किं चायं वितनोति कोकिलकलालापो विलापोदयं प्राणानेव हरन्ति हन्त
नितरामाराममन्दानिलाः ॥ ९४९८॥

ENMSS@9499@1कान्तोऽसि नित्यमधुरोऽसि रसाकुलोऽसि किं चासि
पञ्चशरकार्मुकमद्वितीयम् ।

ENMSS@9499@2इक्षो तवास्ति सकलं परमेकमूनं यत् सेवितो भजसि नीरसतां क्रमेण
॥ ९४९९॥

ENMSS@9500@1कान्त्या काञ्चनकान्तया परिमलैर्भाग्यैकभोग्यैस्तथा सौन्दर्येण च साधुनैव कुसुमं हा हन्त न त्वत्समम् ।

ENMSS@9500@2अक्रोधं शृणु किन्तु दूषणमिव त्वय्यस्ति किञ्चित् पुनस्
तत्त्वज्ञैर्यदचुम्बितं त्वमसि रे चाम्पेय पुष्पन्धयैः ॥ ९५००॥

ENMSS@9501@1कान्त्या दरिद्रत्वमुपैति चन्द्रः  किमस्ति तत्त्वं विकचोत्पलेषु ।
ENMSS@9501@2न वेद्मि विश्वास्य कथं मृगाक्ष्या  सौन्दर्यसृष्टिर्मुषिता विधातुः
॥ ९५०१॥
ENMSS@9502@1कान्त्या विलुप्तानि विलोचनानाम्  आपाटलानामतिरोदनेन ।
ENMSS@9502@2सकुङ्कुमानीव पुनर्भवन्ति  यस्यारिनारीकुचमण्डलानि ॥ ९५०२॥
ENMSS@9503@1कान्त्या सुवर्णवरया परया च शुद्ध्या  नित्यं स्विकाः खलु शिखाः परितः क्षिपन्तीम् ।
ENMSS@9503@2चेतोहरामपि कृशेशयलोचने त्वां  जानामि कोपकलुषो दहनो ददाह
॥ ९५०३॥
ENMSS@9504@1कान्यकुब्जा द्विजाः सर्वे मागधं माधुरं विना ।
ENMSS@9504@2गौडद्राविडविख्याताः कान्यकुब्जाः महोद्भवाः ॥ ९५०४॥
ENMSS@9505@1का पाण्डुपत्नी गृहभूषणं किं  को रामशत्रुः किमगस्त्यजन्म ।
ENMSS@9505@2कः सूर्यपुत्रो विपरीतपृच्छा  कुन्तीसुतो रावणकुम्भकर्णाः ॥ ९५०५॥
ENMSS@9506@1कापि कान्तमिदमाह महेला  साधु साधय तथा युधि कार्यम् ।
ENMSS@9506@2वर्तते तव यथा च जयश्रीर् लोकनाथललना च सपत्नी ॥ ९५०६॥
ENMSS@9507@1कापि कुड्यलिखितावधिरेखाः  प्रोषितप्रियतमा गणयन्ती ।
ENMSS@9507@2वेश्मनि प्रबलवह्निपरीते  सास्रया बहिरनीयत सख्या ॥ ९५०७॥
ENMSS@9508@1कापि मुख्यपदवीमधिरोप्य  स्वां सखीं स्वकरधारितदीपा ।
ENMSS@9508@2प्राणनाथरतिगेहमयासीद्  अद्भुतो रतिपतेरुपदेशः ॥ ९५०८॥
ENMSS@9509@1कापिशायनसुगन्धि विघूर्णन्  उन्मदोऽधिशयितुं समशेत ।
ENMSS@9509@2फुल्लदृष्टिवदनं प्रमदानाम्  अब्जचारु चषकं च शडङ्घ्रिः
॥ ९५०९॥
ENMSS@9510@1कापि शीघ्रमवधीरितमाना  मानिनो विचलिता प्रियधाम्नि ।
ENMSS@9510@2आगतेन मरुतापि पुरस्ताल्  लाघवस्य परिहारममंस्त ॥ ९५१०॥
ENMSS@9511@1कापुरुषः कुक्कुरश्च भोजनैकपरायणः ।
ENMSS@9511@2लालितः पार्श्वमायाति वारितो नैव गच्छति ॥ ९५११॥
ENMSS@9512@1काप्यङ्गी रङ्गपत्र्यारुणयति रमणी भूषणैर्भाति काचिद्  गायत्यन्या परापि प्रलसति लहरीलक्ष्म वासो वसाना ।
ENMSS@9512@2यत्रान्या स्नेहपूरान् वितरति च मुदं याति दोलाभिरन्या  सा शृङ्गारद्वितीया
रचयति न मनः कस्य शृङ्गारमग्नम् ॥ ९५१२॥

ENMSS@9513@1काप्यन्या मुकुलाधिकारमिलिता लक्ष्मीरशोकद्रुमे माकन्दः समयोचितेन विधिना धत्तेऽभिजातं वपुः ।

ENMSS@9513@2किं चाषाढगिरेरनङ्गविजयप्रस्तावनापण्डित ः स्वैरं सर्पति बालचन्दनलतालीलासखो मारुतः ॥ ९५१३॥

ENMSS@9514@1काप्यभिख्या तयोरासीद् व्रजतो शुद्धवेषयोः ।

ENMSS@9514@2हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ ९५१४॥

ENMSS@9515@1काप्यागतं वीक्ष्य मनोधिनाथं समुत्थिता सादरमासनाय ।

ENMSS@9515@2करेण शिञ्जद्वलयेन तल्पम् आस्फालयन्ती कलमाजुहाव ॥ ९५१५॥

ENMSS@9516@1का प्रस्तुताभिषेकाद् आर्यं प्रच्यावयेद् गुणज्येष्ठम् ।

ENMSS@9516@2मन्ये ममैव पुण्यैः सेवावसरः कृतो विधिना ॥ ९५१६॥

ENMSS@9517@1का प्रियेण रहिता वराङ्गना धाम्नि केन तनयेन नन्दिता ।

ENMSS@9517@2कीदृशेन पुरुषेण पक्षिणां बन्धनं समभिलष्यते सदा ॥ ९५१७॥

ENMSS@9518@1का प्रीतिः सह मार्जारैः का प्रीतिरवनीपतौ ।

ENMSS@9518@2गणिकाभिश्च का प्रीतिः का प्रीतिर्भिक्षुकैः सह ॥ ९५१८॥

ENMSS@9519@1काभिर्न तत्राभिनवस्मराज्ञा विश्वासनिक्षेपवणिक् क्रियेऽहम् ।

ENMSS@9519@2जिह्रेति यन्नैव कुतोऽपि तिर्यक् कश्चित् तिरश्चस्त्रपते न तेन ॥ ९५१९॥

ENMSS@9520@1का भूषा बलिनां, क्षमा, परिभवः, कोपः स्वकुल्यैः कृतः किं दुःखं, परसंश्रयो, जगति कः श्लाघ्यो, य आश्रीयते ।

ENMSS@9520@2को मृत्यु, र्व्यसनं, शुचं जहति के, यैर्निर्जिता शत्रवः कैर्विज्ञातमिदं विराटनगरच्छन्नस्थितैः पाण्डवैः ॥ ९५२०॥

ENMSS@9521@1कामं करीषाग्निमधो निधाया- भ्रमेण तापातिशयं भजध्वम् ।

ENMSS@9521@2युष्माकमद्यावधि नाधिकारो दुग्धातिमुग्धाधरमाधुरीषु ॥ ९५२१॥

ENMSS@9522@1कामं कर्णकटुः कृतोऽतिमधुरः केकारवः केकिनां मेघाश्चामृतधारिणोऽपि विहिताः प्रायो विषस्यन्दिनः ।

ENMSS@9522@2उन्मीलन्नवकन्दलावलिरसौ शय्यापि सर्पायते तत् किं यद् विपरीतमत्र न कृतं तस्या वियोगेन मे ॥ ९५२२॥

ENMSS@9523@1कामं कामदुघं धुक्ष्व मित्राय वरुणाय च ।

ENMSS@9523@2वयं धीरेण दानेन सर्वान् कामानशीमहि ॥ ९५२३॥

ENMSS@9524@1कामं कामयते न केलिनलिनीं नामोदते कौमुदी- निस्यन्दैर्न समीहते मृगदृशामालापलीलामपि ।

ENMSS@9524@2सीदन्नेष निशासु दुःसहतनुर्भोगाभिलाषालसैर् अङ्गैस्ताम्यति चेतसि व्रजवधूमाधाय मुग्धो हरिः ॥ ९५२४॥

ENMSS@9525@1कामं कामयमानस्य यदा कामः समृद्ध्यते ।

ENMSS@9525@2अथैनमपरः कामस्तृष्णा विध्यति बाणवत् ॥ ९५२५॥

ENMSS@9526@1कामं कामसमस्त्वमत्र जगति ख्यातोऽसि यत् सर्वदा रूपेणैव महीपते

तव धनुःपाण्डित्यमन्यादृशम् ।

ENMSS@9526@2त्वं यस्मिन् विशिखं विमुञ्चसि तमेवोद्दिश्य मुक्तत्रपं

त्रुट्यत्कंचुकमुद्गतस्पृहमहो धावन्ति देवाङ्गनाः ॥ ९५२६॥

ENMSS@9527@1कामं कुमीनसदृशं राज्यमपि प्राज्यकण्टकं कुशलः ।

ENMSS@9527@2पाकान्वितमतिसुरसं भुङ्क्ते बहुधावधानेन ॥ ९५२७॥

ENMSS@9528@1कामं कूले नदीनामनुगिरि महिषीयूथनीडोपकण्ठे गाहन्ते

शष्पराजीरभिनवशलभग्रासलोला बलाकाः ।

ENMSS@9528@2अन्तर्विन्यस्तवीरुत्तृणमयपुरुषत्रासविघ्नं कथंचित् कापोतं

कोद्रवाणां कवलयति कणान् क्षेत्रकोणैकदेशे ॥ ९५२८॥

ENMSS@9529@1कामं कोपकषायिताक्षियुगलं कृत्वा करोत्फालनैः क्षुद्रान् वन्यमृगात्

करीन्द्र सहसा विद्रावय त्वं मुदा ।

ENMSS@9529@2हेलाखण्डितकुम्भिकुम्भविगलद्रक्तारुणाङ्गे हरौ जाते लोचनगोचरे यदि

भवान् स्थाता तदा मन्महे ॥ ९५२९॥

ENMSS@9530@1कामं क्रोधं च लोभं च दम्भं दर्पं च भूमिपः ।

ENMSS@9530@2सम्यग्विजेतुं यो वेद स महीमभिजायते ॥ ९५३०॥

ENMSS@9530A@1कामं क्रोधं भयं लोभं दम्भं मोहं मदं तथा ।

ENMSS@9530A@2निद्रां मत्सरमालस्यं नास्तिक्यं च परित्यज ॥

ENMSS@9531@1कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं पश्य हि कोऽहम्

ENMSS@9531@2आत्मज्ञानविहीना मूढास् ते पच्यन्ते नरके मूढाः ॥ ९५३१॥

ENMSS@9532@1कामं गुणैर्महानेष प्रकृत्या पुनरासुरः ।

ENMSS@9532@2उत्कर्षात् सर्वतो वृत्तेः सर्वाकारं हि दृप्यति ॥ ९५३२॥

ENMSS@9533@1कामं जनाः स्मयन्ते कैलासविलासवर्णनावसरे ।

ENMSS@9533@2साधनकथनावसरे साचीकुर्वन्ति वक्त्राणि ॥ ९५३३॥

ENMSS@9534@1कामं तु क्षपयेद् देहं पुष्पमूलफलैः शुभैः ।

ENMSS@9534@2न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु ॥ ९५३४॥

ENMSS@9535@1कामं दहन्तु मरुतो मलयाचलस्य  चन्द्रोऽपि पातयतु वा नितरां स्फुलिङ्गान् ।
ENMSS@9535@2दूरे प्रियो विमलवंशमणिः पतिर्मे  तत्साम्प्रतं त्वरितमानय तं कथंचित् ॥ ९५३५॥
ENMSS@9536@1कामं दीर्घा भवेद् यात्रा कामं पन्था महान् भवेत् ।
ENMSS@9536@2सोऽपि प्रभोः कृपामेव नित्यमाश्रयतेऽन्ततः ॥ ९५३६॥
ENMSS@9537@1कामं दुग्धे विप्रकर्षत्यलक्ष्मीं  कीर्तिं सूते दुष्कृतं या हिनस्ति ।
ENMSS@9537@2तां चाप्येतां मातरं मङ्गलानां  धेनुं धीराः सूनृतां वाचमाहुः
॥ ९५३७॥
ENMSS@9538@1कामं दुर्विषहज्वरं जनयति व्याघूर्णयत्पक्षिणी
गात्राण्यूरुनितम्बगण्डहृदयान्युच्छूनयत्युल्बणम् ।
ENMSS@9538@2तां तां दुर्विकृतं करोति सुहृदो गाढं व्यथन्ते यया
व्याधियौवनमात्मनाशनियतः के ते ग्रहण्यादयः ॥ ९५३८॥
ENMSS@9539@1कामं दृष्टा मया सर्वा विवस्त्रा रावणस्त्रियः ।
ENMSS@9539@2न तु मे मनसः किंचिद् वैकृत्यमुपपद्यते ॥ ९५३९॥
ENMSS@9540@1मनो हि हेतुः सर्वेषाम् इन्द्रियाणां प्रवर्तने ।
ENMSS@9540@2शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ९५४०॥
ENMSS@9541@1कामं न पश्यति दिदृक्षत एव भूम्ना  नोक्तापि जल्पति विवक्षति चादरेण ।
ENMSS@9541@2लज्जास्मरव्यतिकरेण मनोऽधिनाथे  बाला रसान्तरमिदं ललितं बिभर्ति
॥ ९५४१॥
ENMSS@9542@1कामं निष्करुणं वेत्सि वेत्सि तं बहुवल्लभम् ।
ENMSS@9542@2दूति चूताङ्कुरखरा दिशो वेत्सि न वेत्सि किम् ॥ ९५४२॥
ENMSS@9543@1कामं नृपाः सन्तु सहस्रशोऽन्ये  राजन्वतीमाहुरनेन भूमिम् ।
ENMSS@9543@2नक्षत्रताराग्रहसंकुलापि  ज्योतिष्मती चान्द्रमसैव रात्रिः ॥ ९५४३॥
ENMSS@9543A@1कामं परमिति ज्ञात्वा देवोऽपि हि पुरन्दरः ।
ENMSS@9543A@2गौतमस्य मुनेः पत्नीम् अहल्यां चकमे पुरा ॥
ENMSS@9544@1कामं प्रत्यादिष्टां  स्मरामि न परिग्रहं मुनेस्तनयान् ।
ENMSS@9544@2बलवत् तु दूयमानं  प्रत्याययतीव मे हृदयम् ॥ ९५४४॥
ENMSS@9545@1कामं प्रदीपयति रूपमभिव्यनक्ति  सौभाग्यमावहति वक्रसुगन्धितां च ।

ENMSS@9545@2ऊर्जं करोति कफजाश्च निहन्ति रोगांस् ताम्बूलमेवमपरांश्च गुणान् करोति ॥ ९५४५॥

ENMSS@9546@1युक्तेन चूर्णेन करोति रागं  रागक्षयं पूगफलातिरिक्तम् ।

ENMSS@9546@2चूर्णाधिकं वक्त्रविगन्धकारि  पत्राधिकं साधु करोति गन्धम् ॥ ९५४६॥

ENMSS@9547@1पत्राधिकम् निशि हितं सफलं दिवा च  प्रोक्तान्यथाकरणमस्य विडम्बनैव ।

ENMSS@9547@2कक्कोलपूगलवलीफलपारिजातैर् आमोदितं मदमुदा मुदितं करोति ॥ ९५४७॥

ENMSS@9548@1कामं प्रदोषतिमिरेण न दृश्यसे त्वं  सौदामिनीव जलदोदरसंधिलीना ।

ENMSS@9548@2त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं  गन्धश्च भीरु मुखराणि च नूपुराणि ॥ ९५४८॥

ENMSS@9549@1कामं प्रियानपि प्राणान् विमुञ्चन्ति मनस्विनः ।

ENMSS@9549@2इच्छन्ति न त्वमित्रेभ्यो महतीमपि सत्क्रियाम् ॥ ९५४९॥

ENMSS@9550@1कामं प्रिया न सुलभा  मनस्तु तद्भावदर्शनाश्वासि ।

ENMSS@9550@2अकृतार्थेऽपि मनसिजे  रतिमुभयप्रार्थना कुरुते ॥ ९५५०॥

ENMSS@9551@1कामं भवन्तु मधुलम्पटषट्पदौघ-
संघट्टधुन्धुमघनध्वनयोऽब्जखण्डाः ।

ENMSS@9551@2गायत्यतिश्रुतिसुखं विधिरेव यत्र  भृङ्गः स कोऽपि धरणीधरनाभिपद्मः ॥ ९५५१॥

ENMSS@9552@1कामं भवन्तु सरितो भुवि सुप्रतिष्ठाः  स्वादूनि सन्तु सलिलानि च शुक्तयश्च ।

ENMSS@9552@2एतां विहाय वरवर्णिनि ताम्रपर्णीं  नान्यत्र सम्भवति मौक्तिककामधेनुः ॥ ९५५२॥

ENMSS@9553@1कामं मा कामयध्वं वृषमपि च भृशं माद्रियध्वं न वित्ते
चित्तं दत्त श्रयध्वं परममृतफला या कला तामिहैकाम् ।

ENMSS@9553@2इत्थं देवः स्मरारिर्वृषमधरचरीकृत्य मूर्त्यैव दित्सन्  निःस्वो विश्वोपदेशानमृतकरकलाशेखरस्त्रायतां वः ॥ ९५५३॥

ENMSS@9554@1कामं लिखतु संस्थानं कश्चिद् रूपं च भास्वतः ।

ENMSS@9554@2अभित्तिविहतालम्बम् आलोकं विलिखेत् कथम् ॥ ९५५४॥

ENMSS@9555@1कामं वनेषु हरिणास् तृणेन जीवन्त्ययत्नसुलभेन ।

ENMSS@9555@2विदधति धनिषु न दैन्यं  ते किल पशवो वयं सुधियः ॥ ९५५५॥
ENMSS@9556@1कामं वपुः पुलकितं नयने धृतास्रे  वाचः सगद्गदपदाः सखि कम्पि वक्षः ।
ENMSS@9556@2ज्ञातं मुकुन्दमुरलीरवमाधुरी ते  चेतः सुधांशुवदने तरलीकरोति ॥ ९५५६॥
ENMSS@9557@1कामं वाचः कतिचिदफलाः सन्तु लोके कवीनां  सन्त्येवान्या मधुरिपुकथासंस्तवात् कामदोग्ध्र्यः ।
ENMSS@9557@2वित्तं कामं भवतु विफलं दत्तमश्रोत्रियेभ्यः  पात्रे दत्तैर्भवति हि धनैर्धन्यता भूरिदातुः ॥ ९५५७॥
ENMSS@9558@1कामं विषं च विषयाश्च निरीक्ष्यमाणाः  श्रेयो विषं न विषयाः परिसेव्यमानाः ।
ENMSS@9558@2एकत्र जन्मनि विषं विनिहन्ति पीतं  जन्मान्तरेषु विषयाः परितापयन्ति ॥ ९५५८॥
ENMSS@9559@1कामं शिवेन शमितं पुनरुज्जगार  दृष्टिस्तवेति किमियं जननि स्तुतिस्ते ।
ENMSS@9559@2लीलाप्रसूतपुरुषार्थचतुष्टयायास् तस्याः परं तु स भवत्यवयुक्त्यवादः ॥ ९५५९॥
ENMSS@9560@1कामं शीर्णपलाशपत्ररचितां कन्थां वसानो वने कुर्यामम्बुभिरप्ययाचितसुखैः प्राणानुबन्धस्थितिम् ।
ENMSS@9560@2साङ्गग्लानि सवेपितं सचकितं सान्तर्निदाघज्वरं  वक्तुं न त्वहमुत्सहे सकृपणं देहीति दीनं वचः ॥ ९५६०॥
ENMSS@9561@1कामं शुनको नृपति-  प्रसादतः स्याद् गजेन्द्रमौलिस्थः ।
ENMSS@9561@2भवतेव तेन सह रे  नार्दयितुं शक्यते जातु ॥ ९५६१॥
ENMSS@9562@1कामं श्यामतनुस्तथा मलिनयत्यावासवस्त्रादिकं  लोकं रोदयते भनक्ति जनतागोष्ठीं क्षणेनापि यः ।
ENMSS@9562@2मार्गेऽप्यङ्गुलिलग्न एव भवतः स्वाभाविनः श्रेयसे  हा स्वाहाप्रिय धूममङ्गजमिमं सूत्वा न किं लज्जितः ॥ ९५६२॥
ENMSS@9563@1कामं सन्तु सहस्रशः कतिपये सारस्यधौरेयकाः  कामं वा कमनीयतापरिमलस्वाराज्यबद्धव्रताः ।
ENMSS@9563@2नैवैवं विवदामहे न च वयं देव प्रियं ब्रूमहे  यत्सत्यं

रमणीयतापरिणतिस्त्वय्येव पारं गता ॥ ९५६३॥

ENMSS@9564@1कामं सर्वोऽप्यलंकारो रसमर्थे निषिञ्चति ।

ENMSS@9564@2तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥ ९५६४॥

ENMSS@9564A@1कामं सुधाकरकरामृतदिव्यरूप- सौधाग्रपीठवसतिः सुखमस्तु काकः ।

ENMSS@9564A@2श्रीसुन्दरीरमणसङ्गमकण्ठलग्न- पूर्यत्सुधामणितजित् किमसौ कपोतः ॥

ENMSS@9565@1कामं स्त्रियो निषेवेत पानं वा साधु मात्रया ।

ENMSS@9565@2न द्यूतमृगये विद्वान् अत्यन्तव्यसने हि ते ॥ ९५६५॥

ENMSS@9566@1कामं हरिर्भव विमूढ भवाथ चन्द्रश् चन्द्रार्धमौलिरथ वा हर

एव भूयाः ।

ENMSS@9566@2विद्याप्रणाशपरिवर्धितघोरदीप्तेः क्रोधानलस्य मम नेन्धनतां प्रयासि

॥ ९५६६॥

ENMSS@9567@1कामः कमनीयतया किमपि निकामं करोति संमोहम् ।

ENMSS@9567@2विषमिव विषमं सहसा मधुरतया जीवनं हरति ॥ ९५६७॥

ENMSS@9568@1कामः कामं कमलवदनानेत्रपर्यन्तवासी दासीभूतत्रिभुवनजनः प्रीतये

जायतां वः ।

ENMSS@9568@2दग्धस्यापि त्रिपुररिपुणा सर्वलोकस्पृहार्हा यस्याधिक्यं

रुचिरतितरामञ्जनस्येव याता ॥ ९५६८॥

ENMSS@9569@1कामः कुप्यति चन्द्रमा अपि बलान्मां दग्धुमभ्युद्यतो वाता वापि समागता

यमदिशः प्राणान् निहर्न्तु तथा ।

ENMSS@9569@2रक्ताक्षास्त्वरयन्ति तान् परभृताः स्वैः कूजनैर्दूति तत् प्रेयांसं

तमुपानयाश्वितरथा त्राणं न मे कुत्रचित् ॥ ९५६९॥

ENMSS@9569A@1कामः क्रोधश्च लोभश्च देहे तिष्ठन्ति तस्कराः ।

ENMSS@9569A@2ज्ञातरत्नमपाहारि तस्माज्जाग्रत जाग्रत ॥

ENMSS@9570@1कामः क्रोधश्च लोभश्च मानो हर्षो मदस्तथा ।

ENMSS@9570@2एते हि षड् विजेतव्या नित्यं स्वं देहमाश्रिताः ॥ ९५७०॥

ENMSS@9571@1कामः क्रोधश्च लोभश्च मदो मानस्तथैव च ।

ENMSS@9571@2हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृताम् ॥ ९५७१॥

ENMSS@9571A@1कामः क्रोधश्च लोभश्च मोहो हर्षो मदस्तथा ।

ENMSS@9571A@2षड्वर्गमुत्सृजेदेनं यस्मिंस्त्यक्ते सुखी नृपः ॥

ENMSS@9571B@1कामः क्रोधस्तथा मोहस्त्रयोऽप्येते महाद्विषः ।
ENMSS@9571B@2एते न निर्जिता यावत् तावत् सौख्यं कुतो नृणाम् ॥
ENMSS@9572@1कामः क्रोधस्तथा लोभो देहे तिष्ठन्ति तस्कराः ।
ENMSS@9572@2ते मुष्णन्ति जगत् सर्वं तस्माज्जाग्रत जाग्रत ॥ ९५७२॥
ENMSS@9572A-B@1कामः क्रोधस्तथा लोभो रागो द्वेषश्च मत्सरः ।
ENMSS@9572A-B@2मदो माया तथा मोहः कन्दर्पो दर्प एव च ॥
ENMSS@9572A-B-3 एते हि रिपवो घोरा धर्मसर्वस्वहारिणः ।
ENMSS@9572A-B-4 एतैर्बम्भ्रम्यते जीवः संसारे बहुदुःखदे ॥
ENMSS@9573@1कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ।
ENMSS@9573@2षड्वर्गमुत्सृजेदेनं तस्मिंस्त्यक्ते सुखी नृपः ॥ ९५७३॥
ENMSS@9574@1कामः क्रोधो मदो मानो लोभो हर्षस्तथैव च ।
ENMSS@9574@2एते वर्ज्याः प्रयत्नेन सादरं पृथिवीक्षिता ॥ ९५७४॥
ENMSS@9575@1एतेषां विजयं कृत्वा कार्यो भृत्यजयस्ततः ।
ENMSS@9575@2कृत्वा भृत्यजयं राजा पौराञ्जनपदाञ्जयेत् ॥ ९५७५॥
ENMSS@9576@1कामः सर्वात्मना हेयः स चेद्धातुं न शक्यते ।
ENMSS@9576@2स्वभार्यां प्रति कर्तव्यः सैव तस्य हि भेषजम् ॥ ९५७६॥
ENMSS@9577@1॥। ॥। ॥। ॥। ।
ENMSS@9577@2काम एवार्थधर्माभ्यां गरीयानिति मे मतिः ॥ ९५७७॥
ENMSS@9578@1काम एष महाशत्रुस्तमेकं निर्जयेद् दृढम् ।
ENMSS@9578@2जितकामा महात्मानस्तैर्जितं निखिलं जगत् ॥ ९५७८॥
ENMSS@9579@1कामकारो महाप्राज्ञ गुरूणां सर्वदानघ ।
ENMSS@9579@2उपपन्नेषु दारेषु पुत्रेषु च विधीयते ॥ ९५७९॥
ENMSS@9580@1कामकार्मुकतया कथयन्ति  भ्रूलतां मम पुनर्मतमन्यत् ।
ENMSS@9580@2लोचनाम्बुरुहयोरुपरिस्थं  भृङ्गशावकततिद्वयमेतत् ॥ ९५८०॥
ENMSS@9581@1कामक्रोधं तथा लोभं स्वादु शृङ्गारकौतुके ।
ENMSS@9581@2अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत् ॥ ९५८१॥
ENMSS@9582@1कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
ENMSS@9582@2कृत्वा धृतिमयीं नावं जन्मदुर्गाणि संतर ॥ ९५८२॥
ENMSS@9582A@1कामक्रोधभयादन्यैर्लोभ्यमानो न लुभ्यति ।
ENMSS@9582A@2यया शक्त्या युतः कार्ये मन्त्रशक्तिस्तु सा स्मृता ॥
ENMSS@9583@1कामक्रोधमदोन्मत्ताः स्त्रीणां ये वशवर्तिनः ।

ENMSS@9583@2न ते जलेन शुध्यन्ति स्नानतीर्थशतैरपि ॥ ९५८३॥
ENMSS@9584@1कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
ENMSS@9584@2अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ ९५८४॥
ENMSS@9585@1कामक्रोधस्तथा मोहो लोभो मानो मदस्तथा ।
ENMSS@9585@2षड्वर्गमुत्सृजेदेनम् अस्मिंस्त्यक्ते सुखी नृपः ॥ ९५८५॥
ENMSS@9586@1कामक्रोधादयः सर्वे मतिरक्षाण्यहंकृतिः ।
ENMSS@9586@2गुणा विविधकर्माणि विलीयन्ते मनःक्षयात् ॥ ९५८६॥
ENMSS@9586A@1कामक्रोधादिभिस्तापैस्ताप्यमानो दिवानिशम् ।
ENMSS@9586A@2आत्मा शरीरान्तस्थोसौ पच्यते पुटपाकवत् ॥
ENMSS@9587@1कामक्रोधानृतद्रोहलोभमोहमदादयः ।
ENMSS@9587@2नमन्ति यत्र राजेन्द्र तमेव ब्राह्मणं विदुः ॥ ९५८७॥
ENMSS@9588@1कामक्रोधावनादृत्य धर्ममेवानुपालयेत् ।
ENMSS@9588@2धर्मः श्रेयस्करतमो राज्ञां भरतसत्तम ॥ ९५८८॥
ENMSS@9588A@1कामक्रोधावनिर्जित्य किमरण्ये करिष्यति ।
ENMSS@9588A@2अथवा निर्जितावेतौ किमरण्ये करिष्यति ॥
ENMSS@9589@1कामक्रोधौ तु संयम्य योऽर्थान् धर्मेण पश्यति ।
ENMSS@9589@2प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥ ९५८९॥
ENMSS@9590@1कामक्रोधौ द्वयमपि पदं प्रत्यनीकं वशित्वे  हत्वानङ्गं किमिव हि रुषा साधितं त्र्यम्बकेण ।
ENMSS@9590@2यस्तु क्षान्त्या शमयति शतं मन्मथाद्यानरातीन्  कल्याणं वो दिशतु स
मुनिग्रामणीरर्कबन्धुः ॥ ९५९०॥
ENMSS@9591@1कामक्रोधौ पुरस्कृत्य योऽर्थं राजानुतिष्ठति ।
ENMSS@9591@2न स धर्मं न चाप्यर्थं परिगृह्णाति बालिशः ॥ ९५९१॥
ENMSS@9592@1कामक्रोधौ मद्यतमौ नियोक्तव्यौ यथोचितम् ।
ENMSS@9592@2कामः प्रजापालने च क्रोधः शत्रुनिबर्हणे ॥ ९५९२॥
ENMSS@9593@1कामक्रोधौ विनिर्जित्य किमरण्यैः करिष्यति ।
ENMSS@9593@2अन्नेन धार्यते देहः कुलं शीलेन धार्यते ॥ ९५९३॥
ENMSS@9594@1कामक्रोधौ हि पुरुषम् अर्थेभ्यो व्यपकर्षतः ।
ENMSS@9594@2तौ तु शत्रू विनिर्जित्य राजा विजयते महीम् ॥ ९५९४॥
ENMSS@9595@1कामघ्राद् विषमदृशो  भूत्यवलिप्ताद् भुजङ्गसङ्गरुचेः ।

ENMSS@9595@2को भृङ्गीव न शुष्यति  वाञ्छ न फलमीश्वरादगुणात् ॥ ९५९५॥
ENMSS@9596@1कामजं मृगया द्यूतं स्त्रियः पानं तथैव च ।
ENMSS@9596@2व्यसनं व्यसनार्थज्ञैश्चतुर्विधमुदाहृतम् ॥ ९५९६॥
ENMSS@9597@1काम जानामि ते मूलं संकल्पात् किल जायसे ।
ENMSS@9597@2न त्वां संकल्पयिष्यामि समूलो न भविष्यसि ॥ ९५९७॥
ENMSS@9598@1कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
ENMSS@9598@2वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥ ९५९८॥
ENMSS@9598A@1कामतन्त्रेषु निपुणः क्रुद्धानुनयकोविदः ।
ENMSS@9598A@2स्फुरितेऽनादरे किंचिद् दयिताया विरज्यति ॥
ENMSS@9599@1कामतो रूपधारित्वं शस्त्रास्त्राश्माम्बुवर्षणम् ।
ENMSS@9599@2तमोऽनिलोऽचलो मेधा इति माया ह्यमानुषी ॥ ९५९९॥
ENMSS@9600@1जघान कीचकं भीम आश्रितः स्त्रीसरूपताम् ।
ENMSS@9600@2चिरं प्रच्छन्नरूपोऽभूद् दिव्यया मायया नलः ॥ ९६००॥
ENMSS@9601@1कामदर्पादिशीलानाम् अविचारितकारिणाम् ।
ENMSS@9601@2आयुषा सह नश्यन्ति सम्पदो मूढचेतसाम् ॥ ९६०१॥
ENMSS@9602@1कामधेनुगुणा विद्या ह्यकाले फलदायिनी ।
ENMSS@9602@2प्रवासे मातृसदृशी विद्या गुप्तं धनं स्मृतम् ॥ ९६०२॥
ENMSS@9602A@1कामधेनुधरादीनां दातारः सुलभा भुवि ।
ENMSS@9602A@2दुर्लभः पुरुषो लोके सर्वभूतदयापरः ॥
ENMSS@9603@1कामनाम्ना किरातेन वितता मूढचेतसाम् ।
ENMSS@9603@2नार्यो नरविहंगानाम् अङ्गबन्धनवागुराः ॥ ९६०३॥
ENMSS@9604@1कामपि धत्ते सूकररूपी  कामपि रहितामिच्छति भूपः ।
ENMSS@9604@2केनाकारि च मन्मथजननं  केन विराजति तरुणीवदनम् ॥ ९६०४॥
ENMSS@9605@1कामपि श्रियमासाद्य यस्तद्वृद्धौ न चेष्टते ।
ENMSS@9605@2तस्यायतिषु न श्रेयो बीजभोजिकुटुम्बवत् ॥ ९६०५॥
ENMSS@9606@1कामप्रसक्तमात्मानं स्मृत्वा पाण्डुं निपातितम् ।
ENMSS@9606@2निवर्तयेत् तथा क्रोधाद् अनुहादं हतात्मजम् ॥ ९६०६॥
ENMSS@9607@1कामबन्धनमेवैकं नान्यदस्तीह बन्धनम् ।
ENMSS@9607@2कामबन्धनमुक्तो हि ब्रह्मभूयाय कल्पते ॥ ९६०७॥
ENMSS@9608@1कामबाणप्रहारेण मूर्च्छितानि पदे पदे ।
ENMSS@9608@2जीवन्ति युवचेतांसि युवतीनां स्मितामृतैः ॥ ९६०८॥

ENMSS@9609@1काममस्तु जगत् सर्वं कालस्यास्य वशंवदम् ।
ENMSS@9609@2कालकालप्रपन्नानां कालः किं नः करिष्यति ॥ ९६०९॥
ENMSS@9610@1काममा मरणात् तिष्ठेद् गृहे कन्यर्तुमत्यपि ।
ENMSS@9610@2न चैवैनां प्रयच्छेत गुणहीनाय कर्हिचित् ॥ ९६१०॥
ENMSS@9611@1काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
ENMSS@9611@2मोहाद् गृहीत्वासद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः ॥ ९६११॥
ENMSS@9612@1कामयन्ते विरज्यन्ते रञ्जयन्ति त्यजन्ति च ।
ENMSS@9612@2कर्षयन्त्योऽपि सर्वार्थाञ् ज्ञायन्ते नैव योषितः ॥ ९६१२॥
ENMSS@9613@1कामयेत न हि क्षुद्रम् अर्थं जातु महामनाः ।
ENMSS@9613@2वर्धयेत स्वमौदार्यं प्रभावं च यशो भुवि ॥ ९६१३॥
ENMSS@9614@1कामवर्षी च पर्जन्यो नित्यं सस्यवती मही ।
ENMSS@9614@2गावश्च घटदोहिन्यः पादपाश्च सदाफलाः ॥ ९६१४॥
ENMSS@9615@1कामवृत्तस्त्वयं लोकः कृत्स्नः समुपवर्तते ।
ENMSS@9615@2यद्वृत्ताः सन्ति राजानस्तद्वृत्ताः सन्ति हि प्रजाः ॥ ९६१५॥
ENMSS@9616@1कामव्याघ्रे कुमतिफणिनि स्वान्तदुर्वारनीडे
मायासिंहीविहरणमहीलोभभल्लूकभीमे ।
ENMSS@9616@2जन्मारण्ये न भवति रतिः सज्जनानां कदाचित्  तत्त्वज्ञानां
विषयतुषिताकण्टकाकीर्णपार्श्वे ॥ ९६१६॥
ENMSS@9617@1कामव्याधशराहतिर्न गणिता संजीवनी त्वं स्मृता  नो दग्धो विरहानलेन
झटिति त्वत्संगमाशाभृतैः ।
ENMSS@9617@2नीतोऽयं दिवसो विचित्रलिखितैः सम्कल्परूपैर्मया   किं वान्यद्
हृदये
स्थितासि ननु मे तत्र स्वयं साक्षिणी ॥ ९६१७॥
ENMSS@9618@1कामसङ्गरविधौ मृगीदृशः  प्रौढपेषणधरे पयोधरे ।
ENMSS@9618@2स्वेदराजिरुदियाय सर्वतः  पुष्पवृष्टिरिव पुष्पधन्वनः ॥ ९६१८॥
ENMSS@9618A@1कायस्तपस्विषु जयत्यधिकारकामो  विश्वस्य चित्तविभुरिन्द्रियवाज्यधीशः
।
ENMSS@9618A@2भूतानि बिभ्रति महान्त्यपि यस्य शिष्टिं
व्यावृत्तमौलिमणिरश्मिभिरुत्तमाङ्गैः ॥
ENMSS@9619@1कामस्तु तस्य नैवास्ति प्रत्यक्षेणोपलक्ष्यते ।
ENMSS@9619@2दम्पत्योः सहधर्मेण त्रयीधर्ममवाप्नुयात् ॥ ९६१९॥
ENMSS@9620@1कामस्तु बाणावसरं प्रतीक्ष्य  पतङ्गवद् वह्निमुखं विविक्षुः ।

ENMSS@9620@2उमासमक्षं हरबद्धलक्ष्यः  शरासनज्यां मुहुराममर्श ॥ ९६२०॥
ENMSS@9621@1कामस्य कश्चिच्चतुरः शरांश्चेद्  विलङ्घयामास कथंचिदन्यान् ।
ENMSS@9621@2उन्मज्जता कोकिलकण्ठयन्त्रात्  न पञ्चमास्त्रेण वशीवभूव ॥ ९६२१॥
ENMSS@9622@1कामस्य जेतुकामस्य मिलनाय महीपतेः ।
ENMSS@9622@2दिवो मीनं त्विषामीशो द्वारीकर्तुमिवाययौ ॥ ९६२२॥
ENMSS@9623@1कामस्य वेषशोभा  पेशलता चारुता गुणोत्कर्षः ।
ENMSS@9623@2नानाविधाश्च लीलाश्  चित्तज्ञानं च कान्तानाम् ॥ ९६२३॥
ENMSS@9624@1कामस्यापि निदानमाहुरपरे मायां महाशासनां  निश्चित्कां
सकलप्रपञ्चरचनाचातुर्यलीलावतीम् ।
ENMSS@9624@2यत्सङ्गाद् भगवानपि प्रभवति प्रत्यङ्गहामोहहा  श्रीरङ्गो
भुवनोदयावनलयव्यापारचक्रेऽक्रियः ॥ ९६२४॥
ENMSS@9625@1कामस्वभावो यो यस्य न स शक्यः प्रमार्जितुम् ।
ENMSS@9625@2न हि दुष्टात्मनामार्य मा वसत्यालये चिरम् ॥ ९६२५॥
ENMSS@9626@1कामाग्निः परिवर्धितो विरहिणीश्वासानिलैर्निर्भरं  तूर्णं तेन कृशानुना
कृशतनुर्मुग्धा न दग्धा कथम् ।
ENMSS@9626@2बाला लोलविलोचनाम्बुजगलत्सद्वारिधाराभरैः  सिक्ता सम्प्रति तेन
जीवसि
हरे तां त्वं समुल्लासय ॥ ९६२६॥
ENMSS@9627@1कामतुरो नाधिगच्छेन् महापुरुषकामिनीम् ।
ENMSS@9627@2सहस्रयोनिदेहोऽभूद् इन्द्रोऽहल्यापरिग्रहात् ॥ ९६२७॥
ENMSS@9628@1कामात् क्रोधाद् भयादन्यैर्लोभ्यमानो न लुम्पति ।
ENMSS@9628@2यया शक्त्या युतः कार्ये मन्त्रशक्तिस्तु सा स्मृता ॥ ९६२८॥
ENMSS@9629@1कामात् क्लाम्यसि का रीतिर्नारीति नरकाभिधा ।
ENMSS@9629@2मलमज्जामयी मांसस्थगी किं न विगीयते ॥ ९६२९॥
ENMSS@9630@1कामात्मता न प्रशस्ता न चैवास्त्यकामता ।
ENMSS@9630@2काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ॥ ९६३०॥
ENMSS@9631@1कामादित्रिकमेव मूलमखिलक्लेशस्य मायोद्भवं  मर्त्यानामिति
देवमौलिविलसद्भ्राजिष्णुचूडामणिः ।
ENMSS@9631@2श्रीकृष्णो भगवानवोचदखिलप्राणिप्रियो मत्प्रभुर् यस्मात् तत्
त्रिकमुद्यतेन मनसा हेयं पुमर्थार्थिना ॥ ९६३१॥
ENMSS@9632@1कामाधिकरणग्राह्यकुलादिबलशालिनः ।

ENMSS@9632@2अहीनेऽपि नरेन्द्रस्य शक्तयः सिद्धिहेतवः ॥ ९६३२॥
ENMSS@9633@1कामानामपि दातारं कर्तारं मानसान्त्वयोः ।
ENMSS@9633@2रक्षितारं न मृष्यन्ति भर्तारं परमं स्त्रियः ॥ ९६३३॥
ENMSS@9634@1कामानुशासनशते सुतरामधीती सोऽयं रहो नखपदैर्महतु स्तनौ ते ।
ENMSS@9634@2रुष्टाद्रिजाचरणकुङ्कुमपङ्कराग संकीर्णशङ्करशशाङ्ककलाङ्क कारैः ॥ ९६३४॥
ENMSS@9365@1कामानुसारी पुरुषः कामाननु विनश्यति ।
ENMSS@9365@2कामान् व्युदस्य धुनुते यत्किञ्चित् पुरुषो रजः ॥ ९३६५॥
ENMSS@9636@1कामान् व्युदस्य धुनुते यत्किंचित् पुरुषो रजः ।
ENMSS@9636@2कामक्रोधोद्भवं दुःखम् अह्रीररतिरेव च ॥ ९६३६॥
ENMSS@9637@1कामाभिभूतः क्रोधाद्वा यो मिथ्या प्रतिपद्यते ।
ENMSS@9637@2स्वेषु चान्येषु वा तस्य न सहाया भवन्त्युत ॥ ९६३७॥
ENMSS@9638@1कामा मनुष्यं प्रसजन्त एव धर्मस्य ये विघ्नमूलं नरेन्द्र ।
ENMSS@9638@2पूर्वं नरस्तान् धृतिमान् विनिघ्नन् लोके प्रशंसां लभतेऽनवद्याम् ॥ ९६३८॥
ENMSS@9639@1कामाय स्पृहयत्यात्मा संयतोऽपि मनीषिणः ।
ENMSS@9639@2वीथीनियमितोऽप्युक्षा शष्पमासाद्य धावति ॥ ९६३९॥
ENMSS@9640@1कामार्तां स्वयमायातां यो न भुङ्क्ते नितम्बिनीम् ।
ENMSS@9640@2सोऽवश्यं नरकं याति तन्निःश्वासहतो नरः ॥ ९६४०॥
ENMSS@9641@1कामार्तां स्वस्त्रियं दीनां प्रार्थयन्तीं पुनः पुनः ।
ENMSS@9641@2न भजेद् भजमानां यः स वै चाण्डालदर्शनः ॥ ९६४१॥
ENMSS@9641A@1कामार्ता घर्मतप्ता वेत्यनिश्चयकरं वचः ।
ENMSS@9641A@2युवानमाकुलीकर्तुम् इति दूत्याह नर्मणा ॥
ENMSS@9641B@1कामार्थमज्ञः कृपणं करोति प्राप्नोति दुःखं वधबन्धनादि ।
ENMSS@9641B@2कामार्थमाशाकृपणस्तपस्वी मृत्युं श्रमं चाच्छति जीवलोकः ॥
ENMSS@9642@1कामार्थौ लिप्समानस्तु धर्ममेवादितश्चरेत् ।
ENMSS@9642@2न हि धर्मादपैत्यर्थः कामो वापि कदाचन ॥ ९६४२॥
ENMSS@9642A@1कामाल्लोभाद् भयात् क्रोधात् साक्षिवादात्तथैव च ।
ENMSS@9642A@2मिथ्या वदति यत्पापं तदसत्यं प्रकीर्तितम् ॥
ENMSS@9642B@1कामावेशः कैतवस्योपदेशः मायाकोशो वञ्चनासन्निवेशः ।

ENMSS@9642B@2निर्द्रव्याणामप्रसिद्धप्रवेशो रम्यक्लेशः सुप्रवेशोऽस्तु वेशः ॥
ENMSS@9643@1कामिजनपरमभोग्ये कामसुखे धारयन्ति बीभत्सम् ।
ENMSS@9643@2सन्तः शमसुखरसिकाः सुधाशनाः सूकरान्न इव ॥ ९६४३॥
ENMSS@9644@1कामिनः कृतरतोत्सवकाल- क्षेपमाकुलवधूकरसङ्गि ।
ENMSS@9644@2मेखलागुणविलग्नमसूयां दीर्घसूत्रमकरोत् परिधानम् ॥ ९६४४॥
ENMSS@9645@1कामिनश्चरितैरेभिः कुर्वन्तो निशि जागरम् ।
ENMSS@9645@2कुर्वन्त्यप्रियमात्मानं केचिन्मूढाः प्रिया अपि ॥ ९६४५॥
ENMSS@9645A@1कामिनां कामिनीनां च सङ्गात् कामी भवेत् पुमान् ।
ENMSS@9645A@2देहान्तरे ततः क्रोधी लोभी मोही च जायते ॥
ENMSS@9646@1कामिनामसकलानि विभुग्नैः स्वेदवारिमृदुभिः करजाग्रैः ।
ENMSS@9646@2अक्रियन्त कठिनेषु कथंचित् कामिनीकुचतटेषु पदानि ॥ ९६४६॥
ENMSS@9647@1कामिनीं प्रथमयौवनान्वितां मन्दवल्गुमृदुपीडितस्वनाम् ।
ENMSS@9647@2उत्स्तनीं समवलम्ब्य या रतिः सा न धातृभवनेऽस्ति मे मतिः ॥ ९६४७॥
ENMSS@9648@1कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
ENMSS@9648@2मा संचर मनःपान्थ तत्रास्ते स्मरतस्करः ॥ ९६४८॥
ENMSS@9648A@1कामिनीजनविलोचनपाता- नुन्मिषत्कलुषान् प्रतिगृह्णन् ।
ENMSS@9648A@2मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥
ENMSS@9649@1कामिनीनयनकज्जलपङ्काद् उत्थितो मदनमत्तवराहः ।
ENMSS@9649@2कामिमानसवनान्तरचारी मूलमुत्खनति मानलतायाः ॥ ९६४९॥
ENMSS@9650@1कामिनीवदननिर्जितकान्तिः शोभितुं न हि शशाक शशाङ्कः ।
ENMSS@9650@2लज्जयेव विमलं वपुरासुं शीधुपूर्णचषकेषु ममज्ज ॥ ९६५०॥
ENMSS@9651@1कामिनीवर्गसंसर्गैर्न कः संक्रान्तपातकः ।
ENMSS@9651@2नाश्नाति स्नाति हा मोहात् कामक्षामव्रतं जगत् ॥ ९६५१॥
ENMSS@9652@1कामिनीसहचरस्य कामिनस् तस्य वेश्मसु मृदङ्गनादिषु ।
ENMSS@9652@2ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः ॥ ९६५२॥
ENMSS@9653@1कामिनो हन्त हेमन्तनिशि शीतज्वरातुराः ।
ENMSS@9653@2जीवन्ति हरिणाक्षीणां वक्षोजाश्लेषरक्षिताः ॥ ९६५३॥
ENMSS@9654@1कामिन्याः कुचदुर्गपर्वतभुवि त्वं मा मनःपान्थक संचारं कुरु रोमराजिगहने तत्रास्ति नाभ्यां गुहा ।
ENMSS@9654@2तल्लीनो मधुसूदनम्य तनयस्तेनात्र चौरेण भो निर्वस्त्रीक्रियते दिवापि

हि नरो रात्रौ तु किं कथ्यते ॥ ९६५४॥

ENMSS@9655@1कामिन्याः कुचयोः कान्तिः पीनत्वेन पुरस्कृता ।

ENMSS@9655@2सुवर्णाचलशृङ्गाभां विनिर्जेतुं समुद्यता ॥ ९६५५॥

ENMSS@9656@1कामिन्याः स्तनभारमन्थरगतेर्लीलाचलच्चक्षुषः

कन्दर्पैकविलासनित्यवसतेः कीदृक् पुमान् वल्लभः ।

ENMSS@9656@2हेलाकृष्टकृपाणपारितगजानीकात् कुतस्तेऽरयः

श्वासायासविशुष्ककण्ठकुहरा निर्यान्ति जीवार्थिनः ॥ ९६५६॥

ENMSS@9657@1कामिन्यो नीचगामिन्यस्तटिन्य इव निश्चितम् ।

ENMSS@9657@2दारा राज्ञोऽपि यत्ताराः प्रणयं यान्ति गोपतेः ॥ ९६५७॥

ENMSS@9658@1कामी कामव्रणपरिगतः कामिनीरेव हित्वा भुङ्क्ते पश्चादपगतभयं कामिनीनां सहस्रम् ।

ENMSS@9658@2इत्थंकारं विषयसुखभोगैकतानैर्नरैरप्यस्मिन् देहे कतिपयदिनान्येष भोगो विवर्ज्यः ॥ ९६५८॥

ENMSS@9659@1कामुकाः स्युः कथा नीचाः सर्वः कस्मिन् प्रमोदते ।

ENMSS@9659@2अर्थिनः प्राप्य पुण्याहं करिष्यध्वे वसूनि किम् ॥ ९६५९॥

ENMSS@9660@1कामुके नूतनासङ्गगाढालिङ्गनकातरे ।

ENMSS@9660@2गणिका गेहगणनां करोति ध्यानमास्थिता ॥ ९६६०॥

ENMSS@9661@1कामुके भ्रमरः प्रोक्तः कामिन्यां चूतमञ्जरी ।

ENMSS@9661@2तथाह्वानाङ्कुराश्चापि प्राकारो वारणे स्मृतः ॥ ९६६१॥

ENMSS@9662@1कामुञ्जहार हरिरम्बुधिमध्यलग्नां कीदृक् श्रुतं भवति निर्मलमागमानाम् ।

ENMSS@9662@2आमन्त्रयस्व वनमग्निशिखावलीढं यच्चापि को दहति के मदयन्ति भृङ्गान् ॥ ९६६२॥

ENMSS@9663@1कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम् ।

ENMSS@9663@2नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम् ॥ ९६६३॥

ENMSS@9664@1का मे गतिरिति पृच्छति चरमश्वासेऽपि यः स्वार्थम् ।

ENMSS@9664@2तस्य जनस्यापि कृते पापाः पापानि कुर्वन्ति ॥ ९६६४॥

ENMSS@9665@1का मेघादुपयाति, कृष्णदयिता का वा, सभा कीदृशी, कां रक्षत्यहिहा,

शरद् विकचयेत् कं, धैर्यहन्त्री च का ।

ENMSS@9665@2कं धत्ते गणनायकः करतले, का चञ्चला कथ्यताम्, आरोहादवरोहतश्च

निपुणैरेकं द्वयोरुत्तरम् ॥ ९६६५॥

ENMSS@9666@1कामेन कामं प्रहिता जवेन  प्रावृट् चचाल त्रिजगद् विजेतुम् ।

ENMSS@9666@2किं चन्द्रबिम्बं दधि भक्षयन्ती  संधारयन्ती हरितः शुभाय

॥ ९६६६॥

ENMSS@9667@1कामेनाकृष्य चापं हतपटुपटहं वल्गुभिर्मारवीरैर्

भ्रूभङ्गोत्क्षेपजृम्भास्मितललितदृशा दिव्यनारीजनेन ।

ENMSS@9667@2सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद् वासवेन  ध्यायन्यो

योगपीठादचलित इति वः पातु दृष्टो मुनीद्रः ॥ ९६६७॥

ENMSS@9668@1कामेनापि न भेत्तुं  किमु हृदयमपारि बालवनितानाम् ।

ENMSS@9668@2मूढविशिखप्रहारो-  च्छूनमिवाभाति यद्वक्षः ॥ ९६६८॥

ENMSS@9669@1कामेषुणा कामरिपोर्मनोऽपि  कल्लोलितं का मनुजेषु वार्ता ।

ENMSS@9669@2आषाढवाते चलति द्विपेन्द्रे  चूलीवतो वारिधिरेव काष्ठा ॥ ९६६९॥

ENMSS@9670@1कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।

ENMSS@9670@2तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ ९६७०॥

ENMSS@9671@1कामोऽक्षमा दक्षिणतानुकम्पा  ह्रीः साध्वसं क्रौर्यमनायैता च ।

ENMSS@9671@2दम्भोऽभिमानोऽथ च धार्मिकत्वं  दैन्यं स्वयूथस्यविमाननं च

॥ ९६७१॥

ENMSS@9672@1द्रोहो भयं शश्वदुपेक्षणं च  शीतोष्णवर्षास्वसहिष्णुता च ।

ENMSS@9672@2एतानि काले समुपाहितानि  कुर्वन्त्यवश्यं खलु सिद्धिविघ्नम् ॥ ९६७२॥

ENMSS@9673@1कामोत्तप्तं मरकतमहाग्रावहारो गभीरे  मग्नं नाभीसरसि हृदयं

जग्रसेऽनेकपं मे ।

ENMSS@9673@2लिलावेशप्रचलितकरः कोऽप्यहीनारिकेतुस् तद्भङ्गेन

प्रतिविधिमिहैवानुरूपं व्यतानीत् ॥ ९६७३॥

ENMSS@9674@1कामोद्वेगगृहीतं  धूर्तैरुपहस्यमानशृङ्गारम् ।

ENMSS@9674@2दारिद्र्यहतं यौवनम्  अबुधानां केवलं विपदे ॥ ९६७४॥

ENMSS@9675@1कामो नास्ति नपुंसकस्य कुलटावर्गस्य नास्ति त्रपा  तोयं नास्ति मरीचकासु

सततं नास्ति स्थिरत्वं स्त्रियः ।

ENMSS@9675@2धर्मो नास्ति च नास्ति कस्य विभवो नास्ति प्रमत्तात्मनः  स्नेहानां कणिकापि

नास्ति गणिकालोकस्य च प्रायशः ॥ ९६७५॥

ENMSS@9676@1कामोपभोगसाफल्यफलो राज्ञां महीजयः ।
ENMSS@9676@2अहङ्कारेण जीयन्ते द्विषन्तः किं नयश्रिया ॥ ९६७६॥
ENMSS@9677@1कामो वामदृशां निधिर्नयजुषां कालानलो विद्विषां स्वःशाखी विदुषां गुरुर्गुणवतां पार्थो धनुर्धारिणाम् ।
ENMSS@9677@2लीलावासगृहं कुलाकुलजुषां कर्णः सुवर्णार्थिनां श्रीमान् वीरवरः क्षितीश्वरवरो वर्वर्ति सर्वोपरि ॥ ९६७७॥
ENMSS@9678@1काम्बोजाः कम्बुजन्माकरशरणकृतः सह्यकान्तारकच्छा- न्विच्छायाः कच्छवाहा विदधति कतमे कामरूपाः कुरूपाः ।
ENMSS@9678@2कुर्वाणे त्वय्यकस्मात् करकमलहृतं कार्मुकं कूर्मपृष्ठो- त्कृष्टं कर्णान्तकृष्टं नरपकुलमणे कर्णमाकर्णयन्ति ॥ ९६७८॥
ENMSS@9679@1काम्याः क्रियास्तथा कामान् मानुषानभिवाञ्छति ।
ENMSS@9679@2स्त्रियो दानफलं विद्यां मायां कुप्यं धनं दिवम् ॥ ९६७९॥
ENMSS@9680@1देवत्वममरेशत्वं रसायनचयः क्रियाः ।
ENMSS@9680@2मरुत्प्रपतनं यज्ञं जलाद्यावेशनं तथा ॥ ९६८०॥
ENMSS@9681@1श्राद्धानां सर्वदानानां फलानि नियमांस्तथा ।
ENMSS@9681@2तथोपवासात् पूर्त्ताच्च देवताभ्यर्चनादपि ॥ ९६८१॥
ENMSS@9682@1तेभ्यस्तेभ्यश्च कर्मभ्य उपसृष्टोऽभिवाञ्छति ।
ENMSS@9682@2चित्तमित्थं वर्त्तमानं यत्नाद्योगी निवर्त्तयेत् ॥ ९६८२॥
ENMSS@9683@1काम्यानां कतिचित् समापरिमितस्वर्गैकसंदायिनां सद्यः स्वान्तनितान्तमोहनकृतां कर्ता जनः कर्मणाम् ।
ENMSS@9683@2आत्मानन्दमनन्यवेद्यमपरिच्छिन्नं न जानाति तं विक्रेता लवणस्य वेत्ति किमु तत्कर्पूरमूल्यं परम् ॥ ९६८३॥
ENMSS@9684@1काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
ENMSS@9684@2सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ ९६८४॥
ENMSS@9685@1कायं मत्वा नश्वरं चञ्चलाभं चायुर्बुद्ध्वा भङ्गुरान् सर्वभोगान् ।
ENMSS@9685@2पारं गन्तुं विश्वसिन्धोर्विदग्धा योगाभ्यासे साधुबुद्धिं विदध्वम् ॥ ९६८५॥
ENMSS@9686@1कायः कण्टकदूषितो न च घनच्छाया कुतः पल्लवाः पुष्पाणि च्युतसौरभाणि न दलश्रेणी मनोहारिणी ।
ENMSS@9686@2किं ब्रूमः फलपाकमस्य यदुपन्यासेऽपि लज्जामहे तद् भोः केन गुणेन

शाल्मलितरो जातोऽसि सोमद्रुमः ॥ ९६८६॥
ENMSS@9687@1कायः संनिहितापायः संपदः पदमापदाम् ।
ENMSS@9687@2समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ॥ ९६८७॥
ENMSS@9687A@1कालक्लमैर्यश्च तपोऽभिधानैः प्रवृत्तिमाकाङ्क्षति कामहेतोः ।
ENMSS@9687A@2संसारदोषानपरीक्षमाणो दुःखेन सोऽन्विच्छति दुःखमेव ॥
ENMSS@9688@1कायक्लेशेन महता पुरुषः प्राप्नुयात् फलम् ।
ENMSS@9688@2तत् सर्वं लभते नारी सुखेन पतिपूजया ॥ ९६८८॥
ENMSS@9689@1कायच्छिन्नास्तु ऋषिका मर्मघ्ना गुरवस्तथा ।
ENMSS@9689@2तीक्ष्णाश्छेदसहा वाङ्गा दृढा शूर्पारकोद्भवाः ॥ ९६८९॥
ENMSS@9689A@1कायवाङ्मनसां दुष्टप्रणिधानमनादरः ।
ENMSS@9689A@2स्मृत्यनुपस्थापनं च स्मृताः सामायिकव्रते ॥
ENMSS@9690@1कायस्थस्य च शल्यस्य कायस्थस्य च सा गतिः ।
ENMSS@9690@2याभ्यामनुप्रविष्टाभ्यां दूष्यन्ते सर्वधातवः ॥ ९६९०॥
ENMSS@9691@1कायस्थेनोदरस्थेन मातुरामिषशङ्कया ।
ENMSS@9691@2अन्त्राणि यन्न भुक्तानि तस्य हेतुरदन्तता ॥ ९६९१॥
ENMSS@9692@1कायस्थैर्यं करणपटुतां बन्धुसम्पत्तिमर्थं चातुर्यं वा किमिव
हि बलं बिभ्रतो निर्भराः स्मः ।
ENMSS@9692@2अन्त्यः श्वासः किमयमथवोपान्त्य इत्यामृशन्तो विस्मृत्येशं निमिषमपि
किं वर्तितुं पारयामः ॥ ९६९२॥
ENMSS@9693@1कायेन कुरुते पापं मनसा सम्प्रधार्य च ।
ENMSS@9693@2अनृतं जिह्वया चाह त्रिविधं कर्म पातकम् ॥ ९६९३॥
ENMSS@9694@1कायेन त्रिविधं चैव वाचा चैव चतुर्विधम् ।
ENMSS@9694@2मनसा त्रिविधं नित्यं दशाधर्मपथांस्त्यजेत् ॥ ९६९४॥
ENMSS@9695@1कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
ENMSS@9695@2योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ९६९५॥
ENMSS@9695A@1काये सीदति कण्ठरोधिनि कफे कुण्ठे च वाणीपथे जिह्मायां दृशि
जीविते जिगमिषौ श्वासे शनैः शाम्यति ।
ENMSS@9695A@2आगत्य स्वयमेव नः करुणया कात्यायनीवल्लभः कर्णे वर्णयताद्
भवार्णवभयादुत्तारकं तारकम् ॥
ENMSS@9696@1कारञ्जीः कूजयन्तो निजजठररवव्यञ्जिता बौजकोशिर् उत्पाकान् कृष्णलानां

पृथुसुषिरगताञ् शिम्बिकान् पारयन्तः ।
ENMSS@9696@2झिल्लीकाझल्लरीणां बधिरितभुवनं झंकृतं खे क्षिपन्तः
शिञ्जानाश्वत्थपत्रप्रकरझणझणाराविणो वान्ति वाताः ॥ ९६९६॥
ENMSS@9697@1कारणाकारणध्वस्तं कारणाकारणागतम् ।
ENMSS@9697@2यो मित्रं समुपेक्षेत स मृत्युमुपगूहति ॥ ९६९७॥
ENMSS@9697A@1कारणात् प्रियतामेति द्वेष्यो भवति कारणात् ।
ENMSS@9697A@2अर्थार्थी जीवलोकोऽयं न कश्चित् कस्यचित् प्रियः ॥
ENMSS@9698@1कारणान्मित्रताम् एति कारणाद् याति शत्रुताम् ।
ENMSS@9698@2तस्मान्मित्रत्वम् एवात्र योज्यं वैरं न धीमता ॥ ९६९८॥
ENMSS@9699@1कारणेन विना भृत्ये यस्तु कुप्यति पार्थिवः ।
ENMSS@9699@2स गृह्णाति विषोन्मादं कृष्णसर्पप्रदंशितः ॥ ९६९९॥
ENMSS@9700@1कारणेनैव जायन्ते मित्राणि रिपवस्तथा ।
ENMSS@9700@2रिपवो येन जायन्ते कारणं तत् परित्यजेत् ॥ ९७००॥
ENMSS@9701@1कारणैः सदृशं कार्यम् इति मिथ्या प्रसिद्धयः ।
ENMSS@9701@2मानिनो भवतो जातं यदमानं यशो भुवि ॥ ९७०१॥
ENMSS@9702@1कारणोत्पन्नकोपोऽपि साम्प्रतं प्रमदाजनः ।
ENMSS@9702@2निशि शीतापदेशेन गाढमालिङ्गति प्रियम् ॥ ९७०२॥
ENMSS@9703@1कारण्डवाननविघट्टितवीचिमालाः कादम्बसारसचयाकुलतीरदेशाः
।
ENMSS@9703@2कुर्वन्ति हंसविरुतैः परितो जनस्य प्रीतिं सरोरुहरजोऽरुणितास्तटिन्यः
॥ ९७०३॥
ENMSS@9704@1कारय नाम्ब विलम्बं मुञ्च करं मे हरिं यामि ।
ENMSS@9704@2न सहे स्थातुं यदसौ गर्जति मुरली प्रगल्भदूतीव ॥ ९७०४॥
ENMSS@9705@1कारणात् प्रियतामेति द्वेष्यो भवति कारणात् ।
ENMSS@9705@2अर्थार्थी जीवलोकोऽयं न कश्चित् कस्यचित् प्रियः ॥ ९७०५॥
ENMSS@9706@1कारासंतानकूटस्य संसारवनवागुरा ।
ENMSS@9706@2स्वर्गमार्गमहागर्ता पुंसां स्त्री वेधसा कृता ॥ ९७०६॥
ENMSS@9707@1कारुण्यं पुण्यानां कृतज्ञता पुरुषचिह्नानाम् ।
ENMSS@9707@2माया मोहमतीनां कृतघ्नता नरकपातहेतूनाम् ॥ ९७०७॥
ENMSS@9708@1कारुण्यं संविभागश्च यथा भृत्येषु लक्ष्यते ।
ENMSS@9708@2चित्तेनानेन ते शङ्का त्रैलोक्यस्यापि नाथता ॥ ९७०८॥

ENMSS@9709@1कारुण्यपुण्यसत्सद्म कुरु त्वं जनबान्धव ।
ENMSS@9709@2मम श्रीपार्श्वतीर्थेश सुप्रसादं सुखास्पदम् ॥ ९७०९॥
ENMSS@9710@1कारुण्यामृतकन्दलीसुमनसः प्रज्ञावधूमौक्तिक- ग्रीवालंकरणश्रियः शमसरित्पूरोत्सलच्छीकराः ।
ENMSS@9710@2ते मौलौ भवतां मिलन्तु जगतीराज्याभिषेकोचित- स्रग्भेदा अभयप्रदानचरणप्रेङ्खन्नखाग्रांशवः ॥ ९७१०॥
ENMSS@9711@1कारुण्यामृतनीरमाश्रितजनश्रीचातकानन्ददं शार्ङ्गाखण्डलचापमम्बुजभवाग्नीन्द्रादिबर्हीष्टदम् ।
ENMSS@9711@2चारुस्मेरमुखोल्लसज्जनकजासौदामिनीशोभितं श्रीरामाम्बुदमाश्रयेऽखिलजगत्संसारता पापहम् ॥ ९७११॥
ENMSS@9711A@1कारुण्येन हता वधव्यसनिता सत्येन दुर्वाच्यता सन्तोषेण परार्थचौर्यपटुता शीलेन रागान्धता ।
ENMSS@9711A@2नैर्ग्रन्थ्येन परिग्रहग्रहिलता यैर्यौवनेऽपि स्फुटं पृथ्वीयं सकलापि तैः सुकृतिभिर्मन्ये पवित्रीकृता ॥
ENMSS@9712@1कारुण्येनात्मनो मानं तृष्णां च परितोषतः ।
ENMSS@9712@2उत्थानेन जयेत् तन्द्रीं वितर्कं निश्चयाज्जयेत् ॥ ९७१२॥
ENMSS@9713@1कार्कश्यं स्तनयोर्दृशोस्तरलतालीकं मुखे श्लाघ्यते कौटिल्यं कचसंचये च वचने मान्द्यं त्रिके स्थूलता ।
ENMSS@9713@2भीरुत्वं हृदये सदैव कथितं मायाप्रयोगः प्रिये यासां दोषगणो गुणो मृगदृशां ताः स्युः पशूनां प्रियाः ॥ ९७१३॥
ENMSS@9714@1कार्कश्यलौल्यनैवर्ण्यं हिंसाचापल्यमूर्खताः ।
ENMSS@9714@2क्रोधावमानदुःखं च स्त्रीणां स्वाभाविका गुणाः ॥ ९७१४॥
ENMSS@9715@1कार्णाटीकेलिवाटीविटपिनवदलान्दोलनाश्चोलबाला- चञ्चच्चाम्पेयमालानिविलपरिमलाकर्षणोत्कर्षब् हाजः ।
ENMSS@9715@2वाता दातार एते मलयजमधुरामोदपूरैः प्रमोदान् गोदावीचीविनोदार्जितजडिमगुणानुद्वहन्तो वहन्ति ॥ ९७१५॥
ENMSS@9716@1कार्णाटी स्वर्णकर्णाभरणपरिमिलन्मौक्तिकेष्वम्बुलेशैर् यस्याः संपृक्तमात्रेष्विदमजनि महच्चित्रमुच्चण्डमेव ।
ENMSS@9716@2सङ्कीर्णे ताम्रपर्णीजललहरिभरैरर्णवे शुक्तयो यत् सार्धं क्रीडन्ति शच्या शमयतु विपदोऽह्नाय सा जाह्नवी नः ॥ ९७१६॥
ENMSS@9717@1कार्त्तिके वाथ चैत्रे वा विजिगीषोः प्रशस्यते ।

ENMSS@9717@2यानमुत्कृष्टवीर्यस्य शत्रुदेशे न चान्यदा ॥ ९७१७॥
ENMSS@9718@1कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात् स्वामिदर्शनम् ।
ENMSS@9718@2सप्तजन्म भवेद् विप्रो धनाढ्यो वेदपारगः ॥ ९७१८॥
ENMSS@9719@1कात्स्न्र्येन निर्वर्णयितुं च रूपम्  इच्छन्ति तत्पूर्वसमागमानाम् ।
ENMSS@9719@2न च प्रियेष्वायतलोचनानां  समग्रपातीनि विलोचनानि ॥ ९७१९॥
ENMSS@9720@1कार्पण्यं दर्पमानौ च भयमुद्वेग एव च ।
ENMSS@9720@2अर्थजानि विदुः प्राज्ञा दुःखान्येतानि देहिनाम् ॥ ९७२०॥
ENMSS@9721@1कार्पण्यवृत्तिः स्वजनेषु निन्दा  कुचेलता नीचजनेषु भक्तिः ।
ENMSS@9721@2अतीव रोषः कटुका च वाणी  नरस्य चिह्नं नरकागतस्य ॥ ९७२१॥
ENMSS@9722@1कार्पण्येन यशः, क्रुधा गुणचयो, दम्भेन सत्यं, क्षुधा  मर्यादा, व्यसनैर्धनं च, विपदा स्थैर्यं, प्रमादैर्द्विजः ।
ENMSS@9722@2पैशुन्येन कुलं, मदेन विनयो, दुश्चेष्टया पौरुषं  दारिद्र्येण जनादरो, ममतया चात्मप्रकाशो हतः ॥ ९७२२॥
ENMSS@9723@1कार्पासं कटिनिर्मुक्तं कौशेयं भोजनावधि ।
ENMSS@9723@2ऊर्णवस्त्रं सदा शुद्धम् ऊर्णा वातेन शुध्यति ॥ ९७२३॥
ENMSS@9724@1कार्पासकृतकूर्पासशतैरपि न शाम्यति ।
ENMSS@9724@2शीतं शातोदरीपीनवक्षोजालिङ्गनं विना ॥ ९७२४॥
ENMSS@9725@1कार्पासकोशोज्ज्वलकेशसंचया  पयोधरालिङ्गितमन्मथालया ।
ENMSS@9725@2गल्लौ जरद्गल्लकसंनिभावुभौ  तथापि रण्डा सुरतं न मुञ्चति ॥ ९७२५॥
ENMSS@9726@1कार्पासौषधकृष्णधान्यलवणक्लीबास्थितैलं वसा-पङ्काङ्गारगुडाहिवर्मशकृतक्लेशाय सव्याधिताः ।
ENMSS@9726@2वान्तोन्मत्तजटीन्धनानि च तृणक्षुत्क्षामतक्रादयो मुण्ड्यभ्यक्तविमुक्तकेशपलिताः काषायिणश्चाशुभाः ॥ ९७२६॥
ENMSS@9726A@1कार्यं च किं ते परदोषदृष्ट्या  कार्यं च किं ते परचिन्तया च ।
ENMSS@9726A@2वृषा कथं खिद्यसि बालबुद्धे  कुरु स्वकार्यं त्यज सर्वमन्यान् ॥
ENMSS@9727@1कार्यं च शान्तदीप्तं  ज्ञात्वा विद्वान् विचारयेत् सर्वम् ।
ENMSS@9727@2शान्ते शान्तं ग्राह्यं  दीप्ते दीप्तं च गृह्णीयात् ॥ ९७२७॥
ENMSS@9728@1कार्यं चावेक्ष्य शक्तिं च देशकालौ च तत्त्वतः ।
ENMSS@9728@2कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥ ९७२८॥
ENMSS@9729@1कार्यं तत्साधकादींश्च तद्व्ययं सुविनिर्गमम् ।

ENMSS@9729@2विचिन्त्य कुरुते ज्ञानी नल्यथा लघ्वपि क्वचित् ॥ ९७२९॥
ENMSS@9730@1कार्यं यावदिवं करोमि विधिवत् तावत् करिष्याम्यदस् तत् कृत्वा पुनरेतदद्य कृतवानेतत् पुरा कारितम् ।
ENMSS@9730@2इत्यात्मीयकुटुम्बपोषणपरः प्राणी क्रियाव्याकुलो मृत्योरेति करग्रहं हतमतिः संत्यक्तधर्मक्रियः ॥ ९७३०॥
ENMSS@9731@1कार्यं शक्तावपि प्राणेस्त्राणं शरणमागते ।
ENMSS@9731@2निजतृष्ठानुगं धातुं प्रदीपः किं न रक्षति ॥ ९७३१॥
ENMSS@9731A@1कार्यः कश्चिद्वरो दूतः सकुलश्चतुरोऽपि च ।
ENMSS@9731A@2कुलशीलविहीनस्तु सिद्धिं नाशयति ध्रुवम् ॥
ENMSS@9732@1कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
ENMSS@9732@2पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ ९७३२॥
ENMSS@9733@1कार्यकाले तु संप्राप्ते नावज्ञेयं त्रयं सदा ।
ENMSS@9733@2बीजमौषधमाहारो यथा लाभस्तथा क्रयः ॥ ९७३३॥
ENMSS@9734@1कार्यकाले विपत्तौ यो भृत्यो हि याचते धनम् ।
ENMSS@9734@2सोत्सारणीयः सपदि नीतिज्ञावनिपालकैः ॥ ९७३४॥
ENMSS@9735@1कार्यकालोचिता पापैर्मतिबुद्धिर्विहीयते ।
ENMSS@9735@2सानुकूला तु वैदैवात् पुंसः सर्वत्र जायते ॥ ९७३५॥
ENMSS@9736@1कार्यगतेर्वैचित्र्या- न्नीचोऽपि क्वचिदलं न जातु महान् ।
ENMSS@9736@2कांस्येनैवादर्शः क्रियते राज्ञामपि न हेम्ना ॥ ९७३६॥
ENMSS@9737@1कार्यज्ञः प्रष्टव्यो न पुनर्मान्यो मम प्रियो वेति ।
ENMSS@9737@2गुरुरप्यासनसेव्यः प्रियानितम्बः कदा मन्त्री ॥ ९७३७॥
ENMSS@9738@1कार्यते यच्च क्रियते सच्चासच्च कृतं ततः ।
ENMSS@9738@2तत्राश्वसीत सत्कृत्वा असत्कृत्वा न विश्वसेत् ॥ ९७३८॥
ENMSS@9739@1कार्यमालोचितापायं मतिमद्भिर्विचेष्टितम् ।
ENMSS@9739@2न केवलं हि सम्पत्तौ विपत्तावपि शोभते ॥ ९७३९॥
ENMSS@9740@1कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन ।
ENMSS@9740@2सङ्गं त्यक्त्वा फलं चैव सत् त्यागः सात्त्विको मतः ॥ ९७४०॥
ENMSS@9741@1कार्यस्य हि गरीयस्त्वान् नीचानामपि कालवित् ।
ENMSS@9741@2सतोऽपि दोषान् प्रच्छाद्य गुणानप्यसतो वदेत् ॥ ९७४१॥
ENMSS@9742@1कार्यस्यापेक्षया भुक्तं विषमप्यमृतायते ।
ENMSS@9742@2सर्वेषां प्राणिनां यत्र नात्र कार्या विचारणा ॥ ९७४२॥

ENMSS@9743@1कार्याकार्यमनार्यैर् उन्मार्गनिरर्गलैर्गलन्मतिभिः ।
ENMSS@9743@2नाकर्ण्यते विकर्णैर् नयोक्तिभिर्युक्तमुक्तमपि ॥ ९७४३॥
ENMSS@9744@1कार्याकार्ये किमपि सततं नैव कर्तृत्वमस्ति जीवन्मुक्तस्थितिरवगतो दग्धवस्त्रावभासः ।
ENMSS@9744@2एवं देहे प्रविलयगते तिष्ठमानो विमुक्तो निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥ ९७४४॥
ENMSS@9745@1कार्याकार्ये तुलयति सर्वस् तृप्तो न जातु तृष्णार्तः ।
ENMSS@9745@2स्वादु शुचि वा च तोयं मरुपथिकः को विचारयति ॥ ९७४५॥
ENMSS@9746@1कार्याकार्येषु काकोलः प्रशस्तः स्याद् यथा किल ।
ENMSS@9746@2न तथा वायसा ज्ञेया ग्राह्यास्तु तदभावतः ॥ ९७४६॥
ENMSS@9747@1कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान् ।
ENMSS@9747@2॥। ॥। ॥। ॥। ॥। ॥। ॥ ९७४७॥
ENMSS@9748@1कार्याणां गतयो भुजंगकुटिलाः स्त्रीणां मनश्चञ्चलं नैश्वर्यं स्थितिमत्तरंगचपलं न् णां वयो धावति ।
ENMSS@9748@2संकल्पाः समदाङ्गनाक्षितरला मृत्युः परं निश्चितो मत्यैवं मतिसत्तमा विदधतां धर्मे मतिं तत्त्वतः ॥ ९७४८॥
ENMSS@9749@1कार्याण्यर्थोपमर्देन स्वानुरक्तोऽपि साधयन् ।
ENMSS@9749@2नोपेक्ष्यः सचिवो राज्ञा स तं मथ्नात्युपेक्षितः ॥ ९७४९॥
ENMSS@9750@1कार्याण्युत्तमदण्डसाहसफलान्यायाससाध्यानि ये प्रीत्या संशमयन्ति नीतिकुशलाः साम्नैऽव ते मन्त्रिणः ।
ENMSS@9750@2निःसाराल्पफलानि ये त्वविधिना वाञ्छन्ति दण्डोद्यमैस् तेषां दुर्नयचेष्टितैर्नरपतेरारोप्यते श्रीस्तुलाम् ॥ ९७५०॥
ENMSS@9751@1कार्या न प्रतिकूलता न च बहिर्गन्तव्यमस्माद् गृहात् कोपश्च क्षणमात्रमाहितरुषा कार्यः प्रणामावधिः ।
ENMSS@9751@2इत्येवं प्रमदाव्रतं यदि भवान् गृह्णाति नात्यन्तिकं तत्राहं दयितीभवामि शठ हे कोपानुबन्धेन किम् ॥ ९७५१॥
ENMSS@9752@1कार्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण ।
ENMSS@9752@2अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ॥ ९७५२॥
ENMSS@9753@1कार्यान्तरेष्वप्यनुगम्यमाना श्रेयःप्रदा शान्तदिशि प्रदिष्टा ।
ENMSS@9753@2शिवा प्रदीप्ते तु दिशःप्रदेशे समारटन्ती महते भयाय ॥ ९७५३॥
ENMSS@9754@1कार्यापेक्षी जनः प्रायः प्रीतिमाविष्करोत्यलम् ।

ENMSS@9754@2लोमार्थी शौण्डिकः शष्पैर्मेषं पुष्णाति पेशलैः ॥ ९७५४॥

ENMSS@9755@1कार्यारम्भः फलोल्लासम् आलोक्य प्रायशो जनैः ।

ENMSS@9755@2अनानुगुण्यगणनां कुर्वाणैर्न विगर्ह्यते ॥ ९७५५॥

ENMSS@9756@1कार्यार्थिनः क्षीणतरस्य नैव  निःशेषकार्यं कुटिलस्य कुर्यात् ।

ENMSS@9756@2दोषाकरः प्राप्तविवृद्धदर्पः  पलायते दूरतरं हि मित्रात् ॥ ९७५६॥

ENMSS@9757@1कार्यार्थिनो दीर्घमिवाध्वखेदं  विक्रीतदासा इव कर्मभारम् ।

ENMSS@9757@2कष्टं कटुद्रव्यमिवामयार्ताः  स्वभर्तृगेहं वनिता सहन्ते ॥ ९७५७॥

ENMSS@9758@1कार्यार्थी बन्धुजनः  कार्यैर्बहुभिर्भवन्ति मित्राणि ।

ENMSS@9758@2दाराः सुताश्च सुलभा  धनमेकं दुर्लभं लोके ॥ ९७५८॥

ENMSS@9759@1कार्यार्थी भजते लोके यावत् कार्यं न सिध्यति ।

ENMSS@9759@2उत्तीर्णे च परे पारे नौकायाः किं प्रयोजनम् ॥ ९७५९॥

ENMSS@9760@1कार्यार्थी भजते लोको न प्रियः पारमार्थिकः ।

ENMSS@9760@2वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥ ९७६०॥

ENMSS@9761@1कार्यार्थी संगतिं याति कृतार्थे नास्ति संगतिः ।

ENMSS@9761@2तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत् ॥ ९७६१॥

ENMSS@9762@1कार्यवितौ हि कालेन धर्मो हि विजयावहः ।

ENMSS@9762@2त्रयाणामपि लोकानाम् आलोककरणो भवेत् ॥ ९७६२॥

ENMSS@9763@1कार्यासमर्थे महति न कुर्यात् परिहासकम् ।

ENMSS@9763@2लम्बोदरं नत्यशक्तम् अप्रेष्योऽभूच्छशी हसन् ॥ ९७६३॥

ENMSS@9764@1कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी  पादास्तामभितो निषण्णहरिणा

गौरीगुरोः पावनाः ।

ENMSS@9764@2शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः  शृङ्गे

कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ ९७६४॥

ENMSS@9765@1कार्यं कर्मणि निर्दिष्टो यो बहून्यपि साधयेत् ।

ENMSS@9765@2पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥ ९७६५॥

ENMSS@9766@1न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः ।

ENMSS@9766@2यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥ ९७६६॥

ENMSS@9767@1कार्येण लोके निजधर्मगर्हणा  विचारचर्चाचरणैस्तु यैर्भुवि ।

ENMSS@9767@2स्यात् तन्न कार्यं सुहितावहं भवद्  अपीह भव्यं स्वविचारदृष्टितः

॥ ९७६७॥

ENMSS@9767A@1कार्येणापि विलम्बनं परगृहे श्वश्रूर्न संमन्यते शङ्कामारचयन्ति यूनि भवनं प्राप्ते मिथो यातरः ।
ENMSS@9767A@2वीथीनिर्गमनेऽपि तर्जयति च क्रुद्धा ननान्दा पुनः कष्टं हन्त मृगीदृशां पतिगृहं प्रायेण कारागृहम् ॥
ENMSS@9768@1कार्ये तु दुःखसाध्ये तु कार्यो नातिश्रमो जनैः ।
ENMSS@9768@2कार्ये सिद्धे श्रमो न स्याद् असिद्धे श्रम एव हि ॥ ९७६८॥
ENMSS@9769@1कार्ये दासी रतौ वेश्या भोजने जननीसमा ।
ENMSS@9769@2विपत्तौ बुद्धिदात्री च सा भार्या सर्वदुर्लभा ॥ ९७६९॥
ENMSS@9769A@1कार्ये महति युञ्जानो हीयतेऽर्थपतिः श्रिया ।
ENMSS@9769A@2स्त्रीप्रधानानि राज्यानि विद्वद्भिर्वर्जितानि च ।
ENMSS@9769A-3 मूर्खामात्यप्रतप्तानि शुष्यन्ति जलबिन्दुवत् ॥
ENMSS@9770@1कार्येषु मन्त्री करणेषु दासी भोज्येषु माता शयनेषु रम्भा ।
ENMSS@9770@2धर्मेऽनुकूला क्षमया धरित्री भार्या च षाड्गुण्यवतीह धन्या ॥ ९७७०॥
ENMSS@9771@1कार्येषु मन्त्री करणेषु दासी स्नेहेषु माता क्षमया धरित्री ।
ENMSS@9771@2धर्मस्य पत्नी शयने च वेश्या षट्कर्मभिः स्त्री कुलमुद्धरन्ति ॥ ९७७१॥
ENMSS@9772@1कार्ये सत्यपि जातु याति न बहिर्नाप्यन्यमालोकते साध्वीरप्यनुकुर्वती गुरुजनं श्वश्रूं च शुश्रूषते ।
ENMSS@9772@2विस्रम्भं कुरुते च पत्युरधिकं प्राप्ते निशीथे पुनर् निद्राणे सकले जने शशिमुखी निर्याति रन्तुं विटैः ॥ ९७७२॥
ENMSS@9773@1कार्येहानुसरणतो वारंवारं परं पुमांसमनु ।
ENMSS@9773@2यतमानस्यानुदिनं भवति यतः प्रेमलक्षणं भजनम् ॥ ९७७३॥
ENMSS@9774@1कार्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छन् बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च ।
ENMSS@9774@2कुर्वन् बुद्ध्या विमर्शं प्रसृतमपि पुनः संहरन् कार्यजातं कर्ता वा नाटकानामियमनुभवति क्लेशमस्मद्विधो वा ॥ ९७७४॥
ENMSS@9775@1कार्श्यं क्षुत्प्रभवं कदन्नमशनं शीतोष्णयोः पात्रता पारुष्यं च शिरोरुहेषु शयनं मह्यास्तले केवले ।
ENMSS@9775@2एतान्येव गृहे वहन्त्यवनतिं यान्त्युन्नतिं कानने दोषा एव गुणीभवन्ति मुनिभिर्योग्ये पदे योजिताः ॥ ९७७५॥

ENMSS@9776@1कार्श्यं चेत् प्रतिपत्कला हिमनिधेः स्थूलाथ चेत् पाण्डिमा लीला एव
मृणालिका यदि घना बाष्पाः कियान् वारिधिः ।
ENMSS@9776@2सन्तापो यदि शीतलो हुतवहस्तस्याः कियद् वर्ण्यते राम त्वत्स्मृतिमात्रमेव
हृदये लावण्यशेषं वपुः ॥ ९७७६॥
ENMSS@9777@1कार्श्यजागरसन्तापान् यः करोति श्रुतोऽप्यलम् ।
ENMSS@9777@2तमेव दुर्लभं कान्तं चेतः कस्माद् दिदृक्षते ॥ ९७७७॥
ENMSS@9778@1कार्षकः सर्वबीजानि समालोड्य प्रवापयेत् ।
ENMSS@9778@2उत्पन्नबीजसद्भावं त्वङ्कुरेण विभावयेत् ॥ ९७७८॥
ENMSS@9779@1कालं कपालमालाङ्कम् एकमन्धकसूदनम् ।
ENMSS@9779@2वन्दे वरदमीशानं शासनं पुष्पधन्वनः ॥ ९७७९॥
ENMSS@9780@1कालं नियम्य कर्माणि ह्याचरेन् नान्यथा क्वचित् ।
ENMSS@9780@2गवादिष्वात्मवज्ज्ञानम् आत्मानं चार्थधर्मयोः ।
ENMSS@9780@3नियुञ्जीतान्नसंसिद्ध्यै मातरं शिक्षणे गुरुम् ॥ ९७८०॥
ENMSS@9781@1कालं निरीक्ष्य कुरुते कार्यं तस्याशु सिध्यति ।
ENMSS@9781@2ग्रहं विचार्य क्रीडायां दीव्यतो न पराजयः ॥ ९७८१॥
ENMSS@9782@1कालं पुरा गरलमम्बुनिधेरुदस्थाद् अद्येन्दुनाम धवलं विषमभ्युदेति ।
ENMSS@9782@2अद्यादिदं स गिरिशो यदि हन्त हन्यात् कार्ष्ण्यं स्वकण्ठनिहितं सखि
मद्वयं च ॥ ९७८२॥
ENMSS@9783@1कालं मुहूर्ताङ्गुलिमण्डलेन दिनत्रियामाञ्जलिना पिबन्तम् ।
ENMSS@9783@2रूपं विलोक्यैव वपुश्च केषां भङ्गेन नाङ्गान्यलसीभवन्ति ॥ ९७८३॥
ENMSS@9784@1कालः करोति कार्याणि काल एव निहन्ति च ।
ENMSS@9784@2करोमीति विहन्मीति मूर्खो मुह्यति केवलम् ॥ ९७८४॥
ENMSS@9785@1कालः किरातः स्फुटपद्मकस्य वधं व्यधाद्यस्य दिनद्विपस्य ।
ENMSS@9785@2तस्येव सन्ध्या रुचिरास्रधारा ताराश्च कुम्भस्थलमौक्तिकानि ॥ ९७८५॥
ENMSS@9786@1कालः पचति भूतानि कालः संहरते प्रजाः ।
ENMSS@9786@2कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ ९७८६॥
ENMSS@9787@1कालः पचति भूतानि कालः संहरति प्रजाः ।
ENMSS@9787@2निर्दहन्तं प्रजाः कालं कालः शमयते पुनः ॥ ९७८७॥

ENMSS@9788@1कालः संप्रति वर्तते कलियुगं सत्या नरा दुर्लभाः  देशाश्च प्रलयं गताः करभरैर्लोभं गताः पार्थिवाः ।

ENMSS@9788@2नानाचौरगणा मुषन्ति पृथिवीमार्यो जनः क्षीयते  पुत्रस्यापि न विश्वसन्ति पितरः कष्टं युगे वर्तते ॥ ९७८८॥

ENMSS@9789@1कालः सदागतिरपि स्थायीव परिचेष्टते ।

ENMSS@9789@2चण्डमारुतवद् विश्वम् अधरोत्तरयन् क्षणात् ॥ ९७८९॥

ENMSS@9790@1कालः समविषमकरः  परिभवसन्मानकारकः कालः ।

ENMSS@9790@2कालः करोति पुरुषं  दातारं याचितारं च ॥ ९७९०॥

ENMSS@9791@1कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ।

ENMSS@9791@2कालः सर्वेषु भूतेषु चरत्यविधृतः समः ॥ ९७९१॥

ENMSS@9792@1कालः सूक्ष्मगतिर्नित्यं द्विविधश्चेह भाव्यते ।

ENMSS@9792@2स्थूलसंग्रहचारेण सूक्ष्माचारान्तरेण च ॥ ९७९२॥

ENMSS@9793@1कालः मृजति भूतानि कालः संहरते प्रजाः ।

ENMSS@9793@2सर्वे कालस्य वशगा न कालः कस्यचिद् वशे ॥ ९७९३॥

ENMSS@9794@1काल एवात्र कालेन निग्रहानुग्रहौ ददत् ।

ENMSS@9794@2बुद्धिमाविश्य भूतानां धर्मार्थेषु प्रवर्तते ॥ ९७९४॥

ENMSS@9795@1कालकालगलकालकालमुखकालकाल!   कालकाल घनकालकाल पनकालकाल ! ।

ENMSS@9795@2कालकालसितकालका ललनिकालकाल-  कालकालगतु कालकाल! कलिकालकाल! ॥

९७९५॥

ENMSS@9796@1कालकूटमधुनापि निहन्तुं  हन्त नो वहसि लाञ्छनभङ्ग्या ।

ENMSS@9796@2यद्भयादिव निगीर्णमपि त्वाम्  आशु मुञ्चति सुधाकर राहुः ॥ ९७९६॥

ENMSS@9797@1कालकूटमिह निन्दति लोको  येन शम्भुरजरामर एव ।

ENMSS@9797@2अन्तकं विरहिणीशु सुधांशुं  स्तौत्यमुं तु विरलो हि विवेकः ॥ ९७९७॥

ENMSS@9798@1कालकूटादयो भेदा विषस्य नव सन्ति ये ।

ENMSS@9798@2चिकित्सा कथ्यते तेषां मन्त्रपूर्वमविस्तरात् ॥ ९७९८॥

ENMSS@9799@1कालक्रमं प्रत्यकथैव तावत्  क्षणं वियोगो मरणेन तुल्यः ।

ENMSS@9799@2प्रियामुखोद्वीक्षणलालसानाम्  अक्ष्णोर्निमेषोऽपि हि विघ्नभूतः ॥ ९७९९॥

ENMSS@9800@1कालक्रमकमनीय- क्रोडेयं केतकीति काशंसा ।
ENMSS@9800@2वृद्धिर्यथा यथा स्यास् तथा तथा कण्टकोत्कर्षः ॥ ९८००॥
ENMSS@9801@1कालक्रमत्रुटितसंश्रयभूः स्वमूल- मात्राश्रयी तटतरुः सरितोऽम्बुपूरैः ।
ENMSS@9801@2यैः शङ्क्यते निपततीति वितीर्णमृद्धिस् तैरेव तस्य हि भवेत् स्थितिभुमिदार्ढ्यम् ॥ ९८०१॥
ENMSS@9802@1कालक्रमेण परिणामवशादनव्या भावा भवन्ति खलु पूर्वमतीव तुच्छाः ।
ENMSS@9802@2मुक्तामणिर्जलदतोयकणोऽप्यणीयान् सम्पद्यते च चिरकीचकरन्ध्रमध्ये ॥ ९८०२॥
ENMSS@9803@1कालक्षेपो न कर्तव्य आयुर्याति दिने दिने ।
ENMSS@9803@2निरीक्षते यमो राजा धर्मस्य विविधां गतिम् ॥ ९८०३॥
ENMSS@9804@1का लक्ष्मीः पदमुन्नतं, किमु पदं यद् गौरवं स्वामिनः किं तद् गौरव, मन्तरायरहितापूर्वैव गुर्वी स्थितिः ।
ENMSS@9804@2का चासौ स्थिति, रात्मभूषणपरव्यापारसम्भावना कस्यैतत् सकलं समस्ति, शशिनः श्रीकण्ठचुडामणेः ॥ ९८०४॥
ENMSS@9805@1कालञ्जरपतिश्चक्रे भीमटः पञ्चनाटकीम् ।
ENMSS@9805@2प्राप प्रबन्धराजत्वं तेषु स्वप्नदशाननम् ॥ ९८०५॥
ENMSS@9805A@1कालत्रयेऽपि यत् किंचिद् आत्मप्रत्ययवर्जितम् ।
ENMSS@9805A@2एवमेतदिति स्पष्टं न वाच्यं चतुरेण तत् ॥
ENMSS@9806@1कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ।
ENMSS@9806@2अनुक्रमन्तो नैवान्तं गच्छन्ति परमर्षयः ॥ ९८०६॥
ENMSS@9807@1कालप्राप्तं महारत्नं यो न गृह्णात्यबुद्धिमान् ।
ENMSS@9807@2अन्यहस्तगतं दृष्ट्वा पश्चात् स परितप्यते ॥ ९८०७॥
ENMSS@9808@1कालप्राप्तमुपादद्यान्नार्थं राजा प्रसूचयेत् ।
ENMSS@9808@2अहन्यहनि सन्दुह्यान्महीं गामिव बुद्धिमान् ॥ ९८०८॥
ENMSS@9809@1कालयापनमाशानां वर्धनं फलखण्डनम् ।
ENMSS@9809@2विरक्तेश्वरचिह्नानि जानीयान्मतिमान् नरः ॥ ९८०९॥
ENMSS@9810@1कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससे ।
ENMSS@9810@2तज्जगत्त्रितयं त्रातुं तात ताडय ताटकाम् ॥ ९८१०॥
ENMSS@9811@1कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।

ENMSS@9811@2त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ ९८११॥
ENMSS@9812@1कालवर्षी च पर्जन्यो धर्मचारी च पार्थिवः ।
ENMSS@9812@2सम्पद् यदैषा भवति सा बिभर्ति सुखं प्रजाः ॥ ९८१२॥
ENMSS@9813@1कालविद्भिर्विनिर्णीतं पाण्डित्यं यस्य राघव ।
ENMSS@9813@2अनध्यार्पित एवासौ तज्ज्ञश्चेद् दैवमुत्तमम् ॥ ९८१३॥
ENMSS@9814@1कालविद्भिर्विनिर्णीता यस्यातिचिरजीविता ।
ENMSS@9814@2स चेज्जीवति संच्छिन्नशिरास्तद् दैवमुत्तमम् ॥ ९८१४॥
ENMSS@9815@1कालव्यालहतं वीक्ष्य पतन्तं भानुमम्बरात् ।
ENMSS@9815@2ओषधीशं समादाय धावतीव पितृप्रसूः ॥ ९८१५॥
ENMSS@9816@1कालविच्छ्रोत्रियो राजा नदी साधुश्च पञ्चमः ।
ENMSS@9816@2एते यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ ९८१६॥
ENMSS@9817@1कालश्चालयति प्रायः पण्डितान् पामरानपि ।
ENMSS@9817@2तं चेच्चिकीर्षसि वशे तितिक्षैव महौषधम् ॥ ९८१७॥
ENMSS@9818@1कालश्चेत् करुणापरः कलियुगं यद्यद्य धर्मप्रियं निस्त्रिंशो यदि पेशलो विषधरः सन्तोषदायी यदि ।
ENMSS@9818@2अग्निश्चेदतिशीतलं खलजनः सर्वोपकारी स चेद् आयुष्यं यदि वा भविष्यति विषं वेश्यापि तद् रागिणी ॥ ९८१८॥
ENMSS@9819@1कालस्य कारणं राजा सदसत्कर्मणस्त्वतः ।
ENMSS@9819@2सुकार्योद्यतदण्डाभ्यां स्वधर्मे स्थापयेत् प्रजाः ॥ ९८१९॥
ENMSS@9820@1॥। ॥। ॥। ॥। ॥। ॥। ।
ENMSS@9820@2कालस्य सुमहद्वीर्यं सर्वभूतेषु लक्ष्मण ॥ ९८२०॥
ENMSS@9821@1कालस्यैव वशो सर्वं दुर्गं दुर्गतरं च यत् ।
ENMSS@9821@2काले क्रुद्धे कथं कालात् त्राणं नोऽद्य भविष्यति ॥ ९८२१॥
ENMSS@9821A@1कालागरूद्गारसुगन्धिगन्ध- धूपाधिवासाश्रयभूगृहेषु ।
ENMSS@9821A@2न तत्र सुर्माघसमीरणेभ्यः श्यामाकुचोष्माश्रयिणः पुमांसः ॥
ENMSS@9822@1कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः पुष्पावतंससुरभीकृतकेशपाशाः ।
ENMSS@9822@2श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे शय्यागृहं गुरुगृहात् प्रविशन्ति नार्यः ॥ ९८२२॥
ENMSS@9823@1कालागुरौ सुरभितातिशयेऽपि सङ्गाद् आरभ्यते सुरभितापरपादपेऽपि ।

ENMSS@9823@2पाटीरपाटवमिदं तव सङ्गिवातैस् तादात्म्यमेति कतरो न तरोः समूहः
॥ ९८२३॥
ENMSS@9824@1कालाग्निरुद्र आधारे शक्तिः कुण्डलिनी तथा ।
ENMSS@9824@2आनन्दाख्या स्वधिष्ठाने शक्त्या कामाख्यया सह ॥ ९८२४॥
ENMSS@9825@1कालातिक्रमणं कुरुष्व तडितां विस्फूर्जितैस्त्रासय स्फारैर्भीषय
गर्जितैरतितरां कार्ष्ण्यं मुखे दर्शय ।
ENMSS@9825@2यस्यानन्यगतेः पयोद मनसो जिज्ञासया चातक- स्याधेहि त्वमिहाखिलं
तदपि न त्वत्तः परं याचते ॥ ९८२५॥
ENMSS@9826@1कालातिक्रमणं वृत्तेर्यो न कुर्वीत भूपतिः ।
ENMSS@9826@2कदाचित् तं न मुञ्चन्ति भर्त्सिता अपि सेवकाः ॥ ९८२६॥
ENMSS@9827@1कालातिक्रमणे ह्येव भक्तवेतनयोर्भृताः ।
ENMSS@9827@2भर्तुः कुप्यन्ति दुष्यन्ति सोऽनर्थः सुमहान् स्मृतः ॥ ९८२७॥
ENMSS@9828@1कालातिपातः कार्याणां धर्मार्थपरिपीडनम् ।
ENMSS@9828@2नित्याभ्यन्तरवर्तित्वात् साधुप्रकृतिकोपनम् ॥ ९८२८॥
ENMSS@9829@1रहस्यभेदस्तत् पक्षाद् अकार्येषु प्रवर्तनम् ।
ENMSS@9829@2ईर्ष्यामर्षस्तथा क्रोधो निरोधः साहसानि च ॥ ९८२९॥
ENMSS@9830@1इत्यादि च स्त्रीव्यसने यच्च पूर्वं प्रकीर्तितम् ।
ENMSS@9830@2तस्मात् स्त्रीव्यसनं राजा राज्यकामः परित्यजेत् ॥ ९८३०॥
ENMSS@9831@1कालात् प्ररोहति विश्वं पुनः कालः प्रवर्तते ।
ENMSS@9831@2स्थूलसूक्ष्मगतिः कालो विविधं तस्य चोच्यते ॥ ९८३१॥
ENMSS@9832@1कालात् प्रवर्तते बीजं कालाद् गर्भं प्रमुञ्चति ।
ENMSS@9832@2कालो जनयते पुत्रं पुनः कालोऽपि संहरेत् ॥ ९८३२॥
ENMSS@9833@1कालाद् प्ररोहते बीजं फलं कालात् प्रवर्तते ।
ENMSS@9833@2कालो हि वर्तयेत् सृष्टिं पुनः कालो हि संहरेत् ॥ ९८३३॥
ENMSS@9834@1कालानपास्य विषुवायनसंक्रमादीन् अस्तंगते हिमकरे च दिवाकरे च ।
ENMSS@9834@2अम्ब स्मरेयमपि ते चरणारविन्दम् आनन्दलक्षणमपास्तसमस्तभेदम्
॥ ९८३४॥
ENMSS@9835@1कालानुकूल्यं विस्पष्टं राघवस्यार्जुनस्य च ।
ENMSS@9835@2अनुकूले यदा दैवे क्रियाल्पा सुफला भवेत् ॥ ९८३५॥
ENMSS@9836@1कालान्तरे ह्यनर्थाय गृध्रो गेहोपरि स्थितः ।

ENMSS@9836@2खलो गृहसमीपस्थः सद्योऽनर्थाय देहिनाम् ॥ ९८३६॥

ENMSS@9837@1कालञ्जराः भारसहास्तेषां वक्ष्यामि लक्षणम् ।

ENMSS@9837@2शतार्धमङ्गुलानां तु श्रेष्ठं खड्गं प्रकीर्तितम् ॥ ९८३७॥

ENMSS@9838@1कालिदास कलावास दासवच्चालितो यदि ।

ENMSS@9838@2राजमार्गे व्रजन्नत्र परेषां तत्र का त्रपा ॥ ९८३८॥

ENMSS@9839@1कालिदासकविता नवं वयो माहिषं दधि सशर्करं पयः ।

ENMSS@9839@2एणमांसमबला च कोमला सम्भवन्तु मम जन्मजन्मनि ॥ ९८३९॥

ENMSS@9840@1कालिदासकवेर्वाणी कदाचिन् मद्गिरा सह ।

ENMSS@9840@2कलयत्यर्थसाम्यं चेद् भीता भीता पदे पदे ॥ ९८४०॥

ENMSS@9841@1कालिन्दि, ब्रूहि कुम्भोद्भव, जलधिरहं नाम गृह्णासि कस्माच् छत्रोर्मे, नर्मदाहं त्वमपि वदसि मे नाम कस्मात् सपत्न्याः ।

ENMSS@9841@2मालिन्यं तर्हि कस्मादनुभवसि, मिलत्कज्जलैर्मालवीनां नेत्राम्भोभिः, किमासां समजनि, कुपितः कुन्तलक्षोणिपालः ॥ ९८४१॥

ENMSS@9842@1कालिन्दीं वीक्ष्य यातां सुललितवदनो मातरं गेहगोपीः कार्यासक्ताः समन्तादनुगतनयनो गोरसागारमन्तः ।

ENMSS@9842@2गत्वा भाण्डानि भित्त्वा मधुमधु शनकैर्गोरसं भक्षमाणः शीघ्रप्रत्याप्तनन्दाकलितसितमुखो नन्दसूनुः शिवाय ॥ ९८४२॥

ENMSS@9843@1कालिन्दीकलकूलकाननकृतक्रीडाकलापोल्लस द्- गोगोपालकबालकैः प्रतिदिशं

सानन्दमाविष्टितम् ।

ENMSS@9843@2वंशीनादवशीकृतव्रजवधूस्वान्तं सदाह्लादकं सद्भक्त्या समुपास्महे वयमघध्वंसैकधीरं महः ॥ ९८४३॥

ENMSS@9844@1कालिन्दीकेशपाशः परिलसति महीनायिकायास्तनूजा जह्वीः सत्पुण्यसंघो गुण इह सलिलं यच्च सारस्वसं तु ।

ENMSS@9844@2वेणी त्वेषा विशेषादमरवरलसत्स्नेहयुक्ता वियुक्ता बन्धेनेत्यत्र चित्रं विलसति नितरां यत्तमोवर्णहीना ॥ ९८४४॥

ENMSS@9845@1कालिन्दीचारुवीचीनिचय इति मुदा गाहिता नैचिकीभिर् बाला कादम्बिनीति

प्रमुदितहृदयं वीक्षिता नीलकण्ठैः ।

ENMSS@9845@2उत्तंसार्थं तमालस्तबक इति हृता मुग्धगोपाङ्गनाभिः श्रेयो नः कल्पयन्तां मधुमथनतनुस्वच्छकान्तिप्रवाहाः ॥ ९८४५॥

ENMSS@9846@1कालिन्दीजलकुञ्जवञ्जुलवनच्छायानिषण्णात्मनो

राधाबद्धनवानुरागरसिकस्योत्कण्ठितं गायतः ।

ENMSS@9846@2तत्पायादपरिस्खलज्ञ्जलरुहापीडं कलस्पृङ्गत-

ग्रीवोत्तानितकर्णतर्णककुलैराकर्ण्यमानं हरेः ॥ ९८४६॥

ENMSS@9847@1कालिन्दीजलकेलिलोलतरुणीरावीतचीनांशु का  निर्गत्याङ्गजलानि सारितवतीरालोक्य सर्वा दिशः ।

ENMSS@9847@2तीरोपान्तमिलन्निकुञ्जभवने गूढं चिरात् पश्यतः  शौरेः संभ्रमयन्निमा विजयते साकूतवेणुध्वनिः ॥ ९८४७॥

ENMSS@9847A@1कालिन्दीतटभेदि हास्तिनपुरीदौस्थ्यादिभिः ख्यापित-  स्थेमा यस्य जयत्यखण्डजगदानन्दैककन्दो भूजः ।

ENMSS@9847A@2मुष्ट्या निष्ठुरयैष मुष्टिकशिरोनिष्ठ्यूतरक्तच्छटाच्-

छद्मोद्वान्तरुषा भिनत्तु भवतां भद्रेतरं लाङ्गलम् ॥

ENMSS@9848@1कालिन्दीनर्मदाम्भःस्रुतमदसलिलोत्सङ्गिनौ पुष्पवन्तौ  विभ्राणः कुम्भयुग्मं गगनतलततः स्वर्धुनीपूरशुण्डः ।

ENMSS@9848@2घण्टालः साधुवादैरनभिमतयशो देव मृद्नन् मृणालं

कीर्तिस्तोमाभ्रकुम्भी जगदुदरसरःसंभ्रमी बम्भ्रमीति ॥ ९८४८॥

ENMSS@9849@1कालिन्दीपुलिनान्तवञ्जुललताकुञ्जे कुतश्चित् क्रमात्  सुप्तस्यैव मिथः कथाजुषि शनैः सम्वाहिकामण्डले ।

ENMSS@9849@2वैदेहीं दशकन्धरोऽपहरतीत्याकर्ण्य कंसद्विषो  हुं हुं वत्स

धनुर्धनुर्धनुरिति व्यग्रा गिरः पान्तु वः ॥ ९८४९॥

ENMSS@9850@1कालिन्दीपुलिने मया, न न मया शैलोपशल्ये, न न  न्यग्रोधस्य तले मया,

न न मया राधापितुः प्राङ्गणे ।

ENMSS@9850@2दृष्टः कृष्ण इतीरितस्य सभयं गोपैर्यशोदापतेर् विस्मेरस्य पुरो

हसन् निजगृहान्निर्यन् हरिः पातु वः ॥ ९८५०॥

ENMSS@9851@1कालिन्दीपुलिनोदरेषु मुसली यावद् गतः क्रीडितुं  तावत् कर्बुरिकापयः पिब

हरे वार्धिष्यते ते शिखा ।

ENMSS@9851@2इत्थं बालतया प्रतारणपरा श्रुत्वा यशोदागिरः  पायाद्वः स्वशिखां

स्पृशन् प्रमुदितः क्षीरेऽर्धपीते हरिः ॥ ९८५१॥

ENMSS@9852@1कालिन्दीमनुकूलकोमलरयामिन्दीवरश्यामलाः  शैलोपान्तभुवः कदम्बकुसुमैरामोदिनः कन्दरान् ।

ENMSS@9852@2राधां च प्रथमाभिसारमधुरां जातानुतापः स्मरन्  अस्तु

द्वारवतीपतिस्त्रिभुवनामोदाय दामोदरः ॥ ९८५२॥

ENMSS@9853@1कालिन्दीयं द्विरददलिंताम्भोजिनीरेणुरम्या यस्याः कृष्णः शिशिरपयसस्तीरकेदारचारी ।

ENMSS@9853@2गायन्तीनां किमपि मधुरं बालगोपालिकानां लीलालोलः कमलकलिकाः कर्णपूरीचकार ॥ ९८५३॥

ENMSS@9854@1कालिन्दीयति कज्जलीयति कलानाथाङ्कमालीयति व्यालीयत्यहिमण्डलीयति मुहुः
श्रीकण्ठकण्ठीयति ।

ENMSS@9854@2शैवालीयति कोकिलीयति महानीलाभ्रजालीयति भ्रह्माण्डे रिपुदुर्यशस्तव नृपालंकारचूडामणे ॥ ९८५४॥

ENMSS@9855@1कालिन्दीराशिरूर्ध्वं ननु मधुपकुलं मालतीपुञ्जगं वा सन्दोहं वैणनाभेर्जयति शशिमुखीकेशजालं मनोज्ञम् ।

ENMSS@9855@2भ्रान्तिं प्राप्नोषि किं त्वं बत गरलधराभोग एष प्रचण्डो लोकं प्रत्यक्षभूतं ग्रसति बत बलाद् यन्न भूयःसुखित्वम् ॥ ९८५५॥

ENMSS@9856@1कालिन्दीवीचिपुञ्जैः कुवलयविपिनैरिन्द्रनीलच्छटाभिः शैवालैः कज्जलौघैरलितिमिरभरैर्बालजीमूतजालैः ।

ENMSS@9856@2कस्तूरीकोकिलानां ततिभिरिव सहाचाकचिक्यप्रपञ्चैस् त्रैलोक्यं पूरयन्ती शमयतु विपदः शांभवी कण्ठनाला ॥ ९८५६॥

ENMSS@9857@1कालिन्द्याः पुलिनं प्रदोषमरुतो रम्याः शशाङ्कांशवः सन्तापं न हरन्तु नाम नितरां कुर्वन्ति कस्मात् पुनः ।

ENMSS@9857@2सन्दष्टं व्रजयोषितामिह हरेः संश्रृण्वतोऽन्तःपुरे निःश्वासा प्रसृता चयन्ति रमणीसौभाग्यगर्वच्छिदः ॥ ९८५७॥

ENMSS@9858@1कालिन्द्याः पुलिनेन्द्रनीलशकलश्यामाम्भसोऽन्तर्जले मग्नस्याञ्जनपुञ्जमेचकनिभस्याहेः कुतोऽन्वेषणम् ।

ENMSS@9858@2ताराभाः फणचक्रवालमणयो न स्युर्यदि द्योतिनो यैरेवोन्नतिमाप्नुवन्ति गुणिनस्तैरेव यान्त्यापदम् ॥ ९८५८॥

ENMSS@9859@1कालिन्द्याः पुलिनेषु केलिकुपितामुत्सृज्य रासे रसं गच्छन्तीमनुगच्छतोऽश्रुकलुषां कंसद्विषो राधिकाम् ।

ENMSS@9859@2तत्पादप्रतिमानिवेशितपदस्योद्भूतरोमोद्गतेर् अक्षुण्णोऽनुनयः प्रसन्नदयितादृष्टस्य पुष्णातु वः ॥ ९८५९॥

ENMSS@9859A@1काली कलकलरूपा महिषासुरविनाशिनी वीरा ।

ENMSS@9859A@2शुम्भादाननिशुम्भा- स्वादनतोषावतु त्वां न् पते ॥

ENMSS@9860@1कालीकेलीकलापक्रमकलितकलाकौतुकी कुन्दकान्तिः कल्पान्ते कालकल्पः

ऋतुकदनकथाकन्दलीकूटकन्दः ।

ENMSS@9860@2काकोलक्रूरकण्ठः कलितकलकलत्क्लान्तकन्दर्पकान्ता- कारुण्याक्रान्तकान्तः

कलयतु कुशलं किङ्कराणां कपर्दी ॥ ९८६०॥

ENMSS@9861@1कालीनागग्रहव्यग्रे श्रीकृष्णे यमुनातटे ।

ENMSS@9861@2झंपयाधोमुखे जाते विपरीतं जगत्रयम् ॥ ९८६१॥

ENMSS@9862@1कालीयकक्षोदविलेपनश्रियं दिशद् दिशामुल्लसदंशुमद्द्युति ।

ENMSS@9862@2खातं खुरैर्मुद्गभुजां विपप्रथे गिरेरधः काञ्चनभूमिजं रजः

॥ ९८६२॥

ENMSS@9863@1कालीयैः कुचकाञ्चनाचलचमत्कारः किमुत्सार्यते कीदृक्

कुङ्कमकेसरत्विषि मुखे कस्तूरिकालेपनम् ।

ENMSS@9863@2स्फीतेऽस्मित् जघने सरोजवदने किं नीलचोलार्पणं कस्मै साहसिनि

त्वमिच्छसि विधेर्विन्यासमन्यादृशम् ॥ ९८६३॥

ENMSS@9864@1कालुष्यं जनयञ्जडस्य रचयन् धर्मद्रुमोन्सूलनं

क्लिश्यन्नीतिकृपाक्षमाकमलिनीं लोभाम्बुधिं वधैयन् ।

ENMSS@9864@2मर्यादातटमुद्रुजञ्छुभमनोहंसप्रवासं दिशन् किं न क्लेशकरः

परिग्रहनदीपूरः प्रवृद्धिं गतः ॥ ९८६४॥

ENMSS@9865@1कालुष्यं पयसां विलोक्य शनकैरुड्डीय हंसा गता

धाराजर्जरकेसरास्फुटरुचः पद्मा निमग्ना जले ।

ENMSS@9865@2सा सर्वर्तुसुखावतारपदवी छन्ना तृणैर्नूतनैः कष्टं तादृगपि

स्वभावविमलं वृद्ध्यैव नष्टं सरः ॥ ९८६५॥

ENMSS@9866@1कालुष्यमुद्वीक्ष्य विधुं कलङ्किनं बुधा यदाहुर्मम सङ्गतं न तत् ।

ENMSS@9866@2जाने निजाङ्के दयितास्य वर्तते निशीथिनीनाथकलङ्किता नहि ॥ ९८६६॥

ENMSS@9867@1काले काले न किमुपनतं भुञ्जते भोज्यजातं गृह्णन्त्यम्भो न किमथ

न किं संविशन्ति क्षपासु ।

ENMSS@9867@2पुष्णन्ति स्वान् न किमु पृथुकान् स्त्रीषु किं नो रमन्ते

कृत्याकृत्यव्यपगतधियां कस्तिरश्चां च भेदः ॥ ९८६७॥

ENMSS@9868@1काले काले विरेच्यं स्यात् पात्रं पूरयितुं पुनः ।

ENMSS@9868@2सञ्जीकुर्मो यदावाप्तुं गुर्वीं ग्रहणशीलताम् ।

ENMSS@9868@3स्वात्मनोऽन्तस्तदस्माभी रिक्ततैवानुभूयते ॥ ९८६८॥

ENMSS@9868A@1काले कथंचिच्चरतां धवानां  कान्त्या स्वया कर्दमितेऽन्तरिक्षे ।

ENMSS@9868A@2अम्भोधराः श्रान्तिजुषामभूवन्  आलम्बदण्डा इव वारिधाराः ॥

ENMSS@9869@1काले खल्वागता देव्यः पुत्रे मोहमुपागते ।

ENMSS@9869@2हस्तस्पर्शो हि मात् णाम् अजलस्य जलाञ्जलिः ॥ ९८६९॥

ENMSS@9869A@1काले तरोरनुपकारि फलं फलित्वा  लज्जावशादुचित एव विनाशयोगः ।

ENMSS@9869A@2एतत् तु चित्रमुपकृत्य फलैः परेभ्यः  प्राणान् निजान् झटिति यत् कदली

जहाति ॥

ENMSS@9870@1कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।

ENMSS@9870@2मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥ ९८७०॥

ENMSS@9871@1काले देशे यथायुक्तं नरः कुर्वन्नुपैति काम् ।

ENMSS@9871@2भुक्तवन्तावलप्स्येतां किमन्नमकरिष्यताम् ॥ ९८७१॥

ENMSS@9872@1काले धर्मार्थकामान् यः संमन्त्र्य सचिवैः सह ।

ENMSS@9872@2निषेवेतात्मवांल्लोके न स व्यसनमाप्नुयात् ॥ ९८७२॥

ENMSS@9873@1कालेन कृष्णाश्च सिताश्च रात्र्यः  कालेन चन्द्रः परिपूर्णबिम्बः ।

ENMSS@9873@2नाकालतः पुष्पफलं नगानां  नाकालवेगाः सरितो वहन्ति ॥ ९८७३॥

ENMSS@9874@1कालेन क्षितिवारिवह्निपवनव्योमादियुक्तं जगद्  ब्रह्माद्याश्च सुराः प्रयान्ति विलयं विद्मो विवारादिति ।

ENMSS@9874@2पश्यामोऽपि विनश्यतेऽनवरतं लोकाननेकान् मुधा  मायामोहमयीं भवप्रणयिनीं नास्थां जहीमो वयम् ॥ ९८७४॥

ENMSS@9875@1कालेन याति क्रिमितां महेन्द्रो  महेन्द्रभावं क्रिमिरप्युपैति ।

ENMSS@9875@2अयं प्रथीयानयमप्रतिष्ठ  इत्येष निष्ठानुचितोऽभिमानः ॥ ९८७५॥

ENMSS@9876@1कालेन रिपुणा संधिः काले मित्रेण विग्रहः ।

ENMSS@9876@2कार्यकारणमाश्रित्य कालं क्षिपति पण्डितः ॥ ९८७६॥

ENMSS@9877@1कालेन शीघ्राः प्रविवान्ति वाताः  कालेन वृष्टिर्जलदानुपैति ।

ENMSS@9877@2कालेन पद्मोत्पलवज्जलं च  कालेन पुष्पन्ति नगा वनेषु ॥ ९८७७॥

ENMSS@9878@1काले नीलबलाहके सतडिति प्रीतिप्रदे बर्हिणा  आश्चर्यं कथयामि वः

श्रृणुत भो यद् वृत्तमस्मिन् गृहे ।

ENMSS@9878@2सौभाग्यव्ययशङ्कयैकशयने कान्ताप्रियाभ्यामहो मानिभ्यां बत रात्रिमेव सकलां चीर्णं प्रवासिव्रतम् ॥ ९८७८॥

ENMSS@9879@1कालेऽन्नस्य क्षुधमवहितो दित्समानो विधृत्य नो भोक्तव्यं प्रथममतिथेर्यः सदा तिष्ठतीति ।

ENMSS@9879@2तस्याप्राप्तावपि गतमलं पुण्यराशिं श्रयन्तं तं दातारं जिनपतिमते मुख्यमाहुर्जिनेद्राः ॥ ९८७९॥

ENMSS@9880@1काले महत्यनवधावपतन् कदापि क्वाप्यन्तिमे जनुषि कोऽपि गतिं लभेत ।

ENMSS@9880@2इत्थं समर्थनविधिः परमागमानां पर्यायसूक्तिविधया नयनं नञर्थे ॥ ९८८०॥

ENMSS@9881@1काले मृदुर्यो भवति काले भवति दारुणः ।

ENMSS@9881@2राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ॥ ९८८१॥

ENMSS@9882@1काले मृदुर्यो भवति काले भवति दारुणः ।

ENMSS@9882@2स वै सुखमवाप्नोति लोकेऽमुष्मिन्निहैव च ॥ ९८८२॥

ENMSS@9883@1काले मृदुर्यो भवति काले भवति दारुणः ।

ENMSS@9883@2स साधयति कृत्यानि शत्रूंश्चैवाधितिष्ठति ॥ ९८८३॥

ENMSS@9884@1काले भृदुश्च तीक्ष्णश्च नृपः स्याद् यदि सूर्यवत् ।

ENMSS@9884@2उदयः क्रियते तस्य मण्डलेनानुरागिणा ॥ ९८८४॥

ENMSS@9885@1काले यथावधिगत- नरपतिकोपाद्यशेषवृत्तान्तः ।

ENMSS@9885@2नृपभवने नतमूर्तिः संयतवस्त्रः शनैः प्रविशेत् ॥ ९८८५॥

ENMSS@9886@1काले वाप्यथवाकाले संध्यावन्दनतत्परः ।

ENMSS@9886@2अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः ॥ ९८८६॥

ENMSS@9887@1काले वारिधराणाम् अपतितया नैव शक्यते स्थातुम् ।

ENMSS@9887@2उत्कण्ठितासि तरले न हि न हि सखि पिच्छिलः पन्थाः ॥ ९८८७॥

ENMSS@9888@1काले विद्युत्प्रभाजाले शिखिताण्डवमण्डिते ।

ENMSS@9888@2कान्तः सर्वजनाभीष्टो बालेन्दुः खे न लभ्यते ॥ ९८८८॥

ENMSS@9889@1काले संततवर्षिणो जलमुचः सस्यैः समृद्धा धरा भूपाला निजधर्मपालनपरा विप्रास्त्रयीनिर्भराः ।

ENMSS@9889@2स्वादुक्षीरनतोधसः प्रतिदिनं गावो निरस्तापदः सन्तः शान्तिपरा भवन्तु कृतिनः सौजन्यभाजो जनाः ॥ ९८८९॥

ENMSS@9890@1काले सहिष्णुर्गिरिवद् असहिष्णुश्च वह्निवत् ।

ENMSS@9890@2स्कन्धेनापि वहेच्छत्रून् प्रियाणि समुदाहरन् ॥ ९८९०॥
ENMSS@9891@1काले हितं मितं ब्रूयाद् अविसंवादि पेशलम् ।
ENMSS@9891@2पूर्वाभिभाषी सुमुखः सुशीलः करुणो मृदुः ॥ ९८९१॥
ENMSS@9892@1काले हितमिताहारविहारी विधसाशनः ।
ENMSS@9892@2अदीनात्मा च सुस्वप्नः शुचिः स्यात् सर्वदा नरः ॥ ९८९२॥
ENMSS@9893@1का लोकमाता किमु देहमुख्यं  रते किमादौ कुरुते मनुष्यः ।
ENMSS@9893@2को दैत्यहन्ता वद वै क्रमेण  गौरीमुखं चुम्बति वासुदेवः ॥ ९८९३॥
ENMSS@9894@1कालो देशः क्रिया कर्ता करणं कार्यमागमः ।
ENMSS@9894@2द्रव्यं फलमिति ब्रह्मन् नवधोक्तोऽजया हरिः ॥ ९८९४॥
ENMSS@9895@1कालो दैवं कर्म जीवः स्वभावो  द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
ENMSS@9895@2तत्संघातो बीजरोहप्रवाहस् त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ ९८९५॥
ENMSS@9896@1कालोपभोगिनः सर्वे नित्यमानन्दिता नराः ।
ENMSS@9896@2सर्वे सत्यरता नित्यं सर्वे धर्मपरायणाः ॥ ९८९६॥
ENMSS@9896A@1कालोपलब्धं कलहंसनाद-  माकर्ण्य कर्णामृतमन्तरिक्षे ।
ENMSS@9896A@2सलीलमुद्घाटितवारिपूरा  सरोजिनी सादरमुज्झगाम ॥
ENMSS@9897@1कालोऽभ्युपैति सकृदेव नरं कथंचित्  प्राप्नोति तं न स पुनः खलु कालकाङ्क्षी ।
ENMSS@9897@2कालेन गोचरगताननपेक्ष्य भक्ष्यान्  मन्दक्रमोऽप्यजगरः समुपैति सिद्धिम् ॥ ९८९७॥
ENMSS@9898@1कालो मधुः कुपित एष च पुष्पधन्वा  धीरा वहन्ति रतिखेदहराः समीराः ।
ENMSS@9898@2केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर् दूरे पतिः कथय किं करणीयमद्य ॥ ९८९८॥
ENMSS@9899@1कालोऽयं भूतमशकघुंधुमानां प्रपातिनाम् ।
ENMSS@9899@2ब्रह्माण्डोदुम्बरोत्थानां बृहत्पादपतां गतः ॥ ९८९९॥
ENMSS@9900@1कालो याति गलत्यायुः क्षीयन्ते च मनोरथाः ।
ENMSS@9900@2सुकृतं च कृतं किंचित् सतां संस्मरणोचितम् ॥ ९९००॥
ENMSS@9901@1कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
ENMSS@9901@2इति ते संशयो मा भूद् राजा कालस्य कारणम् ॥ ९९०१॥
ENMSS@9902@1कालो विकुरुते भावान् सर्वांल्लोके शुभाशुभान् ।
ENMSS@9902@2कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः ॥ ९९०२॥

ENMSS@9903@1कालो हेतुं विकुरुते स्वार्थस्तमनुवर्तते ।

ENMSS@9903@2स्वार्थं प्राज्ञोऽभिजानाति प्राज्ञं लोकोऽनुवर्तते ॥ ९९०३॥

ENMSS@9904@1का विद्या कवितां विनार्थिनि जने त्यागं विना श्रीश्च का को धर्मश्च

कृपां विना नरपतिः को नाम नीतिं विना ।

ENMSS@9904@2कः सूनुर्विनयं विना कुलवधूः का स्वामिभक्तिं विना भोग्यं किं

रमणीं विना क्षितितले किं जन्म कीर्तिं विना ॥ ९९०४॥

ENMSS@9905@1का विषमा दैवगतिः किं लष्टं यज्ञनो गुणग्राही ।

ENMSS@9905@2किं सौख्यं सुकलत्रं किं दुर्ग्राह्यं खलो लोकः ॥ ९९०५॥

ENMSS@9906@1कावेरीं तां समासाद्य विहृतामप्सरोगणैः ।

ENMSS@9906@2तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत् ॥ ९९०६॥

ENMSS@9907@1कावेरी कबरीव भामिनि भुवो देव्याः पुरो दृश्यतां

पूगैर्नागलताश्रितैरुपदिशत्याश्लेषविद्याम् इव ।

ENMSS@9907@2कर्णाटीजनमज्ञनेषु जघनैर्यस्याः पयः प्लावितं पीत्वा

नाभिगुहाभिरात्तरुचिभिः प्राचीं दिशं नीयते ॥ ९९०७॥

ENMSS@9908@1कावेरीतीरकर्पूरपरागामोदसोदराः ।

ENMSS@9908@2रतिस्वेदलवानेते पुरन्ध्रीणां समीरणाः ॥ ९९०८॥

ENMSS@9909@1कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्टः

कर्णाटीचीनपीनस्तनवसनदशान्दोलनास्प न्दमन्दः ।

ENMSS@9909@2लोलल्लाटीललाटालकतिलकलतालास्यलीलाविल् ओलः कष्टं भो दाक्षिणात्य

प्रचलति पवनः पान्थ कान्ताकृतान्तः ॥ ९९०९॥

ENMSS@9909A@1कावेरीरम्यराजीवविलसद्गन्धबन्धुना ।

ENMSS@9909A@2मधुमाससमीरेण वर्धते कुत्र कस्य का ॥

ENMSS@9910@1कावेरीवारिवेल्लल्लहरिपरिकरक्रीडनक्रान्तशीताः

स्फीतश्रीखण्डषण्डभ्रमणभरभव द्भूरिसौरभ्यगर्भाः ।

ENMSS@9910@2चोलस्त्रीलोलचेलाञ्चलचलनकलाक्रान्तकान्तास्तनान्त् आ वान्ति

प्रेयोवियोगातुरतररमणीवैरिणोऽमी समीराः ॥ ९९१०॥

ENMSS@9910A@1कावेरीहृदयाभिरामपुलिने पुण्ये जगन्मङ्गले चन्द्राम्भोजवतीतटे

परिसरे धात्रा समाराधिते ।

ENMSS@9910A@2श्रीरङ्गे भुजगेन्द्रभोगशयने लक्ष्मीमहीसेविते शेते यः पुरुषोत्तमः

स भगवान् नारायणः पातु नः ॥

ENMSS@9910B@1का वेश्या को विरोधोऽयं का प्रशस्तिश्च सङ्गरे ।
ENMSS@9910B@2वृथा प्राणजिहीर्षूणां मूर्खानामीदृशी मतिः ॥
ENMSS@9911@1काव्यं करोति सुकविः  सहृदय एव व्यनक्ति तत्तत्त्वम् ।
ENMSS@9911@2रत्नं खनिः प्रसूते  रचयति शिल्पी तु तत्सुषमान् ॥ ९९११॥
ENMSS@9911A@1काव्यं करोतु परिजल्पतु संस्कृतं वा  सर्वाः कलाः समधिगच्छतु वाच्यमानाः ।
ENMSS@9911A@2लोकस्थितिं यदि न वेत्ति यथानुरूपां  सर्वस्य मूर्खनिकरस्य स चक्रवर्ती ॥
ENMSS@9912@1काव्यं करोमि न हि चारुतरं करोमि  यत्नात् करोमि यदि चारुतरं करोमि ।
ENMSS@9912@2भूपालमौलिमणिमण्डितपादपीठ  हे साहसाङ्क कवयामि वयामि यामि ॥ ९९१२॥
ENMSS@9913@1काव्यं करोषि किमु ते सुहृदो न सन्ति  ये त्वामुदीर्णपवनं विनिवारयन्ति ।
ENMSS@9913@2गव्यं घृतं पिब निवातगृहं प्रविश्य  वाताधिका हि पुरुषाः कवयो भवन्ति ॥ ९९१३॥
ENMSS@9914@1काव्यं चार्वपि रसिक-  प्रीतिकरं भवति नैकरसबद्धम् ।
ENMSS@9914@2सुरतमनाहितकलहं  हरिणदृशो नाभिनन्दयति ॥ ९९१४॥
ENMSS@9914A@1काव्यं चेत् सरसं किमर्थममृतं वक्त्रं कुरङ्गीदृशां  चेत् कन्दर्पविपाण्डुगण्डफलकं राकाशशाङ्केन किम् ।
ENMSS@9914A@2स्वातन्त्र्यं यदि जीवितावधि मुधा स्वर्भूर्भुवो वैभवं  वैदर्भी यदि बद्धयौवनभरा प्रीत्या सरत्यापि किम् ॥
ENMSS@9915@1काव्यं यदीयं गृहमम्बरं वा  सुवर्णचित्रोज्ज्वलमाविभाति ।
ENMSS@9915@2स नन्दनो नन्दति कुन्दनस्य  श्रीकृष्णरामः कविराप्तकामः ॥ ९९१५॥
ENMSS@9916@1काव्यं यद्यपि रसिकं  प्रीतिकरं भवति नैकरसबद्धम् ।
ENMSS@9916@2सुरतमनाहितकलहं  हरिणदृशो नाभिनन्दयति ॥ ९९१६॥
ENMSS@9917@1काव्यं यशसेऽर्थकृते  व्यवहारविदे शिवेतरक्षतये ।
ENMSS@9917@2सद्यः परनिर्वृतये  कान्तासम्मिततयोपदेशयुजे ॥ ९९१७॥
ENMSS@9918@1काव्यं सुधा रसज्ञानां कामिनां कामिनी सुधा ।
ENMSS@9918@2धनं सुधा सलोभानां शान्तिः सन्यसिनां सुधा ॥ ९९१८॥
ENMSS@9919@1काव्यप्रपञ्चचुञ्चू  रचयति काव्यं न सारविद् भवति ।

ENMSS@9919@2तरवः फलानि सुवते विन्दति सारं पतङ्गसमुदायः ॥ ९९१९॥

ENMSS@9920@1काव्यमय्यो गिरो यावच्चरन्ति विशदा भुवि ।

ENMSS@9920@2तावत् सारस्वतं स्थानं कविरासाद्य मोदते ॥ ९९२०॥

ENMSS@9921@1काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।

ENMSS@9921@2व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥ ९९२१॥

ENMSS@9922@1काव्यस्याक्षरमैत्री- भाजो न च कर्कशा न च ग्राम्याः ।

ENMSS@9922@2शब्दा अपि पुरुषा अपि साधव एवार्थबोधाय ॥ ९९२२॥

ENMSS@9923@1काव्यस्याम्रफलस्यापि कोमलस्येतरस्य च ।

ENMSS@9923@2बन्धच्छायाविशेषेण रसोऽप्यन्यादृशो भवेत् ॥ ९९२३॥

ENMSS@9924@1काऽव्याकुलिता माद्यति काञ्चनमुद्रां मनोरमामाहुः ।

ENMSS@9924@2इह कालिकावतंसित- चन्द्रकला कामिता योग्या ॥ ९९२४॥

ENMSS@9925@1काव्यात्मना मनसि पर्यणमन् पुरा मे पीयूषसारसरसास्तव ये विलासाः ।

ENMSS@9925@2तानन्तरेण रमणी रमणीयशीले चेतोहरा सुकविता भविता कथं नः

॥ ९९२५॥

ENMSS@9926@1काव्यामृतं दुर्जनराहुनीतं प्राप्यं भवेन् नो सुमनोजनस्य ।

ENMSS@9926@2सच्चक्रमव्याजविराजमान- तैक्ष्ण्यप्रकर्षं यदि नाम न स्यात् ॥ ९९२६॥

ENMSS@9926A@1काव्ये गान्धर्वे नृत्तशास्त्रे विधिज्ञं दक्षं दातारं दक्षिणं

दाक्षिणात्यम् ।

ENMSS@9926A@2वेश्या का नेच्छेत् स्वामिनं कोङ्कणानां स्याच्चेदस्य स्त्रीष्वार्जवात्

संनिपातः ॥

ENMSS@9927@1काव्येन मूर्खधनिनं प्रणयेन नीचं वेश्यां श्रुतेन

शठशात्रवमार्जवेन ।

ENMSS@9927@2इच्छन्ति ये जगति रञ्जयितुं विमूढास् तेषामरण्यरुदितेन समः प्रयासः

॥ ९९२७॥

ENMSS@9928@1काव्ये भाव्यं गुणैस्तत्र दुर्जना दूषयन्ति यत् ।

ENMSS@9928@2न दुर्गतगृहे संधिर्दीयते जातु दस्युभिः ॥ ९९२८॥

ENMSS@9929@1काव्ये भव्यतमेऽपि विज्ञनिवहैरास्वाद्यमाने मुहुर् दोषान्वेषणमेव

मत्सरजुषां नैसर्गिको दुर्ग्रहः ।

ENMSS@9929@2कासारेऽपि विकासिपङ्कजचये खेलन्मराले पुनः क्रौञ्चश्चञ्चुपुटेन कुञ्चितवपुः शम्बूकमन्वेषते ॥ ९९२९॥

ENMSS@9930@1काव्ये शुभे विरचिते खलु नो खलेभ्यः कश्चिद् गुणो भवति यद्यपि सम्प्रतीह ।

ENMSS@9930@2कुर्यां तथापि सुजनार्थमिदं यतः किं यूकाभयेन परिधानविमोक्षणं स्यात् ॥ ९९३०॥

ENMSS@9931@1काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।

ENMSS@9931@2तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥ ९९३१॥

ENMSS@9932@1काव्यैकपात्रविलसद्गुणदोषदुग्ध- पाथःसमूहपृथगुद्धरणे विदग्धाः ।

ENMSS@9932@2जानन्ति कर्तुमभियुक्ततया विभागं चन्द्रावदातमतयः कविराजहंसाः ॥ ९९३२॥

ENMSS@9933@1काव्यैरुपहता वेदाः पुत्रा जामातृभिर्हृताः ।

ENMSS@9933@2अश्वैरुपहता गावः पण्यस्त्रीभिः कुलाङ्गनाः ॥ ९९३३॥

ENMSS@9934@1का शम्भुकान्ता किमु चन्द्रकान्तं कान्तामुखं किं कुरुते भुजंगः ।

ENMSS@9934@2कः श्रीपतिः का विषमा समस्या गौरीमुखं चुम्बति वासुदेवः ॥ ९९३४॥

ENMSS@9935@1काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या ।

ENMSS@9935@2आपक्वशालिरुचिरा तनुगात्रयष्टिः प्रात्पा शरन् नववधूरिव रूपरम्या ॥ ९९३५॥

ENMSS@9936@1काशाः काशा इवाभान्ति सरांसीव सरांसि च ।

ENMSS@9936@2चेतांस्याचिक्षिपुर्यूनां निम्नगा इव निम्नगाः ॥ ९९३६॥

ENMSS@9937@1काशाः क्षीरनिकाशा दधिशरवर्णानि सप्तपर्णानि ।

ENMSS@9937@2नवनीतनिभश्चन्द्रः शरदि च तक्रप्रभा ज्योत्स्ना ॥ ९९३७॥

ENMSS@9938@1काशीयं समलंकृता निरुपमस्वर्गापगासंभव- स्थूलोत्तारतरङ्गबिन्दुविलसन्मुक्ताफलश्रेणिभिः ।

ENMSS@9938@2चञ्चच्चञ्चलचञ्चरीकनिकरश्यामाम्बरा राजते कासारस्थविनिद्रपद्मनयना विश्वेश्वरप्रेयसी ॥ ९९३८॥

ENMSS@9939@1का शृङ्गारकथा कुतूहलकथा गीतादिविद्याकया मद्यत्कुम्भिकथा तुरङ्गमकथा कोदण्डदीक्षाकथा ।

ENMSS@9939@2एकैवास्ति मिथः पलायनकथा त्वद्भीतरक्षःपतेर् देव श्रीरघुनाथ तस्य नगरे स्वप्नेऽपि नान्या कथा ॥ ९९३९॥

ENMSS@9940@1काशैर्मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि ।
ENMSS@9940@2सप्तच्छदैः कुसुमभारनतैर्वनान्ताः शुक्लीकृतान्युपवनानि च मालतीभिः ॥ ९९४०॥
ENMSS@9941@1का शैलपुत्री किमु नेत्ररम्यं शुकार्भकः किं कुरुते फलानि ।
ENMSS@9941@2मोक्षस्य दाता स्मरणेन को वा गौरीमुखं चुम्बति वासुदेवः ॥ ९९४१॥
ENMSS@9942@1काश्मर्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते तीराश्मन्तकशिम्बिचुम्बितमुखा धावन्त्यपः पूर्णिकाः ।
ENMSS@9942@2दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितं वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुटाः ॥ ९९४२॥
ENMSS@9942A@1काश्मीरकर्दमकषायकपोलपाली कह्लारदामकलिकाकमनीयचूली ।
ENMSS@9942A@2काचिद् विहारविशिखामुपयाति चोली पालीलसत्करतलामलकस्तनाली ॥
ENMSS@9943@1काश्मीरगौरवपुषामभिसारिकाणाम् आबद्धरेखमभितो रुचिमञ्जरीभिः ।
ENMSS@9943@2एतत् तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥ ९९४३॥
ENMSS@9944@1काश्मीरद्रवगौरि हन्त किमयं भूयोऽङ्गरागे ग्रहः को वा नीलसरोरुहाक्षि नितरां नेत्राञ्जने संभ्रमः ।
ENMSS@9944@2रक्ताशोकदलोपमेयचरणे किं लाक्षया दत्तया नो रागान्तरमीहते निजरुचा विभ्राजमानो मणिः ॥ ९९४४॥
ENMSS@9944A@1काश्मीरधूलीकलिकाविराजद्- बालेन्दुरेखातिलकाभिरामा ।
ENMSS@9944A@2कृकाटिकाकीलितकेशपाशा सा वैष्णवी सारसपत्रनेत्रा ॥
ENMSS@9945@1काश्मीरपङ्कखचितस्तनपृष्ठताम्र- पट्टावकीर्णदयितार्द्रनखाक्षराली ।
ENMSS@9945@2एणीदृशः कुसुमचापनरेन्द्रदत्त- तारुण्यशासनमिव प्रकटीकरोति ॥ ९९४५॥
ENMSS@9946@1काश्मीरीगात्रलेखासु लोलल्लावण्यवीचिषु ।
ENMSS@9946@2द्रावयित्वेव विन्यस्तं स्वर्णं षोडशवर्णकम् ॥ ९९४६॥
ENMSS@9947@1काश्मीरेण दिहानमम्बरतलं वामभ्रुवामानन- द्वैराज्यं

विदधानमिन्दुदृषदां भिन्दानमम्भःशिराः ।

ENMSS@9947@2प्रत्युद्यत्पुरुहूतपत्तनवधूदत्तार्घदूर्वाङ्कुर-

क्षीवोत्सङ्गकुरङ्गमैन्दवमिदं तद्बिम्बमुज्जृम्भते ॥ ९९४७॥

ENMSS@9948@1काश्यां तिष्ठ सखे सुपर्वनिवहैर्नित्यं नुतायां भज श्रीकण्ठं

निजभक्तरक्षणविधौ दक्षं दयावारिधिम् ।

ENMSS@9948@2गाङ्गे वारिणि पापहारिणि कुरु स्नानं स्मर श्रीपतिं त्वं कष्टेन

विनैव मोक्षपदवीं प्राणात्यये प्राप्स्यसि ॥ ९९४८॥

ENMSS@9949@1काश्यां तु मरणान्मुक्तिर्जननात् कमलालये ।

ENMSS@9949@2दर्शनादभ्रसरसः स्मरणादरुणाचले ॥ ९९४९॥

ENMSS@9950@1काश्यां निपातय वपुः श्वपचालये वा स्वर्गं नय त्वमपवर्गमधोगतिं वा ।

ENMSS@9950@2अद्यैव वा कुरु दयां पुनरायतौ वा कः संभ्रमो मम, धने धनिनः प्रमाणम् ॥ ९९५०॥

ENMSS@9951@1काश्यामाकृतिमीशितुर्न लभते हृद्याहितातत्त्वधीर् यस्य श्रीरिव

साऽऽभवत् प्रियतमा या सर्वदाराधिका ।

ENMSS@9951@2शश्वत् तद्व्रतचेतसस्तव पुरापुण्यान्यगण्यानि यद् ब्रह्माद्वैतसुखेऽपि

तद्भजनतो मन्दादरं ते मनः ॥ ९९५१॥

ENMSS@9952@1का श्लाघ्या गुणिनां, क्षमा, परिभवः को, यः स्वकुल्यैः कृतः किं

दुःखं, परसंश्रयो, जगति कः श्लाघ्यो, य आश्रीयते ।

ENMSS@9952@2को मृत्युर्व्यसनं, शुचं जहति के, यैर्निर्जिताः शत्रवः

कैर्विज्ञातमिदं, विराटनगरे छन्नस्थितैः पाण्डवैः ॥ ९९५२॥

ENMSS@9953@1काषायान्न च भोजनादिनियमान्नो वा वने वासतो व्याख्यानादथ वा

मुनिव्रतभराच्चित्तोद्भवः क्षीयते ।

ENMSS@9953@2किं तु स्फीतकलिन्दशैलतनयातीरेषु विक्रीडतो गोविन्दस्य

पदारविन्दभजनारम्भस्य लेशादपि ॥ ९९५३॥

ENMSS@9954@1काष्ठं कल्पतरुः सुमेरुरचलश्चिन्तामणिः प्रस्तरः सूर्यस्तीव्रकरः

शशी च विकलः क्षारो हि वारां निधिः ।

ENMSS@9954@2कामो नष्टतनुर्बलिर्दितिसुतो नन्दी पशुः कामगो नैतांस्ते तुलयामि भो

रघुपते कस्योपमा दीयते ॥ ९९५४॥

ENMSS@9955@1काष्ठं वह्न्युज्झितमपि भवेच्छीतशान्त्यै कपीनां लोम्नो शुद्ध्यै

सलिलमनलश्चाग्निशौचैणकानाम् ।

ENMSS@9955@2जन्तोर्भावा विदधति यथाभाविनः कार्यसिद्धिं  तत्त्वं तेषां क्वचन सहजं वस्तुतो नास्ति किंचित् ॥ ९९५५॥

ENMSS@9956@1काष्ठं शिरसि संस्थाप्य तथा काष्ठेन ताडयेत् ।

ENMSS@9956@2लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते ॥ ९९५६॥

ENMSS@9957@1काष्ठगोलयुगं क्षिप्तं दूरमूर्ध्वपुरःस्थितैः ।

ENMSS@9957@2अप्राप्तधारं पृष्ठेन गच्छेत् पुच्छमुखेन हि ॥ ९९५७॥

ENMSS@9958@1काष्ठपाषाणधातूनां कृत्वा भावेन सेवनम् ।

ENMSS@9958@2श्रद्धया च तथा सिद्धिस्तस्य विष्णुप्रसादतः ॥ ९९५८॥

ENMSS@9958A@1काष्ठमङ्गारतां याति भस्मतां गोमयादिकम् ।

ENMSS@9958A@2वह्नौ कीर्णं सुवर्णं तु सुवर्णोत्कर्षतां व्रजेत् ॥

ENMSS@9959@1काष्ठाग्निं निर्हरेच्चैव तथा कूपांश्च खातयेत् ।

ENMSS@9959@2संशोधयेत् तथा कुपान् कृतान् पूर्वं पयोऽर्थिभिः ॥ ९९५९॥

ENMSS@9960@1काष्ठादग्निर्जायते मथ्यमानाद्  भूमिस्तोयं खन्यमाना ददाति ।

ENMSS@9960@2सोत्साहानां नास्त्यसाध्यं नराणां  मार्गारब्धाः सर्वयत्नाः फलन्ति ॥ ९९६०॥

ENMSS@9960A@1काष्ठाद्यथाग्निरुत्पन्नः स्वाश्रयं दहति क्षणात् ।

ENMSS@9960A@2क्रोधाग्निर्देहजस्तद्वत् तमेव दहति ध्रुवम् ॥

ENMSS@9961@1काष्ठानुषङ्गात् परिवर्धमाने  जाग्रत्प्रतापज्वलने त्वदीये ।

ENMSS@9961@2श्रीकार्तवीर्यं प्रसभं पतन्ति  प्रत्यर्थिपृथ्वीपतयः पतङ्गाः ॥ ९९६१॥

ENMSS@9962@1काष्ठेऽश्वकेशं संयम्य तत्र बद्ध्वा वराटिकाम् ।

ENMSS@9962@2हस्तेन भ्राम्यमाणां च यो हन्ति स धनुर्धरः ॥ ९९६२॥

ENMSS@9963@1का संबुद्धिः सुभट भवतो ब्रूहि पृच्छामि सम्यक्  प्रातः कीदृग् भवति विपिनं संप्रबुद्धैर्विहंगैः ।

ENMSS@9963@2लोकः कस्मिन् प्रथयति मुदं, का त्वदीया च जैत्री  प्रायो लोके स्थितमिह

सुखं जन्तुना कीदृशेन ॥ ९९६३॥

ENMSS@9964@1का संसृतिः किमपचारनिबन्धनेयं  कीदृग्विधस्य तव किं क्षतमेतयेति ।

ENMSS@9964@2प्रश्ने तु नास्मि कुशलः प्रतिवक्तुमेव  खेदस्तु मे जननि कोऽप्ययमेवमास्ते ॥ ९९६४॥

ENMSS@9964A@1कासश्वासज्वराजीर्णशोकतृष्णास्य पाकयुक् ।

ENMSS@9964A@2न च कुर्याच्छिरोनेत्रहृत्कर्णामयवानपि ॥

ENMSS@9965@1कासांचिद् धवलश्चिरं निवसतां वित्तेपरासां पुनर् नीलो वा कपिलोऽथवा वरवृषो रक्तोऽथवा मेचकः ।

ENMSS@9965@2ग्रामीणैरवधीरितोऽपि शिथिलस्कन्धोऽप्यनूर्ध्वश्रवाः स्वान्ते मे परतन्त्रतुन्दिलतनुर्जागर्त्ययं कर्बुरः ॥ ९९६५॥

ENMSS@9966@1॥। ॥। ॥। ॥। ॥। ॥। ॥

ENMSS@9966@2कासां हि नापदां हेतुरतिलोभान्धबुद्धिता ॥ ९९६६॥

ENMSS@9967@1कासारशोषिणि नवोदयमानमुग्ध- सद्वर्तिकानिवहदाहिनि दारुणेऽपि ।

ENMSS@9967@2मध्यन्दिनोष्णकिरणे प्रतिपन्नसख्य- स्मेरं सुखं जयति चित्रचरित्रमब्जम् ॥ ९९६७॥

ENMSS@9968@1कासारे पद्मिनीऽयं मुकुलयुगमनत्यन्तरं यत्र हृद्यम् यस्मिन् सद्यःसमुद्यद्ग्रहपतिकरजव्यापृतिः श्लाघनीया ।

ENMSS@9968@2तस्मादेतद् विशेषस्मृतिकलितमिह प्रेक्ष्य साक्षादुपेक्ष्यं वर्यं शौर्यंचनादौ न गमय समयं त्वं व्रजस्त्रीहितज्ञः ॥ ९९६८॥

ENMSS@9969@1कासारेऽपि पयः पिबन्ति पथिका न क्वापि वारि त्वयि क्षारत्वादुदधेः समुद्र इति ते नामैतदेवोचितम् ।

ENMSS@9969@2न त्वेतानि निरर्थकानि भवतो नामान्यनर्थान्तराण्यम्भोधिर्जलधिः पयोनिधिरुदधिर्वारांनिधिर्वारिधिः ॥ ९९६९॥

ENMSS@9970@1कासारे मदमत्तवारणगणैराकुम्भमग्नं पयः पीतं यत्प्रभवोरुवीचिवलनैर्व्याप्तं समस्तं जगत् ।

ENMSS@9970@2तस्मिन्नेव रवेः प्रचण्डकिरणश्रेणीनिपीताम्भसि प्राप्ताः पान्थनखंपचाः प्रतिपदं मध्यस्थलीभूमयः ॥ ९९७०॥

ENMSS@9971@1कासारेषु सरित्सु सिन्धुषु तथा नीचेषु नीरग्रहं धिक् तत्रापि शिरोनतिः

किमपरं हेयं भवेन् मानिनाम् ।

ENMSS@9971@2इत्यालोच्य विमुच्य चातकयुवा तेषु स्पृहामादराद् उद्ग्रीवस्तव वारिवाह

कुरुते धाराधरालोकनम् ॥ ९९७१॥

ENMSS@9971A@1कासार्यवर्य कलिताम्बुरुहावतंस मुक्तासमानजलबिन्दुतरङ्गरङ्ग ।

ENMSS@9971A@2किं भूषणं तव बकैर्बहुभिः कुरार्वैर् हंसैर्विना कलरवैर्नरदेवपूज्यैः ॥

ENMSS@9972@1कासि त्वं वद चौर्यकारिणि कुतः, कस्त्वं, पुरोयामिकः  किं ब्रूषे, मुषितौ सुवर्णकलशौ भूपस्य, केन, त्वया ।
ENMSS@9972@2कुत्र स्तः, प्रकटौ तवाश्चलतटे, कुत्रेति, तत्पश्यताम्  इत्युक्ते धृतवल्लवीकुचयुगस्त्वं पातु पीताम्बरः ॥ ९९७२॥
ENMSS@9973@1कासी विवर्जयेच्चौर्यं निद्रालुश्चर्मचौरिकाम् ।
ENMSS@9973@2जिह्वालौल्यं च रोगाढ्यो जीवितुं योऽत्र वाञ्छति ॥ ९९७३॥
ENMSS@9974@1कासे श्वासे तथा शोषे मन्दाग्नौ विषमज्वरे ।
ENMSS@9974@2प्रमेहे मूत्रकृच्छ्रे च सेवयेन्मधुपिप्पलीम् ॥ ९९७४॥
ENMSS@9975@1का स्त्री न प्रणयिवशा  का विलसितयो मनोभवविहीनाः ।
ENMSS@9975@2को धर्मो निरुपशमः  किं सौख्यं वल्लभेन रहितानाम् ॥ ९९७५॥
ENMSS@9976@1कास्विद् अवगुण्ठनवती  नातिपरिस्फुटशरीरलावण्या ।
ENMSS@9976@2मध्ये तपोधनानां  किसलयमिव पाण्डुपत्राणाम् ॥ ९९७६॥
ENMSS@9977@1काहमस्मि गुहा वक्ति प्रश्नेऽमुष्मिन् किमुत्तरम् ।
ENMSS@9977@2कथमुक्तं न जानासि कदर्थयसि यत् सखे ॥ ९९७७॥
ENMSS@9978@1काहर्निशमनुचिन्त्या  सम्सारासारता न तु प्रमदा ।
ENMSS@9978@2का प्रेयसी विधेया  करुणा दाक्षिण्यमथ मैत्री ॥ ९९७८॥
ENMSS@9979@1का हि तुलामधिरोहति  भुजगलतायाः प्रतानिनीष्वन्या ।
ENMSS@9979@2या खण्डितापि रदनैर् जनयति वदने विचक्षणां सुषमाम् ॥ ९९७९॥

Available from http://www.sub.uni-goettingen.de/ebene_1/fIndolo/gretiltm

# Document Info

| | |
|---|---|
| **Text title :** | mahaasubhaashhita sa.ngraha |
| **Author :** | |
| **Language :** | Sanskrit |
| **Category :** | subhAShita, pramukha |
| **Subject :** | literature |
| **Description/Comments :** | Wise sayings |
| **Transliterated by :** | Unknown. Available at |
| **Proofread by :** | Not done. |
| **Latest update :** | February 2, 2002 |

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

*Please help to maintain respect for volunteer spirit.*

msubhsall.pdf
was typeset on January 18, 2015 using XeLaTeX

Please send corrections to *sanskrit@cheerful.com*